
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

॥ अथ आयुर्वेदाब्धिसार[illegible]भः॥

॥ नत्वाप्य जगदुत्पत्तिस्थितिसंहारकारिणीं ॥ शरणागतदीनार्ति

गा १ गणेशमातरं शांतां दुर्गां प्रत्यूहनाशिनीं ॥ लिख्यते स्त्री पयोधा

चिकित्सितं ॥ २ तत्रादौ येन येन रोगाणां ज्ञानं स्यात् तत्तदाह ॥ हेतुस्तदनु

ः पूर्वरूपं च लक्षणं ॥ तथैवोपशयः पंचरोगविज्ञानहेतवः ॥ १ तत्र हेतोर्लक्ष

णमाह ॥ यत्तु न स्याद्विना येन तस्य तद्धेतुरुच्यते ॥ शास्त्रे संव्यवहाराय तत्पर्यायानप्र

चक्ष्महे ॥ २ निदानं कारणं हेतुर्निमित्तं च निबंधनं ॥ मूलमायतनं चासौ प्रत्ययोपि निग

द्यते ॥ ३ अथ संप्राप्तेर्लक्षणमाह ॥ यथा दुष्टेन दोषेण यथा चानुविसर्पता ॥ उत्पत्ति

रामयस्यासौ संप्राप्तिर्जातिरागतिः ॥ ४ यथा दुष्टेन यथाकारणभेदेन दुष्टेन ॥ यथा चा

नुविसर्पता अनेकधा दोषाणामूर्ध्वाधस्तिर्यगादिगतिभेदेन विसर्पणं तथा च वि ॥ १ ॥

घ

सर्वथा॥ दोषेणआमयस्ययाउत्पत्तिःअसौसंप्राप्तिः॥ एतामेवव्याहरायतत्पर्य्यायाना
ह॥ जातिरागतिरिति॥ संप्राप्तेरौपाधिकभेदानाह॥ संख्याविकल्पप्राधान्यबलकालवि
शेषतः॥ साभिद्यतेयथात्रैववक्ष्यंतेऽष्टौज्वराइति ४ संख्यादिरूपायेविशेषास्तेभ्यः॥ सा
संप्राप्तिर्भिद्यतेभेदवतीक्रीयतइत्यर्थः॥ तत्रसंख्यांविवृणोति॥ यथेत्यादि॥ ५ विकल्पं
विवृणोति॥ दोषाणांसमवेतानांविकल्पोंऽशांशकल्पनास्वातंत्र्यपारतंत्र्याभ्यांव्याधेः
प्राधान्यमादिशेत॥ ६॥ समवेतानांसमुदितानांदोषाणांअंशांशकल्पनाहीनमध्या
धिकभागभेदैर्भागकल्पनाविकल्पइतिप्राधान्यंविवृणोति॥ स्वातंत्र्येत्यादितावद्व्याधेः
स्वातंत्र्येणप्राधान्यंपारतंत्र्येणअप्राधान्यंचवदेदित्यर्थः॥ यथास्वतंत्रस्य(ज्व)रस्यप्रा
धान्यंज्वराधीनानांश्वासादीनामप्राधान्यमिति॥ ७॥ बलंविवृणोति॥ हेत्वादीकात्स्न्यै

२

वयवैर्वलावल विशेषणं नक्तं दिनर्तुभुक्तांशैर्व्याधिकालो यथामलं ॥ ७ ॥ अत्रापि व्याधेरि
त्यनुवर्तते हेत्वादेः हेतुपूर्वरूपरूपाणां कात्स्न्येन साकल्येन अवयवैरेकदेशेन च व्याधे
र्वलावलयोर्विशेषणं विशेषबोध ॥ इति कालं विवृणोति नक्तमित्यादिना ॥ नक्तमत्रा
व्ययं रात्रिवाचकं यथामलं यथादोषं एतेनैतदुक्तं भवति यस्मिन्नक्तादेरंशे यस्य दोष
स्य प्रकोप उक्तोस्ति सोंशस्तद्दोषजस्य व्याधेः कालः इत्यर्थः नक्तादेरंशेषु वातादिप्रको
प उक्तो वाग्भटेन ते व्यापिनोपि हृन्नाभ्योरधोमध्योर्ध्वसंश्रयाः वयो होरात्रिभुक्तानां
तेंतमध्यादिगाः क्रमादिति ते वातपित्तकफाः ऋतुषु वातादिकोपो यथाः ॥ वर्षासु शिशि
रे वायुः पित्तं शरदि उष्मके वसंते तु कफः कुप्यदेवाप्रकृतिरार्तवीति ॥ ७ ॥ अथ पूर्व
रूपस्य लक्षणमाह ॥ पूर्वरूपं तु त[धे]नविधा ज्ञायिनमामयं सामान्यं च विशिष्टं च द्वि ॥ २

विधं तदुदाहृतं ॥ ७ ॥ सामान्यं तत्र दोषाणां विशेषैरनधिष्ठितं विशिष्टमीषद्व्यक्तं स्यादि-
शेषैस्समन्वितं ॥ ८ ॥ दोषाणां विशेषाजं भाति श्रायै नेत्रदाहाग्निमांद्यादयः ॥ ९ ॥ अथ
लक्षणस्य लक्षणमाह ॥ पूर्वरूपं विशिष्टं यद्व्यक्तं लक्षणं स्मृतं संस्थानं लिंगं चिन्हं च
व्यंजनं रूपमाकृतिः ॥ १० ॥ विशिष्टं ईषद्व्यक्तं यत्पूर्वरूपं तदेव सम्यक्व्यक्तं सत् लक्ष-
णं स्मृतमिति तस्य शास्त्रे व्यवहाराय पर्यायानाह संस्थानमित्यादि ॥ १० ॥ अथोप-
शयस्य लक्षणमाह हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणां औषधान्नविहा-
राणामुपयोगं सुखावहं ॥ ११ ॥ विद्यादुपशयं व्याधेः स हि सात्म्यमिति स्मृतः विपरी-
तोनुपशयो व्याध्यसात्म्यमिति स्मृतः ॥ १२ ॥ अनयोरयमर्थः ॥ हेतुर्बाह्याभ्यंतरश्च ।
व्याधिर्ज्वरादिः एतयोर्हेतुव्याध्योः व्यस्तसमस्तयोः विपर्यस्ताः विपरीताः ॥ एतयो

२

रेव व्यस्तसमस्तयोर्विपर्यस्तार्थकारिणः निदाने समानधर्मिणो विषमभावाद्रोगप्रशमकारिणः
एवंविधाये औषधान्नविहाराः ॥ भेषजाहाराचारास्तेषामुपयोगं आचरणं सुखावह
हं ॥ सुखकरं उपशयं विंद्यात् ॥ उपशयाख्यं जानीयात् हेतुविपरीतानां व्याधिविपरी
तानां हेतु ॥ व्याधिविपरीतानां हेतुविपरीतार्थकारिणां व्याधिविपरीतार्थकारिणां हे
तु व्याधिविपरीतार्थकारिणां च औषधान्नविहाराणां यः सुखावहः ॥ उपयोगः स उ
पशयः इति पिंडार्थः ॥ सुखावहमिति सर्वं रोगनिवृत्तिलक्षणं तदावहति सम्यगाप
त्याऽनुबंधेन च करोतीति सुखावहस्तं ॥ एतेन सदातुरस्य नवज्वरिणः शीतजलपाने
तत्कालसुखकरमपि नोपशयः ॥ इति तात्पर्यार्थः ॥ तस्मादौषधादिजनितसुखानुबंध
उपशय इति लक्षणं ॥ अथ क्रमेणैषामुदाहरणानि तत्र हेतुविपरीतमौषधं यथा ॥

॥ ३ ॥

शीतहेतुकेकफज्वरेशुंठ्याद्युष्णंभेषजं ॥ हेतुविपरीतमन्नंयथा ॥ श्रमानिलजेरसौदनंहेतु
विपरीतोविहारोयथादिवास्वप्नोत्थेकफेरात्रौजागरणं ॥ अथव्याधिविपरीतमौषधंयथा
अतिसारेस्तंभनंपाठादिव्याधिविपरीतमन्नंयथा ॥ अतिसारेस्तंभनंमसूरादि ॥ व्याधिवि
परीतोविहारोयथा ॥ उदावर्तेप्रवाहणं ॥ प्रवाहणंनामसशब्दहल्कंठबलेनवायोरूर्ध्वा-
धोगमनंमंत्रौषधादिधारणंवस्तुपहारतियमप्रायश्चित्तहोमदेवगुरुशुश्रूषादयोव्या
धिव्याधिविपरीतविहाराइतिवाग्भटः ॥ अथहेतुव्याधिविपरीतमौषधंयथा ॥ वातशो
फेदशमूलंवातहरंशोथहरंच ॥ हेतुव्याधिविपरीतमन्नंयथा ॥ वातकफग्रहण्यांतक्रंवा
तकफहरंग्रहणीहरंच ॥ हेतुव्याधिविपरीतोविहारोयथा ॥ स्निग्धदिवास्वप्नजायांतंद्रायां
रूक्षंतंद्राविपरीतंचरात्रौजागरणमिति ॥ अथहेतुविपरीतार्थकारिऔषधंयथा ॥ छ

यथा वमनकरं मदनफलादि प्रदिष्टं यथा बहुदोषजायां संशमनायोग्यायां वमनं न क्रियते त
हि विकारानुवृत्ति रोगानुच्छेदो वा न स्यात् ॥ अतो वमनं प्रयुक्तं दोषप्रत्यनीकमेव भवतीति ॥
तदुक्तं सुश्रुते छर्दिषु बहुदोषासु छर्दनं हितमुच्यते ॥ इति ॥ एवमग्नौ प्लुष्टे उष्णक्रिया तथा जंग
म विषे ऊर्ध्वस्थे रूपे मौलिकविषं ॥ अधोगस्वरूपं हेतुविपरीतमेव यदुक्तं चरके विषं विषघ्न
मुक्तं यत् ॥ तत्प्रभावप्रभावितमिति ॥ विषत्वाविशेषेऽपि कुतो गतिभेदः ॥ इत्यत आह तत्प्रभाव
प्रभावितमिति ॥ तथा मद्यकृतमदात्यये पत्यं मद्यं तदपि मातुलिंगचुक्रादियुक्तं ॥ अथवा वा
तमदात्यये रूक्षमाध्वीकादिजनिते स्निग्धपैष्टीकादिमद्यं प्रयुज्यमानं हेतुविपरीतमेव प
थ्योक्तं सुश्रुते ॥ यथा नरेंद्रोपहतस्य कस्यचित् भवेत्प्रसादस्तत एव नान्यतः ॥ इति हेतुविप
रीतार्थकारि अन्नं यथा ॥ पच्यमानव्रणशोफे अन्नं विदाहि हेतुविपरीतार्थकारि विहारो

यथा वातोन्मादे त्रासनं । अथ व्याधिविपरीतार्थकारी औषधं यथा । पित्तप्रधाने पच्यमाने व्र
णशोथे पित्तकर उष्ण उपनाहः व्याधिविपरीतार्थकारी अन्नं यथा । अतीसारे विरेककृत्
क्षीरं व्याधिविपरीतार्थकारी विहारो यथा । छर्द्यां वमनार्थं प्रवाहणं । अथ हेतुव्याधिविपरी
तार्थकारी औषधं यथा । अग्निप्लुष्टे उष्णागर्वादिलेपः । विषे वा विषं हेतुव्याधिविपरीता
र्थकारी अन्नं यथा । मद्यपानोत्थे मदात्यये मदकारकं मद्यं हेतुव्याधिविपरीतार्थकारी विहा
रो यथा । व्यायामजनितसंमूढवाते जलप्रतरणरूपो व्यायाम इति एवमपरेऽपि बोद्धव्या । औ
षधान्नविहाररूपाणि उपलक्षणं तेन देशकालावपि बोद्धव्यौ । तस्य पर्यायमाह व्याधेः
स हि सात्म्यमिति सात्म्यत इति सः उपशयः व्याधेः रोगस्य सात्म्यमिति सात्म्यतः व्याधिसात्म्या
संज्ञक इत्यर्थः हि शब्दः पादपूरणे उपशयः कथं न प्रस्तावादतु उपशयोऽपि वाच्यः । इत्याह वि

परीतो[नु]पशय इति औषधादीनां दुखकरस्तु उपयोग अनुपशय इत्यर्थः ॥ तस्य पर्य्यायमाह ॥

॥५॥ व्याध्यसात्म्यमिति स्मृतः ॥ इति व्याधिग्रहणेन दोषोपियोध्यव्य नन्वनुपशयो व्याधिविशे

षं प्रतिपादयति नवा नेति चेल्लिदाने तदुपन्यासो व्यर्थः ॥ प्रतिपादयति चेत्वं च रोगविज्ञाने हे

तव इति व्याहन्येत तस्य षष्ठत्वापत्ते मैवं प्रतिपादयत्येव यथाह चरकः ॥ गूढलिंगं व्याधिमुप

शयानुपशयाभ्यां परीक्षेतेति किंतु निदाने तस्यांतरभावः दोषस्य रोगस्य वा वेदकत्वात हे

त्वादयो व्याधेस्तीनापहेतवो यथा तत्रहेतो रुदाहरणम् ॥ वर्षाहिक्षस्रपहिमानशनातिमै

थुनशोकचिंताभयादयो वातप्रकोपहेतवो वातव्याधीन्योधयन्ति क्षारकट्वम्लोष्णतीक्ष्ण

भिघा क्रोधतपाक्षुधातातपादयः पित्तप्रकोपहेतवो पित्तव्याधीन्योधयंति यसंतगुरुमधुरशी

तस्निग्धदुग्धदधिदिननिद्रादयश्श्लेष्मप्रकोपहेतवः श्लेष्मव्याधीन्योधयंति ॥ अपसं ॥५॥

प्राप्तेरुदाहरणम् ॥ मिथ्याहारविहारकुपितवातादयामाशयगमनरसदूषणकोष्ठाग्निर्बहि
र्निरसनरूपं ज्वरोत्पत्तिप्रकारं बोधयति ॥ तथा व्याधीनां संख्यादोषांशकल्पनाप्राधान्यब
लकालांश्च बोधयति तेषु ज्ञातेषु चिकित्साविशेषश्च स्यादिति ॥ अथ पूर्वरूपस्योदाहरणं
श्रमादयो भाविनं ज्वरं बोधयंति ॥ अथ च त एव श्रमादयोतिरूपितं भावुक्तं भाविनं वात
ज्वरं त एव दाहयुक्ता भाविनं पित्तज्वरं वन्हिमांद्ययुक्ता भाविनं श्लेष्मज्वरं बोधयंतीति ॥ अथ त
ल्लक्षणस्योदाहरणं ॥ स्वेदावरोधः संतापः सर्वांगग्रहणमिति युगपदेतल्लक्षणं ज्वरं बोधयती
ति ॥ अथोपशयस्योदाहरणं ॥ तथा च चरकः ॥ गूढलिंगं संकीर्णलक्षणं च व्याधिमुपशया
नुपशयाभ्यां परीक्षेतेति तथा च सुश्रुते ॥ अभ्यंगस्वेदनस्नेहैर्विकारो यातिकोनपः शाम्येत्त
त्र तु विज्ञेयं रक्तमत्रास्ति दूषितमिति ॥ एवं पंचापि रोगविज्ञाने हेतवो भवंतीति तत्र वातस्यो

दी

पशयो यथा मधुरलवणाम्लस्निग्धनस्योष्णनिद्राग्रहविकरवस्तिस्वेदसंमर्दनानि दहन
ज्वलदरोषाभ्यंगसंतर्पणानि प्रकुपितपवमानं शमं तमेतानि कुर्युः पित्तस्योपशयो यथा तिक्त
स्वादुकषायशीतपवनछायातीष्णवीजनज्योत्स्नाभूगृहयंत्रवारिजलजस्त्रीगात्रसंस्पर्श
नं सर्पिः क्षीरविरेकसेकरुधिरस्त्रावप्रदेहादिकं पानाहारविहारभेषजमिदं पित्तं प्रशमं गतिं न
येत् कफस्योपशयो यथा रूक्षक्षाराकषायतिक्तकटुकव्यायामनिष्ठीवनं धूमोष्णानलघर्म
नस्यवमनलेहोपवासादिकं तृड्घाताध्वनिप्रजागरजलक्रीडांगनासेवनं पानाहारवि
हारभेषजमिदं श्लेष्मामयान् संहरेत् इति ॥११॥१२ किंच द्विविधं रोगस्य कारणं विप्रकृष्टं स
न्निकृष्टं च विप्रकृष्टं आहारादि संनिकृष्टं वातादि तत्र सन्निकृष्टकारणभूतस्य वाता
देः सर्वरोगेष्वव्यभिचरितं कारणत्वमाह सर्वेषामेव रोगाणां निदानं कुपिता मलाः त

दी

त्प्रकोपस्यतु प्रोक्तं विविधाहितसेवनं ॥ १२ ॥ सर्वेषां रोगाणां निदानं सन्निकृष्टकारणं कुपि
ताः स्वहेतुदुष्टाः मलाः वातपित्तकफा एवेत्यन्वयः । तथा च वाग्भटः । दोषा एव हि सर्वेषां रो
गाणामेककारणमिति । नन्वागंतुजव्याधिषु व्यभिचारः स्यात् तन्न तत्राप्युत्पन्नेनंतरं दोष
प्रकोपस्यावश्यंभावित्वात् । उत्पन्नद्रव्ये गुणारंभयोगस्येव । उक्तं च चरके आगंतुर्हि व्यथापू
र्वं जायते पश्चाल्लिजैर्दोषैरनुबध्यत इति तत्प्रकोपस्यतु दोषप्रकोपस्यतु निदानं विविधा
हितसेवनं विविधविधानि नानाविधानी पात्यहितानी । असात्म्यान्याहारविहारादिनि तेषां
सेवनं ॥ १३ ॥ ननु सर्वेषां रोगाणां निदानं दुष्टा दोषा एव किमन्यमस्तीति प्रांसये चरकवचनमु
पन्यस्यति निदानार्थकरो रोगो रोगस्याप्युपलक्ष्यते तद्यथा । ज्वरसंतापाद्रक्तपित्तमुदीर्यते
रक्तपित्ताज्ज्वरस्ताभ्यां श्वासश्चाप्युपजायते प्लीहाभिवृद्ध्या जठरं जठराच्छोफ एव ॥ १५ ॥ अ

॥ ७ ॥

शोफो जाठरं दुर्वेगुल्मश्चाप्युपजायते प्रतिश्यायाद्थो कासः कासात्संजायते क्षयः ॥ क्षयो रोगस्य
हेतुत्वे शोषश्चाप्युपजायते ॥ १६ ॥ रोगस्य निदानार्थकरः निदानं रोगो ह्युपलक्ष्यते दृश्यते ॥ अत्र
दृष्टांतमाह ॥ तद्यथा ज्वरसंतापादित्यादि शोषश्चाप्युपजायते इत्यंते गूं येन ताभ्यां रक्तपित्तज्वरा
भ्यां गुल्मश्चाप्युपजायत इत्यर्थो भिप्र एवकासात्संजायते क्षयः ॥ इति ओजः प्रभृतीनां मिति शो
षः ॥ क्षयो राजयक्ष्मा उरोगः उरः क्षतं समहारद्वंद्वे नैकवचनं तस्य हेतुत्वे शोषो धातुक्षय उप
जायत इति ॥ १४॥१५॥१६ ॥ रोगहेतो रोगस्य वैचित्र्यमाह ॥ कश्चिद्धि रोगो रोगस्य हेतुर्भूत्वा प्रशाम्य
ति न प्रशाम्यति चाप्यन्यो हेतुत्वं कुरुतेपि च ॥ १७ ॥ हेतुर्निदानं यथा ज्वरो रक्तपित्तमुत्पाद्य स्वयं
प्रशाम्यतीति ॥ ननु येन दोषेण ज्वरो रक्तपित्तमुत्पादितवान् तस्मिन्सति कथं शाम्यतीति ॥
उच्यते तत्र व्याधिस्वभाव एवकारणमिति न दोषः ॥ अन्यो हेतुत्वमपि कुरुते स्वयं च न प्रशा ॥ ७ ॥

शाम्यति न निवर्तत इति ॥ यथा प्रतिश्यायः कासं करोति स्वयं च न प्रशाम्यति ॥ तथाऽसौ जठरगुल्मौ
करोति स्वयं च न निवर्तत इत्यर्थः ॥ १७ ॥ उक्तहेतुपंचकस्य रोगनिवृतिसिद्धिहेतुत्वे सर्वत्र प्रसक्ता
तव्यतामाह ॥ तस्माद्यत्नेन सद्वैद्यैरिच्छद्भिः सिद्धिमुत्तमां । ज्ञातव्या हेतवः पूर्वं ज्वरादीनामशेष
तः ॥ १८ ॥ सद्वैद्यैः शास्त्रे कर्मणि च कुशलैर्भिषग्भिः ॥ अथ सर्वरोगप्रधानत्वात् प्रथमं ज्वरो वाच्यः प्रा
धान्यं चास्य सर्वशरीररोगेषु प्रथमोत्पन्नत्वात् ॥ यदुक्तं चरके देहेन्द्रियमनस्तापी सर्वरोगाग्र
जो बली ज्वरः प्रधानो रोगाणामुक्तो भगवता पुरेति ॥ तत्र तस्य प्रथममुत्पत्तिमाह ॥ दक्षापमान
संक्रुद्धरुद्रनिश्वाससंभवः ज्वरोऽष्टधा पृथग्द्वंद्वसंघातागंतुजः स्मृतः ॥ १ ॥ दक्षकर्तृकोऽपमा
नस्तेन संक्रुद्धो यो रुद्रस्तस्य यो निश्वासस्तस्मात्संभवः उत्पत्तिर्यस्य स ज्वरः क्रुद्धरुद्रनिश्वास
संभूतत्वेन ज्वरः स्वभावादाग्नेय इति कश्चिद् बोध्यते ॥ यदुक्तं चरके क्रोधात्पित्तमित्यादि तेन सर्वज्व

॥८॥

रेषु पित्तोपक्रमनकारिणी चिकित्सा कर्तव्येत्यर्थः ॥ यदुक्तं वाग्भटेन ॥ उष्मा पित्ताद्दृते नास्ति ज्व
रो नास्त्यूष्मणा विना तस्मात्पित्तविरुद्धानि त्यजेत्पित्ताधिके ऽधिकमिति रुद्रसंभूतत्वेन ज्व
रस्य देवतात्मकत्वात्तत्पूजार्हत्वं चोपदर्शित ॥ मतरो वा विष्णुर्ज्वरः संपूजनैः वीपि सहसैवो
पशमं यतीति मूर्तिरस्य स्वोक्ता सुश्रुतेन रुद्रकोपाग्निसंभूतः सर्वभूतप्रतापनः त्रिपाद्भ
स्मप्रहरणः त्रिशिरास्तु महोदरः वैयाघ्रचर्मवसनः कपिलोज्ज्वलविग्रहः पिंगेक्षणो ह्रस्व
जंघो घोरो भीमस्तोवस्यानलं पुरुषो लोकनाशाय भीमसौ ज्वर इति स्मृतः ॥ जन्मादौ निधने चैव प्रा
यो विशति देहिनां स्मृते देवमनुष्याभ्यां नान्यो विषहते हितमिति यथाह रविर्ण्यो ज्वरस्त्रिपा
दस्त्रिशिराः षड्भस्मप्रहरणः ॥ बुधं तस्य ज्वरस्य संख्यारूपां संप्राप्तिमाह ॥ ज्वरो ऽष्टधेति विव
रणोति पृथग्द्वित्यादि वातिकः पैत्तिकः श्लैष्मिकश्चेति त्रयः वातपैत्तिकः वातश्लैष्मिकः

दे

॥८॥

पित्तश्लैष्मिकश्चेति द्वंद्वजास्त्रयः संघातजः सन्निपातिकः स तु एकः यद्यपि वृद्धैर्दोषैः सन्नि
पातास्त्रयोदश | यदुक्तं चरके | द्व्युल्वणैकोल्वणैः षट्स्युर्हीनमध्याधिकैश्च षट् | समैश्चैको।
विकारास्ते संनिपातास्त्रयोदशेति | अस्यायमर्थः | वातोल्वणः पित्तोल्वणः कफोल्वणः वा
तपित्तोल्वणः वातश्लेष्मोल्वणः पित्तश्लेष्मोल्वणः | एवं षट् | अधिकवातो मध्यपित्तो हीन
कफः अधिकवातो मध्यकफो हीनपीतः | अधिकपित्तो मध्यवातो हीनकफः अधिकपि
त्तो मध्यकफो हीनवातः | अधिककफो मध्यवातो हीनपितः | अधिककफो मध्यपितो ही
नवातश्चेति षट् तुल्यण एकः एवं त्रयोदशेति तथाप्यत्र त्रिदोषजत्वेन साम्यात् सान्निपा
तिक एक एवं गणितः | आगंतुज इति | अथागंतुकाद्वेनाभिघातादयो हेतव उच्यंते कुत्रा
पि व्याधयश्च कार्यकारणयोरभेदोपचारात् | आगंतुजा अभिघातोद्यतेककारणयोगा

दनेकेभवंति ॥ तथाप्यागंतुजत्वेन साम्यात् ॥ आगंतुजोप्यैकैकलक्षणितः नन्वागंतुजे पित्तज्वरे वाता
दिलक्षणदर्शनादागंतुजः कथं दोषजाद्भिन्नः ॥ उच्यते ॥ उत्तरकालं दोषोप्रते: ॥ यदुक्तं ॥ आगं
तुरन्वेति निजं विकारं निजस्तथागंतुमतिप्रवृद्धमिति ॥ १ ॥ अथ ज्वरस्य विप्रकृष्टकारण
कथनपूर्विकां संप्राप्तिमाह ॥ मिथ्याहारविहाराभ्यां दोषा ह्यामाशयाश्रयाः ॥ बहिर्निरस्य
कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ॥ २ ॥ मिथ्याहारविहाराभ्यां अनुचिताहारचेष्टाभ्यां हेतुभूता
भ्यां दोषा वातपित्तकफाः ॥ आमाशयाश्रयाः आमाशयगताः ॥ आमाशयस्तु नाभिस्तना
तरंजेतोरामाशय इति स्मृत ॥ इति चरकोक्तः ॥ रसानुगाः रसदूषकाः ॥ बहिर्निरस्य कोष्ठाग्नि
मिति कोष्ठगताग्नेरुष्माणं बहिः प्रक्षिप्य ॥ न तु समस्तमग्निं ॥ तद्दोषपाकासंभवः स्या
त् ॥ ज्वरदाः स्फः ज्वरकारिणो भवेयुरित्यर्थः ॥ २ ॥ अथ ज्वरस्य सामान्यं विशिष्टं पूर्वरूप

माह ॥ श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः ॥ इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ॥ ३ ॥ जं-
भांगमर्दो गुरुत्वं रोमहर्षोऽरुचिस्तमः ॥ अप्रहर्षश्च शीतं च भवत्युत्पत्स्यति ज्वरे ॥ ४ ॥ सामान्य-
तो विशेषात्तु जृंभात्यर्थं समीरणात् ॥ पित्तान्नयनयोर्दाहः कफान्नान्नाभिनंदनं ॥ ५ ॥ श्रमो व्या-
पारं विनैव ॥ अरतिः अनवस्थितचित्तत्वं विवर्णत्वं म्लानगात्रता वैरस्यं मुखस्य विरुद्धर-
सता ॥ नयनप्लवः अश्रुपूर्णनेत्रत्वं ॥ यदुक्तं चरके ॥ गौरवं नयने साश्रु इत्यादि ॥ शीतवातात-
पादिषु मुहुरिच्छाद्वेषौ ॥ आदिशब्दाज्ज्वलने जले च ॥ यदुक्तं चरके ॥ ज्वलनातपवाय्वंबुभक्त-
द्वेषावनिश्चिताविति ॥ आदिशब्दाद्व्यजनादि लिख्यते ॥ अंगमर्दो गमोटनं ॥ गुरुत्वं गात्रस्य
रोमहर्षो रोमांचः ॥ अरुचिर्भोज्ये ॥ तमोंधकारप्रविष्टस्येवाज्ञानं ॥ अप्रहर्षो हर्षाभावः ॥ शीतं शी-
तं तगाति ज्वलने छया शीते सद्वेषशीतं चेति वचनं विशेषेण शीतयोर्धतार्थं ॥ चकारादाल-

३०

हितोपदेशाद्वेषादयो भवंति ॥ तृतीयश्लोकस्थं सामान्यतः इति पदं पूर्वश्लोकाभ्यां संबंधनीयं ॥
तेन सामान्यतो ज्वरे उत्पत्स्यति भविष्यति श्रमादयः पूर्वमेव भवंतीत्यर्थः ॥ विशेषात्तु उच्यते
समीरणाज्ज्वरे उत्पत्स्यति अत्यर्थं मतिशयेन जृंभा भवति ॥ पित्ताज्ज्वरे उत्पत्स्यति अत्यर्थं न
यनयोर्दाहो भवति ॥ कफाज्ज्वरे उत्पत्स्यति अत्यर्थं मन्नाभिनंदनमन्नाभिकांक्षा न भवति ॥
जृंभाद्यो पि श्रमपूर्वा भवंति ॥ यतः सामान्यधर्माक्रांतो विशिष्टो धर्मो भवतीति ॥३॥४॥५॥
अथ द्वंद्वजत्रिदोषजपूर्वरूपमाह ॥ रूपैरन्यतराभ्यां तु संसृष्टैर्द्वंद्वजं विदुः ॥ सर्वलिंगसमावा
यः सर्वदोषभवे ज्वरे ॥६॥ अन्यतराभ्यां जृंभानेत्रदाहाभ्यां जृंभान्नारुचिभ्यां नेत्रदाहान्नारु
चिभ्यां वा संसृष्टैः रूपैः श्रमादिभिः द्वंद्वजं द्विदोषजं पूर्वरूपं विदुः जानीयुः ॥ सर्वलिंग
समावाय इति अतिशयितजृंभानेत्रदाहान्नारुचिसहितानां श्रमादीनां समावायो भ

१०

र्वतीत्यर्थः ॥ ६ ॥ अथ ज्वरस्य सामान्यं लक्षणमाह ॥ स्वेदावरोधः संतापः सर्वांगग्रहणं तथा
युगपद्यत्र रोगे तु स ज्वरः परिकीर्तितः ॥ ७ ॥ स्वेदावरोधः प्रस्वेदानिर्गमः नतु पित्तज्वरे स्वेद
निर्गमादेतल्लक्षणं व्यभिचरति उच्यते तत्रोत्सर्गापवादभावादिति जेज्जटकार्तिकुंडाद
यः समादधुः अन्ये तु स्विद्यते नेनेति स्वेदोग्निस्तस्यावरोधो दोषैराछन्नता संतापस्त्व
त्रतापः इति वक्तव्ये संतापाभिधानं देहेंद्रियमनसां संतापबोधनार्थं यतउक्तं चरके ज्वर
विशेषणं देहेंद्रियमनस्तापीति तत्र देहसंतापो देहोष्मता इंद्रियसंतापो इंद्रियवैकृत्यं
यतउक्तं इंद्रियाणां तु वैकृत्यं ज्ञेयं संतापलक्षणं वैचित्यमरतिग्लानिर्मनः संतापल
क्षणमिति सर्वांगग्रहणं सर्वेषामंगानां वेदनया ग्रहणं सर्वाण्यंगानि स्तंभेन गृहीता
नीव भवंति युगपदिति मिलितमेतल्लक्षणं प्रत्येकशो व्यभिचारात् तथा स्वेदाव

॥ ११ ॥

रोधः कुष्ठस्य पूर्वरूपे । तथा संतापो दाहाख्ये रोगे । सर्वांगग्रहणं सर्वांगाख्यवातव्याधावि-
ति ७ प्रस्वेदानिर्गमपक्षे कारणमाह रसेत्यादि चाप्यं धातुं नयस्मात्तस्माज्ज्वरातुरः भव-
त्यत एव स्तब्धगात्रश्च स्विद्यते तेन च सर्वशः । यस्माज्ज्वरः आप्यं धातुं रसधातुं नयत्यादि तस्मा-
द्धेतोः ज्वरातुरो स्तब्धगात्रो भवति न सर्वशः स्विद्यते च ८ यतो वातपित्तकफानां यथापू-
र्वं भूरि दारुणविकारकारकत्वेन प्राधान्यं यदुक्तं अशीतिर्वातविकाराश्चत्वारिंशत्पि-
त्तविकाराविंशतिः श्लेष्मविकारा इति तथा दारुणाश्च वातविकाराः आक्षेपकपक्षाघाता-
दयः अतः प्राधान्यात्प्रथमं वातज्वरकथनं एवमन्यत्रापि वातादिक्रमनिर्देशो बोद्धव्यं
तत्र वातज्वरस्य विप्रकृष्टसंनिकृष्टकारणकथनपूर्विकां संप्राप्तिमाह वातलाहारचे-
ष्टाभिर्वायुरामाशयाश्रयः । बहिर्निरस्य कोष्ठाग्निं ज्वरकृत्स्याद्रसानुगः ९ रसानुगः ॥ ११ ॥

रसद्रवकः अस्यपूर्वरूपंतुजृंभात्यर्थंसमीरणादित्यनेनपूर्वमुक्तमेव ९ अथवातज्वरस्यल
क्षणमाह वेपथुर्विषमोवेगःकंठोष्ठमुखशोषणं निद्रानाशःक्षवस्तंभोगात्राणांरौक्ष्य
मेवच १० शिरोहृद्गात्ररुग्वक्त्रवैरस्यंगाढविड्भृता शूलाध्मानेजृंभणंचभवंत्यनिलजेज्व
रे ११ विषमोवेगइतिवेगोज्वरस्यवृद्धिःप्रवृत्तिर्यातस्यवैषम्यंमनियतकालत्वंआगमस्य
चौत्स्याद्यनियतत्वं क्षवस्तंभःछिक्कायाअभावः यदाहवाग्भटः हर्षोरोमांगदंतेषुवेपथुः
क्षवथोर्ग्रहइति चरकोपि क्षवथूद्गारनिग्रहइति शिरोहृद्गात्ररुगिति गात्रग्रहणेनै
वशिरोग्रहणेसिद्धेतदभिधानंविशेषेणशिरसिवेदनार्थं आध्मानंवायुनासवेदनमु
दरपूरणं एतानिलक्षणानिप्रायोभावित्वेनसुश्रुतेननिर्दिष्टानि यकारादन्यान्यपि
चरकनिदानेमुक्तकेनोक्तानियोद्धव्यानि तान्येवसार्द्धश्लोकाभ्यांप्रदर्श्यंते भवंतिवि

विधावाता वेदना पादसुप्तता पिंडिकोद्वेष्टनं कर्णस्वनो वक्त्रकषायता उरसादो हनुस्तंभो
विश्लेषः संधिजानुनोः शुष्ककासोवमिर्नैर्मिदंतहर्षः श्रमभ्रमौ अरत्यंनेत्रमूत्रादि
तद्रूपस्तापोस्मकामितेतिः १०॥११ अथपित्तज्वरकथनं तत्रपित्तज्वरस्यविप्रकृष्टस
न्निकृष्टकारणकथनपूर्विकांसंप्राप्तिमाह पित्तलाहारचेष्टाभ्यांपित्तमामाशयाश्र
यं वह्निर्निरस्यकोष्ठाग्निंज्वरकृत्स्याद्रसानुगं १२ रसानुगं रसद्रवकं यतोपित्तस्यपं
गुत्वात्तेनकोष्ठाग्नेरूष्मावहिर्नेतुंनशक्यते यतआह पित्तंपंगुकफःपंगुःपंगवोमल
धातवः वायुनायत्रनीयंतेतत्रगच्छंतिमेघवदिति ततोत्रपित्तंवायुसहायमेवबोद्धव्यं
यतआह द्रव्यमेकरसंनास्तिनरोगोप्येकदोषजः एकस्तुकुपितोदोषइतराननपिकोप
येदिति अस्यतुपूर्वरूपंपितान्नयतयोदीहइत्यनेनपूर्वमुक्तमेव १२ अथपित्तज्व

रस्य लक्षणमाह वेगस्तीक्ष्णोतिसारश्च निद्राल्पत्वं तथा वमिः कंठोष्ठमुखनासानां पाकः
स्वेदश्च जायते १३ प्रलापो वक्त्रकटुता मूर्छा दाहो मदस्तृषा पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्र
म एव च १४ अतिसारः पित्तस्य सरत्वात्सद्रवात्प्रवृत्तिः न त्वतिसार एव तस्य ज्वरोपद्र
वत्वात् निद्राल्पसंख्यस्य निद्राल्पत्वं वमिश्च यदा पित्तं कफस्थानं याति तदा वोद्धव्या स्वे
दो घर्मागमनं प्रायेण सामदोषेण स्रोतसां निरोधात् सर्वज्वरेषु घर्मनिरोधः अत्र तु
पित्तस्य तैक्ष्ण्यात् ज्वरप्रभावाच्च स न भवतीति प्रलापः अनर्थकं वचः वक्त्रकटुता मुखति
क्तत्वं मूर्छा रूपादेरपरिज्ञानं मदः पूगकोद्रवधत्तूरभक्षणादिव मत्तता भ्रमश्चक्रस्थि
तस्येव संभ्रमदृश्यदर्शनं ननु भ्रमस्य अपीति वातविकारमध्ये पठितत्वात्कथं पित्तवि
कारमध्ये पाठः उच्यते न रोगोप्येकदोषज इति वचनात्पैत्तिकेपि वातानुबंधाद्भ्रमः इति

१३

नेऽज्वरः ॥ अथवा दोषदूष्यसंमूर्छितस्वभावात्कारणदृष्टस्यापि हेतुस्यकार्य्यउपलंभः कफ
वातातीसारादाविवाहरणत्वं हरिद्राचूर्णसंयोगादिवल्लौहित्यं तं यदुक्तं सुश्रुते रजःपि
तानिलाद्भ्रम इति ॥ तत्रापि वातानुगतपित्तजत्वमेव बोधव्यं ॥ अन्यथाभ्रमस्य वातविका
रत्वमेव न स्यादिति ॥ अन्ये तु पित्तदूषितनेत्रत्वे न विपर्य्यासंज्ञानं भ्रमः पितः स्वेदः इत्या
दिवदित्याहुः ॥ चकाराच्छीतेच्छारुचिस्फोटादयो बोद्धव्याः ॥ १३॥१४ अथ श्लेष्मज्वरल
क्षणं ॥ तत्र श्लेष्मज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां संप्राप्तिमाह श्लेष्म
लाहारचेष्टाभ्यां कफ आमाशयाश्रयः ॥ वहिर्निरस्य कोष्ठाग्निं ज्वरकृत्स्याद्रसानुगः ॥
१५ ॥ रसानुगः रसदूषकः कफस्य कोष्ठाग्नितेजसो वहिर्नयनेयंमृत्वशंकायां जातायां
पित्तस्यैवसिद्धांतो बोद्धव्यः ॥ अस्य पूर्वहेतुं तु कफान्नान्नाभिनंदनमित्य नेन पूर्वम्

१३

त्क्रमेण ॥ १५ ॥ अथ श्लेष्मज्वरस्य लक्षणमाह ॥ स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता
शुक्लमूत्रपुरीषत्वं स्तंभस्तृप्तिरथापि च ॥ १६ ॥ गौरवं शीतमुत्क्लेदो रोमहर्षोतिनिद्रता प्रति
श्यायो रुचिः कासः कफजेक्ष्णोश्च शुक्लता ॥ १७ ॥ स्तैमित्यमंगानामार्द्रपटावगुंठितत्वमि
व स्तिमितो वेगः ज्वरस्य मंदवेगः आलस्यं समर्थस्यापि कर्मण्यनुत्साहः स्तंभः अं
गादीनामनम्रता तृप्तिः अन्नाभिलाषे सत्यपि भोजनासामर्थ्यं गौरवं गात्राणां उत्क्लेदः
वमनोपस्थितिरिव अतिनिद्रता निद्राधिक्यं प्रतिश्यायः नासारोगविशेषः अरु
चिः भोजनानिच्छा चकारात्पिठिकाः शीतमुखप्रसेकः छर्दिः संद्रा हृदयोपलेपश्लेष्मो
भिलाषो वह्निमांद्यमिति ॥ १६ ॥ १७ ॥ अथ द्वंद्वज्वरकथनं तत्र वातपित्तज्वरस्य वि
प्रकृष्टसन्निकृष्टकारणकथनपूर्विकां संप्राप्तिमाह ॥ वातपित्तकैर्वातपित्तआ

माशयाश्रये वह्निर्निरस्यकोष्ठाग्निं रसगौ ज्वरकारिणौ १७ वातपित्तकरैराहारादिभिः
३४ ज्वरकारिणौ स्यातामिति शेषः १८ अथ तस्य पूर्वरूपं लक्षणं चाह प्राग्रूपे वातपि
त्तस्य भवतो वातपैत्तिके तस्मान्मूर्छा भ्रमो दाहो निद्रानाशः शिरोरुजा १९ कंठास्यशो
षो वमथू रोमहर्षो रुचिस्तमः पर्वभेदश्च जृंभा च वातपित्तज्वराकृतिः २० वातपै
त्तिके ज्वरे इति शेषः कंठास्यशोषः कंठशोषो मुखशोषश्च वमथुः छर्दिर्भेदः रोमह
र्षः रोमांचः अरुचिः प्रसिद्धा तमः अंधकारप्रविष्टस्येवासंवित्तिः पर्वाणि भिद्यंते
इति वे संधिशुव्यथा वातपित्तज्वराकृतिः वातपित्तज्वरलक्षणं १९।२० अथ वा
तश्लेष्मज्वरकथनं तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्विकां संप्राप्तिमा ३४
ह वातश्लेष्मकरैर्वातकफावामाशयाश्रयौ वह्निर्निरस्यकोष्ठाग्निं रसगौ ज्वरका

रिणौ ॥ २१ वातश्लेष्मकैरेराहारादिभिः ॥ ज्वरकारिणौ स्यातामितिशेषः ॥ २१ ॥ अथ तस्य पूर्वरूपं तल्लक्षणं चाह ॥ प्रागूपे वातकफयोः स्यातां वातकफज्वरे ॥ स्तैमित्यं पर्वरुग्णं मेदो निद्रा गौरवमेव च ॥ २२ ॥ शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्तनं ॥ संतापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥ २३ ॥ प्रागूपे पूर्वरूपे ॥ स्वेदाप्रवर्त्तनं स्वेदस्य आसमंताद्भावेन प्रवृत्तिः ॥ तथा च हारीतः ॥ शिरोग्रहः स्वेदभयश्च कासो ज्वरस्य लिंगं कफवातजस्येति ॥ स्वेदभयः स्वेदोप्रगतिः ॥ ननु स्वेदः पित्तस्य धर्मः ॥ अत एव पित्तज्वरे कंठोष्ठमुखनासानां पाकः स्वेदश्च जायत इत्युक्तं ॥ तस्मात्कथं वातश्लेष्मज्वरे स्वेदस्यातिप्रवृत्तिः ॥ उच्यते विकृतिविषमसमवायारब्धत्वान्न दोष इति कार्त्तिकः प्रकृतिसमसमवायस्य विकृतिविषमसमवायस्य चायमर्थः ॥ प्रकृत्या हेतुभूतया समः कारणानुरूपः समवा

यः कार्य्यकारणसंबंधः प्रकृतिसमसमवायः ॥ कारणानुरूपं कार्य्यमिति यावत् ॥ यथा
प्रकृतेर्यथास्थितैः शुक्लैस्तंतुभिः समवायकारणैरारब्धः पटः शुक्ल एव भवति ॥ जथा
च प्रकृतेन क्षेयलेन वातेन पित्तेन कफेन वा जनिते ज्वरे कातावुचितैर्धर्मैः वेपथुवेगा
धिक्यस्तैमित्यादिभिर्युक्तो भवति ॥ विकृतिविषमसमवायस्तु विकृत्या हेतुभूतया
विषमः कारणाननुरूपः समवायः कार्य्यकारणसंबंधः ॥ यथा संयोगाद्विकृताभ्यां
हरिद्राचूर्णाभ्यां हेतुभूताभ्यां विषमः कारणाननुरूपो लोहितो वर्णो जायते ॥ तथा यो
गेन विकृताभ्यां वातश्लेष्माभ्यां हेतुभूताभ्यां विषमा कारणाननुरूपा स्वेदस्याति
प्रवृत्तिरिति सिद्धांतः ॥ मध्यवेगः नातितीक्ष्णो नातिमृदुः ॥ वातश्लेष्मज्वराकृतिः वा
तश्लेष्मज्वरलक्षणं ॥ २२ ॥ २३ ॥ अथ पित्तश्लेष्मज्वरकथनं ॥ तत्र तस्य विप्रकृष्ट

सन्निकृष्टकारणकथनपूर्विकां संप्राप्तिमाह ॥ पित्तश्लेष्मकैः पित्तकफाभ्यामाभ्यामाश्र
यौ ॥ बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ ॥ २४ ॥ पित्तश्लेष्मकैरेराहारादिभिः ॥
ज्वरकारिणौ स्यातामिति शेषः ॥ २४ ॥ अथ तस्य पूर्वरूपं तल्लक्षणं चाह ॥ प्राग्रूपे पित्तक
फयोः स्यातां पित्तकफज्वरे ॥ लिप्ततिक्तास्यता तंद्रा मोहः कासो रुचिस्तृषा ॥ मुहुर्दाहो मु
हुः शीतं श्लेष्मपित्तज्वराकृतिः ॥ २५ ॥ प्राग्रूपे पूर्वरूपे ॥ लिप्ततिक्तास्यता श्लेष्मणा लि
प्तं च पित्तेन तिक्तं च यदास्यं तस्य भावो लिप्ततिक्तास्यता ॥ तंद्रा अर्द्धोन्मीलितनेत्रत्वं
मोहः मूर्छा ॥ अत्रानुक्तान्यपि अन्यानि चरकोक्तानि वोद्धव्यानि ॥ तद्यथा ॥ तथा स्तंभ
प्रसेकस्वेदः कफपित्तप्रवर्तनमिति ॥ श्लेष्मपित्तज्वराकृतिः श्लेष्मपित्तज्वरलक्षणं
२५ ॥ अथ सन्निपातज्वरारंभकथनं ॥ तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपू

र्थिकां संप्राप्तिं पूर्वरूपं चाह ॥ त्रिदोषजनकैर्वातः पित्तं श्लेष्मामगे हगाः ॥ वहिर्निरस्य को
ष्ठाग्निं रसगा ज्वरकारिणः ॥ प्राग्रूपाणि त्रिदोषाणां स्यात्त्रिदोषमये ज्वरे २६ त्रिदो
षजनकैराहारादिभिः ॥ प्राग्रूपाणि पूर्वरूपाणि ॥ २६ अथ सन्निपातज्वरस्य सामा
न्यानि लक्षणान्याह ॥ क्षणे दाहः क्षणे शीतमस्थिसंधिशिरोरुजा ॥ सस्रावे कलुषे र
क्ते निर्भुग्ने चापि लोचने ॥ २७ ॥ सस्वनौ सरुजौ कर्णौ कंठः शूकैरिवावृतः ॥ तंद्रा मोहः प्र
लापश्च कासः श्वासोऽरुचिर्भ्रमः ॥ २८ ॥ परिदग्धा खरस्पर्शा जिह्वा स्रस्तांगता परं ॥ ष्ठी
वनं रक्तपित्तस्य कफेनोन्मिश्रितस्य च ॥ २९ ॥ शिरसो लोठनं तृष्णा निद्रानाशो हृदि
व्यथा ॥ स्वेदमूत्रपुरीषाणां चिराद्दर्शनमल्पशः ॥ ३० ॥ कृशत्वं नातिगात्राणां प्रत
तं कंठकूजनं ॥ कोठानां श्यावरक्तानां मंडलानां च दर्शनं ॥ ३१ ॥ मूकत्वं स्रोतसां पाको

३६

गुरुत्वमुदरस्य च ॥ चिरात्पाकश्च दोषाणां सान्निपातज्वराकृतिः ॥ इर रुजाशूलं ॥ रुजाप्र
वृद्धः अश्मर्यादिभिः संबध्यते ॥ सस्रावे साष्ठीली ॥ कलुषे अस्यच्छे निर्भुग्ने विस्फारि
त इति ईशानजेज्जटौ ॥ अतिकुटिल इति चक्रः ॥ अंतः प्रविष्ट इत्यन्ये ॥ सरुजौ सशब्दौ
सरुजौ सपीडौ ॥ शूकः धान्यादेः शिखा ॥ परिदग्धा दग्धवल्कसवर्णा ॥ स्रस्तांगतायनं
स्रस्तांगता निःसहावयवता तस्या आयतनं प्राप्तिः ॥ ष्ठीवनं रक्तपित्तस्य रक्तस्य पित्तस्य वा
मुखेन तस्योद्गिरणं ॥ शिरसोत्तोटनं इतस्ततः शिरसश्चालनं ॥ कृशत्वं नातिगात्राणां
गात्राणामतिकृशपित्तं कार्श्येन व्याधिप्रभावात् ॥ दोषपूर्णत्वाद्दाध्मातं निरंतरं ॥ कोठो
भालुकितंत्रे पठितः ॥ तद्यथा ॥ वरटीदष्टनिकाशः कंडूमान् लोहितो सकफपित्तात् क्षारि
कोत्पादयिनाशः कोठ इति निगद्यते तज्ज्ञैरिति ॥ श्यावः कपिशो वर्णः ॥ मूकत्वं मेदव

१७

चनता अल्पवचनतायाः ॥ स्रोतसां करणानासादीनां ॥ गुरुत्वमुदरस्य च चिरात्पाकश्च दोषा
णामित्यतिसामत्वारब्धत्वेन ॥ सन्निपातज्वराकृतिः संन्निपातज्वरलक्षणं ॥ चकाराद
न्यान्यपि योद्धव्यानि ॥ यदाह वाग्भटः तद्वच्छीतं महानिद्रा दिवाजागरणं निशि ॥ सदा वा
नैव वा निद्रा महान् स्वेदोऽतिवा नच ॥ गीतनर्त्तनहास्यादिविकृतेहाप्रवर्त्तनमिति ॥ ननु वा
तादयः परस्परविरुद्धगुणास्तेषां संभूयैकत्रकार्यारंभकत्वं नोपपद्यते परस्परोपघा
ताद्दहनसलिलयोरिव ॥ तत्कथं वातपित्तकफा मिलित्वा विकारोत्पादका इति ॥ अत्र स
माधानमुक्तं दृढबलेन ॥ विरुद्धैरपि न त्वेते गुणैर्घ्नंति परस्परं ॥ दोषाः सहजसात्म्यत्वा
द्विषं घोरमहीनिवेति ॥ सहजसात्म्यत्वात् सहजं स्वाभाविकं यत्सात्म्यं अनुपघातक
त्वं तस्मात् ॥ ग यदा समस्तहेत्वंतरमुक्तयान् ॥ दैवाद्दोषप्रभावाद्वा दोषाणां सान्निपाति

के॥ चिद्रूक्षगुणैः केश्चिल्लोपघातः परस्परमिति॥ ननु भिन्नचयप्रकोपकालानां वातपि
त्तकफानां युगपदुत्पानाभावात्कथं संभूय सन्निपातज्वरारंभकत्वमुपपद्यते उच्यते॥
त्रिदोषजनकनिदानवशेन युगपद्देषां प्रकोपादिति सिद्धांतः॥ २७॥ २८॥ २९॥ ३०॥ ३१
३२॥ अथ यातोल्पशमादीनां त्रयोदशानां सन्निपातज्वरविशेषाणां संधिगादीनि त्र
योदशनामानि तल्लक्षणानि चाह॥ संधिगश्चांतकश्चैव रुग्दाहश्चित्तविभ्रमः॥ शीतांग
स्तंद्रिकश्चोक्तः कंठकुब्जश्च कर्णकः॥ ३३॥ विख्यातो भुग्ननेत्रश्च रक्तष्ठीवी प्रलापकः॥
जिह्वकश्चेत्यभिन्यासः सन्निपातास्त्रयोदश॥ ३४॥ व्यथातिशापिता भवेच्छ्वयथुसंयुता
संधिषु प्रभूतकफता मुखे विगततिद्रता कासरुक्॥ समस्तमिति कीर्तितं भवति लक्ष्म
यत्र ज्वरे त्रिदोषजनिते बुधैः स हि निगद्यते संधिगः॥ ३५॥ यस्मिन्नलक्षणमेतदस्ति

सकलैर्दोषैरुद्दीते ज्वरे जसंमूर्द्धविघूननं सकसनं सर्वांगपीडाधिका ॥ हिक्काश्वाससदा
हमोहसहितादेहेति संतप्तता वैकल्यं चवथांवर्चांसि मुनिभिः संकीर्तितः सैातकः ॥२६॥ दा
होधिको भवतिमत्र तृषा चतीव्राश्वासप्रलापविच्युचि भ्रममोहपीडा मन्याहनुव्यथनकं
ठ्हेजाध्मा माध्म रूग्दाह संस्तउदितस्त्विभयोज्वरोयं ॥२७॥ गायति नृत्यति हसति प्रलपति
विकृतं निरीक्षते मुह्येत् ॥ दाहव्यथाभयार्तो दोषत्रयचित्तविभ्रमज्वरवान् ॥२८॥ हिमशि
शिरस्त्रारीरः सन्निपातज्वरी यः श्वसनकसनहिक्कामोहकंपप्रलापैः ॥ क्रमवृद्धकफतांत
द्रीहयम्यंगपीडाज्वरविकृतिभिरार्तः शीतगात्रः स उक्तः ॥२९॥ तंद्रातीवततस्तृषातिस
रएं श्वासोधिकः कासरुक् संतप्तातितनुर्गलश्च यथुनासाद्वि चिकेडुः कफः ॥ सुश्वामा
रसनाक्रमश्रवणयोर्मांद्यं च दाहस्तथा ॥ कंठस्योत्सहितं द्विको निगदितो दोषत्रयोत्थो

ज्वरः ॥ ४० ॥ कंठःशूककृतानावरुद्धवदतिश्वासःप्रलापोरुचिर्दाहोदेहरुजातृषापिचहृत्संभ्रमः
शिरोर्तिस्तथा ॥ मोहोयेयत्रनासहेतिसकलंलिंगंत्रिदोषज्वरेयत्रस्यात्सहिकंठकुब्जउदि
तःप्राज्ञैःचिकित्साबुधैः ॥ ४१ ॥ निःशेषदोषजनितज्वरदोषजन्मास्यात्कर्णमूलविषये
श्वयथुर्व्यथाच ॥ कंठग्रहोबधिरताश्वसनप्रलापप्रस्वेदमोहदहनानिचकर्णिकाख्ये ॥ ४२ ॥
भ्रंशोनयनयुक्तताश्वसनकासतंद्रिभ्रमाःप्रलापमदवेपथुश्रवणहानिमोहास्तथा
अदोनिखिलदोषजेभवतियत्रलिंगंज्वरेप्रुलाततनचिकित्सकैःसरुहभुग्ननेत्रोमतः ॥
४३ ॥ निष्ठीवोरुधिरस्यरक्तसदृशांकृष्णंतनौमंडलंलौहित्यंनयनेतृषारुचिवमिश्वासा
तिसारभ्रमाः ॥ आध्मानंचविसंज्ञताचपतनंहिक्कांगपीडाभृशंरक्तष्ठीवतिसन्निपात
जनितेलिंगंज्वरेजायते ॥ ४४ ॥ यत्रज्वरेनिखिलदोषनितांतरोषजातेप्रलापबहुतास

हसोप्यतिष्ठ्य ॥ कंपव्यथायतनदाहविसंज्ञिताः स्युर्नाम्ना प्रलापक इति प्रथितः पृथिव्यां
॥४५॥ त्रिदोषजनिते ज्वरे भवति यत्र जिह्वा भृशं रता कठिनकंटकैस्तदनु मूकता मूढता ॥ श्रुति
क्षतिबलक्षतिश्च सनकाससंततमयः पुरातनभिषग्वरास्तमिह जिह्वकं चक्षते ॥४६॥ दोषा
स्तीव्रतया भवंति बलिनः सर्वेपि यत्र ज्वरे मोहो हीतीविविचेष्ठता विकलता श्वासो भ्रमः संभ्र
कता ॥ दाहश्चिक्कणमाननं च दहनो मंदो बलस्य क्षयः सोभिन्यास इति प्रकीर्तितः इह प्रा
ज्ञैर्भिषग्भिः पुरा ॥४७॥ संधिगे सन्निपाते तु अंतके दशवासराः ॥ हृद्दाहे विंशतिर्ज्ञेयो
त्रिवर्षं चित विभ्रमे ॥४८॥ शीतांगे पक्षएकस्मात् द्विके पंचविंशतिः ॥ चित्तेयावासराष्ट्रा
त्रकंठकुब्जे त्रयोदश ॥४९॥ कर्णिके तु त्रयोमासा भुग्नने त्रैदिनाष्टकं ॥ रक्तष्ठीवे दशाहानि
चतुर्दश प्रलापके ॥५०॥ जिह्वके षोडशाहानि अभिन्यासे तु पक्षकं ॥ परमायुरिदं ॥

प्रोक्तं निरूप्यते तन्मया लक्षणमपि ५१ संधिगस्तेषु साध्यः स्यात्तंद्रिकश्चित्तविभ्रमः कर्णिको जिह्व

कः कंठकुब्जः पंचापि कष्टकाः ५२ रुग्दाहस्त्वतिकष्टेन संसाध्यस्तेषु भाषितः रक्तष्ठी

वी भुग्ननेत्रः शीतगात्रः प्रलापकः अभिन्यासांतकावेते षडसाध्याः प्रकीर्तिताः ५३

अथ सन्निपातज्वरस्य बंधमोक्षयोः कालमाह पित्तकफानिलवृद्ध्या दशाहद्वादशाहसप्ताहात् हंति विमुंचति वा पुन स्त्रिदोषजो धातुमलपाकात् ५४ धातुपाकाद्धंति

मलपाकाद्विमुंचतीत्यर्थः धातुमलपाकयोः प्राक्तनकर्मैव हेतुः तत्र यदि जीवनं संव

र्द्धिकर्मसंचितं तदा मलपाकोऽन्यथा धातुपाकः स च रसादिषु क्रांतानां धातूनां बोद्धव्या

धातुपाकस्य लक्षणं यथा निद्रानाशो हृदि स्तंभो विष्टंभो गौरवारुची अरतिर्बलहा

निश्च धातूनां पाकलक्षणमिति अन्यच्च संबाध्यमानो हृदि नाभिदेशे गात्रेषु वा

पाकस्तज्जायते तु ॥ पीडां ज्वरार्त्तो गतिमिश्चगच्छेत्साध्या तु पाकी कथितो भिषग्भिरिति ॥ मल

पाकस्य लक्षणं यथा ॥ दोषप्रकृतिवैकृत्यं लघुता ज्वरदेहयोः ॥ इंद्रियाणां च वैमल्यं मला
नां पाकलक्षणमिति ॥ दोषप्रकृतिवैकृत्यं दोषा वातादयस्तेषां प्रकृतिर्वैपथुदाहगौर
वादिकरणं तस्या वैकृत्यं वैपरीत्यं ॥ वैमल्यं मलरहितं ॥ मलानां दोषाणां ॥ सृष्टुतस्या
पि वधमोक्षकालावधावेवमेवाभिप्रायः ॥ स यथा ॥ सप्तमे दिवसे प्राप्ते दशमे द्वाद
शेपि वा ॥ पुनर्घोरतरो भूत्वा प्रशमं याति हंति वेति ॥ घोरतर इति घोरः स्वभावादेव तदा
घोरतरो भूत्वेति ५४ अथामस्याधिक्येन सप्तमदिवसाद्यवध्यतिक्रमे सन्निपातस्य
मोक्षवधयोः परमावधिमाह ॥ सप्तमी द्विगुणा यावन्नवम्येकादशी तथा ॥ एषा त्रिदो
षमर्यादा मोक्षाय च वधाय च ५५ नवम्येकादशी चागमनदिवसं विहाय यो द्वा

व्या॥ तेनागमनदिवसं नीत्वा दशमी द्वादशी च॥ सप्तमे दिवसे प्राप्त इत्यादि सुश्रुतवा
क्ये पुनःशब्देन द्वैगुण्यस्य कार्तिकुंडेन प्रतिपादनात्॥ एतेन चतुर्विंशत्यधिकस्तोम
यीदादिवसो नास्तीत्युक्तं भवति॥ तत्प्रतिपादकागमाभावात्॥ ५५॥ अथ सन्नि
पातज्वरोपद्रवमाह॥ सन्निपातज्वरस्यांते कर्णमूले सुदारुणः॥ शोथः संजायते ते
न कश्चिद्देव प्रमुच्यते॥ ५६॥ सुदारुणः मारकत्वात्॥ यतस्तेन शोथेन कश्चिद्देव प्रमु
च्यते कोपि जीवितुं त्यज्यत इत्यर्थः॥ ५६॥ अथ सन्निपातज्वरस्यासाध्यकृच्छ्रसाध्यल
क्षणमाह॥ दोषे विबद्धे नष्टेग्नौ सर्वसंपूर्णलक्षणः॥ सन्निपातज्वरोसाध्यः कृच्छ्र
साध्यस्ततोन्यथा॥ ५७॥ दोषो वातादिः जैज्जटस्तु दोषशब्देन मलमेवाह॥ विबद्ध इति व
चनात्॥ नष्टाग्नित्वं आहारापाकगम्यं॥ सर्वसंपूर्णलक्षणः सर्वाणि दाहशीतादी

निसंपूर्णानि अन्यूनानि प्रौढानीति यावत् तल्लक्षणानियमस्य सः ॥ ततोन्यथा ॥ दोषेपक्के अग्नौ दीप्ते स्वल्पतल्लक्षणः कृच्छ्रसाध्य इत्यर्थः ॥ असाध्यकृच्छ्रसाध्याभिधानेन सुखसाध्यो न भवतीति दर्शितं ॥ तथा च भालुकिः ॥ मत्कनासहयोर्द्वयं संनिपातचिकित्सुनेति ५७ ॥ अथागंतुज्वरकथनं ॥ तत्रागंतुज्वरस्य निदानमाह ॥ अभिघाताभिषंगाभ्यां अभिचाराभिशापतः ॥ आगंतुर्जायते दोषैर्यथास्वं तं विभावयेत् ॥ ५८ ॥ अभिघातः शस्त्राश्मुष्टिलगुडादिभिरभिहननं ॥ अभिषंगः कामशोकभयक्रोधभूतादीनामावेशः ॥ अभिचारः कृत्याद्युत्पादनं ॥ अभिशापः ब्राह्मणगुरुवृद्धसिद्धादीनामतिष्टाभिशापनं ॥ तं आगंतुज्वरं ॥ यथास्वं यथादोषलक्षणं दोषैर्विभावयेज्जानीयात् ५८ ॥ तत्र कस्यागंतोः को निजो दोष इत्यपेक्षायामाह ॥ कामशोकभयाद्वायुः क्रोधा

त्पित्तं त्रयो मलाः । भूताभिषंगात्कुप्यंति भूतसामान्यलक्षणाः ॥ ५८ ॥ कामशोकभयात्का
मशोकभयजादागंतोः वायुः कुप्यति । क्रोधात् क्रोधजादागंतोः पित्तं कुप्यति । भूताभि
षंगात् भूतावेशजादागंतोस्त्रयो मलास्त्रयो दोषाः कुप्यंतीत्यर्थः ॥ भूतसामान्यलक्ष
णाः भूतस्य भूतलक्षणस्य सामान्यं समानता येषां तानि भूतसामान्यानि भूत
सामान्यानि लक्षणानि येषां ते भूतसामान्यलक्षणा इति मलविशेषणं ॥ भूताभि
षंगजे दोषलक्षणानि भूतलक्षणानि च भवंतीत्यर्थः ॥ ५९ ॥ अथागंतुज्वराणां हे
तुभेदैर्लक्षणभेदानाह । श्यावास्यता विषकृते तथातीसार एव च । भक्तारुचिः पि
पासा च तोदश्च सह मूर्छया ॥ ६० ॥ औषधीगंधजे मूर्छा शिरोरुग्वमथुस्तथा । कामजे
चित्तविभ्रंशस्तंद्रालस्यमभोजनं । हृदये वेदना चास्य गात्रं च परिशुष्यति ॥ ६१ ॥

भयात्प्रलापः शोकाच्च भवेत्कोपाच्च वेपथुः ॥ भूताभिषंगादुद्वेगो हास्यं रोदनकोपने ॥ इ
२२ ॥ केचिद्भूताभिषंगोत्थं ब्रुवते विषमज्वरं ॥ अभिचाराभिशापाभ्यां मोहस्तृष्णा च जाय
ते ॥ इ ॥ विषकृते स्थावरजंगमविषकृते ज्वरे ॥ स्यावःश्युक्तानुविद्धःकृष्णोवर्णः
शाकवर्णो वा ॥ अतीसारः स्याद्रविषे रौच ॥ तस्याधोगामित्वात् ॥ तोदः सूचीव्य
धनेनेव व्यथा ॥ ओषधीगंधजे तीव्रौषधीगंधाघ्राणजे ॥ कामजे संमोहितकांता
ऽप्राप्तिनिमित्तके ज्वरे ॥ चकाराद्वाग्भटोक्तान्यपि लक्षणानि योद्धव्यानि ॥ तान्यथा
कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षय इति ॥ भयाज्जाते ज्वरे ॥ एवं शोकात्
कोपादित्येतयोर्विचिंत्यं ॥ शोकाच्चेति चकारेण प्रलाप एवानकृष्यते ॥ कोपाच्च को
पादपि वेपथुर्भवति ॥ ननु वेपथुर्वातस्य कार्यः तत्कथं कोपजे ज्वरे वेपथुः ॥ ॥ २२

यतउक्तं ॥ क्रोधात्पित्तमित्यादि ॥ उच्यते ॥ एकः प्रकुपितो दोषः इतरानपि कोपयेदिति
वचनात् पित्तकोपितवातजन्य एवात्र वेपथुः ॥ किंच क्रोधाद्वायुरपि भवति ॥ यतउ
क्तं विदेहेन ॥ क्रोधशोकौ स्मृतौ वातपित्तरक्तप्रकोपणाविति ॥ भूताभिषंगात् भूता
नि देवग्रहादयः उन्मादनिदाने वक्ष्यमाणास्तेषामभिषंगः संबंधस्तस्मात् उद्वेगः
उद्विग्नचित्तता ॥ विषमज्वरमिति कदाचिद्दति वेगवान् कदाचिच्छांतवेगो ज्वरो भव
तीत्यर्थः ॥ तस्माच्चेति चकारेण हारीतानुयादि वाग्भटोक्तं बोद्धव्यं तद्यथा ॥ तत्राभि
चारिकैर्मंत्रैर्हूयमानस्य तप्यते ॥ पूर्वं मनस्ततो देहस्ततो विस्फोटतृड्भ्रमैः सदाह
मूर्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः इति ॥ ६०॥ ६१॥ ६२॥ ६३॥ अथ विषमज्वरकथनं ॥
तत्र विषमज्वरस्य निदानकथनपूर्विकां संप्राप्तिमाह ॥ दोषोल्पोहितसंभूतो ज्व

रोऽस्य दुष्टस्य वा पुनः॥ धातुमन्यतमं प्राप्य करोति विषमज्वरं॥ ६४ ज्वरोऽल्पदोषस्य ज्वरे ग
ल्पत्वक्तस्य॥ सन्निकृष्टहेतुमाह दोषइति॥ अल्पः ज्वरमुक्तस्याल्पोपि॥ विप्रकृष्टं हेतु
माह॥ अहितसंभृतइति॥ अहितं आहारविहारादि तेन संभृतः संपूर्णो जातः॥
अन्यतमं धातुं रसरक्तादिकं प्राप्य दूषयित्वा पुनर्विषमज्वरं करोति॥ अत्रोक्तवाग्भ
टेन प्रथमतोपि विषमज्वरो भवतीति बोध्यते॥ यतउक्तं॥ आरंभाद्विषमो यस्येत्यादि
६४॥ धातून्दूषयित्वा कथं विषमज्वरं करोतीत्यपेक्षायामाह॥ संततं रसरक्तस्थः सत
तं रक्तधातुगः॥ दोषः कुर्वज्वरं पुंसां सोन्येद्युः पिशिताश्रितः॥ ६५ मेदोगःस्तृती ग:
येह्नि अस्थिमज्जगतं पुनः॥ कुर्याच्चतुर्थकं घोरमंतकं रोगसंकरं॥ ६६ सः दोषः अ
न्येद्युरिति अन्येद्युष्कं॥ घोरं दुःसहं॥ अंतकं यमनियमात्मकत्वात॥ रोगसंकरप्रभ॥

२३

तरोगोत्पादकं ॥ ६५॥ ६६॥ विषमज्वरस्य सामान्यं लक्षणमाह ॥ यः स्यादनियतात्काला

ष्णा च्छीतोक्ष्माभ्यां तथैव च वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः ॥ ६७॥ अनियता

त्कालादित्यस्यायमर्थः ॥ यथा वातिकोज्वरः ॥ सप्तदिनानि पैत्तिको दशदिनानि श्लैष्मि

को द्वादशदिनानि दोषाणां प्राबल्ये वातिकश्चतुर्दशदिनानि पैत्तिको विंसतिदि

नानि श्लैष्मिकश्चतुर्विंशतिदिनानि तथा विषमज्वरो नियतं कालं प्राप्य न स्यादित्य

र्थः शीतोक्ष्माभ्यां गुणाभ्यां स्यात् ॥ वेगतश्चापि विषमः कदाचिदतिवेगवान् कदा

ततत चिच्छांतवेग इत्यर्थः ॥ ६८॥ तत्र संततलक्षणमाह ॥ सप्ताहं दशाहं वा द्वादशाहमथा

पि वा ॥ संतत्या यो विसर्गी स्यात्संततः स निगद्यते ॥ ६९॥ सप्ताहादि वातिकस्या वातिका

दिभेदात् ॥ संतत्या नैरंतर्येण ॥ अविसर्गी अपरित्यागी ॥ न तु मुक्तानुबंधित्वं विष

मत्वमितिविषमलक्षणं तदत्र न घटते ॥ इति कथमयं विषमेणुपद्यते ॥ घटत एवेति
नैदोषः ॥ यत उक्तं चैकेन ॥ विसर्गाद्दिदशोत्क्रत्वादिवसेऽव्यक्तलक्षणः ॥ इतीभोयप्रायः
कालं दीर्घमप्यनुवर्त्तत इति ॥ यत्तु स्वरनादेन ज्वराः पंचचये प्रोक्ताः पूर्वं संततकादयः
चत्वारः संततं हित्वा ज्ञेयास्ते विषमज्वरा इत्युक्तं तच्चिरेण त्यागाभिप्रायेण ॥ इय ॥ सत
तादीनां लक्षणमाह ॥ अहोरात्रे संततको द्वौ कालावनुवर्त्तते ॥ अन्येद्युष्कस्त्वहोरा
त्र एककालं प्रवर्त्तते ॥ तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ॥ इदं ॥ द्वे कालौ अह
न्येककालं रात्रावेककालं ॥ यतो दोषाणामहोरात्रे प्रत्येकं द्वौ द्वौ प्रकोपकालौ ॥ यत
उक्तं वाग्भटेन ॥ वयोहोरात्रिभुक्तानां तेंतमध्यादिगाः क्रमादिति ॥ अनुवर्त्तते वे
गं करोति ॥ अन्येद्युष्कः एककालं प्रवर्त्तते एककालमागच्छतीत्यर्थः ॥ तृतीयेऽह्नि

इति वेगादिनापेक्ष्यात् तृतीयेन्हि ॥ एवं चतुर्थके वाच्यं ॥ यदुक्तं ॥ दिनमेकमतिक्रम्य
यो भवेत्स तृतीयकः ॥ द्विनद्वयमतिक्रम्य यः स्यात्स हि चतुर्थक इति ॥ अन्ता हरुद्धउ
क्तः ॥ कफस्थानविभागेन यथासंख्यं करोति हि ॥ सततान्येद्युष्कत्र्याख्यचतुर्थ
कान्नेतेपकान् ॥ अहोरात्रादहोरात्रात्स्थानात्स्थानं प्रपद्यते ॥ दोषश्चामाशयं प्रा
प्य करोति विषमज्वरमिति ॥ अस्यापमर्थः ॥ आमाशयो रःकंठशिरःसंधयः पं
च कफस्थानानि एषु तिष्ठन् दोषो यथासंख्यं सततादीन् करोति ॥ तत्रामाशयस्थि
तो दोषो सततं करोति द्वौ कालं ॥ अहोरात्रे कालद्वये दोषप्रकोपात् ॥ हृदये स्थितो
दोषश्चामाशयमागत्यान्येद्युष्कं करोति एककालं ॥ नैकस्यादेकस्मिन्नेवाहोरा ण्या
त्रे दोषश्चामाशयमायाति ॥ तत्र द्वौ दोषप्रकोपकालौ ॥ एकस्मिन् काले हृदये

तिष्ठति अपरस्मिन्नामाशय इति । कंठस्थितो दोषो होरात्राद् उदयमायाति तृतीयदिने आ
माशयमागत्य स्वप्रकोपकाले तृतीयकं करोति एककालं न तु द्विकालं स्वभावात् । ए
वं शिरःस्थितो दोषो होरात्रात्कंठमायाति ततः पुनरहोरात्राद् उदयमायाति चतुर्थे
दिने आमाशयमागत्य स्वप्रकोपकाले चतुर्थकं ज्वरं करोति एककालं न तु द्विकालं
स्वभावादेव । ननु दोषस्यागमनक्रमेण निजस्थानगमनक्रमात् कथं तृतीयकच
तुर्थकदिवसयोर्ज्वरागमनं । उच्यते । दोषो हि प्रकोपसमये वेगवत्त्वाल्लाघवात् स्व
स्थानवेगाद्दिनैकेन याति । यत आह । दोषप्रकोपकाले हि वेगवत्त्वेन लाघवात् । वेग
वान्सरत्येवायं स्वस्थानमधिगच्छतीति । संधिषु स्थितो दोषः प्रलेपकं करोति । संध
यश्च आमाशये पि संति । अत एव तेषु स्थितः प्रलेपकं सदा करोतीति । अयं चाविष

मोपि विषमसहचरितः कफस्थानो मेदानुरोधात्प्रदितः ॥ उक्तं हि सुश्रुते ॥ प्रलेपकस्त्व
विषमः प्रायः क्षेषायक्ष्मेषिणामिति मधुकोशाकृत् ॥ द्वि ॥ अथ द्विदोषोल्वणस्य तृती
यकस्य लक्षणमाह कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ॥ वातपित्ताच्छिरोग्रा
ही त्रिविधः स्यात्तृतीयकः ॥ ७० त्रिकग्राही वेदनया त्रिकं गृह्णातीत्यर्थः ॥ वातकफा
त्मकः पृष्ठात्पृष्ठयाप्यवंव्याप्य भवतीत्यर्थः ॥ ७० कफोल्वणस्य वातोल्वणस्य च चतु
र्थकस्य लक्षणमाह ॥ चातुर्थिको दर्शयति प्रभावं द्विविधं ज्वरः ॥ जंघाभ्यां श्लैष्मिकः पू
र्वं शिरसोनिलसंभवः ॥ ७१ प्रभावस्त्वाद्यांशलिंगं श्लैष्मिकः श्लैष्मोल्वणः ॥ अनिल
संभवः वातोल्वणः सततादीनां त्रिदोषजत्वात् ॥ उक्तं च चरके ॥ प्रायशः सन्निपातेन
पंच स्युर्विषमज्वरा इति ॥ प्रायेणग्रहणादेकदोषजाद्विदोषजा अपि भवंतीति जेज्ज

२६

दः ॥ पूर्वं प्रथमं ॥ जंघाभ्यां व्यपयाजंघे व्याप्य सकलसरीरं व्याप्नोतीत्यर्थः ॥ ७१ किंच ॥ वि

षमज्वर एवान्यश्चतुर्थकविपर्ययः ॥ समध्येज्वरयत्यन्हीआद्यंतेच विमुंचति ॥ ७२ ॥ अ

न्यः संतताद्दिपंचकादपरः ॥ चतुर्थकविपर्ययाख्योयोज्वरः सोपि विषमज्वर एवेति यो

ज्यं ॥ सतु अस्थिमज्जगतदोषजन्यो ज्ञेयः ॥ तथाच तंत्रांतरं ॥ अस्थिमज्जगतोदोषश्चतु

र्थकविपर्ययइति ॥ तस्यचतुर्थकविपर्ययस्य लक्षणमाह ॥ समध्यइति ॥ आद्यावेकदि

नं न भूत्वा मध्ये दिनद्वयं भूत्वा अंते एकदिनं न भवतीत्यर्थः ॥ चतुर्थकविपर्यइस्कृप

लक्षणं ॥ सतताद्दिविपर्ययोपि वोद्धव्यः ॥ तद्यथा ॥ अहोरात्रे द्वौकालौ मुंचति शेषं सर्व

महोरात्रं तिष्ठतीति सततविपर्ययः ॥ अहोरात्रे एककालं मुंचति शेषसर्वमहोरात्रं ति

ष्ठतीत्यन्येद्युष्कविपर्ययः ॥ मध्येरेकदिनं ज्वरयति आद्यावंतेच दिने मुंचतीति तृतीय ॥ २६

कविपर्ययः ॥ एते विषमज्वरा रात्रिज्वरादेरुपलक्षकाः ॥ यदुक्तं ॥ समौ वातकफौ यस्य क्षीणः
पित्तस्य देहिनः ॥ रात्रौ प्रायो ज्वरस्तस्य दिवा हीनकफस्य चेति ७२ संततादीनां शीतपूर्व
त्वे दाहपूर्वत्वे च हेतुमाह ॥ त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरं ॥ तयोः प्रशांतयोः
पित्तमंते दाहं करोति च ॥ शीतं शीतसहितं ॥ प्रशांतयोः प्रशांतवेगयोः ॥ नहि विषमेषु दोष
स्य प्रशांतिर्भवति ॥ पुनर्वेगागमात् ॥ यदाह सुश्रुतः ॥ सचापि विषमो देहं न कदाचिद्वि
मुंचति ॥ ग्लानिगौरवकार्श्येभ्यः स यस्मान्न प्रमुच्यते ॥ वेगे तु समतिक्रांते गतोयमिति ॥
लक्ष्यते ॥ धात्वंतरस्थो लीनत्वात्सौक्ष्म्यान्नैवोपलभ्यत इति ॥ अंते अभ्यंतरे ७३ करोत्यादौ
तथा पित्तं त्वक्स्थं दाहमतीव च ॥ तस्मिन्प्रशांते त्वितरौ कुरुतः शीतमंततः ७४ इतरौ वातक
फौ ॥ अंततः हस्तपादादितः ७४ शीतादिदाहादिज्वरयोस्त्रिदोषजत्वमाह द्वावेतौ दाह

६

२७ ॥ शीताद्यज्वरौ संसर्गजौ स्मृतौ ॥ दाहपूर्वस्तयोः कष्टः सुखसाध्यतमोऽपरः ७५ दाहशीतादी
राकौ दाहादिः परः शीतादिः ॥ संसर्गजौ सान्निपातिकौ ॥ ननु संसर्गो हि द्वयोर्भवति त्रया
णां सन्निपात इति स्थिते कथमत्र संसर्गशब्देन त्रिदोषग्रहणं ॥ उच्यते संसर्गोऽत्र संबंधः
स च द्वयोर्बहूनां भवति ॥ अत्र तु त्रयाणामुक्त इति समाधिः तयोर्दाहशीतादिज्वरयोर्मध्ये
दाहपूर्वः दाहादिः कष्टः कष्टसाध्यः ॥ अपरः शीतादिः ७५ विषमज्वरविशेषानाह ॥
विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ॥ तेनार्द्धं शीतलं देहस्यार्द्धमुष्णं प्रजायते ७६ ॥ अ
न्नरसे आहारजे रसे विदग्धे दुष्टे सति ॥ तथा देहे श्लेष्मपित्ते च विदग्धे दुष्टे व्यवस्थिते स
ति ॥ तेन हेतुना शीतलं कफेन उष्णं पित्तेन ॥ अर्द्धत्वं चास्य अर्द्धनारीश्वराकारेण नरसिं
हाकारेण वा ७६ ॥ किंच काये दुष्टं यदा पित्तं श्लेष्मा चांते व्यवस्थितः ॥ तेनोष्णत्वं शरी ॥ २७ ॥

रस्य शीतत्वं हस्तपादयोः ३७ अंते हस्तपादयोः ३७ उक्तस्यार्थस्य विपर्यये ज्वरांतरमा
ह कायेश्लेष्मा यदा दुष्टः पित्तं चांते व्यवस्थितं शीतत्वं तेन गात्रेस्यादुष्णत्वं हस्तपादयोः
३८ अथ विषमज्वरविशेषस्य प्रलेपकस्य लक्षणमाह प्रलिंपन्निव गात्राणि घर्मेण गौ
रवेण च मंदज्वरविलेपी च सशीतः स्यात्प्रलेपकः ३९ मंदज्वरश्चासौ विलेपी चेति मं
दज्वरविलेपी यस्मादयं घर्मगौरवाभ्यां लिंपति तस्मादस्य विलेपित्वं सेयं अयमपि वि
षमज्वर एव तथा च सुश्रुतः प्रलेपकाख्यो विषमः प्रायः क्लेशाय शोषिणामिति ३९
अथ जीर्णज्वरकथनं तत्र जीर्णज्वरस्य सामान्यं लक्षणमाह यो द्वादशभ्यो दिवसेभ्य
ऊर्ध्वं दोषत्रयेत द्विगुणेभ्य ऊर्ध्वं तनुरंतनोति यतिमंदवेगो भिषग्भिरुक्तो ज्वर एष जीर्णः
४० अथ जीर्णज्वरस्यैव विशेषं वातबलासकमाह नित्यं मंदज्वरो रूक्षः शूनः कृच्छ्रे

॥ २८ ॥

णासिद्धमिति ॥ सर्वांगश्लेष्मभूयिष्ठो नरो वातबलासकी ॥ ८१ ॥ वातबलासकी यातबलासका ।
त्वोज्वरोस्यास्तीति यातबलासकी ॥ न्यूनः श्लेष्मा ॥ श्लेष्मभूयिष्ठो बहुश्लेष्मकः ॥ यातबला
सकारध्वत्वादस्य यातबलासकइतिसंज्ञा ॥ बलासकः श्लेष्मा ॥ पित्तमप्यत्र बोद्धव्यं ॥ यदुक्तं
तंत्रांतरे ॥ वायुः प्रकुपितो दोषावुदीर्यैभौ विधावतीति ॥ रूक्षत्वं चास्य व्याधिप्रभावात् ॥ सेयं
८१ ॥ अथ साध्यस्य ज्वरस्य लक्षणमुपद्रवांश्चाह ॥ बलवत्स्वल्पदोषेषु ज्वरः साध्योनुपद्र
वः ॥ श्वासो मूर्छारुचिः छर्दिस्तृष्णातीसारविड्ग्रहाः ॥ हिक्का कासांगभेदाश्च ज्वरस्योपद्रवा
दश ॥ ८२ ॥ बलवत्सु पुरुषेषु साध्यः ॥ यदुक्तं ॥ बलाधिष्ठानमारोग्यमिति ॥ अल्पदोषेषु
नातिप्रबलदोषेषु ॥ अनुपद्रवः श्वासाद्युपद्रवरहितः ॥ श्वासाद्यो दशउपद्रवा ॥ ८२ ॥
अथ सुखसाध्यस्य ज्वरस्य लक्षणमाह ॥ संतापोप्यधिको यासे तृष्णादीनां चमा ॥ २८ ॥

द्वं ॥ बहिर्वेगस्य लिंगानि सुखसाध्यो मतस्त्वसः ॥ ८२ तृष्णादीनामित्यादिशब्देनांतर्दा
हसंघातस्विन्नत्वप्रयासा गृह्यंते ॥ तेषां मार्दवमल्पता ॥ बहिर्वेगस्य ज्वरस्य ॥ ८३ अथका
लभेदेन ज्वरस्य साध्यासाध्यलक्षणमाह ॥ वर्षाशरद्वसंतेषु वाताद्यैः प्राकृतः क्रमात् ॥
वैकृतोन्यः स दुःसाध्यः प्राकृतश्चानिलोद्भवः ॥ ८४ वर्षादिषु ऋतुषु वाताद्यैः क्रमाद्यो ज्व
रः स प्राकृतः ॥ वर्षासु वातिकः ॥ शरदि पैत्तिकः ॥ वसंते श्लैष्मिकः ॥ अस्मादन्यो वैकृतः
यथा वर्षासु पैत्तिकः शरदि श्लैष्मिकः ॥ वसंते वातिक इति ॥ स वैकृतः दुःसाध्यः ॥ अर्था
त् सुखसाध्यः प्राकृत इति ॥ यदुक्तं ॥ प्राकृतः सुखसाध्यस्तु वसंतशरदुद्भव इति ॥ अनि
लोद्भवश्च प्राकृतो दुःसाध्यः ॥ तेन प्राकृतत्वे दोषप्रभावाद्वातिकस्य दुःसाध्यत्वं वैकृत
वदिति ॥ ८४ ॥ अथ वर्षादिषु ज्वरं जनयतां वातादीनां चिकित्साविशेषार्थं प्राधान्यम

२९

प्राधान्यंचाह॥ वर्षासुमारुतोदुष्टपित्तश्लेष्मान्वितोज्वरं॥ कुर्यात्पित्तंचशरदितस्यचानु
बलःकफः॥ ५५ तत्प्रकृत्याविसर्गाच्चतत्रनानशनाद्भयं॥ कफोवसंतेतमपिवातपित्तंभ वेदनु
चदुष्टंज्वरंकुर्यादितिपूर्वोक्तेनसंबध्यते॥ अनुबलः अनुबंधः॥ तत्प्रकृत्यातयोःपित्त
श्लेष्मणोः प्रकृत्यास्वभावत्वेन॥ तत्रोत्पन्नयोर्ज्वरयोरनशनाद्भयंनभवति॥ यतउक्तं
वर्षाशरद्धेमंताविसर्गकालास्तत्रोपचितबलाःप्राणिनोभवंतिसोमस्यबलवत्वादि
ति॥ कफोवसंतइतिकफःदुष्टःज्वरंकुर्यादितिपूर्वोक्तेनसंबध्यते॥ तमपिकफमपि
अनुवातपित्तंभवति॥ वातपित्तेअनुबंधरूपेभवेतइत्यर्थः॥ अत्रकफप्रकृत्यातघनं
युक्तमेव॥ किंतुवसंतस्यादानकालत्वान्निःशंकंतन्नकर्तव्यं॥ यतउक्तं॥ शिशिरवसंत
ग्रीष्मास्त्वादानकालास्तत्रापचितबलाःप्राणिनोभवंतिसूर्यस्यबलवत्वादिति॥ २९॥

एतेनेदमुक्तं । वर्षास्वायुः प्रधानं पित्तश्लेष्माणौ च प्रधाने । शरदि पित्तं प्रधानं कफो ऽप्र
धानं । वसंते श्लेष्मा प्रधानं वातपित्ते अप्रधाने । तत्र प्रधानस्य प्राधान्येन चिकित्सा कर्त्त
व्या । साचाप्रधानानि षिद्धा विधेया । एवं चैकतेष्वपि । तथा चोक्तं । संसर्गे योगरीयान्
स्याद्दुपक्रमः सर्वैभवेत् । शेषदोषाविरोधेन सन्निपाते तथैव चेति । ८५॥८६ । अथांत
र्वेगस्य कृच्छ्रसाध्यस्य ज्वरस्य लक्षणमाह । अंतर्दाहोधिका तृष्णा प्रलापः श्वसनं भ्र
मः । संध्यस्थिशूलमस्वेदो दोषवर्च्चोविनिग्रहः । अंतर्वेगस्य लिंगानि कृच्छ्रसाध्यो मत
श्वसः । ८७ । प्रलापः असंबंधभाषणं । श्वसनं श्वासः । दोषवर्च्चोविनिग्रह दोषस्य वा
योः वर्च्चसः पुरीषस्य च विनिग्रहः अप्रवृतिः । ८८ । अथासाध्यस्य ज्वरलक्षणमाह
ज्वरः क्षीणस्य शूनस्य गंभीरो दैर्घ्यरात्रिकः । असाध्यो बलवान्यश्च केशसीमंतकृ

ज्वरः ॥ ८६ दैर्घ्यरात्रिकः बहुरात्रानुबंधी ॥ केशसीमंतकृत केशेषु सीमंतं यः करोति सः ॥
८७ अथ गंभीरस्य ज्वरस्य लक्षणमाह ॥ गंभीरस्तु ज्वरो ज्ञेयो ऽन्तर्दाहेन तृष्णया ॥ आ
नद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च ॥ ८८ आनद्धत्वेन विबद्धमलत्वेन ॥ ८९ अथ सा
मान्यज्वरे ऽपि कर्णमूलशोथस्यासाध्यत्वादिकमाह ॥ ज्वरस्य पूर्वं ज्वरमध्यतो वा ज्वरां
ततो वा श्रुतिमूलशोथः ॥ क्रमादसाध्यः खलु कष्टसाध्यः सुखेन साध्यो मुनिभिः प्र
दिष्टः ॥ ९० श्रुतिमूलशोथः कर्णमूलशोथः ॥ ९० अथारिष्टभूतानां ज्वराणां लक्षण
माह ॥ हेतुभिर्बहुभिर्जातो बलिभिर्बहुलक्षणः ॥ ज्वरः प्राणांतकृद्यश्च शीघ्रमिंद्रियनाश
नः ॥ ९१ हेतुभिः कारणैः बलिभिः प्रबलैः ॥ बहुलक्षणः संपूर्णलक्षणः ॥ यश्च शीघ्रमिं
द्रियनाशन इति उत्पन्नमात्र एव चिकित्स्यमानो यो इंद्रियाणां चक्षुरादीनां शक्तिं यो

नाशयति सर्वं इत्यर्थः ॥ ८१ ॥ विसंज्ञस्ताम्यते यस्तु शेते निपतितोपि च । शीतार्दितोंतरुष्णश्च ज्व
रेण म्रियते नरः ॥ ८२ ॥ विसंज्ञः विगतज्ञानः ताम्यते मुह्यते शेते निपतितोपि च यत्रापि च
शाद्दणग्नार्थी ॥ निपतित एव तिष्ठतीत्यर्थः ॥ न चोत्थातुं समर्थः ॥ शीतार्दितः बहिरिति शेषः
अंतरुष्णः अंतर्दाहवान् ॥ ८२ ॥ यो हृष्टरोमा रक्ताक्षो हृदि संघातशूलवान् । वक्त्रेणचैवोच्छ्व
सिति तं ज्वरो हंति मानवं ॥ ८३ ॥ हृष्टरोमा रोमांचयुक्तः ॥ हृदि संघातशूलवान् हृदये सान्नि
पातिकशूलवान् ॥ वक्त्रेणचैवोच्छ्वसतीत्यत्रैवकारेण नासिकोच्छ्वसनस्य व्यवच्छेदः ॥
८३ ॥ हिक्काश्वासतृषायुक्तं मूढं विभ्रांतलोचनं । संततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्व
रः ॥ ८४ ॥ मूढं मोहयुक्तं विभ्रांतलोचनं चलितनेत्रं ॥ संततोच्छ्वासिनं निरंतरश्वासं क्षपय
ति समापयतीत्यर्थः ॥ ८४ ॥ हतप्रभेंद्रियं क्षाममरोचकनिपीडितं । गंभीरं तीक्ष्णवेगार्त्तं

॥३१॥

ज्वरितं परिवर्जयेत् ॥ ७५ ॥ हतप्रभाणि हतशक्तीनि स्वविषयाग्राहिणीति यावत् इंद्रिया
णि चक्षुरादीनि यस्य तं क्षामं क्षीणं ॥ गंभीरतीक्ष्णवेगार्त्तं गंभीरउक्तलक्षणः ॥ तीक्ष्ण
वेगः अतिदुःसहवेगः ताभ्यामार्त्तं दुःखितं ॥ ७५ ॥ अथ विषमज्वरस्यारिष्टमाह ॥ आ
रंभाद्विषमो यस्य यस्य वा दैर्घ्यरात्रिकः क्षीणस्य चातिरूक्षस्य गंभीरो हंति स्यतं ॥
७६ ॥ यस्य पुंसः आरंभाद्विषमः प्रथमोत्पत्तेरेव विषमः ॥ न तु ज्वरोत्सवस्य ॥ यस्य दै
र्घ्यरात्रिको वा ज्वरः ॥ यस्य क्षीणस्य अतिरूक्षस्य च गंभीरो वा ज्वरो भवति तं विष
मो दैर्घ्यरात्रिको गंभीरश्च हंतीत्यर्थः ॥ ७६ ॥ उक्त्वा तादिज्वराणां धातुविशेष ॥ दू
ष्यतयाधिकलक्षणानि भवंति अतस्तानाह ॥ गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ
रसस्थे तु ज्वरे तिंग दैन्यं चास्योपजायते ॥ ७७ ॥ गुरुता गात्राणां ॥ हृदयोत्क्लेशः हृद ३१ ॥

यस्य दोषस्य उपस्थितत्वमन्तमिव रसस्य हृदयस्थानत्वात् दैन्यं ग्लानं तचित्तत्वं छि
रक्तनिष्ठीवनं दाहो मोहः छर्दनविभ्रमौ प्रलापः पिटिकातृष्णा रक्तेऽमा मेऽज्वरे नराणां
टिप रक्तनिष्ठीवनं मुखेन रक्तोद्गमनं मोहः चिगतः चित्तता प्रलापः असंबद्धभाष
णं टिप पिंडिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता उष्मांतर्दाहविक्षेपौ ग्लानिः स्या
न्मांसगेज्वरे टिप पिंडिका जान्वधोभागे मांसपिंडस्तस्योद्वेष्टनं दंडादिना पीडनेनेव
वेदना सृष्टमूत्रपुरीषता मूत्रपुरीषयो बहुत्वं उष्माबहिः दाहोंतः विक्षेपः हस्तादि
चालनं टिप मःसंस्वेदस्तृषा मूर्छा प्रलापच्छर्दितेचकाः दौर्गंध्यंचतथाग्लानिर्मेदःस्थे
चासहिष्णुता १०० मसंस्वेदः मेदोमलत्वात् दौर्गंध्यं गात्रे तद्विकृतत्वैव असहिष्णु
तावेदनासहत्वं ग्लानिः शरीरस्य शिथिलता १०० मेदोस्थ्यां कूजनं श्वासो विरेकः

॥ ३२ ॥

छर्दिरेव च ॥ विक्षेपणं च गात्राणां विद्यादस्थिगते ज्वरे ॥ अस्थिभेद इव भेदः भंगवत्पीडे
त्यर्थः कूजनं कूथनं १ ॥ तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ॥ अंतर्दाहो महाश्वा
सो मर्मछेदश्च मज्जगे ॥ २ तमःप्रवेशनं अंधकारप्रविष्टस्येवार्थासंवित्तिः ॥ महा
श्वासः श्वासाधिकारे वक्ष्यमाणः ॥ मर्मशब्देन हृदयमुच्यते प्राधान्यादिति कार्तिकः
तस्य छेद इव मर्मछेदः ॥ २ मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ॥ शेफसस्तब्धता
मोक्षः शुक्रस्य तु विशेषतः ॥ ३ तत्र तेषु रसादिधातुगतज्वरेषु मध्ये शुक्रस्थानगते
ज्वरे मरणं प्राप्नुयादिति योज्यं ॥ शेफसः मेढ्रस्य ॥ विशेषत इति पदेन शुक्रस्य बा
हुल्येन विसर्गः ॥ अन्यस्य स्त्व्यादेरपि बाहुल्येन वदंति ॥ ३ अथ चिकित्साविशेषा
र्थं ज्वरस्यामपच्यमाननिरामलक्षणान्याह ॥ लालाप्रसेको हृल्लासो हृदयाशुद्ध ॥ ३२ ॥

रोचकौ ॥ तंद्रालस्याविपाकास्यंवैरस्यं गुरुगात्रता ॥ ४ ॥ क्षुन्नाशो बहुमूत्रत्वं स्तब्धता
बलवान्ज्वरः ॥ आमज्वरस्य लिंगानि न देयात्तत्र भेषजं ॥ ५ ॥ लालाप्रसेकः लालास्रा
वः ॥ हृल्लासः उपस्थितवमनमिव ॥ हृदयाशुद्धिः हृदयं पूर्णमिव ॥ क्षुन्नाशः छिका
याअभावः ॥ अपक्वाद्रुतस्तुधातस्यानाशः ॥ भेषजं पाचनादि ॥ ६॥५ ज्वरवेगोधिक
स्तृष्णाप्रलापः श्वसनंभ्रमः ॥ मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणं ॥ ६ ॥ अधिको
ज्वरवेगः पपासातिर्यालापश्वासायां दीपस्य ॥ ६ ॥ क्षुत्क्षामता लघुत्वं च गात्राणां ज्वरमा
र्दवं ॥ दोषप्रवृत्तिरुत्साहो निरामज्वरलक्षणं ॥ ७ ॥ क्षुत्क्षुधा क्षामता कृशत्वं ज्वर
मार्दवं ज्वराल्पत्वं ॥ दोषप्रवृत्तिः गुदेन वायोः प्रवृत्तिः ॥ ७ ॥ अथ मुंधारज्वरलक्षणमा
ह ॥ ज्वरो दाहो भ्रमो मोहो ह्यतीसारो वमिस्तृषा ॥ अनिद्रा मुखवरागस्य जिह्वातालु

३३

विशेषणं ॥ ग्रीवायां परिदृश्यंते स्फोटकाः सर्षपोपमाः ॥ ७ ॥ अनिद्रा निद्राभावः मुखे
रागः मुखस्य रक्तता ॥ ७ ॥ अथ ज्वरविमुक्तेः पूर्वरूपमाह दाहः स्वेदो भ्रमस्तृष्णा कंपो
विड्भेदसंस्रता कूजनं चातिवैगंध्यमाकृतिर्ज्वरमोक्षणे ॥ ८ ॥ विड्भेद मलप्रवृत्तिः ॥
कूजनं कुत्थनं वैगंध्यं दुर्गंधता गात्रस्य ज्वरमोक्षणे ज्वरविमुक्तौ आकृतिर्लक्षणं
ननु दोषक्षयं विना न व्याधिनिवृत्तिः क्षीणश्च दोषः कथमेवंविधं रूपं करिष्यति
उच्यते कश्चिद्भावः क्षीणोपि विनाशकाले स्वशक्तिं दर्शयतीति ॥ ८ ॥ अथ ज्वरमुक्ति
लक्षणमाह स्वेदो लघुत्वं शिरसः कंडूः पाको मुखस्य च ॥ क्षवथुश्चान्नकांक्षा च ज्वर
मुक्तस्य लक्षणं ॥ १० ॥ स्वेदो घर्मागमनं स्रोतसां स्फोटत्वात् लघुत्वं गात्रस्य शिरसः
कंडूरिति सर्वो हि ज्वरस्तैजसः विरोध्यपगमात् सौम्यश्लेष्मा लब्धबलः सन् शिर ३३

सिस्वस्थानेऽसाधारणलक्षणं । केऽजनयतिव्याधिमहिम्नानान्यत्रकफस्थानइति
वदंति । पाकोमुखस्यचेतिज्वरोष्मकौपितपित्तात् । क्षवथुःछिक्का । एतच्चदाहमारभ्य
लक्षणंत्रिदोषाद्विज्वरेभवंतिनसर्वत्र तथाचएतदनंतरंभालुकिःप्राह । त्रिदोषजे
ज्वरेह्येतदंतर्वेगेचधातुगे । लक्षणंमोक्षकालेस्यादन्यस्मिंस्तस्वेददर्शनमिति १०
अपज्वरमुक्तस्यनियमानाह । व्यायामंचव्यवायंचस्नानंचंक्रमणंतथा । ज्वरमुक्तो
नसेवेतयावन्नबलवान्भवेत् ११ अपिज्वरविमुक्तस्यस्नानंकुर्यात्सुनेज्वरं । तस्मा
ज्ज्वरविमुक्तोपिस्नानंविषमिवत्यजेत् १२ बलवत्यग्निवपुषांयावन्नप्रकृतिर्भवे
त् तावज्ज्वरेणमुक्तोपिवर्जनीयानिवर्जयेत् १३ प्रकृतिःस्वभावः १३ इतिज्वरनि
दानंसमाप्तं अपज्वरचिकित्सा आमाशयस्थोहत्वाग्निंसामोमार्गान् । पिधापयन्

३४

विदधातिज्वरंदोषस्तस्माल्लंघनमाचरेत् ॥ अस्यायमर्थः ॥ यतो हेतोरामाशयस्थो दो

षो वातपित्तश्लेष्मरूपः स्वहेतुदुष्टः अग्निं हत्वा आच्छाद्य सामः अपक्काहाररसास्स

२ हितः मार्गांसि मार्गं पिधाययन् पिदधत्सन्ज्वरंकरोतीति तस्माद्धेतोः ज्वरी लंघनमाच

रेदित्यर्थः ॥ तस्य गुणानाह ॥ लंघनं कफमेदोघ्नमामज्वरहरं लघु ॥ पाचनं दीपनं वा

तहरं स्फूलातिसारजित् ॥ केषांचिल्लंघनस्य निषेधमाह ॥ तद्धिमारुतक्षुत्तृष्णामु

खशोषभ्रमान्वितैः ॥ नकार्यंगुर्विणीबालवृद्धदुर्बलभीरुभिः ॥ नक्षुधाध्वश्रम

क्रोधकामशोकभयज्वरे ॥ वैद्यः यतं रक्षन् लंघनं कारयेदित्याह ॥ यत्ताविरोधिना

चैनं लंघनेनोपपादयेत् ॥ बलाधिष्ठानमारोग्यं यदर्थोयं क्रियाक्रमः ॥ अयमर्थः ॥

एनं ज्वरिणं बलाविरोधिना अनतियलक्षयकारिणा लंघनेन उपपादयेत् उपा ३४

चरेत् । कुत इति चेत्तत्राह । यदर्थः यस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः । तदा
रोग्यं बलाधिष्ठानं बलाश्रय मित्यर्थः । ज्वरी लंघने पिपासितं पिबेदित्याह सुश्रुतः । तृषितो
मोहमायाति मोहात्प्राणान् विमुंचति । अतः सर्वास्ववस्थासु न कश्चिद्वारि वारयेत्
अवशेष्य ये यम पिपासितं ज्वरी किंचिद्वारयन् पिबेदित्याह सुश्रुत एव । ज्वरेने आमये कोष्ठे
मंदेऽग्नावुदरे तथा । अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये । अरोचमधुमेहे च पानी
यं मंदमाचरेत् । प्रसेके मुखप्रसेके । मंदमाचरेत् अल्पं पिबेत् । तच्च ज्वरी शीतलं न पिबे
दित्याह सुश्रुत एव । नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे । हिक्कायां स्नेहपाने च शीतं
वारि विवर्जयेत् । अत्र शीतं जलमक्वथितं निषिद्धं । तथा सति क्वथितं ग्राह्यमायातं ॥
अपोह्मोदकस्य तत्क्षणं गुणाश्च । क्वाथ्यमानं तु निर्वेगं निःफेनं निर्मलं तथा । अर्द्धा

वह्निसंपतोयं तदुष्णोदकमुच्यते ॥ ज्वरकासकफश्वासवातपित्तामममेदसां ॥ नाशनं वस्ति
संशोधि पथ्यमुष्णोदकं सदा ॥ निर्वेगं शमैः ॥ क्वथितस्य जलस्य शीतलीकरणविशेषे
गुणविशेषमाह सुश्रुतः ॥ शीतांबु तत्रिदोषघ्नं यदंतर्वाष्पशीतलं ॥ अंतरूक्षमनभि
ष्यंदिकमितदुज्वरहृल्लघु ॥ अंतर्वाष्पशीततं विहितमेव शीतलं ॥ अथ वातिकादि
ज्वराणां पाकावधिमाह ॥ वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः ॥ श्लैष्मिको द्वाद
शाहेन ज्वरः पाकमुपैति हि ॥ अथ ज्वरे सामान्यं भेषजप्रयोगसमयमाह ॥ ज्वरितं ष
डहे तीते लघ्वन्नं प्रतिभोजयेत् ॥ पाचनं शमनीयं वा कषायं पाययेत्तु तं ॥ अस्यायमर्थः
ज्वरितं षडहे तीते लंघनेन व्यतीते सति लघ्वन्नं सप्तमे अह्नि भोजितं लघ्वन्नं अष्टमे
ह्नि कषायं पाययेदित्यर्थः ॥ अत्र हेतुमाह चक्रदत्तः ॥ सप्तरात्रेण पच्यंते सप्तधातु

गतामलाः॥ निरामस्कततः प्रोक्तोज्वरः प्रायोष्टमेदिने॥ अथकषायस्यतरुणज्वरे निषे
धमाह॥ मुख्यभेषजसंबंधो निषिद्धस्तरुणज्वरे॥ तोयपेयादिसंस्कारैर्नीर्दोषं तस्यभे
षजं॥ मुख्यभेषजं क्वाथस्तस्यसंबंधः पानं॥ यतउक्तं॥ नकषायंप्रसंजंति भेषजस्तर
णज्वरे॥ कषायेणाकुलीभूतादोषाजेतुंसुदुस्तराः इति॥ आकुलीभूताः स्वमार्गंपरित्य
जेतस्ततोगताः॥ अन्यच्च॥ नच्यवंते नपच्यंते कषायैस्तंभितामलाः॥ तिर्यग्विमार्ग
गावातेघोरंकुर्युर्विषमज्वरं॥ अतः शृतशीतंषडंगंजलंतरुणज्वरेदेयमित्याहसुश्रुतः
मुस्तापर्पटकोदीच्यछत्राख्योशीरचंदनैः॥ शृतंशीतंजलंदद्यात्तृड्दाहज्वरशांतये
छत्राधान्यकं॥ यतआहनिघंटौधन्वंतरिः॥ कस्तुंबरुःस्याल्लिकाचछत्राधान्यंवितु
न्नकमित्यादि॥ चक्रदत्तवंगसेनादयस्तुछत्रास्थानेनागरंपठंति॥ नागरंकुटकम

३६

पिनात्र पित्तजनकमधुरपाकित्वादिति तेषामभिप्रायः ॥ तीसदेतु नागरस्थाने पर्पटकं
एतस्य प्रक्रिया ॥ चंदनैरित्यत्र सहार्थे तृतीया ॥ तेन कर्षमात्रैर्मुस्तादिभिः षड्भिरामैरेव च
क्षुलैः सहितं प्रस्थमात्रं जलं शृतं जलमेव पक्वे यत्नमर्धपक्वं पश्चाच्छीतं शीतलीकृतं द
द्यादित्यर्थः ॥ अत्र चंदनं श्वेतं ग्राह्यं न तु रक्तं ॥ तत्तु कषाये तैलयोरेव प्रयोक्तुमुक्तं ॥
कषायतैलयोः प्रायो युज्यते रक्तचंदनमिति वचनात् ॥ किंच क्षुधार्दितानां लंघनं नका
रयेदित्याह ॥ ज्वरादौ ज्वरमध्ये वा ज्वरांते वा विशेषतः ॥ क्षुधार्दितेषु दातव्यं दिनांते भो
जनं लघु ॥ पचेत्प्रथममाहारं दोषानाहारसंक्षये ॥ दोषक्षये नलो धातून्प्राणान्धा
तुक्षये सति ॥ बलवतस्तु तरुणज्वरे तं लंघनं कारयेदेवेत्याह ॥ तरुणं तु ज्वरं पूर्वं लंघने
न क्षयं नयेत् ॥ दोषे क्षीणे समुद्रेऽग्नौ ततो दद्याच्च पाचनं ॥ अथ पाचनस्य लक्षणं ३६

माह ॥ पत्यचत्यामआहारं पचेदामरसंचयत ॥ पदपक्कान्यचेद्दोषांस्तद्धिपाचनमुच्यते
अथसामान्यतःसर्वज्वरेषुपाचनकषायमाहसुश्रुतः ॥ नागरंदेवकाष्ठंचधान्यकं
बृहतीद्वयं ॥ दद्यात्पाचनकंपूर्वंज्वरितेभ्योज्वरापहं ॥ धान्यकंरोहिषंतद्वलामेउशीरं
ग्राह्यं ॥ बृहतीद्वयंबृहत्फलासूक्ष्मफलाचबृहती ॥ पद्माक्षुद्रांबृहतीचेतिकंठकारी
द्वयं ॥ केचितधान्यकस्थानेधान्यकंपठंति ॥ इतिनागरादिसर्वज्वरेषुपाचनं ॥ अथ
सामान्यतोज्वरचिकित्सा ॥ गुडूचीधान्यकारिष्टपद्मकारक्तचंदनं ॥ एषांक्काथःसुप्र
सिद्धःसर्वज्वरहरःस्मृतः ॥ दीपनोदाहहृल्लासतृष्णाछर्द्यरुचीर्हरेत ॥ इतिगुडूच्या
दिक्काथः ॥ पटोलंपर्पटंमुस्तागुडूचीसकिरातका ॥ पटोलपंचकंचैतत्सर्वज्वरविना
शनं ॥ इतिपटोलपंचकं ॥ ब्र्ह्मीचविल्वचर्षीभूपयःसोदकेमेवच ॥ पचेत्क्षीरावशे

षं तत्वेयं सर्वज्वरापहं ॥ वृश्चीवः श्वेतपुनर्नवा ॥ वर्षाभूः रक्तपुनर्नवा ॥ तथाच मदन
पालः ॥ पुनर्नवः श्वेतमूलो वृश्चीरो दीर्घपत्रकः ॥ पुनर्नवा परा रक्ता वर्षाभू रक्त
पुष्पका इति ॥ पाकप्रकारमाह ॥ क्षीरमष्टगुणं द्रव्यात् क्षीरान्नीरं चतुर्गुणं ॥ क्षी
रावशेषं पातव्यं क्षीरपाके ह्ययं विधिः ॥ द्रव्यात् पलपरिमितात् ॥ इति वृश्चीरादि
क्षीरं सर्वज्वरेषु ॥ आमसंचित्रकः पथ्या पिप्पली सैंधवं तथा ॥ चूर्णितो यं गणो ज्ञेयः
सर्वज्वरविनाशनः ॥ भेदी हृचिकरः श्लेष्मजेता दीपनपाचनः ॥ इत्यामलक्यादि
चूर्णं सर्वज्वरेषु ॥ गुडूची पिप्पलीमूलं करणा तिक्ता हरीतकी ॥ नागरं देवकुसुमं
निंबत्वक् चंदनं तथा ॥ सर्वचूर्णस्य चार्द्धांशं कैरातं प्रक्षिपेत्सुधीः ॥ एतत्सुदर्श
नं नाम्ना त्रिदोषज्वरापहं ॥ ज्वरांश्च निखिलान् हन्यान्नात्र कार्य्या विचार

॥ ३७ ॥

णा ॥ इति लघुसुदर्शन चूर्णं ॥ दीप्याभयारामठवन्हि पिप्पल्याक्षार द्वयं जीरक युग्म कुस्मा ॥
फलत्रयं सैंचल सैंधवाभ्यां कृतं हि चूर्णं ज्वरनाशकरी ॥ इति दिप्यादि चूर्णं ॥ अमृतह
रजगंध अभ्रवलं त्वचूर्णं दुग्धी (चोक) दुरितदलितबीजं भागवृद्ध्या प्रदेयं ॥ सकलमपिविम
र्द्यं निंबुनीरेण खल्वे ज्वरगजमदहंत्री मुद्गमाना वटीयं ॥ इति ज्वरगदमदहंत्री वटी ॥
रसं विषं गंधक तालटंकणांक द्वित्रि जैपाल फलत्रिकं समं ॥ विमर्द्य भृंगस्य रसेन कल्पि
ता वटी ज्वरान् सर्वगदान्निहंति ॥ रोगोपदिष्टं त्वनुपानमत्र देया वटी तेन हि साभिष
ग्भिः ॥ पाश्चात्यदेशागतयोगिनेयमस्मानुं भवेन पश्यात् ॥ इति घोडाचोली गुटी ॥ एक युतानु
भागो रसो भागद्वयं पुद्रंच गंधकं ॥ विषस्य चत्रयो भागाश्चतुर्भागा हिमावती ॥ जैपाल:
णाः पंचभागानि निंबुद्रवविमर्द्दिताः ॥ कृमिप्रमिता वद्यः कार्य्याः सर्वज्वरच्छिदः ॥ एवं

३८

गवेरेण दातव्या वटिकैका दिने दिने ॥ जीर्णज्वरे तथा जीर्णे सामे वा विषमेपि वा ॥ सर्वज्व
रं निहंत्याशु दावो वनमिवानलः ॥ इति सर्वज्वरादि वटी ॥ हिंगुलं च विषं व्योषं टंकणं मा
गधी सिफा ॥ संचूर्ण्य भावयेत्सर्वं सुरसार्द्रकहेमभिः ॥ रसस्त्रिभुवनो कीर्तिर्गुंजैकार्द्रद्रवे
ण तु ॥ सर्वज्वरान्नाशयति सन्निपातांस्त्रयोदश ॥ इति त्रिभुवनकीर्ती रसः ॥ पारदं गं
धकं चैव समं गरजैर्विमर्द्दयेत् ॥ हिंगुलं च विषं व्योषं टंकणं मागधी समं ॥ मातुलिंगर
सैर्मर्द्यं रसो ह्यानंदभैरवः ॥ गुंजामात्रं प्रदातव्यः प्रातःकाले दिनत्रयं ॥ ज्वरमष्टविधं हं
ति प्रतिश्यादिमुपद्रवं ॥ एकाहिकं द्याहिकं च त्र्याहिकं च चतुर्थकं ॥ विषमं च त्रिदोषं च
हंति सत्यं न संशयः ॥ इति आनंदभैरवो रसः सर्वज्वरेषु ॥ शुद्धं सूतं विषं गंधं धूर्त्तबीजं
त्रिभिः समं ॥ चतुर्णां द्विगुणं व्योषं चूर्णं गुंजाद्वयोन्मितं ॥ आर्द्रकस्य रसैः किं वा जंबीर ३८

स्वरसं[illegible] सैर्युतं ॥ महाज्वरांकुशः सर्वज्वरघ्नः सन्निपातजित् ॥ इति महाज्वरांकुशो रसः ॥ स
र्वज्वरेषु ॥ अथ नवज्वरे रसः ॥ सूतो गंधश्च टंकणः सोषणाश्च समैः स्तुल्या शर्करा मत्स्यपित्तैः
भूयो भूयो मर्द्दयेत्तु त्रिरात्रं च ह्योदयः शृंगवेरद्रवेण ॥ तापे शीतं भोजयेत्तक्रभक्तं चेताका
ठं पथ्यमेतत्प्रदिष्टं ॥ अन्नैर्योगं हंति सद्यो ज्वरं तु पित्ताधिक्ये मूर्छितोयं विदध्यात् ॥ इति
उदकमंजरी रसो नवज्वरे ॥ सूतं गंधं विषं चैव टंकणं च मनःशिला ॥ एतानि टंकमात्रा
णि मरिचं लवङ्ग टंकणं ॥ कटुत्रयं टंकषट्कं खल्ले क्षिप्त्वा विचूर्णयेत् ॥ रसः श्वासकुठारोयं
श्वासः सर्वज्वरापहः ॥ इति श्वासकुठाररसः श्वासे सर्वज्वरेषु च ॥ रसं पलि विषतिंदुदं
ति बीजं त्रिवृद्दभयाच पत्राकं रोहिणीनां ॥ तनुकृतमपि विश्वतापहारि कनकरसेन र
जो नवज्वरघ्नः कनकरसेन धत्तूरस्य रसेन भावितमिति शेषः ॥ इति विश्वतापहरणो र

॥ ३८ ॥

सः नवज्वरे ॥ शुद्धं सूतं विषं गंधं खल्वे तावद्विमर्दयेत् ॥ सूतो न दृश्यते यावत् किंतु कज्जल

वद्भवेत् ॥ एषा कज्जलिका ख्याता यं हरीतकी वीर्यवर्द्धिनी ॥ नानानुपानयोगेन सर्वव्याध्यो

धिनाशिनी ॥ रक्तिकासंमितां तां तु मरिचजीरकसंयुतां ॥ गुंजाद्वयं सह हिंग्वाढ्यं भक्षयेद्रसप

र्पटी ॥ पिबेत् तदनुपानीयं शीततं चुलकत्रयं ॥ प्रत्यहं वर्द्धयेत् स्यात् एकैकां रक्तिकां भिषक्

नाधिकां दशगुंजातो भक्षयेत् तां कदाचन ॥ एकादशादिनारंभात् तां तथैवापकर्षयेत् ॥ एवमेतां

समश्नीयान्नरो विंशतिवासरान् ॥ ज्वरं च ग्रहणीं चापि तथातीसारमेव च ॥ कामलां पां

डुरोगं च शूलं प्लीहजलोदरं ॥ एवमादीन् गदान् हत्वा दृढः पुष्टश्च वीर्यवान् ॥ जीवेद्वर्षश

तं सांगं वलीपलितवर्जितः ॥ इति रसपर्पटी ॥ विडंगमुस्तत्रिफलामंजिष्ठादाडिमोत्पलैः ॥ कृष्

णामैलवालुकैलाभिश्चंदनामरदारुभिः ॥ बर्हिष्ठरजनीपर्णिनीसारिवाद्वयैः ॥ हरे ॥ ३८ ॥

एलकानतचंद्रतीपचातालीसपत्रकैः । चरावित्रुत्रासावृहतीमालतीपष्ठिपर्णीभिः ॥ एतैश्च का

र्षिकैः कल्कैर्घृतप्रस्थं विपाचयेत् ॥ चतुर्गुणेन पयसा द्विगुणेन जलेन च ॥ एतत्कल्याणकं

नाम सर्पिरुक्तं त्रिदोषनुत् ॥ विषमज्वरश्वासकासगुल्मोदरज्वरापहं ॥ इति कल्याणकं

घृतं ज्वरेषु ॥ नागरं चित्रकक्षारः पिप्पलीमूलचित्रकं ॥ कुस्माचपलिकान् भागान् घृत

प्रस्थे विपाचयेत् ॥ शृंगवेररसप्रस्थं मस्तुप्रस्थं तथैव च ॥ एकाहिकं द्याहिकं च त्र्याहिकं

च चतुर्थकं ॥ एतत्सर्वान्ज्वरान् हंति शूलं च हरते भृशं ॥ दुर्नामश्वासकासघ्नं चैतत् वराग्नि

वर्द्धनं ॥ इति नागरादिषट्पलघृतं सर्वज्वरेषु ॥ यवार्द्धकुडवं पिष्ट्वा मंजिष्ठार्द्धपलं तथा ॥

आम्लप्रस्थरसो निक्षिप्य तैलप्रस्थं निपाचयेत् ॥ एतत्प्रह्लादनं तैलं ज्वरदाहविनाशनं ॥

इति प्रह्लादनं तैलं ॥ लाक्षादशगुणाक्षाअरलावडक्षासचंदनं लोहितचंदनं च त्वक्पत्र

कं वारि मुराच मुस्ता प्रत्येकमेतानि पलोन्मितानि ॥ किरात तिक्त स्त्रिवृता सतिक्ता मृताक
टुका पर्पटकं कटुकाख्यः ॥ विडंग विश्वामलकानि रास्ना रसानि शृंगाह्लि सिंधुवाराः ॥ एता
नि देयानि पृथक् पलार्द्धमानानि सर्वाणि च भेषजानि कल्कानमीषां विदधीत गव्यदुग्धे
नवै सार्द्धतुलोन्मितेन तैलं तिलानां तु तुलानुमानं तैनैव कल्केन शनैः पचेत ॥ हन्याज्ज्वरा
न् तैलमिदं समस्तान् कुर्याद्धृतं वीर्य्यमतीव पुष्टिं ॥ विमर्द्दनाद्दाहपरिभ्रमं तं श्रमं श्रमं नये
त्सं जनयेत् द्युतिं ततो ॥ तथाप्यथामस्थिसमुद्भवामपि प्रहत्य निद्रां समुपार्जयेत्सुखं ॥
ज्वरहरणं मंजिष्ठा ॥ रसारास्ना ॥ इति लाक्षादितैलं सर्वज्वरेषु ॥ लाक्षा हरिद्रा मंजिष्ठा कल्कै
सौ तैलं विपाचयेत् ॥ षड्गुणेनारनालेन दाहशीतज्वरापहं ॥ इति लघुलाक्षादितैलं ॥ अथ वि
षमचिकित्सा ॥ तत्र वातज्वरचिकित्सा ॥ गुडूची पिप्पलीमूल नागरैः पाचनं स्मृतं ॥ या

४०

तज्वरे तथा पेयं कालिंगं सप्तमे हनि ॥ कालिंगं शृतं रौद्रयवं शृतं ॥ इति गुडूच्यादि पाचनं वात
ज्वरे ॥ शालिपर्णी चला द्राक्षा गुडूची सारिया तथा ॥ आसां क्वाथं पिबेत्कोष्णं तीव्रवातज्वर
च्छिदं ॥ इति शालिपर्ण्यादिः ॥ कारुणा रसो नाम तत्र चिह्नि विश्वानि दिग्धकासिद्धकं भूमि
निंबैः ॥ समस्तैरेवाचरितः क्वाथो हिताशिनां हंति गदानिमांस्तु ॥ ज्वरं मरुद्दुष्टिसमुद्भवं
तथा बलासजं चानलमंदतां च ॥ कंठावरोधं हृदयावरोधं स्वेदं चरोमांच हिमत्वमोहान्
इति कारुणादिक्वाथ ॥ शुंठिकं पर्पटो यासा भार्गी विश्वा गुडूचिका ॥ एभिः संसाधितं तोयं
तीव्रवातज्वरापहं ॥ इति शुंठिकादि ॥ शुद्धं हिंगुलकस्य कर्मस्तु तितं मारारिनारीरजसा वस्ता
वद्गमा पतितस्फटिकालंकार वस्त्र स्रुतं ॥ तावत्येव मनःशिला च विमला तावत्तथा टंक
णं शुंठी सूक्ष्ममिता कणा च मरिचं दिक्यातसंख्यो क्षकं ॥ विषादिवस्तु निशिलो परिष्वा

॥४१॥

द्विचूर्णयेद्वासरसिंहशोधयेच्च ॥ ततस्तु खल्वे रसगंधकौ च चूर्णयित्वा यामयुगं विमर्द्य ॥ कल्प
तरुर्नामधेयो यथार्थनामा रसेंद्रेषु ॥ समीरणश्लेष्मगदान् हरते मात्रास्य गुंजैका ॥ आ
र्द्रकेण सममेव भक्षितो हंति वातकफसंभवं ज्वरं ॥ श्वासकासमुखशोषशीततावह्निमां
द्यविरुचीश्च नाशयेत् ॥ नस्ये नाश्चैव हरति शिरोर्त्तिं कफवातजां ॥ मोहं महांतमपि च प्रसा
पं क्षयवृद्धिगुरुं ॥ इति कल्पतरू रसः ॥ सामान्यज्वरचिकित्सोक्तो महाज्वरांकुशः प्रदेयोत्र ॥
इति वातज्वरचिकित्सा ॥ अथ पित्तज्वरचिकित्सा ॥ कट्फलेंद्रयवारिष्टतिक्तामुस्तैः शृतं ज
लं ॥ पाचनं दशमे ह्निस्यात्तीव्रे पित्तज्वरे नृणां ॥ इति कटुफलादिपाचनं पित्तज्वरे ॥ लोध्रो
त्पलामृतापद्मसारिवाणां सशर्करः ॥ क्वाथः पित्तज्वरं हन्याद्यथा पर्पटोद्भवः ॥ इति
योगद्वयं ॥ द्राक्षाहरीतकीमुस्ताकटुकारूतमालकः ॥ पर्पटश्चकृतक्वाथपानं पित्त

॥४१॥

ज्वरापहः ॥ इति द्राक्षादिः ॥ पटोलयव धान्याकं मधुकं मधुसंयुतं ॥ हंति पित्तज्वरं दाहं तृष्णां
चातिप्रमाथिनीं ॥ इति पटोलादिः ॥ मुस्तापर्पटकोशीरगोस्तनीसमभागतः ॥ अष्टाव
शेषितः क्वाथो निपीतो मधुना सह ॥ पित्तज्वरं भ्रमं दाहं हंति छर्दिं न संशयः ॥ इति मुस्ता
दिः ॥ भूनिंबातिविषालोध्रमुस्तकं द्रव्यवामताः ॥ बालकं धान्यकं बिल्वं कषायो माक्षि
कान्वितः ॥ विड्भेदच्छासकासांश्च रक्तपित्तं ज्वरं हरेत् ॥ इति भूनिंबादिक्वाथः ॥ द्राक्षा चंद
न पद्मानि मुस्तातिक्तामृतापि च ॥ धात्रीवालमुशीरं च लोध्रं द्रव्य पर्पटाः ॥ परूषकं प्रि
यंगुश्च पद्मा सो वासकस्तथा ॥ मधुकं कुलकं चापि किराततो धान्यकं तथा ॥ एषां क्वाथो
निहंत्येव ज्वरं पित्तसमुत्थितं ॥ तृष्णां दाहं प्रलापं च रक्तपित्तं भ्रमं श्रमं ॥ मूर्छां छर्दिं
तथा शूलं मुखशोषमरोचकं ॥ श्वासं कासं च हृल्लासं नाशयेन्नात्र संशयः ॥ इति म

॥४२॥

हार्द्रक्षादिः ॥ ससितो निशि पर्युषितः प्रातर्धान्याकतंडुलक्कथः ॥ पीतः शमयत्यचिरादंतर्दाहं ज्वरं पैत्तं ॥ धान्याकतंडुलाः निस्तुषधान्याकानि ॥ इतिधान्याकक्काथः ॥ पित्तज्वरे तु कटुकीकल्कः शर्करयान्वितः ॥ प्रशस्यते पित्तदोषे सर्वोपद्रवनाशनः ॥ अत्र कटुकाया द्वादशमाषाः शर्करयाष्टत्वारोमाषा एवं कर्षः इति चरकः ॥ वैद्यव्यवहारे तु कटुकाशर्करयोः सम भागयोरेव कर्षः ॥ इति कटुकीकल्कः ॥ औडुंबरस्य नियसिः सितया दाहनाशनः ॥ छिन्ना सारः सितायुक्तः पित्तज्वरनिषूदनः ॥ इति योगद्वयं ॥ निंबपल्लवसंभूतरसफेनप्रलेपनात् ॥ तृड्दाहमोहाः प्रशमं यांति पित्तसमुद्भवाः ॥ मुद्गयूषोदनोदेयः सितया पैत्तिके ज्वरे ॥ हर्म्येषु भ्राभसंकाशे शशांककरशीतले ॥ मतयो रस्कसंसिक्ते स्वप्यात् पित्तज्वरी नरः ॥ पित्तज्वरे किं रसफाटलेपैः किं ॥४२॥

याकषायेरमृतैर्नकिंवा ॥ येयंप्रियायामुखमेकमेवलीलंचराजेनसदानुभूतं ॥ हारावली
चंदनशीतलानांसुगंधपुष्पांबरभूषितानां ॥ नितंबिनीनांसुपयोधराणामालिंग
नान्पाशुहरंतिदाहं ॥ इतिपित्तज्वरचिकित्सा ॥ अथश्लेष्मज्वरचिकित्सा ॥ बीजपूर
शिफापथ्यानागरग्रंथिकैःशृतं ॥ सक्षारंपाचनंश्लेष्मज्वरेह्यदशवासरे ॥ इतिबी
जपूरशिफादिपाचनं ॥ सिंदुवारदलक्काथंकणाढ्यंकफजेज्वरे ॥ जंघयोश्चबलेक्षी
णेकर्णेचविहितेपिवेत ॥ इतिनिर्गुंडीदलक्काथः ॥ यवानीपिप्पलीवासातथारवोव
सवल्कलं ॥ एषांक्काथंपिबेत्कासेश्वासेचकफजेज्वरे ॥ इतियवान्यादिक्काथः ॥ मरि
चंपिप्पलीमूलनागरंकारवीकणा ॥ चित्रकंकट्फलंकुष्ठंससुगंधिवचाशिवा ॥
कंटकारीजटाशृंगीयवानीपिचुमंदकः ॥ एषांक्काथोहरत्येवज्वरंसोपद्रवंकफात्

इति मरिचादिक्वाथः चपला चपला पद्मा नागरिका च यवकानलसंजनितं सलिलं श्वसने कसने हृदये ह्यसने कफजे तृषि गद्देऽपि पिबेच्च मुदे ॥ इति पिप्पल्यादिः ॥ भूनिंबनिंबचपलाघहती गुडूचीविश्वाभयाशठीशतपदीजनितः कषायः ॥ हन्याद्धतासजनितं ज्वरमाशु तीव्रं निश्वासकासवसतूलविकारभाजं ॥ इति भूनिंबादिः ॥ कलिंगरोहिणीनिशाकटुत्रिकेभकेसरं विचूर्णितं कफज्वरं निहंति कोष्णवारिणा ॥ इतींद्रयवादिचूर्णं ॥ कट्फलं च कणाशृंगीपौष्करं क्षौद्रसंमितं ॥ अयं लेहो निहंत्येषां श्वासकासकफज्वरं ॥ इति चतुर्भद्रिकावलेहः ॥ वातज्वराधिकारोक्तः कल्पतरुरसोऽपि श्लेष्मज्वरे दातव्यस्तस्य कफव्याधिहरत्वात् ॥ इति कफज्वरचिकित्सा ॥ अथ वातपित्तज्वरचिकित्सा ॥ वातपित्तज्वरे देयमौषधं पंचमेऽहनि ॥ किराततिक्तममृतां द्राक्षामामलकं शठी निकाथ्य

४३

सगुडं क्वाथं वातपित्तज्वरे पिबेत् ॥ इति किरातादिक्वाथः ॥ गुडूची पर्पटो मुस्तं किराततो विश्व।
भेषजं ॥ वातपित्तज्वरहरं पंचभद्रमिदं शुभं ॥ इति पंचभद्रक्वाथः ॥ त्रिफला शाल्मली रा
स्ना राजवृक्षोटरूषकैः ॥ श्रतमंबु हरत्याशु वातपित्तभवं ज्वरं ॥ इति त्रिफलादिक्वाथः ॥
जलदधान्यकिराततगुडूचिकानियमनः कटुकीचपटोलिका ॥ क्वथितमेभिरिदं सतिलं ह निंब.
रेत्यवरं न पित्तभवं ज्वरमुल्बणं ॥ इति मुस्तादिः ॥ मुद्गामलकेयूषस्तु वातपित्तज्वरे हितः ॥
इति वातपित्तज्वरचिकित्सा ॥ अथ वातश्लेष्मज्वरचिकित्सा ॥ वातश्लेष्मज्वरे देयमौष
धं नवमेहनि ॥ आरग्वधकणामूलमुस्तातिक्ताभयाकृतः ॥ क्वाथः शमयति क्षिप्रं ज्व
रं वातकफोद्भवं ॥ आमशूलप्रशमनो मेदीदीपनपाचनः ॥ इति आरग्वधादिः ॥ सिंही
पर्णानीछिन्नानां क्वाथः पुनर्नवया युतः ॥ कफवातज्वरश्वासशूलपीनसकासजित् ॥

४४ ॥

इति सिंहाद्यः ॥ कट्फलविषघ्नवचाघनयांसधान्यशिवाजलशृंगीसुराह्वैः ॥ भार्ङ्गीयुतैः क्व
थनं खलु पेयं वातकफघ्नं गरलोन्नयुचैषः ॥ इति कट्फलादिः ॥ किरातविश्वामृतवह्निसिं
हिकाकणाकणामूलरसोनसिंधुकैः ॥ कृतकषायो विनिहंति सत्वरं ज्वरं समीरात्सक
फात्समुत्थितं ॥ इति किरातादिः ॥ पिप्पलीभिः शृतं तोयमनभिष्यंदिदीपनं ॥ वातश्लेष्म
ज्वरहरं सेवितं प्लीहनाशनं ॥ इति पिप्पलीक्वाथः ॥ सूतकं टंकणं भागं गंधं शुद्धं समं सम
द्विगुणं सूतकाद्देयं जैपालं तुषवर्जितं ॥ सैंधवं मरिचं चिंचात्वक्क्षारो शर्करा पिच ॥ प्र
त्येकं सूततुल्यं स्याज्जंबीररैर्मर्द्दयेद्दिनं ॥ सूर्यशेखरनामायं रसो गुंजाद्वयोन्मितः ॥ भक्षि
तस्तस्ततोयेन वातश्लेष्मज्वरापहः ॥ इति सूर्यशेखररसः ॥ अथ पंचशीतज्वरे च योज्यः ॥
स्वेदो द्रुमे भस्मकुलत्थचूर्णानि पातनं शस्त्रमिति प्रवदंति ॥ जीर्णे शाकद्रोर्लेवरणस्य। ४४ ॥

भाजनंसंचूर्णितंस्वेदहरंसुधूलनात् ॥ महत्यायंचमूत्यान्नंसम्यक्सिद्धंचिकित्सकः ॥
सप्तमेदिवसेदद्याज्ज्वरेवातबलासजे ॥ इतिवातश्लेष्मज्वरचिकित्सा ॥ अथपित्तश्लेष्म
ज्वरचिकित्सा ॥ पित्तश्लेष्मज्वरेदेयमौषधंदसमेहनि ॥ गुडूचीनिंवधान्याकचंदनंकटु
रोहिणी ॥ गुडूच्यादिरयंक्वाथःपाचनोदीपनोहितः ॥ तस्मादाहारुचिछर्दिपित्तश्लेष्मज्वरा
पहः ॥ गुडूच्यादिक्वाथः ॥ कंटकार्यमृताभार्गीविश्वेंद्रयववासकं ॥ भूनिंवचंदनंमुस्तंप
टोलंकटुरोहिणी ॥ विपाच्यपाचयेत्क्वाथंपित्तश्लेष्मज्वरापहं ॥ इतिकंटकार्यादिक्वाथः
अमृताकटुकारिष्टपटोलघनचंदनं ॥ नागरेंद्रयवंचैतदमृताष्टकमीरितं ॥ कथितंसक
णाचूर्णंपित्तश्लेष्मज्वरापहं ॥ हृल्लासारोचकछर्दितृष्णादाहनिवारणं ॥ इत्यमृताष्ट
कं ॥ छिन्नरुहाहरिचंदनंनिंवधान्यकपद्मकजातकषायः ॥ छर्दिहिक्कृशानुजडत्वपिपा

साहंति च पित्तकफज्वरदाहं ॥ इति छिन्नरुहादिः ॥ सपत्रपुष्पवासाया रसः क्षौद्रसिता
युतः ॥ पित्तश्लेष्मज्वरं हंति सास्रपित्तं सकामलं ॥ अत्र वासाया रसोऽर्द्धपलपरिमितो
देयः ॥ मधुसितयोः प्रत्येकं कर्षः प्रक्षेप्यः ॥ पटोलधान्ययोर्यूषः पित्तश्लेष्मज्व
रापहः ॥ इति पित्तश्लेष्मज्वरचिकित्सा ॥ अथ सन्निपातज्वरचिकित्सा ॥ तत्र सामा
न्यचिकित्सामाह श्लेष्मनिग्रहमेवादौ कुर्यात्स्याद्धौ त्रिदोषजे ॥ निरस्ते श्लेष्मलि
ङ्गस्य स्रोतस्सूद्घाटितेषु च ॥ लाघवं जायते सम्यक्तस्माच्चैवोपशाम्यति ॥ लंघनं वालु
का स्वेदो नस्यं निष्ठीवनं तथा ॥ अवलेहोंजनं चैव प्राक्प्रयोज्यं त्रिदोषजे ॥ त्रिदोषजे
ज्वरे ॥ इति शेषः ॥ ननु क्रियायास्तु गुणालाभे क्रियामन्यां प्रयोजयेत् ॥ पूर्वस्यां शां
तवेगायां न क्रियासंकरो हित ॥ इति वचनेन क्रियासंकरस्य निषिद्धत्वात्कथ

मत्रनस्यनिष्ठीवनावसेहांजनानि युगपद्दीयंत इत्याशंकायामाह ॥ क्रियाभिस्तुल्य
रूपाभिः क्रियासांकर्यमिष्यते ॥ भिन्नरूपतयैतास्तु न हि कुर्वंति दूषणमिति ॥ तत्र
लंघनस्यावधिमाह ॥ त्रिरात्रं पंचरात्रं वा दशरात्रमथापि वा ॥ लंघनं सन्निपाते तु कु
र्याद्वारोग्यदर्शनात् ॥ लंघने त्रिरात्रादिविकल्प उल्वणत्वाद्यपेक्षया ॥ आरोग्यप्र
दर्शनादिति यावदारोग्यता दर्शनं स्यात्तावद्वा लंघनं कुर्यात् ॥ एतेन त्रिरात्राद्यवधे
रनियतत्वं सूचितं ॥ सन्निपातज्वरी पूर्वं सम्यग्लंघनमाचरेत् ॥ अतश्शीतं पिबेदंभः
समये भेषजं भजेत् ॥ सन्निपाते न तथ्यं तं पार्श्वरुक्कंठतालुशोषिणां ॥ यः पाययेज्जलं
शीतं स मृत्युः नररविग्रहः ॥ शीतं आक्कथितं ॥ अतंतु शीतं विहितमेव ॥ इति लंघनं
अथ वालुकास्वेदः ॥ खर्परभृष्टपटस्थितकांजिकसंसिक्तवालुकास्वेदः ॥ शमय

न्निपातकफामयमस्तकसूलांगभंगादीन् ॥ इतिवालुकाख्येदः ॥ अथनस्यं ॥ सैंधवंस्वे
तमरिचं सर्षपाः कुष्ठमेव च ॥ वस्तमूत्रेणसंपिष्टं नस्यं तंद्रानिवारणं ॥ श्वेतमरिचं
शिग्रुवीजं ॥ इतिसैंधवादिनस्यं ॥ मोहामयेनमुग्धं बोधयितुं यादृशः शक्तः ॥ कल्य
तरुनामधेयो रसोनतादृक्परं किंचित् ॥ इतिनस्यं ॥ सूतकं गंधकं तुल्यं धत्तूरफल
जैर्द्रवैः ॥ संमर्द्य दिनमेकं तु तत्तुल्यं ऊषणं क्षिपेत् ॥ उन्मत्ताख्यो रसश्चायं नस्यतः
सन्निपातजित् ॥ इत्युन्मत्ताख्यो रसोनस्ये ॥ अथनिष्ठीवनं ॥ आर्द्रकस्वरसोपेतं कटु
कत्रयसैंधवं ॥ आकंठं धारयेदास्ये निष्ठीवेच्च पुनः पुनः ॥ तेनास्यहृदयस्रोतोममन्या
पार्श्वशिरोगलात् ॥ लीनोप्याकृष्यते श्लेष्मा लाघवं चास्य जायते ॥ पर्वभेदज्वरोम
र्छानिद्राश्वाससगलामयाः ॥ मुखाक्षिगौरवं जाड्यमुत्क्लेशश्चोपशाम्यति ॥ सकृद्द्वि

स्विचतुःकुर्यादक्षादोषबलाबलं ॥ एतद्धिपरमंप्राहुर्भेषजंसन्निपातिनां ॥ इतिकवल
ग्रहः ॥ अथावलेहा ॥ कट्फलंपौष्करंशृंगीव्योषंयासश्चकारवी ॥ श्लक्ष्णचूर्णीकृ
तंचैतन्मधुनासहलेहयेत ॥ एषावलेहिकाहंतिसन्निपातंसुदारुणं ॥ हिक्काश्वासं
चकासंचकंठरोगंचनाशयेत ॥ एतद्यौज्यंकफोद्रेकेचूर्णमार्द्रकजैरसैः ॥ वासोपवा
सः ॥ केचिद्यास्तस्यानियवानींप्रक्षिपंति ॥ इयमवलेहिकाप्रायेणोर्द्ध्वजत्रुरोगहरत्वात्सा
यमुपयुज्यते ॥ इत्यष्टांगावलेहिका ॥ अथांजनं ॥ निस्तुषंजयपालस्यवीजंस्यात्
शार्ङ्गालिकं ॥ मरिचंपिप्पलीमूलंश्रणमात्रंविचूर्णयेत ॥ जंवीरनीरैरसकृत्सप्ताहं
मर्द्दयेद्दृढं ॥ रसोयमंजनेदत्तःसन्निपातंनियच्छति ॥ इतिजयपालाद्यंजनं ॥ शिरीष
वीजगोमूत्रकृष्णामरिचसैंधवैः ॥ अंजनंस्यात्प्रवोधायसरसोनशिलावचैः ॥ इति

८७

शिरीषबीजाद्यंजनं ॥ अंजनं सम्यगारब्धं मधुसिंधुशिलोषणैः ॥ प्रमोहघ्नो हि भवति
भाषितं भिषजांवरैः ॥ सिला मनःसिला उषणं मरिचं ॥ इत्यंजनं ॥ अभयाघनधान्यक
सिंहमुखीहरिचंदनपद्मकवत्सकजैः ॥ अमृताकटुकीकृतमालवकीजलविश्वग
लेनकृतं निसृतं ॥ पिप्पलीसहितं पेयं सन्निपाते च पाचनं ॥ प्रलापारुचिकासेषुश्वा
सविष्टंभछर्दिषु ॥ इत्यभयादि ॥ दशमूलीकषायस्तु सपौष्करकणान्वितः ॥ सन्निपा
तज्वरे देयः श्वासकाससमन्विते ॥ इति द्वादशांगः ॥ भूनिंबदारुदशमूलमहौषधाब्द
तिक्तेंद्रबीजधनिकेभकणाकषायः ॥ तंद्राप्रलापकसनारुचिदाहमोहश्वाससत्रिःदो
त्य षजनितज्वरनाशनः स्यात् ॥ इद्वादशांगः ॥ क्षुद्रापौष्करभूनिंबगुडूचीविश्वभेषजैः
पंचतिक्तकनामोयं क्वाथो हन्यात्रिधाज्वरं ॥ इति पंचतिक्तः ॥ सटीगुडूचीकटुरोहिणी

८७

घु

च ॥ कुलत्थभार्ङ्गिमहौषधं च ॥ भार्गीवचाकापुष्कररामसेनाः सप्त्याद्विको हंति च सन्निपा
तान् ॥ इति सप्त्यादिः ॥ अर्कीनेताकिराततामरतहरसनासिंदुवारोग्गंधातकी शिगु
पंचोषणगुग्गुलदर्पिता मार्कवारणांकषायः ॥ सद्यः स्तीव्रांस्त्रिदोषानपहरति घनुर्मा
रुतंदंतवंधं शैत्यंगात्रे गुणाढंघ्यसनकसनके सूतिवातरोगान् ॥ अर्कोर्कमूलं अ
नंता यवासकः ॥ रसना रास्नातकी री अरणी गुग्गुलदर्पिता अतिविषा ॥ इत्यर्कादिः
पञ्चानिकायचाशुंठीपिप्पलीकारवीतथा ॥ एतैरुद्धूलनं शस्तं त्रिदोषोत्थेज्वरे नृणां
इति पञ्चान्यादिरुद्धूलनं ॥ अंतस्यास्तरणं शस्तं सन्निपातभवे नृणां ॥ गंधेशटंकमरि
चं विषं धत्तूरजैद्रवैः ॥ दिनैसंमर्दितं शुष्कं पंचवक्त्रो रसो भवेत ॥ आर्द्रकस्य रसेनैष
दातव्यो रक्तिकामितः ॥ सन्निपातं ज्वरं घोरं नाशयेन्नात्र संशयः ॥ ईशः पारदः ॥ इ

त्रिपंचवक्त्रो रसः ॥ रसो गंधः करणा मूलं चव्यं गुंजं जयपालकं ॥ व्योषं च यारणात्वकं विषं च

द्रवं क्षिपेत् ॥ तांबूलरागतो मर्द्यं दिनं तांबूलपत्रयुक् ॥ दत्तो नवज्वरं हंति तापे शीतक्रि

या हिता ॥ सर्वज्वरे सन्निपाते दद्यीतामुंद्गिगुंजकं ॥ आरोग्यरागी नामायं रसः परमदुर्ल

भः ॥ इत्यारोग्यरागी रसः ॥ विषं त्रिकटुकं गंधं टंकणं मृतशुल्वकं ॥ धत्तूरस्य तु विजाती

हिंगुलं नवमं स्मृतं ॥ एतानि समभागानि दिनैकं विजयाद्रवैः ॥ मर्द्दयेच्चणकाकारक

त्त्व्या वटिकाथ सा ॥ भक्षितव्या निपातव्यो रचिमूलकषायकः ॥ मृतसंजीविनी नाम्ना

सन्निपातज्वरांतकृत् ॥ इति मृतसंजीवनीवटिका सान्निपातज्वरे ॥ भस्मशोदुषनिष्कं

स्यादारण्योपलसंभवं ॥ मरिचं निष्कमात्रं च विषं निष्कं विचूर्णयेत् ॥ रसो भस्मेश्व

रो नाम्ना सान्निपातज्वरांतकृत् ॥ एकगुंजामितो भक्ष्य आर्द्रकस्य द्रवेण हि ॥ इति भ

स्मेज्वरोरसः ॥ कट्फलंत्रिफलादारुचंदनंसपर्पटकं ॥ कटुकापद्मकोशीरंविपचेत्का
थिकंजले ॥ त्रिदोषदाहतृष्णाघ्नंपानमात्रेणपूजितं ॥ दीर्घकालज्वरार्त्तानामेतत्स्याद
मृतोपमं ॥ कर्षैककट्फलाशुण्ठीरांतानांसमुदितानांजलेप्रस्थमितेपिपचेत्अर्द्धशेषं
जलंकृत्वादेयं ॥ इतिकट्फलादिपानं ॥ दुस्पर्शागोक्षुरक्षुद्रासिद्धमाहारमर्पयेत् ॥ दोष
घ्नांतिबलाग्निर्थीत्रिदोषज्वरिणेभिषक् ॥ दुस्पर्शोपवासः ॥ पाचनोदीपनःसोस्मोलाज
मंडोयतःस्मृताः ॥ दशमूलादिसिद्धःससन्निपातज्वरेहितः ॥ इतिसामान्यचिकित्सा ॥
अथसंधिगादीनांसन्निपातज्वराणांत्रयोदशानांविशिष्टाचिकित्सा ॥ तत्रसंधि
गस्यचिकित्सा ॥ शटीसुरतरूत्तमास्थिरदारुरास्नाःसमाःसुनागरसुधान्विताःपिब
शतावरीसंयुताःमृदुज्वलनपाचिताःसहपुरेणसंधिगरुव्यथापहतयेवथ्याशि

शिरसे वनं मा कृथाः ॥ उत्तमा त्रिफला ॥ स्थविरदारु विधारा इति लोके ॥ सुधा गुडूची ॥ पु
रो गुग्गुलुः ॥ यथा कच्चकच्छुरा सर्वा साहचरा मता ॥ मंगुरा सुरा वृक्षघननागराः तेरुणाद
रुतास्नावुरोः ॥ यथा तरुणा भीरुभिः सह भवंति संधिगृह्यव्यपो रुजं डिमल्कमभ्रमणाप
क्षघातद्रुहः ॥ कवचः पर्पटकः कच्छुरा यवासः ॥ मंगुरा अतिविषा सुरा वृद्ध देवदारु
अतरुणा दारुवृद्धदारु पुरो गुग्गुलुः ॥ यथा वहहंती ॥ तदत्ता भेदं तीचगा ग्राह्या समानेग्र
णात्वात् तरुणारंडः ॥ भीरुः शतावरी ॥ सुरदारु सटी सुधा लता सुवहाः पुंठिपुताः
ष्प ताजले सपुनः शमयंति सेविताः सततं संधिगतं सदागतिं ॥ सुवहा रास्ना ॥ मुस्तौ
रंडप्राणदा वाणदारु छिन्ना रास्ना भीरु कर्चूर तिक्ता ॥ वासा विष्णा पंचमूली पुगा स्ना
हन्वान्म न्वा स्तेभ संधिगृहार्तीः ॥ प्राणदा हरीतकी ॥ वाणः नीलपुष्पः सहचरः ॥ ४८

प्र

सूतं गंधं शिलां तालं मर्दयेत्तिंदुकैर्जैर्द्रवैः ॥ तिमातन्यर्कपत्राणि यंत्रे भस्माभिधे क्षिपेत् ॥ पा
मार्धौ ज्वालयेदग्निं स्वांगशीतं समुद्धरेत् ॥ विषोषणं चतुर्थांशं दत्वा यत्नमितावटी ॥ देया
दासीरसैर्वह्नरस्सक्षेत्रतन्यमैरवः ॥ दत्वार्द्रकरसैः सर्वसन्निपातवि

तिक्ताकटुकी ॥ अर्पातकचिकित्सा ॥ रहापहापद्मतमुस्तयारिज्वरारिपूषादिगदापहारि
ज्वरछिदंजीवितदं च निंत्यं मत्स्यं जयं चेतसि चिंतयस्व ॥ रल्लक्षेत्रतके ॥ प्रतं लंघनादिनिय
मं ॥ भिषग्भिरिति निर्णीतं सन्निपातं तकाभिधे ॥ भेषजं चान्हवीनीरं वै योगोविंदएव
हि ॥ अथ स्वल्पदाहस्य चिकित्सा ॥ उशीरचंदनोदीच्य द्राक्षामलकपर्पटैः ॥ शृतं शीतं जलं
दद्याद्दाहतृड्ज्वरशांतये ॥ इति षडंगपानं ॥ अत्र साशितोकंडितधान्याकक्काथसे देयः ॥
घातकृत ॥ मृ मैगतं विसंज्ञं च शीतार्तं तंद्रितं नरं ॥ तस्सरणाद्बोधयेद्दाहे कुर्याच्छीतोपचारका
न् ॥ मीनमाकनकतिकातः हिषमोरजसौकरं पित्तपंचकं ॥ अनेन भावितः कापि देयक्षेत्रतन्यमैर

प्रशमयति दाहमचिराद्दधियुक्तकर्कंधुपत्रवैर्लेपः ॥ लेपो मलयजहिमकरनिंबस्त्रैलसक्त
पिष्टैर्वा ॥ हिमकरः कर्पूरः ॥ उत्तानसुविस्तृतस्य गंभीरताम्रकांस्यादिपात्रे निहिते च नाभौ ॥ शी
तांबुधारा च हुताशपतंती निहंति दाहं त्वरितं ज्वरं च ॥ शीतांभसानुशातशष्ट्रविलोडितेन ग
व्येन चंदनयुतेन घृतेन दिग्धः ॥ दाहज्वरी सकमलोत्पलमाल्यधारी क्षिप्रं विशेत्सलिलको
ष्ठमनल्पकालं ॥ कांजिकार्द्रपटेनावगुंठनं दाहनाशनं ॥ अथ गोतक्रसंस्विन्नशीतलोत्क
तया सह ॥ अथ चित्तविभ्रमस्य चिकित्सा ॥ करंजोषणोग्रालवणोत्तमानि करंजबीजक्ष
ल्दामलानि ॥ पथ्याक्षसिद्धार्थकहिंगुशुंठीयुतानि वस्तांबुविमिश्रितानि ॥ पिष्ट्वागु
टीयं नयने विधेया प्रचेतनेति प्रथितान्विताप्ती ॥ चित्तभ्रमापस्मृतिभूतदोषशिरो।
क्षिरोगभ्रमनाशहेतुः ॥ वस्तांबु छागमूत्रं ॥ कुमोद्भवतरोरंभोगुडपिप्पलीकणान्वितं

निहितंनसिन्नूनंस्याच्छ्रितमूत्रविनाशनं ॥ कुंभोद्भूतरोरंभः आगस्तिवृक्षपत्रकलरसः
मृद्वीकामरदारुमत्स्यशकलामुस्तामलक्यो मतापथ्यारेवतरामसेनकरजोराजीफलैः
संयुताः ॥ हन्युश्मितरजोयद्देहेरद्लाद्राक्षापटोलीपयःपथ्यापर्पटराजवृक्षकटुका
शंखकपुष्पयःश्रुताः ॥ मृद्वीकाद्राक्षा ॥ मत्स्यशकलाकटुकी ॥ आरेवतःआरग्वधः ॥ राम
सेनकःकिराततिक्तकः ॥ रजःपर्पटः ॥ राजीफलःपटोलः ॥ योगांतरमाह ॥ हद्देहेरद्लाब्राह्मी
पयःपालकं ॥ शंखकपुष्पीशंखपुष्पी ॥ इतियोगद्वयं ॥ अपसीतांगस्यचिकित्सा ॥ भास्य
न्मूतंजीरकष्योषभार्गीव्याघ्रीपुंठीपुष्करंगोजलेन ॥ सिद्धंसद्यःशीतगात्रातिमोह
श्वासश्लेष्मोद्रेककासान्निहंतिभास्यन्मूतमर्कमूलं ॥ रसविषमरिचमहेशप्रिय
फलमस्यैकमत्रचतुर्वसुभिः ॥ भागैर्मितमुकूतेनमिदमनमितस्वेदशैत्यहरं ॥ इतिर

॥ ५१ ॥

साधुकूलंनं ॥ ब्राह्मवचाक्किरीयसत्रमूषणंजरणं त्रिषा ॥ आकारकरभःकुष्ठं सर्वंगं तम
सेनकः ॥ मद्दीकातत्समाकाप्यकौलंमधुगुडैर्वटी ॥ पीतांगं सन्निपातेच मूर्छांस्विदं
विनाशयेत् ॥ किरीटीशंखपुष्पी ॥ असल्केसरं त्रिषाएला ॥ इतिब्राह्मादिगुटी ॥ अथ
तंद्रिकस्यचिकित्सा ॥ छुद्राम्रतानागरयोष्करारिष्टतानिपीतानिशिवायुतानि
प्रुंठीकरणागस्तिरसोषणांनितस्पेनतेंद्राविजयोत्सरणानि ॥ मरिचकचवचंपचाव
चारुकरूमिहरनागराविरीगवाक्ष्यः ॥ छगलकजलकल्कितानि तांतंनसिनिहितान
नुतंद्रिकंजयंति ॥ कचःचालकाः ॥ पचपचादारुहरिद्रा ॥ रुकुकुष्टं रूमिहरःविंडंगः ॥
शर्वरीहरिद्रा ॥ गवाक्षीइंद्रवारुणी ॥ तुरंगतालालवणोत्तमेंदुमनः ॥ शिलामागधिका
मधूनि ॥ निजोजितान्यक्षिणिनिष्म्रितंद्राकृतंद्रासनिद्रांचिनिवारयंती ॥ लवणो ॥ ५१ ॥

त्तमं सैंधवं ॥ रंडुः कर्पूरः ॥ निद्रां अतिनिद्रां ॥ अथ कंठकुब्जचिकित्सा ॥ फलत्रिकव्यूषण
मुस्तकद्वीकलिंगासिंहाननशार्वरीभिः ॥ क्वाथः कृतः कृंततिकंठकुब्जं कंठीरवः कुंज
रमाशु यद्वत् ॥ इति फलत्रिकादिक्वाथः ॥ किरातकटुकाकणाकुटजकंटकारीसटीकलि
दुक्लिस्तिमाभयाकटुककेटफलांभोधरैः ॥ विषामलकपुष्करनलकुलीरशृंगीवचैषे
महौषधसत्वैरयं जयति कंठकुब्जं गणः ॥ शटीकर्चूरः ॥ कलिद्रुः विभीतकः ॥ कलिमं दे
वदारु कटुकं मरिचं ॥ विषा अतिविषा ॥ पुष्करं पुष्करमूलं ॥ वृषः वासकः ॥ वृषा
दिभिः किंविशिष्टैः महौषधसत्वैः ॥ महौषधस्य सत्विभिः एतैः सहितेन महौष
धेनेत्यर्थः ॥ अथ कर्णकस्य चिकित्सा ॥ प्रलेपस्तमस्तं नयत्यल्पमेकः समुद्रिक्त
शोथं च रक्तावसेकः ॥ विपक्वं च रास्त्रक्रियायूयजित्साव्रणात्वं गतं चद्रुतं तच्चि

५२

कित्सा ॥ अस्यंतकर्णकेरुकः प्रलेपः अस्तंनाशंचैनयति ॥ तच्चिकित्साव्रणचिकित्सा
निशाविशालामयमालिसंर्थदार्वीगृदीमूलकृतःप्रलेपः ॥ प्रभाकरक्षीरयुतःप्रभा
यायस्तःसमस्तोप्यपकर्णकघ्नः ॥ इतिनिशादिलेपः ॥ कुलत्थःकटुफलंशुंठीकारवी
चसमांशकैः ॥ सुखोष्णंलेपनंकार्यंकिर्णमूलेमुहुर्मुहुः ॥ इतिकुलत्थादिः ॥ गैरिक
कटितीक्ष्णशुंठीकटुफलैःसवचैःसमैः ॥ उष्णैकांजिकेसंपिष्टैःप्रलेपःकर्णमूलनुत्
इतिगैरिकादिलेपः ॥ शिग्रुराजिकयोःपिष्ट्वाकर्णमूलंप्रलेपयेत् ॥ कर्णमूलभवः
शोथस्तेनलेपेनसाम्यति ॥ इतिशिग्रुबीजादिः ॥ भार्गीजयाङ्कुकैःकरकंटकोरिक
दुत्रिकोग्राघनकुंडलीभिः कुलीरशृंगीकटुकारास्नाभिःकृतःकषायःकिलकर्ण
कघ्नः जयागनियारीइतिलोके ॥ उग्रांवचा ॥ रसारास्ना ॥ इतिभार्ग्यादिकाथःकर्ण ॥ ५२ ॥

मूले त्रिकटुत्रिफलानिंबरोहिण्णीदर्भमूलजः ॥ कषायः कर्णिके हंति सत्संगरव

दुर्मीतिं ॥ इति त्रिकट्वादिः ॥ अथ भुग्ननेत्रचिकित्सा ॥ फलत्रयं मुस्तपटोलतिक्ताधान्या

कदेवद्रुमनिंबमेभिः ॥ सिद्धः कषायो विनिहंति भुग्ननेत्रं समोहं गुणमर्थनेन ॥ इति

फलत्रयादिः ॥ किरातमरिचं क्षौद्रैः पिप्पलीतालकर्णान्वितैः ॥ भुग्ननेत्रं जयेदाशु वि

हितं नयनांजनं ॥ इति किराताद्यंजनं ॥ अथ रक्तष्ठीवितचिकित्सा ॥ रोहिषधन्वयवा

सकेयासापर्पटगंधलताकटुकाभिः ॥ शर्करपासममेषककषायः ॥ क्षतजष्ठीविनउ

दितउपायः ॥ गंधलताप्रियंगुः ॥ पद्मकचंदनपर्पटमुस्ताजातिवरालूरणचंदनवारि

शीतकनिंबयुतं परिपक्वं वारिमवेदिहशोणितहारि ॥ शीतकं यष्टीमधुकं ॥ इति

रक्तष्ठीविनि ॥ मधुकमधूकपरूषकपायपद्मचंदनपद्मवदारुसनायः ॥ श्रीपर्णी

॥५३॥

फलत्रीतकषायःससितइहस्याद्रक्तजयाय ॥ पत्त्रवंपत्रकं ॥ सनाथःसप्रधानः ॥ श्रीप
र्णीगंभारी ॥ अथप्रलापकस्यचिकित्सा ॥ सतगरवरतिक्तारेवतांभोदतिक्तानलदत्तुर
गंधाभारतीहारहूलः ॥ मलयजदशमूलीशंखपुष्पःसुपक्काःप्रलपनमुपहन्युःया
नेतोनातिदूरात् ॥ वरतिक्तोत्रपर्पटः ॥ नतुमहानिंबः ॥ नेतराद्गुरोधात् नलदःलोमज्जकं
तद्लाभादुशीरंग्राह्यं ॥ भारतीब्राह्मी हारहूरा द्राक्षा ॥ सांत्वनैरंजनैर्नस्यैस्तैःस्रोतोऽस्ति
म मिरसेवनैः ॥ सर्वतोविकृतंचित्तंस्वप्रकृतिमानयेत् ॥ अथजिव्हकस्यचिकित्सा
किरातत्तिक्ताकुलककल्कतिंजकर्चूरकूष्माक्टैतैलयुक्तोः ॥ अस्मद्रवैःसंशमयेद्रस
सोदोषांस्ततोदशारथियथायं ॥ आकुलकृत् आकरकरहा इतिलोके कलिंजंकुलिज
न इतिलोके अम्लद्रवःबीजपूरादिरसः ॥ इतिकिरातादिकयेलः ॥ प्लानूपर्णीमालूरं ५३

मूलामयमधुस्नुतं ॥ शंखपुष्पीसहितासेव्यावाचां विशुद्धये ॥ शालूरपर्णीब्राह्मी
मालूरमूरैः सविल्वमूलं ॥ आमयः कुष्ठं शंखपुष्पी शंखपुष्पी ॥ शालूरपर्णीदिर
वतेहा ॥ स्थूलनागरपुष्करामृततालब्राह्मीवचा सुजाता भार्गीयासकयासंतोयसुर
सा कोपेनपेञ्जितकं ॥ पिप्पलीचर्मविभावरीयुगवराचत्सादतीवारिद्रव्याग्नी निंब
पटोलपुष्करजटाहृद्रोगहृन्मिर्यक्षितः ॥ पुष्करं पुष्करमूलं ॥ सुजाता गंधपलाशीका
श्मीरेणसिद्धा सुरसातुलसी ॥ पिप्पल्यादियोगांतरः ॥ चर्मपर्पटः ॥ विभावरीयुग्मं हरिद्रा
दारुहरिद्रा च ॥ वरात्रिफला ॥ रुक्कुष्ठं ॥ इति योगद्वयं ॥ अथाभिन्यासस्य चिकित्सा
श्रृंगीभार्गीभयाजाजीकरणाभूनिंबपर्पटैः ॥ देवदारुवचाकुष्ठपासकट्फलनाग
रैः ॥ मस्तधान्याकतिक्तेंद्रयवपाठाहरेणुभिः ॥ हस्तिपिप्पल्यपामार्गपिप्पलीमूल

५८

चित्रकैः ॥ विशालारग्वधारिष्टशटीवाकुचिकाफलैः ॥ विडंगरजनीदार्वीयवानीद्वय
संयुतैः ॥ समांशैर्विहितः क्वाथो हिंग्वार्द्रकसमन्वितः ॥ अभिन्यासज्वरं घोरं हंति तं
द्रां च तक्षणात् ॥ प्रमोहं कर्णमूलं च सन्निपातांस्त्रयोदश ॥ हिक्कां श्वासं च कासं चेत
था सर्वानुपद्रवान् ॥ भृंग्यादिक्वाथः ॥ कंटकारिकाशिलामेदपाठासैंधवनागरैः ॥ क्वा
थो बिल्वफलैरंडजयायुक्तैः प्रकल्पितः ॥ सन्निपातं जयेद्दोषो भिन्यासमतिदारुणं
शूलाद्युपद्रवांश्चैव मेघानिव महानिलः ॥ इति कंटकारिकादिक्वाथः ॥ इति त्रयोदश
सन्निपातचिकित्सा ॥ अथागंतुज्वरचिकित्सा ॥ आगंतुजे ज्वरे नैव नरः कुर्वीत लं
घनं ॥ किं तु दीप्ताग्नये तत्र दद्यान्मांसरसौदनं ॥ अभिघातज्वरे युंज्यात्क्रियामुष्ण
विवर्जितां ॥ कषायं मधुरं स्निग्धं यथादोषमथापि वा ॥ अभिघातज्वरोऽनस्ये

५८

स्नानाभ्यंगेन सर्पिषः ॥ रक्तावसेकैर्मेधैश्च तथा मांसरसौदनैः ॥ मेध्यैर्मेधायैर्हितैः

व्यधवंधश्च मात्यध्वभंगाभ्रंश समुद्भवान् ॥ ज्वरानुपाचरेत्सर्वं क्षीरमांसरसौदनैः

व्यधस्ताडनं भंगः छेदभेदादिकः ॥ भ्रंशो वृक्षादितः पतनं ॥ अध्वश्रांतेषु चाभ्यंग

दिवानिद्रां च कारयेत् ॥ औषधीगंधविषजौ विषपित्तप्रवाधनैः ॥ जयेत्कषायैर्म

तिमान् सर्वगंधकृतैर्भिषक् ॥ सर्वगंधं यथा ॥ चातुर्जातककर्पूरकंकोलागरुकुंकुमं

लवंगसहितं चैव सर्वगंधं विनिर्दिशेत् ॥ क्रोधजे पित्तजित्काम्यैनार्थ्यैः सद्वाक्यमे

व च ॥ आश्वासनेष्टलाभेन वायोः प्रशमनेन च ॥ हर्षणैश्च शमं यांति कामशोकभय

मनो

ज्वराः ॥ कामैरर्थोः धैर्यश्च पित्तघ्नैश्चाप्युपक्रमैः ॥ सद्वाक्यैश्च शमं याति ज्वरः क्रोधसमु

द्भवः ॥ कामे कामाविशेषैः ॥ मनोघ्नैः ॥ धिक्कारादिभिः भयजनकवचनैर्वा ॥ कामात्क्रोधज्व

५५

तेनश्चेत्क्रोधात्कामज्वरस्तथा ॥ यातिताभ्यामुभाभ्यांतुकामक्रोधज्वरक्षयाः ॥ यातिभ्या
मुभाभ्यांमनसिनिगृहीताभ्यांकामक्रोधाभ्यां ॥ भूतविद्यासमुद्दिष्टैर्बंधावेशनता
डनैः ॥ जयेद्भूताभिषंगोत्थंमनःसांत्वैश्चमानसं ॥ ताडनैरित्यस्यस्थानेकेचित्तर्जनै
रितिपठंति ॥ सहदेव्यायामूलंविधिनाकंठेनिबद्धमपहरति ॥ एकद्वित्रिचतुर्भिर्द्वि
वसैर्भूतज्वरंपुंसां ॥ अभिचाराभिशापोत्थौज्वरौहोमादिभिर्जयेत् ॥ दानस्वस्त्यय
नातिथ्यैरुत्पातग्रहदुष्टिजौ ॥ इत्यागंतुज्वरचिकित्सा ॥ अथविषमज्वरचिकित्सा
ज्वराश्चविषमाःसर्वेसन्निपातसमुद्भवाः ॥ अथोल्बणस्यदोषस्यतेषुकार्य्यंचिकि
त्सितंविषमेप्यप्यकर्तव्यमूर्ध्वंचाधश्चशोधनं ॥ स्निग्धोष्णैरन्नपानैश्चशमयेद्वि
षमज्वरं ॥ कालिंगकःपटोलस्यपत्रंकटुकरोहिणी ॥ पटोलंसारिवामुस्तंपाठाकटु

॥५५॥

करोहिस्त्री ॥ निंबः पटोलं त्रिफला मृद्वीका मुस्त वत्सकौ ॥ किराततिक्तममृता चंदनं विश्व
भेषजं ॥ गुडूच्यामलकं मुस्तमर्द्धश्लोकसमापनाः ॥ कषायाः क्रममेत्याहुः पंच पंच वि
धं ज्वरं ॥ कालिंगाः इंद्रयवाः वत्सकः कुटजः ॥ चंदनमत्र रक्तचंदनं ॥ पंचविधं संततस
तताऽन्येद्युष्कतृतीयकचतुर्थकरूपं ॥ इति कषायपंचकं क्रमेण संततादिषु ॥ मार्कंडी
वातपथ्या च मृद्वीका स्थूलजीरकं पाचनं शृतं मेतेषां देयं च विषमज्वरे ॥ मार्कंडी भू
मिचरी ॥ इति मार्कंड्यादि ॥ महाबलामूलमहौषधाभ्यां क्वाथो निहन्याद्विषमज्वरं हि
शीतं सकंपं परिदाहयुक्तं विनाशयेत् द्वित्रिदिनप्रयोगात् ॥ इति महाबलादिः ॥ गो
स्तनी वराविश्वधान्यकैः क्वाथितं शृतं पाचनं मतं ॥ द्राक्षकं परं भेषजोत्तमं योजये
पटोलत्रिफलानिंबद्राक्षाशम्याकवासकैः क्वाथः सितामधुयुतो जयेद्दाहिकं ज्वरं ॥

५६

त्सदा सर्वकर्मणि ॥ इति द्राक्षादिः ॥ मुस्तामलकगुडूचीविश्वौषधकंटकारिकाक्काथः

पीतः सकणाचूर्णः समधुर्विषमज्वरं हंति ॥ इति मुस्तादिः ॥ तिलतैललवणयुक्तो

कल्को लशुनस्य सेवितः प्रातः ॥ विषमज्वरमपहरते वातव्याधीनशेषांश्च ॥ इति

रसोनकल्कः ॥ नलिकाशालपर्ण्यातां चूर्णं च सितया सह ॥ पाचने रेचने चोसस

लिलैश्च गुडैः समं ॥ इति नलिकादिचूर्णं ॥ कालाजजीतु सगुडा विषमज्वरनाशि

नी ॥ मधुना चाभयालीढा हंत्याशु विषमज्वरं ॥ कालजाजी किंचिद्दग्धा गुडतुल्या

कर्षमिता भक्षणीया ॥ इति योगद्वयं ॥ अमृतायाः शतं चूर्णं वासससा परिशोषितं

पृथक षोडश भागाः स्युर्गुडमाक्षिकसर्पिषां ॥ यथाग्नि भक्षयेदेतन्नरो हितमि

ताशनः ॥ नास्य कश्चिद्भवेद्व्याधिर्नजिरापलितं न च ॥ नज्वराविषमा नैव मेहो ना

५६

नीलरक्तकं ॥ नयनेत्रकृतारोगाः परमेतद्रसायनं ॥ मेधाकरं त्रिदोषघ्नं प्रयोगादस्य
बुद्धिमान् ॥ जीवेद्वर्षशतं श्रीमान् यथैवादितिजस्तथा ॥ इति गुडूच्याः कल्पः ॥ हरीतकी
तत्क्वक्तुद्दारकाणां पलं भवेत् ॥ पलद्वयं करग्राह्यं ठीगुडूचीगोक्षुरोवती ॥ सहदेवा
विडंगं च प्रत्येकं पलसम्मितं ॥ मधुना मोदकान् कृत्वा स्वादनं ज्वरमयो हति ॥ काशं
श्वासं मलस्तंभं वन्हिमांद्यं नियच्छति ॥ इति हरीतक्यादिमोदकः ॥ क्षौद्राद्द्विगुणितं
सर्पिर्घृताद्द्विगुणा पिप्पली ॥ सिता च द्विगुणा तस्याः क्षीरं देयं चतुर्गुणं ॥ घातुजीतं
क्षौद्रतुल्यं यस्ताकुपश्चिमोदकान् ॥ धातुस्थां ज्वरजरान् सर्वान् श्वासं कासं च पांडु
तां ॥ धातुक्षयं वन्हिमांद्यं पिप्पलीमोदकोजयेत् ॥ इति पिप्पलीमोदकः ॥ त्रिभिर
थपरिवृद्धं पंचभिः सप्तभिर्वा दशभिरपि विवृद्धं पिप्पली वर्द्धमानं ॥ इति पिप्पलि

पुमानयस्तस्यनश्यासकासज्वरजठरगदार्शोंचातरक्तक्षयाःस्फः ॥ ताःक्षीरपिष्टाः।
क्षीरेदत्ताहारेणयातव्याः ॥ तथाचवाग्भटः ॥ क्रमवृद्ध्यादशाहानिदशपैप्पलिकं
त्विदं ॥ वर्द्धयेत्पयसासार्द्धंतथैवापनयेत्पुनः ॥ पिष्टास्ताबलिभिःसेव्याःश्रृतामध्य
बलैर्नरैः ॥ चूर्णिताहीनबलिनांहितामधुसमाप्लुताः ॥ त्र्यादिवृद्धिर्यथापाकफवृद्धि
दुग्धवृद्धिर्यथाग्निबलं ॥ निंबछदंदशपलंमूषणंचपलत्रयं ॥ त्रिफलात्रिपलाचै
वचैवत्रिपलंलवणत्रयं ॥ क्षारयोर्द्विपलंचैवयवानीपलपंचकं ॥ सर्वमेकीकृतंचू
र्णंप्रत्यूषेभक्षयेन्नरः ॥ एकाहिकंद्व्याहिकंचत्र्याहिकंचचतुर्थकं ॥ सततंसंततंघोरं
त्रिदोषोत्थंज्वरंजयेत् ॥ इतिनिंबादिचूर्णं ॥ द्राक्षामृताशटीश्रृंगीमुस्तकंरक्तचंदनं
नागरंकटुकापाठाभूनिंबःसदुरालभः ॥ उशीरंधान्यकंपद्मंबालकंकंटकारिका ॥ पु

ष्करं पिचुमंदच्छदं दशांगमिदं स्मृतं ॥ जीर्णज्वरारुचिश्वासकासक्षयप्रणाशनं ॥
इति द्राक्षादिकाथो जीर्णज्वरे ॥ लाक्षाष्टकं क्काथयित्वा जलस्य चतुराढकैः ॥ चतुर्थांशं
शृतं नीत्वा तैलप्रस्थं विनिक्षिपेत् ॥ मस्त्वाढकं च गोदध्नस्तथैव विनियोजयेत् ॥ शतपुष्
पामश्वगंधां हरिद्रे देवदारु च ॥ कटुकां रेणुकां मूर्वां कुष्ठं च ॥ इति पिप्पलीचर्द्धमान
मधुयष्टिकां ॥ मंजिष्ठां पद्मकोशीरं रक्तद्रां मांसीं च षामते ॥ चंदनं मुस्तकं रास्नाकर्ष
प्रमाणतः ॥ कल्कीकृत्य क्षिपेत्तैले ततो मृद्वग्निना पचेत् ॥ सिद्धं तैलं वस्त्रपूतं शुभे पा
त्रे निधारयेत् ॥ तस्याभ्यंगात्प्रणश्यंति सर्वे विविषमज्वराः ॥ कासश्वासप्रतिश्याय
त्रिकपृष्ठकटिग्रहान् ॥ वातपित्तमपस्मारमुन्मादान् यक्षराक्षसान् ॥ कंडूशूलं च दौ
र्गंध्यं गात्राणां स्फुटनं जयेत् ॥ पुत्रगर्भा भवेदस्या गर्भिण्यभ्यंगतो ध्रुवं ॥ इति महा

५८

लाक्षादितैलं जीर्णज्वरे ॥ अथ संततादीनां विशिष्टा चिकित्सा ॥ त्रायंती कटुकानंतासारि
वाभिः शृतं जलं ॥ संतताख्ये ज्वरे देयं वातादीनां निवृत्तये ॥ इति त्रायमाणादिः ॥ पटो
लाब्दवृषातिक्तासारिवाभिः शृतं जलं ॥ सतताख्ये ज्वरे देयं वातादीनां निवृत्तये ॥ वृषा
वहद्दंती एरंडपत्रविटपा तद्दलाभे दंती च ग्राह्या ॥ समानगुणत्वात् ॥ इति पटोलादिः
सततके ॥ पटोलेंद्रयवानंतापथ्यारिष्टामृताजलं ॥ क्वथितं तज्जलं पीतं ज्वरं सततकं
जयेत् ॥ अनंता सारिवा ॥ अरिष्टो नींबः जलं वालकं ॥ इति पटोलादिक्वाथः ॥ सततज्व
रे ॥ द्राक्षापटोलनिंबाब्दशक्राह्वात्रिफलाशृतं ॥ जलं जंतुः पिबेत्क्षिप्रमन्येद्युर्ज्वरशां
तये ॥ शक्राह्वः इंद्रयवः ॥ इति द्राक्षादिः ॥ अन्येद्युष्के कर्मसाधारणं त्यक्त्वा विशे
षोक्तचिकित्सितैः ॥ भिषजा प्रतिकर्त्तव्यौ तृतीयकचतुर्थकौ ॥ उशीरं चंदनं मु

५८

स्तागुडूचीधान्यनागरं ॥ अंभसा क्वथितं पेयं शर्करामधुयोजितं ॥ ज्वरे तृतीयके पुंसां तृ
ष्णादाहसमन्विते ॥ इति उशीरादिक्वाथस्तृतीयज्वरे ॥ स्थिरातामलकीदारुशिवाव्या
घ्रमहौषधैः ॥ सितामधुयुतः क्वाथश्चातुर्थकहरः परः ॥ स्थिरा शालिपर्णी तामलकी
भूधात्री ॥ शिवा हरीतकी व्याघ्री वासा ॥ इति शालिपर्ण्यादिक्वाथश्चातुर्थज्वरे ॥ दुग्धेन त्रि
फलापीता हंति चातुर्थिकं ज्वरं ॥ मुस्तापाठानिशाक्वाथश्चातुर्थिकज्वरापहः ॥ इति यो
गद्वयं चतुर्थके ज्वरे ॥ अगस्तिपत्रस्वरसेन नस्यं निहंति चातुर्थकमुग्रवीर्यं ॥ शिरीष
पुष्पस्वनिशाद्वयस्य कल्केन वा ततघृतसंयुतेन ॥ इति नस्यं ॥ सततादिविपर्यया।
णां विषमज्वराणां चिकित्सा सततादीनामिव कर्त्तव्या ॥ शीताभिभूते पुरुषे कुर्याच्छी
तहरीं क्रियां ॥ दाहाभिभूते तु विधिं दध्याद्दाहनाशनं ॥ आच्छादनैर्बहुतैर्गुरुभिः क

वि

५९

चा

का

वस्त्रादिभिः ॥ तूलवत्या महाशीतं शीतादिज्वरिणो हरेत् ॥ तेस्तनाभ्यां सुपीनाभ्यां पीवरोरु
र्नितंबिनी ॥ युवतिर्गाढमालिंगेत्तेन शीतं प्रणश्यति ॥ कांतासंसर्गसंजातं तत्स्मी सीतेनि
वारिते ॥ प्रल्हादं स्वविज्ञाय पपपक्तं कारयेत्स्त्रियं ॥ ततो दाहे तु संजाते पत्रैरेरंडसंभवैः
शीतलैर्भूरितैर्देहे दाहतस्यापनोदयेत् ॥ तालकं शुक्तिकाचूर्णं तुल्यं तत्रौभयोरपि
नवमांसं च तुल्यं स्यात्मर्दयेत्कन्याद्रवैः ॥ तत्तु संपुष्टकमुपलैर्वन्यैर्गजपुटे पचेत् ॥ शीतं
तं चूर्णयेच्चूर्णं गुंजामात्रं सितायुतं ॥ प्रभाते भक्षयेत्तेन याति शीतज्वरः क्षयं ॥ यांतिभ
वृतिकस्यापि कस्यापि न भवत्यपि ॥ एकेन दिवसेनैव शीतज्वरहरं परं ॥ मध्याह्ने सम
ये पथ्यं भक्तं शिखरिणीतथा ॥ इति मृतभैरवरसः ॥ एककर्षं भवेत्तालं द्विकर्षं तुत्थकं
भवेत् ॥ षट्कर्षं भस्मशुक्तीनां चूर्णमेकत्र कारयेत् ॥ धत्तूरपत्रस्वरसैर्मर्दयेद्याम

५९

हिपुत्ताम्भोजनितःकषायःशीतज्वरंभोनिधिकंभजन्माधारागुडूची ॥ मंगंवलंगकं इति
दद्रुप्रादिःशीतज्वरे ॥ क्षुद्राधान्यकशुंठीभिर्गुडूचीमुस्तपद्मकैः ॥ रक्तचंदनभूतिंवपटो
लयवपुष्करैः ॥ कटुकैंद्रयवारिष्ठभार्गीपर्पटकैःसमैः ॥ क्वाथंप्रातर्निषेवेतसर्वंशीत
ज्वरच्छिदं ॥ इतिक्षुद्रादिःशीतज्वरे ॥ सजीरकंगुडंभक्षेत्सगुडांवाहरीतकीं ॥ गुडार्द्रकंच
भक्षेद्वासगुडान्वातिलानपि ॥ तथाचत्रिफलाक्वाथंसगुडंविषमातुरः ॥ इतियोग
पंचकं ॥ पीतोमरिचचूर्णेनतुलसीपत्रजोरसः ॥ द्रोणपुष्पीरसोवापिनिहंतिविषमज्व
रं ॥ इतियोगद्वयं ॥ मनःशिलासैंधवपिप्पलीनांचूर्णंसतैलंसप्तभागभजां ॥ नेत्रांजनंत
द्धिहितंमुनीद्रैःसुखायपुंसांविषमज्वरेषु ॥ इतित्र्यंजनंविषमज्वरे ॥ सोमंसानुचरंदे
वंसमातृगणमीश्वरं ॥ पूजयन्प्रयतःशीघ्रंमुच्यतेविषमज्वरान् ॥ सोमंडमपासे

हितं ॥ अथ प्रलेपकस्य चिकित्सा ॥ प्रलेपके प्रयुंजीत श्लेष्मज्वरहरीं क्रियां ॥ अथ जीर्णज्व
रस्य चिकित्सा ॥ जीर्णज्वरी नरः कुर्यान्नोपवासं कदाचन ॥ लंघनात्संभवेत्क्षीणो ज्वरस्तु
स्याद्बलीयतः ॥ पुराणेपि ज्वरे दोषाः पथ्यैः पुनस्तथा ॥ लंघयेत्तत्र तं पश्चात्सर्वव
त्कारयेत्क्रियां ॥ अथ पूर्ववत ॥ निदिग्धिकानागरकामृतानां क्वाथं पिबेन्मिश्रितपि
प्पलीकं ॥ जीर्णज्वरारोचककासशूलश्वासाग्निमांद्यार्दितपीनसेषु ॥ हंत्यूर्ध्वजान
यं प्रायः सायं तेनोपयुज्यते ॥ इति कंटकार्यादिक्वाथः ॥ जीर्णज्वरे ॥ पिप्पलीचूर्णसं
युक्तः क्वाथः छिन्नोद्भवोद्भवः ॥ जीर्णज्वरकफध्वंसी पंचमूलकृतोथवा ॥ इति योगद
यं ॥ अमृतायाः कषायं तु शीतलीकृतमीरितं ॥ मधुपादयुतं पीतं जीर्णज्वरहरं परं
इत्यमृताक्वाथः तुं श्रुतं ॥ पिप्पलीमधुसंमिश्रां गुडूचीस्वरसं पिबेत ॥ जीर्णज्वरे कफ

चंदनाशर्करयान्विता च ॥ अथ पक्वरे तस्याश्चिकित्सा ॥ दंतशठं बीजपूरकं दाडिमं बदरैः
सचुक्रैकैर्वदने ॥ ते योजयति पिपासामथ पाकजां तगुटीमुखांतस्था ॥ शीतं पयः क्षौद्रयुतं नि
पीतमाकंठमाश्चेव तद्वद्वमेच्च ॥ तर्षप्रकर्षप्रशमाय वक्त्रे दध्याद्गुडक्षौद्रयवाग्रलाजान्
अथ पक्वज्वरातीसारस्य चिकित्सा ॥ ज्वरातीसारयोरुक्तं भेषजं पथ्यकं पृथक् ॥ न तन्मि
लितयोः कार्यमन्योन्यं वर्द्धयेद्यतः ॥ अयमभिप्रायः ॥ ज्वरहरमनुलोमनं भवति ॥ अ
तीसारहरं स्तंभनं भवति ॥ अतः परस्परविरुद्धत्वात्पृथगुक्तं भेषजं मिलितयोर्न कार्यं
अतस्तौ विशेषोक्तचिकित्सितैः प्रतिकुर्वीत ॥ लंघनमेकं मुक्त्वा न चान्यदस्तीह भेषजं
बलिनः समुदीर्णदोषनिचयं तस्माच्चयेतथाशमयेत ॥ एतदुभयोरुक्तं विशेषात्तद
नुकथ्यते ॥ दशांशं षोडशांशं वा शतांशं वाथ तज्जलं ॥ सुशीतं पाचनं ग्राहि दीपनं दो

६४

पः ॥ ताम्रमृत्ती दुरालभा ॥ पद्माभार्ग्गी ॥ रोहिणीकटुकी ॥ शैलमल्लीकुटजस्तस्य वीजं इंद्रयवः
अत्र चचतुर्भद्रिकाख्यं गायते हौदेयौ ॥ वन्योपलाग्नितापितदात्रस्याग्रेण पंजरे दाहः
अपहरति श्वासामयमसंशयं भाषितं मुनिभिः ॥ अथ ज्वरोपद्रवभूतायां मूर्छायाश्चि
कित्सा ॥ आर्द्रकस्य रसेनैस्यं मूर्छायामाचरेन्नरः ॥ अंजनं च प्रयुंजीत मधुसिंधुशि
लोषरोः ॥ शीतांभसाक्षिसेकः सुरभिर्धूपः सुगंधिपुष्पं च ॥ मृदुतालवृंतवातः कोम
लकदलीदलस्पर्शः ॥ अथ ज्वरोपद्रवभूतायां अरुचेश्चिकित्सा ॥ अरुचौ मातुलुंगस्य
केसरं साज्यसैंधवं ॥ धात्रीद्राक्षासीतानां च कल्कमास्ये च धारयेत् ॥ अत्र दाडिमच
र्वणमपि ससैंधवं कार्यं ॥ अथ ज्वरोपद्रवभूतायाश्छर्द्याश्चिकित्सा ॥ काथो गुडूच्याः
समधुः सुशीतः पीतः प्रशांतिं वमनस्य कुर्यात् ॥ विण्मक्षिकाणां मधुनावलीढा स

६३

कारकीर्तितं ॥ तथा नारायणं तैलं जीर्णज्वरहरं परं ॥ अथ वातबलासकचिकित्सा ॥
वातश्लेष्मज्वरोक्ता स्यात्क्रिया वातबलासके ॥ अथ ज्वरोपद्रवे चिकित्सा ॥ तत्र विशे
षमाह ॥ संजातोपद्रवो व्याधिस्साध्योऽनस्याचिकित्सकैः ॥ व्याधौ शांते प्रशाम्यं
ति सद्यः सर्वेप्युपद्रवाः ॥ अतो व्याधिं जयेद्यत्नात्पूर्वं पश्चादुपद्रवं ॥ भिषक्पः कुश
लः सोऽत्र जयेत्पूर्वमुपद्रवं ॥ तेष्वपि प्रचुरेषु प्राणघ्ना ये दाष्णुकारिणं ॥ मूलव्याधिं ज
येत्पूर्वं जयेद्यो वा भवेद्बली ॥ अविरोधेन वा कुर्यादुभयोरपि च क्रियां ॥ रोगारंभकदो
षप्रकोपजन्यो विकारः उपद्रवः स्यादुपद्रवलक्षणं सामान्यं ॥ तत्र ज्वरोपद्रवस्य श्वा
सस्य चिकित्सा ॥ सिंही व्याघ्री तामूमूली पटोली शृंगी यवानी पुष्करं रोहिणी च ॥
साकेशरप्रा शैलमहृत्योष्ण वीजं श्वासं हन्यात्सन्निपाते दशांगः ॥ इति दशांगः क्वा ६३ ॥

त्रिनीवसेत्ततः ॥ प्रस्थमेकं शिवानां च जलद्रोणेन धापयेत् ॥ द्विप्रस्थं दशमूलं च सार्द्धप्रस्था
यवाः स्मृताः ॥ गूधिक चित्रको भार्गी प्रं स्वगुप्ती प्रटी वेला ॥ विष्वाया मार्गमेदापु
ष्करं गजपिप्पली ॥ इमानि तत्र योज्यानि प्रत्येकं च पलं पलं ॥ अष्टांशे निसृते चैषां प
थ्याः पिष्टा च चेत्ततः ॥ गुडप्रस्थत्रयं योज्यं गोघृतं पलपंचकं ॥ जातीफलं केसरं च चा
तुर्जातं च धात्रिका ॥ दीप्याक्षौ जातिपत्री च तामूलो हं कटुत्रिकं ॥ चूर्णीमेषां क्षिपेत्तत्र
प्रत्येकं च पलार्द्धकं ॥ पथ्यापाक इति ख्यातः कथितो भृगुणा पुरा ॥ जीर्णज्वरहरः स
द्यः स्तुष्विषुष्वियतमदः ॥ रसकोपेगूहरणां च क्षीणधातावतिस्तौ ॥ गुह्यमये स्था
सकासे वातरक्ते हितो मतः ॥ इति हरीतकीपाकः ॥ जीर्णज्वरे कफक्षीणे दाहतृष्णा
समन्विते ॥ पयः पीयूषसदृशं तन्नयेत्तु विषोपमं ॥ चंदनाद्यं हितं तैलं क्रोधाधी

६२

जीर्णज्वरापहं ॥ इतिवासाद्यं घृतं ॥ क्षीरवृक्षाः समारिष्ठजंबूः सन्यग्रोधार्जुनैः ॥ शिरीषखदि
दिरास्फोताम्रतवक्षीरूषकैः ॥ कृष्णापर्पटकक्षीरवचातेजोवतीधनैः ॥ साधितं तैल
मभ्यंगाद्दाशुजीर्णज्वरान्जयेत ॥ इतिक्षीरवृक्षाद्यं तैलं ॥ शुद्धजैपालटंकैकं तुल्य द्वौ टंक
द्वयोन्मिता ॥ गैरिकं टंकमेकं च कन्यानीरेण मर्द्दयेत ॥ कलापशर्करीकार्या वटिकां तां
च भक्षयेत ॥ शीतलेन जलेनैषा वटी जीर्णज्वरापहा ॥ इतिजीर्णज्वरघ्नी वटी ॥ कनक
मौक्तिकहिंगुलवह्निजं क्रमविवर्द्धितमष्टगुणं ततः ॥ रसकमेव समं किल मक्षले
सरसनिंबुरसेन विमर्द्दयेत ॥ सर्षिपा विरहितोऽस्य सिलामये सर्वदा मधुकेरागु
तो रसः ॥ रक्तिकाप्रमितराजगृह्यते यो वसंत इति मन्यते परः ॥ जीर्णज्वरक्षयेष्वा
से कासे शीतज्वरामये ॥ मौल्यवातेतथाग्रासे पेयः पुष्टिविवर्द्धनः ॥ इतिवसंत

६२

ह्लीहकासारोचकनाशनं || इत्यमृतास्वरसः || जीर्णज्वरेग्निमांद्येच शस्यतेगुडपिप्पली
कासाजीर्णारुचिश्वासहृत्पांडुकृमिरोगजित || द्विगुणःपिप्पलीचूर्णाद्गुडोत्राभिष
ग्मतः || इतिपिप्पलीमोदकः || द्राक्षामृताशटीशृंगीमुस्तकंरक्तचंदनं || नागरंकटु
कीपाठाभूनिंबःसदुरालभः || उशीरंधान्यकंपद्मंवालकंकंटकारिका || पुष्करंपिचु
मंदश्चदशाष्टांगानिदेस्मृतं || जीर्णज्वरारुचिश्वासकासश्वयथुनाशनं || इतिद्राक्षा
दिरष्टादशांगक्वाथः || अनंतावालकंमुस्तानागरंकटुरोहिणी || मुस्तांभुनाप्रगुद
यापिबेदस्नमंतरः || एतत्सर्वज्वरान्हंतिदीपपचन्याशुचालनं || इतिसारिवादिचू
र्णं || वासांगुडूचींत्रिफलांत्रायमाणांदुरालभां || पक्कातेनकषायेणपयसाद्विगु
णेनच || पिप्पलीमुस्तमद्वीकाचंदनोत्पलनागरैः || कल्कीकृतैश्चविपचेतघृतं

स

माषकं ॥ निधाय भाजने लौहे संमर्द्य क्रमशो बुधः ॥ उपर्य्यग्नेः स्थापयित्वा तद्रसं शोषये
द्विषक ॥ पुनः पर्य्युषितं प्रातर्गृहीत्वा किंचिदग्नितः ॥ कोसं कृत्वा कल्कमेतत्ततो वट्यः
प्रसाधिताः ॥ चणकप्रमितास्तासामेकां शर्करया सह ॥ शीतज्वरं निहंत्येव सर्वेनास्य
त्र संशयः ॥ इति द्वितीयो भूतभैरवरसः ॥ तालकः पारदश्चैवं कणां तुल्यं कं चेत्सनागोवलिः
त्वपरं तुल्यशः ॥ कारवेल्लीरसैर्मर्द्दितो रक्तिकामात्र एषो रसः शीतपूर्वांकुशः ॥ अजा
जि शार्कराभ्यां च निहन्याद्घोररसायनः ॥ पथ्यं मुद्गौदनं देयं ज्वरानैकाहिकादिकान् ॥ इति
शीतांकुशो रसः ॥ पलमात्रा गजकणा पलमेकं च तालकं ॥ अश्मचूर्णं चिदपलं सुषवीर
समर्द्दितं ॥ वटीगुंजामिता ग्राह्या पथ्यं क्षीरौदनं स्मृतं ॥ शार्करासहितो ग्राह्यो ज्वरारी
रसनायकः ॥ इति शीतज्वरारिः ॥ कर्षमात्रं तु त्यकं स्यात्तालको द्विगुणो भवेत् ॥ शंख

९०

स्त्रिगुणकः सर्वसुषवीरसमर्द्दितं ॥ ततो गजपुटं दत्वा रसोयं वल्लमात्रकः ॥ सितामाग
रसंयुक्तः पथ्यं क्षीरौदनं स्मृतं ॥ क्षारामलयर्जनं तत्र कारयेद्विषजांवरः ॥ महाश्रीतांकु
शोहंति ज्वरानेकाहिकादिकान् ॥ इति महांश्रीतांकुशः ॥ त्रपुसं भक्षयित्वा गूतकं मल्लं
पिवेदनु ॥ ततो हृताशसेवेत प्रात्यतो वातयं स्फुटं ॥ ततः प्रस्विद्य सर्वांगो यातिशीतज्व
रः क्षयं ॥ रवपरे मानुषीमूत्रे स्थितं घस्त्रत्रीसप्तकं ॥ विल्वकृतदर्द्दुमरिचं नवनीतेन म
र्द्दयेत ॥ शतधा भावयेन्निंवूरसे स्याद्रसकेश्वरः ॥ पिप्पलीमधुयुक्तं दत्तं ससितं चा।
स्य भोजनं ज्वरं धातुगतं पित्तं भ्रमं पित्तास्रजानगदान ॥ रक्तातिसारं गूहलींदुनीमा
स्त्रनिवारयेत ॥ अन्नमलं दधिवास्यधं पथ्यं चास्मिन्नं प्रयोजयेत ॥ इति लघुमालिनीवसं
तो धातुगतज्वरादौ ॥ टंकणविष्याव्ययशंकधारा निर्गुंडिकाभृंगयवानिकाभ्यः सिं

म

९०

षनाशनं ॥ यथायथाश्रितं तोयं ज्वरातीसारिणो भवेत् ॥ दीपनं पाचनं ग्राहि आरोग्यत्वं
तथा तथा ॥ नागरातिविषामुस्तभूनिंबामृतवत्सकैः ॥ सर्वज्वरहरः क्वाथः सर्वातीसा
रनाशनः ॥ इति नागरादिः ॥ ह्रीवेरातिविषामुस्ताबिल्वधान्यकनागरैः ॥ पिबेत्पिच्छा
विबंधघ्नं शूलदोषामपाचनं ॥ सरक्तं हंत्यतीसारं सज्वरं वाथ विज्वरं ॥ इति ह्रीवेरादिः ॥ हि
गुडूच्यतिविषाधान्यशुंठीबिल्वाब्दवालकैः ॥ पाठाभूनिंबकुटजचंदनोशीरपद्मकैः
कषायः शीतलः पेयो ज्वरातीसारशांतये ॥ हृल्लासारोचकच्छर्दिपिपासादाहनाश
नः ॥ इति बृहद्गुडूच्यादिः ॥ उशीरं वालकं मुस्तं धान्यकं बिल्वमेव च ॥ समंगाधातकी
लोध्रं बिल्वं दीपनपाचनं ॥ हंत्यरोचकपिच्छामं विबंधं सातिवेदनं ॥ सशोणिता
मतीसारं सज्वरं वाप्य विज्वरं ॥ उशीरादिः ॥ बिल्ववालकभूनिंबगुडूचीधान्यनागरैः

कुटजाद्युतक्काथोज्वरातीसारशूलनुत् ॥ इतिबिल्वादिः ॥ उत्पलंदाडिमत्वक्च प
द्मकेसरमेवच ॥ पिबेत्तंदुलतोयेनज्वरातीसारनाशनं ॥ इत्युत्पलादिचूर्णं ॥ इति॥
ज्वरातिसारचिकित्सा ॥ अथज्वरेविड्ग्रहस्यचिकित्सा ॥ विड्ग्रहेवातजित्कर्म॥
कुर्याद्वातानुलोमनं ॥ मलंप्रवर्तयेत्सुतीक्ष्णाभिःफलवर्त्तिभिः ॥ हरीतक्यादिगु
टिकामामलक्यादिचूर्णकं ॥ विड्ग्रहेसंप्रयोक्तव्यंभेषजंनात्यतःपरं ॥ पथ्यारग्व
धतिक्तात्रिवृदामलकैःश्रृतंतोयं ॥ जीर्णज्वरेविबंधेदद्याद्दाढ्येवविड्ग्रहःशाम्ये
त् ॥ इतिपथ्यादिक्काथः ॥ मृद्दिकातुचतुःकर्षामार्कंडीतावतीभवेत् ॥ शुंठीधात्र्य
भयादेवकुसुमंकर्षसंमितं ॥ गुटिकाःकार्षिकीःकृत्वाभक्षयेदुष्णवारिणा ॥ नि
हंतिदाहमरुचिंपित्तरोगंचरेचनात् ॥ इतिद्राक्षादिगुटीरेचनी ॥ अथज्वरेहि

क्वाथाश्चिकित्सा ॥ नीरेण सिंधूत्थ रजोति सूक्ष्मं नस्येन नूनं विनिहंति हिक्कां ॥ शुंठी
हठाद्वासितया समेता धूयोथवा हिंगुसमुद्भवश्च ॥ अश्वत्थवल्कलं शुष्कं दग्धं निर्वा
पितं जले ॥ तज्जलं पानमात्रेण हिक्कां छर्दिं च नाशयेत ॥ शुष्कस्याप्यथ पूरिवस्य धूमो
हिक्कां निवारयेत् ॥ अपि सर्वात्मिकां चैव योगराजयमीरितः ॥ अथ ज्वरे कासस्य चि
कित्सा ॥ विभीतकं घृताभ्यक्तं गोशकृत्परिवेष्टितं ॥ स्विन्नमग्नौ हरेत्कासं धृतमास्ये
विधारितं ॥ विभीतकत्वक्मरिचं तवंगं सर्वैः समानः खदिरस्य सारः ॥ बबूलजक्वाथ
कृतावटीयं मुखस्थिता कासहरी क्षणेन ॥ अत्राष्टांगलेहिकापि दातव्या ॥ कासे करण
कणामूलं कलिद्रुमफलं रजः सविश्वभेषजं तिष्ठान्मधुना वा वृषाद्रसं ॥ अथ ज्वरे
दाहस्ये चिकित्सा ॥ दाहाधिकारलिखितं दाहे कुर्याच्चिकित्सितं ॥ पटं ज्वराविरुद्धं

६६

यन्मुख्योनास्यपोज्वरोपतः ॥ अथकर्णमूलशोथस्यचिकित्सा ॥ अश्विशिरजलपरिम्ल
दितंमरिचकणाजीरंसिंधुजंत्वरितं ॥ नस्यविधिसेवितंननुकर्णकरुग्नाशकृदुर्दितिं
कुस्मायामार्गीबीजाभ्यांनस्योयाकटुकलोद्भवः ॥ उषणोषणांतुंबीनांनस्यःकंठामयंह
रेत् ॥ विषतिंदुकनागरकटुकलंकैरसिताभिधजीरकयामिलितैः ॥ कृतलेपउयैतिवि
नाशमतः ॥ श्रुतिमूलगदोनिजदिष्ठमतः ॥ लेपैर्यदिनशाम्येतकर्णमूलभवोगदः ॥ जलौ
कापातनंशस्तंपक्वेव्रणचिकित्सितं ॥ अथसप्तधातुगतज्वरचिकित्सा ॥ रसस्थेतुज्वरे
तस्मिन्कुर्याद्वमनलंघनं ॥ सेकंसंशमनंलेपंरक्तमोक्षमसृग्गते ॥ गायत्रीत्रिफलानिंबः
पटोलीवासकामृता ॥ क्वाथोमधुघृताभ्यांचरक्तदोषेतिशस्यते ॥ इतिगायत्र्यादिर
क्तज्वरे ॥ धात्रमपार्य्यावृहतीहरिद्राचेण्वाटरूपनामवःकषायः ॥ जहातिदूरंमधुना ॥ ६६

विमिश्रो रक्तोद्भवं दाहतृष्णान्वितं वेगं ॥ इति गुडूच्यादि रक्तज्वरे ॥ तीक्ष्णानि विरेकांश्च तथा कु
र्यान्मांसगते ज्वरे ॥ मेदोजे मेदसो नाशमस्थिस्थे घातनाशनं ॥ वस्तिकर्म प्रयोक्तव्यमभ्यंगो
न्मर्दने तथा ॥ मज्जाशुक्रे क्रिया नोक्ता मरणं तत्र भाषितं ॥ अथ आमाशयगतज्वरचिकित्सा
कटुका रोहिणी मुस्तं पिप्पलीमूलमेव च ॥ हरीतकी च तत्तोयमामाशयगते ज्वरे ॥ इति
कटुक्यादि क्वाथः ॥ आमाशयज्वरे ॥ अजमोदा हरीतक्यौ सौवर्चलसमन्वितं ॥ कर्चूरेण
समं चूर्णमजीर्णज्वरनाशनं ॥ इत्यजमोदचूर्णं ॥ लवंगं धान्यकं विश्वाजीरकं शिखिवे
चकं ॥ आमज्वरं हरत्याशु पाचनं वह्निदीपनं ॥ रोचकं वंशरोचनं ॥ इति लवंगादि चूर्णं
अथ मंथरज्वरचिकित्सा ॥ चंदनोशीरधान्यं च वालकं पर्पटं तथा ॥ मुस्ता शुंठी समा
युक्तं मंथरज्वरनाशनं ॥ इति चंदनादि क्वाथः ॥ मंथरज्वरे ॥ मक्षिकागुडसंयुक्ता ज्व

रेमुंधारकेहिता ॥ भूमोदाहोतिसारघ्न क्षिप्रंनश्यतिवेगतः ॥ इतिमुंधारज्वरचिकित्सा
अथमुखशोषस्यवैरस्येचचिकित्सा ॥ शर्करादाडिमाभ्यांच द्राक्षाद्राडिमयोस्तथा
कल्कंविधारयेदास्यशोषवैरस्यनाशनं ॥ आलुबुखारसंज्ञंहिफलंतादृक्समीरि
तं ॥ अथनिद्रानाशस्यचिकित्सा ॥ भवंतुविजयाचूर्णंमधुनानिशिभक्षयेत् ॥ निद्रा
नाशोतिसारेचग्रहण्यांपावककक्षये ॥ गुडंपिप्पलीमूलस्यचूर्णेनालोडितंलिहन्
चिरादपिचसंनष्टांनिद्रांमाप्नोतिमानवः ॥ काकजंघाजटानीरंजनयेच्छिरसिस्थि
ता ॥ केशसंमार्जनीतद्वद्भिषग्भिःसमुदाहृता ॥ निद्रानाशेतुकर्त्तव्यंपादयोर्मर्दुमर्द्द
नं ॥ पुष्पैतैतारनाताभ्यांचुकाद्येनविशेषतः ॥ सुस्विन्नंकोमलंरात्रौकूष्मांवंताक
जंफलं ॥ प्रातर्मधुयुतंखादंच्छीघ्रंनिद्रामवाप्नुयात् ॥ एरंडतैलमतसीतैलंकांस्येवि ॥ ६७ ॥

घर्षयेत् अगस्त्याचांजयेत्तेन निद्रां संजनयेत्परां शतपुष्पां च विजयां छागीक्षीरेण
पेषयेत् लिंपेत्पादौ कवोष्णेन निद्रा संजायते परा कस्तूरिकांजनं कार्यं स्तन्येन प
यसाथवा चिरादपि च संलब्धां निद्रामाप्नोति मानवः अथ शिरोर्त्तौ चिकित्सा
कुष्ठमेरंडजं मूलं तैलकांजिकपेषितं शिरोर्त्तिं वातजां हन्यात्पुष्पं वा मुचकुंदजं
चंदनोशीरयष्ट्याह्वबलाव्याघ्रनखोत्पलैः क्षीरपिष्टैः प्रलेपः स्याद्रक्तपित्तशिरो
र्त्तिनुत् शुंठीकुष्ठप्रपुंनाटदेवकाष्ठैः कफार्त्तिनुत् किरातशुंठीतगराकुष्ठचंदन
वालकैः मर्त्यमौलौ कृतो लेपः सर्वज्वरविनाशकृत् अथ दुर्जलजनितज्वरस्य चि
कित्सा हरीतकी निंबपत्रं नागरं सैंधवो नलः एषां चेत्सदा खादेद्दुर्जलज्वरशां
तये अहिचिंमननलमांग्यंपीनसश्वासकासानेदरमुदकेदोषानाशु हन्यादशेषान्

॥ ६९ ॥

जनयेतितनुकांतिंचित्तनेत्रप्रसादपलपरिमितशुंठीक्षोदसिद्धःकषायः ॥ अपरसः ॥
विषंभागद्वयंदग्धकपर्दःपंचभागकः ॥ मरिचंनवभागंचचूर्णंवस्त्रेणशोधयेत् ॥ आ
र्द्रकस्यैकुर्यान्मुद्गनिभांवटीं ॥ वारिणावटिकायुग्मंप्रातःसायंचभक्षयेत् ॥ अपरंरसोऽस्य
रेयोऽस्यतस्मिन्दुर्जलजेपिच ॥ अजीर्णाध्मानविष्टंभशूलेषुश्वासकासयोः ॥ इतिदुर्ज
लजेतारसः ॥ किराततिक्तात्रिवृद्दंतुपिप्पलीविडंगविश्वाकटुरोहिणीरजः ॥ निहंति
लीढंमधुनातिसत्वरंसुदुस्तरंदुर्जलदोषजंज्वरं ॥ भोजनादौनरैर्भक्तिःशुंठ्यजाज्यभयो
स्थितः ॥ कल्कस्तुसहतेनित्यंनानादेशोद्भवंजलं ॥ महार्द्रकपयक्ष्मारैःपीत्वाचोष्णेनवा
रिणा ॥ नानादेशसमुद्भूतवारिदोषंनियच्छति ॥ तालीसोषणविश्वपिप्पलितुगाः
कर्षाभिवृद्ध्यास्तटिःकर्षार्धैर्लवंगपिप्पलिकामधवलाद्वात्रिंशत्कर्षीसिता ॥ तालीसाद्यमि ॥ ६९ ॥

२ सेनास्य

देसुचूर्णमरुच्याबाध्मानमंदानलश्वासछर्द्यतिसारशोषककसनं सीहज्वरेशस्यते ॥ इति
तालीसादिचूर्णं ॥ अथ पथ्यज्वरितायहितान्यन्नादीन्याह ॥ रक्तशाल्यादयः शस्ताः पुराणाः
षष्टिकैः सह ॥ यवाग्वोदनलाजार्थं ज्वरितानां ज्वरापहाः ॥ रक्तशालिर्मगधदेशे दा
उदखानी इति प्रसिद्धः ॥ मुद्गान्मसूरान्चणकान्कुलत्थान्समकुष्ठकान् ॥ यूषार्थं
यूषसात्म्यानां ज्वरितानां प्रदापयेत् ॥ पटोलपत्रं वार्ताकं कुलकं कारवेल्लकं ॥ कर्कोटकं
कर्कोडे इति लोके ॥ निंबूकं दाडिमं धात्रीफलमम्लं प्रकांक्षते ॥ प्रदद्यादम्लसात्म्याय कांजि
कं च पुरातनं ॥ अथ यवागूविधिः ॥ यवागूः षड्गुणे तोये संसिद्धा घनसिक्थिका ॥
प्रपगध्रयैस्कधिरसैः संयुक्ता ज्वरिणे हिता ॥ अथोदनस्य विधिः ॥ जले चतुर्दशगुणे
तंडुलानां चतुःपले ॥ विपचेत्स्रावयेन्मंडं तद्भक्तं मधुरं लघु ॥ अथ वादशगुणे नीरेषा

श्रुतोऽस्मः॥ विरलान्नो घनः किंचित्पेयं तोयूषउच्यते ॥ उक्तः सयेव निर्यूहः रुचिकृत्स्वविशेषतः॥
शमीधान्यं॥

मीधान्यं वैदलधान्यकं ॥ अथज्वरघ्नानि फलान्याह द्राक्षादाडिमखर्जूरप्रियालैः सपरूषकैः
तर्पणं हि स्यदाहछर्दितृ यार्त्तस्य तव्यं तर्पणं ज्वरशांतये ॥ प्रियालमत्र पक्वं फलं ॥ नतन्मज्जा
अतिगुरुत्वात् ॥ तर्पणं हि स्यदाहछर्दितृयार्त्तस्य लंघितस्य क्षीणस्येत्यर्थः ॥ संतर्पण
स्य स्वरूपं चाह धन्वंतरिः ॥ द्राक्षादाडिमखर्जूरमर्दितांबु सशर्करं ॥ लाजचूर्णं समध्वा
ज्यं संतर्पणमुदाहृतं ॥ लाजचूर्णं द्राक्षादिजलशर्करामध्वाज्यसहितं संतर्पणमुक्तमि
त्यर्थः ॥ किंच ॥ विस्रंसं सहस्रमूर्द्धानं चरणतिं विभुं ॥ स्तुवन्नामसहस्रेण ज्वरान्सर्वान्
व्यपोहति ॥ सहस्रमूर्द्धानं सहस्रशीर्षेत्यादिवेदाभिहितं ॥ नामसहस्रेण भारतोक्तेने
त्यर्थः ॥ ज्वरस्यापि देवतात्मकत्वात्पूजाकार्या ॥ यत आह विदेहः ॥ तीर्थायतनदेवाग्नि
गुरुवृद्धोपसर्पणैः ॥ अद्रुपावजनैश्चापि सहसा शाम्यतिज्वरः ॥ तीर्थं अविजुष्टं जलं ॥ ह्टी

ह्टी

चुरा

आपतनदेवाधिष्ठितं पुरुषोत्तमसेवकश्रीशैलादि ॥ अथ ज्वरमुक्तस्य लक्षणमाह देहो
लघुर्व्यपगतक्लममोहतापः पाको मुखे करणसौष्ठवमव्यथत्वं ॥ स्वेदः क्षवः प्रकृतियो
गिमनोन्नलिप्सा कंडूश्च मूर्ध्नि विगतज्वरलक्षणानि ॥ अथ ज्वरिणो नियमानाह न द्विरद्या
न्न पूर्वान्हे नाभिष्यंदि कदाचन ॥ न तीक्ष्णं न गुरु स्न्नायो भुंजीत तरुणज्वरी ॥ न जातु तर्पयेत्प्रा
ज्ञो सहसा ज्वरकर्षितं ॥ तेन संशमितोप्यस्य पुनरेव भवेज्ज्वरः ॥ व्यायामासवनव्यवाय
हरितासात्म्यान्नविष्टंभकृत्विष्टान्नानि गुरूणि जांगलपलं शुष्काणि शाकानि च ॥ वर्ज्याः
न्यावलभामतो न सहसा सर्वाण्णभुग्विज्वरः स्यादुत्येव हि दुर्बलं प्रतिगतो नूनं ज्वरो ना
त्मकं ॥ इति किंचिज्ज्वरस्योक्तं प्रदाय चिकित्सितं ॥ मक्ष्येदैर्घ्यभयाद्स्य ग्रंथस्य बहुनोदितं
इति ज्वरचिकित्सा समाप्ता ॥ अथातीसारनिदानं ॥ तत्रातिसारस्य विप्रकृष्टानि नि

सं

या

७०

दानान्याह ॥ गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि
भोजनैः १ स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः ॥ शोकाद्दुष्टांबुमद्यातिपानैः सात्म्य
र्तुपर्ययैः २ जलाभिरमणैर्वेगविघातैः कृमिदोषतः ॥ नृणां भवत्यतीसारो लक्षणं त
स्य वक्ष्यते ३ गुरु मात्रया स्वभावेन संस्कारेण च ॥ अतिशब्दः स्थूलांतैः संबध्यते
स्थूलं असम्यक्कृपिष्टं गोधूमादि शीतलं स्पर्शाद्वीर्याच्च ॥ विरुद्धं संयुक्तं क्षीरमत्स्यादि
अध्यशनं पूर्वदिनाहारेऽजीर्णे भोजनं ॥ अजीर्णमपक्वान्नं विषममकालभोजनादि
भोजनैरिति गुर्वादिभिर्विषमांतैः संबध्यते ॥ स्नेहाद्यैः स्नेहपानस्वेदवमनविरेच
नानुवासननिरूहाद्यैः ॥ अतियुक्तैः वारंवारं प्रयुक्तैः ॥ मिथ्यायुक्तैरविधिप्रयुक्तै
श्चैतैः ॥ विषैरिति विषाण्यत्र स्थावरं जंगमानि ॥ तेषामधोगत्वात् ॥ शोको वेद्यादि

७०

(ओ ७८ वी.) मुर्लमित्त्रातिसारस्य विप्रकृष्टानिदानान्याह ॥ गुर्वतिस्निग्धरूक्षोष्णद्रवस्थूलातिशीतलैः ॥ विरुद्धाध्यशनाजीर्णैर्विषमैश्चापि भोजनैः ॥ २ ॥ स्नेहाद्यैरतियुक्तैश्च मिथ्यायुक्तैर्विषैर्भयैः ॥ शोकाद्दुष्टाम्बुमद्यातिपानैः सात्म्यर्तुपर्ययैः ॥ शो

वियोगजनिता मनःपीडा ॥ सात्म्यर्तुपर्ययैरिति सात्म्यपर्ययैरसात्म्यैः ऋतुपर्ययैःय
स्मिन्नृतौ यदुचितं तद्विपरीतैः ॥ जलाभिरमणैः जलक्रीडादिभिः वेगविघातैः मूत्रपु
रीषादिवेगधारणैः ॥ कृमिदोषतः कृमिभिः पक्वाशयस्य दुष्टेः ॥ एतानि यथासंभ
वं वातादीनां दुष्टेः कारणानि बोद्धव्यानि ॥ नन्वेवं सति स्वहेतुदुष्टेन वातादिना अती
सारो भवतीत्येतन्मात्रं वाच्यं किमर्थं गुर्वाद्यभिधानं ॥ उच्यते ॥ गुर्वादिहेतुदूषिता ए
व वातादयो यावत्स्येनातिसारं जनयंति न तु लंघनभुक्तजीर्णताल्पान्नक्रोधतृषा
क्षुधाभिहननाध्वव्यायामवर्षाशरद्वसंतादिभिः कुपिताः अतो गुर्वादीन्युच्यंते
एवमन्यत्रापि निदानविशेषपाठो बोद्धव्यः ॥ १ ॥ २ ॥ ३ ॥ अथातीसारस्य संप्राप्तिमाह ॥
संशाम्यापां धातुरग्निं प्रवृद्धो वर्चोमिश्रो वायुनाधः प्रणुन्नः ॥ सरत्यतीवातिसारं

जलाभिरमणैर्वेगविघातैः कृमिदोषतः ॥ नृणां भवत्यतीसारो लक्षणं तस्य वक्ष्यते ॥ ३ ॥ गुरुमन्नं ... संस्कारयोनत्र ॥ अतिशब्दः स्थूलातैः संबध्यते ॥ स्थूलं असम्य...
एणगोधूमादिशीतलं स्पर्शादीपर्यन्तं ॥ विरुद्धं संयुक्तं क्षीरमत्स्यादि ॥ अध्यसनं पूर्वदिनाहारे

तस्मात्कुर्याद्धि घोरं षड्विधं तं वदंति ॥ एकैकशः सर्वशश्चापि दोषैः शोकेनान्यः षष्ठ आमेन
चोक्तः ॥ ४ ॥ अपांधातुरित्यत्र समासाकरणं द्रुतत्वेन चरसजलमूत्रस्वेदमेदःकफपित्तर
क्तादयो द्रवधातवो गृह्यंते ॥ अग्निं संशमय्य शमयित्वा वर्चोमिश्रः उदीरयुक्तः ॥ वायुनाधः
प्रणुन्नः अधःप्रेरितः ॥ सरत्यतीवेत्यनेन निरुक्तिकथनात्सामान्यं लक्षणमुक्तं ॥ गुदेनब
हु द्रवसरणमतीसार इत्यर्थः ॥ संख्यामाह षड्विधं तं वदंतीति ॥ षड्विधत्वं विवृणोति एकै
कशः इत्यादि द्वंद्वजा अप्यतिसारा भवंति ॥ तथा च मधुकोशे ॥ द्वंद्वजा अप्यतिसाराः प्रकृति
समसमवायारब्धत्वात् पृथक् न पठिताः ॥ विकृतिविषमसमवायारब्धास्तु न भवंत्येव
व्याधिस्वभावात् शैलीयमाचार्याणां प्रायः प्रकृतिसमसमवायारब्धान् सन्निपा
तेच न गणयंति ॥ विकृतिविषमसमवायारब्धांश्चावश्यं गणयंति ॥ यथा चरकेपंच

गुल्मा इत्यभिधाय संसृष्टरूपानपरांस्तु गुल्मांस्त्रीनादिश्ये दोषघ्नकस्य नाधीमित्युक्तं । तथा
च सुश्रुते षडर्शांसीत्यभिधाय आदौ स्तु दृश्यते रूपं च दोषैर्दोषयोर्द्वयोः । संसर्गेति विज्ञा
नीयात् संसर्गः षड्विधस्मृत इति । संसर्गस्य षड्विधत्वं तु वातादिषु गमेत्त्रयः संसर्गास्ते र
क्तादियोगादपरे त्रय इति ज्ञेयं ४ अथातीसारस्य पूर्वरूपमाह । हृन्नाभिपायूदरकु
क्षितोदगात्रावसादानिलसंनिरोधः । विट्संग आध्मानमथाविपाको भविष्यतस्त
स्य पुरःसराणि ५ अत्र कुक्षिशब्द उदरैकदेशवाची तोदशब्दः सर्वैर्हृदादिभिः
संबध्यते अनिलसंनिरोधः अधोवायोरप्रवृत्तिः । विट्संगः पुरीषाप्रवृत्तिः अ
विपाको भुक्तस्य पुरःसराणि अग्राणि लक्षणानि पूर्वभावीनि ५ अथ वातातीसा
रस्य लक्षणमाह । अरुणं फेनिलं रूक्षमल्पमल्पं मुहुर्मुहुः । शकृदामं सरुक् शब्द

॥७२॥

मारुतेनातिसार्यते ॥ ६ ॥ आरुणमीषद्रक्तं ॥ शकृत्पुरीषं ॥ फेनिलं सफेनं ॥ अल्पमल्पमि
तिकफपित्तातिसारापेक्षता ॥ न तु गुरुहरणापेक्षया सरुक्शब्दमिति शब्दो गुदे तस्मा
हर्षपाद्युपायिगुदेरूक्षयोरुर्व्या ॥ ६ ॥ अथ पित्तातिसारस्य लक्षणमाह पीतान्यीतं शकृद्र
क्तं नीलं च हरितं द्रुतं ॥ गुदपाकतृष्णामूर्च्छादाहयुक्तं प्रवर्तते ७ दाहः सर्वांगे गुदे च ॥ ७ ॥
अथ पीतातिसारभेदस्य रक्तातीसारस्य संप्राप्तिमाह पित्तकृंति यदात्यर्थं द्रव्याण्य
श्नाति पैत्तिके ॥ तद्दोषाज्जायते शीघ्रं रक्तातीसार उल्वणः ॥ ८ पैत्तिके अतीसारे वि
द्यमाने भविष्यति या पित्तकृं ति पित्तकारकाणि द्रव्याणि अत्यर्थं प्रभूतं अश्नाति त
दोषादुल्वणो महान् रक्तातीसारः शीघ्रं जायत इति योजना ॥ अत्र आरुणकेन पांडु
त्वादिना वातादयो दूषकाः योद्रव्याः ॥ यदुक्तं ॥ दोषलिंगेन मतिमान् सर्वसंगं तत्र लक्ष

॥७२॥

येदिति ॥ ९ अथ श्लेष्मातीसारस्य लक्षणमाह ॥ श्वेतं स्निग्धं घनं विस्रं शीतलं मंदवेद
नं गौरवारुचिसंयुक्तं श्लेष्मणा स्याद्धि तं शकृत् ॥ ९ विस्रमामगंधि ॥ ९ अथ द्विदो
षजत्रिदोषजातिसाराणां लक्षणान्याह ॥ द्विदोषलक्षणं विद्यादतीसारं द्विदोषजं
वराहस्नेहमांसांबुसदृशं सर्वरूपिणं ॥ कृच्छ्रसाध्यमतीसारं विद्याद्दोषत्रयोद्भवं
१० वराहस्नेहः शूकरस्य मज्जा ॥ मांसांबु मांसप्रक्षालनोदकं ॥ कृच्छ्रसाध्यं त्रिदोषज
त्वादेव ॥ १० अथागंतुजस्य शोकातीसारस्य संप्राप्तिपूर्वकं लक्षणमाह ॥ तैस्तैर्भावैः
शोचतोऽल्पाशनस्य बाष्पोष्मा चैव वह्निमाविश्य जंतोः ॥ कोष्ठं गत्वा क्षोभयेत्तस्य रक्तं त
च्चाधस्तात्काकणंतीप्रकाशं ॥ ११ निर्गच्छेद्वै विड्विमिश्रं ह्यविड्वा निर्गंधं वा गंधवद्वा
तिसारः ॥ शोकोत्पन्नो दुश्चिकित्स्योऽतिमात्रं रोगो वैद्यैः कष्ट एष प्रदिष्टः ॥ १२ तैस्तै

र्यैः बंधुवित्तक्षयादिभिः शोचतः शोकं कुर्वतः जंतोः प्राणिनो बाष्पोष्मा शोकजं देहो।
ष्मणा जनितं नेत्रनासागलादिभुजलं तेन सहितऊष्मा शोकजं देहतेजः ॥ सकोष्ठं गत्वा व
ह्निमाविश्य जठराग्निमंदीकृत्य ॥ बाष्पसाहित्याद्दूष्मणापि वह्नेर्मंदीभावः स्यादेषः ॥ व
ह्नेर्मंदीभावाद्वायुत्थानस्येति जंतोर्विशेषणं ॥ तेनास्य धातुक्षयोपि स्यादित्युक्तं ॥ तत
स्तस्य जंतोः रक्तं क्षोभयेत् स्वस्थानाच्चालयेदिति संप्राप्तिः ॥ अथ लक्षणमाह ॥ तद्रर
क्तं अधस्तादुदात् काकणंतीप्रकाशं गुंजाफलसदृशं विड्भिमिश्रं गंधवच्च अविट् नि
र्गधं वा निर्गच्छेत् ॥ शोकोत्पन्नोतिसारः अतिमात्रं दुश्चिकित्स्यः ॥ शोकापनोदनं वि
ना केवलेन भेषजेन प्रतीकर्त्तुमशक्यत्वात् ॥ एषोतिसारः वैद्यैः कष्टः कष्टसाध्यः प्र
दिष्टः कथितः इत्यर्थः ॥ १३॥ १२ ॥ अथागंतुजेन सामान्याद्भयातीसारस्यापि संप्राप्तिपूर्व

कं लक्षणमेवैवाह भयेन क्षोभिता दोषा दूषयंती मलं यदा तदातिसार्य्यते तत्तु क्षिप्रमुक्तं
जलक्षणं १३ वातपित्तातिसारस्य प्रायो लिंगैः समन्वितं न भयोपशमाच्छर्मयस्मिन्स्या
त्तभयात्स्मृतः १४ स्वक्षतरितिस्वयंजतेनस्वमानं ननुभयातीसारस्य कथमागंतुजे
त्वमयमपि दोषजएव एतदाह भयेनक्षोभिता दोषा मलं दूषयंति तन्मलमतिसरति
तस्माद्त्रपूर्वदोषसंबंधः उच्यते रागद्वेषभयाद्यैश्चतेस्युरागंतवो गदा इतिवचनात्
भयातीसार आगंतुजएव श्लोकार्थस्तु यं भयेनैव हेतुभूतेन दोषा वातपित्तकफा मलं
दूषयंति तन्मलं भयेनैवातिसार्य्यते पश्चाद्वातसंबंधः भयाद्वायुरितिवचनात् अत
एव भयातीसारे वातहार्य्येव क्रियाकथितेति समाधिः किंच भयजस्य वातसंबंधेन
वातिकेवलक्षणत्वात्संख्यातिरेकोपि नेति सर्वं सुस्थं १३।।१४ अथामातीसारस्य सं

७४

प्राप्तिपूर्वकं लक्षणमाह ॥ अन्नाजीर्णात्प्रद्रुताः क्षोभयंतो दोषाः ॥ कोष्ठे धातुसंघान्मलांश्च नानावर्णान्नैकशः सारयंति शूलोपेतं षष्ठमेनं वदंति १५ अन्नमुक्तं तदजीर्णं चेति अन्नाजीर्णं तस्मात् प्रद्रुताः उपद्रुताः ॥ विमार्गगा वा ॥ क्षोभयंतः ॥ आलयंतः ॥ दोषा वातपित्तकफाः ॥ धातुसंघान् रक्तादीन् ॥ मलान् पुरीषादीन् ॥ नैकशः बहुशः ॥ नन्वामेन दोषा दूष्यंते गुर्वादिभक्षणादिना च ते चातीसारमुत्पादयंति न त्वामरसातिसारमुत्पादयेति तेनामातीसारो दोषज एव ॥ किमर्थमयं पृथगुच्यते ॥ उच्यते ॥ आमातीसारस्य चिकित्सा विशेषार्थं संप्राप्तिपूर्वकं लक्षणमुक्तं ॥ कः स चिकित्साविशेष इत्यपेक्षायामुच्यते ॥ अतीसारेषु सर्वेष्वेव संग्राहकमौषधमुक्तं आमातीसारे तु ग्राहकं विरुद्धं ॥ यत उक्तं ॥ नाते संग्राहकं दद्यादतीसारे कदाचन ॥ संगृहीतो बलादामो विकारान् कुरुते बहून् ॥ ७४ ॥

ति । बलात् भेषजबलात् । विकारान् गूढहरण्याध्मानशूलगुल्मशोथोदरादीन् । अतएवा
मातीसारः पृथक् पठितः इति समाधिः ॥ १५ ॥ अथातीसारभेदस्य प्रवाहिकाव्याधेः सं
प्राप्तिपूर्वकं तल्लक्षणमाह । वायुः प्रवृद्धो निचितं बलासं नुदत्यधस्तादहिताशनस्य । प्र
वाहतोऽल्पं बहुशो मलाक्तं प्रवाहिकां तां प्रवदंति तज्ज्ञाः ॥ १६ ॥ अहिताशनस्य अतिशये
न वातलभक्ष्यभोजिनः । प्रवृद्धो वायुः । प्रवाहतः कंठहद्दतेन सशब्दं वायुमपानमार्गे
ण त्यजतः । निचितं संचितं बलासं कफं । मलाक्तं पुरीषयुक्तं बहुशः पुनः पुनः अधस्ता
द्गुदमार्गेण नुदति प्रेरयति । तज्ज्ञाः पुराणवैद्याः तां प्रवाहिकां प्रवदंति कथयंति । अ
तीसारे नानाविधद्रवधातुसरणं प्रवाहिकायां कफसरणमात्रमिति भेदः । भोजादौ
तु इयं विधसीति पठ्यते । परार्धे तु अन्नगेऽपिरिति । श्रीहारीतस्तु निःसारकाख्या

मेतां पठति ॥ १६ ॥ तस्या वातजादिभेदेन रूपमाह ॥ प्रवाहिका वातकृता सशूला पित्तात्सा
दाहा सकफा कफाच्च ॥ सशोणिता शोणितसंभवा च ता स्नेहरूक्षप्रभवा मतास्तु ॥ तासा
मतीसारवदादिशेच्च लिंगं क्रमं चामविपक्वतां च ॥ १७ ॥ स्नेहरूक्षप्रभवा इति स्नेहप्रभवाः क
फजाः रूक्षप्रभवा वातजाः ॥ तुशब्दात्तीक्ष्णोष्णप्रभवा पित्तजा रक्तजाश्च ॥ क्रमं आमपक्व
भेदेन चिकित्सा ॥ क्रमं ननु वायुः प्रवृद्धो निचितं बलासमित्यत्र कथं वातकृतेति ॥ उच्य
ते ॥ अधिकेन व्यपदेशात् ॥ ननु तथापि पित्तरक्तसंभवः कुतः ॥ उच्यते ॥ अहिताशनस्ये
त्यत्र कं तेनायमर्थः ॥ आहारो हि विरुद्धत्वस्यामवस्थायां पित्तं रक्तं च कोपयति ते च पश्चा
द्वातस्यानुवर्तेस्वलिंगं प्रदर्शयतस्तदा ताभ्यां व्यपदेशः ॥ इति समाधिः ॥ ४ ॥ अथा
साध्यातिसारिलक्षणमाह ॥ पक्वजांबवसंकाशं यकृत्खंडनिभं तनु ॥ घृततैलव

सामज्जा वेसवारपयोदधि ॥ १९ ॥ मांसधावनतोयाभं रूक्षं नीलारुणप्रभं ॥ मेचकं कर्बुरं
स्निग्धं चंद्रिकोपगतं घनं ॥ १९ ॥ कुणपं मस्तुलुंगाभं दुर्गंधं कुथितं बहु ॥ वैद्यः श्वयत्स्समा
तोक्षपनातिसारमुपक्रमेत ॥ २० ॥ पक्वजांबवसंकाशं पक्वजंबूफलसदृशवर्णं स्निग्ध
रूक्षवर्णमित्यर्थः ॥ यकृत्खंडनिभं रूक्षलोहितमित्यर्थः ॥ तनुस्वच्छं घृतेत्यादितो
याभमित्यंतं पदं ॥ घृतादीनां मांसधावनतोयांतानामिवाभायस्य तत्तथा ॥ वेसवारः निर
स्थिपिशितं पिष्टमित्यादिपरिभाषितमांसप्रकारः ॥ रूक्षमंजनप्रख्यं ॥ एतद्रूक्षत्वा
दिकं पित्तातिसारवर्ज्यं बोध्यं ॥ तत्र रूपत्वेन पठितत्वात् ॥ नीलारुणप्रभं चाषपक्षप्रति
भासं ॥ मेचकमीषद्रूक्षं ॥ कर्बुरं नानावर्णं ॥ स्निग्धं क्षरद्धातुस्नेहयोगात् ॥ चंद्रिकोपग
तं मयूरपिच्छचंद्रिकैरिव धातुस्नेहैरुपगतं ॥ तदुक्तं करवीराचार्येण ॥ चंद्रिकैः स्निग्धवि

७ ही

पिच्छाभैर्नीलपीताभिराजिभिः ॥ आवर्तं वेसवारं वा गुमज्जाक्षीरोपमं त्यजेदिति ॥ घनं धा
त्ववयवमिश्रितत्वात् ॥ कुणपं शवगंधि ॥ मस्तुलुंगो मस्तकाभ्यंतरस्नेहः घृतिकेति व्या
तस्तत्सदृशं कुथितं पूति ॥ बहुमात्राधिकं ॥ १८ ॥ १९ ॥ २० ॥ तस्मादाहात्पिपासाहिक्का
पार्श्वार्तिष्पूतिनं ॥ संमूर्छारतिसंमोहयुक्तं पक्ववलीगुदं प्रलापयुक्तं च भिषग्वर्जी
येदतिसारिणं २१ ॥ संमूर्छा सकलेंद्रियमनसां स्वस्वविषयग्रहणशक्तिहेतुरव
स्थाविशेषः ॥ संमोहविकृतमतित्वं ॥ चकारादृष्टस्वोक्तसहसोपरतातीसारश्वासा
ध्मो ये हृद्याः ॥ पक्वचलीगुदं पक्वावस्थोगुदे पस्य तं २१ ॥ असंवृतगुदं क्षीणं दुराध्मा
नमुपद्रुतं ॥ गुदे पक्वे गतोष्माणमतीसारिणमुत्सृजेत् ॥ २२ ॥ असंवृतगुदं गुदसंवृ
रणाक्षमं ॥ दुराध्मानं भृशमाध्मानयुक्तं ॥ तस्य विरेकसाध्यत्वेनातिसारविरुद्धो

७ ही

पक्वमलत्वात् ॥ उपद्रुतं वक्ष्यमाणैरतीसारोपद्रवैः शोथादिभिः ॥ गुदे पक्वे गतोष्मा।
णं गुदपाकारंभकेपि ते विद्यमानेपि शीतगात्रं नष्टाग्निं वा ॥ २२ ॥ श्वासशूलपिपा
सार्त्तं क्षीणं ज्वरनिपीडितं ॥ विशेषेण नरं वृद्धमतीसारो विनाशयेत् ॥ २३ ॥ विशे
षेणेति वचनात् बालस्याप्यसाध्यत्वं बोधयति सुश्रुतः ॥ यदाह स एव च कृत्स्ना
श्वासं बालवृद्धेष्वसाध्य इति ॥ एतच्चाबलवत्वे सति बोधव्यं ॥ न केवलं बालवृद्धयो
रेवासाध्यत्वं ॥ किंतु तरुणानामप्यसाध्यत्वमस्य ॥ तथा चोक्तं ॥ बालवृद्धेष्वसाध्यो
यं लिंगैरेतैरुपद्रुतः ॥ अपि यूना मासाध्यः स्यादिति दुर्बलेषु धातुक्षयेति ॥ एतैर्लिंगैः
पूर्वोक्तैः पक्वजांबुसंकाशत्वादिभिः ॥ २३ ॥ अथातीसारस्योपद्रवानाह ॥ शोथं शू
लं ज्वरं तृष्णां श्वासं कासमरोचकं ॥ छर्दिं मूर्छां च हिक्कां च दृष्ट्वातीसारिणं त्यजे

७७ ॥

त् ॥ २४ ॥ हस्तपादांगुलीसंधिप्रपाको मूत्रनिग्रहः ॥ पुरीषस्योस्रुतातीव मरणायाति
सारिणः ॥ २५ ॥ अतीसारीतजरोगी ग्रहणीरोगवानपि ॥ मांसाग्निबलहीनो यो दु
र्लभं तस्य जीवितं ॥ २६ ॥ अथातीसारमुक्तस्य लक्षणमाह ॥ यस्योच्चारं विना मूत्रं स
म्यक् वायुश्च गच्छति ॥ दीप्ताग्नेर्लघुकोष्ठस्य स्थितस्तस्योदरामयः ॥ २७ ॥ सम्यगि
ति नातिप्रवृत्या न हीनयोगेनेत्यर्थः ॥ वायुश्च गच्छति गुदेनेत्यर्थः ॥ स्थितो निवृत्त
गतिः ॥ उदरामयोतीसारः प्रकरणात् ॥ एतेन संप्राप्तिभंग उक्तः ॥ अतीसारे हि संप्रा
प्तिरियं ॥ यन्मूत्रं मूत्रान्वितो वा द्रवधातुर्गुदेनैव प्रवर्त्तते ॥ सर्वस्यैव गुदप्रवृत्तत्वात् त
यदापि मूत्रं मूत्रमार्गेण प्रवर्त्तते तदापि पुरीषप्रवृत्तिसमकालमेवेति ॥ २७ ॥ अथा
तीसारिणो वर्जनीयान्याह ॥ स्नानावगाहनाभ्यंगगुरुस्निग्धादिभोजनं व्यायाम ॥ ७७ ॥

मग्निसंतापमतीसारी विवर्जयेत् ॥ २४ ॥ स्नानमुद्धृतजलेन ॥ अऽवगाहनंनद्यादौ ॥ २५
इत्यतीसारनिदानंसमाप्तं ॥ अथातीसारचिकित्सा ॥ तत्रादौसामान्यांचिकित्सामा
ह ॥ आमपक्वक्रमंहित्वानातिसारेक्रियायतः ॥ अतोतिसारेसर्वस्मिन्नामंपक्वंचल
क्षयेत् ॥ क्रमश्चिकित्सा ॥ तत्रामपक्वयोर्लक्षणमाह ॥ संसृष्टमामैर्दोषैस्तुन्यस्तम
प्सुनिमज्जति ॥ पुरीषंभृशदुर्गंधिपिच्छिलंचामसंज्ञितं ॥ एतान्येवतुलिंगानिविप
रीतानियस्यवै ॥ लाघवंतुविशेषेणतत्तुपक्वंविनिर्दिशेत् ॥ नचसंग्राहणंदद्यात्पू
र्वमामातिसारिणो ॥ अकालेसंगृहीतोहिविकारान्कुरुतेबहून् ॥ दंडकालसकाध्मा
नग्रहण्यर्शोभगंदरान् ॥ शोथपांड्वामयप्लीहगुल्ममेहोदरज्वरानडौंभंस्यःस्य।
विरस्यश्चवातपित्तात्मकश्चयः ॥ क्षीणधातुवेलस्यापिवहुदोषोतिविस्रुतः ॥

७८

आमो विस्तंभनीयः स्यात्पाचनान्मरणं भवेत् अतीसारेषु तवतो लंघनं भेषजं प
रं ॥ जलमस्यावशेषं च ततो वाप्यधिकं शृतं ॥ लंघन एव दोषदुःसह पिपासायां दोष
पाकार्थं षडंगविधिमाह शृतयोगचतुष्टयमाह ॥ धान्याम्बुपांशृतं तोयं तस्माद्दाहा
तिसारिणे ॥ ह्रीवेरशृंगवेराभ्यां मुस्तपर्पटकेन वा ॥ मुस्तोदीच्यशृतं शीतं प्रदातव्यं
पिपासवे ॥ पथ्यादारुनिशामुस्तैर्नागरातिविषान्वितैः ॥ आमातीसारनाशाय क्वा
थमेभिः पिबेन्नरः ॥ इति पथ्यादिक्वाथः ॥ वत्सकातिविषाबिल्वमुस्तवालकजं शृ
तं ॥ अतीसारं जयेत्सामं चिरजं रक्तशूलजित् ॥ इति वत्सकादिक्वाथः ॥ धान्यवाल
कबिल्वाब्दनागरैः पाचितं जलं ॥ आमशूलविबंधघ्नं पाचनं नित्यसेवितं ॥ इ
ति धान्यपंचकं ॥ कुटजातिविषापाठाधातकीलोध्रमुस्तकैः ॥ ह्रीवेरदाडिमयुतैः

७८

कृतः क्वाथः समाक्षिकः । पेयो मोचरसेनैव कुटजाष्टकसंज्ञकः । अतीसारान् जयेद्दाह
रक्तशूलामदुस्तरान् ॥ इति कुटजादिः ॥ पंचमूलीबलाबिल्वगुडूचीमुस्तनागरैः । पाठा
भूनिंबह्रीबेरकुटजत्वक्फलैः शृतं ॥ हंति सर्वानतीसारान् वमिश्वासज्वरान्वितान्
सशूलोपद्रवं श्वासं हन्याच्छीघ्रं सुदारुणं ॥ अत्र पित्तोद्रेके कनीयसी पंचमूली या
श्लेष्मोद्रेके महती च पंचमूली योज्या ॥ इति पंचमूल्यादिः ॥ पक्वातिसाररोगे देयो मुस्ता
क्वाथः समाक्षिकः ॥ इति मुस्ताक्वाथः ॥ सलोध्रं धातकी बिल्वमुस्ताम्रास्थि कलिंगकं
पिबेन्माहिषतक्रेण पक्वातीसारनाशनं ॥ इति लोध्रादिचूर्णं ॥ मुस्ता वत्सकबीजं मोच
रसो बिल्वधातकी लोध्रं । गुडमथितसंप्रयुक्तं गंगामपि वेगवाहिनीं रुंध्यात् ॥ इति
गंगाधरचूर्णं ॥ मुस्तारलुकशुंठीभिः धातकीलोध्रवालकैः । बिल्वमोचरसाभ्यां च

७८

पाठेंद्रयववत्सकैः ॥ आम्रबीजसमंगातिविषायुक्तैर्विचूर्णितैः ॥ मधुतंदुलपानीयैर्पी
तैर्नश्येत्प्रवाहिका ॥ सर्वातिसारग्रहणीप्रशमं यांति वेगतः ॥ वृद्धगंगाधरंचूर्णं हंध्या
द्दीर्घकालप्रवाहिनीं ॥ समंगालज्जालुः ॥ इति वृद्धगंगाधरचूर्णं ॥ शुंठीसर्जसोपेतातुल्यं
जातीफलं तथा ॥ पोस्तकस्य जले वृद्धा गुटिका बदरोपमा ॥ त्रिकालं दापयेद्धीमान् पथ्यं
शालिघृतस्य च ॥ समुद्रवृद्धा विख्याता षडातीसारनाशिनी ॥ इति समुद्रवृद्धगुटिका
लवंगजातीफलजातिपत्रीमायाफलैलाघनशुंठीरालं ॥ सहिंगुलं सर्वसमांशचूर्णं
सर्वार्द्धतुल्यं वरनागफेनं ॥ वल्लप्रमाणा गुटिका विधेया प्रातः पिबेत्तंदुलतोयमिश्रां
सामे सपूर्ते सहशोणिते च चिरप्रवृत्ते विहितातिसारे ॥ इति लवंगादिवटी ॥ शुंठी
जातीफलं चाहिफेनं हिंगुलमंतिमात ॥ अपक्वदाडिमीबीजकोशे क्षिप्त्वाखिलं

र

७८

हितत् ॥ पुटपाकविधानेन पक्वा कोष्णा समन्वितं ॥ पिष्ट्वा कल्कं विधायाथ गुटिकां संप्रक
ल्पयेत् ॥ वल्लास्थि प्रमाणेन तक्रेण सह दापयेत् ॥ पक्वातीसारशमनी दाडिमीवटि
का मता ॥ इति दाडिमीवटी ॥ अहिफेनं सुसंभृष्टं स्वर्परे मृदुवह्निना ॥ पक्वातीसार
शमनं भेषजं नास्तुतः परं ॥ मुक्ताभस्मेति नामेदं दोषं दृष्ट्वा प्रदापयेत् ॥ गुंजार्द्धमेकं
गुंजे वा कर्पूरेण सुवासितं ॥ जातीफलादिसंयुक्तं रहस्यं परमं मतं ॥ इति मुक्ताभस्म
जातीफलं च खर्जूरमहिफेनं तथैव च ॥ समभागानि सर्वाणि नागवल्ली रसेन च ॥
वल्लमात्रा वटी कार्या दिवा तक्रानुपानतः ॥ अतीसारं जयेद्घोरं वैश्वानरइवाहुतिं ॥
इति जातीफलादिवटी ॥ मुस्तं मोचरसं लोध्रं धातकी बिल्व कौटजं ॥ अहिफेनं रसं
गंधं सूक्ष्मचूर्णानि कारयेत् ॥ वल्लमात्रमिदं खादेद्दुग्धतक्रसमन्विते अतीसा

रेप्रवाहे च गुल्म हरण्यां च विशेषतः ॥ इति गंगाधर रसः ॥ महौषधं सूक्ष्मचूर्णं कृत्वा तोयेन
पेषयेत् ॥ ततस्तु गोलकं कृत्वा लेपयेत्तदनंतरं ॥ वातारिमूलकल्केन श्रीपत्रैर्वेष्टयेत्त।
तः ॥ सूत्रबद्धं मृदालिप्तं मृदुवन्हौ विपाचयेत् ॥ सुस्विन्नं गोलकं तत्तु स्फोटयित्वा समु
द्धरेत् ॥ शीतीभूतं मधुयुतं खादेट्टंकद्वयोन्मितं ॥ अथ तक्रेण गव्येन सह देयं पलेन च
योगो यं कफवातोत्थदुष्टातीसारनाशनः ॥ शोफकासहरः कांतिकृत्सम्यग्निविवर्द्धनः
इति शुंठीपुटपाकः ॥ कुटजत्वक्तुलामार्द्रां द्रोणनीरे पचेद्भिषक् ॥ पादशेषं श्रृतं नीत्वा
वस्त्रपूतं पुनः पचेत् ॥ लज्जालु धातकी बिल्वं पाठा मोचरसस्तथा ॥ मुस्तं प्रतिविषा चैव
चूर्णान्येषां पलं पलं ॥ निक्षिप्य विपचेत्तावद्यावद्दर्वीप्रलिप्यते ॥ जलेन छागदुग्धेन
पीतो मंडेन वा जयेत् ॥ घोरान्सर्वानतीसारान्नानावर्णान्सवेदनान् ॥ अस्य

चि

ग्दरं समस्तं च तथार्शांसि प्रवाहिकां ॥ इति कुटजावलेहः ॥ कृत्वालवालं सुदृढं पिष्टैः

रामठकैर्भिषक् । आर्द्रकस्वरसेनाशु पूरयेन्नाभिमंडले ॥ नदीवेगोपमं घोरं प्रवृद्धं

दुर्द्धरं नृणां ॥ वृद्धातीसारमजयं नाशयत्येष योगराट् ॥ दार्वीसलाक्षाकटुकासविश्वा

त्वक्कौटजी शक्रयवाः ॥ सकृष्णाः एभिर्विपक्वं घृतमाशु हंति मंडेन पीतं सकलातिसारं

इति सप्तांगं घृतं ॥ अथ वातातीसारचिकित्सा ॥ वचाचातिविषामुस्तं बीजानि कुटजस्य

च ॥ श्रेष्ठः कषाय एतेषां वातातीसारशांतये ॥ अथ पित्तातीसारचिकित्सा ॥ बिल्वश

क्रयवांभोदवालुकातिविषाकृतः ॥ कषायो हंत्यतीसारं सामं पित्तसमुद्भवं ॥ इति

बिल्वादिः ॥ रसांजनं सातिविषं कुटजस्य फलं त्वचं ॥ धातकीशृंगवेरं च पाययेत्तं

दुलांबुना ॥ निहंति मधुनापीतं पित्तातीसारमुल्बणं ॥ अग्निं संदीपयत्येतच्छू

८१

लमांभुनिवारयेत् ॥ इतिरसांजनादिचूर्णं ॥ अथरक्तातीसारचिकित्सा ॥ वत्सकतरुत्व
गार्द्री दाडिमफलसंभवत्वल्कचत्वग्युगलंपलमानंविपचेदष्टांगसंमितितोये अ
ष्टमभागंशेषंक्वाथंमधुनापिबेत्पुरुषः ॥ रक्तातिसारमुल्बणमतिशयितंनाशयेल्लि
यतां ॥ इतिकुटजदाडिमक्वाथः ॥ गुडेनभक्षयेद्बिल्वंरक्तातीसारनाशनं ॥ आमशूल
विबंधघ्नंकुक्षिरोगहरंपरं ॥ बिल्वंसुस्विन्नवातबिल्वगर्भे ॥ शीतंततस्वेदनोद्धृतंचा
नुपेयं ॥ इतिगुडबिल्वयोगः ॥ जंबाम्रामलकीनांतुकुट्टयेत्पल्लवान्नवान् ॥ संगृह्यस्व
रसंतेषामजाक्षीरेणयोजयेत् ॥ तत्पिबेन्मधुनायुक्तंरक्तातीसारनाशनं ॥ इतिजंबा
दिस्वरसः ॥ पीत्वाशतावरीकल्कंपयसाक्षीरभुक्जयेत् ॥ रक्तातिसारंपीत्वावातया
स्थिंदुग्धघृतंनरः ॥ इतिशतावरीकल्कघृते ॥ गोदुग्धेननवनीतंतु मधुनासितयासह

पित्तातिसारचिकित्सामांति १ प्रवाल १ हस्तिदंत १ शंख १ सुवर्णभस्म १ अभ्रक १ इक्षुरसमे भावना ३ देवरकाकुटकी भावना १ देनी अनुपानतक्र

लीढं रक्तातिसारेनुग्राहकं परमं भवेत् ॥ इति नवनीतावलेहः ॥ पीतं मधुसितायुक्तं चंद
नं तंदुलांबुना ॥ रक्तातिसारजिद्रक्तपित्ततृड्दाहमेहनुत् ॥ इति चंदनकल्कः ॥ विरेकै
र्बृंहणीयैस्य गुदं पित्तेन दह्यते ॥ पच्यते चातयोः कार्य्यं सेकप्रक्षालनादिकं ॥ आदि
शब्देन तेपादिग्रहः ॥ पटोलयष्टीमधुकक्काथेन शिशिरेणहि ॥ गुदं प्रक्षालनं का
र्य्यं तैलं वा गुदसेचनं ॥ दाहे पाके हितं छागीदुग्धं सक्षौद्रशर्करं ॥ गुदस्यैतेन सेके उ क्षा
क्तं पाने च भोजने ॥ अतिप्रवृत्या महती भवेद्यदि गुदव्यथा ॥ स्विन्नमूषकमांसेन
तदा संस्वेदयेद्गुदं ॥ यद्वा गोधूमचूर्णस्य सन्नीतस्य तु वारिणा ॥ साज्यस्य गोलकं
कृत्वा मृदु संस्वेदयेद्गुदं ॥ गुदभ्रंशे गुदं स्नेहैरभ्यज्यांतः प्रवेशयेत् ॥ प्रविष्टं स्वेदये
न्मंदं मूषकस्यामिषेणहि ॥ मूषकस्यामिषेणकांजिकेन स्विन्नेन वा ॥ रंडपत्रस्या

॥८२॥

पित्तेन स्वेदयेदित्वचः ॥ मूषकस्याथवसया पायुं सम्यक्प्रलेपयेत् ॥ गुदभ्रंशाभिधो व्याधिः प्रयात्यनेन संक्षयः ॥ चांगेरीकोलदध्याम्लक्षारनागरसंयुतं ॥ घृतं विपक्वं पातव्यं गुदभ्रंशगदापहं ॥ चांगेरीचतुःपत्र्याम्ललोनिका तस्याः स्वरसः ॥ कोलस्य क्वाथः ॥ दध्यम्लं दधिरूपमम्लं ॥ एतत्त्रयं मिलितं घृताच्चतुर्गुणं ॥ क्षारनागरयोः कल्कः इति चांगेरीघृतं ॥ कोमलं पद्मिनीपत्रं यः खादेच्छर्करान्वितं ॥ एतन्निश्चित्य निर्दिष्टं न तस्य गुदनिर्गमः ॥ एतत्संशोध्य संचूर्ण्य शर्करायुतं खादेत् ॥ अयं तु गुदभ्रंशो तिसारं विनापि भवति ततः क्षुद्ररोगेषु लिखितः ॥ अत्र तु गुदस्य दाहपाकप्रसंगाद्विलिखितः चिकित्सा तु भवत्यपि तुल्यैव ॥ अथ श्लेष्मातीसारचिकित्सा ॥ श्लेष्मातिसारे प्रथमं हितं लंघनपाचनं ॥ योज्यश्चामातिसारघ्नो यथोक्तो दीपनो गणः ॥ चव्यं सौ

॥८२॥

तिविषाकुष्ठंबालविल्वं सनागरं ॥ वत्सकत्वक्फले पथ्या छर्दिश्लेष्मातिसारनुत् ॥

वच्यादिक्वाथः ॥ हिंगुसौवर्च्चलंव्योषमभयातिविषावचा ॥ पीतमुष्णांबुना चूर्णमेषां

श्लेष्मातिसारनुत् ॥ इति हिंग्वादिचूर्णं ॥ कृमिशत्रुवचाविल्वयेशी धान्याकंकट्फलं

एषांक्वाथंभिषक्दद्यादतीसारबलासजे ॥ इति विडंगादिक्वाथः ॥ अथद्विदोषजाति

साराणांचिकित्सा ॥ कट्फलंमधुकंलोध्रंत्वग्दाडिमफलस्यच ॥ सतंडुलजलंचूर्णंवा

तपित्तातिसारनुत् ॥ इतिवातपित्तातीसारे ॥ चित्रकातिविषामुस्तंवालविल्वंसनाग

रं ॥ वत्सकत्वक्फलंपथ्या वातश्लेष्मातिसारनुत् ॥ इतिवातश्लेष्मातिसारे ॥ मुस्तासा

तिविषामूर्वावचाचकुटजःसमाः ॥ एषांकषायःसक्षौद्रः पित्तश्लेष्मातिसारनुत्

इति पित्तश्लेष्मातिसारे ॥ अथसन्निपातातिसारस्यचिकित्सा ॥ पंचमूलीवला

॥८३॥

बिल्वगुडूचीमुस्तनागरैः ॥ पाठाभूनिंबवर्हिष्ठकुटजत्वक्फलैःशृतं ॥ सर्वजं हंत्यतीसा
रं ज्वरं चापि तथा वमिं ॥ सशूलोपद्रवं श्वासं कासं चापि सुदुस्तरं ॥ वर्हिष्ठं वालकं ॥
इति पंचभद्रादिक्वाथः ॥ अभयानागरं मुस्तं गुडेन सह योजितं ॥ चतुःसमेयं गुटिका
स्यात्त्रिदोषातिसारनुत् ॥ आमातिसारमानाहं हंत्यपि विबंधं विसूचिकां ॥ कृमीन रोच
के हन्याद्दीपयत्याशु चानलं ॥ इति चतुःसमो मोदकः ॥ कुटजत्वक्कृतः क्वाथो वस्त्रपू
तो घनीकृतः ॥ संलीढोतिविषायुक्तः स्यात्त्रिदोषातिसारनुत् ॥ इष्टं त्वत्राष्टमांशेन
क्वाथ्यादतिविषारजः ॥ प्रक्षेपत्वाच्चतुर्थांशमिति केचिद्वदंति हि ॥ इति कुटजावलेहः ॥
अथ शोकातिसारभयातिसारयोश्चिकित्सा ॥ भयशोकसमुद्भूतौ ज्ञेयौ वातातिसार
वत् ॥ तयोर्वातहरी कार्या हर्षणाश्वासनैः क्रिया ॥ वातातिसारवत् वातातिसा ॥८३॥

रलक्षणैः ॥ तयोः क्रियाचिकित्साच हर्षणलंघनपूर्वकावातहरीकार्य्या ॥ आमा
मातिसारचिकित्सा ॥ वत्सकातिविषाशुंठीबिल्वहिंगुयवांबुदाः ॥ चित्रकेनयुता
एषांक्वाथआमातिसारनुत ॥ इतिकुटजादिक्वाथः ॥ पाठाहिंग्वजमोदोग्रापंचको
लाब्जरजः ॥ उष्णांबुपीतेसरुजंजयत्यामंससैंधवं ॥ इतिपाठादिचूर्णं ॥ हरीतकींसा
तिविषांहिंगुसौवर्च्चलंवचां ॥ सैंधवंचापिसंपिष्ट्वापाययेदुष्णवारिणा ॥ आमा
तिसारंयोगोयंपाचयित्वाचिकित्सति ॥ आमातिसारेयोगेनयद्येतेननशाम्य
ति ॥ नतेयोगशतेनापिचिकित्सातिचिकित्सकैः ॥ चिकित्सतिअपनयति ॥ इतिह
रीतक्यादिकल्कः ॥ पूर्वोक्तआमातिसारचिकित्सापिकर्त्तव्या ॥ शो॰ पथ्यौदूप्यवाःपा
ठाविडंगातिविषांघनाः ॥ कथिताःसोषणाःपीताःसोथातीसारनाशनाः ॥ शो

॥८४॥

पथ्यौषुमन्नेला ॥ उषणं मरिचं ॥ इति सशोथातिसारे ॥ आम्रमूलास्थिमध्यमातुलुंगफलक्का-
थः समाक्षिकः ॥ शर्करासहितो हन्याच्छर्द्यतीसारमुल्बणं ॥ मातुलुंगफलं बिल्वफलं
इति छर्द्यतीसारे ॥ कषायो मधुमुद्गस्य सलाजमधुशर्करः ॥ निहन्याच्छर्द्यतीसा-
रतृष्णांदाहंज्वरंभ्रमं ॥ इति मुद्गकषायः छर्द्यतिसारे ॥ दध्नाससारेण समाक्षिकेण
भुंजीत निस्सारः रक्तपीडितस्तु ॥ सुतप्तकुप्यक्वथितेन चापि क्षीरेण शीतेन मधुयु-
तेन निस्सारकोमरोडा इति लोके ॥ सुतप्तकुप्यक्वथितेन सुतप्तसुवर्णरजतेतर-
लोहनिर्वापणक्वथितेन भुंजीत पथ्यमिति शेषः ॥ इति निस्सारके ॥ दीप्ताग्निर्निः-
पुरीषोपःस्याद्वितेफेनिलं शकृत् ॥ सपिबेत्फाणितं शुंठीदधितैलंपयो घृतं ॥ फा-
णितं इक्षोर्विकारः राब इति लोके ॥ पत्राविच्चाघृतं क्षीरं गुडतैलानुयोजितं ॥ दी-

॥८४

माग्निं पाचयेत्स्नातः सुखदं वर्च्चसः क्षये ॥ इति पुरीषक्षये योगद्वयं ॥ अथ प्रवाहिकाचिकित्सा ॥ बिल्वयेश्यौ गुडं लोध्रं तैलं मरिचसंयुतं ॥ लिह्यात्प्रवाहिकाक्रांतः स्त्वरं सुखमाप्नुयात् ॥ इति बिल्वादिरवलेहः ॥ धातकी बदरीपत्रकपित्थरसमाक्षिकं ॥ सलोध्रमेकतो दध्ना पिबेन्निर्वाहिकार्दितः ॥ एकत इति प्रत्येकं दध्ना पिबेदित्यर्थः निर्वाहिका प्रवाहिका ॥ इति धातक्यादिस्वरसः ॥ गृहधूमयोगोधिकारेयेलेहाः समुपदर्शिताः ॥ प्रयोज्यास्तेतिसारेपि त्रयाणां तुल्यहेतुतात्रयाणां गृहधूमयोगोतिसाराणां ॥ दरध्यैकभागोपि सार्द्धभागो हिफेनकः ॥ अर्द्धभागो भवेट्टंकः पिष्टिकां चम्रकस्य येत् ॥ जातीफलैश्च विन्यस्य सर्वं च पुट्याचितं ॥ मुद्गमात्रं पिबेन्नित्यं पयसा च गवां हितं ॥ अतिसारे ज्वरे मांद्ये निद्रानाशे हृच्चौतथा ॥ योजये

॥ ८५ ॥

द्रवजं नित्यं बलपुष्टिकरं परं ॥ इति दरदादियोगः ॥ गरलटंकणवाह्विजहिंगुलैः कनक
बीजकणावलिमिश्रितैः ॥ दृढतरं विजयारसमर्द्दितैः कनकसुंदरएष रसः स्मृतः
ज्वरातिसारग्रहणीवह्निमांद्यविशेषतः ॥ दध्ना जातीफलेनैव योजनीयो भिष
ग्वरैः ॥ इति कनकसुंदरो रसः ॥ यवानीपिप्पलीमूलचातुर्जातकनागरैः ॥ मरिचाग्नि
जलाजाजीधान्यसौवर्चलैः समैः ॥ वृक्षाम्लधातकीविल्वकृष्णादाडिमदीप्यकैः ॥
त्रिगुणैः षडुणासितैः कपित्थाष्टगुणैः कृतैः ॥ चूर्णोतिसारग्रहणीक्षयगुल्म।
गलामयान् ॥ कासश्वासारुचीहिक्कां कपित्थाष्टमिदं जयेत ॥ इति कपित्थाष्टकं
अथातीसारे पथ्यमाह ॥ निद्रा मसूरी तुवरी दधि तक्रं गवामपि ॥ दधिजं वा प
योजं वा नवनीतं गवाजयोः ॥ नवं रंभापुष्पफलं पुराणाः शालिषष्टिकाः ॥ अ

मर्द्दनेपा
ल्ला मात्रं का
र्य्यं वहीप
चला का
भाकार्य्या

॥ ८५ ॥

द्रकंचकपित्यंचधान्यकंजीरकंतथा॥ दीपनानिलघून्यानिपथ्यवर्गोतिसारिणां॥ अथातीसारेऽपथ्यमाह॥ यवगोधूममाषाश्चनिष्पावोलशुनंतथा॥ द्राक्षाम्लवेतसोधात्रीपूगंतांबूलमेवच॥ आम्लंगोवारिलवणंपत्रशाकानियानिच॥ व्यवायोरक्तमोक्षश्चनारिकेरंगुडस्तथा॥ गुरुरूक्षंचान्नपानमपथ्यमतिसारिणां॥ इत्यतिसारचिकित्सा॥ अथग्रहणीरोगनिदानं॥ तत्रग्रहणीरोगस्यसंप्राप्तिमाह॥ अतीसारेनिवृत्तेपिमंदाग्नेरहिताशिनः॥ भूयःसंदूषितोवन्हिर्ग्रहणीमभिदूषयेत्॥ १॥ अपिशब्दादनातीसारस्यापिस्याद्धेतोर्ग्रहणीरोगःस्यादितिबोधयति॥ अन्येत्वपिशब्दादनिवृत्तेप्यतिसारेइतिव्याचक्षते॥ मंदाग्नेरित्यनेनदीप्ताग्नेरहितमपि॥ नविकारकारीतिबोधयति॥

८ ही

भूयः पुनः अत्यर्थं वा दूषितः ॥ पूर्वमतीसारेपि दूषितत्वात् ॥ ग्रहणीं अग्न्यधिष्ठा
नं यदाह चरकः ॥ अग्न्यधिष्ठानमन्नस्य ग्रहणाद्ग्रहणी मता ॥ नाभेरुपरि सा ह्य
ग्निबलोपस्तंभबृंहिता ॥ अपक्वं धारयत्यन्नं पक्वं सृजति चाप्यधः इति ॥ अभि दू
षयेत् समंतात् दूषयेत् ॥ एतेन निवृत्तातिसारिणोप्यहिताहारपरिहारः आवह्नि
ताभात्कंरणीय इत्युक्तं भवति ॥ अत एवाह सुश्रुतः ॥ तस्मात्कार्य्यः परीहारोप्य
तीसारे विरिक्तवत् ॥ यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथेति ॥१॥ अथ
ग्रहणीरोगस्य संख्यापूर्वकं सामान्यं लक्षणमाह ॥ एकैकशः सर्वशश्च दो
षैरत्यर्थमुच्छ्रितैः ॥ सा दुष्टा बहुशो भुक्तमाममेव विमुंचति ॥२॥ पक्वं वा सरु
जं पूति मुहुर्बद्धं मुहुर्द्रवं ॥ ग्रहणीरोगमाहुस्तमायुर्वेदविदो जनाः ॥३॥ उर्ह्वि॥

८ ही

तैः वैद्यैः ॥ आममपक्वमेव ॥ पाश्चात्यशास्त्रार्थे ॥ सरुजं सशूलं ॥ पूतिदुर्गंधि मुहुर्बद्धं या
तेन ॥ मुहुर्द्रवं पीतेन ॥ ग्रहणीरोगं ग्रहण्यागद ॥ अतीसारे द्रव धातुप्रवृत्तिः ग्रह
ण्यां बद्धस्यापि मलस्य प्रवृत्तिरिति तयोर्भेदः ॥ २॥३॥ अथ तस्य पूर्वरूपमाह ॥ पूर्व
रूपं तु तस्येदं तस्मात्तस्यं बलक्षयः ॥ विदाहोन्नस्य पाकश्च चिरात्कायस्य गौरवं ॥
४ तस्यापि यास्या ॥ विदाहोग्निमांद्यादाहारविदग्धत्वं ॥ अतएवान्नस्य चिरात्पा
कः ॥ कायस्य गौरवं सामत्वात् ॥ ४ ॥ अथ वातजाया ग्रहण्या निदानसंप्राप्तिपूर्वकं
रूपमाह ॥ कटुतिक्तकषायातिरूक्षशीतान्नभोजनैः ॥ प्रमितानशनात्यध्ववेग
निग्रहमैथुनैः ॥ ५ ॥ मारुतः कुपितो वह्निं संछाद्य कुरुते गदं ॥ तस्यान्नं पच्यते दुःखं
शुक्तपाकं खरांगता ॥ ६ ॥ कंठास्यशोषो क्षुत्तृष्णा तिमिरं कर्णयोः स्वनः ॥ पार्श्वो

८७

हृद्वंक्षणगग्रीवाहृन्मीरुत्रां विषूचिका ७ हृत्पीडा कार्श्यं दौर्बल्यं वैरस्यं परिकी।
र्तिका ॥ गृद्धिः सर्वरसानां च मनसः सदनं तथा ८ जीर्णेजीर्य्यतीत्याध्मानं भुक्ते
स्वास्थ्यमुपैति च ॥ सवातग्रस्तहृद्रोगसीहाशंकी च मानवः ॥ ९ चिरादुःखं दु
वेष्टुकं तन्वामं शब्दफेनवत् ॥ पुनः पुनः सृजेद्वर्चः श्वासश्वासार्द्दितो निलात् ॥ १०
प्रमितमपरिमितं ॥ प्रमतमिति पाठे अतीतकालभोजनं ॥ अनशनमुपवासः ॥ अ
त्यध्वा अतिमार्गगमनं ॥ गदं गृहणीरोगं भुक्तपाकमन्नपाके ॥ स्वरांगताक
र्कशांगता वातेन त्वचः स्नेहशोषणात् ॥ तिमिरं मंददृष्टिता हृत्पीडा सा च पा
र्श्वादिभिः संवध्यते ॥ विषूचिका उर्ध्वमधश्चामान्नप्रवृत्तिः ॥ वैरस्यं विरसास्य
ता ॥ परिकर्तिका गुदे कर्त्तनवत्पीडा ॥ गृद्धिः कांक्षा ॥ मनसः सदनमनुत्साहः

८७

र्णे रौ जीर्य्यतिचेत्यत्र आहारे इति योजनीयं ॥ भुक्ते आहारे भुक्तमात्रे ॥ सवातगुल्म हृ
द्रोगसी हाशंकी तिवातगुल्मादिपीडायुक्तत्वात्तस्य कां ॥ द्रवं शुष्कमितिकदाचिद्द्र
वं कदाचिच्छुष्कं ॥ तत्र अस्यं ॥ ५॥६॥७॥८॥९॥१० ॥ अथ पित्तजायागृहणयानिदान
पूर्वकं रूपमाह ॥ कं द्वजीर्णविदाह्यम्लक्षाराद्यैः पित्तमुल्वणं ॥ आस्रावयद्धंत्युनलं
जलं तप्तमिवानेलं ॥ ११ ॥ साजीर्णपीतनीलाभं पीताभः सार्य्यते द्रवं ॥ अल्पम्लोद्गार
हृत्कं ठदाहारुचितडर्द्दितः ॥ १२ ॥ विदाहि विदाहजनकं यवे सकरीरादि ॥ क्षारोपामार्गा
दिकृतक्षारोदकसाधितं व्यंजनं हि अम्लं तिकाम रूपादौ ॥ तथा क्षारो यवक्षारा
दिः ॥ तथा क्षारं च द्रव्यं ॥ आद्यशब्देन लवणतीक्ष्णोष्णानां गृहणं ॥ आस्रावयत्
H ॥ अभिघ्यंत ॥ ननु पित्तमग्निगुण युक्तं तत्कथमग्निं हंतीत्याशंक्याह ॥ जलं तप्तमि

पाने लघुमिति यथाग्निर्गुरुमप्युक्तमपि तप्तं जलं अनलं हंति तथा पित्तमप्यग्निं हंति ॥
सः पीताभः पुरुषः अजीर्णादिरूपं वर्च्च इति शेषः ॥ साव्यीते पित्तेनेति कटुपदमध्या
हरणीयं ॥ ११॥१२ अथ श्लेष्मजाया ग्रहण्या निदानमाह ॥ गुर्वतिस्निग्धशीतादिभो
जनादतिभोजनात् ॥ भुक्तमात्रस्य च स्वप्नाद्धंत्यग्निं कुपितः कफः ॥ १३ तस्यान्नं पच्य
ते कृच्छ्रेण दुःखं हृल्लासच्छर्द्यरोचकाः ॥ आस्योपदेहमाधुर्य्यकासष्ठीवनपीनसाः
१४ हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु दुष्टो मधुर उद्गारः सदनं स्त्रीष्वहर्षणं
१५ भिन्नाममश्लेष्मसंमिश्रगुरुवर्चःप्रवर्त्तनं ॥ अकृशस्यापि दौर्बल्यमालस्यं च ।
कफात्मके ॥ १६ ॥ आदिशब्दात् पिच्छिलमधुरादीनां ग्रहणं भुक्तमात्रस्य च स्वप्नात् भु
क्तवतः स्वप्न शयनादित्यर्थः ॥ शयनमत्र दिवाशयनं ॥ रात्रिशयनस्य स्वास्थ्या

हेतुत्वात् ॥ निःश्वासस्य प्रश्वासश्चोत्तसां संमीलनेन जठरानलं संधुक्षयति ॥ आस्योप
देहः ॥ मुखस्य कफेन लिप्तत्वं ॥ माधुर्य्यं तु मधुरत्वं मुखस्यैव ॥ स्यानेघन द्रवापूरि
तमिव ॥ स्तिमितं विबद्धं निश्चलमिति यावत् ॥ दुष्टो विकृतः सदनमग्निसादः ॥
स्त्रीष्वहर्षस्तासां रिरंसाया अभावः ॥ भिन्नस्फटितं आममपक्वं श्लेष्मसंश्लिष्टं ग्र
थितं दुर्गन्धं पुरीषं तस्य प्रवर्त्तनं प्रवृत्तिः ॥ अकृशस्य स्थूलस्यापि दौर्बल्यमसाम
र्थ्यं ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ अथ त्रिदोषजस्य ग्रहणीरोगस्य निदानपूर्वकं लक्षण
माह ॥ पृथग्वातादिनिर्दिष्टहेतुलिंगसमागमे ॥ त्रिदोषनिर्दिशेदेवं तेषां वक्ष्या
मि भेषजं ॥ १७ ॥ प्रकृतिसमसमवायारब्धत्वेन समागमाया अपि त्रिदोषजग्रह
ण्या अतिदेशः शिष्यहितैषितयाक्षेपः ॥ तेषां वक्ष्यामि भेषजमिति संपूर्णं

श्लोकानुरोधात्पठितं ॥ गूहणीदुष्ट्या गूहण्याश्रितवन्हेरपि दुष्टिः ॥ तेनाग्निमांद्याद
पो पि गूहणीरोग उच्यते ॥ यदुक्तं चरके ॥ यस्याग्निः पूर्वमुद्दिष्टो रोगानीके चतुर्विधः
ते चापि गूहणीरोगं समवज्रं प्रचक्ष्महे ॥ विभागेंगस्य ये प्रोक्ता विषमाद्यास्त्रयो ग्नयः
ते पि स्युर्गूहणीरोगास्समस्तस्त्वास्य कारणमिति ॥ १७ ॥ अथ गूहणीरोगस्य भेदं
संगूहणीरोगमाह ॥ द्रवं घनं सितं स्निग्धं सकटीवेदनं शकृत ॥ आमं बहु ससैच्छिल्यं
सशब्दं मंदवेदनं ॥ १८ ॥ पक्षान्मासाद्दशाहाद्वा नित्यं चापि विमुंचति ॥ अंत्रकूजनमा
लस्यं दौर्वल्यं सदनं भवेत् ॥ दिवा प्रकोपो भवति रात्रौ शांतिं च गच्छति ॥ १९ ॥ दुर्विज्ञेया
दुर्निवारा चिरकालानुवंधिनी ॥ सा भवेदामवातेन संगूह गूहणी मता ॥ २० ॥ स्निग्धं
स्नेहसदृशं ॥ सदनमग्निमांद्यं ॥ दिवा प्रकोपो भवति रात्रौ शांतिं च गच्छतीति व्याधे

रेचनमाचरः ॥ आमवातेन सामेन वातेन ॥ १९॥१९॥२० ॥ अथ घटीयंत्राख्यं ग्रहणीरोग
भेदमाह ॥ प्रसुप्तिः पार्श्वयोः शूलं तथा जलघटीध्वनिः ॥ तं वदंति घटीयंत्रमसाध्यं ग्र
हणीगदं ॥ २१ ॥ प्रसुप्तिः प्रकर्षेण शयनं जलघटीध्वनिः अधोमुखीकृतया जलघट्या
जलनिस्सरणे यथा ध्वनिर्भवति तथा मलनिर्गमनसमये कुक्षौ ध्वनिर्भवतीत्यर्थः
२१ ॥ अथ ग्रहणीरोगस्यारिष्टमाह ॥ यैर्लिङ्गैः सिद्धतिनातिसारस्तैः स्यादसाध्यो ग्रह
णीगदोऽपि ॥ वृद्धस्य जायेत यदा गदोऽयं देहस्तदा तस्य विनाशमृच्छेत् ॥ २२ ॥ इति ग्रहणी
रोगनिदानं ॥ अथ ग्रहणीरोगचिकित्सा ॥ ग्रहणीमाश्रितं रोगमजीर्णवदुपाचरेत् ॥
अतीसारोक्तविधिना तस्यामामं विपाचयेत् ॥ दोषसामं निरामं च विंद्यात्तत्रातिसा
रवत् ॥ दुःसाध्यो ग्रहणीरोगो भेषजानां शतैरपि ॥ सहस्रशोऽपि विहितैर्विना तक्रस्य

९०

सेवनात् । दोषधातुबलापेक्षी गृहण्यां तक्रमापिबेत् । न तक्रसेवी व्यथते कदाचिन्न त
क्रदग्धाः प्रभवंति रोगाः । यथा सुराणाममृतं सुखाय तथा नराणां भुवि तक्रमाहुः ॥
अथ तक्रस्य भेदानाह । तक्रं तु घोलमथितोदश्वित्तक्रप्रभेदतः । सुश्रुताद्यैर्मुनिश्रे
ष्ठैश्चतुर्धा परिकीर्त्तितं । ससरं निर्जलं घोलं मथितं त्वसरोदकं । तक्रं पादजलं प्रोक्त
मुदश्विच्चार्द्धवारिकं । अथ तेषां गुणाः । वातपित्तहरं घोलं मथितं कफपित्तनुत् । उद
श्वित्कफदं बल्यमामघ्नं परमं मतं । तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु । वीर्योष्णं
बलदं वृष्यं प्रीणनं वातनाशनं । गृहण्यादिमतां तक्रं पथ्यं संग्राहिलाघवात् । अथ
दोषविशेषे तक्रविशेषानाह । वातेऽम्लं सैंधवोपेतं पित्ते स्वादु सशर्करं । पिबेत्तक्रं
कफे वापि क्षारत्रिकटुसंयुतं । अथ तक्रस्य निषेधमाह । नैव तक्रं क्षते दद्यान्नो

९०

ष्मकालेनदुर्बले ॥ नमूर्छाभ्रमदाहेषुनरोगेरक्तपैत्तिके ॥ अथतक्रस्यविधिमाह ॥ सेव
नीयंसदागव्यंत्रिदोषशमनंहितंतत् ॥ शनैःशनैरपहरेदन्नंतक्रंतुवर्द्धयेत् ॥ तक्रमे
वपदाहारोभवेदन्नविवर्जितं ॥ तक्रसात्म्यतयाप्रोक्तोनचान्नंतत्रभक्षयेत् ॥ बुभुक्षायां
पिपासायांपिबेत्तक्रंसनागरं ॥ श्रमंनकुर्याद्दुःखेनकुर्याद्दुर्भाषणं ॥ नकुर्यान्मैथु
नंतक्रपानेक्रोधोविवर्जयेत् ॥ एवंयःसेवतेतक्रंग्रहणीतस्यनश्यति ॥ शीघ्रमेवन
संदेहःश्रीयथामृतकारिणः ॥ प्रशांतेग्रहणीरोगेकालेबहुतिथेगते ॥ अन्नत्याग
विधानेनग्रहणीयांचशनैःशनैः ॥ ग्रहणीरोगिणांतक्रंहितंदोषत्रयापहं ॥ काल
कूटविषंसाक्षात्तदेवापथ्यसेविनः ॥ तस्माद्यत्नेनसंसेव्यंतक्रंसंग्रहणीगदे ॥ श
स्तेनातःपरंकिंचिद्ग्रहणीरोगशांतये ॥ इतितक्रपानविधिः ॥ किराताद्यामृताविश्वा

चंदनोदीच्यवासकैः ॥ कृतः कषायो हंत्याशु ह्यतीसारं सशोणितं । इति किरातादिकाथः
त्रिकटुत्रिफलाचैव विडंगंजीरकद्वयं ॥ भल्लातकं यवानी च हिंगु तवलणपंचकं ॥ गृहधू
मवचाकुष्टं रसगंधकमभ्रकं ॥ क्षारद्वयाजमोदा च चित्रकं गजपिप्पली ॥ मुस्तामोचरसं
पाठा त्वगंजातिपत्रकं ॥ समभागकृतं चैषां चूर्णं श्लक्ष्णाविनिर्मिते ॥ शक्राशनस्य
चूर्णं तु चूर्णतुल्यं प्रदापयेत् ॥ मंदाग्निकासदुर्नामसीहपाकाल्पचिज्वरान् ॥ विषं मांसं
ग्रहेसूलं हन्यान्नानातिसारजित् ॥ आमवातापहं चल्पं सूतिकादोषनाशनं ॥ वर्ज
नीयं माषमम्लं स्तन्यं विशितभोजनं ॥ पथ्यं कांजिकमत्रापि दधितक्रमथापिवा ॥ व
हत्साधीचूर्णमिदं ताधीभाषितमुत्तमं ॥ इति वहत्साधीचूर्णं ॥ कर्षं गंधकमर्द्धपारद
मुभेकुर्याच्छुभांकज्जली द्यक्षं श्रूषणातश्च पंचलवणं सार्द्धं च कर्षं पृथक् ॥ भवे ॥ ९९ ॥

शुद्धं सूतं पलमितं तुर्यांशस्वर्णसंयुतं ॥ मर्दयेन्निंबुनीरेण यावदेकत्वमाप्नुयात् ॥ प्रक्षाल्योष्णां
बुनाथ पश्चात्तन्मात्रे सुगंधके ॥ द्रुते लोहमये पात्रे बादरानलयोगतः ॥ प्रक्षिप्य चालयेत्सौ
ख्यं मंदं लोहशलाकया ॥ ततः पाकं विदित्वा तु रंभापत्रे शनैः क्षिपेत् ॥ गोमयस्थे तदुपरि रं
भापत्रेण यंत्रयेत् ॥ शीतं तच्चूर्णितं गुंजाक्रमवृद्ध्या निषेवयेत् ॥ माषमात्रं भवेद्यावत्ततो मा
त्रां तु वर्द्धयेत् ॥ सक्षौद्रं रोगबलेनैव लेहयेद्भिषगुत्तमः ॥ ग्रहणीं हंति शोफं च स्वर्णरस
पर्पटी ॥ सद्यो बलकरी पुष्टिवर्धनी वह्निदीपनी ॥ क्षयकासश्वासमेहशूलातीसारपांडु
नुत् ॥ इति सुवर्णपर्पटीरसः ॥ शुद्धैः कर्कवराटकैर्गगनया भल्लातकैः तत्समान् प्रोता
नं वेंबुलकं टंकैर्लघु पुटेत्स्वांघ्रिभागं रसं ॥ लेसीतेन समं विचूर्ण्य जयया सप्तांगकाथ्यैः
क्षिप्रं प्रोक्तो यं ग्रहणीकपाटकरसः सैवल्लकैः सौषधैः ॥ इति ग्रहणीकपाटः ॥

हिंगुचजीरकद्वययुतं सर्चार्द्धं भंगान्वितं खादेत् टंकमितं प्रवृत्तिगदग्लानं तक्रस्य विल्वे
न च ॥ इति लघुलायीचूर्णं ॥ जातीफलत्वंगैलापत्रत्वग्नागकेसरैः ॥ कर्पूरचंदनतिलत्व

॥ ९२ ॥

कृक्षीरीतगरामलैः ॥ तालीसपिप्पलीपथ्याश्वेतजीरकचित्रकैः शुंठीविडंगमरिचैः
समभागान्विचूर्णयेत् ॥ पादंत्वेतानि द्रव्याणि दद्याद्भृंगां च तावतीं ॥ सर्वचूर्णस
मादेयाशर्करात्वभिषग्वरैः ॥ कर्षमात्रं ततः खादेन्मधुनासावितं सुधीः ॥ अस्यप्रभा
वाद्ग्रहणीकासश्वासारुचिक्षयाः ॥ वातश्लेष्मप्रतिश्यायाः प्रशमं यांति वेगतः
इति जातीफलाद्यं चूर्णं ॥ पलद्वयं दाडिमस्य व्योषस्य च पलत्रयं ॥ त्रिगंधस्य पलं चैकं
खंडस्याष्टपलानि च ॥ सर्वमेकीकृतं चूर्णं प्रशस्तं दाडिमाष्टकं ॥ दीपनं रुचिदं कण्ठ्यं स
ग्राहिग्रहणीहरं ॥ इति दाडिमाष्टकं ॥ रसं गंधं विषं व्योषं टंकणं लोहभस्म च ॥ अज
मोदाहिफेनौ च सर्वतुल्यं मृतांम्रकं ॥ चित्रकत्वक्कषायेण मर्दयेद्याममात्रकं ॥ म
रिचाभां वटीं कृत्वा खादेदेकां जयेत्सौ ॥ चतुर्विधां च ग्रहणीं रहस्यं तदिदं स्मृतं ॥ ॥ ९२ ॥

।।१०३।।

माह ।। मेढ्रादिष्वपि वक्ष्यंते यथास्वं नाभिजानि च ।। गंडूपदास्यरूपाणि पिच्छिलानि मृदू
नि च ।। ४५ ।। यथास्वं यथात्मीयलक्षणं ।। नेच्याचोक्तनिदानपूर्वरूपसंप्राप्तिलक्षणयुक्तं
गंडूपदः किंचुलकः ।। आदिशब्देन नासादीनां ग्रहणं ।। ४५ ।। अथ मांसांकुरसाम्याच्चर्म
कीलस्य संप्राप्तिपूर्वकं लक्षणमाह ।। व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः
कीलोपमं स्थिरखरं चर्मकीलं तु तद्विदुः ४६ ।। व्यानो वायुः ।। एतच्च गुदोषदेशे एवमा
न्यत्रेति क्वातिकुंडादयः ।। खरं कर्कशं ।। ४६ ।। तस्यैव वाताद्भिभेदेन लक्षणमाह ।। वातेन
तोदपारुष्ये पित्तादसितरक्तता ।। श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ।। ४७
सवर्णता गात्रसमानवर्णता ४७ ।। इत्यर्शोनिदानं ।। अथार्शसां चिकित्सामाह ।।
अर्शोतिसारग्रहणीविकाराः प्रायेणचान्योन्यनिदानभूताः ।। सन्नेनले संति

।।१०३।।

॥ ९२ ॥

कुष्ठोशीरतगरामलैः ॥ तालीसपिप्पलीपथ्याश्वेतजीरकचित्रकैः शुंठीविडंगमरिचैः
समभागान्विचूर्णयेत् ॥ यावंत्येतानि द्रव्याणि द्व्यादंगांचतावतीं ॥ सर्वचूर्णस
मादेयाशर्कराचभिषग्वरैः ॥ कर्षमात्रंततः खादेन्मधुनासावितंसुधीः ॥ अस्यप्रभा
वाद्ग्रहणीकासश्वासारुचिक्षयाः ॥ वातश्लेष्मप्रतिश्यायाः प्रशमंयांतिवेगतः
इतिजातीफलाद्यंचूर्णं ॥ पलद्वयंदाडिमस्यव्योषस्यचपलत्रयं ॥ त्रिगंधस्यपलंचैकं
खंडस्याष्टपलानिच ॥ सर्वमेकीकृतंचूर्णंप्रशस्तंदाडिमाष्टकं ॥ दीपनंरुचिदंकंठ्यंस
ग्राहिग्रहणीहरं ॥ इतिदाडिमाष्टकं ॥ रसंगंधंविषंव्योषंटंकणंलोहभस्मच ॥ अज
मोदाहिफेनौचसर्वतुल्यंमृतांभ्रकं ॥ चित्रकस्यकषायेणमर्द्दयेद्याममात्रकं ॥ म
रिचाभांवटींकृत्वाखादेदेकांजयेदसौ ॥ चतुर्विधांचग्रहणींरहस्यंतदिदंस्मृतं ॥ ॥ ९२ ॥

रत्नमुक्तवटी ॥ गंधं पारदसमं मुक्तं च दरदं लोहं च जातीफलं विल्वं मोचरसं विषं प्रतिवि
षं व्योषं तथा धातकीं ॥ भस्माभस्म भयांकपि त्यजत दौ दी प्यानलौ दाडिमं टंकाद्रुमक
त्तिगकंकनकजं बीजं च पक्षे समं रां ॥ एतत्तुल्यमफेनमेतदखिलं संमर्द्य संचूर्णयेत् ॥ ध
त्तूरच्छदजै रसैस्त्र्यम तिमान् कुर्यान्मरीचाकृतिं ॥ रत्नासा ग्रहणीं गदं सरुधिरं सामं।
सशूलं चिरात्ती सारं विनिहंति जत्तिसहितां ती व्रा विषूचीमपि ॥ इति ग्रहणीकपाटः
पारदाद्विगुणो गंधस्तां भ्यांतु स्यं कटुत्रिकं ॥ अजाकी टंकणं धान्यं हिंगुजीरजयानिकाः
प्रत्येकं द्विगुणाः सूताद्दुचकं च चतुर्गुणं ॥ सर्वेषां च समादेया स्थास्तु सैर्वराटिका
सर्वमेकीकृतं चूर्णं माषद्वयमितं ततः ॥ तेक्रेणानोऽथ मतिमान् भक्षयेत्सततं नरः
ग्रहणीकापाटिको ह्येष हितः स्याद्ग्रहणीगदे ॥ इति द्वितीयो ग्रहणीकपाटः ॥

८३

शुद्धसूतपलं चार्कक्षीरैर्मर्द्यं पुनः पुनः ॥ द्विपलं शुद्धगंधस्य महार्केषु पलाष्टकं उभे वह्निरसैर्भाव्यं शोष्यं पेष्यं दिनत्रयं ॥ मेलयेत्पूर्वसूतेन तद्धुंटंकणं क्षिपेत् ॥ अर्कक्षीरैः पुनः सर्वं यामैकं मर्दयेद्दृढं ॥ तच्छुष्कं चूर्णितं त्वेषमांडे दध्यात्पुटे पचेत् ॥

शुद्धा हिंकेन वतिसूतकपदं भस्म हालाहलं टंकणं विशुद्धसुवर्णबीजैः ॥ अंभोधिपंक्तिकरेशैले धराषवि शेत्यं शौर्विचूर्णितं तमैर्गृहणीकपाटः ॥ वह्नोस्यहंतिमधुना सहजीरकेणभुक्तोतिसारमपि संग्रहणीं नदस्रां ॥ आमं विपाच्य सहसा जनयत्य वैश्वं वैश्वानरं जठरवर्तिनमार्तिभाजः ॥ इति तंत्रीयो गृहणीकपाटः ॥ चित्रकं पिप्पलीमूलं क्षा

चतुर्गुंजामितं त्वादेन्मरिचाज्येन संयुतं ॥ देयं दध्योदनं पथ्यं विजयासगुडा निशि ॥ गृहणीदोषनाशाय नास्त्यनेन समं भुवि ॥ गृहणीनाशयेत्सर्वा मर्कलोकेश्वरो रसः ॥ इत्यर्कलोकेश्वरो रसः रससंकेतकलिकातः ॥

८३

भल्लातकं त्रिकटुकं त्रिफला लवणत्रयं । अंतर्धूमं द्विपलिकं गोपुरीषाग्निना दहेत् स क्षारः
सर्पिषा पीतो भोज्येनाप्यवचूर्णितः हृद्रोगपांडुग्रहणीगुल्मोदावर्तशूलनुत् । इति भल्लातकक्षारः

लवणपंचकं व्योषहिंग्वजमोदां चचव्यं चैकत्र चूर्णयेत् । वटिका मातुलुंगस्य रसैर्वा
दाडिमस्य वा । कृता विपाचयेदामं संदीपयति चानलं ॥ अजमोदात्र यवानिका । इति चि
त्रकादिवटिका ॥ श्वेतो वा यदि वा रक्तः सुपक्वो ग्रहणीगदः । गुडेनाधिकसर्जेन भक्षि
तेनाशु नश्यति । सर्जः राल इति प्रसिद्धः ॥ इति सर्जरसचूर्णं ॥ पाठाधान्ययवान्यजाजि
हवुषा चव्याग्निसिंधूद्भवैः । सग्रंथिकस्यजमोदकीटरिपुभिः कृष्णाजया संयुतैः ॥ सव्यो
षैः सकलत्रिकैः सत्रुटिभिस्त्वक्पत्रकैरौषधैरित्यक्षप्रमितैः । सतैलकुडवैः साष्टत्रि
वृन्मुष्टिभिः । एतैरामलकीरसस्य तुलया सार्द्धं तुलार्द्धं गुडात् पक्त्वा व्यं भिषजावलेह

९४॥

पेयं प्राग्भोजनाद्भक्षितः॥ ये केचिद्ग्रहणीगदाः सगुदजाः कासाः सःश्वोषामयाः सप्ला
सप्लीहपाण्डुस्वरोदररुजः कल्याणकस्तान्जयेत्॥ तैलेमनाक्त्रिवृद्भृष्टाद्यस्मिन्नसि
द्धे सत्येव निधेयात्तथाचानुजातं चेति संप्रदायः॥ इति कल्याणकावलेहः॥ श्वदंष्ट्रा
नागरं धान्यं पाठा विल्वं यवानि॥ द्रव्यैश्च पलिकैरेतैश्चतुःषष्टिपलैर्घृतं॥ घृताच्चतु
र्गुणं दद्याच्चांगेरीस्वरसं बुधः॥ तथा चतुर्गुणं दत्वा दधि चात्र विपाचयेत्॥ शनैः श
नैर्विपक्तव्यं घृतं संग्रहणीहरं॥ शोफार्शः प्लीहहृद्रोगकासहिक्काश्च नाशयेत्॥ मू
त्रकृच्छ्रं क्षयं गुल्मं चांगेर्यादिघृतं जयेत्॥ इति चांगेरीघृतं॥ तुलां संकुट्य विल्वस्य
पचेत्पादावशेषितं॥ सक्षीरं साधयेत्तैलं श्लक्ष्णपिष्टैरिमैः समैः॥ विल्वं सधातकी
कुष्ठं शुंठी रास्ना पुनर्नवा॥ देवदारु वचा मुस्तं लोध्रमोचरसान्वितं॥ एभिर्मर्द्दनि

॥९४॥

नापक्कं गृहण्यर्शोतिसारजित् ॥ बिल्वतैलमितिख्यातमत्रिपुत्रेण भाषितं ॥ इतिवि
ल्वतैलं ॥ अथ गृहणीरोगे पथ्यमाह ॥ मसूरतुवरीमुद्गाः प्राचीनाः शालयस्तथा ॥
तिलतैलं च निद्रा च माक्षिकं धान्यकं तथा ॥ गवामुद्धृतसारं यद्दधितं घनमेव च
गोमयं नेवनीतं चष्यं गाढं विजया तथा ॥ गृहणीगदिनामेष पथ्यवर्गः प्रकीर्त्ति
तः ॥ अथ गृहणीरोगेऽपथ्यमाह ॥ वेगरोधो व्यवायश्च स्नानमातपजागरं
यवगोधूममाषाश्च पूगं दुग्धं गुडस्तथा ॥ पत्रशाका निसर्वाणि गुर्वन्नं यत्स
रं तथा ॥ गृहणीगदितामेतत पथ्यं परिकीर्त्तितं ॥ इतिगृहणीचिकित्सा ॥ अथा
र्शोनिदानं ॥ तत्रार्शसां सन्निकृष्टानि निदानान्याह ॥ पृथग्दोषैः समस्तैश्च
शोणितात्सहजानि च ॥ अर्शांसि षट्प्रकाराणि विंद्याद्गुदवलित्रये ॥ १ ॥ अ

रिवत्तृष्णोति हिनस्तीत्यर्थः ॥ अहिंसायामिति पृषोदरादिपाठान्निरुक्तिः ॥ केचि

८५

द्रुधिरस्यापि दोषत्वं मन्यंते तन्मतमाश्रित्याह ॥ शोणितादिति ॥ सहजानि शरीरेण

सहजातानि ॥ संख्यां चाह ॥ षट्प्रकाराणीति ॥ गुदवलीत्रये सार्द्धचतुरंगुलं गुदस्य

ता

मानं तस्यावयवभूतास्तिस्रो वलयः शंखावर्त्तनिभाः उपर्युपरि संति ॥ तासां नामा

नि प्रवाहिनी विसर्जनी संचरणी चेति ॥ तत्र गुदौष्ठोऽर्द्धांगुलमानस्तदूर्ध्वमंगु

लमाना प्रथमावलिः सार्द्धैकांगुलमाना द्वितीया तृतीया च तावती ॥ उक्तं च ॥ अर्द्धांगु

लप्रमाणेन गुदौष्ठं परिचक्षते ॥ गुदौष्ठादंगुलं चैकं प्रथमां तु वलिं विदुः ॥ सार्द्धै

कांगुलमानेन पृथगन्ये प्रकीर्तिता इति ॥ १ ॥ अथ वातार्शसो विप्रकृष्टं निदानमा

ह ॥ कषायकटुतिक्तानि रूक्षशीतलघूनि च ॥ प्रमिताल्पाशनं तीक्ष्णं मद्यमैथु

८५

न सेवनं ॥ २ ॥ लंघनं देशकालौ च शीतौ व्यायामकर्म च ॥ शोको वातातपस्पर्शौ हेतुर्वा
तार्शसां मतः ॥ ३ ॥ प्रमितम् अपरिमितं तीक्ष्णं मद्यविशेषणं ॥ पैष्टिकादि मद्यमस्य
वातशमकत्वात् ॥ शीतो देशोऽनूपः ॥ शीतः कालो हेमंतादिः ॥ आतपस्तु सवीर्यो
ष्णुद्भूतरौक्ष्याद्वातप्रकोपे हेतुर्वातार्शसां ॥ २॥३ ॥ अथ पित्तार्शसो विप्रकृष्टं निदा
नमाह ॥ कट्वम्ललवणोष्णातिव्यायामाग्न्यातपप्रभाः ॥ देशकालावशिशिरौ क्रो
धो मद्यमसूयनं ॥ ४ ॥ विदाहि तीक्ष्णमुष्णं च सर्वं पानभोजनं ॥ पित्तोल्बणानां
विज्ञेयः प्रकोपे हेतुरर्शसां ॥ ५ ॥ उष्णशब्देनात्र उष्णद्रव्यस्य स्पर्शादिर्बोद्धव्यं
उष्णपानभोजनस्याग्रे वक्ष्यमाणत्वात् ॥ अग्न्यातपप्रभा अग्न्यातपयोः प्रभा
तेजः ॥ यद्वा प्रभा अग्न्यातपेतरतेजोद्रव्यस्य दीप्तिः ॥ अशिशिरो देशो मरुः ॥

टी

अशिशिरेकालः शरद्ग्रीष्मश्च ॥ असूयनं परसंपतिद्वेषः ॥ पानभोजनं पीयत इति पानं भुज्यत इति भोजनं ॥ प्रकोपे उत्पत्तौ ॥ पित्तोल्बणानामित्यनेन सर्वेषामर्शसां त्रिदोषजत्वादाधिक्येन व्यपदेशः ॥ तथा च चरकेः अर्शांसि नाम जायंते नासन्निपातितैस्त्रिभिः ॥ दोषैर्दोषविशेषात्तु विशेषः कथ्यतेर्शसामिति ॥ ४ ॥ ५ ॥ अथ कफार्शसो विप्रकृष्टं निदानमाह ॥ मधुरस्निग्धशीतानि लवणाम्लगुरूणि च ॥ अव्यायामदिवास्वप्नं शय्यासनसुखे रतिः ॥ ६ ॥ प्राग्वातसेवा शीतौ च देशकालावचिंतनं ॥ श्लैष्मिकाणां समुद्दिष्टमेतत्कारणमर्शसां ॥ ७ ॥ शय्यासनसुखे रतिः सुखशय्यासनाशक्तिः ॥ प्राग्वातसेवा पुरोवातसेवनं ॥ अचिंतनं निश्चिंतता ॥ टी ॥ ७ ॥

टी

अथ द्वंद्वजत्रिदोषजार्शसां विप्रकृष्टं निदानमाह ॥ हेतुलक्षणसंसर्गाद्विद्याद्द्वंद्वो

लक्षणानि च ॥ सर्वो हेतुस्त्रिदोषाणां सहजैर्लक्षणां समं ॥ हेतुलक्षणसंसर्गादिति दो
षद्वयस्य निदानं मिलने लक्षणमिलने च द्वंद्वोल्बणानि द्वंद्वजानि विंद्यात् ॥ जनके
न त्रयो दोषाः संति येषां तानि त्रिदोषाणि अग्रेभिसितेषां सर्वो हेतुः पृथग्वातपि
त्तकफानां हेतुर्भवति ॥ लक्षणं च सहजैः सहजातैभिः समं सदृशं ॥ ननु त्रिदोषा
णामिति विशेषणं व्यर्थं ॥ यतः सर्व एव व्याधयस्त्रिदोषजाः ॥ उक्तं च ॥ द्रव्यमेक
रसं नास्ति न रोगोप्येकदोषजः एकस्तु कुपितो दोषः इतरावपि कोपयेदिति ॥ युक्तिम
प्याह ॥ स्वकारणाद्वृद्धो वायुः शैत्याच्छीतलं श्लेष्माणं लाघवात्तेजोरूपं पित्तं वर्द्धय
ते ॥ तथा पित्तं कटुकत्वाद्वातं द्रवत्वात्कफं वर्द्धयति ॥ श्लेष्मा च शैत्याद्वायुं द्रवत्वात्पित्तं
वर्द्धयति उच्यते ॥ यत्र च स्वस्वकारणात्त्रयो दोषाः कुप्यंति तत्र त्रिदोषजव्यपदेश

इति तदोषः ॥ अथार्शसां पूर्वरूपमाह ॥ विष्टंभोन्नस्य दौर्बल्यं कुक्षेराटोप एव च ॥ कार्श्य

मुद्गारबाहुल्यं सक्थिसादोल्पविट्कता ॥ ग्रहणीदोषपांड्वर्त्तेराशंका चोदरस्य च ॥ पू

र्वरूपाणि निर्दिष्टान्यर्शसामभिवृद्धये ॥ १० ॥ विष्टंभः आलस्यं अंगस्य दौर्बल्यमव

ल्पं आटोपो गुडगुडाशब्दः सक्थिसादः जंघावसादः ॥ ग्रहणीदोषपांड्वर्त्तैः ग्रह

णीदोषयुक्तस्य पांडुरोगस्य अभिवृद्धये उत्पत्तये ॥ पच्यपि निदानानंतरं संप्राप्तिर्व

क्तव्या भवति तथाप्यत्रावश्यं वक्तव्यं स्य पूर्वरूपस्य कामचाराद्भिधानेत्रेयं एव

मन्यत्रापि क्वचिद्व्यतिक्रमे ज्ञेयं टी० १० अथार्शसां संप्राप्तिपूर्वकं सामान्यं लक्षण

माह ॥ दोषास्त्वङ्मांसमेदांसि संदूष्य विविधाकृतीन् ॥ मांसांकुरानपानादौ कुर्वंत्य

र्शांसि तान् जगुः ॥ ११ ॥ त्वङ्मांसपदेन त्वङ्मांसाश्रितं रक्तमपि गृह्यते ॥ चिकित्सायां ॥

रक्तस्रावं स्रोतोपदेशात् ॥ अपानं गुदं ॥ आदिशब्दात् नासानेत्रनाभिमेढ्रादिष्वपि कुर्वंति ११
अथ वातार्शसां लक्षणमाह ॥ गुदांकुरा बह्वनिलाः शुष्काश्चिमिचिमान्विताः ॥ म्लानाः
श्यावारुणास्तब्धा विशदाः परुषाः खराः १२ मिथो विसदृशा वक्रास्तीक्ष्णा विस्फुटि
ताननाः ॥ बिंबीकर्कंधुखर्जूरकर्पासीफलसन्निभाः ॥ १३ केचित्कदंबपुष्पाभाः केचित्सि
द्धार्थकोपमाः ॥ शिरःपार्श्वांसकट्यूरुवंक्षणाद्यधिकव्यथाः ॥ १४ क्षवथूद्गारविष्टं
भहृद्ग्रहारोचकप्रदाः ॥ कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः ॥ १५ तैरार्तो ग्रथि
तं स्तोकं सशब्दं सप्रवाहिकं ॥ रुक्फेनपिच्छानुगतं विबद्धमुपवेश्यते ॥ १६ कृष्णत्वङ्न
खविण्मूत्रनेत्रवक्त्रश्च जायते ॥ गुल्मप्लीहोदराष्ठीलासंभवस्तत एव च ॥ १७ ॥ बह्वनिलाः
वातोल्बणाः ॥ गुदांकुरा अर्शांसि ॥ चिमिचिमान्विताः चिमिचिमावेदनाविशेषः चर

॥८८॥

चणवदिति लोके तदन्विताः ॥ म्लाना अनुपचिताः ॥ श्यावा रूक्षाः श्यावाश्च धूम्रवर्णाः आरुणा
ईषद्रक्ताः ॥ स्तब्धाः कठिनाः विशदाः अपिच्छिलाः ॥ परुषाः गोजिह्वावत्स्पर्शे कर्कशाः
खराः कर्कोटकफलवत्सूक्ष्मानेककंटकचिताः ॥ मिथो विसदृशाः ॥ परस्परभिन्नरूपाः
चिंच्यादिफलसन्निभाः आकृत्या ॥ अत्र विकल्पबोधकं केचित्केचिदिति पदं संबध
नीयं ॥ चिंचीओ बोऽपमफला केद्रीति लोके ख्याता ॥ कर्पासी वनकर्पासी ॥ कदंबपुष्पा
भाः स्थूलानेकसूक्ष्मशिखराः ॥ सिद्धार्थकोपमाः पीतसूक्ष्मपिटिकाश्रिताः ॥ हृद्ग्रहः
हृदयं गृहीतमिवेति वेदनाः ॥ तैः आर्तैः अर्शोभिः पीडितः विट्वर्चैः उपवेश्यते न्या
ज्यते ॥ तैरार्तैः विट् उपवेश्यत इत्यात्तस्यान्वयोऽप्यकर्तुं कर्मत्वात् विट् शब्दो नपुंसकेप्य
स्ति ॥ कथंभूतं विट् ग्रथितं पाषाणवत् ग्रथितं ॥ पिच्छापिच्छितो द्रवभागस्तदनु

॥८९॥

गतं वक्रं संहतं ॥ कूर्मशब्दस्वगादिभिर्वक्रांतैः संबध्यते ॥ अस्योपद्रवमाह ॥ एस्मेत्यादि
तत एव वातार्शस एव ॥ अष्ठीला नाभेरधोभागे पाषाणपिंडिकावद्घातव्याधि विशे
षः ॥ १२ ॥ १३ ॥ १४ ॥ १५ ॥ १६ ॥ १७ ॥ अथ पित्तार्शोलक्षणमाह ॥ पित्तोत्तरा नीलमुखा र
क्तपीतासितप्रभाः ॥ तन्व्यस्रस्राविणो विस्रास्तनवो मृदवः श्लथाः ॥ १८ ॥ शुकजिह्वाय
कृत्खंडजलौकोवक्त्रसन्निभाः ॥ दाहपाकज्वरस्वेदतृष्णामूर्छारतिप्रदाः ॥ १९ ॥ सोष्माणो
द्रवनीलोष्मपीतरक्तामवर्चसः ॥ यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः ॥ २० ॥ पित्तो
त्तराः पित्तोल्बणाः ॥ तनुअघनं ॥ विस्रा आमगंधिनः तनवः स्वल्पाः ॥ मृद्वः कोमलाः
श्लथाः लंबनशीलाः ॥ पाको गुदस्य ॥ सोष्माणः उष्मस्पर्शाः ॥ यवमध्याः यवयन्मध्ये
स्थूलाः ॥ हरित शाकवर्णी ॥ पीतहरितालवर्णी ॥ हारिद्रं हरिद्रावर्णी ॥ आदिशब्दान्म

८८

तमूत्रमुखानांग्रहणं ॥१८॥१९॥२० अथरक्तार्शोलक्षणमाह ॥ रक्तोल्वणागुदेकीलाः पित्ताकृतिसमन्विताः ॥ वटप्ररोहसदृशागुंजाविद्रुमसन्निभाः ॥२१ तेत्यर्थंदुष्टमुष्णंच गाढविट्कप्रपीडिताः ॥ स्रवंतिसहसारक्तंतस्यचातिप्रवृत्तितः ॥२२ भेकाभःपीड्यतेदुः खैःशोणितक्षयसंभवैः ॥ हीनवर्णबलोत्साहोहतौजाःकलुषेंद्रियः ॥२३ विट्श्यावं कठिनंरूक्षमधोवायुर्नवर्त्तते ॥ तनुचारुणवर्णंचफेनिलंचासृगर्शसां ॥२४ कट्यूरु गुदशूलंचदौर्बल्यंयदिचाधिकं ॥ तत्रानुबंधोवातस्यहेतुर्यदिचरूक्षणं ॥२५ शिथि लंश्वेतपीतंचविट्स्निग्धंगुरुशीतलं ॥ यद्यर्शसांघनंचासृक्तंतुमत्पांडुपिच्छिलं ॥ २६॥ गुदंसपिच्छंस्तिमितंगुरुस्निग्धंचकारणं ॥ श्लेष्मानुबंधोविज्ञेयस्तत्ररक्तार्शसां बुधैः ॥२७॥ गुदेकीलाःअर्शांसि ॥ पित्ताकृतिसमन्विताःपित्तार्शोलक्षणयुक्ताः ॥

॥ ८८ ॥

विद्रुमः प्रवालमणिः ॥ आखुत्वाचटप्ररोहादिसदृशाः ॥ गाढविट्कप्रपीडिताः कठिनपु
रीषयंत्रिताः ॥ भेकाभः आरवेरप्यभेकाभः ॥ पीतछविः पुरीषइतिशेषः ॥ दुःखैः रो
गैः त्वक्पारुष्यांगुष्ठीतप्रार्थनाशिराशैथिल्यैः ॥ उत्साहोहर्षः ॥ हतौजाः हतशक्तिः
कलुषेंद्रियः व्याकुलसर्वेंद्रियः ॥ अधोवायुर्नवर्ततेगुदेनेतिशेषः ॥ प्रतिलोमक
त्वात ॥ रक्तजस्यापिवातोल्बणस्यलक्षणमाह ॥ तन्विल्यादि ॥ तत्ररक्तार्शसि ॥ अनु

क्ष

बंधः उल्बणत्वं ॥ लक्षणं लक्षयतीतिलक्षणं लैंगद्रव्यं ॥ पित्तोल्बणस्यतुलक्षणं र
क्तोल्बणइत्यादिनैवोक्तं ॥ रक्तपित्तयोः समानलिंगत्वात ॥ कफोल्बणस्यलक्षण
माह ॥ शिथिलमित्यादि ॥ सपिच्छं विच्छिलार्द्रं ॥ स्तिमितं आर्द्रचर्मावगुंठितमि
व ॥ २१ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ अथश्लेष्मार्शोलक्षणमाह ॥ श्लेष्मोल्ब

रणा महामूला घना मंदरुजः सिताः ॥ उत्सन्नोपचिताः स्निग्धाः श्लक्ष्णा गुरवः स्थिराः ॥

२८ पिच्छिलास्तिमिताः श्लक्ष्णाः कंड्वाढ्याः स्पर्शनप्रियाः ॥ करीरपनसास्थ्याभास्तथा गो
स्तनसन्निभाः ॥ २९ वंक्षणानाहिनः पायुवस्तिनाभिविकर्षिणः ॥ सकासश्वासहृल्ला
सप्रसेकारुचिपीनसाः ॥ ३० मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः ॥ क्लैब्याग्नि
मार्दवच्छर्दिरामप्रायविकारदाः ॥ ३१ वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः ॥ न
स्रवंति न भिद्यंते पांडुस्निग्धत्वगादयः ॥ ३२ श्लेष्मोल्बणा इत्यत्र गुदांकुरा इत्यनुवर्त
ते महामूला दरधाल्वगाहिनः ॥ घना निबिडावयवाः ॥ उत्सन्नाः उन्नताः ॥ उपचि
ताः स्थूलाः ॥ स्निग्धाः सस्नेहाः ॥ श्लक्ष्णा अनम्राः ॥ वृत्ताः परिणाहेन वर्त्तुलाः ॥ गुरवः गु
रुद्रव्याक्रांतमिव गुदं कुर्वंति ॥ स्थिरा निष्प्रचलाः पिच्छिलाः कफारब्धत्वात् ॥ ॥ १०० ॥

मिताश्चार्द्धेच स्युर्ग्रथिताइव अन्नस्त्रणामश्मिवन्नस्त्रणाः । करीरोवंशांकुरः । पनसः कं
टकफलः वंक्षणानाहिनः सक्थ्नूर्वीः संधीवंक्षणौतयोरानाहकारिणाः । गुदमत्यास
त्यावंक्षणयोः प्रेरणाग्रसामर्थ्यकारिणइत्यर्थः । प्रसेको मुखस्रवः गुदस्रवा । मेहः
प्रमेहः । कृच्छ्रं मूत्रकृच्छ्रं । शिरोजाड्यं शिरसोभाराक्रांतत्वमिव । क्लैव्यं स्त्रीष्वनिच्छा
अत्रच्छर्द्दिशब्दः स्यांतः आधित्वात् । आमप्रायविकाररुजः आमबहुलाव्याधयोतीसा
रगूहल्यादयस्तान्ददाति । वसाभंचसकफंचप्राज्यंचपुरीषं येषांतेतथा । नस्रवं
तिक्लेदरक्तादिकमितिशेषः । नभिद्यंतेगाढविद्धादिभिः पीडिता अपिनशीर्य्यंते
रस्याः २९ ॥ ३० ॥ ३१ ॥ ३२ अथत्रिदोषार्शसां सहजार्शसां च लक्षणमाह । सर्वैः सर्वा
त्मकान्याहुर्लक्षणैः सहजानि च । सर्वैर्लक्षणैः वातपित्तश्लेष्मार्शोलक्षणैः प्रागुक्तैः

१०१

सर्वात्मकानि सान्निपातिकान्यर्शांसि स्युः ॥ तथान्यैरेव लक्षणैः सहजानि चार्शांसि स्युः ॥
तेषामपि त्रिदोषजत्वात् ॥ अथ तेषां तरोक्तसहजार्शोलक्षणं यथाह ॥ अर्शांसि सह
जातानि दारुणानि भवंति हि ॥ दुर्दर्शनानि पांडूनि परुषाण्यरुणानि च ॥ २३ ॥ अंतर्मुखा
नि तैरार्तः क्षीणः क्षीणस्वरो भवेत् ॥ तीक्ष्णानेलक्षीक्ष्णरेताः शिरासंततविग्रहः ॥
२४ ॥ अल्पप्रजः क्रोधशीलः संततांत्रसुतान्वितः ॥ शिरो हृत्कर्णनासास्युरोगी ह
त्रेपसेकवान् ॥ २५ ॥ ननु गुददेशोद्भवाणां गुदजस्योत्पादातकथं सर्वदेहेऽकृपाकृत्स्नत्वा
दिरूपादुष्टिरित्यत आह ॥ पंचात्मा मारुतः पित्तं कफो गुदवलित्रयं ॥ सर्व एव प्रकुप्यं
ति गुदजानां समुद्भवे ॥ २६ ॥ तस्मादर्शांसि दुःखानि बहुव्याधिकराणि च ॥ सर्वदेहो
पतापीनि प्रायः कृच्छ्रतमानि च ॥ २७ ॥ पंचात्मा पंचस्वरूपः प्राणापानसमानो

१०१

दानव्यानभेदात्॥ एवंलिंगविपरिणामात्संचात्मकत्वंपित्तेचयोद्रव्यं॥ आलोचकरं
जकसाधकपाचकभ्राजकभेदात्॥ कफोपिपंचात्मा अवलंबकक्लेदकबोधकतर्पक
श्लेष्मकभेदात्॥ गुदवलित्रयस्यप्रकोपोविकृतत्वंस्वकार्य्याकर्तृत्वमितियावत्॥ गु
दवलित्रयइतिसप्तम्यंतःपाठोऽप्युक्तः॥ तत्रप्राणोदानयोःसन्निधानस्यासंभवात्
गुदवलीद्वैरप्रात्येश्च॥ सर्वएवेतिउक्तयातादृशएव॥ बहुव्याधिकराणिजठराग्नि
मांद्याद्युपद्रवकराणि॥ प्रायःकृच्छ्रतमानीतिप्रायोग्रहणात् असाध्यानिसुखसा
ध्यान्यपीति॥ ३६॥ ३७ अथसुखसाध्यार्शोलक्षणमाह॥ बाह्यायांतुवलौजातान्ये
कदोषोल्बणानिच॥ अर्शांसिसुखसाध्यानिनचिरोत्पतितानिच॥ ३७ बाह्यायांवलौ
संवरिण्यां॥ नचिरोत्पतितानि अनतिक्रांतसंवत्सराणि॥ एतानिलक्षणानिनि

लितानि सुखसाध्यत्वबोधकानि ॥ ३८ ॥ अथ कृछ्रसाध्यार्शोलक्षणमाह ॥ द्वंद्वजानि द्वि
तीयायां वलौ यान्याश्रितानि च ॥ कृछ्रसाध्यानि तान्याहुः परिसंवत्सराणि च ॥ ३९ ॥ द्वि
तीयायां वलौ विसर्जन्यां ॥ परिसंवत्सराणि परिगतः ॥ संवत्सरो येषां तानि अतिक्रां
तसंवत्सराणीति यावत् ॥ एतानि प्रत्येकं कृछ्रसाध्यलक्षणानि ॥ ३९ ॥ अथासाध्यार्शो
लक्षणमाह ॥ सहजानि त्रिदोषाणि यानि चाभ्यंतरावलिं ॥ जायंतेर्शांसि संश्रित्य ता
न्यसाध्यानि निर्दिशेत् ॥ ४० ॥ अभ्यंतरां वलिं प्रवाहिनीं ॥ एतान्यपि प्रत्येकमसाध्य
लक्षणानि ॥ ४० ॥ किंच ॥ शेषत्वादायुषस्तानि चतुष्पादसमन्वये ॥ याप्यंते दीप्तकाया
ग्नेः प्रत्याख्येयान्यतोन्यथा ॥ ४१ ॥ यथायुषः शेषो वर्त्तते चिकित्सायाश्च चत्वारः पादाः
ते यथा ॥ वैद्यवचनकारी धनवानुदारो जितेंद्रियो रोगी ॥ श्लोकार्थे कर्मणि च कुशलो

वैद्यः ॥ अनलसः आप्तः प्रियः परिचारकः ॥ नचैरसवीर्यादियुक्तमौषधं ॥ एषां समन्व
ये संयोगे सति ॥ दीप्तकायाग्नेः पुरुषस्य तानि अर्शांसि साध्यंते चिकित्सया ॥ अतोन्य
था प्रत्याख्येयानि न चिकित्स्यानीत्यर्थः ॥ ४१ ॥ अथार्शसस्यारिष्टमाह ॥ हस्ते पादे मुखे
नाभ्यां गुदे वृषणयोस्तथा ॥ शोथो हृत्पार्श्वशूलं च यस्यासाध्योर्शसो हि सः ॥ ४२ ॥ अ
साध्यः सन्निहितमरणो वोद्धव्यः ॥ अर्शसः अर्शोरोगयुक्तः एतन्निमित्तमरिष्ट
लक्षणं ॥ ४२ ॥ हृत्पार्श्वशूलं संमोहः छर्दिरंगस्य रुक्ज्वरः ॥ तृष्णा गुदस्य पाकश्च नि
हन्युर्गुदजातुरं ॥ ४३ ॥ गुदस्य पदास्य मोषदेशंस्तस्य पाकः ॥ हृत्पार्श्वशूलादि समस्तं
चारिष्टलक्षणं ॥ ४३ ॥ तृष्णारोचकशूलार्त्तमतिप्रस्रुतशोणितं ॥ शोफातीसारसंयु
क्तमर्शांसि क्षपयंति हि ॥ ४४ ॥ क्षपयंति नाशयंति ॥ ४४ ॥ अथ मेद्रादिजार्शोलक्षणं

माह ॥ मेढ्रादिष्वपि वक्ष्यन्ते यथास्वं नाभिजानि च ॥ गण्डूपदास्यरूपाणि पिच्छिलानि मृदू
नि च ॥ ४५ ॥ यथास्वं यथात्मीयलक्षणं ॥ नेत्राद्युक्तनिदानपूर्वरूपसंप्राप्तिलक्षणयुक्तं
गण्डूपदः किंचुलकः ॥ आदिशब्देन नासादीनां ग्रहणं ॥ ४५ ॥ अथ मांसांकुरसाम्याच्चर्म
कीलस्य संप्राप्तिपूर्वकं लक्षणमाह ॥ व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः
कीलोपमं स्थिरखरं चर्मकीलं तु तद्विदुः ॥ ४६ ॥ व्यानो वायुः ॥ एतच्चग्रदोषदेशे एव ना
न्यत्रेति क्कातिकुंडाद्यः खरं कर्कशं ॥ ४६ ॥ तस्यैव वाताद्दिभेदेन लक्षणमाह ॥ वातेन
तोदपारुष्ये पित्तादसितरक्तता ॥ श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता ॥ ४७ ॥
सवर्णता गात्रसमानवर्णता ॥ ४७ ॥ इत्यर्शोनिदानं ॥ अथार्शसां चिकित्सामाह ॥
अर्शोतिसारग्रहणीविकाराः प्रायेणचान्योन्यनिदानभूताः ॥ सन्नेनले सति

नसंतिदीप्तेरक्षेदतस्तेषुविशेषतोग्निं ॥ यद्वायोरनुलौम्याययदग्निवसव्हृये ॥ अ
न्नपानौषधंसर्वंतत्सेव्यंनित्यमर्शसैः ॥ अर्शसामौषधैःक्षारैःशस्त्रैरप्यचतथा
ग्निना ॥ चिकित्सास्याच्चतुर्द्धेवमुख्यंतत्रौषधंविदुः ॥ अर्शोसिभिन्नवर्चांसिहन्या
द्वातातिसारवत् ॥ उदावर्त्तविधानेनगाढविट्कान्युपाचरेत ॥ गुदजान्शोणित
वहान्पित्तशोणितनाशनैः ॥ योगैरुपाचरेत्तक्रंविड्बंधेनुप्रशस्यते ॥ यवानीविश्व
संयुक्तंतक्रमर्शोनिबर्हणं ॥ घृतसंभर्जितांपथ्यांपिप्पलीगुडसंयुतां ॥ भक्षयेद्वात
वद्दंतीसंयुतांचानुलोमनि ॥ महिषिमूत्रंसौरणंकंदंपक्वाग्नौपुटपाकवत् ॥ अद्यात्स
तैललवणंदुर्नामविनिवृत्तये ॥ अर्कार्कदलैर्वेष्टयित्वापश्चान्मृदालिप्तापुटपाकैः
कार्य्यः ॥ देवदालीकषायेणशौचमाचरतांनृणां ॥ किंवातक्रमसेवाभिःकुतः

१०४

स्नुग्गुदजांकुराः ॥ सिंधूत्थं देवदाल्याश्च वीजं कांजिकपेषितं ॥ गुदांकुरान् प्रलेपेन पा
तयेदुल्वणान्यपि ॥ लेपंरजनिचूर्णेन सुधादुग्धयुतेनच ॥ अर्शोरोगानिरत्यर्थं
कारयेत चिकित्सकः ॥ सुधादुग्धं स्नुकदुग्धं पिप्पली सैंधवं कुष्ठं शिरीषस्य फलं
तथा ॥ स्नुग्दुग्धमर्कदुग्धं वा लेपोयं गुदजान्हरेत ॥ हरिद्राजालिनीचूर्णं कटुतैलस
मन्वितं ॥ एषलेपोवरः प्रोक्तो ह्यर्शसामंतकारकः ॥ जालिनी कटुतोरई इति लोके ॥ शस्त्रै
र्वाथजलौकाभिः श्रोच्छूनकठिनार्शसां ॥ शोणितं संचितं दक्षो हरेत्स्रावैः पुनःपुनः
कासीसं सैंधवं कृष्णा शुंठी कुष्ठं च लांगली ॥ शिलाभिदश्वमारश्च दंतीजंतुघ्न चि
त्रकं ॥ तालकं कुनटी स्वर्णक्षीरी चैतैः पचेद्भिषक ॥ तैलं स्नुह्यर्कपयसा गवां मूत्रे
चतुर्गुणे ॥ एतदभ्यंगतो र्शांसि क्षारेणेव पतंति हि ॥ क्षारकर्मकरं ह्येतन्नच संदू

१०४

षयेद्दली॥ कुनटीमनःसिला ॥ इति चहल्कासीसाद्यं तैलं ॥ पुनः पाठांतरे लोच्यते ॥ कासी
सं लांगलीकुष्ठं ष्टुंटीकृस्माचसैंधवं ॥ मनःशिलाश्चमाल्प्ना चिडंगं चित्रको वृषः ॥ दं
तीको शातकीवीजं हेमाव्हा हरितालकः ॥ कल्कैः कर्षमितैरेतैस्तैलप्रस्थं विपाचयेत्
अर्कसेहुंडयोः क्षीरं प्रदद्याच्चपलं पलं ॥ चतुर्गुणं गवां मूत्रं दत्वा संसाधयेद्भिषक् ॥
खरनादेन कथितं मुनिना तैलमुत्तमं ॥ अभ्यंगान्नाशयेदेतद्दर्शांसि प्रवलान्यपि
छिनत्तिच्छारवन्मूलं वलिं चैव न दूषयेत् ॥ इति खरनादोक्तंकासीसाद्यं तैलं ॥ पथ्या
दलैस्त्रिवृत्कल्कः पलपंचकंस्यादेकं पेतं चमरिचाद पिजीरकाच्च ॥ कृष्णातदुग्धंयजेद्
चचिकाग्निर्त्युंज्यः कृष्णादिपंचकमिदं पलतः प्रवृद्धं ॥ एतैरलुष्करपलाष्टकसंयुतैः
स्यात्कं दस्त्वलुष्करपलाद्विगुणः प्रकल्प्यः ॥ स्याद्यावच्छूकेकुंडवार्द्धमतः समस्ता

॥३०५॥

योऽयं गुडो द्विगुणितो वटकीकृतश्च ॥ कांकायनेन मुनिना गदितः किलायं श्रेयस्करेण
वटकोऽत्र गुदामयेषु ॥ क्षाराग्निशस्त्रपतनैरपियेन सिद्धाः सिद्धंत्वनेन वटकेन गुदा
मयास्ते ॥ इति कांकायनवटकः ॥ शुंठीकणामरिचनागदलत्वगेलं चूर्णीकृतं क्रमवि
वर्द्धितमूर्द्धमंत्यात् ॥ खादेदिदं समसितं गुदजाग्निमांद्यगुल्मारुचिश्वसनकंठहृ
दामयेषु ॥ इति समशर्करं चूर्णं ॥ त्रिकत्रयं पंचचाहिंगु पाठाक्षारौ निशाद्वयं ॥ चव्यति
क्तकतिंगानि शताव्हा लवणानि च ॥ ग्रंथिविल्वाजमोदाश्च गणो ह्यं विंशतिर्म
तः ॥ एतानि समभागानि सूक्ष्मचूर्णानि कारयेत् ॥ चूर्णं बिडालपदकं पिवेदुष्णे
न वारिणा ॥ एरंडतैलयुक्तं वा लिह्याच्चूर्णमिदं नरः ॥ हन्याद्दर्शांसि सर्वाणि श्वा ॥३०५॥
सशोथभगंदरान् ॥ हृच्छूलं पार्श्वशूलं च वातगुल्मं तथोदरं ॥ हिक्कां श्वासं प्रमे

हांश्च पांडुरोगं सकामलं ॥ आमवातमुदावर्त्तमंत्रवृद्धिगुदक्रमीन् ॥ अन्येच ग्रहणी।
दोषा भिषग्भिर्ये प्रकीर्त्तिताः ॥ विजयो नाम चूर्णो यं तान् सर्वान्नाशु नाशयेत ॥ म
हज्वरोपसृष्टानां भूतोपहतचेतसां ॥ अप्रजानां च नारीणां हितमेतद्धि मेषजं ॥
त्रिकत्रयं त्रिफलात्रिकटुत्रिसुगंधीनि ॥ तवृलवणानि पंच विडालपदकं कर्षं ॥ इति वि
जयचूर्णं ॥ भल्लातकानि त्रिफला दंती चित्रकमेवच ॥ एतानि समभागानि सैंध
वं द्विगुणं भवेत् ॥ स्निग्धकुंभे भवेत्पक्वं मृदुनागोमयाग्निना ॥ एतत्कल्याणत
वृणं श्लेष्म अर्शो विकारिणां ॥ इति कल्याणतवृणं ॥ मरिचं पिप्पली कुष्ठं सैंधवं जी
रनागरं ॥ वचा हिंगु विडंगानि पथ्या चाक्षाजमोदकं ॥ एतेषां कारयेच्चूर्णं चूर्णस्य
द्विगुणं गुडं ॥ खादेत्कर्षमितं चापि पिबेदुष्णं जलं ततः ॥ सर्वाण्येवं कृमीसिनस्यं।

तिया तत्त्वानि विशेषतः ॥ इति दुर्नामकुठारमोदकः ॥ वृद्धदारुकभल्लातसुंठीचूर्णे
१० द्वी न योजयेत् ॥ सगुडो मोदको हन्यात्सद्विधार्शः कृतां रुजं ॥ इति वृद्धदारमोदकः
सूरणषोडशभागा वन्हेरष्टौ महौषधस्यापि ॥ अर्द्धेन भागयुक्तिर्मरिचस्य ततो
पिचार्द्धेन ॥ त्रिफलाकणाः समूलास्तालीसारुष्करकृमिघ्नानां ॥ भागा महौषधस
मा दहनांशास्तालमूली च ॥ भागः सूरणतुल्यो दातव्यो वृद्धदारुकस्यापि ॥ भृंगैले
मरिचांशे सर्वाण्येकत्र कारयेत् चूर्णं ॥ द्विगुणेन गुडेन युतः सेव्योयं मोदकः प्र
कामधनैः ॥ गुडवर्ज्यं भोज्यं निरस्तैरितरैः सूपद्रव्यं कुपीत ॥ भस्मकमनेन जनितं पू
र्वमगस्त्यस्य योगराजेन ॥ भीमस्य मारुतेरपि महाशनौ येन तौ जातौ ॥ अग्निव
लमात्रहेतुर्न केवलं सूरणो महावीर्यः ॥ हंताशस्त्रक्षारानलैर्विनाप्यर्शसामेष ॥ १० द्वी

श्वयथुप्लीपदगददहतगूहरणीचक्रकानिलोद्भूतं ॥ नाशयतिवलिंपलितमेधांकुरू
तेजरांहरेत् ॥ हिक्कांकासंश्वासंसराजरोगान्प्रमेहांश्च ॥ प्लीहानंचतथोग्रंहन्याद्दु
श्चुरसायनंपुसां ॥ एषांभागायथा ॥ शूरणस्यभागाः १६ ॥ चित्रकस्यभागाः ८ ॥ महौ
षधस्यभागाः ४ ॥ मरिचस्यभागाः २ ॥ त्रिफलादिकृमिघ्नानांभागाःप्रत्येकं ४ ॥
तालमूल्याभागाः ५ ॥ वृद्धदारुकस्यभागाः १६ ॥ भृंगंवरांगकेतस्यभागो १ ॥ एलायाः
सूक्ष्मायावीजस्यभागो ॥ २ ॥ गुडस्यभागाः ७६ ॥ इतिवृहच्छूरणमोदकः ॥ सुरणंघृते
पक्वाकटुत्रिकेनयुतद्विगुणेनगुडेनसहभक्षितंनस्यातिश्वयंकुरातृपित्तश्लेष्मप्रश
मनीकच्छूदद्रुरुजापहा ॥ गुदजान्नाशयत्याशुभक्षितासगुडाभया ॥ इत्यभयामोदकः
त्रिफलादशमूलाग्नितिकुंभानांपलंपलं ॥ चारित्रेलोऽष्टतपादशेषेगुडतुलायुतं ॥

॥१०७॥

आज्यभांडस्थितं मासं दंत्यारिष्टो निषेवितः ॥ गुदकृमिमुदावर्त्तगुल्महृल्लीपांडुरोगहा
इति दंत्यारिष्टः ॥ कर्पासमज्जा तत्पुनं स्वर्जिकाक्षारहिंगुकं घृतेन कोलमात्रा हि गु
टिका शूलविनाशिनी ॥ इति कार्पासमज्जादिगुटी ॥ शुद्धं बलिं रससमं सुदृढं विमर्द्य
सर्पिः स्नुतं हि गगनं चोलरजो विमिश्रं ॥ तावत्पचेद्द्रवति लोहमये च पात्रे क्षिपे
च्च कदलीदलयुग्ममध्ये जातो रसः पर्पटिकाभिधानः ॥ समस्तदुर्नामकरोगहारी
संसेवितो वल्लचतुष्कमात्र आर्त्तस्य पुंसस्तनु(स्य) पुष्टिकारी ॥ इति बोलबद्धो रसः ॥ मृतसू
ताभ्रलोहार्कविषगंधं समं समं ॥ सर्वतुल्यां शुभल्लातफलमेकत्र कारयेत् ॥ द्रवैः सू
रणकंदोत्थैः खल्वे मर्द्यं दिनत्रयं ॥ माषमात्रं लिहेदाज्यै रसाद्धार्शांसि नाशयेत्
रसो नित्योदितो नामार्शोरोगकुलांतकः ॥ इति नित्योदितो रसः ॥ शुद्धं सूतं पले

॥१०७॥

कंकुष्ठकुंगंधं पलद्वयं । मृतं ताम्रं मृतं लोहं द्वयमेतत्पलत्रयं । स्नुक्‌वरांगलांगली दंती वि
ल्वं चैव ससचित्रकं । प्रत्येकं द्विपलं योज्यं यवक्षारं च टंकणं । उभौ पंचपलौ ग्राह्यौ सैं
धवं पलपंचकं । द्वात्रिंशत्पलगोमूत्रं स्नुहीक्षीरं च तत्समं । मृद्वग्निना पचेत्स्थाल्यां
यावत्तत्पिंडतां व्रजेत् । खादेन्माषद्वयमितं रसमर्शःकुठारकं । इत्यर्शःकुठारको र
सः । तुषं कांजिकसत्वस्य शंकाशानदत्तान्वितं । समं चूर्णीकृतं पायौ धूपोर्शोघ्न
स्कृतस्मरणात् । पंचांगमर्कमनले विधिवद्दग्धं क्षारं मकस्य चित्रधैः सममस्य
योज्यं । सिंदूरमुत्तममिदं द्विशिखंडयुक्तं लेप्यं निघर्ष्य गुदजानि सुखवपीण ।
तेषामुपर्युपरिभक्तदधिप्रलिपे दुद्धाटये दुतपतित्रितये दिनानां । एवं पतंतिगु
दजान्यचिरेण नूनं दृष्टं मयाबहुशणात नन्यथास्ति । इतिलेपः । कुकुटस्यपुरीषं

१०८

च तथा पारावतस्य च ॥ गृहधूमं च सिद्धार्थं धत्तूरकदलानि च ॥ कांजिकेन च संपिष्य वर्त्तिं संचारयेद्गुदे ॥ इति वर्तिः ॥ मनःशिला सनागरं सगुग्गुलुं ससर्षपं ॥ सदेवदारु चौक्कुरं सकुष्ठनिंबपत्रकं ॥ घृतेन धूपयेद्गुदं ॥ गुदामयं भगंदरं निहंति दुष्टपीनसं व्रणं सदुष्टगंधकं ॥ अत्र हरीतकी मधु च निक्षिपेत ॥ इति धूपः ॥ अथ रक्तार्शसां चिकित्सा ॥ जलौकाभिस्तथा शस्त्रैः सूचीभिर्वा पुनःपुनः ॥ आवर्त्तमानं रुधिरं रक्तार्शसो निवारयेत ॥ रक्तार्शसामुपेक्षेत रक्तमादौ स्रवेद्भिषक ॥ दुष्टास्रे निगृहीते स्युः शूलानाहास्रगामयाः ॥ चंदनकिराततिक्तकधन्वयवासाः सनागराः क्वथिताः ॥ रक्तार्शसां प्रशमना दार्वीत्वग्उशीरनिंबाश्च ॥ चंदनमत्र रक्तं ॥ इति चंदनादिक्वाथः ॥ लाक्षा हरिद्रा मधुकं मंजिष्ठा नीलमुत्पलं ॥ अजाक्षीरेण संपीतं रक्तजार्शोविनाशनं ॥

१०८

इतिलाक्षादिचूर्णं ॥ विषमुष्टिभवंबीजंषड्भागसमांषचापिच ॥ चूर्णितंससितंभक्ष्येद्धन्त्या
र्शोविनिवारणं ॥ महाप्रमेहशमनंत्वग्दोषकृमिनाशनं ॥ नवनीततिलाभ्यासात्के
सरनवनीतशर्कराभ्यासात् ॥ दधिसरमथिताभ्यासात्कुदजाःशाम्यंतिरक्तवहाः ॥ द
ध्नस्तूपरियोभागोघनःस्नेहयुतःसरः ॥ मथितंसरहितंनिर्जलंवस्त्रपूतंदधि ॥ सप
क्वेकेसरक्षौद्रंनवनीतंनवंलिहन् ॥ सिताकेसरसंयुक्तंरक्तार्शसःसुखीभवेत् ॥ सम
गोत्पलमोचाव्हतिरीटतिलचंदनैः ॥ सिद्धंछागीपयोदद्यात्कुदजेशोणितात्मके ॥ स
मंगालज्जालुः ॥ मोचाव्होमोचरसः ॥ तिरीटोलोध्रः ॥ चंदनमत्ररक्तं ॥ इतिसमंगादि
दुग्धं ॥ कुटजत्वक्पलशतंजलद्रोणेविपाचयेत् ॥ अष्टभागावशेषंतुकषायमव
तारयेत् ॥ वस्त्रपूतंपुनःक्वाथंपचेल्लेहत्वमागतं ॥ मुस्तंमोचरसंलोध्रंकपित्थफ

॥१०८॥

त्‌ धातकी ॥ भल्लातकं विडंगानि त्रिकटु त्रिफलां तथा ॥ रसांजनं चित्रकं च कुटजस्य फ
लानि च ॥ वचामतिविषां बिल्वं प्रत्येकं च पलं पलं ॥ त्रिंशत्पलं गुडस्यात्र चूर्णीकृत्य नि
धापयेत् ॥ मधुनः कुडवं दद्यात् घृतस्य कुडवं तथा ॥ एष लेहः शमयति अर्शो रक्तस
मुद्भवं ॥ वातिकं पैत्तिकं चैव श्लैष्मिकं सान्निपातिकं ॥ येच दुर्नामजा रोगास्तान् सर्वा
न्नाशयत्यपि ॥ अम्लपित्तमतीसारं पांडुरोगमरोचकं ॥ ग्रहणीमार्द्दवं कार्श्यं श्वयथुं
कामलामपि ॥ अनुपानं घृतं दद्यान्मधु तक्रं घृतं पयः रोगानीकविनाशाय कौटजो
लेह उच्यते ॥ इति कुटजलेहः ॥ गुडूचिका सत्वसमौ रसेंद्रगंधौ समांशेन निखिलेन वर्वि

ल्प

रः ॥ विमर्द्दयेच्छाल्मलिकोद्भवाद्भिः स्याद्वोलवद्धौ मधुयुक्त त्रिमाषः ॥ रक्तार्शसां नाश

कः एष सूतः पित्तार्शसां पित्तजविद्रधेश्च रक्तप्रमेहस्य रवेडस्य चापि स्त्रीणां प्रवा ॥१०८॥

हृस्वभगंदरस्य ॥ इति द्वितीयो बोलबद्धरसः ॥ ज्वराधिकारोक्तो लघुमालिनीवसंतोप्य
त्रातीवहितः ॥ रक्षोघ्नशांतये देयं गुदे करपूरधूपनं ॥ इति धूपः ॥ भावितं रजनीचूर्णैः स्नु
ह्यक्षीरैः पुनः पुनः ॥ बंधनात्सुदृढं सूत्रं छिनत्त्यर्शो भगंदरं ॥ इति क्षारसूत्रं ॥ नासाना
भिसमुत्थेषु तथा मेढ्रादिजेष्वपि ॥ क्रियामर्शस्सु कुर्वीत तत्र तत्र यथोचितां ॥ अथा
र्शोरोगे पथ्यमाह ॥ शालिषष्टिकमुद्गाश्च कुलत्थाश्च यवा अपि ॥ चिर्भीच शतपुष्पी
च कूष्मांडं सपटोलकं ॥ कारवेल्लं वास्तुकं च सूरणो राजिकांजिकं ॥ गुडं तक्रं घृतं चैव न
प्रशस्यंतेर्शसां सदा ॥ रसोनश्चेत वार्त्ताकुमूलकं चात्र वै हितं ॥ वातापहं दीपनं च अ
न्नपानं हितं तथा ॥ अथार्शोरोगे अपथ्यमाह ॥ माषा निष्पावपिण्याकं बिल्वं दधि
च पिष्टकं ॥ पक्वाम्रमालुकं सर्वं आतपं वस्तिकर्म च ॥ विरुद्धानि च सर्वाणि नदीनां

११०

सलिलानि च ॥ वेगरोधं स्त्रियं पद्मपानमुत्कटकासनं ॥ यथास्वं दोषलं चान्नमर्शसः प

रिवर्जयेत् ॥ यत्पथ्यं यदपथ्यं च यच्चस्य ते रक्तपित्तिनां ॥ रक्तार्शो रोगिणां तत्तु पथ्यं विंद्या

द्विशेषतः ॥ इत्यर्शसां चिकित्सा ॥ अथ जठराग्निविकारादिनिदानमाह ॥ तत्र संनिकृष्ट

निदानपूर्वकानादौ जठराग्निविकारानाह ॥ कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरो

नलः ॥ मंदस्तीक्ष्णोथ विषमः समश्चेति चतुर्विधः ॥ १ ॥ कफपित्तानिलाधिक्यादिति

यथाक्रमं मंदादिषु योज्यं ॥ तत्साम्यात्तेषां कफादीनां साम्यात् ॥ समोऽविकृतः धातु

साम्यहेतुरित्यर्थः ॥ जाठर इति धात्वग्निभूताग्निव्यवच्छेदार्थं ॥ १ ॥ तत्र मंदस्याग्नेर्लक्ष

णमाह ॥ स्वस्थोपि नैव मंदाग्नेर्मात्रा भुक्ता विपच्यते ॥ छर्दिः सादः प्रसेकः स्याच्छिरो

जठरगौरवं ॥ २ ॥ अथ तीक्ष्णस्य लक्षणमाह ॥ मात्रातिमात्राप्यशिता तीक्ष्णाग्नेः ॥ ११०

पच्यते सुखं ॥ अत एव हि कस्यापि मतं तीक्ष्णोग्निरुत्तमः ॥ २ मात्रातिमात्रेत्यत्र लक्ष-
णं तेनाजीर्णभोजनादिकमपि लक्षणीयं पक्तं तत्रांतरे ॥ अतिमात्रमजीर्णेपि गुरु-
चान्नमथाप्यनतः ॥ दिवापि स्वपतो येन पच्यते सोग्निरुत्तम इति ॥ एतेन कस्यापि मते
तीक्ष्ण उत्तम इत्युक्तं भवति ॥ स च मधुरस्निग्धादिभोज्यसंपत्तावुत्तमः ॥ तर्हि कथं तीक्ष्ण-
स्य विकारमध्ये गणना ॥ उच्यते ॥ समोग्निः क्षुधाविघातादप्येव विकारं न करोति
तीक्ष्णस्तु स्वस्वकालमपि क्षुधाविघातादप्येवं पैत्तिकान् विकारान् करोति अत ए-
व तीक्ष्णः पित्तसमुत्थानानिति वक्ष्यते ॥ तस्मात्तीक्ष्णस्य विकारमध्ये गणनेति समा-
धिः ॥ २ अथ विषमस्य लक्षणमाह ॥ अशितात्वेतु मात्रापि विषमाग्नेस्तु देहिनः
कदाचित्पच्यते सम्यक्कदाचिन्न विपच्यते ॥ ४ तस्याध्मानमुदावर्त्तः शूलं जठरगौ-

रवं प्रवाहणमतीसारस्तथा स्याद्दंत्रकूजनं ५ अथ समस्य लक्षणमाह समा समाग्ने
रक्षिता मात्रा सम्यग्विपच्यते एषां मध्ये तु सर्वेषां समोग्निः श्रेष्ठ उच्यते ६ समाउ।
चिता मात्रा आहारस्य ६ अथ मंदाद्यग्निजन्यान् विकारानाह मंदोग्नेर्देहिनां कु
र्याद्विकारान् कफसंभवान् तीक्ष्णः पित्तसमुत्थानान् विषमो वातहेतुकान् ७ अ
थ तीक्ष्णाग्नेरेवावस्थाविशेषस्य भस्मकस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह
कट्वादिरूक्षान्नभुजां नराणां क्षीणे कफे मारुतपित्तवृद्धौ अतिप्रवृद्धः पवनान्वि
तोग्निर्भुक्तं क्षणाद्भस्मकरोति यस्मात् तस्माद् सौ भस्मकसंज्ञको भूदुपेक्षितोयं प
चते च धातून् ८ अथ भस्मकस्य सोपद्रवमरिष्टमाह तृट्स्वेददाहमूर्च्छादीन् कृत्वै
वाग्निसंभवान् पक्वान्नं च ततो धातून् स क्षिप्रं नाशयेन्नरं ९ अथाजीर्ण

१११

स्यविप्ररूपंनिदानमाह ॥ अत्यंबुपानाद्विषमाशनाच्च संधारणात्स्वप्नविपर्ययाच्च

कालेपि सात्म्यं लघु चापि भुक्तमन्नं न पाकं भजते नरस्य ॥ १० ॥ संधारणात् उद्गतमूत्र

पुरीषादीनां ॥ स्वप्नविपर्ययात् दिवास्वप्नाद्रात्रौजागरणात् ॥ लघुचापीत्यपिशब्दात्स्नि

ग्धोष्णादिगुणयुक्तमपि ॥ १० ॥ अथ मानसदोषविषयकमजीर्णमाह ॥ ईर्ष्याभयक्रो

धपरिप्लुतेन लुब्धेन रुग्दैन्यनिपीडितेन ॥ प्रद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक्प

रिपाकमेति ॥ १ ॥ परिप्लुतेन व्याप्तेन ॥ १ ॥ उक्ताकारणोभ्योतिमात्रभोजनं विशेषादजीर्ण

स्यकारणं अजीर्णं च बहुव्याधीनां कारणमित्याह ॥ अनात्मवंतः पशुवद्भुंजते ये

ऽप्रमाणतः ॥ रोगानीकस्य ते मूलमजीर्णं प्राप्नुवंति हि ॥ १२ ॥ अनात्मवंतः अबुद्धिमं

तः लोलुपत्वेन तदात्वसुखकांक्षिण इत्यर्थः ॥ अत एवोक्तं पशुवदिति ॥ रोगानीके

स्वविष्टम्भ्यादेः मूलंकारणं ॥ १२ ॥ किंच ॥ प्रायेणाहारवैषम्यादजीर्णं जायते नृणां ॥ तन्मू
लो रोगसंघातस्तद्विनाशाद्विनश्यति ॥ १३ ॥ तद्विनाशात् अजीर्णविनाशात् विनश्यति
रोगसंघातः इत्यर्थः ॥ वह्नातत् अजीर्णं अशनाद्विना भक्षणाभावेन विनश्यतीति निवर्त्त
ते इत्यर्थः ॥ १४ ॥ अथाजीर्णस्य सामान्यलक्षणमाह ॥ ग्लानिर्गौरवमाटोपो भ्रमो मारु
तमूढता ॥ विबंधो तिप्रवृत्तिर्वा सामान्याजीर्णलक्षणं ॥ १५ ॥ मारुतमूढता वायोरवरो
धः विबंधः मलाप्रवृत्तिः ॥ १५ ॥ विरेको जठरेष्मूलं वमनं च मुहुर्मुहुः ॥ हस्तपादादिसंको
चः सर्वाजीर्णस्य लक्षणमिति सामान्यसर्वाजीर्णलक्षणं रसेंद्रकोशात ॥ अथ सालि
रूपकारणैः सहितानजीर्णभेदानाह ॥ आमं विदग्धं विष्टब्धं कफपित्तानिलैस्त्रि
भिः ॥ अजीर्णं केचिदिच्छंति चतुर्थं रसशेषतः ॥ १६ ॥ त्रिभिरित्येकैकशो नैतु मिलितैः

रेकच्छर्दीतितद्भ्रांतिशैत्यतंद्रारुचिज्वरैः निष्पंदिनाडिकाभिश्च विसूचींकलयेद्विषगि
तिरसेंद्रकोशादिविसूचीलक्षणं

केचित्सुश्रुतादयः ॥ रसशेषतः भुक्तस्यपक्वस्यसारभूतोद्रवःसचापक्वःरसशेषस्तस्मा
च्चतुर्थमजीर्णंनत्वामाजीर्णं ॥ नत्वामाजीर्णाद्रसशेषस्यकोभेदःउच्यते ॥ आममधुर
तांगतमपक्वमन्नमेव ॥ रसशेषस्तुभुक्तस्यपक्वस्यसारभूतोयोद्रवःसचापक्वइतिभे
दः ॥ १६ ॥ अजीर्णंपंचमंकेचिन्निर्दोषंदिनपाकिच ॥ वदंतिषष्ठंचाजीर्णंप्राकृतंप्रति
वासरं ॥ १७ ॥ निर्दोषंगौरवमात्रमाध्मानादिदोषाजनकं ॥ दिनपाकिचेतिआहारोऽहो
रात्रेणपाकंयातीतिस्वभावः ॥ यत्तुमात्राकालसात्म्यादिदोषाद्दिनांतरेपाकंयाति
तद्दिनपाकि ॥ कालव्यतिक्रमेणपच्यमानमपिगौरवाद्यजनकमितिपूर्वाभ्याभेदः

एतदभिधानस्य प्रयोजनं पाककालप्रतीक्षणार्थं ॥ अतएव याममध्ये न भोक्तव्यमिति
वचनं प्राकृतमविकारकं ॥ प्रतिवासरं प्रतिदिनमपि ॥ अयमभिप्रायः भुक्तं यावन्न
जीर्णं तावदजीर्णमित्युच्यते ॥ एतदभिधानस्य प्रयोजनं पाकार्थं याम पार्श्वशयनप्र
यष्टव्यादिसेवनार्थं ॥ उक्तं हि सुश्रुते ॥ भुक्त्वा पादशतं गत्वा वामपार्श्वेन संविशेत् ॥ श
ब्दरूपरसस्पर्शगंधांश्च मनसः प्रियान् ॥ भुक्तवानुपसेवेत तेनान्नं साधु तिष्ठतीति
न चात्राहारस्य निषेधः ॥ प्रातराशे त्वजीर्णेपि सायमाशो न दुष्यतीति वचनेन सायमा
शस्यावश्यंकर्तव्यत्वात् ॥ १७ ॥ अथ यामाजीर्णस्य लक्षणमाह ॥ तत्रामे गुरुतोत्क्लेशः
शोथो गंडाक्षिकूटगः ॥ उद्गारश्च यथाभुक्तमविदग्धः प्रवर्तते ॥ १५ ॥ तत्र तेषु मध्ये
गुरुता उदरोगयोः ॥ उत्क्लेशः उपस्थितवमनमिव गंडः कपोलः ॥ आक्षिकूटोक्षिपु

११३

रुक्ः॥ तद्वतः शोफो भवति प्रभावात् उद्गारश्च यथाभुक्तमिति मधुरादित्वयः॥ अविद
ग्धः अनम्लो निर्गंधश्च॥ १८ अथ विदग्धाजीर्णस्य लक्षणमाह॥ विदग्धे भ्रमतृण्मू
र्छाः पित्ताच्च विविधा रुजः उद्गारश्च सधूमाम्लः स्वेदो दाहश्च जायते॥ १९ विविधा रुजः
ओषचोषादयः॥ सधूमाम्ल इति धूमोद्गारे म्लोद्गारश्च॥ १९ अथ विष्टब्धाजीर्णरसशे
षाजीर्णयोर्लक्षणमाह॥ विष्टब्धे शूलमाध्मानं विविधा वातवेदनाः॥ मलवाताप्रवृत्ति
श्च स्तंभो मोहोंगपीडनं॥ रसशेषेऽन्नविद्वेषो हृदयाशुद्धि गौरवे॥ २० वातवेदनातो
दभेदादयः॥ स्तंभो गात्रानां॥ मोहो मूर्छा॥ २० रसशेषाजीर्णस्योपद्रवानाह॥ मूर्छाप्रलापो
वमथुः प्रसेकः सदनं भ्रमः॥ उपद्रवा भवंत्येते मृतिश्च रसशेषतः॥ २१ अथातिमात्रापि
तेभ्यः आमाद्यजीर्णेभ्यो विसूच्यादिरोगानाह॥ आमं विदग्धं विष्टब्धमित्यजीर्णय

॥ ११४ ॥

दीरितं ॥ विष्णुच्यलसकौ तस्माद्धवेद्यायिविंशतिका ॥ २२ नात्रयथासंख्यं ॥ यदिचेत्तदा वि
ष्णुच्याद्विंशतिकाभवितुमर्हति साचक्रकपदा तामप्यं भवतीत्येकैकतो जीर्णाद्विष्णुच्याद्विंश
पोत्पतिः ॥ २२ अथविष्णुच्यानिरुक्तिमाह ॥ भूचीभिरिव गात्राणि तुदन् संतिष्ठते निरः
यत्राजीर्णेन सा वैद्यैर्विष्णुचीति निगद्यते ॥ २३ ॥ अथविष्णुच्यानिदानमाह ॥ न तां परिमि
ताहाराः न भंते विदितागमाः ॥ मूढास्तामजितात्मानो लभंतेऽशनलोलुपाः ॥ २४ ॥ विदिताग
माः ज्ञाता आयुर्वेदाः ॥ मूढाः भक्ष्याभक्ष्यानभिज्ञाः ॥ अजितात्मानोऽजितेंद्रियाः ॥ अशनलो
लुपाः पशुवदन्नमात्राभोजिनः ॥ २४ ॥ अथविष्णुच्यालक्षणमाह ॥ मूर्छातिसारौ वमथुः
पिपासा शूलं भ्रमो द्वेष्टनजृंभदाहाः ॥ वैवर्ण्यकंपौ हृदये रुजश्च भवंति तस्यां शिरसश्च
भेदः ॥ २५ ॥ वमथुर्वांतिः ॥ उद्वेष्टनं हस्तपादयोः ॥ शिरसो भेदः शिरःशूलं ॥ अत्र वमना ॥ ११५ ॥

तिसारौ मिलितौ तल्लक्षणमिति स्मृतः ॥ चरकस्तु ऊर्ध्वमधश्च प्रवृत्तामदोषां यथोक्तरू
पां विषूचीं विद्यादित्यवदत्तोर्ध्वगा विषूची भवति तथाधोगापि ॥ २५ ॥ निद्रानाशो
रतिः कंपो मूत्राघातो विसंज्ञता ॥ अमी उपद्रवा घोरा विषूच्याः पंच दारुणाः ॥ २६ ॥
अमी उपद्रवा घोरा इति अमी निद्रानाशादय उपद्रवाः ॥ सर्वेषामेव रोगाणां घोरा भ
यंकराः विषूच्याः पंच दारुणाः विषूच्यास्तु पंचापि यदि स्युस्तदा दारुणाः प्राण
भयंकरा इत्यर्थः ॥ २६ ॥ अथालसकस्य लक्षणमाह ॥ कुक्षिरानह्यते त्यर्थं प्रताम्येत्प
रिकूजति ॥ निरुद्धो मारुतश्चैव कुक्षावुपरिधावति ॥ २७ ॥ वातवर्चोनिरोधश्च यस्या
त्यर्थं भवेदपि ॥ तस्यालसकमाचक्षेत तृष्णोद्गारौ च यस्य तु ॥ २८ ॥ आनह्यते आध्मायते
प्रताम्येत् मुह्येत् पुरुषः ॥ परिकूजति आर्तनादं करोति ॥ कुक्षौ अजीर्णेन निरु

ॐ मारुतः उपरिधावति हृदयकंठादिकं गछतीत्यर्थः ॥ अलसक इति दोषस्थिरत्वनिमित्ता संज्ञा ॥ यदुक्तं काश्यपेन: नाधोयाति न चाप्यूर्ध्वमाहारो न च पच्यते ॥ कोष्ठे स्थितोलसीभूतस्ततोसावलसः स्मृत इति ॥ २३॥२४ ॥ विशूच्यलसकयोररिष्टमाह ॥ यः श्यावदंतोष्ठमुखोल्पसंज्ञो वम्यर्दितोभ्यंतरयातनेत्रः ॥ क्षामस्वरः सर्वविमुक्तसंधिर्यायान्नरः सोऽपुनरागमाय ॥ २५ ॥ अल्पसंज्ञः मोहयुक्तः ॥ अभ्यंतरयातनेत्रः कोटराक्षः ॥ सर्वविमुक्तसंधिः श्लथीभूतसर्वपर्वास्थिसंधिः ॥ अपुनरागमाय मरणाय ॥ २५ ॥ अथ विलंबिकायाः लक्षणमाह ॥ दुष्टं तु भुक्तं कफमारुताभ्यां प्रवर्त्तते नोर्ध्वमधश्च यस्य ॥ विलंबिकां तां भृशदुश्चिकित्सामाचक्षते शास्त्रविदः पुराणाः ॥ २६ ॥ भुक्तमन्नं कफमारुताभ्यां दुष्टमिति संबंधः ॥ भृशदुश्चिकित्सां प्रत्याख्यायोपचरणीयां

यां॥रवमसाध्यैवेतिजेज्जटः॥ननुअलसकविलंविकयोरुभयोरपिवातकफप्रवल
योरूर्ध्वाधःप्रवर्त्तनाश्रीतयोःस्तुल्यत्वात्कोभेदः॥उच्यते॥अलसकेतीव्राःशूला
दयोभवंतितितेनभेदः॥यदुक्तं॥पीडितंमारुतेनान्नंश्लेष्मणारुद्धमंतरा॥अलसंक्षो
भितंदोषैःशल्यत्वेनैवसंस्थितं॥शूलादीन्कुरुतेतीव्रान्छर्द्यतीसारवर्जितानि
ति॥३०॥अथाजीर्णजन्यान्विषूच्यादीनभिधायअजीर्णजन्यस्यामस्यैकाप्यी
तरमाह॥यत्रस्थमामंविरुजेत्तमेवदेशंविशेषेणविकारजातैः॥दोषेणयेनावत
तंशरीरंतल्लक्षणैरामसमुद्भवैश्च॥३१॥आमंकर्तृयत्रस्थंतमेवदेशंविशेषेणरु
जेत॥एतेनान्यदेशेपिकिंचिद्रुजंकरोतीतिबोधयति॥यत्रेतिसर्वनामशब्देन
कुपितवातादीनामिवानियतमेवस्थानमामस्येतिदर्शितं॥कैर्विरुजेदित्य

आह विकारजातैः विकारसमूहैः ॥ किंभूतैरित्यत आह दोषेण येन स्वकारणोपचि
तेन वातादिना अवततं व्याप्तं शरीरं तल्लक्षणैस्तल्लिंगैः स्तोददाहगौरवादिभिः
न केवलं तैः ॥ आमसमुद्भवैर्विकारजातैरपाकालस्यादिभिरिति ३१ अथाजीर्ण
प्रतियोगि तथाजीर्णाहारलक्षणमाह उद्गारशुद्धिरुत्साहो वेगोत्सर्गो यथोचि
तः ॥ लघुता क्षुत्पिपासे च जीर्णाहारस्य लक्षणं ॥ ३२ उद्गारस्य शुद्धिः धूमाम्लादि
रहितत्वं ॥ उत्साहः शरीरमनसोर्बलं ॥ उत्सर्गो मलमूत्रप्रवृत्तिः ॥ वेगसहित उत्स
र्गः वेगोत्सर्गः ॥ यथोचितः उपयुक्ताहारानुरूपः लघुता देहस्य कोष्ठस्य च वि
शेषेण ॥ ३२ इति जठराग्निविकाराजीर्णविषूच्यालसकविलंबिकानिदानं स
माप्तं ॥ अथ जठराग्निविकारादीनां चिकित्सा ॥ समाग्नेः पालनं कुर्याद्विषमे

वातनिग्रहः ॥ तीक्ष्णोऽग्नौ पित्तशमनं मंदे श्लेष्मप्रतिक्रिया ॥ तीक्ष्णोग्नौ तन्निषेवे
त ग्रहस्निग्धं च यद्भवेत् ॥ पञ्चश्लेष्मकरं भुक्त्वा दिवा निद्रा च शस्यते ॥ आमाजीर्णे
वमिः कार्या वचालवणवारिणा ॥ जलंमत्र शरावमात्रं वचा कर्षार्द्धमिता सैंधवं
कर्षार्द्धमितं ॥ धान्यनागरयोः क्वाथः पेयो वाजीर्णशूलहृत् ॥ अन्नं विदग्धं
हि नरस्य शीघ्रं शीतांबुना वै परिपाकमेति ॥ तद्ध्यस्य शैत्येन निहंति पित्तमाक्लेदि
भावाच्च नयत्यधस्तात् ॥ स्वेदं कुर्याच्च विष्टब्धे पिवेद्वा लवणोदकं ॥ रसशेषे दि
वा निद्रां लंघनं वातवर्जनं ॥ आतिप्य जठरं प्राज्ञो हिंगुत्र्यूषणसैंधवैः ॥ दिवास्व
प्नं प्रकुर्वीत सर्वाजीर्णप्रणाशनं ॥ व्यायामप्रमदाध्ववाहनरतान् क्लांतानती
सारिणः ॥ शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडितान् ॥ क्षीणान्

॥११७॥

क्षीणकफान्शिशून्मदहृतान्वृद्धांस्तथाजीर्णिनौ रात्रौजागरितान्नरान्निरशना
न्कामंदिवास्वापयेत् ॥ ईषदम्लकानिपिष्टानिगुरूण्यन्नानिभोजयेत् ॥ भस्मकेश्ले
ष्मलंक्षौद्रंमाहिषंचपयोघृतंहरीतकीकरणचूर्णंसौवर्चलयुतंपिबेत् ॥ क्षौद्रे
णोष्णांबुनावापिसात्वादोषगतिंबुधः ॥ अग्निमांद्यमजीर्णंनितथाध्मानमरोच
कं ॥ शूलंचवातगुल्मंचशीघ्रमेवव्यपोहति ॥ इतिहरीतक्यादिचूर्णं ॥ लवंगशुंठी।
धान्याकपूतनापिप्पलीजलं ॥ पिबेद्वाथवाप्येवंतुविषूचीरोगनाशनमितिरसेंद्र
कोषात् ॥ हिंगुग्रुगंधाचपलाश्वंगवेरंयवानिका ॥ पथ्याचित्रककुष्ठानिभागवृद्धि
यथोत्तरं ॥ चूर्णमग्निमुखंनामपिबेत्कोष्णेनवारिणा ॥ दध्नावामस्तुनावापिसर्व ॥११७॥
वातहरंपरं ॥ अजीर्णमुदरंचैवगुल्मप्लीहगुदांकुरान् ॥ उदावर्त्तक्षयःश्वासंका

संचाक्षुविनाशयेत् ॥ इत्यग्निमुखंचूर्णं ॥ जरणहृचित्रकशुंठीपिप्पलीतीक्ष्णावेल्लं
सलवणमजमोदाहिंगुपथ्येतिकर्षं ॥ पृथगपृथपलमेकंस्यात्त्रिवृच्चूर्णमेषांजनेन
मुद्रवन्हेःपाचनंरेचनंच ॥ तीक्ष्णंमरिचंवेल्लंविडंगं ॥ इतिजरणादिचूर्णं ॥ अजा
जियुग्मजीरकंकटुत्रिकाजमोदकं ॥ ससैंधवंसमंत्विदंग्रहाणरामठाभिधं ॥ कव
लेप्रथमेग्राह्यंसर्पिषाचूर्णमुत्तमं ॥ जठराग्निकरंहृद्यंवातगुल्महरंपरं ॥ अजमो
दात्रयवानीअंतःसंमार्जकत्वात् ॥ इतिहिंग्वादिचूर्णकं ॥ शुंठीवारणमिताकणारी
वमितादीप्याजवान्योःक्रमाद्भागानोत्रितयंद्वयंचेलवणाद्भागःश्रीवैतत्समा
कोष्ठाटोपरुगामगुल्ममलहृद्योलंवराजोदितश्चूर्णोद्रौनयिभस्मसात्कुरुते
किंभोजनंभोजनाः ॥ इतिशुंठ्यादिचूर्णं ॥ शिवाकरंजचित्रकंकणाजटाकटुत्रि

॥११८॥

कं सशर्करं समांशकं लवणे हिवाडवाग्निकं ॥ इति वडवानलचूर्णं ॥ द्वौ क्षारौ चित्रकं पा
ठा करंजलवणानि च ॥ सूक्ष्मैलापत्रकं भार्गी कृमिघ्नं हिंगु पुष्करं ॥ शठी दार्वी त्रिवृन्मु
स्तं वचा चेंद्रयवास्तथा ॥ वृक्षाम्लं जीरकं धात्री श्रेयसी चोपकुंचिका ॥ अम्लवेतसम
म्लीका यवानी देवदारु च ॥ अभयातिविषाश्यामा हपुषारग्वधं समं ॥ तिलमुष्कक
शिग्रूणां कोकिलाक्षपलाशयोः ॥ क्षारौ च लोहकिट्टं च तप्तगोमूत्रसेचितं ॥ सूक्ष्म

भा

चूर्णानि कृत्वा तु समभागानि कारयेत ॥ मातुलुंगरसेनैतद्भावयेद्दिवसत्रयं ॥ दिनत्र
यं तु शुक्तेन तथार्द्रकरसेन च ॥ अत्यग्निकारकं चूर्णं प्रदीप्ताग्निसमप्रभं ॥ उपयु
क्तं विधानेन नाशयत्यचिरात गदान ॥ अजीर्णमथ गुल्मांश्च प्लीहानं गुदजा
नि च ॥ उदराण्यंत्रवृद्धिं च अष्ठीलां वातशोणितं ॥ प्रणुदत्युल्वणान्दोषान् ॥११५॥

नष्टमग्निं प्रदीपयेत् ॥ अपसीरारसा ॥ मुष्ककः मोक्ष इति लोके ॥ इति वृहदग्निमुखं
चूर्णं ॥ स्नुह्यर्कचित्रकैरंडवह्णलांगलपुनर्नवं ॥ तिलापामार्गकदलीपलाशं तिंतिडीं
तथा ॥ गृहीत्वा ज्वालयेदेतं लक्ष्यं भस्माखिलं च तत् ॥ जलाढके विपक्तव्यं यावन्मादा
वशेषितं ॥ सुवस्त्रस्नाव्य विनिष्क्राव्य तत्त्रारमस्यं संयुक्तं ॥ पक्वं निर्द्रूमकठिनं सूक्ष्म ।
चूर्णीकृतं पुनः ॥ यवानीजीरकव्योषस्थूलजीरकहिंगुभिः ॥ पृथग्द्वैपलैरेभिश्चूर्णि
तैस्तद्विमिश्रयेत् ॥ आर्द्रकस्य रसेनापि भावयेच्छोषयेत्पुनः ॥ शीतोदकेन तच्चूर्णं
पिबेत्प्रातर्हि मात्रया ॥ तस्मिन् जीर्णेऽन्नमश्नीयात् यूषैर्जांगलजै रसैः ॥ दधिदुग्धैः स
लवणैः सर्वोष्मैर्वन्हिदीपनैः ॥ एतेनाग्निर्विवर्द्धेत बलमारोग्यमेव च ॥ तत्रानुपा
नं शाल्कं हितकं वा भोजने हितं ॥ मंदाग्न्यशोविकारेषु वातश्लेष्मामयेषु च ॥ स

र्वांगशोथरोगेषु शूलगुल्मोदरेषु च ॥ अश्मर्यां शर्करायां च विरामूत्रानिलरोगिषु ॥ इ

११८ ति वैश्वानरः क्षारः ॥ गंधकं मरिचं शुंठं सौवर्चलसमन्वितं ॥ टंकप्रमाणा वटिका व

द्धा कोष्णाग्निदीपनी ॥ इति गंधकादिवटी ॥ विडंगं नागरं कुष्ठं पथ्यामलविभीतकाः

वचा गुडूची भल्लातं विषं चात्र प्रयोजयेत् ॥ एतानि समभागानि गोमूत्रेणैव पेषये

त् ॥ गुंजाभा गुटिकाः कार्या दद्यादार्द्रकजै रसैः ॥ एकामजीर्णयुक्तस्य द्वे विषूच्यां

प्रदापयेत् तिस्रो भुजंगदष्टस्य चतस्रः सन्निपातिनः ॥ गुटी संजीवनी नाम्ना संजी

वयति मानवं ॥ इति संजीवनी गुटिका ॥ सर्वांहिं देवपुष्पं मरिचं मगधं पोत्रि त्रिके

षं पवान्यौ रक्षाव षाग्नितो पिचित्रिपटुरसपलं गंधकं स प्रकर्षं ॥ शुंठी पथ्या द्रक्षा

क्षामलककलिफलाजातिचव्यानिषट्षड्लेत्रामप्रीतिपात्रेनरवमितमरिचि ॥ ११८

लंचूर्णितंवस्त्रपूतं ॥ त्रिभाग्यंचार्द्रकस्यद्रवमभिविधिवन्माषवअमनमात्रावद्धायुक्ते
लासिद्धाप्रभवतिगुटिकासौलवंगामृताख्या ॥ भुक्तान्नक्कांवुवुक्तासकलसुषकरीदी
प्रमग्निंविधत्तेरष्यापुष्पावपुष्पामयनिचयहृतिख्यातिर्व्यांविभाति ॥ इतिलवंगा
मृतावटिका ॥ मरिचंपिप्पलीमूलंलवंगमभयावती ॥ यत्नानीतिंतडीकंचदाडिमंतव
लात्रयं ॥ एतानिपलमात्राणिमागधीक्षारचित्रकं ॥ ध्वजाजीनागरंधान्यं एलाधा
त्रीफलंसमं ॥ एतानद्विपलिकानभागान्भावयेद्वीजपूरकैः ॥ भावनात्रितयंदत्वागु
टिकांकारयेद्बुधः ॥ छायाशुष्कांप्रकुर्वीतअजीर्णस्यप्रशांतये ॥ अग्निंचकुरुतेघो
रंगुटिकाचामृतप्रभा ॥ इत्यमृतप्रभागुटी ॥ नागरंचचतुर्भागंतदर्धंसैंधवंतथा ॥ गं
धकंभागमेकंचकायस्थासमगंधका ॥ निंबूरसस्यसप्ताहंपुटंदद्याद्विशारदः

१२०

विशूचिकाजीर्णशूलमंदाग्निवमनं हरेत् ॥ ख्याता राजवटी नाम कोलमात्रं प्रभक्षयेत् ॥ इति
राजवटी ॥ व्योषसिंधूत्थयवानिभिरेकद्वित्रितयैः स्मृतः ॥ निंबुमर्द्दितो गाढं नाम्ना शुद्धबो-
धकोरसः ॥ इति शुद्धबोधकोरसः ॥ शुद्धसूतं विषं गंधमजमोदाफलत्रयं सर्जिक्षारय-
वक्षारं वन्हिसैंधवजीरकं सौवर्चलं विडंगानि सामुद्रं त्र्यूषणं समं ॥ विषमुष्टिः सर्व-
तुल्यो जंबीराम्लेन मर्द्दयेत् मरिचाभां वटीं खादेदग्निमांद्यप्रशांतये ॥ पथ्यां शुंठी
गुडं चानुपलांद्वि भक्षयेत्सदा ॥ अग्नितुंडावटी ख्याता सर्वरोगकुलांतका ॥ इति अग्नि
तुंडावटी ॥ टंकणाकर्णामृतानां सहिंगुलानां समा भागाः ॥ मरिचस्य भागयुगलं
निंबूनीरैर्वटिकाकार्या ॥ वटिकां कलापसदृशीमेकां द्वे वा समश्नीयात् सत्वरम-
जीर्णशांत्यै वन्हेर्वृद्ध्यै कफध्वंस्यै ॥ इत्यजीर्णकंटकोरसः ॥ पटुपंचकं हिंगुभं

१२०

त्वचिंचामसितव्योषवल्लीच्चरामृतानि ॥ त्रिफलाशैलवरिकामलवर्गानिंबकूटजभाव्यानिय
ध्यामलतांभ्रजंति ॥ महाशंखवटीख्याता भोजनांते प्रयोजिता ॥ दीपनी परमा हंति मेहाशी
ग्रहणीगदान् ॥ चित्रकायामार्गजटायाःक्वाथेनात्र भावना देया ॥ इति महाशंखवटी
चिंचोक्षारपलं पटुव्रजपलं निंबुरसैःकल्कितं तस्मिन् शंखपलं प्रतप्तमसकृन्नि
र्वाप्यक्षीणं यावधि ॥ हिंगुव्योषपलं रसामृतवलीन्निक्षिप्य निष्कांशकान् वज्राशंख
वटीक्षयग्रहणिकारुक्पंक्तिमूलामनुत् ॥ इति द्वितीयाशंखवटी ॥ स्नुगर्कचिंचाया
मार्गरंभातिलपलाशजाने ॥ लवणान्भिषक्[illegible]गाद्स्यात्प्रत्येकं पलमात्रया ॥ लवणा
नि पंच कृपंच ग्राह्याणि पलमात्रया ॥ स्वर्जिकाचयवक्षारःटंकणं त्रितयं पलं ॥ स
र्वैत्रयोदशपलं सूक्ष्मचूर्णं विधायतु ॥ निंबुफलरसे प्रस्थसंमिते तत्परिक्षिपेत्

१२१

पलं चित्राक्षारं पल परिमितं पंचलवणानां द्वयं सम्यक् पिष्टं भवति विधिना निंबुकरसैः ॥ तत
स्तत्तुल्यं पल परिमितं शंखभस्माकलं क्षिप्ते द्रावणे स्वल्पमथितमनेनैव विधिना ॥ पलप्र
माणं कटुकत्रयं च पलार्द्धमानेन लवंगभागः ॥ विषं पलद्वादशभागमानं पलार्द्धमानं र
सगंधकं च ॥ वदरास्थिप्रमाणेन वटीं कुर्याद्विधानतः ॥ सर्वाजीर्णप्रशमनं स्वर्णं बोदिक्षं शंख
वटीमिमां ॥ गुल्मोदरेषु शूलेषु वह्निमांद्येषु पूजिता ॥ इति शंखवटी बृहत्तरंगिण्यां

तत्र शंखस्य स्वच्छकलं पतं वह्नौ प्रतप्य तु ॥ वारान्निर्वापयेत्सप्त सर्वं द्रवति तद्यथा ॥ नागरं
त्रिपलं ग्राह्यं मरिचं च पलद्वयं ॥ पिप्पलीपलमानास्यात् पलार्द्धं भृष्टहिंगुनः ॥ ग्रंथिकं
चित्रकं चापि यवानी जीरकं तथा ॥ जातीफलं लवंगं च पृथक् कर्षद्वयोन्मितं ॥ रसो गंधो
विषं चापि टंकणं च मनःशिला ॥ एतानि कर्षमात्राणि सर्वं संचूर्ण्य भिज्ञयेत् ॥ आर
द्रार्द्रेन चुक्रेण संनीय वटिकां चरेत् ॥ माषप्रमाणां सा वै चैवं हि शंखवटी स्मृता ॥ १२१

सर्वाजीर्णप्रशमनी सर्वशूलनिवारिणी ॥ विशूच्यलसकादीनां सद्योभवति पाचिनी
चुक्रेणगुडादिनिर्मितेन ॥ तद्यथा ॥ गुडमधुकांजिकतक्रं पयोत्तरं द्विगुणभागसंवृद्धं ॥
न्यस्तंतुधान्यराशौ त्रिदिवसमितितद्भवेच्चुक्रमिति ॥ इतिवहच्छंखवटी ॥ चिंचाक्षस्य
स्नुहीजातमपामार्गकंजंतथा ॥ क्षारत्र्यंलवणांग्रह्य तथालवणपंचकं ॥ सैंधवाद्यं
समादायसर्वमितस्वल्पद्रवं ॥ कर्षंकर्षंविभिन्नंगंधंरसटंकणकंतथा ॥ हिंगुविश्वलिशुं
ठीनांतथामरिचजीरयोः ॥ द्वौद्वौकर्षौपृथक्कार्यौतथाद्वौशंखचूर्णतः ॥ फलत्रया
श्चैककर्षैकंद्विकर्षंतुलवंगतः ॥ एतत्सर्वंसमोदायपंचाम्लक्षाराचूर्णीकृतंशुभं ॥ भावये
दम्लयोगेनसप्तधातुप्रयत्नतः ॥ रसःशंखवटीनाम्नासेवितःसर्वरोगजित् ॥ गुंजा
मात्रमिदंखादेद्वह्निदीपनपाचनं ॥ अजीर्णंयातसंभूतंपित्तश्लेष्मभवंतथा ॥ वि

१२२

शूलीं शूलमानाहं हन्याद्देवेन संशयः ॥ इति द्वितीयाच्छंखवटी ॥ पारदामृतलवंग
गंधकं भागतुल्यमरिचेन संयुतं ॥ तत्र जातिफलमर्द्धभागिकं तिंतिडीफलरसेन मर्द्दि
तं ॥ वन्हिमांद्यदशावर्जं नाशनो रामबाण इति विश्रुतो रसः ॥ संगृहगृहलिकुंभक
लीकें सामवातरवरदुष्टशूलं जयेत् ॥ दीपसेतु चणकानुमानतः ॥ सद्यएव जठराग्नि
दीपनः ॥ रोचकः कफकुलांतकारकः श्वासकासवमिजंतुनाशनः ॥ इति रामबाणर
सः ॥ क्षारत्रयं सूतगंधौ पंचकोलमिदं समं ॥ सर्वैस्तुल्या जयाभस्म तद्वद्धि शिग्रुजम्भ
टा ॥ एतत्सर्वं जया शिग्रु वन्हिमार्कवजैर्द्रवैः ॥ भावयेत्त्रिदिनं घर्मे ततो लघुपुटे क्षिपे
त् ॥ सप्तधार्द्रद्रवैर्द्विघोरसोज्वालानलो भवेत् ॥ निष्कास्य मधुनालीढोनुपानं गुडनाग
रं ॥ हंत्यजीर्णमतीसारं ग्रहणीमग्निमार्द्दवं ॥ श्लेष्महृच्छ्वासवमनमालस्यमरुचिं ॥ १२२ ॥

रामवाला
मस्तरसा
यतेमागाय
त्रमरिचे
नभक्षितं
मित्वतुपा
नमस्योक्तं
गंध्यांतरे

जयेत् जयाविजया ॥ इतिज्वालानलोरसः ॥ शुद्धो रसः पलमितो द्विपलं गंधकं मतं ॥ सर्वं हि
कज्जलीकृत्य लोहपात्रे विनिक्षिपेत् ॥ चुल्ल्यामग्निं मृदुं दद्याद्यथा गंधो न दह्यते ॥ गोमय
स्याल चार्केतुपत्रं यातारिजं क्षिपेत् ॥ स्थापयेच्चूर्णरसं तत्र पत्रं चोपरि निःक्षिपेत् ॥ वस्त्र
शुद्धं ततः कृत्वा लोहपात्रे पुनः क्षिपेत् ॥ पुनस्तत्तापयेच्चुल्ल्यां मातुलुंगरसं ततः ॥ माना
च्छितपलं दद्यात्स्वेच्छकोलं तथैव च ॥ चुक्रस्य च तुलां दत्वा सिद्धं तच्च समुद्धरेत् ॥ एकं तद्गोल
कं कृत्वा तत्समं टंकणं मतं ॥ टंकणाद्द्विविषं दद्यान्मरिचं विषसम्मितं ॥ भावनाचणक
क्षारैः सप्त दद्याद्विचक्षणः ॥ सिद्धस्यैवं रसस्यास्य तु रसं माषद्वयात्मकं ॥ सैंधवं माष
मात्रं तु तक्रेण सह पाययेत् ॥ रसं क्रव्यादनामानं दद्यात्तं भोजनोपरि ॥ क्षीणं तु जारये
द्भुक्तं पुनर्भोजनमाचरेत् ॥ अनेन क्रमयोगेन सर्वव्याधिहरो रसः ॥ इति क्रव्यादरसः

१२३

द्विपलं गंधकं शुद्धं पलमेकं तु पारदं ॥ मृतलोहं ताप्यताम्रं कर्षद्वयमितं पृथक् ॥ संचूर्ण्य सर्वं
संमिश्र्य द्रावयित्वाग्नियोगतः ॥ सम्यग्द्रुतं समस्तं तत्स्वयं गलदले क्षिपेत् ॥ पुनः संचूर्ण्य तत्
सर्वं लोहपात्रे निधाय च ॥ जंबीरस्य रसं तत्र पूतं पलशतं क्षिपेत् ॥ चुल्ह्यां निवेश्य तत घल्ला
वह्निना पचेत् ॥ रसे तस्मिन्घनीभूते तत्संशोष्य विचूर्णयेत् ॥ पंचकोलकषायस्य पुंके
ल सहितस्य च ॥ भावनास्तत्र दातव्याः पंचाशत्संख्यया शनैः ॥ भृष्टटंकणचूर्णेन तुल्येन
सह मेलयेत् ॥ मरिचेनापि तुल्येन तदर्द्धेन विडेन च ॥ भावयेत्सप्तकृत्वस्तद्द्रोणकाम्लजलेन
च ॥ ततः संशोष्य संपिष्य कूपीमध्ये निधापयेत् ॥ रसः क्रव्यादनामायं भैरवानंदयो
गिना ॥ उक्तः सिंहलराजाय बहुमांसाशिने पुरा ॥ भक्षयेद्भोजनस्यांते माषद्वयमितं रसं भ
क्षयित्वा रसं पश्चात्पिबेत्तक्रेण सैंधवं ॥ अतीव गुरु यद्भुक्तमतिमात्रमथापि वा ॥ तत्स

१२३

र्वंजीर्य्यति क्षिप्रं रसस्यैतस्य भक्षणात् ॥ शूलगुल्मं च विष्टंभं प्लीहानमुदरं तथा ॥ रसः
क्रव्यादनामायं विनिहंति न संशयः ॥ इति द्वितीयः क्रव्यादो रसः ॥ पारदाद्विगुणं गंधं गं
धांशं मृतलोहकं ॥ पिप्पली पिप्पलीमूलमग्निशुंठी लवंगकं ॥ लोहसाम्यं पचेत्कुर्व्या
द्रसः साम्यं सुवर्चले ॥ टंकणं मरिचं चापि गंधतुल्यं प्रदापयेत् ॥ एतद्विचूर्ण्य पलेन भाव
येत्सप्तधाम्लकैः ॥ एतद्रसायनं माषमात्रं भुक्ते प्रदापयेत् ॥ तक्रेण केवलं चापि दद्याद्भोज
नपाचनं ॥ क्षिप्रं प्रजीर्यते भुक्तं दीपनं भवति ध्रुवं ॥ सर्वाजीर्णप्रशमनं लघुक्रव्याद
संज्ञितं ॥ इति तृतीयो लघुक्रव्यादरसः ॥ गंधे शौ टंकणं व्योषं लवंगं पटु पंचकं ॥ हिंगुभा
र्गी विषं शुंठी कपर्दभस्मितं समं ॥ नागवल्लीरसै रेषां वटिका माषमात्रकाः ॥ कृत्वा देयाः
शृंगवेरस्वरसैरग्निमांद्यके ॥ कासे श्वासे क्षये सर्वशूले संग्रहणीगदे ॥ क्षुधा सा

१२४

गरनामायं वन्हितुल्यो रसः स्मृतः ॥ इति सुधासागररसः ॥ त्रिकटु त्रिफला चैव तथा लवणपंचकं ॥ क्षारत्रयं रसो गंधो द्विभागं पूर्ववद्विषं ॥ आर्द्रकस्य रसेनैव गुंजामात्रवटीकृता अजीर्णे द्विवटीं खादेत्रव्यंगैः पंचसप्तभिः ॥ सुधासागरनाम्नीयं वटी सूर्य्यविनिर्मिता इति द्वितीयः सुधासागरो रसः ॥ टंकणं रसगंधौ च समं भागत्रयं विषात् कपर्द्दभस्मितं क्षारौ मागधी विश्वमेषजं पृथक्पृथक्कर्षमात्रं पंचभागमिहौषधं ॥ जंबीराम्लैर्दिनेपष्टं भवेदग्निकुमारकः ॥ विषूची शूलवातादि वन्हिमांद्यप्रशांतये ॥ अपं गुंजाद्वयमितो देयो वैद्यैर्विचक्षणैः ॥ इति अग्निकुमारो रसः ॥ सूतं गंधं विषं तुल्यं मर्द्दयेदार्द्रकद्रवैः ॥ अपामार्गचिंचापामार्गक्षारः क्षारौ च टंकणं ॥ जातीफलं लवंगं च त्रिकटु त्रिफला समं ॥ पंच क्षारं पंचपटुहिंगुजीरद्विभागिकं ॥ मर्द्दयेद्रसयोगेन गुंजामात्राव

१२४

टीष्णुभा ॥ पाचनी दीपनी सद्यो ऽजीर्णाभूतविषूचिकाः ॥ हिक्कां गुल्मं च मोहं च नाशयेन्ना
त्र संशयः ॥ रसेंद्रसंहितायां च नाम्ना वह्निमुखो रसः ॥ इत्याग्निमुखो रसः ॥ यवानी
तण्डूलं व्योषं हिंगुसैंधवगंधकं ॥ भावयेल्लिंबुकद्रावैर्हन्यात्सर्वां विषूचिकां ॥ इति वि
षूचिकाविध्वंसनो रसः ॥ रुचिकसैंधवजीरकरसोनकं त्रिकटु रामठचूर्णविमिश्रितं
रुचिरनिंबुरसेन विभावितं सकलमाशु निहंति विषूचिकां ॥ इति रुचकादिगुटी ॥ पा
रदं च विषं गंधं त्रिकटु त्रिफला समं ॥ जातीफलं लवंगं च तल्लवणानि च पंच वै ॥ सर्व
मेतत्कृतचूर्णमम्लयोगेन सप्तधा भावयित्वा वटिकां कुर्याद्गुंजार्द्धप्रमितां बुधैः ॥ र
सो ह्यादित्यसंज्ञोयमजीर्णक्षयकारकः ॥ भुक्तमात्रः पाचयति जठरानलदीपनः ॥
इति आदित्यरसः ॥ तक्रे समुत्पद्यचिरोषितानि तद्बीजमुद्धृत्य च कौशलेन षड्ब

१२५

णं पंचपटूनि हिंगुक्षारौ वजाजी अजमोदकं च ॥ षड्षणादेतद्वर्द्धभागा गणस्यदे
यं चरणोलितस्य ॥ विभाव्येचूर्णकेण रजोस्यमीषां क्षिपेच्छिवावीजनिवासगर्भे
सम र्धधर्मेच विशोष्यतासां हरीतकीमन्यतमां निषेवेत ॥ अजीर्णमंदानलजाठरा
मयानसगुल्मस्थूलगृहणीगदांकुरान ॥ विबंधमानाहहृजोजयत्यसौससामवाता
स्वमृताहरीतकी ॥ इति अमृताहरीतकी ॥ अर्कपत्ररसप्रस्थं प्रस्थं धत्तूरकस्य च ॥
थ्येत स्नुहीरसप्रस्थं प्रस्थं सौभांजनाद्रसात ॥ कुष्ठसैंधवयोः कल्कं पले द्वे द्वे प्रमाणे
तः ॥ तैलप्रस्थं कांजिकेन पचेन्मृदग्निनासमं ॥ लक्ष्यीं विश्वचिकां हंति पक्षाघातं
च गृध्रसीं ॥ इति अर्कपत्रस्वरसादितैलं ॥ पलं चूर्णं कुष्ठं पिचुयुगमितं सैंधवं कणो
तदर्द्धं प्रत्येकं करतलमितं जातिफलकं ॥ कटोस्तैलं किंचित्कुडवमितमग्नावथ धि ॥ १२५

अतं तदेतच्चुक्राख्यं प्रशमयति विषूचीमुग्रसगदाः ॥ इति चुक्राद्यं तैलं ॥ शुद्धं सूतं वि
षं गंधं पलमानं पृथक्पृथक् ॥ हरीतकी च द्विपला नागरं त्रिपलं स्मृतं ॥ कृष्णा च
मरिचं तद्वत् सिंधूत्थं त्रिपलं पृथक् ॥ चतुःपला च विजया मर्द्दयेत् निंबुकद्रवैः ॥ एत
न्निः सप्त देयानि घर्ममध्ये पुनः पुनः ॥ अजीर्णारिरयं प्रोक्तः सद्यो दीपनपाचनः
निंबुकस्य रसाभावे चुक्रं स्याद्विजया समं ॥ इत्यजीर्णारिः ॥ जलपीतमपामार्गमूलं
हन्याद्विषूचिकां ॥ सतैलं कारवेल्लं वा विधुनोति विषूचिकां ॥ बालमूलस्य निक्का
थः पिप्पलीचूर्णसंयुतः ॥ विषूचीनाशनः श्रेष्ठो जठराग्निविवर्द्धनः ॥ बिल्वना
गरनिक्काथो हन्याच्छर्दिविषूचिकां ॥ बिल्वनागरकैडर्यक्काथस्त्वदधिकोग्गलैः
कैडर्यकट्फले ॥ विषूच्यामतिवृद्धायां पार्ष्णोर्दाहः प्रशस्यते ॥ मधकंकुंकुमं वा

॥१२६॥

पिबेद्यवाग्निं तुजलेनच॥ व्योषं करंजस्य फलं हरिद्रे मूलं समावाप्य च मातुलुंग्याः॥ छायावि
शुष्का गुटिका कृता सा हन्तु विशूचीं नयनांजनेन॥ मातुलुंगी मधुकर्कटी॥ अपामार्ग
स्य पत्राणि गिमरिचानि समानि च॥ अर्घ्यस्य तालयापिष्टान्यंजनात् घ्नंति शूचिकां॥ वि
शूच्या मतिघ्न्यां तक्रं दधि समं जलं॥ नारिकेलांबु पेयं वा प्राणन्नालाय योजयेत्॥
त्वक्पत्ररास्नागुरुशिग्रुकुष्ठैरम्लप्रपिष्टैः सवचाशताव्हैः॥ उद्वर्तनं खल्लि विशूचिका
घ्नं तैलं विपक्वं च विदर्थकारी॥ इति त्वगादितैलं॥ कुष्ठसैंधवयोः कल्कं शुक्तैलं तु तत्कृ
तं॥ विशूचीमर्दनं तेन खल्लीशूलनिवारणं॥ इति कुष्ठादितैलं॥ पिपासायां तथोत्क्ले
शे लवंगस्यांबु शस्यते॥ जातीफलस्य वा शीतं शृतं मद्घनस्य वा॥ सलुंग्वानद्रुमद
रमल्लपिष्टैः प्रलेपयेत्॥ दाहे हैमवतीकुष्ठशताव्हाहिंगुसैंधवैः॥ हेमवतीत्युच्येत

॥१२६॥

वचा ॥ इति हारिद्रबद्कलेपः ॥ तक्रेण युक्तं यवचूर्णमुष्णं सक्षारमार्त्तिं जठरे निहन्यात ॥ स्वेदो
घटैर्वा बहुबाष्पपूर्णैरुष्णैस्तथा पान्यैरपि पाणितापैः ॥ चित्तं त्रिकालसमकोयोरयमेव क्रिया
क्रमः ॥ अतएवैतयोरुक्तं पृथङ्नेह चिकित्सितं ॥ अथ भस्मकचिकित्सा ॥ तं भस्मकं गुरुस्नि
ग्धं सान्द्रं मंदहिमस्थिरैः ॥ अन्नपानैर्नयेच्छान्तिं पित्तश्लेष्मविरेचनैः ॥ अत्युद्धताग्नि
शांत्यै माहिषदधिदुग्धतक्रसर्पीषि ॥ सेवेत यवाग्वा समधूच्छिष्टां ससर्पिष्कां ॥ अ
सकृत्पित्तहरणं पायसं च प्रभोजयेत ॥ श्यामा मात्रिवृद्विपक्वं च पयो दद्याद्विरेचनं ॥
यत्किंचिन्मधुरं मेध्यं श्लेष्मलं तं प्रतिभोजनं ॥ सर्वं तदत्यग्निहितं भुक्त्वा प्रस्वपनं दिवा ॥
सितं तं दुग्धसितकृतमर्ज्छगी ॥ क्षीरेण पायसं सिद्धं ॥ भुक्त्वा घृतेन पुरुषो द्वादशाहं दिव
सान्न बुभुक्षितो न भवेत ॥ अथ लोहासवः ॥ लोहचूर्णं त्रिकटुकं त्रिफला च यवानिका

अष्टानामपि द्रव्याणां चैव घनेन च वेष्टितं ॥ एरंडीकरसैतैलेन मर्दयेच्च समंततः इति रसेंद्रकोषात् ॥

॥१२७॥ विडंगं मुस्तकं चित्रं चतुःसंख्या पलं पृथक् ॥ चूर्णीकृत्य ततः क्षौद्रे चतुःषष्टीपले क्षिपेत् ॥
दद्यात्कुडवतैलं तत्र जतद्रोणाढकं तथा ॥ घृतभांडे विनिक्षिप्य निरुध्यान्मासमात्रकं ॥ लोहा
सवमिमं मर्त्यः पिबेद्वह्निकरं परं ॥ पांडुश्वयथुगुल्मानि जठराण्यर्शसां रुजं ॥ कुष्ठं प्लीहाम
यकं दुःकासश्वासभगंदरं ॥ अरोचकं च गृहण्यों हृद्रोगं च विनाशयेत् ॥ इति लोहासवः
अथ पथ्यमाह ॥ स्नैग्धिके वमनं पूर्वं पैत्तिके मृदुरेचकं ॥ नः ॥ वातिके स्वेदनं चापथ्यपथ्या व
स्यं हितं चयेत् ॥ नानाप्रकारोप्यापामो दीपनानि लघूनि च ॥ बहुकालसमुत्पन्ना मुद्गातो
हितं शालयः ॥ चिरे पीला जमंडं अन्नमंडो मुद्गरसस्तथा ॥ तरुणं च छक्के ष्मांड वास्तुकं वा
तमूलीकं ॥ सौभांजनं पटोलं च वृंताकं नवनीतकं ॥ कर्कोटं कारवेल्लं च नागरं च महा ॥१२७॥

द्रकं ॥ अम्लवेतसजंबीरमातुलुंगानिमाक्षिकं ॥ तक्रंचसैंधवंहिंगुकटुतैलंचकांजिकं
यवानीमरिचंमेथीधान्यकंजीरकंदधि ॥ तांबुलंतप्तसलिलंकटुतिक्तौरसावपि ॥ मं
दानलेपथ्यजीर्णेचपथ्यमेतन्नृणांभवेत ॥ अथापथ्यमाह ॥ विरेचनानिविरुद्धंवा
पुवेगाविधारणं ॥ अतिवेलंचाध्यशनंजागरंविषमाशने ॥ रक्तस्रुतिंशमीधान्यं
स्नानंचविषमाशनं ॥ जलपानंतथाक्षीरंसेहनंदुष्टवारिच ॥ विरुद्धासात्म्यान्नपानं
विष्टंभीनिगुरूणिच ॥ अग्निमांद्येपथ्यजीर्णेचसर्वाणिपरिवर्जयेत ॥ फलवर्तिव
मिस्रेदंतेघनंचापतर्पणं ॥ विशेषादत्रसेकुर्यादीर्घप्रच्छानमतिसारवत ॥ पार्श्विद
ह्रेतिवल्लभायांसम्यग्दीपनपाचनं ॥ इतिजठराग्निविकारजीर्णादीनांचिकित्सा
अथकृमिनिदानं ॥ कृमयस्तुद्विधाप्रोक्ताबाह्याभ्यंतरभेदतः ॥ बहिर्मलकफास्र

॥१२८॥

ग्विड्जन्मभेदाच्चतुर्विधः ॥१॥ नामतो विंशतिविधा बाह्यास्तत्र मलोद्भवाः ॥ तिलप्र
माणसंस्थानवर्णाः केशांवराश्रयाः ॥२॥ वहुपादाश्च सूक्ष्माश्च यूकालिख्याश्च
नामतः ॥ द्विधा ते कोठपिटिकाकंडूगंडान्प्रकुर्वते ॥३॥ द्विधा बाह्याभ्यंतरभेदत इति
तत्र बाह्यास्त्वगुपलेपकबाह्यमलसंभवाः ॥ आभ्यंतरा आमाशयादिसंभवाः ॥ ए
वं देशभेदेन द्वैविध्यमुक्त्वा कारणभेदेन चतुर्विधत्वं वक्तुं तेषां निदानान्याह ॥ वहि
रित्यादि ॥ वहिर्मलादिषु चतुर्षु यज्जन्म तस्य भेदात् ॥ त एव चतुर्विधा नामभेदेन ।
विंशतिविधा भवंति ॥ विंशत्यतिरिक्ताश्चातिसूक्ष्माः सहजाश्चरकेणोक्ता पै
तेषां वैकारिकत्वेन रोगाधिकारे नोच्यंते ॥ विंशतिविधास्तु कृमयो दोषप्रकोप
द्वारेणाश्मूत्रादीन्जनयंतीति ॥ उच्यंते उक्तान्बाह्यान्विवृणोति ॥ बाह्यास्तत्र ॥१२८॥

मलोद्भवा इति ॥ तत्र तेषु ॥ मलोद्भवानां बाह्यानां रूपाण्याह ॥ तिलानामिव परिमाणा

कृति वर्णा येषां ते ॥ तत्र पृथ्वाकाव बहुपादाः सूक्ष्माः केशाश्रयाश्च ॥ तिरश्चाः सूक्ष्माः श्वेता

वस्त्राश्रयाश्च ॥ तत्कर्तव्यविकारानाह ॥ कोठेत्यादि ॥ १ ॥ २ ॥ ३ ॥ अथाभ्यंतरकृमीणां ।

विप्रकृष्टनिदानमाह ॥ अजीर्णभोजी मधुराम्लनित्यो द्रवप्रियः पिष्टगुडोपभोक्ता ॥

व्यायामवर्जी च ॥ दिवाशयी वै विरुद्धभोक्ता तमेते कृमींश्च ॥ ४ ॥ अजीर्णभोजी अजीर्णे

भोजनशीलः ॥ मधुराम्लनित्यः संततमधुराम्लभोजी ॥ विरुद्धं क्षीरमत्स्यादि तद्भो

क्ता ॥ ४ ॥ अथ कफजरक्तजपुरीषजकृमीणां विप्रकृष्टं निदानमाह ॥ मांसमाषगुड

क्षीरदधिशुक्तैः कफोद्भवाः ॥ विरुद्धाजीर्णशाकाद्यैः शोणितोत्था भवंति हि ॥

माषपिष्टान्नलवणगुडशाकैः पुरीषजाः ॥ ५ ॥ शुक्तं कालांतरेणाम्लीभूत इक्षुरसः

॥१२८॥

अथोत्पन्नकृमिलक्षणमाह ॥ ज्वरो विवर्णता शूलं हृद्रोगः सदनं भ्रमः ॥ भक्तद्वेषोतिसा
रश्च संजातकृमिलक्षणं ॥ ६ ॥ अथ कफजान्कृमीनाह ॥ कफादामाशये जाता वृद्धाः
सर्पंति सर्वतः ॥ पृथुब्रध्ननिभाः केचित्केचिद्गंडूपदोपमाः ॥ ७ ॥ रूढधान्यांकुराकारास्तनु
दीर्घास्तथाणवः ॥ श्वेतास्ताम्रावभासाश्च नामतः सप्तधा तु ते ॥ ८ ॥ अंत्रादा उदरावेष्टा
हृदयादा महागुहाः ॥ चुरवो दर्भकुसुमाः सुगंधास्ते तु कुर्वते ॥ ९ ॥ हृल्लासमास्यस्रव
णमविपाकमरोचकं ॥ मूर्छाछर्दिज्वरानाहकासक्षवथुपीनसान् ॥ १० ॥ कफादि
तिकफनिमित्ताः कृमयः जायंते ते च वृद्धाः संतः सर्वतः ऊर्ध्वमधश्च सर्पंतीति ॥ एवं
रक्तवादिषु द्रष्टव्यं ॥ ब्रध्ना चर्मवरता ॥ रूढांकुरितः ॥ तनवः परिणाहेन दीर्घा आया
मेन ॥ अणवः उभाभ्यामपि तु स्याः ॥ सप्तानां नामानि विवरणेति ॥ अंत्रादा इत्या ॥ १२८ ॥

दि ॥ एते च नाम विशेषाः केचित्साध्याः केचिन्निरत्ययाः ॥ व्यवहारार्थं पूर्वाचार्यैः प्रणी-
ताः ॥ एवं वक्ष्यमाणेष्वपि बोद्धव्यं ॥ तत्कर्तव्यचिकारानाह ॥ हत्वासेत्यादि ॥ ७॥८॥९॥१०
अथ रक्तजानष्टमीनाह ॥ रक्तवाहिशिरास्थाना रक्तजा जंतवोऽणवः ॥ अपादा वृत्तता-
म्राश्च सौक्ष्म्यात्केचिददर्शनाः ॥११॥ केशादा लोमविध्वंसा रोमद्वीपा उदुंबराः ॥ षट्ते
कुष्ठैककर्माणः सहसौरसमातरः ॥१२॥ रक्तवाहिशिरास्थानाश्च ते रक्तजाश्चेति रक्तवा-
हिशिरास्थानरक्तजाः नाम भेदात्ते षट् ॥ तत्र केशादादयश्चत्वारः सहसौरसमातृभ्यां
वर्तंत इति सहसौरसमातरः एवं षट् भवंति ॥ कुष्ठैककर्माणः कुष्ठमेव एकं कर्म का-
र्यं एषां ते तथा कुष्ठैकफला इत्यावृतं ॥ उक्तं हि सुश्रुते ॥ सर्वाण्येव कुष्ठानि सवा-
तानि सपित्तानि सकफानि सकृमीणि स रक्तानि चोपदिश्यंत इति ॥११॥१२॥ अथ

॥१३०॥

पुरीषजा न्कृमीनाहि ॥ पक्वाशये पुरीषोत्था जायंतेधो विसर्पिणः ॥ वृद्धास्ते स्युर्भवेयुश्च ते
यदामाशयोन्मुखाः ॥१३॥ तदास्योद्गारनिःश्वासविड्गंधानुविधायिनः ॥ पृथुवृत्ततनुस्थू
लश्यावपीतसितासिताः ॥१४॥ ते पंच नाम्ना कृमयः ककेरुकमकेरुकाः ॥ सौसुरादाः सलू
नाख्याः लेलिहा जनयंति च ॥१५॥ विड्भेदशूलविष्टंभकार्श्यपारुष्यपांडुताः ॥ रोमहर्षा
ग्निसदनगुदकंडूर्विमार्गगाः ॥१६॥ वृद्धास्ते अधो विसर्पिणः स्युः ॥ यदा ते आमाशयो
न्मुखा भवेयुस्तदास्य उद्गारे निःश्वासयोः विड्गंधानुविधायिनः पुरीषगंध
युक्तो भवेयुः ॥ विमार्गगाश्च संतो विड्भेदादीन् जनयंति ॥१३॥१४॥१५॥१६॥ इति कृमि
निदानं ॥ अथ कृमिचिकित्सा ॥ जरदमूषककर्णीफलत्रिकामरकशिग्रुभवंहर
तेप्यतं ॥ मगधजा कृमिवैरिविमिश्रितं कृमिहृज्जं द्विपथे नगतोद्भवा ॥ इति मत्रा ॥१३०॥

दाडिकाथः ॥ दाडिमीवल्कलक्काथस्तिलतैलसमन्वितः ॥ पीतो दिनत्रयं कोष्ठकृमीन्
पातयते ध्रुवं ॥ इति दाडिमीत्वक्काथः ॥ विडंगाद्यो षसंयुक्तं मल्लमंडं पिवेन्नरः ॥ दीप
नं कृमिनाशाय जठराग्निविवर्द्धये ॥ पारसीकजवानीका पीता पर्युषितवारिणा प्रा
तः ॥ गुडपूर्वा कृमिजालं कोष्ठगतं पातयत्याशु ॥ रसैः केतकस्य संयुक्तो रसो धत्तूरपत्रजः
तांबूलपत्रजो वापि तैः पाययेत्कान्निक्षारेण ॥ हिंगु संकर्षमानं च दंतीबीजं तदर्द्धकं ॥ अर्क
क्षीरेण संमर्द्य दापयेद्भावना दश ॥ माषमात्रं प्रदातव्या मर्कमूलरसं पुनः ॥ प्रपिबे
द्धिंगुसंयुक्तं कृमिजालनिपातने ॥ सर्वान्कृमीन्प्रणुदतीति चक्रं मुक्तं मिश्रासुरान्
अपधूपः ॥ ककुभस्य प्रसूनानि विडंगं हस्तिनी तथा ॥ श्रीवेष्टो श्रीरभल्लातचंदनं
रालसंयुतं ॥ धूपोयं श्रेष्ठगंधस्य मशकानां विनाशनः ॥ शय्याशु मत्कुणान्हंति

॥१३१॥

मूर्छ्रिं च कासं च यो हंति ॥ इति धूपः ॥ विडंगमृतपानीयं विडंगेनाथ धूपितं ॥ पीतं क्रिमिहरं हृद्यं क्रिमिजांश्च गदान् जयेत् ॥ पलाशबीजस्वरसं पिबेन्माक्षिकसंयुतं ॥ पिबेत्तद्बीजं कल्कं वा तक्रेण क्रिमिनाशनं ॥ कांपिल्लस्य चूर्णं कर्षार्द्धं गुडेन सह योजितं ॥ पातयेत् क्रिमीन् सर्वानुदरस्थान्न संशयः ॥ विडंगं कोटजं बीजं तथा बीजं पलाशजं ॥ संचूर्ण्य खादेद्गुडेन क्रिमीन्नाशयितुं नरः ॥ निंबपत्रसमुद्भूतं रसं क्षौद्रयुतं पिबेत् ॥ धत्तूरपत्रकल्केन तद्रसेनैव पाचितं ॥ तैलमभ्यंगमात्रेण यूकालिक्षापतिश्चरणात् ॥ त्रिवृत्सत्ताशबीजातिपारसीपजवानिका ॥ तक्रेण कल्कमेतेषां पिबेत् क्रिमिगणापहं ॥ अथ घृतं ॥ फलत्रयपवचादंती त्रिवृत्कांपिल्लकैर्घृतं ॥ गोमूत्रैः साधितं हंति क्रिमिजालं न संशयः ॥ इति घृतं ॥ शिरोरोगे पिबेद्देतिपैः कटुतैलाक्तसक्तुभिः ॥ पतंति क्रिमयः क्षिप्रं

॥१३१॥

ददेश समाश्रयाः ॥ कृमीणां विट्कफोत्थानामेतदुक्तं चिकित्सितं ॥ रक्तजानां तु संहारं
कुर्यात्कुष्ठचिकित्सया ॥ अथ रसः ॥ शुद्धसूतं शुद्धगंधं विडंगमजमोदकं ॥ ब्रह्मबीजं म
हानिंबं कमेलाहिंगुरणीकृतं ॥ चूर्णितं मधुना लीढः कीटमर्द्दो रसो जयेत् ॥ निष्कमात्रः
कृमीन् सर्वांस्तु मुस्तातोयं पिबेदनु ॥ इति कीटमर्द्दरसः ॥ अथ पथ्यमाह ॥ आस्थापनं काय
शिरोविरेचनं धूमः कफमांसलजन्मानि चापि ॥ चिरंतनाः षष्टिकरक्तशालयः पटोल
वेत्राग्ररसोनवास्तूकं कटुताशमंदारदलानि सर्षपाः पथ्या च तैलं तिलसर्षपोद्भवं ॥ औ
ष्ट्रालोमूत्राज्यपयांसि तलमठं क्षाराजमोदा त्वदिस्य यवासकैः ॥ जंबीरनीरं सुरषवीवचा
तिक्ताग्रोमूत्रतांबूलं तु षोदकं मधु ॥ तिक्तः कषायः कटुको रसोप्यपथ्यं च प्रोक्तं नराणां
कृमिरोगिणां सदैवः ॥ अथापथ्यमाह ॥ छर्दिं चितं द्वेगविधारणं च विरुद्धपाना

शालमल्लिनिद्रा ॥ क्षीरिणीमांसानिघृतानिचापिदधीनिशाकानिचपरीवर्जयेति ॥ आम्लं
चमिष्टंचरसंविशेषात्कृमीनजिघांसुःपरिवर्जयेद्धि ॥ इतिकृमिचिकित्सा ॥ अथपां
डुरोगकामलाहलीमकनिदानं ॥ तत्रपांडुरोगस्यसंख्यापूर्वकंसन्निकृष्टंनिदानमाह
पांडुरोगाःस्मृताःपंचवातपित्तकफैस्त्रिधा ॥ चतुर्थःसन्निपातेनपंचमोभक्षणात्
मृदः १ ॥ पांडुत्वेनोपलक्षितारोगाःपांडुरोगाः ॥ ननुपंचमोभक्षणान्मृदइत्यसंगतं
यतोमृत्तिकापिदूषितदोषद्वारेणैवपांडुरोगंजनयतीतिमृद्भक्षणजःपांडुरोगोदो
षजादभिन्नएवतत्कथंपंचमइति ॥ उच्यते ॥ अपरकोपकुपितावातादयोन्यान
पिरोगान्कुर्वंतिमृत्तिकाभक्षणकुपितावातादयस्तुविशेषतः ॥ पांडुरोगमेवज
नयंत्येवेतिविशेषाच्चिकित्साविशेषाच्चपंचमत्वमस्योक्तं ॥ तच्चिकित्सापरत्वा

रलोकुपितदोषजनितपांडुरोगचिकित्सायामपिभवतीति सुश्रुतेनमृत्तिकाजःपथ्यद्भः

पठितइति॥१॥अथपित्तप्रकृतिनिदानपूर्विकांसंप्राप्तिमाह॥व्यवायमम्लंलवणानि

मद्यंमृदंदिवास्वप्नमतीवतीक्ष्णं॥निषेव्यमाणस्यविदूष्यरक्तंदोषास्त्वचंपांडुर

तांनयंति॥२॥तीक्ष्णंराजिकादि॥रक्तमितिरक्तपदस्यलं॥त्वङ्मांसमपिदूष्यत्वेनग्रह

णतेनपठितं॥हारीतेनरसोपीति॥२॥अथतस्यपूर्वरूपमाह॥त्वक्स्फोटनष्ठीवन

गात्रसादमृद्भक्षणप्रेक्षणकूटशोथाः॥विरुद्धमूत्रपीतत्वमथाविपाकोभविष्यत

स्तस्यपुरस्सराणि॥३॥त्वक्स्फोटनंत्वचःकिंचिद्विदरणं॥मृद्भक्षणेश्रद्धामृद्भक्षणे

च्छा॥प्रेक्षणकूटशोथःअक्षिगोलकशोथः॥अविपाकःआहारस्य॥पुरस्सराणि

पूर्वरूपाणि॥३॥अथवातिकस्यपांडुरोगस्यलक्षणमाह॥त्वङ्मूत्रनयनादीनां

१३३

रूक्षकृष्णारुणाभता ॥ वातपांड्वामये कंपतोदानाहभ्रमादयः ४ रूक्षकृष्णारुणाभता पांडुत्वं नाति
क्रामति ॥ अतएव सुश्रुते ॥ सर्वैर्लिंगैस्तेष्वपि पांडुभावो यतोधिकोतः खलु पांडुरोग इति ॥
भ्रमादय इत्यादिशब्देन मेदस्थूलादयः ४ ॥ अथ पैत्तिकस्य पांडुरोगस्य लक्षणमाह ॥ पी
तमूत्रशकृन्नेत्रो दाहतृष्णाज्वरान्वितः ॥ भिन्नविट्कोतिपीताभः पित्तपांड्वामयी नरः ॥
५ भिन्नविट्कः सद्रवमलः ॥ ननु पित्तपांड्वामयीति न युक्तं पांडुरोगस्य पित्तकार्यत्वादेव
उच्यते ॥ इतरदोषसंश्लिष्टप्रबलपित्तजन्यतेन पैत्तिकत्वाभिधानं ॥ यथा पैत्तिकं रक्तपि
त्तमिति ॥ ५ अथ श्लैष्मिकस्य पांडुरोगस्य लक्षणमाह ॥ कफप्रसेकश्वयथुतंद्रालस्या
तिगौरवैः ॥ पांडुरोगी कफाच्छुक्लैस्त्वङ्मूत्रनयनाननैः ॥ कफाद्यः पांडुरोगी स शुक्लैस्त्व
ङ्मूत्रनयनाननैः ॥ कफप्रसेकादिभिश्चोपलक्षित इति योज्यं ॥ अत्र उपलक्षणेन तीव्रा

१३३

॥ अथसान्निपातिकस्यपांडुरोगस्यलक्षणमाह ॥ सर्वान्नसेविनःसर्वेदुष्टादोषास्त्रिदो
षजं ॥ त्रिदोषलिंगंकुर्वीतिपांडुरोगंसुदुःसहं ७ ॥ सर्वेदोषावातपित्तकफाः ॥ ७ अथमृज्जे
स्यपांडुरोगस्यसंप्राप्तिमाह ॥ मृत्तिकादनशीलस्यकुप्यत्यन्यतमोमलः ॥ कषायामारुतं
पित्तमूषरामधुराकफं ॥ ८ कोपयेन्मृद्रसादींश्च रौक्ष्याद्भुक्तंचरूक्षयेत् ॥ पूरयत्यविप
क्वैवस्रोतांसिनिरुणद्ध्यपि ॥ ९ इंद्रियाणांबलंहत्वातेजोवीर्यौजसीतथा ॥ पांडुरोगंक
रोत्याशुबलवर्णाग्निनाशनं ॥ १० अन्यतमोमलोवातादिः ॥ ऊषरासक्षारा ॥ रसादीन्
रूक्षयेत् भुक्तंचरूक्षयेदितियोज्यं ॥ अविपक्वैवेतितकोष्ठधात्वग्निभिःपाकंगच्छति
स्रोतांसिरसवहादीनि ॥ इंद्रियाणांबलंस्वस्वविषयग्रहणशक्तिं ॥ तेजोदीप्तिर्दि
तिजेज्वरः ॥ उष्मेतिचक्रः ॥ वीर्यंशक्तिः ॥ ओजःसर्वधातुसारः ॥ पराभिभवेच्छेतिजै

॥१३४॥

ज्वरः ॥८॥९॥१० अथ मृज्जस्य पांडुरोगस्य लक्षणमाह ॥ मृद्भक्षणाद्भवेत्पांडुस्तंद्रालस्य-
निपीडितः ॥ सकासश्वासशूलार्त्तः तोदारुचिसमन्वितः ॥११ शूनाक्षिकूटगंडभ्रूः शून-
पन्नाभिमेहनः ॥ कृमिकोष्ठोतिसार्येत मलं सासृक्कफान्वितं ॥१२ कृमिकोष्ठ इत्यंतोग्रं-
थो भवेदित्यंते न संबध्यते ॥ अतिसार्येत मलमिति प्रथमं तं कर्मकर्ता तत्कर्म च मंतव्यं ॥
॥११॥१२ अथासाध्यस्य पांडुरोगस्य लक्षणमाह ॥ ज्वरारोचकहृल्लासछर्दितृष्णाक्ल-
मान्वितः ॥ पांडुरोगी त्रिभिर्दोषैस्त्याज्यः क्षीणो हतेंद्रियः ॥१३ हतेंद्रियः स्वविषयाग्रा-
हकेंद्रियः ॥१३ ॥ पांडुरोगश्चिरोत्पन्नः खरीभूतो न सिद्धति ॥ कालप्रकर्षाच्छूनांगो यो
वा पीतानि पश्यति ॥१४ खरीभूतः अतिरूक्षितसर्वधातुः ॥ कालप्रकर्षात् कालचि-
रत्वात् ॥१४ बद्धाल्पविट्सहरितं सकफं योतिसार्यते ॥ दीनः श्वेतातिदिग्धांगो छ- ॥१३४॥

हृद्रोगः शीतकान्वितः ॥ स नास्य सकृच्छ्र याप्यः स्यात् पांडुः स्थेतत्वमाप्नुयात् ॥ १५ ॥ अत्र सकफ
त्वेपि वक्तुं त्वास्वल्पहरितत्वानि व्याधिप्रभावात् ॥ इतीत्यादि तृष्णान्वितः स्यादत्र परम
साध्यत लक्षणं ॥ स नास्ति न षट्द्वा साध्य इत्यर्थः ॥ १५ ॥ पांडुदंतनखो यस्तु पांडुनेत्रश्च
यो भवेत् ॥ पांडुसंघातदर्शी च पांडुरोगी विनश्यति ॥ १६ ॥ पांडुसंघातदर्शी पीतवर्णस्य
राशिं पश्यतीत्यर्थः ॥ १६ ॥ अंते शूनं परिहीनमध्यं म्लानं तथांते सुच मध्यशूनं ॥ गुदे
पशेफस्य च मुष्कयोश्च शूनं प्रताम्यंतमसंज्ञकल्पं ॥ विवर्जयेत्पांडुकिनं यशोर्थीतथाति
सारज्वरपीडितं च ॥ १७ ॥ अंतेषु हस्तपादादिषु ॥ परिहीनमध्यं कृशमध्यदेशं ॥ एतेद्वैप
रीत्येनापरमसाध्यलक्षणं म्लानमित्यादि ॥ म्लानं दुर्बलं ॥ असंज्ञकल्पं मृतसदृशं ॥ ए
वंविधं पांडुकिनं पांडुरोगिणं यशोर्थी विवर्जयेत् ॥ पांडुकिनमित्यत्र पातकिनमिति

१३५

पाठांतरे ॥ युक्तं चैतत् ॥ अत एवैकाभिप्राये ग्रंथांतरे उक्तं ॥ अतः स्थूलः कृशो मध्येऽन्यथा ।
ग्रहसेकसि ॥ स्थूलोऽज्वरातिसारोतिमतकेस्यः सुपान्तकीति ॥ १२ ॥ अथ पांडुरोगभेदस्य कामल
ाख्यरोगस्य निदानपूर्विकां संप्राप्तिमाह ॥ पांडुरोगी तु योत्यर्थं पित्तलानि निषेवते ॥
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते ॥ १ ॥ पित्तं कर्तृ ॥ दग्ध्वा संदूष्य ॥ रोगाय कामला
ख्याय ॥ पांडुरोगी लक्षयति अपित्तपित्तलसेवया कामला भवतीति नायं नियमः ॥ किं
तु कामलाख्यतंत्रोऽपि भवति ॥ यथा राजयक्ष्मा कासादुपेक्षिताद्भवतीति नायं नियमः
किं तु राजयक्ष्मा स्वतंत्रोऽपि भवति तद्वदेवापि ॥ १४ ॥ अथ कामलाया लक्षणमाह ॥ हारि
द्रनेत्रः स भृशं हारिद्रत्वङ्नखाननः ॥ पीतरक्तशकृन्मूत्रो भेकवर्णो हतेंद्रियः ॥ १ ॥ दा
हाविपाकदौर्बल्यसदनारुचिकर्षितः ॥ कामला बहुपित्तैषा कोष्ठशाखाश्रया मता ॥ १३५ ॥

कालांतरात्खरीभूता कृच्छ्रा स्यात्कुंभकामला ॥२०॥ हारिद्रं हरिद्रावर्णं ॥ पीतरक्ते शकृ
न्मूत्राः पीते रक्ते वा शकृन्मूत्रे यस्य सः ॥ भेकवर्णः वृहद्भेकवर्णः ॥ तस्या भेदमाह कोष्ठ
शाखाश्रयेति ॥ एका कोष्ठाश्रया ॥ अपरा शाखाश्रया ॥ शाखा रक्तादयो धातवः इति मधु
कोशकृत् तत्र कोष्ठकामलामाह ॥ कालांतरादित्यादि ॥ खरीभूताऽतिरूक्षितसर्वधा
तुः कुंभं कोष्ठं ॥ अंतःसुषिरसाधर्म्यात् तद्गता कामला कोष्ठकामला कोष्ठाश्रयेत्यर्थः
कृच्छ्रा कष्टसाध्या ॥१८॥२०॥ कुंभकामलिनोऽरिष्टलक्षणमाह ॥ छर्द्यरोचकहृल्लासज्व
रक्लमनिपीडितः ॥ नश्यति श्वासकासार्त्तो विड्भेदी कुंभकामली ॥२१॥ उभयोरपि कामल
लयोररिष्टलक्षणमाह ॥ कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः ॥ संरक्ताक्षिमुख
छर्द्दिविण्मूत्रो यश्च ताम्यति ॥२२॥ दाहारुचितृषानाहतंद्रामोहसमन्वितः ॥ नष्टाग्नि

॥१३६॥

संस्रः क्षिप्रं हिक्कामलायाननविपद्यते ॥ २३ ॥ अथ पांडुरोगस्यैव भेदं हलीमकमाह ॥ यदा तु पांडोर्वर्णः स्याद्धरितः श्यावपीतकः ॥ बलोत्साहक्षयस्तंद्रा मंदाग्नित्वं मृदुज्वरः ॥ स्त्रीष्वहर्षोंगमर्दश्च श्वासस्तृष्णारुचिभ्रमाः ॥ हलीमकं तदा तस्य विद्याद्दनिलपित्ततः ॥ २५ ॥ पांडोः पांडुरोगिणः ॥ २५ ॥ इति पांडुरोगकामलाहलीमकनिदानं ॥ अथ चिकित्सा ॥ वातिके पाचनं कुर्यात्पैत्तिके च विरेचनं ॥ श्लैष्मिके वमनं कार्यं क्रियाचैषा प्रकीर्तिता ॥ वासामृतानिंबकिरातकट्वीवराकषायः समधुर्निपीतः ॥ सकामलं पांडुमथाम्लपित्तं हन्यादतोन्यांश्च हलीमकादीन् ॥ इति वासादिक्काथः ॥ त्रिवृद्रजः समाक्षिकं फलत्रयोदकेन वानिपितमेव कामलामलं विजेतुमीरितं ॥ सप्तरात्रं गवां मूत्रे भावितं चाप्ययोरजः ॥ पांडुरोगप्रशांत्यर्थं पयसा प्रपिबेन्नरः ॥ गोमूत्रसिद्धमंडूरचूर्णं सगुड

॥१३६॥

मज्जनः ॥ पांडुरोगः क्षयं याति यंत्रिमूलं च दारुणं ॥ त्रिफलाया गुडूच्या वा दार्व्या निंब
स्य वा रसः ॥ प्रातर्माक्षिकसंयुक्तः शीलितः कामलापहः ॥ अंजने कामलार्त्तानां द्रो
णपुष्पीरसो हितः ॥ चूर्णं कटुत्रिकफलत्रयचित्रकैश्च मंडूरकं द्विगुणमक्षगुणं च
मूत्रं ॥ पक्त्वावलेह वदनेन कृतः प्रयुक्तो मंडूरकोऽस्य यटंकासलवनु पीततक्रः ॥ पांडु
मयं श्वयथुयुक्तमपि प्रमेहं वाधिर्य्ययुक्तजडतां च जयंति जेतोः ॥ इति हंसमंडूरः ॥
सत्र्यूषणानि सफलत्रयचित्रकाणि सांभोधराणि ॥ सविडंगफलानि च स्फेः
कषीणि लोहरजसश्च नवेति चूर्णं मितन्नवायसमिदं मधुनावलीढं तेस्फः प्र
मेहपिडकानच पांडुरोगाः स्थौल्यं तनोः स्थविरतानच शीघ्रमेति ॥ नोकुष्ठरुक्ज
ठरतोजठरस्य नैव नाग्नेरपाटवमनेन नवायसेन ॥ अत्र नवायसे लोहं नव रक्ति

॥१३७॥

कामितंभक्तलीयं ॥ यत उक्तं रससंप्रदीपे ॥ गुंजामेकां समारभ्य यावत्स्फुर्नव रक्तिकाः । तावद्वृ
द्धिं समभ्रीयाद्वृष्याद्दोषवत्तं न रहति ॥ एवं सति प्रथमदिवसे अष्टचत्वादिसहितं रक्ति
काद्वयमितं खादेत ततः प्रतिदिनं रक्तिकाद्वयं द्वयं वर्द्धयेत ॥ यावदष्टचत्वादिसहिता
अष्टादश रक्तिकाः स्युः ॥ ततस्ताः प्रतिदिनं खादेत ॥ इति नवायसं चूर्णं ॥ व्योषधात्री
त्रिफलालोहचूर्णं क्षौद्राज्यसंयुतं ॥ लेहोयं पांडुरोगे तु कामलामाशु नाशयेत । कर्कोटि
काजटानस्ये देयंवाजातिनीफलं ॥ हरिद्रारिष्टमधुकं वला त्रिफलसाधितं सक्षीरं मा
हिषं सर्पिः कामलां हंति दुस्तरां ॥ इति हरिद्राद्यं घृतं ॥ अजीर्णाधिकारे प्रोक्तं लोहास
वो प्यत्र प्रशस्तः ॥ पुनर्नवा त्रिवृच्छुंठी षविडंग दारुचित्रकं । कुष्ठं हरिद्रे त्रिफला दंती
चव्यकलिंगकं ॥ कटुका पिप्पलीमूलं मुस्तं शृंगीच कारवी ॥ पद्मानी कटुफलं चे

॥१३७॥

नि पृथक्पलमितं मतं ॥ मंडूरं द्विगुणं चूर्णाद्गोमूत्रेष्टगुणे पचेत् ॥ गुडवद्गुटिकान् कृत्वा
तक्रेणालोड्य तत्पिबेत् ॥ पुनर्नवादिमंडूरवटकोब्धिशिमिर्मितः ॥ पांडुरोगं पुरोगांच
कामलां च हलीमकं ॥ श्वासं कासं च यक्ष्माणं ज्वरं शूलं तथोदरं ॥ मूत्रं प्लीहानमाध्मा
नमर्शांसि ग्रहणीं कृमीन् ॥ वातरक्तं च कुष्ठं च सेवनान्नाशयेद्ध्रुवं ॥ इति पुनर्नवादि
मंडूरवटकः ॥ अथ व्योषं त्रिफला मुस्तं विडंगं चव्य चित्रके ॥ दार्वीत्वङ्माक्षिको धातुर्ग्रं
थिको देवदारु च ॥ एषां द्विपलिकान् भागान् कृत्वा चूर्णं पृथक् पृथक् ॥ मंडूरं द्विगुणं
चूर्णाच्छुद्धमंजनसन्निभं ॥ मूत्रे चाष्टगुणे पक्त्वा तस्मिंस्तत्प्रक्षिपेत्ततः ॥ उदुंबरसमा
न् कृत्वा वटकांस्तान् यथाग्नि च ॥ उपयुंजीत तक्रेण जीर्णे सात्म्यं च भोजनं ॥ मंडूरवट
का ह्येते प्राणदाः पांडुरोगिणां ॥ कुष्ठानि जठरं शोथं मूत्रस्तंभं कफामयान् ॥ अर्शां

॥ १३५ ॥

सिकामलंमेहंहंसीहानंश्रमयेतिच ॥ इतिच्यवर्णादिमंडूरवटकः ॥ रसमामलकानांतु
संपुटंपुटपाकेनपीडितं ॥ द्रोणंपचेत्स्थमहद्गौतत्रैमानिप्रदापयेत् ॥ चूर्णितंपिप्पलीप्रस्थं
मधुकंद्विपलंतथा ॥ प्रस्थंगोस्तनिकायाश्चत्वक्पुष्पायास्तुप्रपेषितं ॥ शृंगवेरपलेद्वेच
तुगाक्षीर्याःपलद्वयं ॥ तुलार्धंशर्करायास्तुतद्धनीभूतमुद्धरेत् ॥ मधुप्रस्थसमायुक्तं
लेहयेत्सततंसम्मितं ॥ हतीमकंकामलांचपांडुत्वंचापकर्षति ॥ इतिआमलकाद्यवले
हः ॥ लोहकिट्टंचसंतप्तंध्मापयेच्चपुनःपुनः ॥ गोमूत्रमध्येमतिमान्तच्चूर्णंकृत्वातुसू
क्ष्मकं ॥ तच्चूर्णंमधुनादेयंपांडुमयविनाशनं ॥ इत्ययश्चूर्णं ॥ पलानिचत्वारिरस
स्यपंचगंधस्यसत्वस्यगडूचिकायाः ॥ व्योषस्यचूर्णस्यचतालमूल्यासप्तामलस्त ॥ १३५ ॥
स्यैवपलत्रयंस्यात् ॥ पथ्याक्षपथ्याक्षपर्णंगगनंस्वचाश्मौलोहस्यसर्वैस्त्रिफलाजलेन

घृष्टं चतुःषष्ठि मितं तदूर्ध्वं स्यु भावनं मार्कवजद्रवस्य ॥ शिग्रूपुनीरेलाच षोडशांशैः

तथा जलोत्थाग्रहकन्यकायाः ॥ आर्द्रद्रवस्येति रसो प्रयुक्तः पांडुक्षयश्वासगदा

दिहंता ॥ क्षौद्रेण वाष्णकिरयाघृतेन कर्षार्द्धमेतस्य भजस्व यत्नात ॥ इति त्रैलोक्यना

थोरसः ॥ अथ हलीमक चिकित्सा ॥ मारितस्याय शस्म्रूलं मुस्ताचूर्णेन संयुतं ॥

खदिरस्य कषायेण पिवेद्धंतुं हलीमकं ॥ सितातिक्ताबलायष्टी त्रिफला रजनीद्व

यैः ॥ स्नेहं लिह्यात्समध्वाज्यं हलीमकनिवृत्तये ॥ अमृतरसारसकल्कप्रसाधितं

तुरगविड्विषः सर्पिः ॥ क्षीरं चतुर्गुणमेतद्धिंत्येष्ठ हलीमकार्त्तिभ्यः ॥ मधुरैरन्नपानैः ॥ त

स्तथा वातपित्तहरैर्हरेत ॥ कामलापांडुरोगोक्तं क्रियां चात्र प्रयोजयेत ॥ अथ पथ्यमा

ह ॥ छर्दिर्विरेचनं जीर्णयवगोधूमशालयः ॥ मुद्गाढकीमसूराणां यूषा धन्वात्र

हिताः स्मृताः ॥ पटोलं च कुष्मांडं तरुणं कदलीफलं ॥ पुनर्नवा तंदुलीयं वार्ताकुल
शुनद्वयं ॥ धात्रीतक्रं घृतं तैलं गोमूत्रमभयातथा ॥ यवक्षारो लोहभस्म कुंकुमं नागके
सरं ॥ दाहः स्मरणयोः संधौ नाभेर्यंगुल्फादधः ॥ मस्तके हस्तयोर्मूले मध्ये यस्तन
कक्षयोः ॥ यथा दोषमिदं पथ्यं पांडुरोगवतां भवेत् ॥ अथापथ्यमाह ॥ रक्तस्रुतिर्धू
मपानं वमिवेगविधारणं ॥ स्वेदनं मैथुनं शिंबी पत्रशाकानि रामठं ॥ अन्यं बुपा
नं पिण्याकं सांबूलं सर्षपाः सुरा ॥ मृद्भक्षणं दिवास्वप्नं तीक्ष्णानि लवणानि च ॥
सर्वाण्यम्लानि दुष्टांबु विरुद्धान्यशनानि च ॥ गुर्वन्नं च विदाहीनि पांडुरोगवतां वि
षं इति पांडुरोगकामलाहलीमकचिकित्सा ॥ अथ रक्तपित्तनिदानं ॥ तत्र रक्तपित्त
स्य निदानपूर्विकां संप्राप्तिमाह ॥ घर्मव्यायामशोकाध्वव्यवायैरतिसेवितैः ॥

तीक्ष्णोष्णक्षारलवणैरम्लैःकटुभिरेवच॥ पित्तंविदग्धंस्वगुणैर्विदहत्याशुशोणि
तं॥१॥ तीक्ष्णंराजिकादि॥ उष्णोग्नितापादिः॥ क्षारोयवक्षारादिः॥ विदग्धंदूषितं॥ स्व
गुणैःपित्ततीक्ष्णंद्रवंपूतीत्यादिभिः॥ विदहतिदूषयति॥१॥ अथरक्तपित्तस्यसामा
न्यंतल्लक्षणमार्गमप्याह॥ ततःप्रवर्त्ततेरक्तमूर्ध्वंचाधोद्विधापिवा॥ ऊर्ध्वंनासाक्षि
कर्णास्यैर्मेढ्रयोनिगुदैरधः॥ कुपितंरोमकूपैश्चसमस्तैस्तत्प्रवर्त्तते॥२॥ रक्तमित्यु
पलक्षणंतत्संसर्गिपित्तंच॥ अतएवरक्तपित्तमितिद्वंद्वइतिसुश्रुतः॥ रक्तंचतत्पि
त्तंचेतिरक्तपित्तंरागप्राप्तंपित्तमितिकर्मधारयइतिचरकः॥ कुपितमपिकुपितं॥२
अथतस्यपूर्वरूपमाह॥ सदनंशीतकामित्वंकंठधूमायनंवमिः॥ लोहगंधिश्च
निश्वासोभवत्यस्मिन्भविष्यति॥३॥ कंठधूमायनंकंठधूमनिर्गमइव॥३॥ अ

॥१४०॥

प्रविशिष्टं रूपमाह ॥ सांद्रं सपांडु सस्नेहं पिच्छिलं च कफान्वितं ॥ श्यावारुणं सफेनं च
तनु रूक्षं च वातिकं ॥४॥ रक्तपित्तं कषायाभं कृष्णं गोमूत्रसन्निभं ॥ मेचकागारधूमा
भमंजनाभं च पैत्तिकं ॥ संसृष्टलिंगं संसर्गी त्रिलिंगं सान्निपातिकं ॥५॥ सांद्रं घनं
सपांडुरीषत्पांडु ॥ पिच्छिलं मयूरपिच्छवद्विपुक्तं कषायाभं वटादिक्षारवर्णं ॥ कृष्णं
कज्जलाभं ॥ मेचकागारधूमाभं मेचकाभं अगारधूमाभं च ॥ मसारगल्वकीदिम
लिमसदृशीकृतस्य कृष्णवर्णस्य वस्त्रस्येव वर्णो मेचक इति जेज्जटाचार्याः प्राहुः
चिक्कणकृष्णवर्णमित्यर्थः अंजनं स्रोतोंजनं तदाभं ॥ ननु सर्वमेव रक्तपित्तं उ
ष्णेन पित्तेनारभ्यते तत्कथं पैत्तिकं रक्तपित्तमिति ॥ उच्यते ॥ सत्यं यद्यप्युष्णस्थानस्थं
पित्तं रक्तपित्तारंभकं स्थानांतरागतं स्थितेनापि पित्तेन संसृज्यते तदा पैत्तिकमि ॥१४०॥

ति व्यपदेशः ॥ ४ ॥ ५ ॥ अथ संसर्गविशेषेणामार्गभेदमाह ॥ ऊर्ध्वगं कफसंसृष्टमधो
गं मारुतानुगं ॥ द्विमार्गं कफवाताभ्यामुभाभ्यां तत्प्रवर्तते ॥ ६ ॥ अथ तस्योपद्रवानाह
दौर्बल्यश्वासकासज्वरवमथुमदाः पाण्डुता दाहमूर्छा भुक्ते घोरो विदाहस्त्वध्यति
रपि सदाह्यतुल्याच पीडा ॥ तस्मात्कोष्ठस्य भेदः शिरसि च तपनं प्रतिनिष्ठीवनं
च द्वेषो भक्ते विपाको विकृतिरपि भवेद्रक्तपित्तोपसर्गाः ॥ ७ ॥ दौर्बल्यं शक्त्युपचयपयो
रभावः इति गदाधरः ॥ भुक्ते घोरो विदाह इति षष्ठ्यर्थे सप्तमीति कार्तिकः ॥ अतुल्या
असदृशी ॥ कोष्ठस्य भेदः कोष्ठमलस्य भेदः तपनं तापः ॥ अविपाक आहारस्य ॥
विकृतिः मांसभक्षात तन्नाम तादिः ॥ ७ ॥ अथ साध्यत्वादिकमाह ॥ एकदोषानुगं सा
ध्यं द्विदोषं याप्यमुच्यते ॥ त्रिदोषमसाध्यं तन्मेदाग्ने रतिवेगवत ॥ यऊर्ध्व

॥१४१॥

साध्यमधोयाप्यमसाध्यं युगपद्गतं ॥ व्याधिभिः क्षीणदेहस्य वृद्धस्यानश्नतश्च य
त् ॥ ९ ॥ मंदाग्नेर्यदतिवेगं तदप्यसाध्यं ॥ अनश्नतः अरुच्यादिना ॥ ५ ॥ ८ ॥ अथासाध्य
त्वे हेतुमाह ॥ एकमार्गं बलवतो नातिवेगं नवोत्थितं ॥ रक्तपित्तं सुखे काले साध्यं स्या
न्निरुपद्रवं ॥ १० ॥ एकमार्गमधोर्ध्वगामभिप्रेतं अधोगस्य याप्यत्वात् ॥ नवोत्थितम
चिरोत्थितं ॥ सुखे काले हिमशिशिरयोः ॥ १० ॥ अथासाध्यलक्षणमाह ॥ मांसप्रक्षा
लनाभं कुथितमिव च यत्कर्दमांभोनिभं वा मेदःपूयास्रकल्पं यकृदिव यदि वा
पक्वजंबूफलाभं ॥ यत्कृष्णं यच्च नीलं भृशमतिकुणपं यत्र चोक्ता विकारास्तद्वर्ज्यं र
क्तपित्तं सुरपतिधनुषा यच्च तुल्यं विभाति ॥ ११ ॥ कुथितमिव पूतितां गतमिव ॥ कर्द
मांभोनिभं कर्दमाविलमंभः कर्दमांभस्तत्सदृशं ॥ यद्वा कर्दमनिभं चांभोनिभं च

॥१४१॥

कल्पशब्दो भेदः प्रभृतिभिः संबध्यते ॥ यकृदिव यकृतः खंडमिव ॥ पक्वजंबूफलाभं
स्निग्धकृष्णं ॥ कृष्णमंजनाभं ॥ नीलं चाषपक्षप्रतिमं ॥ ननु पैत्तिके कृष्णं पठितं न च
तदसाध्यमेवं ॥ अपिशब्देनात्र विशेषितत्वात् ॥ तेन तत्र मनाक्कृष्णत्वं बोध्यमिति
जेज्जटादयः ॥ पक्वजंबूफलाभं यत्कृष्णमिति योज्यं ॥ उक्ताधिकारादौर्वल्यादयः ॥
सुरपतिधनुषा तुल्यं नानावर्णमित्यर्थः ॥ ११ ॥ किंच येन चोपहतो रक्तं रक्तपित्तेन
मानवः ॥ पश्येद्दृश्यं वियच्चापि तच्चासाध्यमसंशयः ॥ १२ ॥ येन रक्तपित्तेन उपहतो म
नुष्यः दृश्यं घटपटादिकं वियच्च रक्तं पश्यति स नश्यति ॥ यद्वा वियच्चापि अदृश्यम
पीत्यर्थः ॥ १२ ॥ अथ रक्तपित्तस्यारिष्टमाह ॥ लोहितं छर्दयेद्यस्तु बहुशो लोहितेक्ष
णः ॥ लोहितो द्वारदर्शी च म्रियते रक्तपैत्तिकः ॥ १३ ॥ बहुशः छर्दयेदिति संबंधः ॥

लोहितोद्गारदर्शी लोहितोद्गारो लोहितदर्शी च ॥ पद्दाव्याधिमहिम्ना उद्गारमपि लो
हितं पश्यतीत्यर्थः ॥ १३ ॥ इति रक्तपित्तनिदानं ॥ अथ रक्तपित्तचिकित्सा ॥ नादौ संग्राह्य
मुद्रिक्तं यदसृग्बलिनोऽश्नुतं ॥ तत्पांडुग्रहणीकुष्ठप्लीहगुल्मादिकारकं ॥ ऊर्ध्वं प्रवृत्ते
वमनमधोगे तु विरेचनं ॥ जयेद्दन्यतराद्वापि क्षीणस्य समनैरसृक् ॥ विरेचने त्रिवृ
च्छ्रेष्ठा वमने मदनं हितं ॥ सर्वत्रोक्तेषु रोगेषु रक्तपित्ते विशेषतः ॥ आटरूषकमृद्वी
कापथ्याक्वाथः सशर्करः ॥ मधुमिश्रः श्वासकासरक्तपित्तनिवारणः ॥ चंदनोशी
रह्रीवेरमुस्तापर्पटसाधितं ॥ केवलं वा शृतं तोयं रक्तपित्ते प्रशस्यते ॥ वासायां वि
द्यमानायामाशायां जीवितस्य च ॥ रक्तपित्ती क्षयी कासी किमर्थमवसीदति ॥ वासा
याः स्वरसं क्वाथं कल्कं वा भक्षयेन्नरः ॥ क्षयासृक्पित्तकासेभ्यः शीघ्रमेव वि ॥ १४२ ॥

मुच्यते ॥ धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः ॥ रक्तपित्तं ज्वरं दाहं तृष्णां शोषं
च नाशयेत् ॥ मञ्जिष्ठां चंदनं लोध्रं प्रियंगुं चेति चूर्णयेत् ॥ चूर्णमेतत्पिबेत्क्षौद्रवासा
रससमन्वितं ॥ चक्रनासारोमकूपपायूमेढ्रप्रवर्त्तितं ॥ योषित्तां योनिमार्गेण श्रवद्र
क्तं निवारयेत् ॥ शस्त्रक्षतस्य यद्रक्तं न तिष्ठेद्दतियेगतः ॥ तद्यनेन चूर्णेन तिष्ठत्ये
व न संशयः ॥ चंदनं नखं देतोध्रमुशीरं पद्मकेसरं ॥ नागपुष्पं तथा विल्वं भद्रमुस्तं स
शर्करं ह्रीवेरं चैव पाठा चकुटज स्वल्वचाफलं शृंगवेरं चातिविषं धातकी च रसांजनं
आम्रास्थिजंबुसारश्च तथा मोचरसो भवेत् ॥ नीलोत्पलं समंगा च सूक्ष्मैला दाडिमत्व
चं ॥ चतुर्विंशतिरेतानि समभागानि कारयेत् ॥ तंदुलोदकसंयुक्तं क्षौद्रेण सह संयुतं ॥
हितं लोहितपित्तानामर्शसां लोहितेषु च ॥ मूर्छितमोमुमार्त्तानां च दापयेत् ॥ चलतां चातिविषाणां

॥३४३॥

गर्भिण्यां सेवमानं परमुच्यते ॥ अग्निना विहितो योगो रक्तपित्तनिबर्हणः ॥ इति चंदनादि
चूर्णं ॥ एलात्वक्नागपुष्पं च पत्रकं मरिचं तथा ॥ मिश्री च नागरं चैव कुर्याद्भागोत्त
रं क्रमात् ॥ सितामेकेषु तुल्यां तु दत्वा चास्मिंस्तु भक्षयेत् ॥ सीहाजीर्णश्वासकासग्र
हणं पश्मनुद्भुवं ॥ हन्याच्च रक्तपित्तं च चूर्णमेलादिकं नृणां ॥ इति एलादिचूर्णं
कूष्मांडकात्पलशतं कुडवैश्चतुर्भिर्घृतं तथा दन्तुपचेत्समखंडमेतत् ॥ विश्वाच्छजी
रकैकरूपं पलषड्युक्तं त्वङ्नागपुष्पतटिबत्रपलद्वयेन ॥ एतत्सुरालमधुनः कुडवे
द्वयेन संयोजितं जयति जंतुषु रक्तपित्तं ॥ ऊर्ध्वप्रवृत्तमपिग्रहगदप्रवृत्तमस्मात्परं
भुविभवेद्परं न हृद्यं ॥ मूत्रस्य कृच्छ्रमरुचिं च मृतैरमिंसतत्समां मूर्छामिपस्मृतिमुरः
क्षतमूर्ध्वपितं ॥ उन्मादमप्यपहरेदिति वृष्यमेशो रक्तोत्मकं च शमयेद्धिदधाति ॥३४३॥

वृद्धिं॥ इति कूष्मांडपाकः॥ उशीरं वालकं पद्मं काश्मीरी नीलमुत्पलं॥ प्रियंगुं पद्मकं लोध्रं
मंजिष्ठा धन्वयासकं॥ पाठा किराततिक्ता च न्यग्रोधोदुंबरं सटी॥ पर्पटं पुंडरीकं च पटो
लं कांचनारकं॥ जंबूशाल्मलिनिर्यासं प्रत्येकं पलसंमितं॥ भागान् चूर्णितान् कृत्वा
द्राक्षायाः पलविंशतिः॥ धातकीं षोडशपलां जलद्रोणद्वये क्षिपेत्॥ शर्करायाः शतं
दत्वा क्षौद्रस्यैव तुलां तथा॥ मासं संस्थापयेद्भांडे मांसीमरिचधूपिते॥ उशीरासव इत्येष
रक्तपित्तविनाशनः॥ पांडुकुष्ठप्रमेहार्शःकृमिशोषहरस्तथा॥ इत्युशीरासवः॥
दुर्वासोत्पलकिंजल्कामंजिष्ठांसैलवालुका॥ मूर्वालोध्रमुशीरालिमुस्तंचंदनपद्म
कं॥ द्राक्षामधुकपष्ठ्याह्वं काश्मरीचंदनं सितं॥ पिष्ठैस्तैः कार्षिकैर्द्रव्यैर्घृतप्रस्थं वि
पाचयेत्॥ अजाक्षीरं तंदुलांबु पयपक्त्वा दत्वा च तुर्गुणं॥ तस्यानं वमतो रक्तं नावनेना

सिक्तागते॥ फलीक्षिरोमकूपेभ्यो मद्रात्वा योग्ययोनितः॥ शोणितं यदि निर्गच्छेत् घृतेना
नेन पूरयेत्॥ तानि तान्येव रंध्राणि तेन रक्तं प्रशाम्यति॥ नातः परतरं किंचिद्रक्तपित्तवि
नाशनं॥ इति दूर्वाद्यं घृतं॥ पुराणं पीनमादाय कूष्मांडस्य फलं दृढं॥ तद्वीजाधारबीजत्व
क्शिराश्च त्वचं समाचरेत्॥ ततस्तस्य तुलां नीत्वा पचेज्जलतुलाद्वये॥ तस्मिन्नीरेऽर्द्धशिष्टे
तु पल्लतः शीतलीकृते॥ तानि कूष्मांडखंडानि पीडयेद्दृढवाससा॥ पल्लतस्तज्जलं नीत्वा
पुनः पाकाय धारयेत्॥ कूष्मांडं शोषयेद्घर्मे तामपात्रे ततः क्षिपेत्॥ क्षिप्तात्र घृतप्रस्थं
कूष्मांडं तेन भर्जयेत्॥ मधुवर्णं तदालोक्य तज्जलं तत्र निक्षिपेत्॥ सिताया अर्द्धतुलां तत्र
क्षिप्तातं लेहवत्पचेत्॥ सुपक्के पिप्पलीशुंठीजीरकाणां द्विपलं पृथक्॥ प्रपक्कप्तार्द्धधा
न्याकपत्रैला मरिच त्वचः॥ चूर्णमेषां क्षिपेत्तत्र घृतार्द्धं क्षौद्रमावपेत्॥ एतत्वल्समितं

ध्वोदरस्यचाग्निबलंपथ्या ॥ खंडकूष्मांडलेहोयंरक्तपित्तंविनाशयेत् ॥ पित्तज्वरंतृषांदाहंप्र
दरंकृशतांवमिं ॥ स्वरभेदंसहृद्रोगंकासश्वासक्षतक्षयं ॥ नाशयत्येवयष्योयंवहृल्गोचे
लवर्द्धनः ॥ इतिपाठांतरेणकूष्मांडावलेहः ॥ शतावरीमूलकल्कंकल्कात्क्षीरंचतुर्गुणं
क्षीरंतुयच्चघृतंतोयंसितपाकल्केतुल्यपा ॥ घृतंशेषंपचेत्तुपलार्द्धलिहयेत्सदा ॥ रक्त
पित्तंघ्नम्लपित्तंक्षयंश्वासंचनाशयेत् ॥ इतिशतावरीघृतं ॥ मालिनीवसंतरसः ॥ योल
वकुपर्यटीरसस्मात्रदेयौ ॥ पंचाशच्चपलंस्विन्नंकूष्मांडात्प्रस्थमाज्यतः ॥ पक्कंपलशा
तंखंडंवासाक्काथाढके पचेत् ॥ शुंठीधात्रीघनैर्भार्गीत्रिसुगंधैश्चकार्षिकैः ॥ तालीस
विश्वधान्याकमरिचैश्चपलांशकैः ॥ पिप्पलीकुडवंचैवमधुमानीमदापयेत् ॥ कास
श्वासंज्वरंहिक्कांरक्तपित्तंहलीमकं ॥ हृद्रोगमम्लपित्तंचपीनसंचव्यपोहति ॥ इ

तिवासा कूष्मांडः ॥ एलापत्रत्वचोर्द्धाक्षाः पिप्पल्यर्द्धपलं तथा ॥ सितामधुकखर्जूरमृद्वी
काश्च पलोन्मिताः ॥ संचूर्ण्य मधुना भुक्ता गुटिकाः संप्रकल्पयेत् ॥ अक्षमात्रं ततश्चैकां
भक्षयेत्तां दिने दिने ॥ कासं श्वासं ज्वरं हिक्कां छर्दिं मूर्छां मदं भ्रमं ॥ रक्तनिष्ठीवनं तृष्णां
पार्श्वशूलमरोचकं ॥ शोषं प्लीहाढ्यवातं च स्वरभेदं क्षतक्षयं ॥ गुटिका तर्पणी वृष्या
रक्तपित्तं विनाशयेत् ॥ एलादिगुटिका ॥ अथ नासिकास्राविरक्तचिकित्सा ॥ नासा
प्रवृत्ते रुधिरे जलनस्यं प्रशस्यते ॥ नस्ये दाडिमपुष्पोत्थो रसो दूर्वाभवोऽपि वा ॥ आम्रा
स्थिजः पलांडोर्वा नासिकास्रावि रक्तजित् ॥ सीतलामलकल्केन शतधौतघृतेन च ॥
मुंडं विलिप्य लिप्ते लेपः क्षाररणीयाः पुनः पुनः ॥ अथ पथ्यमाह ॥ अधोगते छर्दनमूर्ध्व
निर्गमे विरेचनं स्यादुभयत्र लंघनं ॥ पुरातनाः षष्टिकशालिको द्रवाः प्रियंगुनीवा

रवचाः प्रसस्ताः ॥ मुद्गा मसूराश्चणकास्तुवर्य्यो मकुष्टकाश्चापि कषायवर्गः ॥ गव्याम
जाप्यापयो घृतं च घृतं माहिष्याः पनसं प्रियालं ॥ रंभाफलं कं च टतंडुलीयपटोलवेत्रा
ग्रमहार्द्रकाणि ॥ पुराणकूष्मांडफलं च पक्वं खर्जूरधात्रीमिसिनालिकेरं ॥ द्राक्षासिता
माक्षिकमिक्षवश्च शीतोदकं चंदनमिंदुपादाः ॥ भूनिंबशाकं पिचुमंदपत्रं हितं त्वलं
क्तोलितापित्तरोगे ॥ अपथ्यमाह ॥ घर्मः स्त्रीसंगमस्तीक्ष्णाव्यायामोष्मानिषेवणं
रक्तपित्ते परिहरेद्यत्नात्सीतकारकं ॥ इति रक्तपित्तचिकित्सा ॥ अथ राजयक्ष्मनिदानं
तत्र राजयक्ष्मणो विप्रकृष्टं सन्निकृष्टं च निदानमाह । वेगरोधात्क्षयाच्चैव साहसा
द्विषमाशनात् ॥ त्रिदोषो जायते यक्ष्मा गदो हेतुचतुष्टयात् ॥ १ ॥ वेगोत्रवातमूत्रपुरी
षाणां ॥ यातमूत्रपुरीषाणि निगृह्णातिपदानरः इति वचनात् ॥ क्षयात्क्षीयते अ

॥१४६॥

नेनेतिक्षयस्तस्मात् ॥ तेनातिव्यवायानशनेर्ष्यादयो धातुक्षयहेतवो क्षयशब्देनोच्यंते
साहसात्वलवत्तासमं महत्त्वपुरुषादितः ॥ विषमाशनात् यहस्रोतकेमेकालेयातदुक्तं विष
माशनं तस्मात् ॥ त्रिदोषः सान्निपातिकः ॥ यदाह सुश्रुतः ॥ एकएवमतः शोषः ॥ सन्निपा
तात्मकोपतरइति ॥ ननुवेगरोधादयो वातं कोपयंति तज्जनितो यक्ष्मा कथं त्रिदोषजइति
चेदुच्यते ॥ वातप्रकोपादेवाग्निदुष्ट्याककपित्तयोरपिप्रकोपइत्याहुः ॥ हेतुचतुष्टयादि
त्यनेनान्येपिहेतवो हेतुचतुष्टयएवांतर्भवंतीति दर्शयति ॥ यक्ष्मणएवपर्यायाराजय
क्ष्मक्षयशोषाः ॥१॥ अथयक्ष्मादिशब्दानां निरुक्तिमाह ॥ वैद्योव्याधिमतायस्माद्व्याधे
र्यत्नेनयक्ष्यते ॥ सयक्ष्माप्रोच्यते लोके शब्दशास्त्रविशारदैः ॥२॥ यक्ष्मते पूज्यते ॥२॥ राज्ञ
श्चंद्रमसोयस्मादभूदेषकिलामयः ॥ तस्मात्तेराजयक्ष्मेतिकेचिदाहुर्मनीषिणः ॥१४६॥

३ क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते बुधैः ॥ संशोषणाद्रसादीनां शोष इत्यभिधीयते ॥
४ अथ तस्य संप्राप्तिमाह ॥ कफप्रधानैर्दोषैस्तु रुद्धेषु रसवर्त्मसु ॥ अतिव्यवायिनो वा
पि क्षीणे रेतस्यनंतरं ॥ क्षीयंते धातवः सर्वे ततः शुष्यति मानवः ॥ ५ कफः प्रधानं
येषामनिलादिदोषाणां तैस्तथा ॥ ननु दोषैरित्यनेन दोषत्रयमुच्यते ॥ कफस्य विशेष
णत्वेनोपात्तत्वात् कथमस्यैवान्यपदार्थवाच्यता ॥ उच्यते ॥ अवयवेन विग्रहः समा
सार्थः समुदायः ॥ यथा बहुव्रक्षं वनमिति समाधानं ॥ विस्तरस्तु स्पष्टस्तैर्जेज्जटे द्रष्ट
व्यः ॥ कफप्रधानता च वेगरोधादिकुपितवातविहताग्निमांद्यादिना बोद्धव्या ॥ रस
वर्त्मसु रसवहधमनीषु ॥ अनंतरं सर्वे धातवो रक्तादयः क्षीयंते ॥ कारणभूतरसधा
तुक्षये सति रसकार्याणां रक्तादिधातूनां पोषकाभावेन क्षीयमाणत्वात् ॥ मार्गा

वरोधे रसक्षयो भवतीति इदमत्र सूचितं ॥ तथा च चरकः ॥ रसस्रोतस्सु रुद्धेषु स्वस्थानस्थो
विदह्यते स ऊर्ध्वं कासवेगेन बहुरूपः प्रवर्तत इति ॥ स्वस्थानस्थः हृदयस्थः ॥ कासं विनापि
रसक्षयो भवति मार्गविरोधकुपितवातेन रसस्य शोषणात ॥ उक्तं च वायो धातुक्षया
त्कोपो मार्गस्यावरणेन चेति ॥ अनुलोमं क्षयं दर्शयित्वा प्रतिलोमक्षयमाह ॥ अतिव्य
वायिनो वा रेतसि क्षीणे प्रतिलोमक्रमेण नेतराः सर्वे धातवो रसपर्यन्ताः क्षीयन्ते ॥ त
था ॥ शुक्रे क्षीणे मज्जा क्षीयते मज्जनि क्षीणे अस्थि क्षीयते अस्थ्नि क्षीणे मांसं एवं
पूर्वं पूर्वं ॥ ननु कार्यस्य शुक्रस्य क्षये कथं कारणभूतानां मज्जादीनां क्षयः ॥ उच्यते ॥
शुक्रक्षयाद्धि वायुः कुप्यति ॥ यदुक्तं ॥ वायो धातुक्षयात्कोप इत्यादि ॥ सः वायुः सान्नि
ध्यक्रमेण मज्जादीन् सर्वान् धातून् शोषयति ॥ ततस्तदनंतरं मानवः शुष्यति ॥ इत्थंच

न्त्यासत्याकार्य्यजननं ॥ यथाग्निसंतप्तायो गोलकसन्निधानादूर्ध्वभागस्य शोषइ
ति ॥ अत्रानंतरः क्षीयंते धातवः सर्वे ततः शुष्यति मानव इति उभयत्रापि कांक्षित्यो
पचयुज्यत इति सेयं ॥ ५ ॥ अथ तस्य पूर्वरूपमाह ॥ श्वासांगसादकफसंस्रवतालुशोष
वम्यग्निसादमदपीनसकासनिद्राः ॥ शोषे भविष्यति भवंति स चापि जंतुः शुक्लेक्ष
णो भवति मांसपरो रिरंसुः ॥ ६ ॥ स्वप्ने च काकशुकशल्लकिनीलकंठगृध्रास्तथैव
कपयः कृकलासकाश्च ॥ ते वाहयंति स नदीर्विजलाश्च पश्येत् शुष्कांस्तरून्पवनधू
मदवार्द्दितांश्च ॥ कफसंस्रवः कफनिष्ठीवनं ॥ पीनसः प्रतिश्यायः ॥ मांसपरो मांस
भक्षणकामः ॥ रिरंसुः स्त्रियं रंतुमिच्छुः ॥ एतच्च व्याधिमहिम्ना मनोदोषात् ॥ शल्ल
कः सज्जक इति ख्यातः ॥ नीलकंठो मयूरः ॥ विजलाः निर्जलाः ॥ दवो दावाग्निः ॥ अ

॥ १४८ ॥

द्भुतान् अभिभूतान् ॥ चकारात् तेनाकेशानियातादयो ग्राह्याः ॥ यदुक्तं चरके ॥ नश्चिकाणां
च केशानां तरुणानां यतमानानि च ॥ प्रायेणाल्पप्राणे केशानां न खलानां चाभिवर्द्धनं ॥ पत
त्रिभिः पतंगैः श्वापदैश्चापि कर्षणमिति ॥ श्वापदा व्याघ्रादयः ॥ ६ ॥ ७ ॥ अथ यक्ष्म
णो लक्षणमाह ॥ अंसपार्श्वाभितापश्च संतापः करपादयोः ॥ ज्वरः सर्वांगगश्चेति
लक्षणं राजयक्ष्मणः ॥ ८ ॥ अंसयोः पार्श्वयोरभितापः पीडा ॥ अत्र सकलधातुक्षय
पूर्वकः सकलशरीरशोषो विज्ञेयः ॥ ८ ॥ अथ संपूर्णोक्तं षड्लक्षणं यक्ष्माणं द
र्शयति ॥ भक्तद्वेषो ज्वरः कासः श्वासः शोणितदर्शनं ॥ स्वरभेदश्च जायंते षड्रूपे राज
यक्ष्मणि ॥ ९ ॥ अथ उक्तलक्षणतया दोषाणां भेदात् ॥ एकादशलक्षणं यक्ष्माणमाह
स्वरभेदोऽनिलाच्छूलं संकोचश्चांसपार्श्वयोः ॥ ज्वरो दाहोऽतिसारश्च पित्ताद्रक्तस्य ॥ १४८ ॥

चागमः ॥१०॥ शिरसः परिपूर्णत्वमभक्तछंद एव च ॥ कासः कंठस्य चोध्वंसो विज्ञेयः कफकोपतः ॥११॥ अनिलात् उल्वणात् ॥ एवं पित्तात्कफाच्च ॥ यत आह सुश्रुतः ॥ उद्रेकात्तत्र लिंगानि दोषाणां निपतंति चेति ॥ शूलं अंसपार्श्वयोरेवेति मधुकोशकृत ॥ अभक्तछंदो अभक्तरुचिः ॥ कंठस्य चोध्वंसः कंठभेदः उत्कासिकेति कार्त्तिकः ॥ एतानि लक्षणानि विभज्य व्याधिप्रभावात् जन्यंते न तु सन्निपातज्वरलिंगवत् युगपत्सर्वदोषैः सर्वाणीति ज्ञेयं ॥१०॥११॥ अथासाध्यं यक्ष्मिणमाह ॥ एकादशभिरेभिर्वा षड्भिर्वापि समन्वितं ॥ कासातिसारपार्श्वार्त्तिस्वरभेदारुचिज्वरैः ॥१२॥ त्रिभिर्वा पीडितं लिंगैर्ज्वरकासासृगामयैः ॥ जह्याच्छोषार्दितं जंतुमिच्छन् सुविपुलं यशः ॥१३॥ एकादशभिः स्वरभेदादिभिः कंठध्वंसांतैः ॥ असृगामयो रक्तपित्तं ॥१२॥१३॥ तत्र विशेषमा

॥१४८॥

ह॥ तैर्द्वैस्त्रिभिर्वापि लिंगैर्मांसबलक्षये। युक्तो वर्ज्यश्चिकित्स्यस्तु सर्वरूपोप्यतोन्य
था॥१४॥ सर्वैरेकादशभिः॥ अर्द्धैरिति एकादशानामर्द्धं अर्द्धानि षट् भवति॥ तत्रके
तमस्य रूपस्यार्द्धत्वं ग्राह्यमित्याशंकायामेकस्य रूपस्यार्द्धासंभवे षट्स्वेव रूपेषु मध्ये
षड्रूपस्योत्कृष्टत्वात् षड्रूपार्थो बोद्धव्यः॥ तेनार्द्धैः षड्भिरित्यर्थः। त्रिभिर्ज्वरकासरुधि
रवमनैः लिंगैर्युक्त इति संबंधः॥ अतोन्यथा मांसबले सति सर्वरूपोपि प्रत्याख्या
य चिकित्स्य इत्यर्थः॥१४॥ किंच॥ महाशनं क्षीयमाणमतीसारनिपीडितं॥ शूनमुष्को
दरं चैव यक्ष्मिणं परिवर्जयेत्॥१५॥ महाशनं क्षीयमाणमित्येकमसाध्यलक्षणं
अतीसारनिपीडितमिति द्वितीयं॥ यक्ष्मिरोगे मलायत्तजीवितस्योक्तत्वात्॥ तदुक्तं
मलायत्तं बलं पुंसां शुक्रायत्तं च जीवितं॥ तस्माद्यत्नेन संरक्षेद्यक्ष्मिणो मलरेत ॥१४८॥

सोऽरिति ॥ १५ ॥ अथारिष्टमाह ॥ शुक्लाक्षमन्नद्वेष्टारमूर्ध्वश्वासनिपीडितं ॥ कृच्छ्रेण च
हुमेहन्तं यक्ष्मा हन्तीह मानवं ॥ १६ ॥ मेहन्तं शुक्रं क्षरन्तं ॥ शुक्लाक्षत्वादीन्येकैकशोऽरिष्ट
लक्षणानि ॥ १६ ॥ अथावधिमाह ॥ परं दिनसहस्रं तु यदि जीवति मानवः ॥ सुभिषग्भि
रुपक्रान्तस्तरुणः शोषपीडितः ॥ १७ ॥ शोषपीडितो मानवस्तरुणो यदि स्यात् सुभि
षग्भिः शास्त्रैककर्मनिपुणैर्वैद्यैः उपक्रान्तश्चिकित्सितश्च यदि स्यात् तर्हि प
रं केवलं दिनसहस्रं जीवति ॥ द्वितीयदिनसहस्रे जीवनस्य विकल्प इत्यर्थः ॥ तदुक्तं
योगपयोधौ ॥ सहस्रात्परतो नास्ति जीवितं राजयक्ष्मिणामिति ॥ ७ ॥ अथ चिकित्स्य
माह ॥ ज्वरानुबन्धरहितं बलवन्तं क्रियासहं ॥ उपक्रमेदात्मवन्तं दीप्ताग्निमकृशं
नरं ॥ १८ ॥ आत्मवन्तं यत्नवन्तं धृतिवन्तं वा ॥ १८ ॥ अथ निदानविशेषैः शोषविशेषा

॥१५०॥

नाह ॥ व्यवायशोकवार्द्धक्यव्यायामाध्वप्रशोषितान् ॥ व्रणोरःक्षतसंज्ञौ च शोषि-
णौ तल्लक्षणैः शृणु ॥१९॥ वृद्धस्वभावी वार्द्धक्यं ॥ व्रणोरःक्षतसंज्ञौ शोषिणौ व्रण-
शोषी उरःक्षतशोषी च ॥१९॥ तत्र व्यवायशोषिणो लक्षणमाह ॥ व्यवायशोषी शु-
क्रस्य क्षयलिंगैरुपद्रुतः ॥ पांडुदेहो यथापूर्वं क्षीयंते चास्य धातवः ॥२०॥ शुक्रस्य क्ष-
यलिंगैः स्फुटोक्तैः ॥ तानि यथा ॥ शुक्रक्षये मेढ्रवृषणवेदना अशक्तिर्मैथुने चि-
राद्वा प्रसेकः प्रसेके चाल्पशुक्रदर्शनमिति ॥ यथापूर्वं क्षीयंते चास्य धातव ॥ इति
प्रथमं शुक्रं क्षीयते पश्चाच्छुक्रक्षयजनितवायुना मज्जादयो पि धातवो यथापू-
र्वं क्षीयंते ॥२०॥ अथ शोकशोषिजराशोषिणोर्लक्षणमाह ॥ प्रध्यानशीलः स्रस्तां-
गः शोकशोष्यपि तादृशः ॥ जराशोषी कृशो मंदवीर्यबुद्धिबलेंद्रियः कंपनो

॥१५०॥

रुचिमान् भिन्नकांस्यपात्रहतस्वरः ॥२१॥ क्षीयते श्लेष्मरागहीनं गौरवारतिपीडितः
संप्रसुप्तास्यनासाक्षः शुक्लरूक्षमलच्छविः ॥२२॥ प्रधानशोषः यस्याभावेन शो-
को जनितस्तत्स्थानपरः ॥ स्रस्तांगः शिथिलांगः ॥ तादृशः व्यवायशोषिसदृशः
तेन शुक्रादिसर्वधातुक्षयपुक्तो भवति ॥ परं शुक्रक्षयकृतैर्विकारैर्मेद्रवृषण-
वेदनादिभिः वर्जितो भवति ॥ व्याधिस्वभावात् ॥ मंदशब्दः स्वल्पार्थः ॥ कंपनः
कंपयुक्तः ॥ भिन्नस्य भग्नस्य कांस्यपात्रस्य हतस्य दंडादिनेव स्वरो यस्य स त-
था ॥ क्षीयते श्लेष्मरागहीनमिति श्लेष्महरणप्रयत्ने कृतेपि न श्लेष्मा निःस्स-
रतीत्यर्थः ॥ शुक्लरूक्षमलच्छविः शुक्लरूक्षे यथाक्रमं मलछवी यस्य स तथा ॥
२१॥२२॥ अथाध्वशोषिणो लक्षणमाह ॥ अध्वप्रशोषी स्रस्तांगः संभृष्ट-

परुषछविः || प्रसुप्तगात्रावयवः शुष्कक्लोमगलाननः || २३ || संभग्नस्येव परुषाछविर्यस्य सः

॥१५१॥ प्रसुप्तस्पर्शः स्पर्शाज्ञानार्थः || क्लोम हृदयस्य पिपासास्थानं || २३ || अथ व्यायामशोषिणो

लक्षणमाह || व्यायामशोषी भूयिष्ठमेभिरेव समन्वितः || लिंगैरुरःक्षतकृतैः संयुक्त

उरःक्षतं विना || २४ || एभिरेव सलक्षणां गलादिभिरध्वशोषिलक्षणैरेव || भूयिष्ठं अत्यर्थः

अध्वशोषे अल्पानि तल्लक्षणानि व्यायामजे तु महांतीत्यर्थः || २४ || अथ सनिदानव्र

णशोषमाह || रक्तक्षयाद्वेदनाभिस्तथैवाहारयंत्रणात || व्रणितस्य भवेच्छोषः स चा

प्यसाध्यतमो मतः || २५ | वेदनाव्रणवेदनाः || २५ || अथ उरःक्षतस्य निदानमाह ||

धनुषायास्यतोऽत्यर्थं भारमुद्वहतो गुरुं || युध्यमानस्य बलिभिः पततो विषमोच्चतः || २६

वृषं हयं वा धावंतं दम्यं वान्यं निगृह्णतः || शिलाकाष्ठाश्मनिर्घातान् क्षिपतो नि ॥१५१॥

प्रतापवान् ॥ २४ ॥ अधीयानस्य वाप्युच्चैर्दूरं वा व्रजतो द्रुतं ॥ महानदीं वा तरतो हयैर्वा स
हधावतः ॥ २५ ॥ सहसोत्पततो दूरं तूर्णं वातिप्रनृत्यतः ॥ तथान्यैः कर्मभिः क्रूरैर्भृशमभ्या
हतस्य वै ॥ २६ ॥ स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः ॥ विक्षते वक्षसि व्याधिर्ब
लवान् समुदीर्यते ॥ २७ ॥ आयासस्यतः आयासं कुर्वतः ॥ दम्यं दमनार्हं वृषादिकमेव ॥
अन्यं च गजोष्ट्रादिकं ॥ शिला दीर्घपाषाणः ॥ अश्मा प्रस्तरखंडः ॥ निर्घातो वायुविशेषः
यद्वा निर्घातोऽशिलादीनां प्रेरणविशेषः ॥ परान् शत्रून् ॥ अधीयानस्य पठतः ॥ तथा
क्रूरैः शत्रुभिः अन्यैः कर्मभिर्मल्लयुद्धादिभिर्भृशमभ्याहतस्य ताडितस्य ॥ विक्षत इति
उरो विशेषणं व्याधिर्वायुरिति जेज्जटः दोषा अपि व्याधिशब्देन तंत्रांतरस्यागमात्
यद्वा व्याधिरुरःक्षतारव्यः समुदीर्यते उत्पद्यते ॥ २४ ॥ २५ ॥ २६ ॥ २७ ॥ ३० ॥ अथ उ

॥१५२॥

हृः क्षतस्य लक्षणमाह ॥ उरो विरुज्यते ऽत्यर्थं भिद्यते ऽथ विभज्यते ॥ प्रपीड्यते ततः पार्श्वे शु
ष्यत्यंगं प्रकंपते ॥ २१ ॥ क्रमाद्वीर्यं बलं वर्णो रुचिरग्निश्च हीयते ॥ ज्वरो व्यथा मनो दैन्यं ।
विड्भेदो ऽग्निवधस्तथा ॥ २२ ॥ दुष्टः श्यावः सुदुर्गंधिः पीतो ग्रथितो बहुः ॥ कासमानस्य चाभी
क्ष्णं कफः सास्रः प्रवर्त्तते ॥ २३ ॥ सक्षतो क्षीयते ऽत्यर्थं तथा शुक्रौजसोः क्षयात् ॥ अव्यक्तं
लक्षणं तस्य पूर्वरूपमिति स्मृतं ॥ २४ ॥ विरुज्यते प्रपीड्यते ॥ भिद्यते विदार्यत इव ॥ विभ
ज्यते द्विधा क्रियत इव ॥ वीर्यं शक्तिः ॥ बलं मांसोपचयः ॥ दुष्टो व्यापन्नाः ॥ तदेव विवृणो ।
ति श्याव इत्यादि ॥ विग्रथितः विशेषाद्ग्रथितः ॥ विबद्ध इति जेज्जटः ॥ सक्षत इति उरः
क्षतवान् ॥ क्षीयते धातुशोषमाप्नोति ॥ न केवलं सासृक्कफक्षयादेव क्षीणो भवति त
था शुक्रौजसोः क्षयात् ॥ अतिसेवनादिना शुक्रौजसोः क्षयादपि क्षीणो भवति ॥ १५२ ॥

तस्य पूर्वरूपमाह ॥ अव्यक्तमित्यादि ॥ ३२॥३३॥३४ ॥ अथोरःक्षतस्य विशिष्टं लक्षण-
माह ॥ उरो रुक्शोणितछर्दिः कासो वैशेषिकः विशिष्टो भवति ॥ विशिष्टत्वं उक्तदुष्टश्ले-
ष्मादिकफलक्षणयुक्तत्वं ज्ञेयं ॥ तस्मिन्नेवोरःक्षते चतिसासृक्कफस्तु क्रोजसां क्षयात्
क्षीणे सति सरक्तमूत्रत्वं आलोहितरक्तमूत्रता पार्श्वपृष्ठकटिग्रहश्च भवति ॥ ३५ ॥ अ-
थ निदानविशेषेणोरःक्षतस्य विशेषमाह ॥ न्तरारोधात्क्षयाद्वैवकोष्ठात्प्रतिमलात
या ॥ क्षतो रक्तस्यानलपाके निःश्वासो वातिपूतिकः ॥ ३६ ॥ क्षयात्क्षयहेतो रतिव्यवाया-
दितः ॥ कोष्ठात्प्रतिमलात् कोष्ठात्प्रतिलोमयातेन प्रतिलोममलात् ॥ पूतिकः पूतिगंधः
३६ ॥ अथोरःक्षतस्य साध्यपाध्यासाध्यलक्षणमाह ॥ अल्पलिंगस्य दीप्ताग्नेः साध्यो
बलवतो नवः ॥ परिसंवत्सरो याप्यः सर्वलिंगं तु वर्जयेत् ॥ ३८ ॥ इति राजयक्ष्मोरःक्ष-

॥१५३॥

स्तुताम्रायो हिंवं गोबरण विषमखिलांसेन गंधेन तौघ्रांकौ ताग्नौ विद्रुतेन स्वरणमत मिलितं
शर्तिंगोमयस्थे ॥ रेभापत्रेमुनान्येन च दृढं पिहितं प्राणदापर्पटी स्यात पांडौ रेकेगृहे णयांज्व
रहृजिकसनेयक्ष्ममेहाग्निमांद्ये ॥ प्राणदापर्पटीसैषा भाविताशंभुनास्वयं ॥ तत्तद्रोगानुया
नेन सर्वरोगविनाशिनी ॥ इति प्राणदपर्पटी

तनिदानं अथ राजयक्ष्मउरःक्षत चिकित्सा ॥ बलिनो बहुदोषस्य पंचकर्माणि कारयेत ॥
यक्ष्मिणः क्षीणदेहस्य तत्कृतं स्याद्विषोपमं ॥ मलायत्तं बलं पुंसां शुक्रायत्तं तु जीवितं ॥ तस्मा
द्यत्नेन संरक्षेद्यक्ष्मिणो मलरेतसी ॥ सितोपला तुगाक्षीरी पिप्पली बहुला त्वचः ॥ अंत्या
दूर्ध्वं द्विगुणिताश्च्चूर्णिता मधुसर्पिषा ॥ लेहयेद्राजरोगार्त्तं कासश्वासज्वरातुरं ॥ पार्श्व
शूलिनमल्पाग्निं सुप्तजिव्हं हृचिच्युतं ॥ हस्तपादांगदाहे च ज्वरे रक्ते तथोर्ध्वगे ॥ इति सि ॥१५३॥

शुद्धं सुवर्णदलमष्टगुणेन शुद्धसूतेन पिंडितमथो वसुभागभाजि ॥ गंधे द्रुते च दरवन्हिगलोह
पात्रे दत्वा विलोड्य तदनु लोहशलाकया ततः ॥ मंदं निरस्य सुरभीमलमंडलस्य रंभादले तदुपरि
प्रणिधाय चान्यत् ॥ रंभादलं तदनु निर्यत्रते दहेदितं शीतं सुवर्णरसपर्पटिकाभिधानं ॥ पितोल्वणोत्र सि

तोपलादिरवलेहः ॥ रसभस्मामृतासत्वलोहं मधुघृतान्वितं ॥ अमृतेश्वरनामायं षड्गुंजो राज
यक्ष्मजित् ॥ इत्यमृतेश्वरो रसः ॥ त्रयोंशा मारितात्सूतादेको भागो हेमभस्मतः ॥ एकोंशो मृत
ताम्रस्य शिलागंधकतालकं ॥ प्रत्येकं भागयुग्मं स्याद्देतत्सर्वं विचूर्णयेत् ॥ वराटीः पूरयेत्ते
न छागीक्षीरेण टंकणं ॥ पिष्ट्वा तस्य मुखं रुंध्यान्मृद्भांडे तान्निधारयेत् ॥ ततो गजपुटे पक्त्वा
चूर्णयेत्स्वांगशीततं ॥ रसो राजमृगांको यं चतुर्गुंजः क्षयापहः ॥ मरिचैरेकविंशत्या कणा
भिर्दशभिस्तथा ॥ मधुना सर्पिषा वापि दद्यादेनं रसं भिषक् ॥ अनेन नश्यति क्षिप्रं वात

॥ १५४ ॥

तपातुगवाथयातः श्लेष्मोल्वणे किवतुगामधुपिप्पलीभिः ॥ क्षीरोविरेके क्रिमिषः शोथिशि
मेदवन्हौ पांडौ प्रमेहे हिलिचिरज्वरि लिग्रहण्यां ॥ वृद्धौ श्वित्रे शोलरिवि निरान्नि नरेचनार्थं भि
षज्यमेतदुदितं हितमामयघ्नं ॥ इति स्ववर्णपर्पटी नाम रसः

श्लेष्मभवः क्षयः ॥ इति राजमृगांको रसः ॥ कर्पूरं चोचकंकोलजातीफलदलाः समाः ॥ लवं
गनागमरिचकृष्णाशुंठी विवर्द्धिताः ॥ चूर्णं सितासमं हृद्यं रोचनं क्षयकासनुत ॥ वैस्वर्य
ज्यासगुल्मार्शः छर्द्दिकंठामयापहं ॥ प्रयुक्तं चान्नपानेषु भेषजे द्विषिरल्पमपि ॥ इति कर्पूरा
द्यं चूर्णं ॥ पारदं शोधितं गंधमभ्रकं च समं समं ॥ तदर्द्धं दरदं दद्यात्तदर्द्धं च मनःशिला ॥ स
र्वार्द्धं मृतलोहं च खल्वमध्ये विनिक्षिपेत ॥ दिनमेकं भावयेत्ताद्देयाः शतावर्य्या रसेन च ॥ रसः
सिद्धो भवत्येषां कुमुदेश्वर रससंज्ञकः ॥ सितया मरिचेनाथ गुंजाद्वित्रिप्रमाणतः ॥ भक्षये ॥ १५४ ॥

पतंकपर्द्दचूर्णस्यपतंपारदगंधयोः ॥ माषषंकेलाकस्यैकोजंबीराद्भिर्विमर्दयेत ॥ पुटेल्लोकेश्वरो
नाम्ना लोकनाथो यमुत्तमः ॥ क्षतंकुष्टंरक्तपित्तनाम्यरोगान्क्षयंजयेत ॥ पुष्टिर्वीर्यप्रसादौजः
कांतिलावण्यदः परः ॥ कोलितलोकेश्वराद्स्मान्नलांष्टांभुप्रत्योद्धतान ॥ इतिलोकेश्वरपोप्टलीरसः

त्यातरुत्थायपूजयित्वेष्टदेवताः ॥ पक्ष्मात्नमुगंहत्येवत्रातपित्तकफामयान ॥ ज्वराहीन्वि
तान्रोगान्पथ्यादेत्यानजनार्दनः ॥ सततान्यासयोगेनवलीपलीतनाशनः ॥ इतिकुमुदे
श्वरो रसः ॥ मञ्जर्यत्सूक्ष्मपत्राणि हेम्नः भुद्रस्यकारयेत ॥ सूतेनतानितुल्यानिखल्वेक्षि
प्याविमर्दयेत ॥ काचनाररसेनैवज्वालामुख्यारसेनवा ॥ लागेस्यांवारसैस्ताववयावद्भवे
तिपिष्टिका ॥ ततौहेम्नचतुर्थांशंटंकणंतत्रनिक्षिपेत ॥ विद्रुममौक्तिकचूर्णंचहेम्नो
द्विगुणमावपेत ॥ तेषुसर्वसमंगंधंक्षिप्याचैकत्रमर्दयेत ॥ तेषांकृत्वाततोगोलंयोससा

रसेन तुल्यं कनकं तयोस्तु साम्येन कुर्यान्नव मौक्तिकानि ॥ रसप्रमाणेन बलिर्द्विभागः क्षारस्य सर्वं तु वराटिकानां ॥ सम्मर्द्य घस्रं तु विधाय गोलं दिनं पचेत हण्डलोनपूर्णे ॥ भांडे मृगांको यमतिप्रशस्तः क्षयाग्निमांद्यगृहणीगदेषु ॥ साज्योषणैर्वा मधुपिप्पलीभिर्वल्लद्वयोस्य देयो न ततोधिकस्तु ॥ इति राजमृगांकः

१५५

परिवेष्टयेत ॥ पश्चान्मृदा वेष्टयित्वा शोषयित्वा च धारयेत ॥ शरावसंपुटस्यांतस्तत्र मुद्रां प्रदापयेत ॥ तदलोनपूरिते भांडे धारयेत्तं च संपुटं ॥ मुद्रां दत्वा शोषयित्वा च बहुभिर्गोमयैः पुटेत ॥ स्वांगशीते ततस्तस्मिन्गंधं सूतसमं क्षिपेत ॥ पश्चाच्च पूर्ववत्खल्ले पुटेद्गजपुटेन च ॥ स्वांगशीतं ततो नीत्वा गुंजायुग्मं प्रयोजयेत ॥ अष्टभिर्मरिचैर्युक्तो कृष्णात्रययुतोथवा ॥ त्रिलोकस्य दया दोषादीन्नोकैकारसरक्तिका ॥ सर्पिषा मधुना

१५५

चापि दद्याद्दोषाद्यपेक्षया ॥ पथ्यं तद्युवतैः प्रायो मुद्गाद्यैरपि कल्पयेत् ॥ व्यंजनैर्घृतसंसिद्धैर्नी
तिक्षारैरहिंगुभिः ॥ संस्कृतैर्मरिचैलाभ्यां जीरकैश्चापि दाडिमैः ॥ बिल्ववृंताकतैलानि का
रवेल्लं विवर्जयेत् ॥ कोपं शोकं परिहरेत्स्त्रीप्रसंगं विवर्जयेत् ॥ एतेष्वारांगहलींकासंख्या
संक्षयमरोचकं ॥ नाशयेदग्निमांद्यं च कफवातामयानपि ॥ मृगांकोयं रसो नाम क्षयरोगा
दिनाशनः ॥ इति द्वितीयराजमृगांकरसः ॥ वासकस्य रसप्रस्थे मानिका सितशर्करा ॥ पिप्पली
द्विपलं सर्पिर्दत्वा मृद्वग्निना पचेत् ॥ लेहीभूते ततः पश्चाच्छीते क्षौद्रं पलाष्टकं ॥ दत्वावतार
येत्कोलमात्रमथालेहउत्तमः ॥ निहंति राजयक्ष्माणं कासं श्वासं च दारुणं पार्श्वशूलं च हृ
द्रोगं रक्तपित्तं ज्वरं तथा ॥ इति वासावलेहः ॥ हरीतकी शतं श्रेष्ठं पञ्चानामाढकं तथा ॥
पलानि दशमूलस्य विंशतिं तत्र योजयेत् ॥ चित्रकं पिप्पलीमूलमपामार्गं शटी तथा ॥

पिप्पल्याद्वि
पलं नागसे
विचक्षणैः
पचेत्

॥ ३५६ ॥

कपिकच्छूः शंखपुष्पी भार्गी च गजपिप्पली ॥ बलापुष्करमूलं च प्रत्येकं द्विपलं भवेत् ॥ पचेत्पंचा
ढके नीरे यवैः स्विन्नैः श्रृतं नयेत् ॥ तत्राभयाशतं दद्यात्क्वाथे तस्मिन् विचक्षणः ॥ सर्पिस्तै
लाष्टपलं क्षिपेद्गुडतुलां तथा ॥ पक्कालेहत्वमानीय सिद्धे शीते पृथक् पृथक् ॥ क्षौद्रं च पि
प्पलीचूर्णं दद्यात्कुडवमात्रया ॥ हरीतकीद्वयं खादेत्तेन लेहेन नित्यशः ॥ क्षयं कासं तथा
श्वासं हिक्काशोरुचिपीनसं ॥ ग्रहणीं नाशयत्येव वलीपलितनाशनः ॥ बलवर्णकरः
पुंसामवलेहो रसायनः ॥ विहितोगस्त्यमुनिना सर्वरोगप्रणाशनः ॥ इति अगस्त्यह
रीतक्यवलेहः ॥ शिलाजतुक्षौद्रविडंगसर्पिर्लोहाभयापारदताप्यभस्म ॥ आपूर्यते दु
र्बलदेहधातुस्त्रिपंचरात्रेण यथा शशांकः ॥ इति शिलाजत्वाद्यवलेहः ॥ द्राक्षातुलार्द्धं
द्विद्रोणे जलस्य विपचेत्सुधीः ॥ पादशेषे कषाये च कृते शीते विनिक्षिपेत् ॥ गुडस्य

॥ ३५६ ॥

प्रवालरससमौक्तिकंमृगांकमिदंचतुर्भागभाक्रमशक्रमशगपस्त्रतंरजतहेमनीहं शके ॥ अथो भुज
गरंगकेत्रितयकंविमर्द्याखिलंशुभेहनिविभावयेद्भिषगिदंधियासप्तशः ॥ द्रवैर्वृषनिशे
क्षुजैःकमलमालतीपुष्पजैःपयः ॥ कदलिकंदजैर्मलयजैर्लतानामुद्गवैः ॥ वसंतकुसुमाकरोर
सयतिहृद्विवृद्धोषितःसमस्तगदहृद्भवेत्किंतुनिजानुपानैरयं ॥ शिलाजतुमधुघृतैःक्षय
गदेषुसर्वेष्वपिप्रमेहहृजिरात्रिभिःसमधुधातकीलाभिःसह ॥ सितामलयजद्रवैर्महतिरक्तपि
त्तेपथ्यासितामधुसमन्वितंवृषभयक्ष्वानांद्रवैः इतीवसंतकुसुमाकरोरसः ॥

द्विगुलांतत्रत्वगेलापत्रकेसरं ॥ प्रियंगुमरिचंकृष्णाविडंगंचेतिचूर्णयेत ॥ एकपलोन्मि
तैर्भागैस्ततोभांडेनिधापयेत ॥ समंततोमर्दयित्वापिवेज्ज्ञात्वारसंततः ॥ उरःक्षतंक्षयंहंतिका
सश्वाससगलामयान ॥ द्राक्षारिष्टाह्वयःप्रोक्तोयकृन्मतघ्नोधनः ॥ चतुर्थभागंद्राक्षाया
धातकीमत्रकेचन ॥ प्रयच्छंतिततोवीर्यमितस्योच्चैःप्रजायते ॥ इतिद्राक्षारिष्टः ॥ तुलार्द्धं

॥ १५७ ॥

तुवंवृत्वाञ्चतुर्द्रोणेजलेपचेत् ॥ पादशेषेजलेशीतेगुडस्यत्रितुलांक्षिपेत् ॥ धातकींषोडश
पलांशिकां ॥ जातीफलानिकंकोलमेलात्वक्पत्रकेसरं ॥ लवंगंमरिचंचैवपलिकान्युप
कल्पयेत् ॥ मासंभांडेस्थितस्त्वेषवंवृत्वारिष्टकोजयेत् ॥ क्षयंकुष्ठमतीसारंप्रमेहंश्वास
कासनुत् ॥ इतिवंवृत्वारिष्टः ॥ कौंजंत्रिफलानिंवपटोलघनेनागरैः ॥ भावितानिदशा।
हानिरसैर्द्वित्रिगुणानिच ॥ शिलाजतुपलान्यष्टौतावतीशितशर्करा ॥ त्वक्क्षीरीपिप्प
लीधात्रीकुर्कटाख्याःपलोन्मिताः ॥ तिद्रग्धिकामूलफलंपलंकुर्यात्रिजातकात् ॥ मधु
त्रिपलसंयुक्ताःकुर्यादक्षसमागुटीः ॥ दाडिमाम्लंपयःक्षीरंरसपूर्वंसुरासवान् ॥ तांभ
क्षयित्वानुपिवेन्नीरंचहितभक्षभाक् ॥ पद्यचक्षिप्यतेवैद्यःकांतलोहंतथाभ्रकं ॥ प
लंपलंचमितितंतदास्याद्दीर्घ्यवत्तरं ॥ लेजरोगंतथापांडुप्रमेहंचभगंदरं ॥ मूत्रकृच्छ्रं ॥ १५७ ॥

छ्वचातां द्रवैः ॥ त्रिजातगर्जैश्चंदनैरपि च तुष्टिप्रदो मनोभवकरः परो वमिषु संभ्रवपुष्पीर

सैः ॥ अभीरुरसशर्करा मधुभिरम्लपित्तामये परे श्रुचयक्ष्मोचितं तनुगदेषु सेसेव्यते ॥ इति वसंतकुसुमाकरः

ज्वरं कुष्ठमर्शांसि तमकं तथा ॥ नाशयेत्प्लीहरोगं च व्याधिसंकरकारकं ॥ इति तत्पुष्पिवृग्रपि

का ॥ अच्छेतपुष्पा सहस्रालिघृतप्रस्थे विपाचयेत ॥ घृतपक्के ततस्तस्मिन्निक्षिपेद्देतदो

षधं ॥ सितोपला चतुर्भागा वातुजीतं पलं पलं ॥ मद्धिका षट्पला चैव क्षिपेन्मधुपलाष्ट

कं ॥ धात्रीरसत्वचा द्विपलं सर्वमेकत्र कारयेत ॥ कर्षप्रमाणं तत्सेव्यं सततं च गदातुरैः

क्षयेजीर्णज्वरे कासे चाग्निमांद्ये प्रमेहके ॥ प्रदरं रक्तजान् रोगान् कुष्ठार्शांसि विनाश

येत ॥ नेत्ररोगान् सुदुःसाध्यान् तथा सर्वान्मुखोत्थितान् ॥ इति सेवत्यवलेहः ॥ द्राक्षै

लाव्ददर्शांघ्रिजीवनबलाश्वगंधप्रद्धटापः कणापथ्याकाकनसज्यपक्कुरसटी छिन्ना

॥१५८॥

विदारीरसाः॥ वर्षाभूर्हिममामिकं जलघटे धात्री शतैः पंचभिः पात्स्थं व्यस्थिपिशिवाप्तु
तं यमकतो द्विःषट्पलेभर्जितं॥ सम्यचेतार्द्धतुलं पचेन्मधुतगावरुक्षाचतुर्जातषट् द्वि द्वि
द्वैकपलान्वितञ्च वनकष्ट्रा सोजरान्मकजित॥ कासश्वासखुडज्वरक्षयवमीरुक्कं
जिव्हार्तिजित॥ अस्याप्यं॥ द्राक्षागोस्तनी एलात्रुटिः अर्द्धामुस्ता दशांघ्रि दशमूलं
जीवनः जीवंती मुद्गपर्णी माषपर्णी काकोली क्षीरकाकोली जीवकर्षभकमेदामहामे
दायष्टीमधु नीतिजीवंत्यादिगणः॥ बलावाद्यालकः श्वंगीकर्कटशृंगी अश्वगंधातामि
लकी अपो लोहं करणा पिप्पली पथ्या हरीतकी काकनसा काकतुंडी अर्ज्जकमलं पुष्करं
पुष्करमूलं सटी कचूरीर्गौरः छिन्ना गुडूची विदारीभूकुष्मांडीरसः॥ आटरूषः वर्षाभूः ॥१५८॥
पुनर्नवा हिमं चंदनं एतत्सर्वं आमिकं प्रत्येकं पलप्रमाणं जलघटे तोयद्रोणे धात्री

श्रृते पंचभिः सहपात्स्यं क्वाथनेन पादावशेषं व्यस्थि शिवायुतैस्तैरेवामलकैरस्थिर

हितैर्गालयित्वा लोडितं योजितं यमकतो घृततैलात् द्विःषट्पले द्वादशपले भर्जितं तत

लितं स्वच्छे ताद्रृ तुलं शर्करापंचाशत्पलसहितं पुनः पचेत् मधुनः षड्भिः पलैस्तु गाया

द्विर्द्विर्द्विभ्यां चतुर्भिरित्यर्थः ॥ कृष्णायाद्वाभ्यां चातुर्जातकस्यैकेनान्वितो यं च्यवनप्राः

सो नामावलेहः जरां च मत्यं च जयति कासश्वासं जयति ॥ इति च्यवनप्राशावलेहः

कंटकारीतुलां स्वुरसांज तद्रोणेः शो विपाचयेत् ॥ पादशेषे जले तत्र च्छुपलांपथ्याशतं

न्यसेत् ॥ योऽन्यः गुडशतपलं पक्वा चोतार्थ्यपल्लेतः ॥ त्रिफलाषट्पलातत्र तथैव च

कटुत्रिके ॥ षट्पलं माक्षिकं देयं चातुर्जातं पलं तथा ॥ अवलेहो भवेत्सोऽयं व्याघ्रीना

मा भगृहदितः ॥ वातपित्तकफोद्भूतं कासं द्वंद्वं त्रिदोषजं ॥ यक्ष्मारोगं दशाहस्य चवतास

॥१५८॥

ण्यासंयुतं ॥ उरःक्षतं पीनसं च वमनं रुधिरस्य च ॥ हिनस्ति सहसा दिव्यो रोगराजं च
दारुणं ॥ इति वासावलेहः ॥ नेत्रलोचनचेद्देदप्रमाणं भागमाहरेत ॥ वह्निजं फटकी।
मच्छागारत्नं नवसादरं ॥ चूर्णमेषां सितायुक्तं गुंजार्द्धं योजयेद्भिषक् ॥ क्षयकेसरी नामा
यं रसः परमदारुणः ॥ इति क्षयकेसरी ॥ दशमूलकणावह्निकपिकच्छुविभीतकं ॥
कट्फलं मरिचं चैव पिप्पलीमूलसंयुतं ॥ स्करोहितकं दंती द्राक्षाजाजी निशाद्वयं
धात्रीजंतुघ्नशिखरीशृंगीदारुपुनर्नवाः ॥ धान्यकं देवकुसुमं राजवृक्षं त्रिकंटकं
वृक्षदारु कुबेराक्षीमूलं वारुणिकाभवं ॥ एतेषां पलयुग्मं तु भेषजानां पृथक्पृथक् ॥
आढकं चैव पथ्यानां जलद्रोणे पचेद्भिषक् ॥ सुस्विन्नाश्च यदा पथ्या मधुमध्ये वि
निक्षिपेत ॥ गुरूपदेशाद्विधिवत पिदितं च ततः परं ॥ पुनः क्षिपेत्यं च दिनं तथा च ॥१५८॥

दशवासरं ॥ विनीयताम्ततः पश्चात् घृतभांडे निधापयेत ॥ विमलेसुदृढे क्षौद्रपरिपू

र्णे च यत्नतः ॥ धातुजीतकरणानां तु चूर्णमध्ये प्रसेचितं ॥ पश्चात्सुचिक्कभांडे तु क्षिपेद्बु

द्धिपरायणः ॥ शुभाधान्यतरिक्तता लोकानां हितकाम्यया ॥ भक्षयेद्यो नरो नित्यं रो

गान्नश्यंति तस्य वै ॥ श्वासं क्षयं च कासं च छर्दिं मूर्छां मदं भ्रमं ॥ मुखरोगं तथा तृष्णा

मरुचिं च वह्निमांद्यतां ॥ पक्वातिसारीहोदराणां च वृद्धिं च विषमज्वरं ॥ मूत्रकृच्छ्रं प्रमेहं

च वातरक्तं सुदारुणं ॥ रुजं च वातसंभूतं तथा च कुग्रदोद्भवं ॥ रक्तपित्तं श्लेष्मपित्तं

सिध्मदद्रुं विचर्चिकां ॥ कुष्ठमर्शांस्यपस्मारं पांडुरोगं सकामलं ॥ मधुपक्वेति विख्या

ता हंति रोगान्न संशयः ॥ इति मधुपक्वहरीतकी ॥ माक्षिकस्य तु लाईं तु छिद्रे रोगा

पो विपाचयेत ॥ तस्मिन्पश्चात्तु थर्थशोषे तु पृते श्रीते प्रदापयेत ॥ गुडस्य द्वितुलां क्षिप्त्वा

१६०

तत्सर्वं घृतभाजने ॥ विडंगं च विकाश्वक्रस्मात्वगेलापत्रकेसरैः ॥ मरिचैश्च तथा चूर्णं स
म्यक्कृत्वा विचक्षणः ॥ क्षिपेद्वैद्य पलिकैर्भागै रक्षणीयः समं ततः ॥ ततो यथाबलं
पीत्वा कासश्वासगलामयान् ॥ हंति यक्ष्मारुजमलुगं गुरुसंधानकारकः ॥ माक्षि
कासवर इत्येषा व्रहननाचिहितः पुरा ॥ इति मध्वासवः ॥ शुद्धं सूतं द्विधागंधं कुर्यात्ख
ल्वेन कज्जलीं ॥ तयोः समं तीक्ष्णचूर्णं मर्द्यं कन्यकाद्रवैः ॥ द्विर्यामं मातयेद्गोलं तां
मूषाग्रे विधारयेत् ॥ आच्छाद्यैरंडपत्रेण स्याद्दुष्मं यामयुग्मतः ॥ धान्यराशौ न्यसेत्प
श्चाद्दहोरात्रात्तदुद्धरेत् ॥ संचूर्ण्य गालयेद्वस्त्रे सत्यं वारितरं भवेत् ॥ त्रिकटु त्रिफलै
ला भिजीती फलल्वंगकैः ॥ नवभागोन्मितैरेतैः समः रुधरसो भवेत् ॥ निष्कद्वयमितं
नित्यं मधुना सह लेहयेत् ॥ अयमग्निरसो नाम्ना क्षयकासहरः परः ॥ इत्यग्निर

१६०

सः ॥ द्राक्षायाः प्रस्थमेकं तु मधुकस्य पलाष्टकं ॥ पचेत्तोयाढके शुद्धे पादशेषेण तेन तु
पलिके मधुकद्राक्षे पिष्टे कृष्णापलद्वयं ॥ प्रदाय सर्पिषः प्रस्थं पचेत्क्षीरे चतुर्गुणे ॥
सिद्धे शीते पलान्यष्टौ शर्करायाः प्रदापयेत् ॥ एतद्द्राक्षाघृतं सिद्धं क्षतक्षीणासुखाव
हं ॥ वातपित्तज्वरश्वासविस्फोटकहलीमकान् ॥ प्रदरं रक्तपित्तं च हन्यात्पाण्डुं सबल
प्रदं ॥ इति द्राक्षादिघृतं ॥ चंदनांबुनखं बाष्पं यष्टीशैलेयपद्मकं ॥ मंजिष्ठा सरलं दा
रु शट्येलापद्मकेसरं ॥ पत्रं विल्वमुशीरं च कंकोलं वनितांबुदं ॥ हरिद्रे सारिवे तिक्ता
लवंगागुरुकुंकुमं ॥ त्वक्रेणुर्नलिका चैभिस्तैलं मस्तु चतुर्गुणं ॥ लाक्षारससमं सिद्धं
ग्रहघ्नं बलवर्णकृत् ॥ अपस्मारज्वरोन्मादकृत्यालक्ष्मीविनाशनं ॥ आयुःपुष्टि
करं चैव वशीकरणमुत्तमं ॥ विशेषात्क्षयरोगघ्नं रक्तपित्तहरं परं ॥ अंबुवालकं

॥३६१॥

वाष्पंकुष्ठं शैलेयं छडिला इति लोके ॥ सरलं चीडः इति लोके वनिता प्रियंगुः ॥ नलिका चेत
नलिका ॥ इति चेत्स्नाय्यै तैलं ॥ अथ पथ्यमाह ॥ दोषाधिकस्य वलिनो मदुष्ट छर्द्दिरोगे शो
धनममृदुश्चलाकाल्ला। शालयश्च च्छागादिमांस नवनीतपयो घृतानि क्रव्यादमांस
मपि जांगलजा रसाश्च ॥ पक्वानि मोचपनसाम्रफलानि धात्री खर्जूरपौष्करपरूषक
नारिकेरं ॥ सौभांजनं च कुलकं नवतालसस्यं द्राक्षाफलानि मिषयोपि च माक्षिमं
पं ॥ सिंहास्यपत्रमजगोमहिषीघृतं च च्छागोद्भवं च तदुपस्करमत्र तैलं पौमत्स्यंडिका
सितशिरिलीमदिरारसालाकर्पूरकं मृगमदः सितचंदनं च ॥ संदर्शनं मृगदृशामपि
हेमचूर्णं मुक्तामणिप्रचुरभूषणधारणं च ॥ होमः प्रदानममरद्विजपूजनानि।
दिव्यान्नपानमपि पथ्यगणः क्षयार्त्तेः ॥ अथापथ्यमाह ॥ विरेचनं वेगविधार ॥३६१॥

लं च स्नानं स्त्रियं स्वेदनमंजनं च प्रजागरं साहसकर्मसेवां रूक्षान्नपानं विषमाशनं च
तांबूलकालिंगकुलत्थमाषरसोनवंशांकुररामठानि ॥ अम्लानि तिक्तानि कषायका
णि कटूनि सर्वाणि च पत्रशाकं ॥ क्षारान्नविरूढान्नशनानि बिंबीकर्कोटकं चापि वि
दाहि सर्वं ॥ कटित्वकं कौसुममपि क्षयेषु विवर्जयेत्सं तततमप्रमतः ॥ इति राजयक्ष्मउरः
क्षतचिकित्सा ॥ अथ कासनिदानं तत्र कासस्य निदानपूर्वकं सामान्यं लक्षणमाह
धूमोपघाताद्रजसस्तथैव व्यायामरूक्षान्ननिषेवणाच्च ॥ विमार्गगत्वादपि भोज
नस्य वेगावरोधात्क्षवथोस्तथैव ॥ १ ॥ प्राणो ह्युदानानुगतः प्रदुष्टः संभिन्नकांस्यध्व
नितुल्यघोषः ॥ निरेति वक्त्रात्सहसा सदोषो मनीषिभिः कास इति प्रदिष्टः ॥ २ ॥
धूमोपघातात् धूमेन कंठप्रविष्टेन कंठस्योपघातात् ॥ रजसः कंठप्रविष्टाः दे

विमार्गगत्वं च भोजनस्यातिद्रुतहारादिना | वेगावरोधात् मलादिवेगावरोधात् || तेन
हि वायुरूर्ध्वंगतः स्यात् || क्षवथोरपि वेगधारणात् || सः दोषः तादृक्प्राणानिलरूपः
मनीषिभिः कास इति प्रदिष्टः निर्दिष्टः || कसनं कासः || भिन्नस्वरः कासति शुष्कमेवेति
सुश्रुतवचनात् || कासति शिरः कंठादूर्ध्वं गच्छति वायुरिति वा कासः | कसि गतिशा
सनयोरित्यस्मात् || १ || २ अथ तस्य संख्यामाह || पंचकासाः स्मृता वात पित्त श्लेष्म
क्षतक्षयैः || क्षयायोपेक्षिताः सर्वे बलिनश्चोत्तरोत्तरं || ३ क्षयाय राजयक्ष्मणे || ३ ||
अथ पूर्वरूपमाह || पूर्वरूपं भवेदेषां शूकपूर्णगलास्यता || कंठे कंडूश्च भोज्यानामव
रोधश्च जायते || ४ भोज्यानामवरोधः कवलगिलने कंठव्यथा || ४ अथ वातिकस्य
कासस्य स्वरूपमाह || हृच्छंखमूर्धोदरपार्श्वशूली क्षाममाननः क्षीणबलस्वरौजाः

प्रसक्तवेगस्तु समीरणेन भिन्नस्वरः कासति शुष्कमेव ॥५॥ शंखौ ललाटैकदेशौ क्षा
माननः शुष्कमुखः घातक्षोभेण ॥ प्रसक्तवेगः सततकासवेगः ॥ शुष्कं श्लेष्मादिष्ठी
वनरहितं ५ ॥ अथ पैत्तिकस्य कासस्य स्वरूपमाह ॥ उरोविदाहज्वरवक्त्रशोषैरभ्य
र्द्दितस्तिक्तमुखस्तृषार्त्तः ॥ पित्तेन पीतानि वमेत्कटूनि कासेत्स पांडुः परिदह्यमानः
६ ॥ अभ्यर्द्दितः पीडितः ॥ स पांडुः पांडुरोगयुक्तः ॥ ६ ॥ अथ श्लैष्मिकस्य कासस्य स्वरूप
माह ॥ प्रलिप्यमानेन मुखेन सीदन् शिरोरुजार्त्तः कफपूर्णकंठः ॥ अभक्तरुक्गौरव
कंडुयुक्तः कासेद्भृशं सांद्रकफः कफेन ॥ ७ प्रलिप्यमानेन मुखेन श्लेष्मालिप्तेन मु
खेन चोपलक्षितः ॥ सीदन् गात्रावसादयुक्तः ॥ न भक्ते रुक् रुचिर्यस्य ॥ कंडूः कंठ एव
७ ॥ अथ क्षतकासस्य निदानपूर्विकां संप्राप्तिमाह ॥ अतिव्यवायभाराध्वयुद्धाश्व

॥१६३॥

गजनिग्रहेः॥ हृत्क्षस्योरःक्षतं या पुर्ग्रहीत्वा कासः समावहेत्॥ ५ अथ गजयोर्निग्रहो दम

नं॥ ५ अथ तस्य लक्षणमाह सपूर्वकासे तेष्ठुष्कं ततः ष्ठीवेत्स शोणितं॥ कंठेन रुजतात्य

र्थं विहृग्नेनेव चोरसा॥ ये सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना॥ दुःखस्पर्शे

न शूलेन भेदपीडाभितापिना॥ १० पर्वभेदज्वरश्वासतृष्णावैस्वर्यपीडितः॥ पाराव

त इवाकूजन् कासवेगात्क्षतोद्भवात्॥ ११ ष्ठीवेत्स शोणितमिति कासाभिघातेन हृद

यस्य विदारणात्॥ कंठेनेत्यकपलक्षणोत तीया॥ रायमुरसेति॥ विहृग्नेनेव सूचीभि

रिव तुद्यमानेन शूलिना दुःखस्पर्शेन चोरसेति संबंधः॥ भेदपीडाभितापिनेति शू

ल विशेषणं पारायत इवस्ततः भवतीति शेषः॥ टी॥१०॥११॥ अथ क्षयकासस्य नि

दानपूर्विकां संप्राप्तिमाह॥ विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात्॥ घ ॥१६३॥

णिनां शोचतां नराणां व्यापन्नेग्नौ त्रयो मलाः ॥ कुपिताः क्षयजं कासं कुर्युर्देहक्षयप्रदं ॥ १२ ॥
घृणिनां विचिकित्सायुक्तानां ॥ शोचतां आहाराभावात्कुपितेन वायुनाग्नेस्य
क्षयात् दोषत्रयप्रकोपः परस्परं ॥ क्षयजं शुक्रादिधातुक्षयजं ॥ न तु राजयक्ष्मजं ॥ त्रि
दोषजेपि राजयक्ष्मणि कासो यतः कफेनैवाक्रियते ॥ यदुक्तं ॥ कासः कंठस्य चोद्ध्वंसो
विज्ञेयः कफकोपतः इति ॥ क्षयकासस्तु त्रिदोषज इति तस्माद्ययं भिन्नः ॥ ननु कासा
देव क्षयो जायते ॥ तत्कथं क्षयजः कासः ॥ उक्तं हि कासात्संजायते क्षय इति ॥ उच्यते ॥
दृष्टो हि परस्परं व्यक्तिभेदेन कार्यकारणभावो बहुशः ॥ यथाप्रोक्तीतिसारावग्निमां
द्यादिति ॥ १२ ॥ सगात्रशूलज्वरदाहमोहान् प्राणक्षयं चोपलभेत कासी ॥ शुष्यन्
विनिष्ठीवति दुर्बलस्तु प्रक्षीणमांसो रुधिरं सपूयं ॥ तं सर्वलिंगं भृशदुश्चिकि

॥ १६४ ॥

स्यं चिकित्सितं ज्ञाः क्षयजं वदंति ॥ १३ ॥ सपूयं रुधिरं विनिष्ठीवन्तीति संबंधः ॥ १३ ॥ अथा
साध्यसाध्ययाप्यत्वमाह ॥ इत्येवं क्षयजः कासः क्षीणानां देहनाशनः ॥ साध्यो बलवतां
वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ॥ १४ ॥ एवं क्षतोत्थित इति क्षतोत्थितः कासः क्षीणानां नो
म साध्यः बलवतां साध्यो वा याप्यो वा स्यादित्यर्थः ॥ १४ ॥ नवौ कदाचित्सिध्येतामपि पाद
गुणान्वितौ ॥ स्थविराणां जराकासः सर्वो याप्यः प्रकीर्तितः ॥ त्रीन् पूर्वान् साधयेत्सा
ध्यान् पथ्यैर्याप्यांस्तु यापयेत् ॥ १५ ॥ सिध्येतां क्षतजक्षयजौ ॥ पादगुणान्वितौ सद्
यः सद्वैद्यजसम्परिचारकयुक्तस्य सदातुरस्य जातौ ॥ स्थविराणां वृद्धानामित्येकोपि
जराशब्दोपादानं जरानिमित्तधातुक्षयजं ॥ एवं सर्वो वातादिकासो याप्यः केवलवाता
दिदोषजनितस्तु साध्य इति बोधनार्थं ॥ अत एवाग्रे त्रीन् पूर्वानित्यादि वक्ष्यते ॥ १६४ ॥

१५। स्वल्पोपिकासस्तुउपेक्षणीयोनभवतिकिंतुशीघ्रंप्रतिकरणीयःस्यात्॥ ज्वरारोच
कहृच्छ्वासस्वरभेदक्षयादयः॥ भवंत्युपेक्षिताद्यस्मात्तस्मात्तंत्वरयाजयेत्॥३६॥ इति
कासनिदानं॥ अथकासचिकित्सा॥ मरिचंकर्षमात्रंस्यात्पिप्पलीकर्षसंमिता॥ अर्द्ध
कर्षोयवक्षारःकर्षद्वयंचदाडिमं॥ एतच्चूर्णीकृतंयुंज्यादष्टकर्षगुडेनहि॥ प्राणा
प्रमाणांगुटिकांकृत्वावक्त्रेविधारयेत्॥ अस्याःप्रभावात्सर्वेपिकासायांत्येवसंक्ष
यं॥ इतिमरिचादिगुटिका॥ सपीप्पलीपुष्करमूलपथ्याशुंठीसटीमुस्तकसूक्ष्मचूर्णैः
गुडेनयुक्तागुडिकाप्रयोज्याश्वासेषुकासेष्वभिवर्द्धितेषु॥ तद्वभक्षकंटकारीस्वरसे
चपलारजोमिश्रं॥ यःपिबतितस्यकासाःसश्वासानाशमुपयांति॥ हरीतकीकणा
शुंठीमरिचंगुडसंयुतं॥ कासघ्नोमोदकःप्रोक्तःपरंचानलदीपनः॥ त्वक्क्षीरीपिप्प

लीलाजाद्राक्षाजलदशर्कराः॥ सर्पिर्मध्ववलेहोयंपित्तकासविनाशनः॥ स्वरसःशृंगवे
रस्यपीतःक्षौद्रसमन्वितः॥ कफकासप्रतिश्यायश्वासकासानाशुनिवारयेत्॥ वर्द्धमान
पिप्पल्यपिदेया॥ ज्वरोपद्रवप्रसंगेनकासश्वासयोर्ज्वराधिकारेयेउक्तास्तेपिसामा
न्यकासेविधेयाः॥ ज्वराधिकारोक्तंतालीसाद्यंचूर्णमपिदेयं॥ कट्फलंमुस्तकंति
क्तासटीशृंगीचपौष्करं॥ चूर्णमेषांमधुयुतंशृंगवेररसेनवा॥ लिह्याज्ज्वरहरंकंठ्यं
कासश्वासारुचीर्जयेत्॥ वायुच्छर्दितथाशूलंक्षयंचैवव्यपोहति॥ इतिकट्फलादि
चूर्णं॥ व्योषाम्लवेतसंचव्यंतालीसंचित्रकंतथा॥ जीरकंतितिडीकंचप्रत्येकंकर्षभा
गिकं॥ त्रिसुगंधंत्रिशाणंस्याद्गुडःस्यात्कर्षविंशतिः॥ सर्वमेकत्रसंकुर्याद्वटिकां
कर्षसंमितां॥ भक्षयेत्प्रातरुत्थायसर्वकासान्व्यपोहति॥ पीनसंश्वासमरुचिं

स्वरभेदं व्यपोहति ॥ इति व्योषादिगुटिका ॥ लवंगं पिप्पली जातीफलं कर्षमितं पृथक्
कर्षद्वयं च मरिचं शुंठी शोडषकार्षिकी ॥ सितासर्वैः समा देया चूर्णं कासं ज्वरं हरे-
त् ॥ प्रमेहारोचकाश्वासवन्हिमांद्यामयानपि ॥ ग्रहणीगुल्मरोगांश्च हंति शीघ्रं
न संशयः ॥ इति लवंगादिचूर्णं ॥ दरदं मरिचं मुस्तं टंकणं च विषं समं ॥ जंबीराद्भि-
श्च संमर्द्य कुर्यान्मुद्गनिभां वटीं ॥ आर्द्रकस्य रसेनैका कासं श्वासं व्यपोहति ॥ इति
दरदादिगुटी ॥ मरिचमुस्तककुष्ठवचाविषं सममयो परिगृह्य तु पिष्य च ॥ विम-
लकार्द्ररसेन वटीकृता कसनशूलकफामयनाशिनी ॥ प्रसूतिरोगं ग्रहणीं नाशये-
च्च लोकोपमा ॥ इति द्वितीयमरिचादिगुटी ॥ पारदं गंधकं शुद्धं मृतं लोहं च टंकणं
रास्नाविडंगत्रिफलादेवदारुकटुत्रयं ॥ अमृतापत्रकं क्षौद्रं विषं तुल्यानि दापयेत्

१६६

त्रिगुंजः सर्वकासघ्नोज्वरान्नेचकमेहनुत् ॥ इतिपारदादिचूर्णं ॥ कर्पूरमर्द्धकर्षं मृगमद
मथिदेवकुसुमयुगं ॥ मरिचकरणाक्षकुलींजनमेकैकं प्रक्षिपरिमांसं चूर्णं ॥ दाडिमफ
लवल्कलपलनखिलसममेवदिरसारमवचूर्ण्य ॥ वटिकामुद्गसमानाकृताध्ताःस्ये
कफघ्नीस्यात् ॥ इतिकफघ्नीवटी ॥ शुल्वंसूतसमंद्वयोरपिसमोगंधस्तदर्द्धः पुनस्ता
लंस्यार्द्धंशिलापुतोविरचयेपिष्टेतितकज्जली ॥ लिप्तातामृदजानिमार्त्तिकदृढाम
त्रे ॥ निधायाथतत्पाच्यंसैकतयंत्रिकेद्वुदिवसंभीतंस्वतोनिहरेत् ॥ तत्कासघ्नस
नाग्निमांद्यगदजातेकान्तिपांडुमयघ्नीहोरः प्रतिरोधकोथमरुतोयुक्त्याजयेद्यो
जितं ॥ वहन्नद्वंद्वमितंकणामधुयुतंक्षीरंदत्वातपिवापुक्तंसर्वकफामयघ्नमचि
राघ्नसोमनाथाभिधं ॥ इतिसोमनाथताम्रं ॥ रसकर्हमाभयाक्षाटरूपभार्ग्यः

१६६

क्रमोत्तरं ॥ तत्समं खादिरं सारं चंचूलक्काथभावितं ॥ एकविंशतिवारं च मधुना का
सकर्त्तरी ॥ कासे श्वासं क्षयं हिक्कां हंत्येषा कासकर्त्तरी ॥ अत्र पारदमेतानार्थं तत्समो
नुक्तोपि गंधको देयः ॥ इति कासकर्त्तरी ॥ प्रस्थं विभीतकानामस्थीनि विहाय साधये
द्जामूत्रे ॥ तेहवद्यमवतेहो मधुसहितश्वासकासहरः ॥ इति विभीतकावतेहः ॥
समूलपत्रशाखायाः कंटकार्या रसाष्टकं ॥ घृतप्रस्थं वचाव्योषविडंगसटिचित्रकैः
सौवर्चलयवक्षारबिल्वामलकपुष्करैः ॥ सीहास्वबृहतीपथ्यायवानीदारुदाडिमैः
द्राक्षापुनर्नवाचव्यवचापात्वामलावेतसैः ॥ शृंगीतामलकीभार्गीरास्नागोक्षुरकैः
पचेत ॥ कल्कैः पादांशकैस्तत्तु कासश्वासहरं परं ॥ इति कंटकारीघृतं ॥ समूलकंटका
रीं च पत्नायपलाजटा ॥ अपामार्गस्य बीजानि जीरं सामुद्रिकं तथा ॥ मधुना लेह

॥१६७॥

पेत्सर्वंष्ष्यांसकासहरंपरं ॥ उरःक्षतेक्षयेतीव्रेकफेरक्तंवमीषुच ॥ इतिक्षुद्रावलेहः
वासातुलामथगुलोचनीरेविपाच्यतत्पादजलेनसार्धं ॥ क्षुन्नाठकंतद्विपचेत्त्रि
ग्रानांसिताप्रयोज्यालकतस्यतुल्या ॥ ततःसमुत्तोर्ध्वपलानिचात्रौक्षौद्रस्यचद्वे
क्विलवंग्राजापाः ॥ क्षिपेत्तथामागधिकापलार्द्धपलंचतुर्जातमथंप्रयोज्यं ॥ योज्यंप
लार्द्धकसनेचखासेक्षयेजपित्तेकफपीनसेषु ॥ हृद्रोगकार्श्येकिलविद्रधौचउरः
क्षतेशोणितवांतिकोपे ॥ इतिवासावलेहः ॥ कटुत्रिकाछिन्नलताकृष्णानुफलत्रि

सर्पिर्गुडूचीवृषकंटकारीकाथेनकल्केनचसिद्धमेतत ॥ पेयंपुराणज्वरकासशूलध्वा
साग्निमांद्यगुल्महलीमकेषु ॥ इतिगुडूचीसिंहास्यघृतं ॥ वृषानिंबामृताव्याघ्रीपटोला ॥१६७॥
नांसतेनच ॥ कल्केनपक्वंसर्पिस्तुनिहन्याद्विषमज्वरं ॥ कासंश्वासंसतत्राहिकांवा
तरक्तंभगंदरं ॥ इतिपंचतिक्तकंघृतं

क्राथे द्वभवं सरास्नं ॥ सशर्करं चूर्णमिदं हि सेव्यं कासाष्टीलाहृदग्लानलारव्यं ॥ इतिक
टुत्रिकादिचूर्णं ॥ शृंगिनिमागधिकाक्षमहौषधैरचितचूर्णमिदं मधुनाप्लुतं हर
तिकासमयं दरमाततं विविधदोषहरं च निषेवितं ॥ पिप्पलीमूलादिचूर्णं ॥ पुष्पा
क्षयवह्निजसमः खदिरस्य सारो वंबूलसंभवकषायकमिश्रितश्च एषां कृताच
वटिकाप्रहरान्त्रयुक्ता कासं निहंति कफतां जठराग्निमांद्यं ॥ इति लवंगादिवटि
का ॥ अथ पथ्यमाह ॥ स्वेदो विरेचनं छर्दि धूमपानं समौषिताः ॥ शालिषष्टिक
गोधूमश्यामाकयवकोद्रवाः ॥ ग्राम्यानूपाममाषमुद्गकुलत्थानां रसाः पृथक् ॥
सुरा पुरातनं सर्पिः छागं चापि पयो घृतं ॥ वास्तुकं वायसीशाकं वार्ताकं वालमू
लकं ॥ कंटकारिका समर्दे जीवंती सुनिषण्णकं ॥ द्राक्षा विंबीमातुलिंगं पौष्करं

॥ १ हि ॥

वासकं त्रुटिः ॥ गोमूत्रं तण्डुलं पथ्या व्योषं मुस्तोदकं मधु लाजा दिवसनिद्रा च तप्तान्नानि यानि च ॥ पथ्यमेतद्यथादोषमुक्तं कासगदातुरे ॥ अथापथ्यमाह ॥ वस्तिं नस्यं मस्रजोक्षं व्यायामं दंतघर्षणं ॥ आतपं दुष्टपवनं रजो मार्गनिषेवणं ॥ विष्टंभीनि विदाहीनि रूक्षाणि विविधानि च ॥ शाकं मत्स्योद्गारकासवमिवेगविधारणं ॥ मत्स्यं कंदं सर्षपं च तुंबीफलमुपोदिकां ॥ दुष्टांबुनानुपानं च विरुद्धान्यशनानि च ॥ गुरु शीतं चान्नपानं कासरोगी परित्यजेत् अथ धूमपानमाह ॥ मनःशिलालसकासीसं तीक्ष्णं मांसी सुराह्वयं ॥ गंधकं निंबपत्रं च निर्गुंडी सुरदारु च ॥ गुडसर्पिः समं सिप्तं निर्धूमांगारकोपरि ॥ घटं त्वेषं परं कं देयं तस्य छिद्रं तु कारयेत् ॥ तेन छिद्रेण तद्धूमं नाडीयंत्रेण पाययेत् ॥ इति धूमपानं ॥ इतिकासचि ॥ १ हि ॥

किल्सा ॥ अथ हिक्कानिदानं ॥ तत्र हिक्काया विप्रकृष्टं निदानमाह ॥ विदाहिगुरुविष्टंभि
रूक्षाभिष्यंदिभोजनैः ॥१॥ शीतपानाशनस्नानरजोधूमातपानिलैः ॥ व्यायामक
र्मभाराध्ववेगाघातापतर्पणैः ॥ हिक्काश्वासश्च कासश्च नृणां समुपजायते ॥२
शीतशब्दः पानादिभिस्त्रिभिः संबध्यते ॥ रजोधूलिः साधूमवत्तास्याप्रवेशका
रणं ॥ व्यायामकर्मधनुराकर्षणादिव्यापारः ॥ वेगाघातो मलादिधारणं ॥ अपतर्प
नि णमनशनादि ॥ कासश्चेति पुनरुक्तिरेकोदानत्वप्रतिपादनार्थं ॥१॥२ अथ तस्याः
सामान्यलक्षणमाह ॥ मुहुर्मुहुर्वायुरुदेति सस्वनो यकृत्प्लिहांत्राणि मुखादि
वाक्षिपन् ॥ सघोषवानाशु हिनस्त्यसून्यतस्ततस्तु हिक्केत्यभिधीयते बुधैः ॥३
वायुरत्र सोदानः प्राणो वोद्धव्यः ॥ उदेति ऊर्ध्वं याति ॥ सस्वनो हिगिति शब्दवान्

॥ १ हि॰ ॥

ऊर्ध्वगमनं विश्लिनष्टि ॥ पक्कादित्वादि ॥ हिहनशब्दोप्यस्ति ॥ दीर्घत्वविकस्यात् ॥ मु
खादितिल्यपूर्तो पेपंचमी तेनपक्वहिहां आशिमुखमानी यश्चाक्षिपन् निस्सा
रयन्नित्यर्थः ॥ सवायुः दोषज्ञानदोषोत्र कफस्तद्यान ॥ वायुक फेनानुगतइति संप्राप्ते
हिनस्तीति हिक्का पृषोदरादित्वाद्रूपसिद्धिः ॥ हिगितिकायतिशब्दं करोतीति हिक्के
ति श्लाघ्यिकाः ॥ अथतस्यापूर्वरूपमाह ॥ कंठोरसोर्गुरुत्वं च वदनस्य कषायता ॥
हिक्कानां पूर्वरूपाणि कुक्षेराटोपएव च ॥ ४ वदनस्य कषायता वातेन ॥ नतुकफान्मा
धुर्य्यं व्याधिप्रभावात् ॥ ५ ॥ अथतासां भेदं संप्राप्तिं चाह ॥ वायुः कफेनानुगतः पंच
हिक्काः करोति ॥ अन्नजां यमलां क्षुद्रां गंभीरां महतीं तथा ॥ ६ ॥ तत्रान्नजालक्षणमाह ॥
पानान्नैरतिसंयुक्तैः सहसा पीडितोऽनिलः ॥ हिक्कयत्यूर्ध्वगो भूत्वा तां विद्यादन्न

॥ १ हि॰ ॥

जांभिषक्॥ ७ ॥ अनिलः प्राणो वायुः॥ हिक्कयति हिक्कां करोति॥ अन्नजादीनां साध्यत्वे

न प्राशस्यात् पूर्वमभिधानं॥ ७ ॥ अथ यमलालक्षणमाह॥ चिरेण यमलैर्वेगैर्या हि

क्का संप्रवर्त्तते॥ कंपयंती शिरो ग्रीवां यमलां तां विनिर्दिशेत॥ ८ कंपयंती शिरो ग्रीवं

मित्यपलक्षणं॥ तेन चरकोक्तप्रलापवमितृष्णादयो बोद्धव्याः॥ ८ ॥ अथ क्षुद्रा लक्ष

णमाह॥ विकृष्टकालैर्या वेगैर्मंदैः समभिवर्त्तते॥ क्षुद्रिका नाम सा हिक्का जत्रुमूलात्

प्रधावति॥ ९ ॥ विकृष्टकालैश्चिरेण॥ जत्रुः कक्षोरसोः संधिरिति जैज्जटः॥ ९ ॥ अथ गं

भीरालक्षणमाह॥ नाभिप्रवृत्ता या हिक्का घोरा गंभीरनादिनी॥ अनेकोपद्रववती गं

भीरा नाम सा स्मृता॥ १० ॥ अनेकोपद्रववतीतृष्णाज्वरादियुक्ता॥ १० ॥ अथ महतीमा

ह॥ मर्माणि पीडयंतीव सततं या प्रवर्त्तते॥ महाहिक्केति सा ज्ञेया सर्वगात्रप्रकंपि

॥ १७० ॥

नौ ॥११॥ मर्माणि लिवस्ति हृद्वस्तिशिरःप्रभृतीनि ॥११॥ अथासाध्यत्वमाह । आयम्यते हि
क्किनो यस्य देहो दृष्टिश्चोर्ध्वं नाम्यते यस्य नित्यं ॥ क्षीणोऽन्नद्विट् क्षौति यश्चातिमात्रं
तौ द्वौ चान्यौ वर्जयेद्धिक्कमानौ ॥१२॥ आयम्यते विस्तार्यत इव ॥ दृष्टिश्चोर्ध्वं भवतीति
शेषः ॥ नाम्यते आकुंच्यते देह इति संबंधः ॥ क्षौति क्षिक्कति ॥ तौ द्वाविति आयम्यत
इत्यादिना नित्यमेवयं तेनैको हिक्कमानः ॥ क्षीण इत्यादिनातिमात्रमित्यंतेनापरः
तौ द्वौ ॥ अन्यौ च गंभीरया महत्या च हिक्कमानौ ॥ वर्जयेत् त्यजेत ॥१२॥ अपरं च ॥ अति
संचितदोषस्य भक्तच्छेदकृशस्य च ॥ व्याधिभिः क्षीणदेहस्य वृद्धस्यातिव्यवायिनः
१३ ॥ आसां या या समुत्पन्ना हिक्का हन्त्याशु जीवितं ॥ यमिका च प्रलापार्त्तिमोहतृष्णा
समन्विता ॥१४॥ अथ यमिकायाः साध्यत्वमाह । अक्षीणश्चाप्यदीनश्च स्थि

॥ १७० ॥

रुध्यात्विंद्रियसंश्रयः ॥ तस्य साधयितुं शक्या यमिका हंत्यतोन्यथा ॥ ३५ ॥ अदीनः प्रस
न्नमनाः ॥ ३५ ॥ इति हिक्कानिदानं ॥ अथ हिक्काचिकित्सा ॥ रेणुकापिप्पलीक्वाथो हिं
गुकल्केन संयुतः ॥ पानादेव हि पंचापि हिक्कां नाशयति क्षणात् ॥ धात्री च मागधी
शुंठीक्वाथश्चैषां सितायुतः ॥ हिनस्ति रुद्रयोद्भूतां हिक्कां प्राणापनोदिनीं ॥ प्राणा
वरोधतर्जनविस्मापनमाषिकाभिश्च ॥ तैर्द्रैः कथाप्रयोगैः शमयेद्धिक्कां मनोभि
घातैश्च ॥ हिक्कार्त्तस्य पयः छागं हितं नागरसाधितं ॥ मधुकं मधुसंयुक्तं पिप्पलीश
र्करान्विता ॥ नागरं गुडसंयुक्तं हिक्काघ्नं नावनत्रयं ॥ धूमो माषनिष्पाराजो युतश
णत्वक्यंभयो हंत्यतं श्वासोर्ध्वानितका सहहुलरजो हिध्माः समस्तास्त्वपि ॥ कटु
त्रिकयवासकटफलकंकारवीपौष्करैः सच्छंगिभिरतिद्रुतं मधुयुतो वलेहो जयेत्

॥१७१॥

सहिध्मकसतंकफंच्यसनमंभसासिंधुजेमदत्तमपिनावनेऽरुदितिसर्वहिक्कापहं॥
चंद्रनघ्नूरस्यवीजानिक्षिपेदबुधोजले॥ पद्मान्दुनिगृह्यात्ततोवाससिंधालयेत॥
हिक्कातियेगविकलस्तज्जलंपलमात्रया॥ पिवेल्लुःनःपुनस्थापिहिक्काश्वासघ्नंप्रणास्य
ति॥ सिखिपिछभस्मकृष्णाचूर्णंमधुमिश्रितंमुहुर्लिहं॥ हिक्कांहंतिप्रवलांश्वासं
चैवातिदुस्तरांछर्दिं॥ कोलमज्जांजनंलाजातिक्ताकांचनगैरिकं॥ कृष्णाधात्रीसिताशुं
ठीकासीसंदधिनामच॥ पाटल्याःसफलंपुष्पंकृष्णाखर्जूरमुस्तकं॥ षडेतेपादिक्का
लेहाहिक्काघ्नामधुसंयुताः॥ स्तन्येनमक्षिकाविष्टानस्येवालक्तकांबुना॥ योन्यंहिक्का
भिभूतेस्पोस्तन्यंवाचंदनान्वितं॥ मधुसौवर्चलोपेतंमातुलुंगरसंपिवेत॥ हिक्कार्त्तोम
धुनातिघातशुंठीधात्रीकणान्वितां॥ पाटलाफलतोयेनक्षौद्रेणचसमन्वितं॥

॥१७१॥

हेमभस्मनिहंत्येवहिक्कापंचसुदारुणाः ॥ रुद्रकाजैरिकाभ्यांचमुक्ताभस्मतथैवच ॥ वी
जपूरस्यतोयेनतामूंतद्वत्समाक्षिकं ॥ हेमयुक्तार्ककांतानांभस्मयद्वत्समन्वितं ॥ वीज
पूररसंक्षौद्रसौवर्चलसमन्वितं ॥ हंतिहिक्काशतेसत्यमेकमात्राप्रयोगतः ॥ पटोलानां
फलंवापिवेज्जूरीमुस्तकेतथा ॥ तिहोहिक्काविनाशाययहितोयंमधुनायुतः ॥ मातुलुंग
रसोताजाघृतसैंधवयाचितः ॥ हृद्दुःखेहापितीहिक्कातस्मिनभक्तेनिवर्त्तते ॥ अथ
पथ्यमाह स्वेदनंवमनंनस्यंधूमपानंविरेचनं निद्रास्निग्धानियान्नानिमृदूनिच
लवणानिच जीर्णाःकुलत्थागोधूमाःशालयःषष्टिकायवाः ॥ वकंकपित्थंतत्पूर्णंपटोलं
वालमूलीकं ॥ उष्णोदकंमातुलिंगंमाक्षिकंसुरभीजलं ॥ अन्नपानानिसर्वाणिवातश्ले
ष्महराणिच ॥ शीतांबुसेकःसहसात्रासोविस्मापनंभयं ॥ स्वधर्मित्तमदाघ्नाराँ

॥१७२॥

प्राणायामनिषेवणं ॥ एतत्पथ्यं समुद्दिष्टं हिक्कार्त्तानां भिषग्वरैः ॥ अथापथ्यमाह ॥ विष्टंभी
नि विदाहीनि रूक्षाणि कफदानि च ॥ निष्पावं राजमाषं च वारिजानूपजामिषं ॥ अवि
दुग्धं दंतकाष्ठं मत्स्यान्सर्षपकांस्तथा ॥ अम्लं तुंबीफलं कंदं तैलभृष्टमुपोदिकां ॥ गुरुशी
तं चान्नपानं हिक्कारोगी विवर्जयेत् ॥ इति हिक्काचिकित्सा ॥ अथ श्वासनिदानं तत्र त
स्य विप्रकृष्टं निदानमाह ॥ यैरेव कारणैर्हिक्का देहिनां संप्रवर्तते तैरेव बहुभिः श्वासो
व्याधिर्घोरः प्रवर्तते १ अथ श्वासस्य भेदानाह ॥ महोर्ध्वछिन्नतमकक्षुद्रभेदैस्तु पंच
धा ॥ भिद्यते स महाव्याधिः श्वास एको विशेषतः ॥ २ एको विशेषत इति श्वासत्वेन
एक एव स न विशेषं हेतुलिंगभेदं प्राप्य पंचधा भिद्यते ॥ पंचसु च श्वासत्वं वेगव
दूर्ध्वयातत्वं ॥ यदुक्तमन्यैः ॥ श्वासस्तु मस्तिक्कोध्मानसमवातोर्ध्वगामितेति २ अथ

॥१७२॥

तस्य पूर्वरूपमाह ॥ प्राग्रूपं तस्य हृत्पीडा शूलमाध्मानमेव च ॥ आनाहो वक्त्रवैरस्यं शंख
निस्तोद एव च ॥३॥ अथ संप्राप्तिमाह ॥ यदा स्रोतांसि संरुद्ध्य मारुतः कफपूर्वकः ॥ वि
ष्वग्व्रजति संरुद्धस्तदा श्वासान्करोति सः ॥४॥ स्रोतांसि प्राणोदकान्नवहानि ॥ कफपूर्व
कः कफः पूर्वं प्रधानं यस्य सः ॥ विष्वग्व्रजति सर्वतो विमार्गगो न याति ॥ संरुद्धः कफेन
रुद्धमार्गः ॥४॥ अथ महाश्वासस्य लक्षणमाह ॥ उद्धूयमानवातो यः शब्दवद्दुःखितो
नरः ॥ उच्चैः श्वसिति संरुद्धो मत्तर्षभ इवानिशं ॥५॥ प्रनष्टज्ञानविज्ञानस्तथा विभ्रांतलो
चनः ॥ विकृताक्ष्याननो बद्धमूत्रवर्चा विशीर्णवाक् ॥ दीनः प्रश्वसितं चास्य दूराद्विज्ञा
यते भृशं ॥ महाश्वासोपसृष्टस्तु क्षिप्रमेव विपद्यते ॥६॥ उद्धूयमानवातः ऊर्ध्वं नीयमा
नो वातो यस्य सः ॥ शब्दवत्तत्श्वसनं यथा भवति तथा ॥ क्रीडके शब्दस्तु देदितुमाह ॥ म

॥१०३॥

नर्थमर्दयद्भिश्चैः श्वसतीत्यन्वयः ॥ सन्नद्धः आनद्धः ॥ आनाहयुक्त इति यावत् ॥ स्तानं सास्त्रं विस्ता
नं तद्दर्शीनिश्वसः ॥ विभ्रांतलोचनश्चंचलाक्षः ॥ विप्लुते स्तब्धे अक्षिणी अंतनेत्रे यस्य सः
नेत्रस्य विभ्रांतविप्लुतत्वे कालभेदादिति जेज्जटः ॥ विशीर्णा वाक् स्खलितं वचनं ॥ दीनः
म्लानः ॥ मारकश्चायं महाश्वासः ॥ ५ ॥ ६ ॥ ७ ॥ अथोर्ध्वश्वासमाह ऊर्ध्वं श्वसिति यो त्यर्थं
नच प्रत्याहरत्यधः ॥ श्लेष्मावृतमुखस्रोतः क्रुद्धगंधवहार्दितः ॥ ८ ऊर्ध्वदृष्टिर्विपश्यंस्तु वि
भ्रांताक्ष इतस्ततः ॥ प्रमुह्यन्वेदनार्तश्च शुष्कास्यो रतिपीडितः ॥ ९ ऊर्ध्वश्वासे प्रकुपिते
ह्यधःश्वासो निरुध्यते ॥ मुह्यतस्ताम्यतश्चोर्ध्वश्वासस्तस्यैव हंत्यसून् ॥ १० सर्वेषु श्वासे
षूर्ध्वश्वसनं ॥ अत्रात्यर्थमिति विशेषः ॥ नच प्रत्याहरत्यध इति तच्छ्वासमधः करोति
दीर्घकालमित्यर्थः ॥ श्लेष्मावृतमुखानि यानि स्रोतांसि तैः क्रुद्धो यो गंधवहस्तेना ॥१०३॥

र्द्दितः ॥ ततस्ततो विपश्यन् इतस्ततो विकृतं पश्यत्स्यादेवं पश्यन् ॥ अथ श्वासो निरुद्धु

ते श्वासो नाधः प्रवर्त्तत इत्यर्थः ॥ अस्यारिष्टमाह ॥ मुह्यत इत्यादि ॥ मुह्यतः मोहं प्राप्नुवतः

ताम्यतः ग्लानिं प्राप्नुवतः ऊर्ध्वश्वासः असून् प्राणान् हंति ॥ ५।८।१० ॥ अथ छिन्न

श्वासमाह ॥ यस्तु श्वसति विच्छिन्नं सर्वप्राणेन पीडितः ॥ न वा श्वसति दुःखार्तो मर्म

छेदरुगर्द्दितः ॥ ११ ॥ आनाहस्वेदमूर्छार्त्तो दह्यमानेन वस्तिना ॥ विप्लुताक्षः परिक्षीणः

श्वसन् रक्तैकलोचनः ॥ विचेताः परिशुष्कास्यो विवर्णः प्रलपन्नरः ॥ छिन्नश्वासेन

विच्छिन्नः स शीघ्रं विजहात्यसून् ॥ १२ ॥ विच्छिन्नं सविच्छेदं ॥ सर्वप्राणेन यावद्बलेन ॥

मर्मच्छेदरुगर्द्दितः हृदयशिरः छेदवेदनयेव पीडितः ॥ पित्ताद्दह्यमानेन वस्तिना उप

लक्षितः ॥ एतेन वातस्य पित्तानुबंधो दर्शितः ॥ विप्लुताक्षः अश्रुपूर्णनेत्रः ॥ रक्तैक

॥ १७४ ॥

लोचनत्वं व्याधिस्वभावात् ॥ दोषात्तु हृद्योरस्यादिति मधुकोशाकृत् ॥ विचेताः उद्विग्नचितः
विच्छिन्नः पीडितः मोक्षितस्संधिर्वेधो वा ॥ मारुकष्टायं छिन्नश्वासः ॥ ११ ॥ १२ ॥ १३ ॥ अ
थतमकश्वासमाह ॥ प्रतिलोमं यदा वायुः स्रोतांसि प्रतिपद्यते ॥ ग्रीवां शिरश्च संगृह्य श्ले
ष्माणं समुदीर्य्य च ॥ १४ ॥ करोति पीनसं तेन कंठे घुर्घुरकं तथा ॥ अतीव तीव्रवेगं च श्वा
सं प्राणप्रपीडकं ॥ १५ ॥ प्रताम्यति स वेगेन त्रस्यति सन्निरुध्यते ॥ प्रमोहं कासमानश्च
स गच्छति मुहुर्मुहुः ॥ १६ ॥ श्लेष्मण्यमुच्यमानेन भृशं भवति दुःखितः तस्यैव च विमो
क्षांते मुहूर्त्तं लभते सुखं ॥ १७ ॥ तथास्योद्ध्वंसते कंठः कृच्छ्राच्छक्नोति भाषितुं ॥ न चापि निद्रां
लभते शयानः श्वासपीडितः ॥ १८ ॥ पार्श्वे तस्यावगृह्णाति शयानस्य समीरणः ॥ आसी ॥ १७४ ॥
नो लभते सौख्यमुष्णं चैवाभिनंदति ॥ १९ ॥ उच्छ्रिताक्षो ललाटेन स्विद्यता भृशमर्त्तिमान्

विष्टब्धाङ्गो मुहुःश्वासी मुहुश्चैवावधम्यते ॥ २० ॥ मेघांवुशीतप्राग्वातैःश्लेष्मलैश्चावि
वर्द्धते ॥ सयाप्यस्तमकःश्वासो साध्यो वा स्याद्बलवतोत्थितः ॥ २१ ॥ संग्रहव्याख्या ॥ समुदीर्य्य
वर्द्धयित्वा ॥ श्लेष्माणं समुदीर्य्येत्यनेन सामान्यसंप्राप्तिरुक्तस्यापि श्लेष्मणः पुनर
भिधानादिह विशेषेण कारणत्वं बोधयति ॥ पीनसं नासास्रावं ॥ घुर्घुरकं घुर्घुरशब्दं
प्राणप्रपीडकं प्राणाधिष्ठान हृदये प्रपीडकं ॥ प्रताम्यति तमसि प्रविशतीव ॥ वेगेन श्वा
सवेगेन ॥ संनिरुद्धे ते निश्चेष्टो भवतीति चक्रः ॥ संनिरुद्धे श्वास इति शेष इत्याहा
न्यः ॥ तस्यैव श्लेष्मणः सुखं सुखमिव ॥ उद्ध्वंसते व्यथितो भवति ॥ कंडूयत इति वा शया
नः शय्यानिहितांगः ॥ पार्श्व इति कर्मपदं ॥ अवगाहत्वातिपीडयति ॥ उष्मं चैवाभिनंदति इ
त्यनेन तमकी वातकफारब्ध इति बोद्धव्यं ॥ उच्छ्रिताक्ष ऊर्ध्वनाक्षः ॥ स्विद्यता ललाटेनो

॥१७५॥

पलक्षितः ॥ अवधम्यते गजारूढस्येव सर्वगात्रं चाल्यते ॥ १४॥१५॥१६॥१७॥१८॥१९॥२०॥
२१॥ अथ तमकस्यैव पित्तानुबंधजनितज्वरादियोगेन प्रतमकसंज्ञामाह ॥ ज्वरमूर्छापरीतं
तं विद्यात्प्रतमकं भिषक् ॥ ज्वरेण मूर्छा ज्वरमूर्छा तया परीतं यद्वा ज्वरमूर्छाभ्यां परीतं ॥ आ
द्यमिदं ॥ अथ तस्यैवापरं लक्षणं कारणं चाह ॥ उदावर्त्तरजोजीर्णक्लिन्नकायनिरोधतः
तमसा वर्द्धतेत्यर्थं शीतैश्चाशु प्रशाम्यति ॥ मज्जतस्तमसीवास्य विद्यात्प्रतमकं तु तं ॥ २२
उदावर्त्तो रोगः ॥ रजो धूलिः ॥ अजीर्णमामादि क्लिन्नविदग्धं ॥ कायवेगानां निरोधः ॥
यद्वा क्लिन्नकायो वृष्टो नरः इत्याहुः ॥ निरोधो वेगनिरोधः ॥ यद्वा कुयोगिनां कुंभकादिरूप
वातनिरोधः ॥ तमसा अंधकारेण मानसदोषेण वा ॥ अत्यर्थं ज्वरकारणापेक्षया वि
शेषेण ॥ वातकफारब्धः पित्तसंबंधात् शीतैरुपशाम्यतीत्याहुः ॥ अनेनोदावर्त्तेत्यादि ॥ १७५ ॥

नाप्रतमकस्यउपसर्गोनाहुरितिजैज्जटः ॥२२॥ अथक्षुद्रश्वासमाह ॥ रूक्षायासोद्भवः
कोष्ठेक्षुद्रोवातउदीरयेत् ॥ क्षुद्रश्वासोनसोत्यर्थंदुःखेनांगप्रबाधकः ॥२३॥ हिनस्तिन
चगात्राणिनचदुःखोयथेतरे ॥ नचभोजनपानानांनिरुणद्ध्युचितांगतिं ॥२४॥ नेंद्रिया
णांव्यथांचापिकांचिदुत्पादयेद्रुजं ॥ ससाध्यउक्तोबलिनःसर्वेचाव्यक्तलक्षणाः ॥२५॥
रूक्षमल्पपानं ॥ क्षुद्रोल्पनिदानलिंगः ॥ उदीरयेदूर्ध्वंगच्छति ॥ दुःखदुःखप्रदः ॥ सर्वेम
हाश्वासादयोपिच ॥२३॥२४॥२५॥ अथैषांसाध्यत्वादिकलक्षणमाह ॥ क्षुद्रःसाध्यत
मस्तेषांतमकःकृच्छ्रउच्यते ॥ त्रयःश्वासानसिध्यंतितमकोदुर्बलस्यच ॥२६॥ त्रयःश्वा
सामहोर्ध्वछिन्नाः ॥२६॥ अथहिक्काश्वासयोरुपेक्षणात्शीघ्रमवश्यमारकत्वमा
ह ॥ कामंप्राणहरारोगाबहवोनज्वरादयः ॥ तथायथाश्वासहिक्केहरतोजीवमाशुते

॥ ३७ ही ॥

२७ इतिश्वासनिदानं ॥ अथश्वासस्यचिकित्सा ॥ हिक्काश्वासातुरंपूर्वंतैलाक्तंस्वेदयेत्त
ते ॥ स्निग्धैर्लवणयोगैश्च मृदुवातानुलोमनं ॥ ऊर्ध्वाधःशोधनंशक्ते दुर्बलेशमनंमतं
ज्वराधिकारोक्तघोडाचोलीरसोप्यत्रप्रशस्तः ॥ सचार्द्रकरसेनदातव्यः ॥ कृष्णामलक
शुंठीनांचूर्णंमधुसिताघृतं ॥ मुहुर्मुहुःप्रयोक्तव्यंहिक्काश्वासनिवारणं ॥ हिक्काश्वासी
पिबेद्भार्गींसविश्वामुष्णवारिणा ॥ शृंगीकटुत्रिकफलत्रयकंटकारीभार्ङ्गीसपुष्कर
जटालवणानिपंच ॥ चूर्णंपिबेदशिशिरेणजलेन हिक्काश्वासोर्ध्ववातकसनारु
चिपीनसेषु ॥ इतिशृंग्यादिचूर्णं ॥ पारदंगंधकंशुद्धंमृतंलोहंचटंकणं ॥ रास्नाविडं
गत्रिफलादेवदारुकटुत्रयं ॥ अमृतापत्रकंक्षौद्रंविषंतुल्यंसुचूर्णितं ॥ त्रिगुंजंश्वा
सकासार्त्तःसेवयेदमृतार्णवं ॥ इतिअमृतार्णवरसः ॥ सूतार्द्धंगंधकंमर्द्यंयामैः ॥ ३७ ही

वो

कंकन्यकाद्रवैः ॥ द्वयो स्तुल्यं ताम्रपत्रं पूर्वकल्केन लेपयेत ॥ दिनैकं स्थालिकायंत्रे पक्क
मादाय चूर्णयेत ॥ सूर्यावर्त्तो रसो नाम द्विगुंजाः श्वासजिद्भवेत ॥ इति सूर्यावर्त्तरसः
रसं गंधं विषं चैव टंकणं च मनःशिला ॥ एतानि एकमात्राणि मरिचं चाष्ट टंककं ॥
एकैकं मरिचं दत्वा खल्वे सूक्ष्मं विधाय च ॥ कटुत्रयं टंकषट्कं दत्वा पश्चाद्धि चूर्णये
त ॥ सर्वमेकत्र संचूर्ण्य काचकुप्यां विनिक्षिपेत ॥ गुंजामात्रं प्रदातव्यं पर्णखंडे
न बुद्धिमान ॥ सन्निपाते च मूर्छायामपस्मारे तथा पुनः ॥ अतिमोहत्वमापन्ने नस्यं
दद्याद्विचक्षणः ॥ रसः श्वासकुठारोयं सर्वश्वासनिवारणः ॥ इति श्वासकुठारो
रसः ॥ चूर्णं कूष्मांडमूलस्य पिबेदुष्णेन वारिणा ॥ श्वासान सर्वांस्तथा कासान
शीघ्रमेव निवारयेत ॥ कुलत्थरससंयुक्तं पंचकोलं प्रयुज्यते घृतं हितं श्वासकास

॥१८७॥

ष्ठं कफव्याधिहरं परं ॥ इति कुलत्थघृतं ॥ तैलं दशगुणे सिद्धं गुडाम्पांचे भृंगराजरसे शुभे
पीयमानं पथ्यान्नाद्यं श्वासकासान् व्यपोहति ॥ इति भृंगराजतैलं ॥ कटुतैलं गुडाम्पांच
श्वासो नश्यति तत्क्षणात् ॥ भार्ङ्गीपुष्करमूलं च मधुनाश्वासहं तथा ॥ कुलत्थव्याघ्रि
काशुंठीयासाभिः क्वथितं जलं ॥ पीतं पुष्करसंयुक्तं श्वासकासान् व्यपोहति ॥ शतं पला
नि संगृह्य भार्गीमूलस्य बुद्धिमान् ॥ दशमूल्याः पलशतं पथ्यानां च शतं पचेत् ॥ चतु
र्गुणे जले पादशेषे च वस्त्रगालिते ॥ तुलां गुडस्य निक्षिप्य निक्षिपेदभयाः पुनः ॥ प
चेन्मृद्वग्निना तावद्यावल्लेहत्वमाप्नुयात् ॥ मधुनः प्रपलान्यष्टौ शीते तस्मिन् विनि
क्षिपेत् ॥ पलत्रयं त्र्यूषणांशं चपलमेकं च चित्रकं ॥ त्रिफलां त्रिसुगंधं च पलाक्षारं द्विका ॥१७७॥
र्षिकं ॥ संचूर्ण्यैतानि निक्षिपेत्ततो भूपः प्रयातयेत् ॥ एकां हरीतकीं खादेल्लेहा

द्रुपत्तसंयुतां ॥ घोरान् नाशयते श्वासान् कासान् पंच विधानपि ॥ स्वरवर्णप्रदो ह्येष
जठराग्नेश्च दीपनः ॥ इति भार्ग्यादि हरीतक्यावलेहः ॥ ताम्रमेला तथा नागं सिता
चाकल्लकं तथा ॥ त्वंगमहिफेनं चकर्पूरं जातिपत्रिका ॥ नागवल्लीरसेवक्रागुपि
काचणकोपमा ॥ श्वासक्षयाग्निमंदत्वपंचकासविनाशिनी ॥ इति ताम्रभस्मा
दिगुटिका ॥ कट्फलं कतृणं भार्गी मुस्तं धान्यं वचाभया ॥ शुंठीपर्पटकं श्रृंगी सुरा
ह्वं च जलेश्रृतं ॥ मधुहिंगुयुतं पेयं कासे वातकफात्मके ॥ कंठरोगे मुखे श्वासे हि
क्काज्वरेषु च ॥ इति कट्फलादिश्रृतं ॥ मनःशिलालमर्कस्य ततो दुर्तकं त्रयं ॥ चूर्णं
कृत्वा वह्निमध्ये क्षिप्त्वा धूमं पिबेत्ततः ॥ तांबूलं भक्षयेद्रोगी दुग्धं वापि पिबेन्नरः
शीघ्रं पंचविधाः कासाः क्षयं यांति न संशयः ॥ इति धूमपानं ॥ अथ पथ्यमाह ॥

||१७८||

विरेचनंस्वेदनधूमपानमूछर्दनानिलपनंदिवाच॥पुरातनाःषष्टिकरक्तशालयः
कुलत्थगोधूमयवाःप्रशस्ताः॥पुरातनंसर्पिरजाविमांसंपयोघृतंचापिसुरामधूनि
पटोलवर्त्ताकुरसोनपथ्यानिदिग्धिकावास्तुकतंडुलीयं॥द्राक्षात्रुटिःपौष्करमुस्तवारि
कटुत्रयंगोजनितंचमूत्रं॥अन्नानिपानानिचभेषजानिश्लेष्मानिलघ्नानियानितानि
नि॥प्रदीप्तलोहेनचकंठकूपेदाहोपिचपथ्यासिनिपथ्यवर्गः॥अथापथ्यमाह॥मूत्रो
द्गारछर्दिःक्षुतकासरोधानस्वप्नंचरात्रौदंतकाष्ठमञ्च॥अध्वाभारारोपणंसूर्य्यपा
दाविषंभीनिग्राम्यधर्मौविदाहि॥आनूपानामामिषंतैलभक्षंनिष्पावाञ्ज॥श्लेष्म
कारीणिमाषाः॥रक्तस्त्रावःपूर्ववातोनुपानंमेषीसर्पिर्दुग्धमंभोपिदुष्टं॥म
त्स्याःकंदाःसर्षपाश्चान्नपानंरूक्षंशीतंगुर्वीविपथ्यासिवर्ज्जी॥इतिश्वासचि

||१७८||

क्रिया॥ अथ स्वरभेदनिदानं॥ तत्र स्वरभेदस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह॥
अत्युच्चभाषणविषाध्ययनाभिघातसंदूषणैः प्रकुपिताः पवनादयस्तु॥ स्रोत
स्सु ते स्वरवहेषु गताः प्रतिष्ठां हन्युः स्वरं भवति चापि हि षड्विधः सः॥१॥ अध्ययनं
उच्चैर्वेदपाठः॥ अभिघातः कंठादिदेशे लगुडादिभिः॥ एतैरत्युच्चभाषणादिभिस्त्र
तुभिः संदूषणैरन्यैरपि दुष्टहेतुभिः॥ स्रोतस्सु श्रुत्युक्तेषु चतुर्षु प्रतिष्ठां स्थितिं व
द्धिं वा प्राप्य हन्युः स्वरमिति लक्षणं स स्वरभेदः षड्विधः॥ वातपित्तकफसन्निपातक्ष
यमेदोभवभेदैः॥ श्रुत्युक्तानि स्वरवहानि स्रोतांसि यथा॥ द्वाभ्यां भाषते द्वाभ्यां घो
षं करोतीति॥ भाषणघोषणयोरल्पत्वमहत्वाभ्यां भेदः॥१॥ तत्र वातपित्तकफस्वर
यभेदिनी लक्षणमाह॥ वातेन कृष्णनयनाननमूत्रवर्च्चा भिन्नं शनैर्वदति गर्द

॥३७८॥

भवत्स्वरं च ॥ पित्तेन पीतनयनाननमूत्रवर्च्चो वृष्णादृतेन सच दाहसमन्वितेन ॥ व्याल्लो
फेन सततं कफरुद्धकंठः स्वस्थं घ्राने वदतिचापि दिवाविशेषात ॥ २ ॥ गंद्भवतगंद्भो
यथा उद्देजकं स्वरं वदति तद्वत ॥ गतदाहोत्रवचनसमएरे एववोद्धव्यः ॥ दिवाविशेषा
दिति दिवा सूर्यरश्मिभिः कफस्यासीभावात विशेषाद्धि प्रिषं वदतीत्यर्थः ॥ २ स्त्र
यसन्निपातजक्षयजमेदोजस्वरभेदिनोतक्षणमाह ॥ सर्वात्मके भवति सर्वविका
र संपतं चाप्यसाध्यमृषयः स्वरभेदमाहुः ॥ धूम्येतावोक्षयक्षतेक्षयेमान्फया
त्वस्यादेषुचापि हतवाकपरिवर्जनीयः ॥ अतर्गलं स्वरमतक्षपदं चिरेणमेदोन्व
याद्वदति दिग्धगलस्तृषार्तः ॥ ३ ॥ सर्वविकारसंपतउक्तवातादिस्वरभेदलिंगयो
गः ॥ वाकधूम्येतसद्धमेवनिस्सरति ॥ क्षयमान्फयोछगेच एषुवातादिस्वरभेदे ॥३७८॥

षुमध्येहतवाक्ओजःक्षयाद्वचनाक्षमःपरिवर्जनीयअसाध्यःस्यात्॥अंतर्गतं
गलमध्यरुद्धस्वरंवदति॥स्निग्धगलःमेदसाश्लेष्मणाचातिमृगलः॥तृषार्तः
मेदसाश्लेष्ममार्गावरोधात्॥२॥अथासाध्यत्वमाह॥क्षीणस्यवृद्धस्यकृशस्यचा
पिचिरोत्थितोयश्चसहोपजातः॥मेदःस्विनःसर्वसमुद्भवश्चस्वरामयोयोनस
सिद्धिमेति॥४॥क्षीणस्यक्षयरोगिणः॥कृशस्यक्षीणमांसस्य॥सहोपजातः
जन्मप्रतिबद्धःकाकस्वरइतिलोके॥५॥इतिस्वरभेदनिदानं॥अथस्वरभेदचि
कित्सा॥वातेकोष्णंजलंपेयंभुक्त्वाघृतगुडोदनं॥क्षीरानुपानंपित्तोत्थेपिबेत्सर्पि
रतंद्रितः॥पिप्पलीपिप्पलीमूलंमरिचंविश्वभेषजं॥पिबेन्मूत्रेमतिमानक
फजेस्वरसंक्षये॥मूत्रासृचौमधुनापिबेत्॥अजमोदानिशाक्षारःचित्रकाम

॥१८०॥

तकानि च ॥ लेहोयं मधुसर्पिर्भ्यां स्वरभेदं व्यपोहति ॥ बदरीपत्रकल्कं तु घृतभृष्टं स
सैंधवं ॥ स्वरोपघाते कासे च लेहमेनं प्रयोजयेत् ॥ शर्करामधुमिश्राणि शृता
नि मधुरैः सह ॥ पिबेत्पयांसि यस्योच्चैर्वदतोभिहतः स्वरः ॥ वातादिजनितश्चा
सकासघ्ना ये प्रकीर्तिताः योगास्तानत्र युंजीत यथादोषं चिकित्सकः ॥ ब्राह्मी
वचाभयावासा पिप्पली मधुसंयुता ॥ अस्य प्रयोगात्सप्ताहात्किन्नरैः सह गाय
ति ॥ फलत्रकव्यूषबलायावश्यकचूर्णं निहन्यात्स्वरभेदमाशु ॥ किंवा कुलिंजं व
दनांतरस्थं स्वरामयं हंत्यथ पौष्करं वा ॥ चव्याम्लवेतसकटुत्रयतिंतडीकताली
सजीरकतुगादहनैः समांशैः ॥ चूर्णं गुडत्रिगुणितं त्रिसुगंधयुक्तं वैस्वर्यपी
नसकफारुचिषु प्रशस्तं ॥ रसभस्मार्कलोहस्य भावितस्य त्रिसप्तधा क्षुद्राफ ॥१८०॥

तरसैर्भुंजीत त्याकाय्यीवटीशुभा ॥ मुखेस्याहरते प्रौढं स्वरभंगमसंशयं ॥ गोरक्ष
नाथेन गदितास्वरभंगकृपालुभिः ॥ इति गोरक्षवटी ॥ व्याघ्रीस्वरसविपक्वं रास्ना
वाट्यालगोक्षुरव्योषैः ॥ सर्पिः स्वरोपघातं हन्यात्कासं च पंचविधं ॥ इति व्याघ्रा
दिघृतं ॥ अथ पथ्यमाह ॥ स्वेदो बस्तिर्धूमपानं विरेकः कवलग्रहः ॥ नस्यं भालशि
रावेधो पवालो हितशालयः ॥ गोकंटकः काकमाचीजीवंती बालमूलकं ॥ द्राक्षा
पथ्यामातुलिंगं लशुनं लवणार्द्रकं ॥ तांबूलं मरिचं सर्पिः पथ्यानि स्वरभेदिनां ॥
अथापथ्यमाह ॥ आम्रं कपित्थं च कुलं शालूकं जांबवानि च ॥ तिंदुकानि कषा
याणि वमिं स्वप्नं प्रजल्पनं ॥ अन्नपानं विरुद्धं च स्वरभेदी विवर्जयेत ॥ इति स्वर
भेदचिकित्सा ॥ अथारोचकनिदानं ॥ तत्र सनिदानमरोचकमाह ॥ वातादि

॥३८१॥

भिः शोकभयातिलोभक्रोधैर्मनोघ्नाशनरूपगंधैः ॥ अरोचकाः स्युः परिहृष्टदं
तः कषायवक्त्रश्च मतोऽनिलेन ॥१ अरोचकाः न भोजने रुचिमुत्पादयंतीत्यरोचकाः
व्याधयः ॥ ते च वातादिभेदैः पंचधा ॥ यतो पंचानामेव लक्षणं वक्ष्यंति सुश्रुतेप्यो
क्तं ॥ भक्तोपघातमिह पंचविधं वदंतीति ॥ तत्र वातिकस्य लक्षणमाह ॥ परिहृष्टदं
तइत्यादि ॥ अम्लभक्षणेनेव परिहृष्टो दंतो यत्र सः ॥ तथा कषायरसं वक्त्रं यत्र
सः ॥१ अथ पैत्तिकश्लेष्मिकयोर्लक्षणमाह ॥ कट्वम्लमुष्णं विरसं च पूति पित्तेन विं
द्याल्लवणं च वक्त्रं ॥ माधुर्य्यपैच्छिल्यगुरुत्वशैत्यस्निग्धत्वदौर्गंध्ययुतं कफेन ॥ २
कट्वम्लमित्यादिना विंद्यादित्यंतेन पैत्तिकस्य लक्षणं ॥ कटुशब्दोऽत्र तिक्तवाची
लवणं च वक्त्रमिति विदग्धश्लेष्मणो लवणरसत्वात् ॥ पैच्छिल्यं मुखस्याभ्यं

॥३८१॥

ततोऽस्निग्धत्वं वहिः ॥ २ ॥ आगंतुजत्रिदोषजमाह ॥ अरोचके शोकभयातिलोभक्रो
धाद्यहृद्याशुचिगंधजे स्यात् ॥ स्वाभाविकं चास्यमथारुचिश्च त्रिदोषजे नैकरसं भ
वेच्च ॥ क्रोधादित्यादिशब्देनाहृद्यरूपयोर्ग्रहणं ॥ अहृद्यो गंधः घ्राणोद्वेज
को गंधः ॥ स्वाभाविकं अविकृतरसं ॥ नैकरसमनेकरसमास्यं स्यात् ॥ ३ ॥ अथ वातजादि
भेदेन मुखे विकृतिमभिधायान्यदेशे विकृतिमाह ॥ हृच्छूलपीडनयुतं पवनेन पि
त्तात् तृड्दाहचोषबहुलं सकफप्रसेकं ॥ श्लेष्मात्मकं बहुरुजं बहुभिश्च विद्याद्वैगुण्यमो
हजडताभिरथापरं च ॥ ४ ॥ हृच्छूलपीडनयुतं हृदि शूलेन पीडनं तेन युतं ॥ चोषः पार्श्व
स्थिताग्निनेव संतापः बहुभिस्त्रिभिर्दोषैः ॥ बहुरुजं उक्तवातादिलिंगयुक्तं ॥ वैगुण्यं
मनसो व्याकुलत्वं ॥ जडताष्टन्यहृद्यता अपरं आगंतुजं ॥ ४ ॥ भक्तद्वेषो भक्तच्छंदो च

॥१८२॥

रकसुश्रुताभ्यामरोचकत्वेनैव संगृहीतौ ॥ बहुभोजनस्येषां तक्षणानि पृथग्गाह ॥ प्र
क्षिप्तं तु मुखे चान्नं यत्र नास्वादते नरः ॥ अरोचकः स विज्ञेयो भक्तद्वेषमतः शृणु
५ ॥ नास्वादते अन्नस्य मिष्टतां न प्राप्नोति ॥ तदन्नं मिष्टं न लगतीति यावत् तः ॥५॥ चिंत
यित्वा तु मनसा दृष्ट्वा स्पृष्ट्वा च भोजनं ॥ द्वेषमायाति यज्जंतुर्भक्तद्वेषः स उच्यते ॥ द्वि
यद्यत्र ॥ ६ ॥ कुपितस्य भयार्त्तस्य तथा भक्तनिरोधतः ॥ यत्र नान्ने भवेच्छ्रद्धा सो भक्त
च्छंद उच्यते ॥ ७ ॥ इत्यरोचकनिदानं ॥ अथारोचकचिकित्सा ॥ वस्तिं समीरणे पित्ते
विरेकं वमनं कफे ॥ कुर्यादरोचके हृद्यान् हर्षणं मनसस्तथा ॥ त्वङ्मुस्तमेलाधा।
न्यानि मुस्तमामलकं त्वचः ॥ त्वक् च दार्वी यवान्यश्च पिप्पल्यस्तेजवत्यपि ॥ यवा
नी तिंतिडीकं च पंचैते मुखशोधनाः ॥ श्लोकपादैरभिहिताः सर्वारोचकनाशनाः १८२॥

विडंचूर्णमधुसंयुक्तो रसो दाडिमसंभवः ॥ असाध्यमपि संहन्यादरुचिं वक्त्रधारि
तः ॥ द्वे पले दाडिमादष्टौ खंडाद्व्योषात्पलत्रयं ॥ त्रिसुगंधं पलं चैकं चूर्णमेकत्र कार
येत् ॥ दीपनं रोचनं हृद्यं पीनसस्वरकासजित् ॥ इति दाडिमाद्यं चूर्णं ॥ भोजनाग्रे स
दा पथ्यं लवणार्द्रकभक्षणं ॥ रोचनं दीपनं वन्हेर्जिह्वाकंठविशोधनं ॥ शृंगवेरर
सं वापि मधुना सह लेहयेत् ॥ अरुचिश्वासकासघ्नं प्रतिश्यायकफापहं ॥ पक्काम्ली
कासिता शीतवारिणा वस्त्रगालिता ॥ एलालवंगकर्पूरमरिचैरवधूलिता ॥ पान
कस्यास्य गंडूषं धारयित्वा मुखे मुहुः ॥ अरुचिं नाशयेत्येव पित्तं प्रशमयेत्ततः ॥
हृत्पम्लीकापानकं ॥ तवंगकंकोलमुशीरचंदनं तं तं स नीलोत्पलकृष्णजीरकं ॥ जलं स
कृष्णागुरुपंगकेसरं कणा सविश्वा नलदैसहैतया ॥ तुषारजातीफलवंसरोच

॥१८३॥

नाः पिताद्विभागाः सकलं विचूर्णितं ॥ सुरोचनं तर्पणमग्निदीपनं बलप्रदं वृष्यतमं
त्रिदोषजित् ॥ उरोविबंधं तमकं गलग्रहं सकासं ॥ हिक्कारुचिपक्षपीनसं ॥ ग्रहण्य
तीसारमुरःक्षतं तथांत्याप्रमेहान्निखिलान्निहंतिहि ॥ अम्लीकागुडतोयं चेत्व
गेलामरिचान्वितं ॥ सर्वरोचकनाशाय शस्तं कवलधारणे ॥ वस्य यद्दोषं छितं किं
चित्तद्वेषमरुचौ सदा ॥ कारव्यजाजीपत्रैलाव्योषद्राक्षाम्लडीमैः सक्षौद्रशार्कैर्हृद् द
द्यौते होपं रुचिकारकः ॥ इति कारव्यादिलेहः ॥ मरिचं नागपुष्पाणि तालीसं तवराणा
निच ॥ प्रत्येकमेकभागाः स्युः पिप्पलीमूलचित्रकौ ॥ त्वकक्रमणांतितडीकंचजीरकं
चद्विभागिकं ॥ धान्याम्लवेतसौ विश्वं भद्रैलावदराणि च ॥ अजमोदाजलधरः प्र ॥१८३॥
त्येकं स्युस्त्रिभागिकाः ॥ सर्वौषधचतुर्थांशं दाडिमस्य फलं भवेत् ॥ द्रव्येभ्यो निषि

लैम्यब्ध्नसितादेयार्द्धमात्रया ॥ माहाखांडवसंज्ञंस्याच्चूर्णमेतत्सुरोचनं ॥ अग्निदीप्ति
करंहृद्यंकासातीसारनाशनं ॥ हृद्रोगकंठजठरमुखरोगप्रनाशनं ॥ विषूचिकांतथाध्मा
नमर्शोगुल्मकृमीनपि ॥ छर्दिंपंचविधंश्वासंचूर्णमेतद्व्यपोहति ॥ इतिमहाखांडव
चूर्णं ॥ पक्वानीदाडिमंमंडूठीतितडीकाम्लवेतसौ ॥ वदराम्लानिकुर्वीतचतुःशाणमिति
नितु ॥ सार्द्धंद्विशाणंमरिचंपिप्पलीदशशाणिका ॥ त्वक्सौवर्च्चलधान्याकजीरकंद्वि
द्विशाणकं ॥ चतुःषष्ठिमितैःशाणैःशर्करामत्रयोजयेत ॥ पक्वानीखांडवंचूर्णंसवी
रोचकनाशनं ॥ कंठास्यशोधनंहृद्यंहृत्पीठपार्श्वशूलजित ॥ ग्रहण्यर्शोविकारघ्नंश्वा
सातांचविनाशनं ॥ ग्राहिकासविवंधघ्नमग्निसंदीपनंपरं ॥ इतिपक्वानीखांडवंचू
र्णं ॥ लोभजेवांछितप्राप्तिःक्रोधेछंदानुवर्तनं ॥ भयजेभीतिशमनंशोकेमानसहर्ष

णां ॥ कवलो धूमपानं च चूर्णानि मुखधावनं ॥ करंजदंतकाष्ठं च विधेयमरुचौ सदा ॥
अम्लवर्णं कपित्थं च शर्करारोचके चैतैः साधयेद्वटी ॥ सेविता च सा जायते नरो भीमसे
नवद्बुभुक्षालालसः ॥ त्रुटिस्त्वक्केसरं पुष्पं वह्निजं सकरौषधं ॥ समखंडं भागवृद्धं च
र्णितं भक्षयेद्वटी ॥ श्वासकासप्रसेकेषु तृट्पार्श्वार्तिरुचिजे गदे ॥ गलामयप्रशस्तं च मु
खपाकविधौ हितं ॥ अथ पथ्यमाह ॥ वस्तिर्विरेको वमनं यथामलं धूमोपसेवा कवल
ग्रहस्तथा ॥ तिक्तानि काष्ठानि च दंतघर्षणे चित्रान्नपानान्यपि तैः कृतान्यपि ॥ गोधू
ममुद्गारुणशालिषष्टिका वार्त्ताकुसौभांजनमूलकानि च ॥ मोचं पटोलं त्वचकं पयोध
तवालानि तालानि रसोनसूरणौ ॥ द्राक्षा रसाला दधितक्रमार्द्रकं कंकोल खर्जूर
प्रियालदाडिमं ॥ पक्वं कपित्थं बदरं सिता तथा वर्ष्या यवानी मरिचानि रामठं ॥ स्वाद

रतिक्तानिचदेहमार्जनंवर्गोयमुक्तोह्यरुचिरोगिणोहितः ॥ अथापथ्यमाह । तत्सोद्गार
क्षुधानिद्राश्वासवेगविधारणं ॥ अहृद्यान्नमसृक्स्रावंक्रोधंलोभंभयंशुचं ॥ दुर्ग
न्धारूपसेवांचनकुर्याद्रुचौनरः ॥ इत्यरोचकचिकित्सा ॥ अथछर्दिनिदानं तत्रछ
र्दिः संख्यांविप्रकृष्टसन्निकृष्टनिदानपूर्विकांसंप्राप्तिंचाह ॥ दुष्टैर्दोषैःपृथक्सर्वै
र्बीभत्सालोकनादिभिः ॥ छर्दयःपंचविज्ञेयास्तासांलक्षणमुच्यते ॥ १ ॥ अतिद्रवैरति
स्निग्धैरहृद्यैर्लवणैरपि ॥ अकालेचातिमात्रैश्चतथासात्म्यैश्चभोजनैः ॥ २ ॥ आमाद्भ
यात्तथोद्वेगादजीर्णात्कृमिदोषतः ॥ नार्याश्चापन्नसत्वायास्तथातिद्रुतमश्नतः
बीभत्सैर्हेतुभिश्चान्यैर्भुक्तमुत्क्लिश्यतेबलात् ॥ ३ ॥ बीभत्सालोकनंविकृतिदर्शनं आ
दिशब्देनानिष्टगंधभक्षणादीनांग्रहणं ॥ आमादसम्यक्पक्वाद्रसात् ॥ अजीर्णा

॥१८५॥

यथाद्यथास्थिताद्भुक्तात् ॥ आपन्नसत्वाया प्राप्तगर्भायाः ॥ तस्या गर्भोत्पीडनेन यातैर्वेगरूपा
त् छर्द्दिः ॥ अन्यैर्वीभत्सैर्विकृतैर्घृणाकारिभिः ॥ अनिष्टश्रवणदर्शनभक्षणपानैः
उत्क्लिश्यते ऊर्ध्वं नीत्वा मुखाद्बहिः क्रियते ॥१॥२॥३॥ अथ पूर्वरूपमाह ॥ हृल्लासोद्गाररोधौ
च प्रसेको लवणस्तथा ॥ द्वेषोन्नपाने च भृशं वमीनां पूर्वलक्षणं ॥४॥ उद्गाररोधः उद्गार
प्रवृत्तिः ॥ प्रसेको मुखस्रवः ॥४॥ अथ छर्द्दिसामान्यं लक्षणमाह ॥ छादयन्नाननं वेगैरर्द्द
यन्नंगभंजनैः ॥ निरुच्यते छर्द्दिरिति दोषो वक्त्रं प्रधावितः ॥५॥ छादयन् पूरयन् ॥ अं
गभंजनैः अंगभेदैः ॥ अर्द्दयन् पीडयन् ॥ वक्त्रं प्रधावितः प्रतिधावितः दोषः छर्द्दिर्नि
गद्यते ॥ छादयति मुखं अर्द्दयति चांगानीति छर्द्दिः ॥ पृषोदरादित्वेन रूपसिद्धिः ॥५॥
अथ वातजायालक्षणमाह ॥ हृत्पार्श्वपीडामुखशोषशीर्षनाभ्यर्तिकासस्वरभे

॥१८५॥

दतोदैः ॥ उद्गारशब्दं प्रबलं सफेनं विच्छिन्नकृष्णं तनुकं कषायं ॥ कृच्छ्रेण चाल्पं महता च
वेगेनार्त्तो ऽनिलाच्छर्दयतीह दुःखं ॥ इ शीर्षनाभ्यर्त्तिः मस्तकेनाभौ च शूलं ॥ तोदैरिति
उपलक्षणेन तृतीया ॥ आर्त्तो नरः दुःखमिव छर्दयतीति योऽर्थः ॥ किंभूतं छर्दयतीत्यत्राह
उद्गारेत्यादि ॥ उद्गारशब्दाभ्यां प्रबलं ॥ विच्छिन्नं अल्पद्रवं ॥ वातस्य रुक्षत्वात् द्रवत्वाभावा
त् ॥ तनुकं अघनं ॥ कषायं कषायरसं ॥ इ ॥ अथ पित्तजायालक्षणमाह ॥ मूर्छापिपासा
मुखसोषमूर्द्धताल्वक्षिसंतापतमोभ्रमार्त्तः ॥ पीतं भृशोष्णं हरितं च तिक्तं धूम्रं च पि
त्तेन वमेत्सदाहं ॥ तमोंधकारदर्शनमिव ॥ धूम्रं कृष्णलोहितवर्णं ॥ ७ ॥ अथ कफजाया
लक्षणमाह ॥ तंद्रास्यमाधुर्यकफप्रसेकसंतोषनिद्रारुचिगौरवार्त्तः ॥ स्निग्धं घनं
स्वादुकफाद्विशुद्धं सलोमहर्षोऽल्परुजं वमेत्तु ॥ य ॥ संतोषस्तृप्तिः अनन्नाभिलाष

॥१८६॥

रसार्थः॥ तृष्णो हि मांसमभिलषतीति॥ अरुचिरभ्यवाहारासामर्थ्यं स्यादुमधुरं॥५॥ अथ त्रि
दोषजायालक्षणमाह॥ शूलाविपाकारुचिदाहतृष्णाभ्रमप्रमोहप्रबलाप्रसक्तं॥ ष
हिं त्रिदोषाद्व्रणमास्त्रनीलसांद्रोस्रस्रक्तंव मतांतरं स्यात्॥६॥ शूलादिभिः प्रमोहां
तैः प्रबलाः शूलादिप्रबला॥ प्रसक्तं निरंतरं॥६॥ आगंतुजायालक्षणमाह॥ बीभत्स
जादोहदजामजा च असात्म्यजा वा कृमिजा च या हि॥ सा पंचमी तां च विभावयेद्धै दोषो
त्थरूपे लैंगपथोक्तमादौ॥१०॥ दोहदजा दोहदालाभजा॥ आमजा अजीर्णजा॥ असात्म्य
जा असात्म्यभक्षणजा॥ कृमिजा कोष्ठकृमिसंभवा॥ एताः पंच आगंतुजत्वेन साम्या
दैकैव॥ अतएव सा आगंतुजा पंचमी॥ आदौ पथ्योक्तं पूर्वमुक्तवातादितक्षणमित्य
र्थः॥ विभावयेदनुबंधयेत्॥१०॥ अथ कृमिजायाः स्वतोधार्थं पृथक् लक्षणमाह

॥१८६॥

शूलहृल्लासबहुला कृमिजा च विशेषतः॥ कृमिहृद्रोगतुल्येन लक्षणेन च लक्षिता॥११

कृमिहृद्रोगे यथा कृमिलक्षणं तथा पीडादिकं तदस्यां भवतीत्यर्थः॥११॥ अथ साध्यमाह

विट्स्वेदमूत्रांबुवहानि वायुः स्रोतांसि संरुध्य यदोर्ध्वमेति॥ उत्सन्नदोषस्य समा

चितं तं दोषं समुद्धूय नरस्य कोष्ठात्॥१२॥ विलम्बवत्योः सततं समगंधवर्णं तृष्णाश्वासहिक्का

सान्वितं प्रसक्तं॥ प्रच्छर्दयेद्दुष्टमिहातिवेगात्तयार्दितं श्वाशु विनाशमेति॥१३॥ उत्स

न्नदोषस्य उद्धृतदोषस्य। दोषं पित्तं कफं वा तदिति यस्माद्विडादिवाहिस्रोतोदुष्टि

स्ततो हेतोर्विलम्बवत्योः समगंधवर्णं प्रच्छर्दयेदिति योज्यं॥ इयं तु छर्दिर्विकृतिविष

मसमकोपाख्या त्रिदोषजेति बोध्यं॥ अन्ये त्वाहुः॥ सर्वा एव छर्द्यः प्रबला एवंविधाः

सत्यो साध्याः स्युरिति॥१२॥१३॥ अथासाध्यां साध्यांचाह॥ क्षीणस्य या छर्दिरतिप्र

सक्तासोपद्रवाशोणितपूययुक्ता ॥ सचंद्रिकां तां प्रवदंत्यसाध्यां साध्यां चिकित्सेत्तु निरु ये
॥१८॥ पद्रवां च १४ ॥ सचंद्रिकामिति मेदःप्रभृतिधातूनां स्नेहः प्रवर्त्तमानो मयूरपिच्छचंद्रि
कावत्प्रतिभाति ॥ निरुपद्रवां वक्ष्यमाणोपद्रवरहितां ॥१४॥ अथोपद्रवानाह ॥ कासः
श्वासो ज्वरस्तृष्णा हिक्का वैचित्त्यमेव च ॥ हृद्रोगस्तमकश्चैव ज्ञेयाश्छर्देरुपद्रवाः ॥ १५
वैचित्त्यं विकृतचित्तत्वं ॥ तमकोत्र तमकः श्वासपदेनैव तमकाख्यस्यापि श्वासस्योक्तेः
१५ ॥ इति छर्दिनिदानं ॥ अथ छर्दिचिकित्सा ॥ हितं तु लंघनं प्रायो वमीषु मारुताद्दृते ॥ आ
ध्यापि वामयेदूर्ध्वं विरेचयेद्यथाहितः ॥ हन्यात्क्षीरोदकं पीतं छर्दिं पवनसंभवां ॥ मुद्गा
मलकयूषो वा ससर्पिष्कः ससैंधवः ॥ क्षीरोदकं नाशीतस्पर्शी रस्य उदकं ॥ मसूरमुद्गला
जानां यवागूर्मधुसंयुता ॥ भुक्तमात्रं हरेदाशु वमिं पित्तसमुद्भवां ॥ पिबेद्द्राक्षीरसो ॥१८॥

पेतं मधुयुक्तं सुचंदनं ॥ अक्षमात्रं जयेत्तेन छर्द्दिं सुगुतरामपि ॥ गुडूचीत्रिफलानिंबप
टोलैः क्वथितं जलं ॥ पिवेन्मधुयुतं तेन छर्द्दिर्नश्यति पित्तजा ॥ हरीतकीनां चूर्णं तु लि
ह्यान्माक्षिकसंयुतं ॥ अधोमार्गीकृते दोषे छर्द्दिः शीघ्रं निवर्त्तते ॥ गुडूच्या रचितं हे
तिहिमं मधुसमन्वितं ॥ दुर्निवारामपि छर्द्दिं त्रिदोषजनितां बलात् ॥ एलालवंगगज
केसरकोलमज्जालाजाप्रियंगुघनचंदनपिप्पलीनां ॥ चूर्णानि माक्षिकसितासहि
तानि लिढ्वा छर्द्दिं निहंति कफमारुतपित्तजातां ॥ अश्वत्थवल्कलं शुष्कं दग्धं निर्वापि
तं जले ॥ तज्जलं पानमात्रेण छर्द्दिं जयति दुर्जयां ॥ कोलामलकमज्जानौ मक्षिकाविट्
सितामधु ॥ सकृत्स्नातंडुलो लेहः छर्द्दिमाशु व्यपोहति ॥ आम्रास्थिविल्वनिर्व्यूहः
पीतः समधुशर्करः ॥ निहन्याच्छर्द्यतीसारं वैश्वानरमिवोद्धृतं ॥ मयूरपिछंसंद

॥१८८॥

ग्धातद्रसमधुमिश्रितं ॥ लिह्यान्निवारयत्याशु छर्दिं सोपद्रवामपि ॥ पुराणगोरणीभस्मां
भो मधुयुक्तं निपीयते ॥ छर्दिं निहंति मनुजस्तरणीनीयहुताशनः ॥ वराककरणी षधांज
नैः स राजकोलमज्जभिः ॥ विचूर्णितैर्मधुयुतैर्वमिर्विराममृच्छति ॥ कोमलकरंजपत्रं
सतवरणामल्लिनेसंयुक्तं ॥ यःखादतिदिनवदनेछर्दिकेप्यातस्यकुत्रेह ॥ सुरसास्वर
सैर्युक्ता गुटिकामर्दिता भक्षं ॥ वांतिं शमयति क्षिप्रं वातपित्तकफोद्भवां ॥ कृष्णाशिता
मरीचं च कपित्थरसभावितं ॥ तुल्यलाजैश्च मधुनालीढं छर्दिहरं परं ॥ कलपूररसक्षौ
वछर्दिघ्नो मधुनासह ॥ गंधकश्च कृतमारस्यश्च यष्टी मधु शिलाजतु ॥ हद्राक्षो टंकण
क्षौवसारंगस्वयच्छ्रंगकं ॥ चंदनंतवक्षीरीचगोरोचनमिदंसमं ॥ विल्वमूलकषा
येणमर्दयेद्यामनमात्रकां ॥ मात्राचैवप्रकुर्वीतवल्लस्यैवप्रमाणतः ॥ नानाविधान् ॥१८८॥

पानेन छर्दिं हंति त्रिदोषजां ॥ वमनामृतयोगोयं कमलाकरभाषितः ॥ इति वमनामृतयो
गः ॥ अजाजीधान्यपथ्याभिः सक्षौद्रैः सकटुत्रिकैः ॥ एतैः सार्द्धं भस्मसूतः सद्यो वांतिं वि
नाशयेत् ॥ इति भस्मसूतयोगः ॥ द्विवल्लं टंकरंजस्य बीजं खंडीकृतं पुनः ॥ मुहुर्मुहुर्नरो
भुक्त्वा छर्दिं जयति दुस्तरां ॥ पर्पटक्वाथमादाय शीतलं दापयेन्नरं ॥ वमिं हंति महाघोरां
सपित्तभ्रमसंयुतां ॥ शंखचूर्णं ख्वीरसं टंकद्वयं समरिचं मुहुः ॥ सक्षौद्रं मनुजः पीत्वा छर्दि
भ्यः किल मुच्यते ॥ अथ पथ्यमाह ॥ विरेचनं छर्दनं लंघनानि स्नानं मज्जाताजकृतप्र
मंठः ॥ पुरातनाः षष्ठिकशालिमुद्गकौलीयगोधूमयवा मधूनि ॥ मत्स्या नाना मटरसह
यशं धारसोष्ण पूषा अपि खांडवाश्च ॥ जंबीर धात्री सहकार कोल द्राक्षा कपित्थानि च
नारिकेलं ॥ हरीतकी दाडिमबीजपूरजातीफलं चासकं निंबवासाः ॥ स्मितापाताव्हाक

रिके सरारिगमस्यामनःप्रीतिकराहि ताभ्र्यहाहृद्यनाभे ह्रियो परिष्ठाद्दिर्दहिपथ्यंवमना
तुरस्य ॥ अथापथ्यमाह ॥ नस्यंवस्तिं स्वेदनं लेहपानं रक्तस्नावं दंतकाष्टं द्रवान्नं ॥ वीभत्से
क्षां भीतिमुद्वेगमुष्णं स्निग्धासात्म्या हृद्यवैरोचेकान्नं ॥ तं वांविंवीं सर्षपान्नैवमधूकं
छर्द्यां सत्यां वर्जयेदप्रमतः ॥ इतिछर्दिचिकित्सा ॥ अथ तृष्णानिदानं तत्रतृष्णायानिदा
नपूर्विकां संप्राप्तिमाह ॥ भयश्रमाभ्यां बलसंक्षयाद्वा ऊर्ध्वं चितं पित्तविवर्द्धनैश्च ॥ पि
त्तं सवातं कुपितं नराणां तालुप्रपन्नं जनयेत्पिपासां ॥ १ ॥ स्रोतःस्वपांवाहिषु दूषिते
षु दोषैश्च तृट्संभवतीह जंतोः ॥ तिस्रः स्मृतास्ताः क्षतजा चतुर्थी क्षयात्तथान्यामस
मुद्भवा च ॥ भुक्तोद्भवा सप्तमिकेति तासां निबोधलिंगान्यनुपूर्वशस्तु ॥ २ ॥ नराणां चि
तं स्वस्थानगं संचितं सवातं पित्तं पित्तविवर्द्धनैः कटुम्लोष्णादिभिः पित्तं कुपि

तेभयश्रमाभ्यांचसंक्षयादुपवासादेश्च वाताः कुपितः ततद्द्वयंऊर्ध्वंप्रसरत् तालु-
प्रपन्नं पिपासां जनयेत् ॥ न केवलं तालुन्येव दूषिते तस्मा भवतीति किंतु जलवाहि स्रोतः
स्वपि ॥ अतआह ॥ स्रोतःस्वित्यादि नन्वत्र बहुवचनं नेनयुक्तं ॥ यतो जलवहे द्वे स्रोतसी
सुश्रुते नोक्ते ॥ उच्यते ॥ तयोरेवानेकप्रतानयोगान्न दोषः ॥ अपां वाहिषु स्रोतःस्विति
जिव्हादेरुपलक्षणं ॥ यतआह चरकः ॥ रसवाहिनीश्च धमनीर्जिव्हा हृदयगत
तालुक्लोमच संशोष्य नरं ॥ देहेषु कुरुते तस्मादतिवर्ग्रौ पित्तानिलाविति ॥ संख्यामा
ह ॥ तिस्र इत्यादि ॥ दोषैश्चतिस्र इति संबंधः ॥ क्षतजेति क्षतनिमित्तं प्राणिनां याभव
ति ॥ १॥२ अथ वातजायास्तृष्णाया लक्षणमाह ॥ क्षामास्यता मारुतसंभवायां तोदस्तथा
संखशिरस्सुचापि ॥ स्रोतोनिरोधो विरसं च वक्त्रं शीताभिरद्भिश्च विवृद्धिमेति ॥ ३

॥ १८० ॥

क्षामास्यताक्षुत्कृद्दीनमुखत्वं ॥ शंखेति रसशंखयोः सिरश्चेति ॥ स्रोतो निरोधाः
रसांबुवाहिनीधमनीनिरोधः ॥ शीताभिरद्भिरित्यनेन वायोः शीतस्य शीतेन
वृद्धिरित्यनुपशयस्य निदर्शनं ॥ चकाराच्चरकोक्तानि ज्ञानाग्नि स्वग्रहणं ॥ अथ
पित्तजायास्तृष्णाया लक्षणमाह ॥ मूर्छेति विदेहविलायदाहारक्तेक्षणत्वं
प्रततृष्णशोषः ॥ शीताभिर्नंदामुखेतिक्ताचपित्तात्मिकायां परिदधूपनं कंठ च
धूमनिर्गमः ख ॥ चकारात्पीतविण्मूत्रनेत्रत्वादयो ग्राह्याः ४ ॥ अथ कफजाया
स्तृष्णाया लक्षणमाह ॥ वाष्पावरोधात्कफसंवृते ग्नौ तृष्णा बलासेन भवेन्न
रस्य ॥ निद्रागुरुत्वं मधुरास्यता च तयार्दितः शुष्यति चातिमात्रं ॥ ५ बलासेन
कफेन नरस्य तृष्णा भवेत् ॥ ननु कफेन तृष्णा तु पपन्ना ॥ कफस्य द्रवस्य के

॥ १८० ॥

वृद्धस्य पिपासाकर्तृत्वायोगात्॥ वातपित्तयोरेव पित्तं सवातं कुपितमित्या-
दिना तृष्णाकर्तृत्वेनोक्तत्वाच्च॥ अतएवेमामाशङ्कां दूरीकर्तुं हेतुमाह॥ अग्नौ
जठराग्नौ कफसंवृते स्वकारणकुपितेन कफेन संवृते उपरिष्टादाच्छादिते स-
ति वाष्पावरोधात् अधोगतस्य पावकस्योष्मणोऽवरोधात् अवरुद्धानलोष्म-
णां तु वहस्रोतः शोषणादित्यर्थः॥ तया तृष्णया आर्द्रितः पीडितः शुष्यति
कृशो भवति॥ ५॥ अथ क्षतक्षयजयोस्तृष्णयोर्लक्षणमाह॥ क्षतस्य रुक्छोणि-
तनिर्गमाभ्यां तृष्णा चतुर्थी क्षतजा मता तु॥ रसक्षयाद्या क्षयसंभवा सा तया-
भिभूतस्तु निशादिनानि॥ ६॥ पेपीयतेंभः स सुखं न याति तां सन्निपातादि-
ति केचिदाहुः॥ रसक्षयोक्तानि च लक्षणानि तस्यामशेषेण भिषग्व्यवस्ये-

३८१॥

त॥७॥ क्षतस्य रूक्षादि क्षतयुक्तस्य॥ रुक् पीडा॥ ये पीयते पुनः पुनः पिबति॥ एत
त्वाविशेषपरं॥ सर्वतस्मात्सुतथामृतत्वात्॥ यदाह सुश्रुतः॥ सततं यः पिबन्
वारि नैति तृप्तिमधिगच्छति॥ पुनः कांक्षति तोयं च तं तस्माद्दितमादिशेदिति॥
रसक्षयलक्षणानि सुश्रुतेनोक्तानि॥ रसक्षये हृत्पीडा कंपः शोषः शून्यता
तृष्णा चेति॥ तस्यां क्षयजायां व्यवस्येत् जानीयात्॥ ६॥७॥ आमयामजायामु
क्तोद्भवायाश्च लक्षणमाह॥ त्रिदोषलिंगाऽऽमसमुद्भवायां हृच्छूलनिष्ठीवनसा
दकर्त्री॥ स्निग्धं तथाम्लं लवणं च भुक्तं गुर्वन्नमेवात्सुतृषां करोति॥ यत्रिदोषा
लिंगा त्रिदोषलिंगयुक्ता॥ लवणं चेति चकारात्कटु च॥ गुरुशब्देन मात्रागुरु
द्रव्यगुरु च गृह्यते॥ ७॥ उपसर्गजामप्याह॥ क्षीणः स्वरः प्रताम्यतेदीनः सं

३८१॥

शुष्कगलतालुः ॥ भवति खलु चोपसर्गात्तृष्णा सा शोषरोगी कष्टा ॥ ९ ॥ प्रताम्यन मुख
न ॥ शोषरोगी धातुक्षोषरोगी ॥ कष्टा कष्टसाध्या ॥ इयं यथास्वं दोषजा सु अवरुद्धे
हि तिस्रो यमतो न संख्यातिरेकः ॥ ९ ॥ अथोपसर्गात्तृष्णायुताया आरिष्टलक्षणमाह
ज्वरमोहक्षयकासश्वासाद्युपसृष्टदेहानां ॥ सर्वास्त्वतिप्रसक्ता रोगकृशा
नां वमिप्रसक्तानां ॥ घोरोपद्रवयुक्तास्तृष्णा मरणाय विज्ञेयाः ॥ १० ॥ आदिश
ब्दाद्दतीसारादीनां ग्रहणं ॥ अतिप्रसक्ता निरंतराः ॥ घोरोपद्रवयुक्ताः अतीव
मुखशोषादिर्युक्ताः ॥ १० इति तृष्णानिदानं ॥ अथ तृष्णाचिकित्सा ॥ विधिवीत
पित्तापहः प्रायश्च पिपासु शीतं च हिक्कांतरे च ॥ सुशीतं च दिव्यं जलं क्षौद्र
युक्तं प्रतप्ताश्मलोष्टादि सिक्तं च भौमं ॥ वातोत्थायां पिपासायां पिबेद्दधि

॥१८२॥

गुडान्वितं ॥ मृद्वीकाचंदनोशीरखर्ज्जूरक्वाथितं जलं ॥ पिबेत्क्षौद्रेण संयुक्तं पित्ततृष्णा
निवृत्तये ॥ श्रीपर्णीनसदमधूकधान्यशीतैः सक्षौद्रैरतिशिशिरैः सितासमेता
तृड्दाहभ्रममदमोहहा तु फांटेव कस्यं हरति तृषां च पष्ठिसंसं ॥ क्षौद्रान्वितं शी
तजलं निपीय प्रकाममा प्लवमतः पिपासा ॥ नश्यत्यशाप्यस्य विधातावपीयं मेह
रत्यवेश्यं रजतोपजाता ॥ खर्ज्जूरमृद्वीमधुकं सखंडं पथक्कृतं मागधिका त्रिगं
धे ॥ तथार्द्रविल्वेमधुनागृदीयं तृणमोहपित्ताश्रजयेति प्रासो ॥ उत्पलं मधुलाजा
श्रवटलेहो गदस्तथा ॥ एतैः कृतावटी नीत्यं तृष्णां नाशयति क्षणात् ॥ आरुणाचं
दनचंदनवालकैर्नलदपद्मकतुल्यकृतां प्रलेपैः ॥ शिरसि लेपनमाचरतां नराणां
तृडुपयात्युपशांतिमुसंशयं ॥ अथ रसः ॥ रसगंधककर्पूरैः शैलोशीरमरीचकैः ॥ १८२ ॥

ससितैः क्रमवृद्धैश्च सूक्ष्मचूर्णं महर्मुखे ॥ त्रिगुंजाप्रमितं खादेल्लिवेत्सर्पिषितां त्रुच
मत्स्यं तस्यांनिहंत्येव मथ्विम्यांच प्रकासितं ॥ ससौद्रमामृजंचूर्णं पिवेत्क्काथं रसांवि
तं ॥ सतक्रोमधुनाकुर्याद्दुग्धान्निशिरस्थितः ॥ रसरजतगुडीच मुखेध्यतात्तस्मां
शमयति ॥ स्नापितैः शीतनीरेण सघृतैर्यवसक्तुभिः ॥ नातिसांद्रद्रवैर्मंथस्तस्मा
दाहभ्रमापहः ॥ मरिचंमधुयष्टीचकाकोदुंबरपल्लवं ॥ नीलोत्पलंहिमत्वचंषांतत्स्मा
च्छर्दिनिवारणः ॥ तस्माद्यांमोहमायातिमोहात्प्राणान्नविमुंचति तस्मात्सर्वास्वव
स्थासु न क्वचिद्धारिरुं वारयेत ॥ अथपथ्यमाह ॥ शोधनंवमनंनिद्रांस्नानंकेवल
धारणं ॥ कोद्रवाः शालयः पेयाविलेपीलाजसक्तवः ॥ मद्यैर्मुद्गैर्मसूरैश्च रणकै
र्विष्किरोरसः ॥ रंभापुष्पमल्लमंडः शर्करागोस्तनीतथा ॥ कपित्थंकोलमल्लीकाकू

खांडकमुपोदिका ॥ खर्जूरं दाडिमं धात्री कर्कटी पर्पटं तथा ॥ जंबीरं करमर्द्दं च बीजपूरं
गवां पयः ॥ मधूकपुष्पं ह्रीवेरं तिक्तानि मधुराणि च ॥ माक्षिकं सरसी तोयं शृताब्दा
नागकेसरं ॥ एलाजातीफलं पथ्या कुसुंबरु च चंदनं ॥ चंदनाद्रिप्रियाश्लेषोल्लाभर
णाधारणं ॥ हिमानुलेपनं चस्यात्पथ्यमेतत्तृषातुरे ॥ अथापथ्यमाह ॥ स्वेदांजन
स्नेहनधूमपानं व्यायाममनस्यातपदंतकाष्टं ॥ गुर्वन्नमम्लं लवणं कषायं कटु दुष्ट
पं दुष्टजलानि तीक्ष्णं ॥ एतानि सर्वाणि हिताभिलाषी तृषातुरो नैव भजेत्कदाचित्
इति तृष्णाचिकित्सा ॥ अथ मूर्छादिनिदानं ॥ तत्र मूर्छाया निदानपूर्विकां संप्राप्ति
माह ॥ क्षीणस्य बहुदोषस्य विरुद्धाहारसेविनः ॥ वेगाघातादभीघाताद्धीनसत्व
स्य वा पुनः ॥ १ ॥ करणायतनेषूग्रा बाह्येष्वाभ्यंतरेषु च ॥ निविशंति यदा दोषा ॥३८३॥

दिमा

स्तदा मूर्छंति मानवाः ॥ २ ॥ बहुदोषस्य विपुलदोषस्य ॥ नत्वनेकदोषस्य ॥ तदा मूर्छा त्रि
दोषजैव स्यात् ॥ तथा सति पृथक् दोषजानां प्राप्तिर्नोक्ता स्यात् ॥ वेगाघातात् मलादि वे
गविधारणात् ॥ अभीघातात् हृद्गुडो ॥ हीनसत्वस्य स्वल्पसत्वस्य ॥ अर्थाद् अधिकतमोगु
णस्य ॥ यत उक्तं ॥ मूर्छा पित्ततमःप्रायेति ॥ करणायतनेषु करणं मनसस्तस्यायतने
षु बाह्येषु कर्मेंद्रियेषु आभ्यंतरेषु बुद्धींद्रियेषु ॥ यद्वा बाह्यानि चक्षुरादीनि आभ्यंत
राणि मनोवहानि स्रोतांसि पैरगात्यचक्षुरादीनि अधितिष्ठति ॥ तेषु यदा उग्रा दोषा
निवसंति तदा मानवा मूर्छंतीति योज्यं ॥ १ ॥ २ अथ सामान्यं तल्लक्षणमाह ॥ संज्ञावहासु
नाडीषु पिहितास्वनिलादिभिः ॥ तमोभ्युपैति सहसा सुखदुःखव्यपोहकृत् ॥ ३ ॥ सु
खदुःखव्यपोहाच्च नरः पतति काष्ठवत् ॥ मोहो मूर्छेति तां प्राहुः ॥ षड्विधा सा प्रकी

॥१९४॥

र्मिताः॥४॥ अत्र संज्ञावहनाडीशब्देन शिराधमनीस्रोतसां ग्रहणं॥ यतस्तैर्मन इंद्रियादि
देशं प्राप्नोतीत्याहुः॥ पिहितासु आच्छादितासु॥ तमः तमोगुणः॥ अस्मान्हेतुः॥ अभ्युपैति
आगच्छति॥ सहसा इति॥ अन्येषु तमोबहुलेषु रोगेषु मदात्ययादिषु न तथा सत्वरजसी
तीपेते यथा मूर्छायां॥ तदेवाह सुखदुःखव्यपोहकृदिति॥ सुखदुःखयोः व्यपोह
कृत् नाशकरं॥ अतएव नष्टसुखदुःखज्ञानेन नरः काष्ठवत् पततीति॥ तां मोहो मूर्छेति
प्राहुरित्यन्वयः॥ मूर्छाया मूर्छायोपि पर्यायः॥ यत उक्तं॥ संज्ञोपघातो मूर्छायो मू
र्छा स्यान्मूर्छनं तथा॥ कश्मलं प्रलयो मोहसंन्यासस्तु मतोपम इति॥ ४॥ अथ ष
ड्विधमूर्छाविवृणोति॥ वातादिभिः शोणितेन मद्येन च विषेण च॥ षट्स्वप्येता
सु पित्तं तु प्रभुत्वेनावतिष्ठते॥५॥ प्रभुत्वेन व्यापकत्वेन॥ तेन वातजादिष्वपि ज्वर ॥१९४॥

यद्रोगमहिम्नाऽप्यवश्यं पित्तसंबंधः ॥ यतउक्तं ॥ मूर्छा पित्ततमःप्रायेति ॥ अतएव
द्रोगमहिम्नो चिकित्सायां शीतक्रियाविधानं ५ अथ पूर्वरूपमाह ॥ हृत्पीडा जृंभणं ग्ला
निः संज्ञानाशो बलस्यमेव च ॥ सर्वासां पूर्वरूपाणि यथास्वं च विभावयेत ॥ ६ ॥ संज्ञानाशो
बलस्य मस्यकस्मात् ॥ यथास्वं च विभावयेदिति तां वुल्लं मूर्छा वातजादिभेदेन जानी
यात ॥ व्यक्तरूपावस्थायां न तु पूर्वरूपावस्थायामिति जेज्जटः ॥ ६ ॥ तत्र वातिकमूर्छा
यमाह ॥ नीलं वा यदि वा कृष्णमाकाशमथवारुणं ॥ पश्यंस्तमः प्रविशति जेज्जटः
शीघ्रं च प्रतिबुध्यते ॥ ७ वेपथुश्चांगमर्दश्च प्रपीडा हृदयस्य च ॥ कार्श्यं श्यावारुणा
छाया मूर्छाये वातसंभवे ॥ ८ नीलं नीलवर्णं कृष्णं कज्जलाभं ॥ अरुणमव्यक्तरू
पारुणं ॥ तमः प्रविशति अंधकारमिव प्रविशति मूर्छतीत्यर्थः शीघ्रं च प्रति

॥ १८५ ॥

बुध्यत इति वायोः शीघ्रकारित्वात्। कार्श्यं रूक्षाण्यरुणा च्छाया गात्रस्येति शेषः ॥ ७॥ ८॥
अथ पैत्तिकमूर्छामाह। रक्तं हरितवर्णं वा वियत्पीतमथापि वा। पश्यंस्तमः प्रवि
शति सस्वेदः प्रतिबुध्यते। सपिपासः ससंतापो रक्तपीताकुलेक्षणः। संभिन्न
वर्चाः पीताभो मूर्छाये पित्तसंभवे ॥ १० ॥ वियत् आकाशं ॥ ९॥ १०॥ अथ श्लैष्मिक
मूर्छामाह। मेघसंकाशमाकाशं तमोभिर्वा घनैर्वृतं। पश्यंस्तमः प्रविशति चि
राच्च प्रतिबुध्यते ॥ ११ ॥ गुरुभिः प्रावृतैः रंगैर्यथैवार्द्रेण चर्मणा। सप्रसेकः सहृल्लासो
मूर्छाये कफसंभवे ॥ १२ ॥ मेघसंकाशं धूम्रं मेघसंकाशमित्यर्थः। यत आह सुश्रुतः
कफेन पश्येद्रूपाणि श्वेताभ्रप्रतिमानि वेति। घनैर्निबिडैस्तमोभिरंधकारैः। घन
शब्दोत्र मेघवाची। इति मधुकोशकृत्। तेन घनैर्वीवृतं ॥ ११॥ १२॥ अथ सान्निपा

॥ १८५ ॥

तिकमूर्छायमाह॥ सर्वाकृतिः सन्निपातादपस्मारस्त्वागतः॥ सजंतुं पातयत्याशु विना
बीभत्सचेष्टितैः॥१३॥ सर्वाकृतिः वातजादिलिंगः॥ ननु सर्वाकृतिरिति विरुद्धं षड्वि
धासा प्रकीर्तितेति अत्रैवाभिहितत्वात् सन्निपातजपासहसप्तप्रसज्येरन्॥ उच्यते
संग्रहे सर्वत्र स्वीकारात् सुश्रुतग्रंथे न उद्दिष्टापस्मारके ग्रंथे नो विवरणमित्यकं भयम
पितिस्थितमित्यदोषः॥ अपस्मारस्त्वेति तेन महताभिघातेन पतति चिरेण प्रति
बुध्यते तदृश्यापि॥ तर्हि अपस्मारादस्य को भेदः इत्यपेक्षायामाह॥ ससान्निपातिको
मूर्छायः विना विभत्सचेष्टितैः फेनवमनदंतघट्टनालिविकृत्यादिभिर्विना पातय
ति॥१३॥ अथ रक्तजमूर्छायास्य निदानमाह॥ पृथिव्यं भस्तमोरूपं रक्तगंधस्तदन्व
यः॥ तस्माद्रक्तस्य गंधेन मूर्छंति भुवि मानवाः॥१४॥ तमोरूपं तमो वंशुलं पृथि

॥ १९८ ही ॥

वीजं भक्ष्यैतदुभयं ॥ उक्तं हि ॥ तमोबहुलाः पृथिवी सत्वतमोबहुला आप इति ॥ तदन्वयः
पृथिव्यंभोन्वयः ॥ तस्मात् यस्मात् पृथिव्यंभसस्तमोरूपं रक्तगंधस्तत्तन्मयः मूर्छा च त
मःप्राया तस्मादित्यर्थः ॥ मुह्यति मानवा इति शरीरस्य पांचभौतिकत्वे तिकत्वेपि पृथिवीब
हुलत्वं तेन मानवा अपि पार्थिवास्तामसा इत्यर्थः ॥ न तु सात्विका राजसाश्च अत एव र
क्तस्य गंधेन मूर्छंतीति ॥ १४ ॥ तर्हि चंपकादिगंधेनापि मूर्छा प्रसज्येत तत्रापि गंधस्य
पार्थिवत्वात् ॥ नैषा युक्तिः समीचीना इत्यत आह ॥ द्रव्यस्वभाव इत्येके यद्दृष्ट्वापि विमु
ह्यति ॥ रक्तस्यायं स्वभावो येन तद्गत एव गंधो मूर्छयतीत्येके आचार्या वदंति ॥ अन्ये
तु गंधस्य हेतुत्वमपास्य दर्शनस्यैव हेतुत्वमन्वंते तन्मतमाश्रित्याह ॥ यद्दृष्ट्वापि वि
मुह्यतीति यदाह भोजः ॥ दर्शनादसृजस्तेजोत्रादुं धाम्नैव प्रमुह्यतीति ॥ १४ ॥ अथ मद्य

॥ १९८ ही ॥

जविषजयोर्मूर्छायोर्निदानमाह॥ गुणातीव्रतरत्वेन स्थितास्तु विषमद्ययोः॥ तएव
तस्मात्ताभ्यां तु मोहौ स्यातां यथेरितौ॥ ३५॥ ये गुणाः लघुरूक्षाशुविशदव्यवायितीक्ष्ण
विकाशिसूक्ष्मोष्णानिर्देश्यरसात्वादयस्ते तादृशे द्रव्ये व्यस्ताः समस्ता वा भासंते तितरा वगु
णा विषमद्ययोर्यस्मात्तीव्रतरत्वेन स्थितास्तस्मात्ताभ्यां मोहौ स्यातामिति योऽयं॥
यथेरितौ यथोक्तलक्षणावितिमोहयोर्विशेषणं॥ तत्रापि भेदः॥ यतउक्तं तंत्रांतरे॥
ये विषस्य गुणाः प्रोक्ताः सन्निपातप्रकोपणाः॥ तएव मद्ये दृश्यंते विषे तु बलवत्त
रा इति॥ ३५॥ अथ रक्तजमद्यजमूर्छयोर्लक्षणमाह॥ स्तब्धांगदृष्टिस्त्वसृजा मूढोच्छ्वा
सश्च मूर्छितः॥ मद्येन विलपन्शेते नष्टविभ्रांतमानसः॥ गात्राणि विक्षिपन्भूमौ
जरां यावन्न याति तत्॥ ३६॥ गूढोच्छ्वासः अस्फुटोच्छ्वासः॥ नष्टविभ्रांतमानसः ने

॥१६॥

दुःसर्वथा मतीहीनं चिमग्नं तं ज्ञौ सर्पादिस्तानयुक्तं मानसं यस्य रुक्षः ॥ जरांजीर्णतां
ततमयं ॥१६॥ अथ विषजस्य मूर्छायस्य लक्षणमाह ॥ वेपथुस्वप्नतृष्णाः स्युस्तमश्च
विषमूर्छिते ॥ वेदितव्यं तीव्रतरं यथास्वं विषलक्षणं ॥१७॥ विषस्य मूलकंदफलप
त्रक्षीरादिभेदभिन्नस्य यथास्वं यल्लक्षणमुक्तं सौश्रुतकल्पस्थाने तल्लक्षणम
स्यापेक्षया तीव्रतरं वेदितव्यं ॥१७॥ ननु शंखानाशे नसाधर्म्यान्मूर्छाभ्रमतंद्रादीनां को
भेद इत्यत आह ॥ मूर्छा पित्ततमःप्राया रजःपित्तानिलाद्भ्रमः ॥ तमोवातकफात्तंद्रा नि
द्रा श्लेष्मतमोद्भवा ॥१८॥ रजःपित्तानिलाद्भ्रम इति नात्र समुच्चयः ॥ केवलपित्तज्वरे
भ्रमस्योक्तत्वात ॥ भ्रमश्चक्रारूढस्येव भ्रमदृष्टित्वं ॥ स्वदेहस्य भ्रमत इव ज्ञानं वा ॥१६॥
निद्रा तंद्रयोश्लैष्मिकत्वेन कारणानि व्यस्तसमस्तानीति मधुकोशाकृत ॥१८॥ अपतं

द्रालक्षणमाह ॥ इंद्रियार्थेष्वसंवित्तिर्गौरवंजृंभणंक्लमः ॥ निद्रार्त्तस्येवयस्येतितस्य
तंद्रांविनिर्दिशेत ॥१९॥ इंद्रियाणामर्थैः प्रयोजनंयेषु अर्थादिविषयेषु असंवित्तिः अ
सम्यक्ज्ञानं ॥ निद्रायांप्रगुरुत्वस्यक्लमाभावस्तंद्रायांप्रबोधितस्यापिक्लमस्त्वनयोर्भे
दः ॥१९॥ अथक्लमस्यलक्षणमाह ॥ योनायासःश्रमोदेहेप्रवृद्धःश्वासवर्जितः ॥ क्लम
सइतिविज्ञेयइंद्रियार्थप्रबाधकः ॥२०॥ इंद्रियाणांबुद्धींद्रियाणांकर्मेंद्रियाणांचअ
र्थःप्रयोजनंविषयग्रहणंतस्यप्रबाधकः ॥२०॥ अथनिद्रालक्षणमाह ॥ यदातुमन
सिक्लांतेकर्मात्मानःक्लमान्विताः ॥ विषयेभ्योनिवर्त्तंतेतदास्वपितिमानवाः ॥२१॥
क्लांतेम्लानेश्रांतेइतिपाठः ॥ कर्मात्मानःकर्मेंद्रियाणिज्ञानेंद्रियाणिच ॥ क्लमान्वि
ताःश्रांताः ॥२१॥ अथसंन्यासस्यसंप्राप्तिपूर्वकंलक्षणमाह ॥ वाग्देहमनसां

॥१८८॥

चेष्टामाक्षिप्यातिबलामलाः॥ संन्यस्यं स्यवलजं तु प्राणायतनमाश्रिताः॥ २२॥ संन्या
संन्यास संन्यस्तः काष्ठीभूतो मृतोपमः॥ प्राणैर्विमुच्यते शीघ्रं मुक्त्वा सद्यः फलां
क्रियां॥ २२॥ आक्षिप्य विनाश्य॥ अतिबला इत्यनेन मूर्छारंभकदोषेभ्यो धिकत्वेन
प्रवृद्धा दोषास्तमश्चेति बोधयंति॥ संन्यस्यंति मूर्छयंती॥ प्राणायतनं हृदयं॥
संन्यास संन्यस्तः संन्यासमूर्छितः॥ काष्ठीभूतः अत निश्चलत्वेनाकाष्ठमेव काष्ठ
वद्भूतः क्रियारहित इति यावत॥ अतरा एव मृतोपमः॥ सद्यः फलां क्रियां शूचीव्य
धनांजनावपीडनकपिकच्छूघर्षणावच्छिन्नकादिदंशनादिरूपां॥ मुक्त्वेति पदाउ।
क्त्वा क्रियानु क्रियते तदा प्राणैर्विमुच्यते॥ अन्यथा तु जीवतीति॥ २२॥ २३॥ अथ सं
न्यासस्य मूर्छादितो भेदमाह॥ दोषेषु मदमूर्छायागतवेगेषु देहिनः॥ स्वयम

१८८॥

ष्पुपरुणान्ध्यंतिसंज्ञ्यासौनौषधैर्विना ॥ २४ ॥ मदमूर्छायाः मदः अवृद्धउन्मादः ॥ मूर्छा
याः मूर्छाः ॥ २४ ॥ इति मूर्छाभ्रमतंद्रानिद्रासंज्ञ्यासनिदानं ॥ अथ मूर्छादीनां चिकि
त्सा ॥ सेकावगाहा मणयः सहाराः शीताः प्रदेहा व्यजनानिलाश्च शीतानि पाना
नि च गंधवंति सर्वासु मूर्छास्व निवारितानि ॥ मणयश्चंद्रकांतादयः ॥ सर्वासु मूर्छा
स्व निवारितानीत्यस्यायमभिप्रायः ॥ सेकादीन्यन्यासु मूर्छासु हितान्येव किंतु या
तश्लेष्मजास्वपि मूर्छासु न निवारितानि तत्रापि पित्तस्य प्राधान्यात ॥ कोलमज्जो
षणोशीरकेसरं शीतवारिणा ॥ पीतं मूर्छां जयेल्लीढा कृष्णा वा मधुसंयुता ॥ शीते
नतोयेन मज्जनं मरणात्तं कृष्णां च पथ्यां मधुनावलिह्यात ॥ कुर्याच्च नासावदनाव
रोधं क्षीरं पिवेद्वाप्यथ मानुषीणां ॥ द्राक्षासितादाडिमलाजवंतिकल्हारनीलो

॥१८८॥

मलयमवंति ॥ पिबेत्कषायाशिाचशीतलानि पित्तज्वरेयानि च यापयंति ॥ शिरीषवी
जगोमूत्रकृष्णामरिचसैंधवैः ॥ अंजनं स्याल्लबोधाय सरसोनशिलावचैः ॥ अंजनं
लशुनगोरच्यं मधुसिंधुशिलोषणैः ॥ प्रमोहहृद्रोहि भवतिभाषितं भिषजां वरैः ॥ मूर्च्छा
मदं विहन्यान्नस्ये प्रयुक्तं तथाः स्तन्यं ॥ समधुत्रिफलानि शिग्रुयुक्तासग्गुडं प्रातरप्या
द्रकं तथैव ॥ दिनसप्तकतो जयत्यवश्यं मदमूर्च्छापरिशोषकामलादीन् ॥ पिबेद्दुरा
लभाकाथं सघृतं भ्रममात्तये ॥ शुंठीकूष्माण्डतक्रानां समभागानां पलं पलं ॥ गुडस्य
षट्पलान्येषा गुटिका भ्रमनाशिनी ॥ ताम्रं दुरालभाकाथैः पीतं तु घृतसंयुतं ॥ नि
वारयेद्भ्रमं शीघ्रं नात्र कार्या विचारणा ॥ महौषधामृताद्राक्षा पुष्करग्रंथिकोद्भ
वं ॥ पिबेत्करणापुतं क्वाथं मूर्च्छामदनिवृत्तये ॥ स्विन्नं धात्रीफलं पिष्टं शुंठीद्राक्षा

॥१८८॥

नुयोजितं॥ त्रिद्धामधुप्लुतंमूर्छाःकासंश्वासंचनाशयेत्॥ मूर्छारक्तोद्भवाज्ञेयाविधि
नाशीतलेनच॥ मद्यजायांपिबेन्मद्यंनिद्रांकुर्य्यात्सुखेनवा॥ विषोत्थायांतुमूर्छायां
विषघ्नंभेषजंचरेत्॥ घृतंधात्रीरसैःसिद्धंपथ्याक्वाथेनवापिबेत्॥ घृतंपर्युषितं
तोयंमदमूर्छानिवारणं॥ अथरसः॥ कणामधुप्लुतंसूतंमूर्छायांप्राशयेद्भिषक्॥ सू
तमारितं॥ ताम्रचूर्णंसमोशीरकेसरंशीतवारिणा॥ पीतंमूर्छांद्रुतंहन्याद्रक्तपित्त
भ्रांतिर्यथा॥ ताम्रचूर्णंमारितताम्रचूर्णं॥ अथपथ्यमाह॥ जीर्णशालिर्यवालोहितशाल
यश्चसिताहविर्मुद्गसतीनयूषः॥ धूमोंजनंनावनमस्रमोक्षोदाहक्रमःक्षीरपरितो
दनानि॥ लोम्नांकचानामपिलुंचनानिनखांतपीडादशनोपदंशः॥ क्रोधोभयंदुः
खकरीचशय्याविरेचनछर्दनलंघनानि॥ छायानितांभःस्नातधौतसर्पिर्मुद्

॥ २०० ॥

नितीक्ष्णानिचलाजमंडः ॥ पुराणकूष्मांडपटोलमोचहरीतकीदाडिमनालिकेरं ॥ माध
कपुष्पाणिचतंदुलीयंगव्यांपयोन्नानिलघूनिचापि ॥ उशीरनीरंशितचंदनानिक
पूरनीरंहिमवासकाच ॥ अल्पस्त्रेशब्दोद्भुतदर्शनानिगीतानिवाद्यान्यपिचोत्कटा
नि ॥ श्रमःस्मृतिर्जितनमात्मवोधोधैर्यंचमूर्छापितिपथ्यवर्गः ॥ अथापथ्यमाह
तांबूलंपत्रशाकानिदंतघर्षणमातपं ॥ विरुद्धान्यन्नपानानिव्यवायंस्वेदनंकटु ॥ ते
क्ष्णंद्रव्योवेगरोधंतक्रंमूर्छामयीत्यजेत ॥ इतिमूर्छाचिकित्सा ॥ अथमदात्ययादिनि
दानं ॥ तत्रमद्यस्यस्वभावमाह ॥ मद्यंस्वभावतःप्राणैर्यथैवान्नंतथास्मृतं ॥ अयु
क्तियुक्तंरोगाययुक्तियुक्तंयथामृतं १ ॥ यथैवान्नंदेहधारकस्वभावंतथामद्य
मपिस्मृतंकथितं ॥ अयुक्तियुक्तंअविधियुक्तं ॥ तस्माद्हितमपिविधिवि

॥ २०० ॥

विधिनोपयुक्तं हितं ॥ हितमप्यविधिनोपयुक्तमनर्थायभवतीत्यर्थः ॥ १ ॥ अत्रैव
दृष्टांतमाह ॥ प्राणाः प्राणभृतामन्नं तदयुक्त्या निहंत्यसून् ॥ विषं प्राणहरं तच्च यु
क्तियुक्तं रसायनं ॥ २ ॥ अयुक्त्येति अतिमात्रत्वादिना विषूच्यादिकं कृत्वा मारयती
त्यर्थः ॥ युक्तियुक्तमिति यथा चरककरसायनप्रयोगे उक्तं दोषवावत्रहेमस्तुति तेद्द्या
द्विषस्य चेति ॥ अत्र तिलं तिलप्रमाणमित्यर्थः ॥ २ ॥ विधिनोपयुक्तस्य फलमाह ॥ वि
धिनामात्रया काले हितैरन्नैर्यथा सुखं ॥ प्रहृष्टो यः पिबेन्मद्यं तस्य स्यादमृतं यथा ॥ ३ ॥
विधिनाकृतशरीरसंस्कारः शुचिरुक्तमगंधज्ञान॥ उद्दाममगंधिभिः स्फीतैर्मृदुभि
र्वसनैर्वृतः ॥ विचित्रविविधस्रग्वीरत्नाभरणभूषितः ॥ सानंदः सावधानश्च पि
बेन्मद्यं शनैः शनैः रित्येवं रूपेण ॥ मात्रया तेत्रांतरोक्तया सात्म्यया ॥ शुद्धकायः

॥२०१॥

पिबेन्मद्यंसोपदंशंपरद्द्रव्यं॥मध्याह्नेद्विगुणंतच्चसुस्निग्धंभक्षयेदनु॥प्रदोषेषट्प
लंतद्वन्मात्रामद्यरसायने॥अनेनविधिनासेव्यंमद्यंनित्यमतंद्रितैरिति॥ष्टुद्व्का
यःविसर्पमूत्रमलः॥एतद्द्रव्यंपारिशेष्यात्पूर्वाह्नेबोद्धव्यं॥अतंद्रितैःमात्रायांसाव
धानैःकारत्इतियस्मिन्कालेयादृशमद्यमुचितंतस्मिन्तादृशंदेयं॥यथाग्रीष्मे
शीतंमधुरंमाध्वीकादि॥शीतेउष्णंतीक्ष्णंगौडिकपैष्टिकादि॥हितैरन्नैःवक्ष्यमा
णैःस्निग्धादिभिः॥३॥किंच॥स्निग्धैःसादन्नैर्मांसैश्चभक्ष्यैश्चसहसेवितं॥भवेदा
युःप्रकर्षायबलायोपचयायच॥४॥स्निग्धैरित्युपलक्षणं॥तेनान्यैरपिमद्यवि
परीतगुणैरितिबोद्धव्यं॥अन्नभक्ष्याभ्यांलब्धमपिमांसग्रहणंविशेषेणहि ॥२०१॥
तत्वोपदर्शनार्थं॥बलेशक्तिःउपचयःस्थौल्यं॥४॥अपरमपिविधिसेवायां

णमाह ॥ कान्यता मनस्तुष्टिस्तेजो विक्रमएव च ॥ विधिवत्सेव्यमानैस्तु मद्यैः संनि
हिता गुणाः ॥ ५ ॥ कान्यता कमनीयमूर्तिता ॥ मनस्तुष्टिः संतोषः ॥ तेजः उत्साहः
विक्रमः पराभिभवार्थं यत्नवती शरीरचेष्टा ॥ ५ ॥ मदस्त्रिलक्षणो भवति ॥ एको
मदोधिकसत्वगुणस्य पुंसो भवति ॥ द्वितीयोधिकरजोगुणस्य ॥ तृतीयोधिक
तमोगुणस्य ॥ अत एवोक्तं च रके ॥ प्रधानाधममध्यानां रुक्माणां व्यक्तिदर्शि
कः ॥ यथाग्निरेवं सत्वानां मद्यं प्रकृतिदर्शकमिति ॥ तत्र सात्विकस्य मदस्य
लक्षणमाह ॥ बुद्धिस्मृतिप्रीतिकरः सुखश्च पानान्न ॥ निद्रारतिवर्द्धनश्च
संपाठगीतश्चरवर्द्धनश्च प्रोक्तो हि रम्यः प्रथमो मदो हि ॥ ६ ॥ बुद्धिरनुभवः
स्मृतिरनुभूतानुसंधानं ॥ प्रीतिः पैरमैत्री ॥ सुखः सुखवतीति सुखः

॥२०२॥

सुखकर इत्यर्थः ॥ पानेत्यादि पानादिष्वनुरागवर्द्धनः ॥ संपाठः संमुक्तपाठः ॥ अतिर
म्यः मनोधिकारित्वेपि न दुःखकरः ॥ प्रथमः प्रथमगुणाधिकारित्वात् प्रथमः ॥ एवं
द्वितीयस्तृतीयश्च ॥ ३ ॥ अथ राजसमदस्य लक्षणमाह ॥ अव्यक्तबुद्धिस्मृतिवाक्
विचेष्टः सोन्मत्तलीलाकृतिरप्रमतः ॥ आलस्यनिद्राभिहतो मुहुश्च मद्येन मत्तः पु
रुषो मदेन ॥ १ ॥ अव्यक्तेत्यत्र इत्य दर्पेनज ॥ विचेष्टः विरुद्धचेष्टः ॥ उन्मत्तस्य लीलाकृ
तिर्यां स हितः सोन्मत्तलीलाकृतिः ॥ उन्मत्तप्राय इत्यर्थः ॥ अप्रमत्त इत्यत्र अप्रशांत इ
ति पाठे प्रचंड इत्यर्थः ॥ १ ॥ अथ तामसस्य मदस्य लक्षणमाह ॥ गच्छेदगम्यान्न गु
रूंश्च मन्येत्खादेदभक्ष्याणि च नष्टसंज्ञः ॥ कृपाश्च गुह्यानि हृदि स्थितानि मदे तृ
तीये पुरुषो स्वतंत्रः ॥ य अगम्यान् गुरुदारादीन् ॥ मन्येदिति परस्मैपदमार्षं ॥

॥२०२॥

नष्टसंज्ञः नष्टज्ञानः गुह्यानि गोप्यानि ॥ अस्वतंत्रः मदवशगः ॥ य ॥ यद्यपि मदात्यय

एव तथापि सुश्रुतानुरोधात् ॥ अतितामसमदलक्षणमाह ॥ चतुर्थे स्यान्मदे मूढो

भग्नदार्विव निष्क्रियः ॥ कार्याकार्य विभागज्ञो मृतादप्यपरो मृतः ॥ दी ॥ को मदं ता

दृशं गच्छेदुन्मादमिव चापरं ॥ बहुदोषमिवं मूढः कांतारं स्ववशः कृती ॥ १० ॥ मूढः

मोहयुक्तः ॥ कार्याकार्य विभागज्ञः कार्याकार्य विभागयो रज्ञः ॥ मृतादप्यपरो

मृत इति मृतमप्यपेक्ष्यापरो यं मृत इव ॥ कः कृती सुकृती कृतकृतो वा स्ववशः अ

पराधीनः तादृश मुक्तप्रकारेण निंदितं अपरमुन्मादमिव स्थितं मदं बहुदोषं

हिंस्रादियुक्तं कांतारं दूरतरमध्वानमिव गच्छेत् स्वायंभूपात ॥ टी ॥ १० ॥ अथ मदात्यया

नां निदानान्याह ॥ विषस्य ये गुणाः प्रोक्ताः सन्निपातप्रकोपणाः ॥ त एव मद्ये दृ

॥२०३॥

श्यंते विषैस्तु बलवत्तरा॥११॥ तस्माद्विधिपीतेन तथामात्राधिकेन च॥ युक्तेन चाहिते
रन्नैरकालेसेवितेन च॥ मद्येन खलु जायंते मदात्ययमुखा गदाः॥१२॥ विषस्य ग्रेग्रा
मुर्छानिदाने प्रोक्ताः॥ अहितैरसात्म्यै॥११॥१२॥ अथाविधिप्रयुक्तं मद्यं विकारांतरमु
त्पादयतीत्याशयेनाह॥ निर्भुक्तमेकांतत एव मद्यं निषेव्यमाणं मनुजेन नित्यं॥
उत्पादयेत्कष्टतमान् विकारानुत्पादयेच्चापि शरीरभेदं॥१३॥ एकांततो नैरंतर्येण
विकारान् मदात्ययादीन्॥ शरीरस्य भेदं नाशः॥१३॥ मदात्ययादीनां हेत्वंतरमाह॥ क्रुद्धे
न भीतेन पिपासितेन शोकाभितप्तेन बुभुक्षितेन॥ व्यायामभाराध्वपरिक्षतेन वे
गावरोधाभिहतेन चापि॥१४॥ अत्यम्लभक्षावततोदरेणसाजीर्णभुक्तेन तथा
बलेन॥ उष्माभितप्तेन च सेव्यमानं करोति मद्यं विविधान् विकारान्॥१५॥प

॥२०३॥

रिक्षतेनक्षीरोनश्चवततंव्याप्तं॥१४॥१५॥तानेवविकारान्विब्रणोति॥पानात्ययं
परमदंपानाजीर्णमथापिच॥पानविभ्रममुग्रंचतेषांवक्ष्यामिलक्षणं॥१६॥तत्र
मदात्ययस्यसामान्यंलक्षणमाह॥शरीरदुःखंबलवत्संमोहोहृदयव्यथा॥अरु
चिःप्रततंतृष्णाज्वरःशीतोष्णलक्षणः॥१७॥शिरःपार्श्वास्थिसंधीनांवदनाऽवे
क्षतेऽपथा॥गीयतेतिवलाज्ञंभास्फुरणंवेपनंश्रमः॥१८॥उरोविबंधःकासश्च
श्वासोहिक्काप्रजागरः॥शरीरकंपःकर्णाक्षिमुखरोगास्त्रिकग्रहः॥१९॥छर्दि
र्विड्भेदउत्क्लेशोवातपित्तकफात्मकः॥भ्रमःप्रलापोरूपाणामसतांचैवदर्शनं॥
२०॥तृणभस्मलतापर्णपांशुभिश्चावपूरणं॥प्रधर्षणंविहंगैश्चभ्रांतचेताःस
मन्यते॥२१॥व्याकुलानामशस्तानांस्वप्नानांदर्शनानिच॥मदात्ययस्यरूपाणि

॥२०४॥

सर्वाण्येतानिलक्षयेत् ॥२२॥ अथवातिकस्यमदात्ययस्यनिदानमाह ॥ स्त्रीशोकभय
भाराध्वकर्मभिर्योतिकर्षितः ॥ रूक्षाल्पप्रमिताशीचयःपिवेत्यतिमात्रया ॥२३॥ रूक्षंप
रिणतंमद्यंनिशिनिद्रांनिहत्यच ॥ करोतितस्यतच्छीघ्रंवातप्रायंमदात्ययं ॥२४॥
प्रमितमल्पं ॥ ततमद्यं ॥ वातप्रायमित्यनेनसर्वेमदात्ययास्त्रिदोषजाऽउद्भूतेनव्य
पदेशाः ॥ यदाहचरकः ॥ येविषस्यगुणाहृत्यारभ्ययावत्सर्वेमदात्ययंविद्यात्त्रिदो
षजमिति ॥२३॥२४ अथतस्यलक्षणमाह ॥ हिक्काश्वासशिरःकंपपार्श्वशूलप्र
जागरैः ॥ विद्याद्बहुप्रलापस्यवातप्रायंमदात्ययं ॥२५॥ अथपैत्तिकस्यनिदानमाह
तीक्ष्णोष्णंमद्यमम्लंचयोतिमात्रंनिषेवते ॥ अम्लोष्णतीक्ष्णभोजीचक्रोधनो
ग्न्यातपप्रभः ॥ तस्योपजायतेतीव्रःपित्तप्रायोमदात्ययः ॥२६॥ अथतस्यलक्ष

॥२०४॥

णमाह॥ तृष्णादाहज्वरस्वेदमोहातिसारविभ्रमैः॥ विद्याद्धरितवर्णस्य पित्तप्रायं
मदात्ययं॥ १४॥ विभ्रमो भ्रमः हरितवर्णस्येति पित्तलक्षणं॥ १४॥ अथ श्लैष्मिकस्य
निदानमाह॥ मधुरस्निग्धगुर्वन्नीयः पिबत्यतिमात्रया॥ अव्यायामदिवास्वप्नश
य्यासनसुखैरतः॥ मदात्ययं कफप्रायं स नरो लभते ध्रुवं॥ १५॥ अथ तस्य लक्षण
माह॥ छर्द्यरोचकहृल्लासतन्द्रास्तैमित्यगौरवैः॥ विद्याच्छीतपरीतस्य कफप्रायं म
दात्ययं॥ १६॥ अथ सान्निपातिकस्य मदात्ययस्य निदानं लक्षणं चाह॥ त्रिदोषैः
हेतुभिः सर्वैर्लिंगैः सर्वैर्मदात्ययः॥ १७॥ त्रिदोषो मदात्ययः हेत्वादिभिर्ज्ञेय इति शे
षः॥ १७॥ अथ परमदमाह॥ श्लेष्मोच्छ्रयोंगगुरुता विरसास्यता च विण्मूत्रशक्तिर
थ तंद्रिररोचकश्च॥ लिंगं परस्य तु मदस्य वदंति तज्ज्ञास्तृष्णारुजाशिरसि संधिषु

॥२०५॥

याविभेदः ॥ ३० ॥ श्लेष्मोत्थमत्ययमात्रनासाक्ष्यायादिना वोद्धव्यः ॥ सक्तिः संगः अप्रवृत्ति
रिति यावत् ॥ तद्विस्त्रेद्रा ॥ परस्य मदस्येति समासानिर्देशः छेदो नु रोधात् ॥ ३० ॥ अथ पा
नाजीर्णमाह ॥ आध्मानमुग्रमथ चोद्गिरणं विदाहः पाने त्वजीर्णमुपगच्छति लक्ष
णानि ॥ ३० ॥ उद्गिरणं यातिरुद्गारो वा ॥ पीयत इति पानं मद्यं ॥ अजीर्णमपक्वतां ॥ ३० ॥
अथ पानविभ्रममाह ॥ हृद्गात्रतोदकफसंस्रवकंठधूममूर्छावमिज्वरशिरोरुजन
प्रदेहाः ॥ द्वेषः सुरान्नविकृतेषु च तेषु तेषु तं पानविभ्रममुशंत्यखिलेषु धीराः ॥
३१ ॥ कंठधूमः कंठाद्धूमनिर्गम इव ॥ शिरोरुजनं शिरःशूलं प्रदेहः कफेनलिप्तास्य
ता ॥ सुरान्नविकृतेषु सुराविकारेषु मैरेयादिषु अन्नविकारेषु लड्डुकादिषु तेषु ॥२०५॥
तेषु नानाप्रकारेषु ॥ अखिलेषु मद्यविकारेषु मध्ये ॥ उशंति इच्छंति ॥ ३१ ॥ अथ पा

साध्यासाध्यानां मदात्ययादीनां लक्षणमाह ॥ हीनोत्तरोष्ठमतिशीतममंददाहं तैलप्रभास्य
मतिपानहतं त्यजेच्च जिह्वौष्ठदंतमसितं त्वथवापि चैयानेहतं त्यजेत्तु नीलं पीते यथ
स्य नयने रुधिरप्रभे च ॥ हिक्काज्वरौ वमथुवेपथुपार्श्वशूलाः कासभ्रमावपि च पान
हतं त्यजेत्तं ॥ ३२ ॥ हीनोत्तरोष्ठं मलं यो परितमौष्ठं ॥ अतिसीतं वहिः ॥ अमंददाह मभ्यं
तरे ॥ तैलप्रभास्यं तैलाक्तमुखमिव ॥ ३२ ॥ अपचरकोक्तौ ध्वंसकविक्षेपकाख्यौ म
द्यविकारावाह ॥ विच्छिन्नमद्यः सहसा यो तिमद्यं निषेवते ॥ ध्वंसो विक्षेपकश्चैव
रोगस्तस्योपजायते ॥ ३३ ॥ श्लेष्मप्रसेकः कंठस्य शोषः शब्दासहिष्णुता ॥ तंद्रानिद्रा
तियोगश्च ज्ञेयं ध्वंसकलक्षणं ॥ ३४ हृत्कंठरोगः संमोहः छर्दिरंगस्य रुक् ज्वरः
तृष्णा कासः शिरःशूलमेतद्विक्षेपलक्षणं ॥ ३५ ॥ इति मदात्ययादिनिदानं ॥ अप

द

॥२०६॥

मदात्ययादिचिकित्सा ॥ मंथः खर्जूरमृद्वीकावृक्षाम्लाम्लीकदाडिमैः ॥ परूषकैः साम
लकैर्युक्तो मद्यविकारनुत् ॥ हिंगुसौवर्चलं तंचव्यं जीरकं विश्वदीप्यकं ॥ चूर्णं मद्येन पा
तव्यं पानात्ययरुजापहं ॥ त्रिफलायारसः पीतो व्योषचूर्णसमन्वितः ॥ शुक्तामलक
जो यूषो हंति पानात्ययं गदं ॥ क्षुद्राधान्यपरूषकामरतुटीजीरैः सनागोषणैः संपे
लं ससितं मधुकसहितं युक्तं दधित्थद्रवैः ॥ कर्पूरेण सुवासितं मदगदान्पीतं जये
त्पानकं हृद्यं रोचनमग्निदीपनमिदं पूर्वैर्भिषग्भिः स्मृतं ॥ पीत्वा तु मद्यमचिरं द
नु सीधु शर्करा सघृता ॥ अतितीक्ष्णमद्यजातां मादकतामप्ययाकुरुते ॥ कूष्मांडजो
गुडयुतः स्वरसो निहंति पीतस्तु कोद्रवमदं ससितं पयस्तु ॥ धत्तूरजं मदमपाकुरुते
प्रयोगमात्रात् पिपीतमतिशीतजलं सह लोन ॥ आघ्राणतो निहन्त्याद्रव्यकरीषं तु पू ॥२०६॥

गमदं ॥ लवलीं तथा सिता वाथ्येता हन्यान्मदमुपचिरात् ॥ जातीफलमदं शीघ्रं हंति पथ्या
निषेविता ॥ शीततोयावगाहश्च शर्करा दधियोजिता ॥ धात्रीस्वरसनिपीता रसगं
धककज्जली सितासहिता ॥ हरति मदात्ययरोगान्नाश्रुगहन्ता निवोरग्गान् सहसा
इति कज्जली रसः ॥ किंच ॥ मद्योत्थानां तु रोगाणां मद्यमेव हि भेषजं ॥ यथा दहनदग्धा
नां दहनस्वेदनं हितं ॥ मिथ्याविहीनमद्येन यो व्याधिरुपजायते ॥ समेनैव निपीते
न मद्येन स हि शाम्यति ॥ सौवर्चलं जीरकं च वृक्षाम्लं साम्लवेतसं ॥ एकैकं कर्षमात्रं स्या
त् त्वगेलामरिचानि च ॥ प्रत्येकमर्द्धकर्षाणि सर्वतुल्या च शर्करा ॥ लवणाष्टकनामे
दं चूर्णं पानात्ययापहं ॥ इति लवणाष्टकं चूर्णं ॥ मधुना हंत्यफयमुस्ता त्रिफला
रात्रौ गुडार्द्रकं प्रातः ॥ सप्ताहात्पथ्यभुजां मदमूर्च्छाकामलोन्मादान् ॥ धात्रीरसे

॥२०७॥

न संसिद्धं पथ्याक्वाथेन वा घृतं । कल्याणकं घृतं वापि मदमूर्छाहरं पिबेत् ॥ कल्याणकं घृतं ज्व
रचिकित्सोक्तं ॥ अथ पथ्यमाह ॥ संशोधनं संशमनं स्वपनं लंघनं श्रमः ॥ संवत्सरसमु
त्पन्नाः शालयः षष्टिका यवाः ॥ मुद्गाढकमाषा गोधूमाः सतीनाः रागखांडवाः ॥ वेसवारो
विचित्रान्नं हृद्यं मद्यं पयः सिता ॥ तंदुलीयं पटोलं च मातुलुंगं परूषकं ॥ खर्जूरं दाडि
मं धात्री नारिकेरं च गोस्तनी ॥ सर्पिः पुराणं कर्पूरं मतीरं शिशिरोनिलः ॥ धारागृहं चं
द्रपादा मणयो मित्रसंगमः ॥ क्षौमांबरं प्रियाश्लेषो गीतवादित्रमुत्कृतं ॥ शीतांबु चं
दनं स्नानं सेव्यमेतन्मदात्यये ॥ अथापथ्यमाह ॥ स्वेदांजनं धूमपानं नावनं दंतघर्षणं
तांबूलं चेत्यपथ्यं स्यान्मदात्ययविकारिणां ॥ इति मदात्ययादिचिकित्सा ॥ अथ दा ॥२०७॥
हनिदानं ॥ तत्र दाहः सप्तविधः ॥ तत्रादौ मद्यजं दाहमाह ॥ त्वचं प्राप्य सपानोष्मापि

त्तरक्ताभिमूर्छितः॥ दाहं प्रकुरुते घोरं पित्तवत्तत्र भेषजं॥१॥ सः प्रसिद्धः पानोष्माम
द्यपानजनितउष्मा॥ पित्तरक्ताभिमूर्छितः॥ पित्तरक्ताभ्यां वर्द्धितः॥ समानोष्मेति
पाठांतरमप्युक्तं॥ सुश्रुते पानात्यये अस्य श्लोकस्य पाठात्॥ पित्तजोप्ययं हेतुभेदा
त्पृथक्पठितः॥१॥ अथ पित्तरक्तजा दाह॥ पित्तज्वरसमः पित्ताद्दाहः स्यात्तस्य सक्रमः॥
कृत्स्नदेहानुगं रक्तमुद्रिक्तं दहति ध्रुवं॥२॥ संधूप्यते चोष्यते च ताम्राभस्ताम्रलोचनः॥
लोहगंधांगवदनो वन्हिनेवावकीर्यते॥३॥ पित्तज्वरसमः पित्तज्वरतक्षणयुक्तः॥
पित्तज्वरे अरत्यामाशयदुष्टिछर्द्यादयो अधिका इति भेदः॥ तस्य दाहस्य सः पि
त्तज्वरोक्तः क्रमश्चिकित्सा॥ उद्रिक्तं अतिरिक्तं सत्॥ दहति दाहाख्यं व्याधिं करोति
संधूप्यते आज्जिनादहृतरव॥ उष्यते समीपस्थेनेव वन्हिना तप्यते॥ च्फष्यतर

॥२०८॥

तिपाठांतरे आचूषलोनेव पीडामनुभवतीत्यर्थः ॥ वन्हिनेवावकीर्यतिशरीरे परिवन्हि
प्रतिप्यतइव ॥ २११ ॥ अथ शस्त्रादिक्षतनिःसृतरक्तपूर्णकोष्ठजमाह ॥ अस्रजापूर्ण
कोष्ठस्य दाहोपःस्यात्सुदुस्तरः ॥ ३ ॥ अस्रजा शस्त्रादिक्षतान्निःसृतेन रक्तेन ॥ नचोक्त
रक्तजेनास्यपौनरुक्त्यं ॥ कृत्स्नदेहानुगामितिवचनात्कारणभेदाच्च ॥ ३ ॥ अथ तृषा
निरोधजमाह ॥ तृष्णानिरोधादब्धातौ क्षीणे तेजः समुद्धतं ॥ सबाह्याभ्यंतरं देहं प्रद
हेन्मंदतेजसः ॥ संशुष्कगलताल्वोष्ठो जिव्हां निष्कास्य वेपते ॥ ४ ॥ अब्धातौ रसे क्षीणे
क्षयं प्राप्ते ॥ तेजः पित्तोष्मा समुद्धतं वृद्धं ॥ मंदचेतसः अल्पबुद्धेः ॥ यतस्तेन तृषा निरोधः
कृतः ॥ ४ ॥ अथ धातुक्षयजमाह ॥ धातुक्षयोत्थो यो दाहस्तेन मूर्छा तृषान्वितः ॥ क्षाम
स्वरः क्रियाहीनः ससीदेद्भृशपीडितः ॥ ५ ॥ धातवो रसादयः ॥ क्रियाहीनो निश्चे ॥२०८॥

षः ॥ सीदेत् म्रियेत ॥ ५ ॥ अथ मर्माभिघातजमाह ॥ मर्माभिघातजोऽप्यस्ति सोऽसाध्यः
सप्तमो मतः ॥ ६ ॥ मर्माणि शिरोहृदयवस्त्यादीनि ॥ ६ ॥ अथासाध्यदाहमाह ॥ सर्वरी
रहिवर्ज्याः स्युः शीतगात्रस्य देहिनः ॥ ६ ॥ इति दाहनिदानं ॥ अथ दाहनिदानेचि
कित्सा ॥ प्रातः सशर्करः पेयो हिमो धान्याकसंभवः ॥ अंतर्दाहं तथा तृष्णां जयेत् स्रो
तोविशोधनः ॥ स्नातधौतघृताभ्यंगो धान्याम्लैश्च विलेपनं ॥ कोलामलकसंयुक्तैः
शस्यते दाहरोगिणः ॥ छादयेत्तस्य सर्वांगमारनालार्द्रयासस्सा ॥ पित्तज्वरेसुपक्रांतो
मर्लैलेपनमौषधं ॥ तच्च सर्वं प्रयोक्तव्यं दाहार्त्तस्य भिषग्वरैः ॥ रसवलिघनसारयं
दनानांसनलदसेव्यपयोदजीवनानां ॥ अपहरति गटीमुखास्थितेयं सकलसमु
त्थितदाहमाशु येमेयं ॥ इति रसादिगुटी ॥ प्रत्येकं तोलमादाय सूतेतामृं तथाभ्रकं

॥२०८॥

द्विगुणं गंधकं चैव कृत्वा कज्जलिकां शुभां ॥ मुस्ता दाडिमतोयेन केतकीमूलवारिणा
सहदेव्या कुमार्याश्च पर्पटोशीरयोरपि ॥ तालमूल्या शतावर्य्या भावयित्वा दिनं दि
नं तिक्ता गुडूची सत्वं च पर्पटोशीरमागधी ॥ श्रीखंडं सारिवा चैषां समानं चूर्णकं
क्षिपेत् ॥ द्राक्षाफलकषायेण सप्तधा परिभावयेत् ॥ छायाशुष्कं विधायाथ वटिका
र्य्याचणोपमा ॥ महाचंद्रकला नाम्ना रसेंद्रोयं निरूपितः ॥ अम्लपित्तप्रशमनः प्रद
रध्वंसकारकः ॥ अंतर्बाह्यमहादाहविध्वंसनकरः परं ॥ ग्रीष्मकाले शरत्काले विशे
षेण प्रशस्यते ॥ रसो मूर्छां रक्तपित्तज्वरदावानलापहः ॥ मूत्रकृच्छ्राणि सर्वाणि प्र
मेहानपि दुस्तरान् ॥ हरत्येष रसो नूनं महाचंद्रकलाभिधः ॥ इति महाचंद्रकलारसः
खर्जूरामलबीजानि पिप्पली च शिलाजतु ॥ एलामधुकषायालं चंदनैर्वीरबीज ॥२०८॥

कं ॥ धान्यकं शर्करायुक्तं पातव्यं यष्टिवारिणा ॥ अंगदाहं हतिं गदाहं गुदवं क्षरणं शुक्रजं ॥
नाशयेन्मूत्ररोगांश्च तथा शुक्रमहाशनयि ॥ शर्करामरिच्युतं सम्यग्वर्ष्यं बलकरं परं ॥ शर्क
रात्र सर्वौषधसमा ॥ यष्टिवारिणा यष्टीमधुकषायेण ॥ इति खर्जूरादिचूर्णं ॥ कुष्माण्डै
र्जीरकाद्यैश्च शालिपर्ण्यादिभिर्घृतं तैलं वा साधितं हंति दाहं पित्तसमुद्भवं ॥ अथ पथ्य
माह ॥ शालयः षष्टिका मुद्गा मसूराश्च लाजा यवाः ॥ शतधौतघृतं दुग्धं नवनीतं पयोभ
वं ॥ कूष्मांडं कर्कटी मोचं पनसं स्वादु दाडिमं ॥ पटोलं पर्पटो द्राक्षा धात्रीफलं तपरूषकं ॥
वालतालं प्रियालं च चर्म्मरंगा टंकक सेरूकं ॥ मधूकपुष्पं खर्जूरं पथ्यानि तिक्तानि सर्वशः ॥
शीतप्रदेहा मृवेश्म सेकाभ्यंगावगाहनं ॥ पद्मोत्पलदलं क्षौमं शय्यासीतलकाननं
कथाविचित्रा गीतानि निशि सर्वो मंजुभाषिणः ॥ उशीरं चंदनालेपः शीतांबु शिशि

रनिलः॥ धारागृहं प्रियास्पर्शाः सक्तवा शर्करा तथा॥ सुधांशुरश्मयः स्नानं मरण्यो मधु-
रोरसः॥ इति दाहवतां नृणां पथ्यवर्ग उदाहृतः॥ अथापथ्यमाह विरुद्धान्नान्यपानानि
क्रोधो वेगविधारणं॥ गजाश्वयानमध्वानं क्षारपित्तकराणि च व्यायाममातपं तक्रं तां-
बूलं मधुरामठं॥ व्यवायं कटुतिक्तोष्णं दाहवान् परिवर्जयेत्॥ इति दाहचिकित्सा॥ अथो-
न्मादनिदानं॥ तत्रोन्मादस्य निरुक्तिमाह॥ मदयंत्युद्धता दोषा यस्मादुन्मार्गमाश्रिताः॥
मानसोऽयमतो व्याधिरुन्माद इति कीर्तितः॥१॥ अथ मदर्थः यस्माद्धेतोः उद्धताः प्रवृद्धा दो-
षा उन्मार्गमाश्रिताः मनोवहधमनीरूपमार्गमाश्रितं मदयंति चित्तं विक्षिपंति॥ अतो
यमुन्माद इति कीर्तितः॥ स उन्मादः मानसो व्याधिर्मतः मनोवैकृत्यकारणात्॥१॥ तस्यै-
वावस्थाभेदेन नामांतरमाह॥ स चाप्रवृद्धस्तरुणो मदसंज्ञां बिभर्त्ति च॥१॥ स उन्मादः

तद्रुग्णो न चीनः ॥१॥ अथोन्मादस्य विप्रकृष्टं निदानमाह ॥ विरुद्धदुष्टाशुचिभोजनं च प्रध
र्षणं देवगुरुद्विजानां ॥ उन्मादहेतुर्भयहर्षपूर्वो मनोभिघातो विषमाश्च चेष्टाः ॥२॥ दुष्टं
धत्तूरबीजादिसहितं ॥ अशुचिर्जलस्वलास्पृष्टादि ॥ प्रधर्षणमभिभवः ॥ भयहर्षपू
र्वः भयं हर्षो द्वौ पूर्वं यस्य सः ॥ पूर्वशब्दोत्र कारणवाची ॥ विषमाश्च चेष्टा बलवद्विग्रहा
दिः ॥२॥ अथ संनिकृष्टं निदानमाह ॥ एकैकशः सर्वशश्च दोषैरत्यर्थमूर्छितैः ॥ मान
सेन च दुःखेन स पंचविध उच्यते ॥ विषाद्भवति षष्ठश्च यथास्वं तत्र भेषजं ॥३॥ अथ त
स्य संप्राप्तिमाह ॥ तैरल्पसत्वस्य मलाः प्रदुष्टा बुद्धेर्निवासं हृदयं प्रदूष्य ॥ स्रोतांस्यधिष्ठा
य मनोवहानि प्रमोहयंत्याशु नरस्य चेतः ॥४॥ अल्पसत्वस्य अल्पसत्वगुणयुक्तस्य
मला वातादयः ॥ बुद्धेर्निवासं हृदयं प्रदूष्येति एतेनाश्रयस्य दुष्यत्वात् तदाश्रिताया बु

॥२३१॥

ऽऽ एषि दुष्टिरुक्ता ॥ मनोवहानि स्रोतांसि हृदयस्थानि दश ॥ एतानि दश विशेषतो वोद्धव्या
नि ॥ यतश्चरकेण सकलशरीरस्रोतांस्येव मनोधिष्ठानत्वेनोक्तानि ॥ प्रमोहयंति विकृ
तं कुर्वंति ॥ ४ उन्मादस्य सामान्यं रूपमाह ॥ धीविभ्रमः सत्वपरिप्लवश्च पर्याकुला दृष्टि
रधीरता च ॥ अबद्धवाक्त्वं हृदयं च शून्यं सामान्यमुन्मादगदस्य लिंगं ॥ ५ ॥ धीविभ्रमः
शुक्तिकायां रजतज्ञानमिव ॥ सत्वपरिप्लवः सत्वं मनस्तस्य परिप्लवश्चांचल्यं ॥ अधी
रता कातरत्वं अबद्धवाक्त्वं असंबद्धभाषित्वं ॥ शून्यं स्मृतिशून्यं ५ अथ वातिकोन्मा
दस्य निदानपूर्विकां संप्राप्तिमाह ॥ रूक्षाल्पशीतान्नविरेकधातुक्षयोपवासैरनिलो
ऽतिवृद्धः ॥ चिंतादिदुष्टं हृदयं प्रदूष्य बुद्धिं स्मृतिं चाप्युपहंति शीघ्रं ॥ ६ ॥ विरेकशब्देनात्र
वांतिरभिधीयते ॥ विरेचयति देहान्मलं पृथक्करोतीति विरेकः ॥ प्रदूष्य प्रकर्षेण

॥२३१॥

दूषयित्वा ॥ ६ ॥ अथ तस्यैव रूपमाह ॥ अस्थानहास्यस्मितनृत्यगीतवागंगविक्षेपरो-
दनानि ॥ पारुष्यकार्श्यारुणवर्णता च जीर्णे बलं चानिलजस्य रूपं ॥ ७ ॥ अस्थाने अ-
नवसरे हास्यादीनि रोदनांतानि ॥ तत्र स्मितमीषद्धासः ॥ जीर्णे आहारे ॥ बलं व्याधेः
॥ ७ ॥ अथ पैत्तिकस्य निदानपूर्विकां संप्राप्तिमाह ॥ अजीर्णकट्वम्लविदाह्यशीतैर्भोज्यै-
श्चितं पित्तमुदीर्णवेगं ॥ उन्मादमत्युग्रमनात्मकस्य हृदि स्थितं पूर्ववदाशु कुर्यात्
॥ ८ ॥ अशीतैः उष्णैः ॥ अनात्मकस्य अनात्मवतः ॥ पूर्ववद्धृदयं प्रदूष्येत्यर्थः ॥ ८ ॥ अथ त-
स्य पूर्वं रूपमाह ॥ अमर्षसंरंभविनग्नभावाः संतर्जनाभिद्रवणौष्ण्यरोषाः ॥ प्रच्छाय-
शीतान्नजलाभिलाषा पीता च भा पित्तकृतस्य लिंगं ॥ ९ ॥ अमर्षो असहिष्णुता ॥ संरंभः आ-
रभटो आडंबर इति यावत् ॥ विनग्नभावो विनग्नत्वं ॥ संतर्जनं परत्रासनं ॥ अभिद्र-

॥२१२॥

ढूरां पलायनं ॥ औष्ण्यं गात्रे चोष्मोद्भूदाहविशेषः ॥ मच्छायेत्यादि ॥ छायायां शीतयोरन्ना
न्नलयोरभिलाषः ॥ ८ ॥ अथ श्लैष्मिकस्य निदानपूर्विकां संप्राप्तिमाह ॥ संपूर्णैर्मंदवि
चेष्टितस्य सोष्मा कफो मर्मणि संप्रवृद्धः ॥ बुद्धिं स्मृतिं चाप्युपहंत्य चित्तं प्रमोहयन्
संजनयेद्विकारं ॥ १० ॥ संपूरणैः रतिभोजनादिभिः ॥ मंदविचेष्टितस्य व्यायामरहित
स्य सोष्मा कफः रतिकफोप्युन्मादं करिष्यन् पित्तसहायमपेक्षते ॥ व्याधिस्वभावात
मर्मणीति अत्र मर्मशब्देन हृदयमुच्यते ॥ विकारं उन्मादलक्षणं ॥ १० ॥ अथ तस्य रूपमा
ह ॥ वाक्चेष्टितं मंदमरोचकश्च नारीविविक्तप्रियता च निद्रा ॥ छर्दिश्च लाला च ब
ले च भुक्ते नखादिशौक्ल्यं च कफात्मके स्यात् ॥ ११ ॥ मंदं वाक्चेष्टितं अल्पं वचनं ॥
नारीविविक्तप्रियता नारीप्रियता विजनप्रियता च ॥ भुक्ते सति बलं व्याधेः आ ॥२१२॥

दिग्धत्वेन त्वङ्मांसादीनां ग्रहणं ॥११॥ अथ सान्निपातिकस्य निदानपूर्वकं लक्षणमा
ह ॥ यः सन्निपातप्रभवोऽतिघोरः सर्वैः समस्तैः स तु हेतुभिः स्यात् ॥ सर्वाणि रूपा
णि बिभर्त्ति तादृक् विरुद्धभैषज्यविधिर्विवर्ज्यः ॥१२॥ सः सान्निपातिक उन्मादः
सान्निपातग्रहणे नैव सर्वात्मकत्वे लब्धे पुनः सर्वैरिति यदुक्तं तेन रजस्तमः प्रा
पणार्थं ॥ तेन रजस्तमोमीलितरूपार्थः ॥ तेन वातादयो रजस्तमोभ्यां मनोदोषाभ्यां
मिलिताः ॥ समस्तैः अनिदानैः कुपिता उन्मादं जनयंति ॥ सर्वैर्हेतुभिः समस्तैर्मि
लितैः स्यात् ॥ यतोऽन्यो व्याधिः सर्वैर्हेतुभिर्मिलितैरेव भवतीति नियमो नास्ति ॥ अ
यं तु व्याधिः प्रभावात् सर्वैर्हेतुभिर्मिलितैरेव स्यात् ॥ तादृक् उन्मादः विरुद्धभैषज्य
विधिः ॥ अयमर्थः ॥ त्रिदोषजे प्रत्येकं वातादिप्रत्यनीका क्रिया कार्या सा च पर

॥२१३॥

स्परविरोधिनी ॥ त्रिदोषहरंचकिंचिदेव द्रव्यमामलकादितच्चायौगिकं नहिस
र्वाणि सर्वत्रयोग्यानिभवंति ॥ अतएवविवर्ज्यः नचिकित्स्यः ॥ ननुयद्येवंतदा
सर्वएवत्रिदोषजाविकाराअसाध्याभवेयुः ॥ तदुक्तं ॥ तादृगिति ॥ कोप्येषस्त्रिदो
षजसंप्राप्तिविशेषः येनायंविरुद्धभैषज्यविधिः नतुसर्वइत्यर्थः ॥ १२ ॥ मनोदुः
खजस्यविप्रकर्षंनिदानमाह ॥ चौरैर्नरेंद्रपुरुषैररिभिस्तथान्यैर्वित्रासितस्य
धनबांधवसंक्षयाद्वा ॥ गाढंक्षतेमनसिचप्रियया रिरंसोर्जायेतचोत्कटतरो
मनसोविकारः ॥ १३ ॥ अन्यैर्हिंस्रादिभिः ॥ गाढंअतिशयेन ॥ क्षते अहिंहते ॥ तथा भि
रिरंसोः कामुकस्याप्राप्तयाप्रियया क्षतेमनसीतिसंबंधः ॥ विकारः उन्माद ॥२१३॥
रूपः ॥ १३ ॥ अथतस्यरूपमाह ॥ चीत्वंब्रवीतिचमनोनुगतंविसंज्ञोगायत्य

षोहसतिरोदितिध्यायिमूढः ॥१४॥ चित्रं विविधं ॥ मनोनुगतं गोप्यमपि ॥ विसंज्ञः ।
विरुद्धस्थानः ॥ अतीवमूढः अतीवस्थानशून्यः ॥ अत्र विकल्पो बोद्धव्यः ॥१४॥ अ
पविषजस्य रूपमाह ॥ स्रोक्षलो हतवर्णेन्द्रियभाः सुदीनो ध्यायानेनो विषकृते
न भवेत्परासुः ॥१४॥ भा दीप्तिः ॥ परासुः मृतः ॥१४॥ अपस्मारिरूपमाह ॥ अवाङ्मुखस्तून्नु
खोवाक्षीणमांसबलो नरः ॥ जागरूको ह्यसंदेहमुन्मादेन चिनेभ्यपति ॥१५॥ जागरू
कः उन्निद्रः ॥१५॥ अथ देवादिकृतोन्मादस्य सामान्यं लक्षणमाह ॥ अमर्त्यवाग्वि
क्रमवीर्यचेष्टो ज्ञानादिविज्ञानबलादियुक्तः ॥ प्रकोपकालो नियतश्च यस्य दे
वादिजन्मासमनो विकारः ॥१६॥ अमर्त्यवाग्विक्रमवीर्यचेष्टः नमर्त्यस्य संवदम
नुष्यस्येव वागादयो यत्र सः ॥ विक्रमः पराक्रमः ॥ वीर्यं शौर्यं ॥ चेष्टा शरीरक्रि

॥२१४॥

या॥ ज्ञानादिविज्ञानपर्यन्तादि उक्तः ज्ञानं बुद्धिः आदिपदेन तद्भेदा मेधाविचारणास्म
त्यादयो गृह्यन्ते॥ विज्ञानं शिल्पशास्त्रादिविषयकं ज्ञानं तस्य बलं चेष्टापाटवं॥ आदि
पदेनाभिमानादि गृह्यन्ते॥ नियतः वक्ष्यमाणतिथ्यादिभिः॥ मनोधिकारः उन्मा
दः॥१६॥ तत्र देवाविष्टस्य लक्षणमाह॥ संतुष्टः शुचिरतिदिव्यमाल्यगंधो निस्तं
द्रोऽवितथसंस्कृतप्रभाषी॥ तेजस्वी स्थिरनयनो वरप्रदाता ब्रह्मण्यो भवति न
रः स देवजुष्टः॥१७॥ अतिदिव्यमाल्यगंधः अतिशयेन दिव्यस्य माल्यस्य गंधो
यस्य सः॥ निस्तंद्रः निद्रारहितः॥ अवितथं सत्यं ब्रह्मण्यः ब्राह्मणभक्तः॥१७॥ अथ
दैत्याविष्टस्य लक्षणमाह॥ संस्वेदी द्विजगुरुदेवदोषवक्ता जिह्माक्षो विगतभयो
विमार्गदृष्टिः॥ संतुष्टो भवति न चान्नपानजातैर्दुष्टात्मा भवति स दैत्यग्रहजुष्टः ॥२१४॥

१८ विमार्गदृष्टिः कुमार्गरतः दुष्टात्मा दुष्टस्वभावः ॥ १८ ॥ अथ गांधर्वाविष्टस्य लक्ष
णमाह ॥ हृष्टात्मा पुलिनवनांतरोपसेवी स्वाचारः प्रियपरिगीतगंधमाल्यः
नृत्यन्वै प्रहसति चारुचाल्पशब्दं गंधर्वग्रहपरिपीडितो मनुष्यः ॥ १९ ॥ हृष्टात्मा
हृष्टजीवात्मा ॥ पुलिनं तोयोत्थितं तटं ॥ वनांतरं वनमध्यं ॥ स्वाचारः अनिंदिताचा
रः ॥ प्रियाणि परिसमंततो भावेन गीतगंधमाल्यानि यस्य स तथा ॥ चारुचाल्प
शब्दमिति हसक्रियाविशेषणं ॥ १९ ॥ अथ यक्षाविष्टस्य लक्षणमाह ॥ ताम्राक्षः
प्रियतनुरक्तवस्त्रधारी गंभीरो द्रुतगतिरल्पवाक्सहिष्णुः ॥ तेजस्वी वदति च किं
ददामि कस्मै यो यक्षग्रहपरिपीडितो मनुष्यः ॥ २० ॥ प्रियं शोभनं तनु सूक्ष्मं रक्तं
वस्त्रं धर्तुं शीलं यस्य स तथा ॥ २० ॥ अथ पित्र्याविष्टस्य लक्षणमाह ॥ प्रेतानां

२१५

सद्दिशति संस्तरेषु पिंडान् श्रांतात्मा जलमपि चापसव्यवस्त्रः ॥ मांसेषु स्तिलगुड
पायसाभिकामस्तद्भक्तो भवति पितृगृहाभिजुष्टः ॥ २१ ॥ प्रेतानां मृतानां पितृणां ॥
दिशति ददाति ॥ संस्तरेषु कुशपत्राविरचितास्तरणेषु अपसव्यवस्त्रः दक्षिणं
स्कंधनिहितवस्त्रः ॥ तद्भक्तः पितृभक्तः ॥ २१ ॥ अथ नागाविष्टस्य लक्षणमाह ॥ व
सुर्व्यां प्रसरति सर्पवत्कदाचित् सृक्किण्यौ मुहुरपि जिह्वया वै लेढि ॥ क्रोधालुर्घृ
तमधुदुग्धपायसेप्सुर्विलेयः स खलु भुजंगमेन जुष्टः ॥ २२ ॥ प्रसरति सर्पवदुत
रसा चलतीत्यर्थः ॥ सृक्किण्यौ ओष्ठप्रांतौ ॥ २२ ॥ अथ राक्षसाविष्टस्य लक्षणमा
ह ॥ मांसासृग्विविधसुराविकारलिप्सुर्निर्लज्जो भृशमतिनिष्ठुरोतिशूरः ॥ क्रो
धालुर्विपुलबलो निशाविचारी शौचद्विट् भवति स राक्षसैर्गृहीतः ॥ २३ ॥ नि

२१५

शाचिचारी निशायामेव भ्रमणशीलः ॥ अतिनिष्ठुरः अतिनिर्दयः ॥ २३ ॥ अथ ब्रह्म
राक्षसो विशेषस्य तल्लक्षणमाह ॥ द्विजविप्रगुरुद्वेषी वेदवेदांगविच्युतिः ॥ आत्मपीडा
करो हिंस्रो ब्रह्मराक्षससेवितः ॥ २४ ॥ अहिंस्रः अहिंसाशीलः ॥ २४ अथ पिशा
चाविशेषस्य तल्लक्षणमाह ॥ उद्धस्तः कृशः परुषो विरुद्धभाषी दुर्गंधो मलशामशुचि
सत्याति लोलः ॥ बह्वाशी विजनवनांतरोपसेवी व्यांचेष्टनभ्रमति रुदन् पिशाच
जुष्टः ॥ २५ ॥ उद्धस्तः नग्नः द्विजोवरइति विदेहवचनात ॥ कृशो निर्मांसः ॥ परुषो रूक्षः
अतिलोलः सर्वस्मिन्नन्नपाने सतोभः ॥ व्यांचेष्टन विरुद्धमाचेष्टन ॥ २५ ॥ गृहादि
हिंसाविहारसत्कारार्थं ग्रहं इति ॥ अत एवोक्तं ॥ अशुचिं भिन्नमर्यादं क्षतं वाप
द्विचाक्षतं ॥ हिंस्रकहिंसाविहारार्थं सत्कारार्थमथापि वा ॥ इति ॥ तत्र हिंसार्थी

॥२१ह्॥

गृहीतस्य लक्षणमाह ॥ स्फुटाक्षो द्रुतगमनः सफेनवामी निद्रालुः पतति चकंपते च यो
ति ॥ पश्चाद्रिद्विरदनगादिविच्युतः स्यात्सोऽसाध्यो भवति तथात्र षोडशाब्दे २६ ॥ स्फुटा
क्षः विवृतनेत्रः ॥ द्रुतगमनः द्रुतगतिः ॥ पश्चाद्रीत्यादि ॥ यः पर्वतादिभ्यः पतितः सन्
गृहे गृहीत इत्यर्थः ॥ आदिशब्देन भित्तिप्रासादादयो गृह्यंते नगो वृक्षः ॥ तथात्र षोड
शाब्दे सर्वशिवदेवादिगृहीतोऽसाध्यः ॥ २६ ॥ अथ देवादीनामावेशसमयमाह ॥
देवगृहाः पौर्णमास्यामसुराः संध्ययोरपि ॥ गंधर्वाः प्रायशोऽष्टम्यां यक्षाश्च प्रति
पद्द्वये ॥ २७ पितरः कृष्णपक्षे च पंचम्यामपि चोरगाः ॥ रक्षःपिशाचा रात्रौ च चतु
र्दश्यां विशंति हि ॥ २८ कृष्णपक्षे अमावास्यायां ॥ प्रायसः पदाहन्यत्रापि ॥ तिथ्या ॥२१ह्॥

८ भिधानप्रयोजनं लक्षणार्थं दृष्टीनार्थं च ॥ २७।२८ ननु यदि देवादयो विशंति

तदाविशंतस्तेकथंनदृश्यंतइत्यतआह ॥ दर्पणादौयथाछायाप्रतीतोऽस्मंप्राणिनो
यथा ॥ स्वमणिंभास्करार्चिश्चयथादेहेचदेहधृक् ॥ विशंतिनचदृश्यंतेग्रहास्तद्
च्छरीरिणं ॥ २८ ॥ दर्पणादौत्यादिशब्देनान्यदपिनिर्मलंद्रव्यंजलतैलादिद्रवद्र
व्यंचगृह्यते ॥ छायाप्रतिबिंबं ॥ प्रतीतोऽस्मीतिकर्तृपदं ॥ प्राणिनइतिकर्मपदं ॥
स्वमणिंसूर्यमणिं ॥ देहधृक्जीवात्मा ॥ देवशब्देनात्रदेवानुचरादेवसधर्माणो
गृह्यंते ॥ देवादीनामशुचिनामनुष्यशरीरेणसंबंधाभावात् ॥ यदाहसुश्रुताचा
र्यः ॥ नतेमनुष्यैःसहसंविशंतिनतेमनुष्यान्क्वचिदाविशंति ॥ येत्वाविशंतीति
वदंतिमोहात्तेभूतविद्याविषयादपोह्याइति ॥ २९ ॥ इत्यकस्मादनिदानं ॥ अपोन्मा
दचिकित्सा ॥ वातिकेस्नेहपानंप्राक्विरेकःपित्तसंभवे । वमनंकफजेशस्तमुन्मा

॥२६७॥

देवग्रहमौषधं ॥ जलाग्निद्रुमशैलेभ्यो विषमेभ्यश्च ते सदा ॥ रक्षेदुन्मादिनं चैव सद्यः प्रा
णहरं हितं ॥ ब्राह्मीकूष्मांडीफलषड्ग्रंथाशंखपुष्पिकास्वरसाः ॥ उन्मादहरा द्वयाः प
योगे ते कुष्ठमधुमिश्राः अस्यायमर्थः ॥ ब्राह्मीति पदमत्र तं स्वरसपरं ॥ कूष्मांडीफलप
दं तद्बीजपरं ॥ षड्ग्रंथेति पदं तच्चूर्णपरं ॥ शंखपुष्पिकास्वरसपदं यथाश्रुतार्थमेव ॥
तेते यंत्र क्रिया ॥ ब्राह्मीस्वरसः पलार्द्धमितः कुष्ठचूर्णं माषद्वयमितं मधु अर्द्धमाषमि
तं मेलयित्वा पेयमित्येको योगः ॥ कूष्मांडीफलबीजचूर्णं माषद्वयमितं कुष्ठचूर्णं माष
द्वयमितं लेह्योऽयं मधुना संधीयावलेह्यमित्ययं द्वितीयो योगः ॥ वचाचूर्णं माषद्व
यमितं कुष्ठचूर्णं माषद्वयमितं लेह्योऽयं मधुनावलेह्यमित्ययं तृतीयो योगः ॥ शंख ॥२६७॥
पुष्पीस्वरसोऽर्द्धपलमितः कुष्ठचूर्णं माषद्वयमितं मधु अर्द्धमाषमितं मेलयित्वा

पेयमित्यपंचतुर्थो योगः ॥ इतिब्राह्म्यादिस्वरसाः ब्राह्मीरसः स्यात्सवचः सकुष्ठः सशं
खपुष्पः ससुवर्णचूर्णः ॥ उन्मादिनामुन्मदमानसानामपस्मृतौ भूतहतात्मनां च
कूष्माण्डधत्तूरजैर्वीजैः पंचभिः पर्पटीरसः । साज्योपोऽयं प्रशांत्यर्थमुन्मादस्यापुनाय
ने ॥ इति नस्यं ॥ सूतगंधशिलातुल्यं स्वर्णवीजं विचूर्णयेत् ॥ भावयेद्दुग्धगंधायाः क्वाथे
न मुनिशः पृथक् ॥ ब्राह्मीरसेन सप्तैव भावयित्वा विचूर्णयेत् ॥ रसः संजायते नूनमु
न्मादगजकेसरी ॥ अस्य माषः ससर्पिष्को लीढो हंति हठादिदं उन्मादाख्यमपस्मारं
भूतोन्मादमपिज्वरं ॥ इत्युन्मादगजकेसरीरसः ॥ सिद्धार्थको हिंगु वचा करंजो देवदा
रु च ॥ मंजिष्ठा त्रिफला श्वेता कटभी त्वक्कटुत्रयं ॥ द्वे हरिद्रे शिरीषश्च सर्वमेतत्समां
शकं ॥ पिष्टं वस्तस्य मूत्रेण परमांजनमौषधं ॥ नस्यं विलेपनं चैव स्नानमुद्धर्त

॥२१८॥

नेतथा ॥ अपस्मारविषोन्मादकृत्यालक्ष्मीज्वरापहं ॥ सर्वभूतभयं हंति राजवेश्मनिकें
मानदं ॥ सिद्धं घृतमनेनैव गोमूत्रेण समन्वितं ॥ पूर्वोदितान् गुणान् सर्वान् प्रकरो
ति प्रयोजितं ॥ इति सिद्धार्थकाद्यौषधं ॥ कुष्ठं वचा गंधेलवणाजमोदे द्वेजीरके त्रिलि
कटु निपाठा ॥ मंगल्यपुष्पी च समांशमेतानि सर्वैः समानां च वचां विचूर्ण्य ब्राह्मी
रसेनाखिलमेव भाव्यं वारत्रयं शुष्कमिदं विचूर्ण्य ॥ अक्षप्रमाणं मधुनाघृतेनेलि
ह्यान्नरः सप्तदिनानि यावत् ॥ सारस्वतमिदं चूर्णं ब्रह्मणा निर्मितं पुरा ॥ हिताय सर्व
लोकानां दुर्मेधानां विचेतसां ॥ एतस्याभ्यासतः पुंसां बुद्धिर्मेधा धृतिः स्मृतिः ॥ संप
त्तिः कविताशक्तिः प्रवर्द्धंते तरोत्तरं ॥ मंगल्यपुष्पी शंखपुष्पी ॥ इति सारस्वतं चूर्णं
विश्वाजमोदरजनीद्वयसैंधवोग्राप्याठाकुष्ठमगधोद्भवजीरकाणां ॥ चूर्णं ॥२१८॥

प्रभातश्चामयेस्निहतःससर्पिर्यद्दिव्यतानियसातिस्यपमेवयक्के ॥ इतिविष्याद्यंचचूर्णं
हिंगुसौवर्च्चलव्योषैर्द्विपलांशैर्घृताढकं ॥ चतुर्गुणेगवांमूत्रेसिद्धमुन्मादनाशनं
इतिहिंग्वाद्यंघृतं ॥ फलिनीदशमूलीचमूर्वारास्नाश्वतावरी ॥ गोक्षुरःशालामूलंच
तैर्युक्त्याक्वाथकल्कितैः ॥ साधितंचैतसंनामघृतंचैतोविकारनुत् ॥ उन्मादमदमूर्छा
ग्रंज्वरापस्मारनाशनं ॥ इतिचैतसंघृतं ॥ कल्याणकंप्रयुंजीततैलंनारायणंतथा
बद्धंसर्षपतैलाक्तंरक्षेदुत्तानमातपे ॥ पूजावल्युपहारेष्टिहोममंत्रांजनादिभिः ॥
जयेदागंतुमुन्मादंयथाविधिशुचिर्भिषक् ॥ कृष्णामरिचसिंधूत्थमधुगोरोचना
कृतं ॥ अंजनंसर्वदेवादिकृतोन्मादहरंपरं ॥ इत्यंजनंदेवोन्मादे ॥ श्वशृगालजंबुकलोमा
निशाल्वकीलशुनंतथा ॥ हिंगुमूत्रंचवस्तस्यधूपमस्यप्रयोजयेत् ॥ एतेनसाम्प्र

॥२१८॥

तिक्षिप्तं वस्त्रानपि पेमाहः ॥ इतिधूपः ॥ क्रतेपिशाचादन्येषु प्रतिकूलं नचाचरेत् ॥
रोगिणां भिषजं पक्षे क्रुद्धा हन्युर्महौजसः ॥ अथपथ्यमाह ॥ स्नेहे देवि विरेकौ वमनं न्यस्य पूर्वं
कमान्नमुल्लिप्तकफोत्तरेषु ॥ ततः परं चास्ति विधिश्च नस्यं तंतर्जनं ताडनमंजनं च ॥
आश्वासतत्रासनवंधनानि भयानि दाहानि च घर्षणानि ॥ धूपो वंधो विस्मर
णं प्रदेहः शिलावधः संश्रमनं च सेकः ॥ आश्चर्यकर्माणि च धूमपानमभ्यंजनं
स्नापनमासनानि गोधूममुद्गारुणशालयश्च धारोष्णदुग्धं शतधौतसर्पिः ॥ घृ
तं नवीनं च पुरातनं च निद्रा सुशीतान्यनुलेपनानि ॥ पूराणकूष्मांडफलं पटोलं
ब्राह्मीदलं वास्तुकतंदुलीयं ॥ स्वराष्यमत्रं गगनांवुपथ्यास्तु वर्षणि चूर्णानि च ना
लिकेरं ॥ द्राक्षाकपीत्थं पनसं च वैद्यैर्विधेयमुन्मादगदेषु पथ्यं ॥ कामशोकभय

॥२१८॥

क्रोधःदुःखमोहमदोद्भवान् ॥ परस्परप्रतिद्वंद्वानेभिरेव प्रशमं नयेत् ॥ इष्टद्रव्यवि
नाशेन मनो यस्योपहन्यते ॥ तस्य तत्सदृशलाभेन शांतिर्व्याधेः प्रजायते ॥ देवर्षिपितृ
गंधर्वैरुन्मत्तस्य च बुद्धिमान् ॥ त्यजेन्नस्यांजनादीनि तीक्ष्णानि क्रूरकर्म च ॥ पूजा
वल्युपहारश्शांतिविधयो होमेष्टमंत्रक्रियादानं स्वस्त्ययनं व्रतानि नियमाः स
त्यं जयो मंगलं ॥ प्रायश्चित्तविधानमंजतिविधीरत्नौषधीधारणं देवब्राह्मणपू
जनं च शमयेदुन्मादमागंतुकं ॥ अथापथ्यमाह ॥ मद्यं विरुद्धासनभोजनं च निद्राक्षु
धातृट्क्षुतवेगधारणं ॥ तिक्तानि तीक्ष्णानि निमिषक्रसमादिशेदुन्मादरोगे बुवि
गर्हितानि ॥ अस्पृश्यचीन्यलपानानि नदीकूप्यावचानपि ॥ प्रासादानपणाश्विनोस्त्रा
णि सेवेतोन्मादवान्नरः ॥ इत्युन्मादचिकित्सा ॥ अथापस्मारनिदानं ॥ तत्राप

॥२२०॥

स्मारस्य निदानपूर्विकां संप्राप्तिमाह॥ चिंताशोकादिभिर्दोषाः क्रुद्धा हृत्स्रोतसि स्थि
ताः॥ कृत्वा स्मृतेरपध्वंसमपस्मारं प्रकुर्वते॥१॥ हृत्स्रोतसि मनोवहस्रोतसि॥१॥ त
स्य संख्यामाह॥ वातात्पित्तात्कफात्स्वैर्दोषैः समस्ताच्चतुर्विधः॥१॥ अथापस्मार
स्य सामान्यं लक्षणमाह॥ तमःप्रवेशः संरंभो दोषोद्रेको हतस्मृतेः॥ अपस्मार इति
ज्ञेयो गदो घोरतरो हि सः॥२॥ तमःप्रवेशः अंधकारप्रवेश इव ज्ञानाभाव इत्यर्थः॥
संरंभः नेत्रविकृति हस्तपादविक्षेपणादिकं च॥ अस्य निरुक्तिरपि सुश्रुतेनोक्ता॥
स यथा॥ स्मृतिर्भूतार्थविज्ञानमपस्तत्परिवर्जने॥ अपस्मार इति प्रोक्तस्ततोयं व्या
धिरंतकृदिति॥२॥ अथ तस्य पूर्वरूपमाह॥ हृत्कंपः शून्यता स्वेदो ध्यानं मूर्छा प्रमू
ढता॥ निद्रानाशश्च तस्मिंश्च भविष्यति भवत्यथ॥३॥ शून्यता हृदयस्यैव॥ ध्यानं जि ॥२२०॥

स्थायनं ॥ मूर्छा मनोमोहः ॥ प्रमूढता इंद्रियमोहः ॥ भविष्यति भाविनि तस्मिन्नपस्मारे
३ ॥ अथ वातिकस्य लक्षणमाह ॥ कंपते प्रदशेद्दंतान् फेनोद्वामी श्वसत्यपि ॥ असिता
रुणवर्णानि पश्येद्रूपाणि चानिलात् ॥ ४ ॥ श्वसिति श्वासो भवति ॥ रूपाणीति
प्राणिनः ॥ नीलो मामनुधावतीति स्फुटवचनात् ॥ एवं पैत्तिकेपि तो मामनुधावती
ति ॥ श्लैष्मिके श्वेतो मामनुधावतीति ज्ञेयं ॥ ४ ॥ अथ पैत्तिकस्य लक्षणमाह ॥ पीतफे
नांगवक्त्राक्षः पीतासृग्रूपदर्शनः ॥ सतृष्णोष्णानलव्याप्तलोकदर्शी च पैत्तिकः ॥
पीतस्य असृग्रूपस्य वा यस्क्तनो दर्शनं पश्यतः ॥ सतृष्णेत्यादि ॥ सतृष्णश्चासावुष्ण
श्चेति सतृष्णोष्णः सतृष्णोष्णश्चासावनलव्याप्तलोकदर्शी चेति समासः ॥ पैत्तिके
अपस्मारे इति शेषः ॥ ५ ॥ अथ श्लैष्मिकस्य लक्षणमाह ॥ शुक्लफेनांगवक्त्राक्षः शी

॥२२१॥

तो हृष्टांगजो गुरुः ॥ पश्येच्छुक्लानि रूपाणि श्लैष्मिको मुच्यते चिरात् ॥६॥ शीतांगः ॥ हृष्टां
गजः हृष्टरोमा ॥ गुरुः गुरुगात्रः ॥ अचिरादित्यनेन वातपित्तयोरचिरेण वेगमुक्तिरि
ति सूच्यति ॥६॥ अथ सान्निपातिकस्य लक्षणमाह ॥ समस्तैर्लक्षणैरेतैर्विज्ञातव्य
स्त्रिदोषजः ॥ अपस्मारः स चासाध्यो यः क्षीणस्यानवश्च यः ॥७॥ स चेति सान्निपा
तिकः ॥ क्षीणस्यैकदोषजोप्यसाध्यः ॥ एवमनवश्च यो बोद्धव्यः ॥७॥ अथापस्मारस्या
रिष्टलक्षणमाह ॥ प्रस्फुरंतं च बहुशः क्षीणं प्रचलितभ्रुवं ॥ नेत्राभ्यां च विकुर्वाण
मपस्मारो विनाशयेत् ॥८॥ प्रस्फुरंतं गात्रस्फुरणयुक्तं ॥ नेत्राभ्यां च विकुर्वाणं नेत्रे
विकृते कुर्वाणं ॥८॥ अथापस्मारस्य प्रकोपकालमाह ॥ पक्षाद्वा द्वादशाहाद्वा मासा
द्वा कुपिता मलाः ॥ अपस्मारं प्रकुर्वंति वेगं किंचिदथोत्तरं ॥९॥ पक्षादिति द्वादशाहा

॥२२१॥

द्धापुः मासात्कफः अपस्मारं करोतीत्यर्थः॥ वेगं किंचिदंतरमिति किंचित्स्वस्थ
वेगं आंतरं उक्तकालानामंतरालेपि कुर्वंति॥ यदि न तु हेतुभूतेषु दोषेषु विद्यमानेषु
सदैव तस्माधिकोपः कथं न स्यादित्त आह॥ देवे वर्षत्यपि यथा भूमौ बीजानि का
नि चित्॥ शरदि प्रतिरोहंति तथा व्याधिसमुच्छ्रयः॥ १०॥ अस्यायमर्थः॥ यथा त्वत्रि
कारणसामग्र्यां सत्यामपि वार्षिककादिबीजानि स्वभावाच्छरद्येव प्ररोहंति तथा हेतु व
भूतेषु विद्यमानेष्वपि स्वभावादपस्मारो द्वादशाहादिष्वेव वेगं करोतीत्यर्थः॥
१०॥ इत्यपस्मारनिदानं॥ अथापस्मारचिकित्सा॥ पूर्वरूपेज्यादपस्मारे छर्दनादीनि
बुद्धिमान्॥ वातिकं बस्तिभिः प्रायः पैत्तिकं तु विरेचनैः॥ कफजं वमनैः प्रायस्त्वप
स्मारमुपाचरेत्॥ तैलेन लशुनः सेव्यः पयसा च शतावरी॥ ब्राह्मीरसश्च मधु

॥२२२॥

नासर्वापस्मारभेषजं ॥ यःखादेत्क्षीरभक्ताशीमाक्षिकेणवचारजः ॥ अपस्मारंमहाघो
रंसुचिरोत्थंजयेद्ध्रुवं ॥ कूष्मांडकफलोत्थेनरसेनपरिपेषितं ॥ अपस्मारविनाशाययष्ट्याय
ह्वंनापिबेत्त्र्यहं ॥ कूष्मांडकरसेसर्पिरष्टादशगुणेपचेत् ॥ यष्टीकल्कान्वितंपानादप
स्मारंविनाशयेत् ॥ इतिकूष्मांडघृतं ॥ ब्रह्मीरसेशंखपुष्पीवचाकुष्ठैश्चसाधितं ॥ घृ
तंपुराणमुन्मादग्रहापस्मारनाशनं ॥ एतस्यप्रक्रिया ॥ पुराणंगोघृतंप्रस्थमितंवचा
कुष्ठशंखपुष्पीभिःसमुदितानांकुडवमितानांकल्केनप्रस्थमितब्राह्मीरसपिष्टेनप
चेत् ॥ इतिब्राह्मीघृतं ॥ द्वौकीटमेषौविधिवदानीयरविवासरे कंठेभुजेवासंधार्यौ
जयेदुग्रामपस्मृतिं ॥ अयंतुकीटोनदीतीरेसिकतामध्येतिष्ठति ॥ उद्धृत्यचितनष्टोप्ना
पाशंदग्ध्वाकृतामषी ॥ पीतांबुनासमायीताहंत्यपस्मारमुद्धृतं ॥ शंखपुष्पीव ॥२२२॥

चाङ्गाह्लीकुष्ठमेषां रसैः सह ॥ भस्मसूतः पर्पटीका सेव्यापस्मारशान्तये ॥ कूष्माण्डगालवि
ड्रालानां कधीनां चापि निष्ठितं ॥ पित्तानि तस्य तोदुग्धादपस्मारनिवृत्तये ॥ पुष्योद्धृतं
शुनः पित्तमपस्मारघ्नमंजनात् ॥ तदेव सर्पिषा युक्तं धूपनं परमं मतं ॥ मधूकसारकृ
ष्णाभ्यां वचामरिचसैंधवैः ॥ नस्यं कोष्णजलैः पिष्टं कुर्यात्संज्ञाप्रबोधनं ॥ अपस्मारे
तथोन्मादे सन्निपाते ऽपतंत्रके ॥ इति नस्यं ॥ मनोह्वाताक्ष्यविषाच शकृत्पारवतस्य च
अंजनाद्धंत्यपस्मारमुन्मादं च विशेषतः ॥ इत्यंजने ॥ रसः सतालः सशिलः सलोहः सो
तौंजनं सांककिमिदं सगंधं ॥ पिष्टं नमूत्रेण समं समस्ताद्ध्योद्विभागो ऽथ वलिः पंचेद्ध्वे
वौ हेक्ष्वरं हंति घृतेन माषो ऽपस्मारमस्योन्मादमानसत्वं ॥ पिवेद्रतेनात्र वचा हिंगुप
त्वं सर्पिर्नमूत्रे रुचकेन सार्द्धं ॥ भूतोन्मादेषु सर्वेषु रसोयं भूतभैरवः ॥ स्वर्णलीजैः पंच

मरिचचूर्णं तु कर्षैकं पयसार्कस्य भावितं नस्यं प्रदत्तं ऊदिति कुर्यात्संज्ञाप्रबोधनं
मिर्बीजैर्देयः सर्पिर्विमिश्रितः ॥ इति भूतभैरवरसः ॥ वचामृतं व्योषमधूकसारं
द्राक्षा सिंधूद्भवं वह्निषाणि ॥ फलं समुद्रस्य रसो न कल्कं ध्मातं हिनास्यापुष्पमध्यदे
यो ॥ अपस्मृतिं श्लेष्म महत्त्विरोहकं प्रलापं तं द्राभ्रम मोहजाड्यान् ॥ ससन्निपातप्र
तिकाक्षिभंगान् सपीनसान् हंति हसीमकं च ॥ रसायनं भैरवनामधेयं ज्ञातं वि
चारात्कथिविच्छितेन ॥ इति रसायनभैरवः ॥ उन्मादेषु पादादिषु पथ्यं नस्यांजनौ
षधं अपस्मारे पित्तात्सर्वं प्रयोक्तव्यं भिषग्वरैः ॥ अथ पथ्यमाह ॥ नस्यं शिराव्यधो
दानं त्रासनं बंधनं भयं तर्जनं ताडनं हर्षो धूमपानं च विस्मयं ॥ धीधैर्यात्मा
दिविज्ञानं स्नानमभ्यंजनानि च ॥ श्वासयो सो हिता मुद्गा गोधूमाः प्रततं हवि

२२३

पटोलं च हृद्कूष्मांडं दुग्धं ब्राह्मी दलं वचा ॥ तैलं खराश्वगोमूत्रं द्राक्षा धात्री च वास्तुकं ॥
अपस्माररोगदेन नराणां पथ्यमेतदुदीरितं ॥ अथापथ्यमाह ॥ चिंताशोकं भयं क्रोधम
शुचीन्यन्नानि च ॥ मद्यं मत्स्यं विरुद्धान्नं तीक्ष्णोष्णगुरु भोजनं ॥ अतिव्यवाय
मायासं पूज्यपूजाव्यतिक्रमं ॥ पत्रशाकानि सर्वाणि विंबी माषाढजं फलं ॥ क्षुधा
तृष्णास्वप्नवेगान अपस्मारी परित्यजेत ॥ इत्यपस्मारचिकित्सा ॥ अथ वातव्याधिनि
दानं ॥ तत्र वातव्याधीनां सामान्यतो विप्रकृष्टनिदानान्याह ॥ कषायकटुतिक्तक
प्रमितरूक्षलघ्वनतः ॥ पुरः पवनजागरक्षतरणाभिघातश्रमैः ॥ हिमादनशना
तथा निधुवनाच्च धातुक्षयान्मतादिहठधारणान्मदनशोकचिंताभयैः ॥ १ ॥ अ
तिक्षतजमोक्षणात गदकृततातिमांसक्षयादतीव वमनान्नणमति विरे

॥२२४॥

चनादामतः॥ वयोदसमयेदिनक्षरणादयोसतीयांशयोर्जरामतिगातेशितेशिशिरसं
सक्तातेपिच॥२॥ देहस्रोतांसिसिक्तानिपूरयित्वानिलौचसौ॥ करोतिविविधान्रोगा
न्सर्वेषांजैकागसंभवान्॥३॥ प्रमितमित्यत्रैवैपरिमेनोपसर्गः॥ तेनापरिमितमि
त्यर्थः॥ प्रकर्षेणामितमल्पस्वेवा॥ तव्द्यन्नमतिपुराणशाल्यादि॥ पुरःपवनःप्रा
ग्वातः निधुवनंकंपनं॥ आमतःआमेनमार्गावरणात्॥ यतउक्तं॥ वायोर्धातुक्ष
यात्कोपोमार्गस्यावरणेनचेति॥ वयोदसमयेवर्षासु॥ आशितेभुक्तेजरांजीर्ण
तांआतिगतेअतीवप्राप्तेसति॥ देहस्रोतांसित्यादिनासंप्राप्तिरुक्ता॥ कषायादि
भिर्हेतुभिर्दोषादोषसमयेहेतुभूतेवसौआनिलःप्रवृद्धोवायुःविविधान्रोगान्करो
तीत्यर्थः॥१॥२॥३॥ अपतीन्द्रोगानाह॥ ग्रीरोगग्रहोत्यकेशत्वंजंभात्यर्थंह

नुगूहाः ॥ जिह्वास्तंभो गद्गदत्वं मिन्मिनत्वं च मूकता ॥ ४ ॥ वाचालता प्रलापश्च रसाना
मनभिज्ञता ॥ बाधिर्यं कर्णनादश्च स्पर्शाज्ञत्वं तथादितं ॥ ५ ॥ मन्यास्तंभोत्रगाणि
तो बाहुशोषो बवाहुकः ॥ कथिता त्रैव विश्वाची उर्ध्ववातउदीरितः ॥ ६ ॥ आध्मा
न प्रत्याध्माने वाताष्ठीला प्रत्यष्ठीलिका ॥ तूनीचैव प्रतूनी च वर्ध्नेहैवैषम्यमेव च ः
७ ॥ आक्षेपः पार्श्वशूलं च त्रिकशूलं तथैव च ॥ गृध्रसी मूत्रणां मूत्रनिग्रहो मलसंगा
ढता ॥ ८ ॥ पुरीषस्याप्रवृत्तिश्च गृध्रसी च ततः परा ॥ कलापखंजता चापि खंजे
तापंगुता तथा ॥ ९ ॥ कोष्टुशीर्षक खल्ली च वातकंटक एव च ॥ पादहर्षः पाददाह
आध्मोयो दंडकाभिधः ॥ १० ॥ वातपित्तकृताक्षेपस्तथा दंडापतानकः ॥ अभि
घातकृताक्षेप आयामो द्विविधस्तथा ॥ ११ ॥ अंतरश्च तथा बाह्यो धनुर्वात

॥२२५॥

ष्टकुब्जकः ॥ अपतंत्रोपतानश्च पक्षाघातो खिलांगकः ॥ १३ ॥ कंपस्तंभो व्यथा तोदो भे
दश्च स्फुरणं तथा ॥ रौक्ष्यं कार्ष्ण्यं च कार्श्यं च शैत्यं तोन्नां च हर्षणं ॥ अंगमर्दो गवि
भ्रंशः शिरासंकोच एव च ॥ अंगशोषश्च भीरुत्वं मोहश्च च चित्तता ॥ १४ ॥ निद्रा
नाशः स्वेदनाशो बलहानिस्तथैव च ॥ शुक्रक्षयो रजोनाशो गर्भनाशः परिभ्र
मः ॥ १५ ॥ एत एवाशीतिसंख्यास्तेषां योगेन कुंठितः ॥ वातव्याधीति नामानो मु
निभिः परिकीर्तिताः ॥ १६ ॥ एत एवाशीतिरोगाहृदय एव च ॥ योगेन वातेन वाताद्वा व्या
धिरिति निरुक्त्या ॥ तदा च वातज्वरादिष्वपि प्रसंगः स्यादत आह ॥ रूढितः प्रसिद्धि
तः ॥ वातेन योऽसाधारणव्याधिर्गृह्यते तेन वातजनितज्वरस्याऽसाधारणाऽभा
वात् न ग्रहणं ॥ अशीतिरोगहृदयोऽशीतिरेव वातव्याधिसंज्ञाः प्रसिद्धाः ॥ नतु वातज्व ॥२२५॥

रादयस्त्वर्थः ॥ १६ ॥ अथ विशिष्टानां वातव्याधीनां लक्षणान्युच्यते ॥ तत्रादौ शिरोग्र
हस्य लक्षणमाह ॥ रक्तमाश्रित्य पवनः कुर्यान्मूर्द्धधराः शिराः ॥ रूक्षाः सवेदनाः
कृष्णाः सोऽसाध्यः स्याच्छिरोग्रहः ॥ १७ ॥ मूर्द्धधराः ग्रीवागताः ॥ स पवनः शिरोग्र
हः स्यादित्यन्वयः ॥ स चासाध्यः स्वरूपे रौव ॥ शिरोग्रहस्त्वपि पाठांतरं तंत्रांतरे
अस्यैव प्रसेयं ॥ १७ ॥ जृंभायालक्षणमाह ॥ पीत्वैकं श्वासमनिलः पुनस्त्यजति वे
गवान ॥ आलस्यनिद्रायुक्तश्च स जृंभ इति कथ्यते ॥ १४ ॥ जृंभशब्दः स्त्रिलिंगः ॥ तथा
चामरसिंहः ॥ जृंभस्तु त्रिषु जृंभणमिति ॥ १५ ॥ अथ हनुग्रहस्य निदानं लक्षणं
चाह ॥ जिह्वानिर्लेखनाच्छुष्कभक्षणादभिघाततः ॥ कुपितो हनुमूलस्थः स्रंसयि
त्वानिलो हनू ॥ करोति विवृतास्यत्वमथवा संवृतास्यतां ॥ हनुग्रहः स तेन स्या

स्तु च्छायाच्छवर्णाभावत्वां ॥ २० ॥ निष्ठीवनं कर्षणं शुष्कं चरणकादि ॥ स्तंभित्वा अधःकृत्वा
विवृतास्यत्वं व्यात्तमुखत्वं ॥ संवृतास्यतां दंतलग्नास्यतां ॥ १९ ॥ २० ॥ अथ जिह्वास्तं
भस्य लक्षणमाह ॥ वाग्वाहिनीशिरासंस्थो जिह्वां स्तंभयतेनिलः ॥ जिह्वास्तंभः स
तेनान्नपानवाक्येष्वनीशता ॥ २१ ॥ अनीशता असामर्थ्यं ॥ २१ ॥ अथ मूके मिन्मि
नगद्गदानां लक्षणमाह ॥ आवृत्य वायुः सकफो धमनीः शब्दवाहिनीः ॥ नरान्करो
त्यवचनान् मूकमिन्मिनगद्गदान् ॥ २२ ॥ अवचनान् नित्यभावे ईषद्वचनेन ॥ आ
द्यो मूके ॥ द्वितीयो मिन्मिनगद्गदयोः ॥ मूकः वचनक्रियारहितः ॥ मिन्मिनः सानु
नासिकवचनः ॥ गद्गदो लुप्तपदव्यंजनाभिधायी ॥ एषां समानाधिकरणत्वेपि द्व
छेदत्कथ्यादिना अदृष्टवशाद्वा भेदो बोद्धव्यः ॥ २२ ॥ अथ प्रतापस्य लक्षणमाह ॥

२२ द्वि

स्वहेतुकुपितायातादृसंबद्धं निरर्थकं ॥ वचनं यन्नरो ब्रूते स प्रलापः प्रकीर्त्तितः ॥ २३ ॥
अथ रसाज्ञानस्य लक्षणमाह ॥ भुंजानस्य नरस्यान्नं मधुरप्रभृतीन् रसान् ॥ रस
ज्ञापन्नजानाति रसाज्ञानं तदुच्यते ॥ २४ ॥ अथ त्वक्शून्यताया लक्षणमाह ॥
मस्पृशमानां त्वचा यातु शीतोष्णं मृदुकर्कशं ॥ न जानाति बुधैस्तस्सोपशून्येति प
रिकीर्त्यते ॥ २५ ॥ अथार्द्दितस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह ॥ उच्चैर्व्याहर
तोत्यर्थं खादतः कठिनानि च ॥ हसतो जृंभतो भाराद्विषमाच्छयनासनात् ॥ २६
शिरोनासौष्ठचिबुकललाटेक्षणसंधिगः ॥ ऊर्द्धपत्यनिलो वक्त्रमर्द्दितं जनयेत्त
तः ॥ २७ वक्रीभवति वक्त्रार्द्धं ग्रीवा चाप्यपवर्त्तते ॥ शिरश्चलति वाक्संगो नेत्रादीनां
च वैकृतं ॥ २८ ग्रीवाचिबुकदंतानां तस्मिन् पार्श्वे च वेदना ॥ तमर्द्दितमिति प्राहु

॥२२७॥

व्याधिं व्याधिविशारदाः ॥ रूक्षं व्याहरतः वदतः कठिनानि पूगफलादीनि ॥ विषमादुप

धानात्‌ग्रीवादिवैपरीत्येनस्थापनादासनाच्च ॥ अर्दयति पीडयति ततस्तदनेनेतरं अ

र्दितं जनयेत् ॥ अर्दिते जाते किं स्यात्तदाह ॥ वक्री भवतीत्यादि ॥ अपवर्त्तते वक्री भवति

चलति कंपते वाक्संगः वाङ्निरोधः ॥ नेत्रादीनामित्यादिशब्देन भ्रूगंडनासिकादी

नां ग्रहणं ॥ वैकृतं वेदनास्फुरणवक्रत्वादिकं ॥ ग्रीवेत्यादि ॥ यस्मिन्पार्श्वे अर्दितं त

स्मिन्पार्श्वे ग्रीवादीनां वेदना ॥ तंत्रांतरे तु मुखार्द्धं च तच्छरीरार्द्धं व्यापको प्यर्दितः

पठितः ॥ ननु यद्येवं तर्हि अर्दितार्द्धांगवातयोः को भेदः उच्यते ॥ वेदनार्दिते कदा

चिद्भवति अर्द्धांगवाते सर्वदैवेति भेदः ॥ रक्तक्षयादर्दी वातात्पित्तात्कफाच्चै

व त्रिविधः स्यात्समासतः ॥ तालास्रावोच्यथाकंपः स्फुरणं हनुवाग्ग्रहः ॥

दा

॥२२७॥

जे

ओष्ठयोः स्पन्दनं शूलं चार्दितेवातेभिषेत ॥२०॥ पीतमास्यं ज्वरस्तृष्णा पित्तजे मोहधूप
ने ॥ गंडे शिरसि मन्यायां श्लेष्मस्तंभः कफात्मके ॥२१॥ तस्यासाध्यस्य लक्षणमाह ॥ क्षी
णस्यानिमिषाक्षस्य प्रसक्ताव्यक्तभाषिणः ॥ न सिध्यत्यर्दितं गाढं त्रिवर्षं वेपनस्य
च ॥२२॥ अनिमिषाक्षस्य निमेषेणासमर्थचक्षुषः ॥ प्रसक्तं प्रकर्षेण लग्नं अव्य
क्तं च भाषितुं ॥ शीलं यस्य तस्य अर्दितं न सिध्यति ॥ त्रिवर्षं अतीतवर्षत्रयं ॥ यद्वात्र
पाणां चक्षुर्नासामुखानां वर्षैः स्रवो यत्र तत् ॥ वेपनस्य कंपनशीलस्य ॥ गाढम
तिशयेन न सिध्यतीत्यन्वयः ॥२२॥ अथ मन्यास्तंभस्य निदानपूर्वकं लक्षणमाह
दिवास्वप्नासनस्थानविकृतोर्ध्वनिरीक्षणैः ॥ मन्यास्तंभं प्रकुरुते स एव श्लेष्म
णावृतः ॥२३॥ दिवास्वप्नेनासनेनस्थानेन चातिशायितेन विकृतं गृीवादिवि

॥२३५॥

स्तं तं यथा स्यादेवं उपसमीपस्थयन्तीरक्षणं तेन च॥ स एव कुपितो वातः श्लेष्मणाच्युतः मन्या
स्तंभं करोतीति॥ ग्रीवायाः पश्चाद्भागे चतुर्दश शिरा मन्यासंज्ञाः॥ तथा चामरसिंहः॥ पश्चाद्ग्री
वाशिरा मन्या इति॥ ३३॥ अथ बाहुशोषावबाहुकयोर्लक्षणमाह॥ अंसदेशस्थितो वायुः
शोषयेदंसबंधनं॥ अंसबंधनशोषात्स्याद्बाहुःशोषः सवेदनः॥ शिराः संकोच्य बाहुस्थाः
स कुर्य्यादववाहुकं॥ ३४॥ अंसबंधनं अंसबंधनकारकं श्लेष्माणं॥ अयं केवलवातजः
शिरा बाहुशिराः॥ स वायुः॥ अयं तु कफवातज इति मधुकोशाकृत॥ ३४॥ अथ विश्वाची
लक्षणमाह॥ तलं प्रत्यंगुलीनां यः कंडरा बाहुपृष्ठतः॥ बाह्वोः कर्मक्षयकरी विश्वाची
ती ह चोच्यते॥ ३५॥ कंडरा महास्नायुः॥ तलं हस्तस्योपरिभागः॥ तलशब्दोत्रोपरिभाग
वचनः॥ यथाभ्रतलमिति तेनायमर्थः॥ बाह्वोः पृष्ठं बाहुपृष्ठं तदारभ्य हस्ततलं ता।

॥२२५॥

क्षीकृत्य अंगुलीनां याः कंडरास्तासां संदूष्य बाह्वोः प्रसारणाकुंचनादिकर्मक्षयकरी या
भवति सा इह वातव्याधिषु विश्वाचीत्युच्यते ॥ बाह्वोरीति द्वित्वं संभवपरं ॥ तेनैकस्मि
न्नपि बाह्वौ विश्वाची भवतीति ज्ञेयं ॥ २५ ॥ अथोर्ध्ववातस्य लक्षणमाह ॥ अधःप्रतिह
तो वायुः श्लेष्मणा मारुतेन च ॥ करोत्युद्गारबाहुल्यमूर्ध्ववातः स उच्यते ॥ २६ ॥ वायुः समान
वायुः ॥ मारुतेनापानवायुना अस्य हेतुदूषेन ॥ अधःप्रतिहतः अधोनिरुद्धः ॥ २६ ॥ अथाध्मा
नस्य लक्षणमाह ॥ साटोपमत्युग्ररुजमाध्मानमुदरं भृशं ॥ आध्मानमिति जानीयाद्घो
रं वातनिरोधजं ॥ २७ ॥ आटोपो गुडगुडाशब्दः ॥ भृशमाध्मातं वातपूर्णभस्त्रावत ॥ उदर
मिह पक्वाशयः ॥ प्रत्याध्मानस्यामाशयसंभवत्वात ॥ घोरं कष्टप्रदं ॥ वातनिरोधजे अधो
वातनिरोधाज्जातं ॥ २७ ॥ अथ प्रत्याध्मानस्य लक्षणमाह ॥ विमुक्तपार्श्वहृदयं तदेवा

॥२२८॥

आध्मानस्य विधानमविदेशः

मार्गयोस्थितं ॥ प्रत्याध्मानं विजानीयात्कफव्याकुलितानिलं ॥२५॥ आमाशयेसमुत्थेन प्रत्या
सन्नाया पार्श्वहृदययोरपि वेदनाशंकानिरासार्थमाह ॥ विमुक्तपार्श्वहृदयमिति ॥ पार्श्वहृ
दये विहाय जातं ॥ तदेवेत्यनेन साटोपादित्वमतिदिशति ॥ कफव्याकुलितानिलं कफेनाव
रुद्धवातं ॥२५॥ अथ वाताष्ठीलालक्षणमाह ॥ नाभेरधस्तात्संजातः संचारी यदि वाचलः
अष्ठीलावद्घनो ग्रंथिरूर्ध्वमायत उन्नतः ॥ वाताष्ठीलां विजानीयाद्बहिर्मार्गनिरोधिनीं
॥२६॥ अष्ठीलावर्तुलः पाषाणखंडः ॥ ऊर्ध्वमायतः उपरि दीर्घः ॥ उन्नतस्तिर्यगुन्नतः ॥ वा
तकृताष्ठीला वाताष्ठीलेति स्वरूपपरं ॥ न तु विशेषपरं ॥ व्यावर्तकाभावात् ॥ बहिर्मार्गनिरो
धिनीं विण्मूत्रमार्गनिरोधिनीं ॥ तेन मूत्रमलानिलावरोधः सूचितः ॥२६॥ अथ प्रत्यष्ठी
लालक्षणमाह ॥ एतामेव रुजायुक्तां वातविण्मूत्ररोधिनीं ॥ प्रत्यष्ठीलामिति वदेज्जठ ॥२२८॥

रेतिर्यग्गुस्थितां ॥४०॥ एतामेव अष्ठीलामेव जठरे तिर्यग्गुस्थितामिति भेदः ॥ याताविण्मू
त्ररोधिनीमिति विशेषपरं ॥४०॥ अथ तूनीलक्षणमाह ॥ अधो या वेदना याति वर्च्चोमू
त्राशयोत्थिता ॥ भिंदंतीव गुदोपस्थं सा तूनी नाम नामतः ॥४१॥ वेदनाशूलं ॥ वर्च्चोमूत्राश
योत्थिता पक्वाशयमूत्राशयोर्व्यस्तसमस्तयोर्जाता ॥ उपस्थं शिश्नं भगं च नामतः प्रा
सिद्धतः ॥४१॥ अथ प्रतितूनीलक्षणमाह ॥ गुदोपस्थोत्थिता सैव प्रतिलोमं विधाविता
वेगैः पक्वाशयं याति प्रतितूनीति सोच्यते ॥४२॥ सेत्यनेन भिंद्यतीव त्यति दिश्यते ॥ सैव
वेदना ॥ प्रतिलोममिति ऊर्ध्वं वेगैः त्वरितैः प्रशमलक्षितैः ॥४२॥ अथ त्रिकशूलस्य लक्ष
णमाह ॥ स्फिक्ष्वस्थोपष्ठवंशास्थ्नः संधिर्यस्तत्त्रिकं स्मृतं ॥ तत्र वातेन या पीडा त्रिकशूलं
तदुच्यते ॥४३॥ अथ वस्तिवातस्य लक्षणमाह ॥ मारुते विगुणे वस्तौ मूत्रं सम्यक् प्रव

॥२३०॥

र्ते॥ विकाराविविधान्यापि तस्मिन्दुष्टे भवंतीति हि॥ ४४॥ अविग्रतोन्यतुलीमे॥ विकाराःवि-
विधा मुहुर्मुहुर्मूत्रनिग्रहादयः॥ ४४॥ अथ गृध्रसीलक्षणमाह॥ स्फिक्पूर्वाकटिपृष्ठो-
रुजानुजंघापदं क्रमात॥ गृध्रसी स्तंभरुक्तोदैर्गृह्णाति स्पंदते मुहुः॥ ४५॥ वाताद्वातकफा-
त्सा विज्ञेया द्विविधा पुनः॥ वातजायां भवेत्तोदो देहस्यातीव वक्रता॥ ४६॥ जानुजंघोरु-
संधीनां स्फुरणं स्तंभता भृशं॥ वातश्लेष्मोद्भवायां तु गौरवं वह्निमार्दवं॥ तंद्रा मुखप्रसे-
कश्च भक्तद्वेषस्तथैव च॥ ४७॥ स्फिक्पूर्वं प्रथमतो गृह्णाति स्तंभरुक्तोदैर्यस्याः सा स्फिक्-
पूर्वा क्रमात् वृद्धिक्रमान्नतु युगपत् तेन यथा वर्द्धते तथा तथा स्फिगादीन्याक्रमति॥ तथा
मुहुः स्पंदते स्फिगादिषु शिराकंपं करोतीत्यर्थः॥ नात्र गृहलो निर्दिष्टक्रमनियम इति के-
चित्॥ वातात्केवलादिति पूर्वेणैव श्लोकेन संबंधः॥ वातकफाख्यां गृध्रसीं याऽऽक्ता

॥२३०॥

सा उक्ता यातलक्षणा गौरवादिलक्षणापि भवतीति ज्ञेयं तंत्रांतरेपि ॥ कथ्यते ज्ञानुमध्ये तु जा
यते चतुर्वेदना ॥ गृध्रसीति विजानीयात्तेन नोक्तमलक्षणमस्ति ॥ ४५ ॥ ४६ ॥ ४७ ॥ अथ खंजस्य
पंगोश्च लक्षणमाह ॥ वायुः कट्याश्रितः सक्थ्नः कंडरामाक्षिपेद्यदा ॥ खंजस्तदा भवेज्जंतुः
पंगुः सक्थ्नोर्द्वयोर्वधात ॥ ४८ ॥ सक्थ्नः कट्यादिगुल्फांतस्य ॥ कंडरां महास्नायुं ॥ आक्षिपेत
गमनादौ कंपयेत ॥ वधात गमनादिक्रियोपघातात ॥ सक्थ्नोरिति द्विवचनेनैव द्वित्वे ल
ब्धे द्वयोरिति पदेन सक्थ्नि द्वयस्यैव वधात पंगुरेकसक्थ्निवधात खंज इति नियमयति
४८ ॥ अथ कलापखंजस्य लक्षणमाह ॥ कंपते गमनारंभे खंजन्निव च लक्ष्यते ॥ कलाप
खंजं तं विद्यान्मुक्तसंधिप्रबंधनं ॥ ४९ ॥ गमनारंभे कंपत इति तस्य खंजाद्भेदः क
लापखंज इति शास्त्रे रूढा संज्ञा न तु यौगिकी ॥ ४९ ॥ अथ क्रोष्टुशीर्षकस्य लक्षणमाह ॥

वातशोणितजः शोथो जानुमध्ये महारुजः ॥ ज्ञेयः क्रोष्टुकशीर्षस्तु स्थूलः क्रोष्टुकशीर्षवत् ॥
५० ॥ वातशोणितज इति वातरक्ताख्याधिकारजश्चिकित्साभेदार्थं पृथगयं पठितं ॥ इति गये
दासः वातःशोणिताभ्यां जात इति जेज्जटादयः ॥ इष्यते ह्ययं वातरक्तव्यतिरेकेण पिजा
नेदेशे नियतत्वेन विशिष्टलक्षणत्वेन च ॥ क्रोष्टुःशृगालः ॥ ५० ॥ अथ खल्लीलक्षणमाह
खल्ली तु पादजंघोरुकरमूलावमोटिनी ॥ ५० ॥ अवमोटिनी परिवर्त्तनशीला ॥ ५० ॥ अथ
वातकंटकस्य लक्षणमाह ॥ रुक् पादे विषमे न्यस्ते श्रमाद्वा जायते यदा ॥ वातेन गुल्फमा
श्रित्य तमाहुर्वातकंटकं ॥ ५१ ॥ विषमपादन्यासकुपितः श्रमकुपितो वा वायुर्गुल्फे वेद
नां जनयति ॥ तां वातकंटकमाहुः ॥ ५१ ॥ अथ पाददाहस्य लक्षणमाह ॥ पादयोः कुरुते दाहं
पित्तासृक्सहितोऽनिलः ॥ विशेषतश्चंक्रमणात्पाददाहं तमादिशेत् ॥ ५२ ॥ विशेषतो

॥ २३१ ॥

ष्टंक्रमणादित्येनेनखिंचितस्यमंदोदाहरतिदर्शयति ॥५२॥ अथपादहर्षस्यतल्लक्षणमा
ह ॥ हृष्येतेचरणौयस्यभवतश्चप्रसुप्तकौ ॥ पादहर्षःसविज्ञेयःकफवातप्रकोपजः
॥५३॥ हृष्येतेरोमांचितौभवतः ॥ प्रसुप्तकौझिनिझिनियुक्तौ ॥५३॥ अथाक्षेपकस्या
सामान्यंलक्षणमाह ॥ यदातुधमनीःसर्वाःकुपितोभ्येतिमारुतः ॥ तदाक्षिपत्याशु
मुहुर्मुहुर्देहंमुहुश्चरः ॥ मुहुराक्षेपणाद्वायुराक्षेपकइतिस्मृतः ॥५४॥ सर्वाःऊर्ध्वाध
स्तिर्यग्गाः ॥ मुहुर्मुहुर्देहंआक्षिपति गजारूढस्येवपुरुषस्यगात्रंदोलयति ॥ किंचि
च्छिद्योमारुतःमुहुश्चरःवारंवारंसंचरणशीलः ॥ मुहुराक्षेपणात्देहस्यमुहुश्चालना
त् ॥ अयंवायुराक्षेपकइतिस्मृतः ॥५४॥ अथाक्षेपकस्यचतुरोभेदानाह ॥ पित्तश्ले
९ ष्मान्वितोवायुर्वायुरैकैकेवलः कुर्यादाक्षेपकंत्वन्यंचतुर्थमभिघातजः ॥५५॥ पि

॥ २३२ ॥

ग्नान्वितः श्लेष्मान्वितश्च वायुः केवलश्च वायुराक्षेपकत्रितयं कुर्यात् । अन्यश्चतुर्थमभि
घातज इति अन्यो दंडाद्यभिघातजो । वायुश्चतुर्थमाक्षेपकं कुर्यादित्यर्थः ॥ तत्र केवल
वातजस्याक्षेपकस्य लक्षणमाह ॥ पाणिपादशिरः पृष्ठश्रोणीः स्तभ्नाति मारुतः ॥ दं
डवत्स्तब्धगात्रस्य दंडकः सोनुपक्रमः ॥ ५६ ॥ अपवातजाक्षेपको दंडकाख्यः ॥ सोनुपक्र
मः स्वभावादेवासाध्यः ॥ ५६ ॥ अथ श्लेष्मान्वितवातजस्याक्षेपकस्य लक्षणमाह
कफान्वितो यदा वायुर्धमनीष्ववतिष्ठति । स दंडवत्स्तंभयति कृच्छ्रो दंडापतानकः ॥ ५७
सः आक्षेपकः दंडापतानकः दंडापतानाख्यः स कृच्छ्रः कष्टसाध्यः अत्र च मुहुर्मुहुरा
क्षेपणं बोद्धव्यं ॥ आगंतुजाक्षेपकस्य लक्षणं सामान्यमेव बोद्धव्यं ॥ पित्तजाक्षेपक
स्य तु लक्षणं व्याने पित्तावृते दाह इत्यादिना वक्ष्यमाणं ज्ञेयं ॥ ५७ ॥ अथापतानका

॥ २३२ ॥

मस्य तल्लक्षणमाह ॥ अंगुलीगुल्फजठरहृद्वक्षोगलसंश्रितः ॥ स्नायुप्रतानमनिलस्तदा
क्षिपति वेगवान् ॥५४॥ विष्टब्धाक्षस्तब्धहनुर्भग्नपार्श्वः कफं वमन् ॥ अभ्यंतरे धनुरि
व तदा नमति मानवः ॥ यदा सोभ्यंतरायामं कुरुते मारुतो बली ॥५५॥ यदास सबली मारुतो
भ्यंतरायामं कुरुते तदांगुल्यादिसंश्रितो निलः ॥ स्नायुप्रतानं स्नायुजालं स्नायुरज्जोप
तल्लक्षणं ॥ तेन शिराकंडरयोरपि ग्रहणं ॥ आक्षिपति कंपयति ॥ किंच तदा स मानवः
विष्टब्धाक्षः स्तब्धनेत्रः ॥ भग्नपार्श्वे इव पार्श्वे यस्य सः ॥ कफं वमन् स नर अभ्यंतरे ध
नुरिव नमतीति ॥ क्रोडेन नमनं अभ्यंतरायामः ॥५८॥५६॥ अथ बाह्यायामस्य तल्लक्ष
णमाह ॥ महाहेतुर्यदा वायुः शिराः स स्नायुकंडराः ॥ मन्यापृष्ठस्थिता बाह्याः संशोष्य
नमयेद्बहिः ॥ ६॥ यत्र तं बहिरायामं प्रवदंति भिषग्वराः ॥ तमसाध्यं बुधाः प्राहुर्वी

॥२३३॥

क्षः कद्गुरुभंजनं ॥ ६९ ॥ वक्षःकटूरुभंजनमिति तत्रापि यो वक्षःकटूरू हन्‌मिनत्रिनम
यति तमसाध्यमाहुः ॥ पक्षेननमनं वा ह्यायामः ॥ ७० ॥ ७१ ॥ अथ धनुस्तंभस्य लक्षणमा
ह ॥ धनुस्तुल्यो नमेद्यस्तु स धनुस्तंभसंज्ञितः ॥ विवर्णो वद्धदन्तश्च स्रस्तांगो नष्टचेत
नः ॥ प्रस्विद्यंश्च धनुस्तंभी दशरात्रं न जीवति ॥ ७२ ॥ अंतरायामे गुल्फादौ आक्षेपस्त
आक्षेपत्वादिकं च भवति धनुस्तंभे धनुर्वन्नमनमात्रमित्यनयोर्भेदः ॥ विवर्णो वद्धुवद
न इत्यत्र वेधो चिबुकस्येत्येयः ॥ ७२ ॥ अथ कुब्जस्य लक्षणमाह ॥ हृदयं यदि वा पृष्ठमुन्नतं
क्रमशः सरुक ॥ क्रुद्धो वायुर्यदा कुर्यात्तदा तं कुब्जमादिशेत् ॥ ७३ ॥ यदेत्यकस्माद्यदि वेति वि
कल्पनार्थः ॥ तेनैव पुनरुक्तिदोषः ॥ नन्वंतरायामः क्रोडतो बहिरायामः पृष्ठतो भवति
ताभ्यामस्य को भेदः ॥ उच्यते ॥ अंतरायामबहिरायामयोः प्रकृतस्यैवान्तः शरीरस्य

॥२३३॥

वहिः शरीरस्य यानमतं अत्र तु हृदयं पृष्ठं वा शरीराद्वहिर्भवतीतिभेदः ॥ ६३ ॥ अथापतंत्र
कस्य तक्षलणमाह ॥ ॐ कुः स्वैः कोपनैर्वायुः स्थानादूर्ध्वं प्रपद्यते ॥ पीडयेन् हृदयं गत्वा शि
रः शंखौ च पीडयेत् ॥ ६४ ॥ धनुर्वन्नामयेद्गात्राण्याक्षिपेन्मोहयेत्तथा ॥ ६५ ॥ स कृच्छ्रादुच्छ्वस
त्यपि च स्तब्धाक्षोथ निमीलकः ॥ कपोत इव कूजेच्च निःसंज्ञः सोपतंत्रकः ॥ ६६ ॥ स्थानात् प
क्वाशयात् ऊर्ध्वं शिरः इति प्र ॥ आक्षिपेच्चालयेत् ॥ अथ निमीलकः अथवा निमीलिता
क्षः ॥ एवं तानि भवंति सोपतंत्रकः ॥ ६४ ॥ ६५ ॥ ६६ ॥ अथापतानकस्य तक्षलणमाह ॥ दृष्टिं संस्ता
भ्य संज्ञां च हत्वा कंठेन कूजति ॥ हृदि मुक्ते नरः स्वास्थ्यं याति मोहं वृते पुनः ॥ वायुना दारुणं
नरः
प्राहुरेके तमपतानकं ॥ ६७ ॥ गर्भपातनिमित्तश्च शोणितातिस्रवाच्च यः ॥ अभिघात
निमित्तश्च न सिध्यत्यपतानकः ॥ ६८ ॥ दृष्टिं स्तभ्य गृह्णाति ॥ संस्तभ्य नाशयित्वा ॥

॥२३४॥

कूजति कूजयति वायुरिति शेषः॥ अस्यासाध्यत्वमाह। गर्भेत्यादि॥ छ॥६९॥ अथप
क्षाघातस्य लक्षणमाह। गृहीत्वार्द्धं तनोर्वायुः शिराः स्नायूर्विशोष्य च॥ पक्षमन्यतमं
हंति संधिबंधान्विमोक्षयन्॥ इति॥ कृत्स्नोऽर्द्धकायस्तस्य स्यादकर्मण्यो विचेतनाः॥
एकांगरोगं तं केचिदन्ये पक्षवधं विदुः॥७०॥ अर्द्धं अर्द्धनारीश्वरवत्॥ पक्षं बाहुपार्श्वो
रुजंघादिभागं॥ अन्यतमं वामं दक्षिणं वा॥ संधिबंधानकफसंहितस्नायुभिः कृता
न्॥ विमोक्षयन् शिथिलीकुर्वन्॥ अर्द्धकाय इत्यत्र केचित्कृत्स्नग्रहणं पुनःपासर्वांगव्या
प्यर्थं॥ अकर्मण्यः कर्मासमर्थः॥ विचेतनः ईषत्स्पर्शादिज्ञानयुक्तः॥ छ॥७०॥ अथा
स्य साध्यासाध्यस्थानार्थमाह॥ दाहसंतापमूर्च्छाः स्युर्वायौ पित्तसमन्विते॥ शैत्यशो
थगुरुत्वानि तस्मिन्नेव कफावृते॥७१॥ दाहो बाह्यः॥ संताप आभ्यंतरः॥ एतच्चैतक्ष

॥२३४॥

णामन्यत्रापि वातव्याधौ येदृष्टं ॥ सामान्यतो वा या वितिनिर्दिष्टत्वात् ॥ ७१ ॥ अथ पक्षा
घातस्य कृच्छ्रसाध्यत्वादिकमाह ॥ शुद्धवातहतं पक्षं कृच्छ्रसाध्यतमं विदुः ॥ साध्यमन्
न्येन संयुक्तमसाध्यं क्षयहेतुकं ॥ ७२ ॥ अन्येन पित्तेन कफेन वा ॥ क्षयहेतुकं क्षयो धातु
क्षयः ॥ तत्कुपितवातनिमित्तकं ॥ ७२ ॥ अथापरमसाध्यतलक्षणमाह ॥ गर्भिणीसूति
काबालवृद्धक्षीणेष्वसृक्क्षये ॥ पक्षाघातं परिहरेद्वेदनारहितो यदि ॥ ७३ ॥ वेदना
रहितो यदीति भिन्नमसाध्यतलक्षणं ॥ वेदनात्र स्पर्शज्ञानं ॥ तथा च विश्वकोशे ॥ वेद
नाज्ञानदुःखयोरिति ॥ ७३ ॥ अथ सर्वांगवातस्य लक्षणमाह ॥ सर्वांगपवने क्रुद्धे गा
त्रस्फुरणभंजने वेदनाभिपरीताश्च स्फुटंतीवास्य संधयः ॥ ७४ ॥ अथ स्थाननाम
तलक्षणान्वातव्याधीनाह ॥ स्थाननामानुरूपैश्च लिंगैः शेषान्विनिर्दिशेत् ॥ स

॥२३५॥

वैद्येतेषु संसर्गे पित्तादेरूपरक्षयेत्॥ ७५॥ स्थानानुरूपैर्लिंगैः यथा कुक्षिशूलं वस्तिशूल
मित्यादि॥ नामानुरूपैः यथा शूल इत्युक्ते कीलनिखातवेदनाविशेष एवोच्यते तथा
तोदभेदादिभिरपि पीडाविशेष एवावगम्यत इति मधुकोशकृत्॥ ७५॥ प्रथमं हृत्स्थके
सत्वं ततो वाचालता पिच॥ आटोपः पार्श्वशूलं च पुरीषस्यातिगाढता॥ ७६॥ तथा मता
प्रवृत्तिश्च कंपस्तंभश्च रूक्षता॥ कार्श्यं कार्ष्ण्यं च शैत्यं च रोमहर्षो व्यथा तथा॥ ७७॥ तोदो
भेदः शिरास्फूर्त्तिरंगमर्दोंगशुष्कता॥ संकोचश्चांगविभ्रंशो मोहश्चैव चलचित्तता॥
७८॥ निद्रानाशः स्वेदनाशो बलहानिश्च भीरुता॥ शुक्रक्षयो रजोनाशो गर्भनाशः परि
भ्रमः॥ ७९॥ आटोपो गुडगुडाशब्दः॥ व्यथा पीडा॥ सा च पादपार्श्वश्रोत्राक्षिवक्षसा
मिति जैज्जटः॥ तोदः सूचीव्यधनेनेव पीडा॥ भेदो विदारणेनेव व्यथा॥ संकोचः

२३५

श्चिरग्रहणमिति शेषः ॥ अंगविभ्रंशः अंगानां स्वस्थानत्यागेन स्खलनं ॥ निद्रानाश इत्यु
पलक्षणं तेन निद्राल्पत्वमपि ॥ गर्भनाशः आमगर्भपातः ॥ गर्भशोष्यायां वाताधि
ष्ठानात् गर्भाग्रहणमिति जेज्जटः ॥ परिश्रमः आयासं विनाश्रमः ॥ ७६ ॥ ७७ ॥ ७८ ॥ ७९
एवंविधानि रूपाणि करोति कुपितोऽनिलः ॥ हेतुस्थानविशेषेण भवेद्रोगविशेषकृ
त् ॥ ८० ॥ एवंविधानि रूपाणि शिरोग्रहादीन्यपरीति ॥ हेत्वित्यादि ॥ हेतुविशेषः श्लेष्मा
द्यावृतत्वादि ॥ यथा श्लेष्मावृतो वायुर्मन्यास्तंभं करोति ॥ स्थानविशेषः कोष्ठादि ॥ य
था तत्र कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोरित्यादि ॥ ८० ॥ तत्र हेतुविशेषेणावातव्या
धिविशेषमाह उदाने पित्तसंयुक्ते दाहो मूर्च्छा भ्रमः क्लमः ॥ अस्वेद हर्षौ मंदोग्निः
शीतता चक्रकायते ॥ ८१ ॥ प्राणे पित्तावृते छर्दिर्दाहश्चैवोपजायते ॥ दौर्बल्यं सदनं

तंद्राचैव रसश्चंचककफावृते ॥ ८२ ॥ स्वेदो दाहस्तथा मूर्छा समाने पित्तसंवृते ॥ कफेन सक्ते
विण्मूत्रे गात्रहर्षश्च जायते ॥ ८३ ॥ कफेन संवृते समाने सति विण्मूत्रे सक्ते भवतः
अवरुद्धे भवतः ॥ गात्रहर्षो रोमांचः ॥ ८३ ॥ अपाने पित्तसंयुक्ते दाहौष्ण्ये स्याद्रक्तमूत्रता
अधःकाये गुरुत्वं च शीतता च कफावृते ॥ ८४ ॥ व्याने पित्तावृते दाहो गात्रविक्षेपः
सक्लमः ॥ स्तंभो दंडकश्चापि विश्लूतशोथौ कफावृते ॥ ८५ ॥ दंडकस्याक्षेपभेदः ॥ ८५ ॥ अ
परसादिधातुगतानां वातानां लक्षणान्याह ॥ त्वग्रूक्षा स्फुटिता सुप्ता कृशा कृष्णा च
तुद्यते ॥ आतन्यते सरागा च सर्वरुक् त्वग्गते निले ॥ ८६ ॥ आतन्यते विस्तार्यते रसं
सर्वरुक् सर्वत्वग्व्यथा ॥ त्वग्गत इति त्वक्शब्देनात्र रस उच्यते ॥ त्वग्गाधारत्वात् ॥
तेन रसगत इत्यर्थः ॥ ८६ ॥ रुजस्तीव्राः ससंतापा वैवर्ण्यं कृशतारुचिः ॥ गात्रेषु

हृषि मुक्तस्य सम्भग्नास्त्यागते निरे ॥ ७७ ॥ अर्द्धं विबलानि ॥ मुक्तस्य मुक्तं च ततः संभः संत
पर्शोन सक्तवद्धेः ॥ ७८ ॥ पूर्वं गंतु यतेस्त व्यंदंडमुष्टिहतेयथा ॥ सरुक्प्रमितमत्यर्थं चाते
मांसंसमाश्रिते ॥ तथा मेदःश्रितः कुर्यात् ग्रंथीन मंदरुजो व्रणान् ॥ ७९ ॥ तथा मेदःश्रि
तः मांसगतवदित्यर्थः ॥ अणुदरेणाव्रत्वासतैरस्थिरूपाश्रया मेदाय ॥ कुर्याद्ग्रंथीनि
त्यादि विशेषः ॥ ८० ॥ मेदोस्थि पर्वशोणं संधिश्रुतं मांसवत क्षयः ॥ असृग्भंः संतता
स्तु च याते दुष्टे स्थिसंस्थिते ॥ याते मज्जगते पीडा न कदाचित्प्रशाम्यति ॥ ८१ ॥ मज्ज
गतो स्थिगतवत् तथा मेदोगतो मांसगतवत् ॥ पीडासातत्यमिति विशेषः ॥ ८२ ॥
क्षिप्रं मुंचति बध्नाति शुक्रं गर्भमथापि वा ॥ विकृतिं जनयेच्चापि शुक्रस्थः कुपि
तो निलः ॥ ८३ ॥ शुक्रं बध्नाति न स्रवतयत्येव ॥ गर्भं क्षिप्रं मुंचति आममेव पात

यति ॥ वध्मातिमूढं करोति वातदुष्टशुक्रारभ्यत्वात ॥ विकृतिं शुक्रस्य वर्णित त्वा दिरूपं गर्भस्य विकृतां गत्वादिरूपं जनयति ॥ ८० ॥ अथ स्थानविशेषेण वातव्याधि विशेषमाह ॥ तत्र कोष्ठगतस्य वातस्य लक्षणमाह ॥ वाते कोष्ठाश्रिते दुष्टे निग्रहो मूत्रवर्चसोः ॥ वर्ध्महृद्रोगगुल्मार्शः पार्श्वशूलं च जायते ॥ ८१ ॥ कोष्ठशब्देनावि शेषात सर्वेषामाशयादयो गृह्यते ॥ तथाच्यामाशयादिगतवातस्य लक्षणानि विशेषार्थं पृथगपि वक्ष्यंते ॥ निग्रह अप्रवृत्तिः ॥ ८२ ॥ अथामाशयगतस्य वातस्य लक्षणमाह ॥ रुक्पार्श्वोदरहृन्नाभेस्तृष्णोद्गारविषूचिकाः ॥ कासः कंठास्यशोष श्चाप्यामाशयस्थिते ॥ ८३ ॥ आमाशयो नाभिस्तनांतरं ॥ ८४ ॥ अथ पक्वाशय गतस्य वातस्य लक्षणमाह ॥ पक्वाशयस्थो त्रकूजं शूलाटोपौ करोति च ॥ कृच्छ्रमू

॥ २३० ॥

त्रपृष्ठीवत्समानाहं त्रिकवेदनां ॥ ८२ ॥ आटोपो वातस्य क्षुब्धत्वं ॥ न तु गुडगुडाशब्दस्त-
स्यांत्रकूजेनोक्तत्वात् ॥ ८३ ॥ अथ गुदगतस्य वातस्य लक्षणमाह ॥ गु. होविलमूत्रवा-
तानां शूलाध्मानाश्मशर्कराः । जंघोरुत्रिकपार्श्वांसपृष्ठरोगो गुदेनिले ॥ ८४ ॥ अ-
श्मा अश्मरी ॥ रोगोत्र रुजा पीडेति यावत् ॥ ८४ ॥ अथ श्रोत्रादिगतस्य सिरागतस्य
च वातस्य लक्षणमाह ॥ श्रोत्रादिष्विंद्रियवधं कुर्यात् क्रुद्धः समीरणः । कुर्याच्छि-
रागतः शूलं शिराकुंचनपूरणं ॥ ८५ ॥ शूलं शिरायामेव कुंचनं संकोचः पूरणं स्थू-
लत्वं ॥ ८५ ॥ अथ स्नायुगतस्य संधिगतस्य च वातस्य लक्षणमाह ॥ शूलमाक्षेपकः
कंपः स्तंभः स्नाय्वनिलाद्भवेत् ॥ हंति संधिगतः संधीन् शूलशोथौ करोति च ॥ ८६ ॥
हंति विश्लेषयति ॥ ८६ ॥ अथ हनुस्तंभादीनां कष्टसाध्यत्वादिकमाह ॥ हनुस्तं

२३५

म्भार्दिताक्षेपपक्षाघातापतानकाः ॥ कालेन महता वाता यत्नात्सिध्यंति वा न वा ॥ न
वान्बलवतस्त्वेतान्साधयेन्निरुपद्रवान् ॥ ६७ ॥ अथोपद्रवानाह ॥ विसर्पदाहरुक्सं
गमूर्छारुच्यग्निमार्दवैः ॥ क्षीणमांसबलं वाता घ्नंति पक्षवधादयः ॥ ६८ ॥ संगो मू
त्रादीनामप्रवृत्तिः ॥ वाता वातविकाराः ॥ कार्य्यकारणयोरभेदोपचारात् ॥ ६८ ॥ अथा
साध्यमाह ॥ शूनं सुप्तत्वचं भग्नं कंपाध्माननिपीडितं ॥ नरं रुजार्त्तिमंतं च वातव्याधि
र्विनाशयेत ॥ ६९ ॥ शूनं सशोथं ॥ सुप्तत्वचं स्पर्शानभिज्ञं ॥ ६९ ॥ अथ प्रकृतिस्थस्य
वायोः कार्य्यं लिंगं चाह ॥ अव्याहतगतिर्यस्य स्थानस्थः प्रकृतौ स्थितः ॥ वायुः स्यात्सो
धिकं जीवेद्वीतरोगः समाः शतं ॥ ७० ॥ अव्याहतगतिः अनिरुद्धगतिः ॥ स्थानस्थः स्वाश्र
येव्यवस्थितः ॥ प्रकृतौ स्थितः अक्षीणोवृद्धश्च वीतरोगः निरोगः ॥ कफपित्तद्वयेर

२३५

पिवाताधीनत्वात् वातदुष्ट्यभावेन कफपित्तदुष्ट्यभाव इत्यर्थः ॥ अधिकं पंचदिनोत्तर
विंशतिवर्षाधिकं ॥ समासतस्येदं विशेषणं ॥ परिहकारोह आपुनिरूपणे ॥ समाःषष्टि
र्द्विगुणामनुजकरिणां पंचचनिशा इति १०० ॥ अथ वातव्याधिचिकित्सा ॥ सर्वेषामे
व वातानामभ्यंगः स्वेदनं तथा ॥ नस्यं विरेचनं बस्तिकर्म पूर्वं प्रशस्यते ॥ स्वादम्लस्नि
ग्धलवणान्नबो ष्णादिनिषेवणैः ॥ निवातगृहसंस्थानैरुष्णप्रावरणादिभिः ॥ वातेज
पेद्दलकैरन्नपानादिसेवनैः ॥ रास्नामृतामहादारुनागरैरंडजं श्रृतः ॥ सर्वधातुग
ते वाते सामे सर्वांगगेपि वै पिवेत ॥ इति रास्नापंचकं ॥ सिद्धः कल्को रसोनस्य तिलतैलेन मिश्रि
तः ॥ वातरोगान् जयेत्तीव्रान् विषमज्वरनाशनः ॥ इति रसोनकल्कः ॥ रास्ना द्विगुणभागा
स्यादेकभागास्तथापराः ॥ धन्वयासवलैरंडदेवदारुशटीवचः ॥ वासकोनागरं पथ्या

॥२३८॥

चव्यं मुस्ता पुनर्नवा ॥ गुडूची वृद्धदारुश्च शताह्वा शतपुष्पा च गोक्षुरः ॥ अश्वगंधा प्रतिविषा कृत
मालः शतावरी ॥ वृषः सहचरश्चैव धान्यकं बृहतीद्वयं ॥ एभिः कृतं पिबेत्क्वाथं शुंठीचूर्ण
नसंयुतं ॥ कृष्णाचूर्णेन वा योगराजगुग्गुलुनाथवा ॥ अजमोदादिना वापि तैलेनैरंडजेन वा ॥ ना
आमवातं धनुर्वातं दंडवातं तथैव च ॥ सर्वांगवातकं हंति मेदोनलमसंशयं ॥ सर्वांगकंपे कु
ब्जत्वे पक्षाघाते पवाहुके ॥ गृध्रस्यामामवाते च श्लीपदे चापतानके ॥ अंत्रवृद्धौ तथाध्माने जं
घाजानुगदेर्दिते ॥ शुक्रामये मेढ्ररोगे वंध्यायोन्यामयेषु च ॥ महारास्नादिराख्यातो ब्रह्मणा
निर्मितः स्वयं ॥ इति महारास्नादिः ॥ रास्नामृतैरंडसुराह्वविश्वं तुल्येन गाढं पुरहरणा विमर्द्य
खादेत्समीरी सशिरोगदी च नाडीगदी चापि भगंदरी च ॥ इति रास्नादिगुग्गुलुः ॥ नागरं
पिप्पलीमूलं चव्यमूषणाचित्रकं ॥ मषं हिंग्वजमोदा च सर्षपो जीरकद्वयं रेणुकेंद्रय

२३८ ॥

वाः पाठाविडंगंगजपिप्पली ॥ कटुकातिविषाभार्गीवचामूर्वाचपत्रकं ॥ देवदारुक्षएलाकुष्ठं।
रास्नामुस्ताचसैंधवं ॥ एलात्रिकंटंकः पथ्याधान्यकंचविभीतकं ॥ धात्रीचत्वगुशीरंचयव
क्षारोखिसात्वपि ॥ एतानिसमभागानिसूक्ष्मचूर्णानिकारयेत ॥ यावंत्येतानिचूर्णानि
तावानेवात्रगुग्गुलुः ॥ संमर्द्यसर्पिषापश्चात्सर्वंसंमिश्रयेच्चतत ॥ एकंपिंडंततःकृ
त्वाधारयेद्घृतभाजने ॥ गुटिकाश्चैकमात्रास्तुकृत्वादेत्ताश्चयथोचितः ॥ गुग्गुलुर्योगरा
जोयंमहान्श्रेष्ठोरसायनं ॥ मैथुनाहारपानानांनियमोनात्रविद्यते ॥ सर्वान्वाताम
यान्हन्यादामवातमपस्मृतिं ॥ वातरक्तंतथाकुष्ठंतथादुष्टव्रणानपि ॥ अर्शांसिगृ
हणीरोगंप्लीहगुल्मोदराण्यपि ॥ आनाहमग्निमांद्यंचश्वासकासमरोचकं ॥ प्रमे
हंनाभिशूलंचकृमिंक्षयमुरोग्रहं ॥ शुक्रदोषंरजोदोषमुदावर्तंभगंदरं ॥ रास्नादि

॥२४०॥

क्वाथसंयुक्तः सर्वान्वातामयान्हरेत् ॥ काकोल्यादिश्रृतं सितं कफमारग्वधादिना ॥ दार्वीक्वथितेन मेहांश्च गोमूत्रेणाच पांडुतां ॥ मधुना मेदसो वृद्धिं कुष्ठं निंबक्वथितेनच ॥ छिन्नाक्वाथेनवातास्रं शोफं मूत्रकृच्छ्रजान्स्थुतान् ॥ पाटलाक्वाथसहितो विषं मूषकसंभवं ॥ त्रिफलाक्वाथसंयुक्तो दारुणामेत्रवेदनां ॥ पुनर्नवादेः क्वाथेन हंति सर्वोदराण्यपि ॥ अत्राद्यौषधास्त्रव्यं चेच्चतुर्गुणं लोहभस्मापि देयं ॥ यतः कर्षमयोमतमिति सारसंग्रहोक्तेः ॥ भक्षणे । परिभाषाच ॥ आदौ शाणोन्मितं खादेत्ततः कर्षार्द्धमात्रकं ॥ ततः कर्षमितं खादेद्गुग्गुलुं क्रमतो नरः ॥ दिनानां सप्तके पूर्वं गुग्गुलोः शाणमाहरेत् ॥ द्वितीये कर्षमर्द्धं तु पूर्णकर्षं ततः परं ॥ इति महायोगराजगुग्गुलुः ॥ रसो गंधो वरा व्हिर्गुग्गुलुः क्रमवर्द्धिताः ॥ तत्रैकभागः सूतः स्याद्गंधको द्विगुणस्ततः ॥ त्रिभागा त्रिफला योज्या चतुर्भागस्तु चित्रकः

॥२४०॥

गुग्गुलोः पंच भागाः स्युः रुबुतैलेन मर्दितः ॥ क्षिप्त्वात्रोदितं चूर्णं तेन तैलेन मर्दयेत् ॥ गु
टिकां कर्षमात्रां तु भक्षयेत्प्रातरेव हि ॥ नागरैरंडमूलानां कषायं प्रपिबेदनु ॥ अभ्यज्यैरं
डतैलेन स्वेदयेत्सर्वदेहकं ॥ विरेकपरिणामे तु स्निग्धमुष्णं च भोजनं ॥ वातारिसंज्ञको
ह्येष रसो निर्वातसेवितः ॥ मासेन मरुतो रोगान् हरेत्सुरतवर्जितः ॥ इति वातारिरसः
अभ्रगंधविषव्योषरसटंकान् समांशकान् ॥ भावयेत्सप्तधा भृंगरसेन स्यात्समीर
हा ॥ आर्द्रद्रवेण च क्षौद्रवा खंडव्योषेण योजितः ॥ महावातान् जयत्याशु न साध्मातः
सुसंसकृत ॥ इति समीरपन्नगरसः ॥ नवाहिफेनं कुचिलं नवानि मरिचानि च ॥ समभा
गानि सर्वाणि रक्तिकाप्रमितानि च ॥ दद्यानि प्रातरेतानि पुनस्तांबूलचर्वणं ॥ कुब्जे च
खांजवाते च सर्वजे गृध्रसीगदे ॥ अपथ्याहो प्रयोक्तव्यः सोफे कंपे पतानके ॥ विष्णु

॥ २४१ ॥

आमहृचौदेय अपस्मारे विशेषतः ॥ इति समीरगजकेसरी रसः ॥ पारदं वंकं लोगंधपाषाण
मिहलसना गोवराटस्तथा तालकः ॥ अभ्रकं हेमनिरेणतन्मर्द्दयेद्रक्तिका भावयेदथयात।
विध्वंसकः ॥ इति लघुवातविध्वंसकः ॥ पलत्रयं हरीतक्याश्चित्रकस्य पलत्रयं ॥ एला
त्वक्पत्रमुस्तानां भागो द्विपलिको मतः ॥ रेणुका द्विपला प्रोक्ता तदर्द्धं नागकेसरं ॥ व्योषं च
पिप्पलीमूलं विषं च पलमात्रकं ॥ लोहचूर्णं पलं चैकं त्वक्क्षीर्य्यश्च पलं स्मृतं ॥ रसं प
लं तथा गंधं सूक्ष्मचूर्णानि कारयेत् ॥ पुरातनगुडे पक्वे तुलार्द्धं तद्विनिःक्षिपेत् ॥ हिम
स्पर्शे च गल्लोया हुते नाक्रांत तोवुधः ॥ प्रकुर्य्याद्गुटिकां वैद्यो विजयां वदलास्थिवेत् ॥
प्रमेहनिप्रयुंजीत वटीमेकां यथाबलं ॥ घृतेन भोजयेत्तावद्यावद्स्वबलं भवेत् ॥ हो
लावत्स्यो पचयं पुनर्हि द्वि प्रयोजयेत् ॥ अथवा गुटिकां साहुंपि पानपरिपीडयेत् ॥

॥ २४१ ॥

मासद्वयेनश्लेष्माणंपित्तंचैवत्रिभिर्हरेत् ॥ चतुर्भिर्वायुदोषांश्चनाशयेन्नात्रसंशयः ॥
मासैस्तुसप्तभिर्दद्रुजातान्रोगान्व्यपोहति ॥ सर्वव्याधिविनिर्मुक्तोवर्षेनैकेनजायते ॥
वर्षद्वयेप्रयोगेणवलीपलितवर्जितः ॥ जीवेद्वर्षशतंचैववलीपलितवर्जितः ॥ इतिविज
यादिगुटिका ॥ तद्युक्शुंठीकृतंचूर्णंपलसप्तमितंभिषक् ॥ तत्समंगोघृतंदत्वाभर्जयित्वा
ततोबुधः ॥ शुंठीसमरसोनंचपिष्ट्वातत्रविनिक्षिपेत् ॥ पलसप्तमितंदेयंशुभंमधुप्रय
त्नतः ॥ सर्वमेकत्रसंयोज्यपलमात्रंतुभक्षयेत् ॥ पक्षाघातंहनुस्तंभंकटिभंगंतथैवच
बाहुपीडांजयेत्तीव्रांवातरोगंचनाशयेत् ॥ इतिशुंठीयोगः ॥ पलमर्द्धपलंवापिरसोनस्य
सुकुट्टितं ॥ हिंगुजीरकसिंधूत्थसौवर्च्चलकटुत्रिकैः ॥ चूर्णितैर्माषकोन्मानैरवचूर्णि
विलोडितं ॥ यथाग्निभक्षितंप्रातरुष्णकाथानुपानतः ॥ दिनेदिनेप्रयोक्तव्यंमासके

॥२४२॥

कं निरंतरं ॥ वातामयं निहंत्येवं चार्द्दितं चापतंत्रकं ॥ एकांगरोगिणां रोगं तथा सर्वांगरोगिणां

ऊरुस्तंभं गृध्रसीं च शूलं हृद्रुक्कृमीनपि ॥ कटिपृष्ठामयं हन्यादष्ठीलं च समीरणं ॥ इति र

सोन योगः ॥ त्रिकटु त्रिफला चैव रेणुका ग्रंथिकानलं ॥ मृततोहं च तुर्जातं पारदं गंधकं

विषं ॥ विडंगाकल्लकं तुल्या सर्वेभ्यो द्विगुणो गुडः ॥ चणप्रमाणा गुटिका नाम्नाऽमरसुं

दरी ॥ अपस्मारे सन्निपाते श्वासे कासे गुदामये ॥ अशीतिवातरोगेषु उन्मादेषु विशे

षतः ॥ इत्यमरसुंदरी गुटिका ॥ शुंठी विषं च हिंगुजं च भर्जितं टंकणं तथा ॥ एतानि कर्षमा

त्राणि कस्तूरी माषमात्रका ॥ जातीफलं लवंगं च केसरं जातिपत्रिका ॥ आकल्लकं चैव [illegible]

लि पृथक् माषत्रयाणि वै ॥ एतेषां सूक्ष्मचूर्णं तु कृत्वार्द्रकरसस्य च ॥ भावनात्रितयं

दत्वा गुटिका माषसमानकाः ॥ कर्त्तव्या वातरोगेषु देया युक्त्यानुपानतः ॥ नागादिगुटि

॥२४२॥

काद्येषां संप्रदायेन कीर्त्तिता ॥ इति नागादिगुटी ॥ पारदः पन्नगस्ताम्रं गंधो कणा लोहवंगौ
ब्धं वह्निजं टंकणः ॥ अभ्रकं सर्वमितत्समं कारयेत्सार्द्रवेदं गारं व्याघ्रमाचूर्णयेत् ॥ आ
र्द्रकं सिंधुभवा क्षितिधात्री अब्बणा चित्रकभंगागादेश्चितिः ॥ त्रैफत्रयासकनिंबुरसो नको
नजयामिरिदं परिभाव्यं ॥ कफसीतसमीरप्रभूतमांचे हृदयस्मारगुल्मपयेषु मौठ्ये ॥ गृह
णीहिहगुल्मदंतवंधेप्यसने चोदरके च कोष्ठरोगे ॥ वातविध्वंसनः सर्वरोगापहः ॥
सन्निपाते ऽभराद्दुराक्षः केसरी ॥ यो जितो यं पुरा संकरेणाक्षितौ मानुषाणां गणाय प्रेय
से तिष्ठितं ॥ इति महावातविध्वंसः ॥ सूतहाटकवज्राणि ताम्रं लोहं च माक्षिकं ॥ तालं नी
लांजनं तुत्थमर्फेनं समांशकं ॥ पंचानां लवणानां च भागमेकं विमर्दयेत् ॥ वज्रीक्षीरै
र्दिनैकं तु लध्वाहो भूधरे पचेत् ॥ माषैकमार्द्रकद्रावैर्देहयेद्वातनाशनं ॥ पिप्पलीम

॥ २४३ ॥

रजं क्वाथं सकृत्समनुपाययेत् ॥ सर्वान्वातविकारांश्च निहंत्याक्षेपकादिकान् ॥ र
तिवातनाशनो रसः ॥ शुद्धसूतं मृतं लोहं ताप्यं गंधकतालकं ॥ पथ्याग्निमंथनिर्गुंडी
त्र्यूषणं टंकणं विषं ॥ तुल्यांशं मर्दयेत्खल्वे दिनं निर्गुंडिकारसैः ॥ मुंडीद्रवैर्दिनैकं तु
द्विगुंजं वटकीकृतं ॥ भक्षयेद्वातरोगार्तो रसं स्वच्छंदभैरवं ॥ रास्नामृतादेवदारुशुंठी
वातारिजं शृतं ॥ सगुग्गुलुं पिबेत्क्वाथमनुपानं सुखावहं ॥ इति स्वच्छंदभैरवो रसः
हरबीजं गंधकं च मर्द्यं चात्रितयं क्षिपेत् ॥ पाचयेत्कज्जलीकृत्वा काचकूप्यां च धार
येत् ॥ तदग्निगलितं सर्वं गृह्णीयाच्छुभपात्रके ॥ रक्तिकामानतो देयं संधिशूलं वि
नश्यति ॥ इति पारदादिपर्पटी ॥ पक्वकंदरसोनस्य गुलिका निस्तुषीकृताः ॥ पाटयि
त्वा च तन्मध्यं दूरीकुर्याच्च तदंकुरं ॥ निश्युग्रगंधनाशाय दध्ना संमीय रक्षयेत् ॥ ॥ २४३ ॥

ततः प्रक्षाल्य संशोष्य शिलायां परिपेषयेत् ॥ कल्कस्य पंचमं भागं चूर्णमेषां विनिक्षि-
पेत् ॥ सौवर्च्चलं यवानी च भर्जितं हिंगु सैंधवं ॥ कटुत्रिकं जीरकं च समभागं विचूर्णये-
त् ॥ खादेत्कर्षमितं प्रातः क्रियादोषाद्यपेक्षया ॥ अनुपानं प्रकुर्वीत यातारिष्टतम-
न्वेहं ॥ सर्वांगैकांगजं वातमर्दितं चापतंत्रकं ॥ अपस्मारं तथोन्मादमूरुस्तंभं च गृध्र-
सीं ॥ उरः पृष्ठकटीपार्श्वकुक्षिपीडां कृमीन्हरेत् ॥ मद्यं मांसं तथाम्लं च रसं सेवे-
त नित्यशः ॥ व्यायाममातपं रोषमतिनीरं गुडं तथा ॥ रसोनमश्मनं पुरुषस्त्यजेद्दे-
तान्निरंतरं ॥ वर्जयेत्तद्रती सा हि प्रमेही पांडुरोगवान् ॥ अरोचकी गर्भिणी च मूर्च्छी
ष्ठीरोगसंयुतः ॥ रक्तपित्ती च शोषी च यक्ष्मी छर्द्यर्दितो नरः ॥ पित्तेजाते प्रकुप्यी-
तु प्रयोगांते विरेचनं ॥ अन्यथा तस्य जायंते कुष्ठपांड्वामयादयः ॥ स्त्रीसत्त्वानां त

रीतं दद्याच्छालानामथवानिरुहं तां ॥ तथापि लभते सिद्धिं महावीर्य्याद्रसो नतः ॥ इतिरसो

॥२४४॥ नाथकल्कं ॥ पक्षयित्वाक्षुरेणांगं केवलानिलपीडितं ॥ तत्र प्रलेपं दद्याच्च पिष्टाज्जा

फलैः कृतं ॥ तेनायं बाहुजापीडा विश्वाची गृध्रसी तथा ॥ अन्याश्च वातजा पीडा प्रशमं

याति वेगतः ॥ इतिलेपः ॥ शतपुष्पसुरदिनेरुपयोगादलमठसिंधुमयेहरति ॥ अपि

लेपनतो स्थिगतं महतं कटिसंधिभवं त्रिदिनात्सततं ॥ इति शतपुष्पादिलेपः ॥ प

वनारिजटाद्विपताबगुलोसतिलेपचितावचजेनयुता ॥ कथनं हृदयोद्भवेपा

र्श्वकटीगतशूलविदारणसिंहनखं हृदयेरंडजपकाथः ॥ अथ तैलानि ॥ तत्र मध्यमना

रायणतैलं ॥ अश्वगंधां बलां बिल्वं पिप्पलीं बृहतीद्वयं ॥ श्वदंष्ट्रातियतानिंच ॥२४४॥

श्योनाकं चपुनर्नवां ॥ प्रसारणीं मग्निमंथं कुर्य्याद्दशपलं पृथक् ॥ चतुर्द्रोणे

एलाह्रीबेरसरलाजतुनखग्रन्थिकेकोलकं॥ चोरगुमुस्ताशतंत्वक्दारुकुस्तागरुतगरज
टाकुष्टमेततसमांशं॥ चैगुरायंकातराले सूक्ष्मडमरुकायंत्रतः सिद्धमेतत तैलंपुष्पै
र्भाव्यंपरिमलमिलितंनामतोगंधतैलं एतत्स्वक्ष्मीविलासं विजयतिजगतांनायकैसंप्रयुक्तं

जसेपक्वापादशेषंश्रृतंनयेत्॥ तैलाढकेनसंयोज्यशतावर्य्यारसाढकं॥ निक्षिपेत्तत्र
गोक्षीरंतैलात्तस्माच्चतुर्गुणं॥ शनैर्विपाचयेदेभिः कल्कैर्द्विपलिकैः पृथक्॥ वचाचं
दनकुष्ठैलामांसीशैलेयसैंधवैः॥ अश्वगंधाबलारास्नाशतपुष्पादेवदारुभिः॥ पर्णी
चतुष्टयेनैवतगरेणचसाधयेत्॥ तत्तैलंनावनेभ्यंगेपानेबस्तौचयोजयेत्॥ पक्षाघा
तंहनुस्तंभंमन्यास्तंभंगलग्रहं॥ कुब्जत्वंबधिरत्वंचगतिभंगंकटिग्रहं॥ गात्रशो
षेन्द्रियध्वंसंशुक्रनाशंज्वरक्षयान्॥ अंत्रवृद्धिंकुरंडंचदंतरोगंशिरोग्रहं॥ पा

॥२४५॥

र्ध्वमूलं च यं ग्रत्वं बुद्धिहानिं च गृध्रसीं ॥ अन्यांश्च विविधान्रोगान्हरेत्सर्वांगसंस्रया
न् ॥ अस्य प्रभावाद्वंध्यापि नारी पुत्रं प्रसूयते ॥ यथा नारायणो देवो दुष्टदैत्यविनाश
नः ॥ तथेदं वातरोगाणां नाशनं तैलमुत्तमं ॥ इति मध्यनारायणं तैलं वातव्याधौ ॥ तैल
प्रस्थे रसप्रस्थं विषचेद्रुमपत्रजं ॥ स्वर्णबीजं विषं गुंजाकल्कमेषां पृथक्पृथक् ॥ प
लार्द्धसंमितं क्षिप्त्वा सिद्धं च मृदुवन्हिना ॥ विषगर्भमिदं तैलं सर्ववातविकारनुत् ॥
इति लघुविषगर्भतैलं ॥ विषं च पुष्करं कुष्ठं वचा भार्गी शतावरी ॥ शुंठी हरिद्रे लशु
नं विडंगं देवदारु च ॥ अश्वगंधाजमोदा च मरिचं ग्रंथिकेवला ॥ रास्ना प्रसारिणी
त्रिगुगुडूची हपुषाभया ॥ दशमूलानि निर्गुंडी मिसिः पाठा च वानरी ॥ विशाला श
तपुष्पा च प्रत्येकं पलिकानि तु ॥ चतुर्गुणे जले पक्त्वा पादशेषं सृतं नयेत् ॥ तिले ॥२४५॥

तैलं क्षिपेत्प्रस्थं तथैरंडं च सार्षपं ॥ धत्तूरैरंडभृंगार्करसान्प्रस्थमितान्क्षिपेत् ॥ पा
चयेद्धोमयाग्नौ च तैलशेषं समुद्धरेत् ॥ पलमेकं विषं चात्र सूक्ष्मं कृत्वा विनिक्षिपेत्
सर्वेषु वातरोगेषु सदाभ्यंगो विधीयते ॥ संधिवाते सन्निपाते त्रिकपृष्ठकटिग्रहे ॥
पक्षाघाते तथा कुब्जे गात्रकंपे तिदारुणे ॥ कुब्जके च धनुर्वाते गृध्रस्यां च प्रतानके
विषगर्भमिदं तैलं योजनीयं सदा बुधैः ॥ इति वृहद्विषगर्भतैलं ॥ ज्योतिष्मतीं च कुष्ट
रं कालाजाजीं जवानिकां ॥ नेपालं तिलांश्च संपीड्य यंत्रे तैलं समुद्धरेत ॥ अभ्यंगान्ना
हृतव्याधीन्समस्तान्संप्रणाशयेत ॥ इति ज्योतिष्मत्यादितैलं ॥ पारदं गंधकं चै
व हरितालं मनःशिला ॥ समभागानि सर्वाणि सूक्ष्मचूर्णानि कारयेत ॥ त्रिदिनं
तुम्बपल्लेन कांजिकेन विमर्दयेत ॥ हस्तमात्रं ततो वस्त्रं संप्रसार्य विलेपयेत ॥ य

॥२४६॥

र्तिं कृत्वा ततो धीमान् तंतुभिः परिवेष्टयेत् ॥ वामहस्ते धृतां वर्तिं कृत्वा चैवमधोमुखीं
लोहपात्रमधो धृत्वा तैलमूर्ध्वं प्रदापयेत् ॥ द्रव्यतस्तिलजं तैलं दातव्यं च चतुर्गुणं ॥
पादशेषं ततो स्नात्वा ततः सिद्धं प्रजायते ॥ हस्तपादहृत्प्रि रोगग्रीवाजंघाजानुकंपनं ॥
मर्द्दनान्नाशयेद्देवि वचत्रिमिंद्राशनिर्यथा ॥ नष्टं यत्तेन तैलेन वातरोगाः सुदुर्जयाः ।
असाध्यमपथ्यासाध्यं नाशयेद्विपमात्रया ॥ रोगसांत्यै सदा भक्ष्यं तैलं विजयभैरवं
अत्र तैलभक्षणात्सहने घृतं देयं वर्त्ती ॥ घृतान्नं कारयेद्वर्त्तिं [illegible]ति तत्रांत रोक्तेः ॥ इ
ति विजयभैरवतैलं ॥ वत्सामूलकषायस्य भागान् षोडश कल्पयेत् ॥ अघोचदशमूल
स्य काथभागान्त्समाहरेत् ॥ कुलत्थयवकोलानां कषायस्याष्टभागिकाः ॥ गोक्षी
रस्याष्टभागांश्च पंचस्वेभ्यः पक्वपचेत् ॥ एकभागमितं तैलं तस्मिन्कल्कमि

॥२४६॥

मंथयेत् ॥ सैंधवागरुमंजिष्टाचंदनंदेवदारुच । तालंचसरलंकुष्टमेलाशैलेयपत्र
कं ॥ शालिपर्णीपृश्निपर्णीशतपुष्पापुनर्नवा । वचाशतावरीमांसीतगरंचाश्वगं
धिका ॥ मधुस्कंधगणाः सर्वएषांकल्कःसमीरितः ॥ सिद्धंतैलंशुभेपात्रेबलाद्यंस्था
पयेत्सुधीः ॥ सर्वेषुवातरोगेषुप्रशस्तंगुर्विणीषुच ॥ गर्भार्थिनीनांनारीणांपुंसां
चक्षीणरेतसां ॥ व्यायामक्षीणगात्राणांप्रसूतानांचपूज्यते । तासांयोगप्रमिदं
तैलंसुखिनांचविशेषतः ॥ षण्मासानांप्रयोगेणवृद्धोपितरुणायते ॥ सर्वरोगवि
निर्मुक्तःपंचसायकविग्रहः ॥ पंचसुक्वाथ्येषु ॥ मधुरागणाःजीवंतीयगणाः ॥ इतिबला
तैलं ॥ माषापवातसीक्षुद्रामर्कटीचकुरंटकः ॥ गोकंटःटिंटुकस्तेषांकुप्पीःसप्तपलं
पृथक् ॥ चतुर्गुणांबुनापक्त्वापादशेषंसृतंनयेत् ॥ कर्पासकास्थिवदरंशणवीजं

२६७

कुलत्थकं पृथक्चतुर्द्दशपलं चतुर्ग्गुणजले पचेत् । चतुर्थांशावशिष्टं च गृह्णीयात्क्वाथमु
त्तमं । प्रस्थैकं छागमांसस्य चतुःषष्टिपले जले । निक्षिप्य पाचयेद्धीमान् पादशेषं रसं
नयेत् । तैलप्रस्थे ततः क्वाथान् सर्वानेतान्विनिक्षिपेत् । कल्कैरेभिश्च विपचेद् मत्ता
कुष्ठनागरैः । रास्नापुनर्नवैरंडैः पिप्पल्या शतपुष्पया । येलाप्रसारिणीभ्यां च मांस्या
कटुकया तथा । पृथगर्द्धपलैरेतैः साधयेन्मृदुनाग्निना । हन्यात्तैलमिदं शीघ्रं मन्यास्तं
भमवाहुकौ । अर्द्धांगशोषमाक्षेपमुरुस्तंभापतानकौ । शस्त्राकंपं शिरःकंपं विश्वाची
मर्दितं तथा । माषादिकमिदं तैलं सर्ववातविकारनुत् । इति माषादितैलं । शतावरीब
लापुगमं पलर्यौ गंधर्वहस्तकः । अश्वगंधाश्वदंष्ट्रा च बिल्वाकोशः कुरंटकः । एषां सा
र्द्धपलान्भागान्कल्कपेष्यं विपाचयेत् । चतुर्गुणेन नीरेण पादशेषं शृतं नयेत् ॥

२६७

नियोज्य तैलप्रस्थेन क्षीरप्रस्थं विनिक्षिपेत्। शतावरीरसप्रस्थं जलप्रस्थं च योजयेत्
शतावरी देवदारुमांसी तगरचंदनं॥ शतपुष्पा वचा कुष्ठमेला शैलेयमुत्पलं॥ ऋद्धि
र्मेदा च मधुकं काकोली जीवकस्तथा॥ एषां कर्षसमैः कल्कैः तैलं गोमयवह्निना॥ पचे
त्तत्सिद्धतैलेन नरः स्त्रीषु वृषायते॥ नारी च लभते पुत्रं योनिशूलं च नश्यति॥ अंगशू
लं शिरःशूलं कामला पांडुता गरं॥ गृध्रसीं सीहशोषांश्च मेहान् दंडापतानकं॥ सदा
हं वातरक्तं च वातपित्तमयाह्रितं॥ असृग्दरं तथाध्मानं रक्तपित्तं नियच्छति॥ शतावरी ग
तैलमिदं कृष्णात्रेयेण भाषितं॥ इति शतावरीतैलं॥ कषायैः समूलार्कनिर्गुंडिधत्तूरप्र
जातैः शठीदारुहलस्नानिकुंभैः॥ त्रिवृत्सिंधुजन्मांतं धात्री विषाग्नित्रिकटून्वितैः॥ कुष्ठ
पुरिभश्चकल्कैः उदन्वस्फसेन तु याति रक्तैः तैलं तिलैरंडपूतीकजानां मिहैकं॥ विपक्वं ज

येस्तं भं कंपातिषैत्वं तथाक्षेपकां ईवमेदादिरोगान् ॥ इतियोगश्चंद्रिकोक्तं तैलं ॥ योगः स्या
द्वैध्येकतो वातरोगेतैलद्रोण्यां संस्थितिश्चैकतः स्यात् ॥ कोदंडस्थेभास्वतीयं प्रयुक्तामाषा
नुष्मादायवायोर्जरायाः ॥ इतितैलद्रोण्यां योगः ॥ मह्यातकानां खंडानि त्रिकोलप्रमितानि
वै ॥ कृत्वाचतुःपरे तोये तत्क्काथं मदुवन्हिना ॥ साधयित्वाचतुर्थांशं गृहीत्वाशुभभा
जने ॥ सिताघृतपयोयुक्तं पलार्द्धं पलमेवचा ॥ पाययेद्वाततोगेषुवातदोषाननामिधं
सर्वान्वातामयान् हंतिक्काथोयं नात्रसंशयः ॥ इतिसमीरस्याशानलक्काथः ॥ मेथिका
चंद्रसूर्श्चकाराजाजीयवानिका ॥ एतच्चतुष्टयं युक्तं चतुर्बीजमितिस्मृतं ॥ तच्चूर्णं ।
भक्षितेनित्यंनिहंतिपवनामयान् ॥ अजीर्णंशूलमाध्मानंपार्श्वमूलंकटिव्यथा
इतिमेथिकादिचूर्णं ॥ मिश्रीनतामरेणुमैःसपघ्विपुष्कराभिधैः ॥ हविर्युक्तैः प्रलेप ॥ २४८ ॥

नं त्रिफलां सपथ्यस्पलजित ॥ निष्क्वादिलेपः मेथीयपः ॥ सपट्पंचकमेकमस्यतुंबीफलेक्षे
ट्टनिसप्तदिनं निखातं ॥ उद्धृत्य तस्समुपलिप्तमपाकरोति वक्रत्वमर्तिमपियात कृतांसु
तीव्रां ॥ इति सामान्यचिकित्सा ॥ अथ विशिष्टानां वातव्याधीनां चिकित्सा ॥ तत्रादौ शिरो
ग्रहस्य चिकित्सामाह ॥ शिरोग्रहे तु कर्त्तव्या शिरागतमरुत्क्रिया ॥ दशमूलकषायेण मा
तुलुंगरसेन च ॥ श्रृतेन तैलेनाभ्यंगः शिरोवस्तिः प्रयुज्यते ॥ अथ जंभस्य चिकित्सामाह
शुंठी पिप्पलमूलं दीप्यकक्ष्मा सिंधुद्भूतं चेति सर्वं पथ्थकया ॥ तद्रूपं वा सुसूक्ष्मचूर्णी
कृतेपाजंभामंगस्तात्कतः स्यात्तदैव ॥ जंभावेगे समुत्पन्ने क्षोभने क्षेपने नरं ॥ स्वाप
येत्तेन नित्यमाज्जंभावेगः प्रशाम्यति ॥ जंभावेगः क्षयं याति कटुतैलेन मर्द्दनात ॥ भो
जनात्स्यादु भोज्यानां तथा तांबूलभक्षणात ॥ अथ हनुग्रहस्य चिकित्सामाह सैंधवं

॥२४८॥

चिबुकं स्निग्धं स्विन्नमुन्नमयेद्भिषक् विवृतं नमयित्वा कुर्यान्नाप्तामिह क्रियां ॥ पिप्पली
माधुकं चापि संचर्व्य च मुहुर्मुहुः ॥ निष्ठीवेत ततो योनं क्रोधमेधद्दमांतरे ॥ निर्गुंडूत्स्थुनं
सम्यक् संस्कुर्यात्तिलतैलवत् ॥ सैंधवेनान्वितं त्वा देहन्तस्तं भाद्दिंतो नरः ॥ रसोनगुलिकां
माषविद्दत्तं परिपेष्य च ॥ योजयेत्पिप्पलिकां कांतां सैंधवाद्रकहिंगुभिः ॥ ततस्तु वटकां
न कृत्वा तिलतैले च पचेच्छनैः ॥ भक्षयेत्तान्यथावन्हि हनुस्तंभी सुखी भवेत् ॥ अथ जि
ह्वास्तंभस्य चिकित्सामाह ॥ जिह्वास्तंभे यथावस्थं वातव्याधिचिकित्सितं ॥ सामान्यो
क्ता क्रिया चात्रार्द्दितस्यापि विहिता मता ॥ अथ मूकमिन्मिनगद्गदानां चिकित्सामाह
मूत्रं घृतस्य पलिकैः त्रिगुवचा लवणधातकीलोध्रैः ॥ अजेपयसि सपादैः सिद्धं सो
रस्वतं नाम ॥ विधिवद्द्रुपयुज्यमानं जडगद्गदमूकतां क्षणान्निहत्वा ॥ स्मृति मति मेधाः ॥ २४८ ॥

प्रतिभाः कुर्यात्सस्वरश्चवाग्भवति ॥ इति सारस्वतं घृतं ॥ साहरिद्रा वचा कुष्ठं पिप्पली विश्वभे
षजं ॥ अजाजी चाजमोदा च यष्टीमधुकसैंधवं ॥ एतानि समभागानि सूक्ष्मचूर्णानि का
रयेत् ॥ तच्चूर्णं सर्पिषा लोड्य प्रत्यहं भक्षयेन्नरः ॥ एकविंशतिरात्रेण भवेच्छ्रुतिधरो नरः
मेघदुंदुभिनिर्घोषो मत्तकोकिलनिस्वनः ॥ इति कल्याणकावलेहः ॥ अथ प्रलापस्य चि
कित्सामाह ॥ सतगरवरतिक्तांश्वेतांभोदतिक्तानलदतुरगगंधाभारतीहारहूराः ॥ मलय
जदशमूलीशंखपुष्प्यःसुपक्काः प्रलपनमपहन्युः पानतो नातिदूरात् ॥ वरतिक्तोत्रपर्प
टः ॥ नलदमुशीरं ॥ भारती ब्राह्मी ॥ अथ रसाज्ञानस्य चिकित्सामाह ॥ घर्षैर्जिह्वांजडांसिं
धूत्थवल्लैः साम्लवेतसैः ॥ किराततिक्तकः कट्वी कुटजकुटकिरेंद्रयवस्य फलं त्वचा ॥ मा
लकलं च पाषाणं राजिकां कृष्णजीरकं ॥ पिप्पली पिप्पलीमूलं चित्रं नागरमूषणं ॥

॥२५०॥

एषां कल्कैर्मुहुर्घृष्य जिह्विकामार्द्रिकारसैः। तेन सम्यक् विजानाति रसना सकलान् रसान्
कल्कः किराततिक्तादि जिह्वायाः स्रवतां हरेत्॥ व्याधिर्यः कर्णनादयोश्चिकित्सां कर्ण
रोगनिदाने वक्ष्यामः॥ अथ स्वरघ्नस्य चिकित्सामाह॥ स्पप्तवाते त्वसृङ्मोक्षं कारये
द्बुधो भिषक्॥ दिह्याच्च तगरेणामारध्मैसैतसमन्वितैः॥ अथार्द्दितस्य चिकित्सामा
ह॥ स्नेहपानानि नस्यं च भोज्यान्यनिलहंति च॥ उपनाहाश्च शस्यंते स्वेदनं च स्तयोर्द्दिते
रसोनकल्कं तिलतैलमिश्रं खादेन्नरो योर्द्दितरोगयुक्तः। तस्यार्द्दितं नाशमुपैति शीघ्रं
वृंदं घनानामिव वायुवेगात्॥ अथ मन्यास्तंभस्य चिकित्सामाह॥ कुक्कुटांडद्रवैरूहैसैः
सैंधवाद्यसमन्वितैः॥ ग्रीवां संमर्दयेत्तेन मन्यास्तंभः प्रशाम्यति॥ रूक्षं स्वेदं तथा नस्यं
मन्यास्तंभे प्रयोजयेत्॥ तैलेनाभ्येन यागृद्धीं वामभ्यज्यार्कदलैरपि॥ एरंडपत्रैर्वा वीष्ठाय स्वे ॥२५०॥

दद्याद्बाहुशोषे भिषक् ॥ अथ बाहुशोषस्य चिकित्सामाह ॥ बाहुशोषे पिबेद्भुक्त्वा सर्पिः कल्या
णकं महत् ॥ बलामूलकृतं तोयं सैंधवेन समन्वितं ॥ बाहुशोषकरे वाते मन्यास्तंभे च
शस्यते ॥ अथापबाहुकस्य चिकित्सामाह ॥ परमौषधमपबाहुकमन्यास्तंभोर्ध्वजत्रु
गतरोगे ॥ शीतलजलेन नस्यं तद्वत्प्रशमे जिंगिनी च पुरः ॥ मूलं बलायास्तथ पारिभद्रा।
त्तथात्मगुप्तास्वरसं पिबेद्वा ॥ भुंजीत यो माषरसेन नस्यं भवेदसौ वज्रसमानबाहुः ॥
अत्र बलायामूलं कल्कीकृत्य पिबेत् तथैव पारिभद्रस्य ॥ अथ विश्वाच्याश्चिकित्सा
माह ॥ दशमूलीबलामाषक्वाथं तैलाज्यमिश्रितं ॥ सायं भुक्त्वा पिबेन्नस्यं विश्वाच्यामप
बाहुके ॥ माषसैंधवबलारास्नादशमूलकहिंगुभिः ॥ वचाशतजटाख्याभिः सिद्धं तैलं
सनागरं ॥ ऊर्ध्वं भुक्त्वा शनाद्धन्याद्बाहुशोषापबाहुकौ ॥ विश्वाचीमुद्धतां चापि पक्षाघा

॥२५१॥

तेन पथ्या हितं ॥ अथोर्ध्ववातस्य चिकित्सामाह ॥ भागा दश विश्वायास्तत्तुल्यो वृद्धदारकश्रा
पि ॥ पथ्यात्रयं च भागाश्चतुरं शुंठी हिंगु संभवं ॥ एकः सैंधव भागास्तु तुल्यं चित्रकं च्यात्र ॥
सर्वं चूर्णयित्वा तं हन्त्येतच्चूर्णितं भुक्तं ॥ अत्र वृद्धदारकालाभे त्रिवृन्मूलं ग्राह्यं ॥ अथाध्मा
नस्य चिकित्सामाह ॥ आध्माने लंघनं पूर्वं दीपनं पाचनं ततः ॥ फलवर्ति क्रियां कुर्या
द्वस्तिकर्म च शोधनं ॥ कर्षमात्रा भवेत्कृष्णा त्रिवृता स्यात्पलोन्मिता ॥ खंडाद्दपि पलं
ग्राह्यं चूर्णमेकत्र कारयेत ॥ मधुनाक्षमितं लिह्याच्चूर्णमाध्माननाशनं ॥ दारुहैम
वतीकुष्ठशताह्वाहिंगुसैंधवैः ॥ लिंपेत्कोष्णै रसैः पिष्टैः शूलाध्मानयुतोदरं ॥ हैमव
तीच्छेत वचा ॥ अभया राग्वधो धात्री दंती तिक्ता स्नुही त्रिवृत ॥ मुस्ता सप्तैकमेतानि ग्रा
ह्याणि पलमात्रया ॥ तानि संक्षुद्य सर्वाणि जलाढके पचेत ॥ तत्र तोये ष्ममं भा

॥२५१॥

गं कषायमवशेषयेत् ॥ निस्तुषं जैपालबीजानि नवानि पलमात्रया ॥ तनुवस्त्रे धृतान्ये
व तस्मिन् क्वाथे शनैः पचेत् ॥ ज्वालयेदनलं मंदं यावत्क्वाथो घनो भवेत् ॥ ततः खल्वे
क्षिपेद्भागान् बीजैर्जैपालबीजतः ॥ भागं त्रीन्नागराद्द्वौ च मरिचाद्द्वौ च पारदात् ॥ गंध
काद्द्वौ च तानीह यावद्यामं विमर्दयेत् ॥ रसो नाराचनामायं भक्षितो रक्तिकामितः ॥ जले
न शीतलेनैव रोगानेतान्विनाशयेत् ॥ आध्मानं शूलमानाहं प्रत्याध्मानं तथैव च ॥
उदावर्त्ततथागुल्ममुदराणि हरत्यसौ ॥ वेगे भ्रांते च भुंजीत शर्करासहितं दधि ॥ ततस्त
त्सैंधवेनापि ततो दध्योदनं समाक् ॥ इति महानाराचो रसः ॥ सूतं टंकणकं तुल्यं मरि
चं सूततुल्यकं ॥ गंधकं पिप्पली शुंठी द्वौ द्वौ भागौ विचूर्णयेत् ॥ सर्वतुल्यं क्षिपेद्दंती
बीजं निस्तुषितं भिषक् ॥ द्विगुंजे रेचनं सिद्धं नाराचोयं महारसः ॥ आध्मानं मलवि

द्वं भमुदावर्त्तं च नाशयेत् ॥ अनुपानमथापि शीतांबु ॥ इति लघुनाराचो रसः ॥ अथ प्रत्या
ध्मानस्य चिकित्सामाह ॥ प्रत्याध्माने समुत्पन्ने कुर्याद्वमनलंघने ॥ दीपनादि प्रयुंजीत
पूर्ववद्वस्तिकर्म च ॥ अथ वाताष्ठीलाप्रत्यष्ठीलिकयोचिकित्सा ॥ अष्ठीलयोः क्रिया
कार्या गुल्मस्यांतरविद्रधेः ॥ चूर्णं हिंग्वादिकं चात्र पिबेदुष्णेन वारिणा ॥ तद्यथा ॥
हिंगुग्रंथिकधान्यजीरकवचाचव्याग्निपाठासठीरक्षाम्लवेलवणत्रयंत्रिकटुकं
क्षारद्वयं दाडिमं ॥ पथ्यापौष्करवेतसाम्लहपुष्याजाज्यस्तदेभिःकृतं चूर्णं भावितमे
तदार्द्रकरसैः स्याद्वषिलानाशनं ॥ बीजपूररसस्यापि भावना देया ॥ अथ तूनीप्र
तितून्योश्चिकित्सामाह ॥ तूनींच प्रतितूनींच प्रशस्ताः स्नेहबस्तयः ॥ पिबेद्वा स्ने
हलवणं पिप्पल्यादिगणांबुना ॥ उष्णेन तामठक्षारमगाठमेध्यावाघृतं ॥ अथ त्रि

कृछ्रतस्यचिकित्सामाह ॥ कारयेद्वालुकास्वेदं त्रिकछ्रेतीव्रयत्नतः । रक्तद्रावस्तात्कारी
षाग्निं धारयेत्सततं नरः ॥ अथ पवस्तिवातस्य चिकित्सामाह ॥ वलामूलत्वचश्चूर्णं
ससितं कर्षसंमितं ॥ पिवेत्कुडवदुग्धेन मुहुर्मूत्रेण पशांतये ॥ पथ्याविभीतधात्रीणां
चूर्णं चूर्णमतायसः ॥ मधुनासहसंलीढं मुहुर्मूत्रेणशांतिकृत ॥ द्विदीप्यकरुश्माति
तमेष्पिकानां कूसीं जिकास्वांरवससंयुतानां ॥ सुसमधाभंगरसस्रुतानां शुष्कं तु चूर्णं
वहुमूत्रजित्स्यात ॥ तिलानाममसितानां च भंगराजदलस्य च । तुषं पत्रान्याः कुडवं भंग
राजरसेन तु ॥ भावितं समधाचूर्णं कर्षमात्रं तु भक्षयेत ॥ वहुमूत्रं हरत्येव समाहान्ना
त्रसंशयः ॥ त्रिफलावेरगुपत्राब्दपाठाकाथो मधुस्रुतः ॥ कुंभयोनिनिवांभोधिं वहु
मूत्रं विशोषयेत ॥ यवक्षारस्य चूर्णं तु संयोज्य सितया सह ॥ भक्षयेन्नियतं तस्य प्र

॥२५३॥

शाम्येन्मूत्रनिग्रहः ॥ मेहनस्याथवा योनेर्मुखस्याभ्यंतरे शनैः ॥ घनसारयुतां
वर्त्तिं धारयेन्मूत्रनिग्रहे ॥ कूष्मांडस्य तु बीजानि चिर्भिजानि त्रपुसस्य च ॥ वस्तौ सं-
धारयेत्तेन प्रशाम्येन्मूत्रनिग्रहः ॥ आमलक्याश्च कल्केन वस्तिभागं प्रलेपये-
त् ॥ तेन प्रशाम्यति क्षिप्रं निपमान्मूत्रनिग्रहः ॥ अथ गृध्रसीचिकित्सामाह ॥ गृ-
ध्रस्यां तु नरं सम्यक् रेकैर्नयमनेन वा ॥ शाल्यानि रामं दीप्ताग्निं वस्तिभिः समुपाच-
रेत् ॥ तैलमेरंडजं प्रातः गोमूत्रेन पिबेन्नरः ॥ मासमेकं प्रयोगोयं गृध्रस्यां तु गृहापहः
निर्गुंडैरंडबीजानि पीलुश्रेष्ठी रेण पाचयेत् ॥ तत्याय संकटीशूले गृध्रस्यां परमौ-
षधं ॥ गोमूत्रे रंडतैलाभ्यां कृष्णाचूर्णं पिबेन्नरः ॥ दीर्घकालोत्थितां हंति गृध्रसीं
कफवातजां ॥ सिंहास्यदंतीकृतमालकानां पिबेत्कषायं त्वथ तैलमिश्रं ॥ योग

॥२५३॥

ध्रसीनवगतिः प्रसुप्तः सशोथगात्रः स्याद्विकिमत्र चित्रं॥ वृहन्निंबतरोः सारो वारि

णा परिपेषितः॥ संपीतो नाशयेत्क्षिप्रमसाध्यामपि गृध्रसीं॥ शेफालिकादलक्का

थो मृदुग्निपरिपाचितः॥ दुर्वारं गृध्रसीरोगं पीतमात्रः प्रनाशयेत्॥ शेफालिका

निर्गुंडीः॥ रास्नायास्तु पलं चैकं पंचकर्षाणि गुग्गुलोः॥ सर्पिषा वटिकां कृत्वा भ

क्षयेद्गृध्रसीहरीं॥ रास्नामृतारग्वधदेवदारुत्रिकंटकैरंडपुनर्नवानां॥ क्वाथं पि

वेन्नागरचूर्णमिश्रं जंघोरुपृष्ठत्रिकपार्श्वशूली॥ तैलं घृतं सार्द्रकमातुलुंगर

सं सचुक्रं सगुडं पिबेद्वा॥ कट्यूरुपृष्ठत्रिकशूलगुल्मगृध्रस्युदावर्तहरः प्रयो

गः॥ पथ्याविभीतामलकीफलानां शृतं क्रमेणाह्नि गुणाभिवृद्धं॥ प्रस्थेन युक्तं च

पलं कषायं द्रोणे जले संस्थितमेकरात्रं॥ अर्द्धावशेषं क्वथितं कषायं भांडे प

॥२५४॥

चेत्तं पुनरेव तैलैः ॥ अमृतानिंबवल्कैश्चतार्ध्वं दद्यादूर्ध्वालिसं च सर्षपताद्धिकानि ॥ विडं
गदंतीत्रिफलागुडूचीकूष्मांत्रिवृत्कलागारकोषराणि ॥ पथ्येषु चैषु सेन नरस्य शीघ्रं
हिमांबुपानानि च भोजनानि ॥ निषेव्यमाणो विनिहंति रोगान् सगृध्रसीन् तन
स्वेजतांश्च ॥ श्लीपदानमुग्रं जठराणि गुल्मं पांडुत्वकंडूवमिवातरक्तं ॥ पथ्यादिकोगु
ग्गुलुरेष नाम्नाख्यातः क्षितावप्रतिमप्रभावः ॥ यतेन नागेन समं मनुष्यं जयेन कु
पितु रोगेन तुल्यं ॥ आयुः प्रकर्षं विदधाति चक्षुर्बलं तथा पुष्टिकरो विषघ्नः ॥ क्षत
स्य संधानकरो विशेषाद्रोगेषु प्रोक्तः सकलेषु तज्ज्ञैः ॥ इति पथ्यादि गुग्गुलुः ॥ अ
थ खंजपंगवोश्चिकित्सामाह ॥ उपाचरेदभिनवं खंजं पंगुमथापि वा ॥ विरेकास्थाप
नस्नेहगुग्गुलुस्नेहबस्तिभिः ॥ अथ कलापखंजस्य चिकित्सामाह ॥ क्रमः कलाप

॥२५४॥

त्वंजस्य त्वंजपंचयोरिव सस्रतः ॥ विरोधात्स्नेहनं कर्म कार्य्यमत्र विचक्षणैः ॥ अथ
क्रोष्टुकशीर्षकस्य चिकित्सामाह ॥ गुग्गुलुं क्रोष्टुशीर्षे तु गुडूचीत्रिफलांभसा ॥ क्षीरे
णैरंडतैलं वापि विरेच्य वद्धरास्रके ॥ गुग्गुलुं भुंक्ष कर्षमितं ॥ गुडूचीत्रिफलांभसा गुडू
चीत्रिफलाक्वाथेन पलद्वयमितेन ॥ वातरक्तक्रियाभिश्च जयेज्जंबुकमस्तकं ॥ अथ
खल्लीचिकित्सामाह ॥ कुष्ठसैंधवयोः कल्कश्चुक्रतैलसमन्वितः ॥ सुखोष्णो म
र्द्दने योज्यः खल्लीशूलनिवारणः ॥ क्वाथैरंडतैलमपि मर्द्दने योज्यं ॥ अथ वातकंट
कचिकित्सामाह ॥ रक्तावसेचनं कुर्यादभीक्ष्णं वातकंटके ॥ पिबेदेरंडतैलं वा दहेत्सू वे
चीभिरेव वा ॥ अथ पाददाहस्य चिकित्सामाह ॥ वातरक्तक्रमं कुर्यात्पाददाह
प्रशांतये ॥ नवनीतेन संलिप्तौ वह्निना परितापितौ ॥ मुच्येते च खल्लैः क्षिप्रं प

॥२५५॥

रितापास्वरसरूरणात् ॥ मसूरविदलैः पिष्टैः घृतभ्रष्टैस्तेन वारिणा ॥ चरणौ लेपयेत्सम्यक्पा-
ददाहप्रशान्तये ॥ धातारिवीजं दुग्धेन पिष्ट्वा पादौ प्रलेपयेत् ॥ करोत्यपि महादाहं शमये-
त्तत्र संशयः ॥ अथ पादहर्षस्य चिकित्सामाह ॥ पादहर्षे तु कर्त्तव्यः क्रमः कफवातहरो विधिः
आक्षेपकमेदे दंडापतानकादौ महावला तैलं योज्यं ॥ अथांतरायामबाह्यायामयोश्चि-
कित्सामाह ॥ बाह्यायामेंतरायामे तु विधेयाः हितक्रिया ॥ अथ धनुस्तंभकुब्जयोश्चिकि-
त्सामाह ॥ धनुस्तंभे कुब्जके च द्विविधायामयोरपि ॥ योज्यं प्रसारणी तैलं तेन तेषां
शमो भवेत् ॥ वातव्याधिषु सामान्या याः क्रियाः कथितास्तथा ॥ कर्त्तव्या एव ताः
सर्वास्तैलमेतद्विशेषतः ॥ प्रसारणी तैलं यथा ॥ प्रसारणी पलशतं जलद्रोणेन पा-
चयेत् ॥ पादशेषं जतं गृह्य तैलं च दधि तत्समं ॥ कांजिकं च समं तेन तैलात् क्षीरं च

॥२५५॥

तुरुष्कं ॥ तैलात् तस्माच्च मात्रेण सर्वकस्कान् प्रयोजयेत् ॥ मधुकं पिप्पलीमूलं चित्रकं सैं-
ट। धवं वचा ॥ प्रसारणी देवदारु रास्ना च गजपिप्पली ॥ भल्लातः शतपुष्पा च मांसी चे-
ति विपाचयेत् ॥ एतत्तैलवरं पक्वं वातश्लेष्मामयान् जयेत् ॥ कौब्जं खांजत्वं पंगुत्वं गृध्र-
सीमर्दितं तथा ॥ हनुपृष्ठशिरोग्रीवाकटिस्तंभं च नाशयेत् ॥ अन्यांश्च विषमान्
वातान् सर्वान्नाशु विनाशयेत् ॥ इति प्रसारिणी तैलं ॥ अथापतंत्रकस्य चिकित्सा
मारु ॥ अथापतंत्रके नाति मातुरं नापतर्पयेत् ॥ निरूहं वस्तिं वमनं सेवयेन्न कदा-
चन ॥ श्वसनाः कफवाताभ्यां रुद्धास्तस्य विमोक्षयेत् ॥ तीक्ष्णैः प्रधमनैः संज्ञां ता-
सु मुक्तासु विंदति ॥ श्वसनाः नश्या सोच्छ्वासवहा धमनीः ॥ मरिचं शिग्रुवीजा-
नि विडंगं च फणिज्झकं ॥ एतानि सूक्ष्मचूर्णानि दद्याच्छिरोविरेचनं ॥ फणिज्झ-

॥२५६॥

कोमरूपकः ॥ हरीतकीवचारास्नासैंधवैःसाम्लैःपिबेतसं ॥ घृतमार्द्रकसंयुक्तमपतंत्रकनाशनं ॥ अथापतानकस्यचिकित्सामाह ॥ अपतानकिनेशस्तंदशमूलीशृतंजलं ॥ पिप्पलीचूर्णसंयुक्तंजीर्णेमांसरसौदनं ॥ तैलेनमर्दनंस्वेदस्तथास्तीक्ष्णंचशोधनं ॥ स्रोतोविशोधनंपश्चात्सर्पिःपानंहितंस्मृतं ॥ हेतिभुक्तवतापीतमम्लंदध्यपतानकं ॥ मरिचेनसमायुक्तंस्नेहवस्तिरथापिवा ॥ अथपक्षाघातस्यचिकित्सामाह ॥ माषात्मगुप्तकैरंडवाट्यालकशृतंपिबेत ॥ हिंगुसैंधवसंयुक्तंपक्षाघातनिवारणं ॥ अत्रहिंगुसैंधवेप्रत्येकंमाषमात्रेग्राह्ये ॥ माषिकेहिंगुसिंधूत्थेजरणंत्यात्सुशालिका ॥ इतिवचनात ॥ गृंथिकाग्निकरणंशुंठीरास्नासैंधवकल्कितं ॥ माषक्काथेशृतंतैलंपक्षाघातंविनाशयेत ॥ इतिगृंथिकादितैलं ॥ माषात्मगुप्तातिविषारुबूकरंभाशताव्हातवरीः ॥२५६॥

सपिष्टैः ॥ चतुर्गुणैर्माषपलाशकषाये तैलं पक्वं हंति हि पक्षवातं ॥ इतिमाषादितैलं ॥ अ
थसर्वांगवातस्यचिकित्सा ॥ सर्वांगगतमेकांगगतंचापिसमीरणं ॥ तैलावगाहने
हंतितोयवेगमिवाचलः ॥ अथस्थाननामलक्षणानांवातव्याधीनांचिकित्सामा
ह ॥ सामान्यवातरोगाणांयाचिकित्साप्रकीर्तिता ॥ एषांसैवविधातव्यातत्स्थैतेषां
तिसंक्षेपं ॥ अथहेतुविशेषविशिष्टस्यवायोश्चिकित्सामाह ॥ वातेसपित्तेकुर्वीत
वातपित्तहरींक्रियां ॥ सकफेतत्रकुर्वीतवातश्लेष्महरींक्रियां ॥ अथरसादिधातु
गतानांवातानांचिकित्सामाह ॥ वायौत्वगाश्रितेस्नेहाभ्यंगंस्वेदंचकारयेत ॥ रक्तस्थे
शीतलाननुलेपान्विरेकंरक्तमोक्षणं ॥ मांसमेदोगतेवातेसविरेकंनिरूहणं ॥ अ
स्थिमज्जागतेस्नेहंबहिरंतश्चयोजयेत ॥ शुक्रप्राप्तेनिरेकार्य्यंशुक्रदोषचिकित्सितं

२५७

केतकनागबलातिबलानां पृथक् कुलेन रसेन विपक्वं ॥ तैलमनेन खंजशोषकसिद्धं मारुतम
स्थिगतं विनिहंति ॥ इति केतकादिस्वरसतैलं ॥ अथ कोष्ठगतवातस्य चिकित्सामाह ॥
पाचनीयरसैर्युक्तैरन्यैर्वा पाचयेन्मतान् ॥ विशेषतः पिवेत्क्षीरं नरः कोष्ठगते निले
अथामाशयगतवातस्य चिकित्सामाह ॥ आमाशये स्थितेनिले प्रशस्तं प्राकृतं वमनं दी
पनपाचनं च ॥ प्रछर्दनं तीक्ष्णविरेचनं वा मुद्गयवाः शालियुताः पुराणाः ॥ मतीकष
ष्या शाटिपुष्कराणि विश्वामृता दारुकनागराणि ॥ उग्राविषामागधिकाविडंगमिश्रं क्वा
थास्त्रयः सामसमीरणघ्नाः ॥ मतिकः रोहिषसुगंधितृणविशेषः ॥ तदस्याभेउशीरं
ग्राह्यं ॥ दारुकं देवदारु ॥ चित्रकेंद्रयवाः पाठा कटुकातिविषाभयाः ॥ आमाशयोत्थवात
घ्नं चूर्णं पेयं सुखांबुना ॥ योगेस्मिन् भिषजा ग्राह्या बलं षड्धरणाः पृथक् ॥ दिते

२५७

शुष्ठ्सुरातथ्यातेनषड्धरणः स्मृतः ॥ अथ मर्थः ॥ प्रथमदिवसेवमनं कारयितव्यं

ततोद्वितीयंदिनमारभ्यषड्दिनपर्य्यंतं पाठक्रमेणैकैकस्यचूर्णमेकैकस्मिन्न हन्य

केकषंक्रमितदेयं ॥ आमाशयगतेवातेछर्द्दितायथाक्रमं ॥ देयः षड्धरणोयोगः

सप्तरात्रंसुखांबुनेतितत्रांतरोक्ते ॥ इतिषड्धरणयोगः ॥ अथपक्वाशयगतस्यवा

तस्यचिकित्सामाह ॥ यत्नेहःसंवर्द्धितंकार्य्यंक्रमोदायतकंतथा ॥ देयः स्नेहविरेकश्चपक्वा

शयगतेनिले ॥ अथजठरगतकुक्षिगतवातयोश्चिकित्सामाह ॥ वातेजठरगेदद्या

त्क्षारचूर्णादिदीपनं ॥ शुंठीकुष्ठजवीजानिचूर्णंकोष्णांबुकुक्षिगे ॥ अथगुदगतवा

तस्यचिकित्सामाह ॥ वातेगुदगतेदुष्टेकर्म्मोदावर्त्तकेहितं ॥ अथहृदयगतवातस्य।

चिकित्सामाह ॥ हृदयानिलनाशायगुडूचींमरिचान्वितां ॥ पिबेत्प्रातः प्रयत्नेन

सुखेतमांमसासह ॥ पिबेद्दुग्धंमसापिवं साश्वगंधं विनीतकं ॥ गुडयुक्तं प्रपल्लेन हृद्
यानितनाशनं ॥ देवदारुसमायुक्तं नागरं परिपेषितं ॥ नितेहुष्केकार्प्यो वातहरः क्रमः
स्नेहाभ्यंगोपनाहश्च मर्दनालेपनानि च ॥ अथ शिरागतवातस्य चिकित्सामाह ॥
स्नेहाभ्यंगोपनाहश्च मर्दनालेपनानि च ॥ वाते शिरागते कुर्यात्तथा च स्निग्धमोक्षणं
अथ स्नायुगतवातस्य चिकित्सामाह ॥ स्वेदोपनाहाग्निकर्मबंधनोन्मर्दनानि च ॥
कुर्यात्स्नायुगते वाते कारयेत्कुशलो भिषक् ॥ अथ संधिगतस्य वातस्य चिकित्सामाह
कुर्यात्संधिगते वाते दाहस्नेहोपनाहनं ॥ इंद्रवारुणिकामूलं समागधीगुडसंयुतं ॥
भक्षयेत्कर्षमात्रं तत्संधिवातं व्यपोहति ॥ सूतं लवंगं कर्पूरं जातिपत्रफलं त्रुटिः ॥
कयायापिप्पलीमूलं जातिपत्रं शतावरी ॥ मस्तकी चाश्वगंधा च विडंगं चकुदारुकं

एतच्चूर्णं समांशं च सूताद्द्विमहिफेनकं ॥ गुडेन च गुटीः कुर्य्यात् मर्द्दयेच्च विचक्षणः ॥
गुटी विस्फोटकान् हंति सर्वसंधिरुजापहा ॥ माषार्द्धं भक्षयेद्यैतच्छर्करायाज्यपान
कं ॥ पयसा ओदनं भोज्यं जीर्णे गोधूमसेवनं ॥ पिटिकामंडलं हंति ह्यग्निदीपनकं प
रं ॥ तांबूलं भक्षयेत्पश्चाच्छीतमन्नं तिलां सृजेत ॥ इति रसेंद्रगुटिका ॥ चव्यं चित्रकता
ली सं यवक्षारो धान्यकं वचा ॥ अजमोदाजगंधा च दाडिमं चाम्लवेतसं ॥ रास्नागुंपि
विडंगं च समाभयं जीरकं द्वयं ॥ क्षारद्वयं समायुक्तं तद्वर्णा अपसंयुतं ॥ शतमूलावतकु
घं व्योषं पूतीकपत्रकं ॥ शतपुष्पा कारवी हिंगु लशुनं च चतुर्गुणं ॥ घृतेन मर्द्दितं पिंड
अक्षमात्रं च भक्षयेत ॥ आमवाते हृत्शूले मेमन्यास्तंभे गलरोगके ॥ तूनी प्रतूनी गुल्मेषु
सर्ववातार्द्दिते षु च ॥ सर्वेषु करीरोगेषु भोजने क्षीरखालेपः ॥ इति रसोनपिंडी

॥ २५८ ॥

अथ पथ्यमाह ॥ नवीनास्तिलगोधूममाषाः संवत्सरोषिताः ॥ शालयः षष्टिकाश्चापि
कुलत्थानां रसास्तथा ॥ पटोलं शिग्रु वार्ताकं लशुनं दाडिमार्द्रकं । जंबीरबदरं द्राक्षा नाग
रंगं परूषकं ॥ सर्पिस्तैलं पक्वतांहैवु तैलं गयांजलं ॥ मत्स्यंडिकाचतांबूलं धान्याम्लं तिंतित
डीफलं ॥ स्निग्धोष्णानि च भोज्यानि स्निग्धोष्णं चानुलेपनं ॥ प्रवातवर्जनं चैव पच्छायनं
न स्वमातपः ॥ संतर्पणं बृंहणं च साद्वम्ललवणा रसाः ॥ वातव्याधौ समुत्पन्ने पथ्य
मेतन्न लंघयेत् ॥ अथापथ्यमाह ॥ चिंताप्रजागरणवेगविधारणमिछर्दिं श्रमोन
शनं तथा चरणकाः केलायाः ॥ धान्यानि यानि तृणजानि च राजमाषा मुद्गस्तडागतटि
नीसलिलं करीरं ॥ शीतोदकं च चक्रमुकं रुधिरं स्रुतिश्च नीवारयत्र मधुश्यामाककटि
त्तक्कानि क्षौद्रं कषायकटुतिक्तरसा व्यवायो हस्त्यश्वयानमपि चंक्रमणं त्वरस्व ॥ २५८ ॥

त

द्रा ॥ आध्मानेनोद्धृतवतो पिपुनर्विरेकेषात्स्नानं प्रदुष्टसलिलं द्विजघर्षणं च ॥ निःशेष
तेत्र परिकीर्तितएष वर्गो न्नरणां समीरणगदेषुमुदेनधते ॥ प्रसप्तसर्पमितत्वचं सशो
फकं पप्लुतिनं ॥ विवर्जयेत्तुमारुतामयैरूपद्रुतं नरं ॥ इति वातव्याधिचिकित्सा ॥ अथ
वातरक्तनिदानं ॥ तत्र वातरक्तस्य विप्रकर्षं निदानमाह ॥ लवणाम्लकटुक्षारस्नि
ग्धोष्णाजीर्णभोजनैः ॥ क्लिन्नशुष्कांबुजानूपमांसपिण्याकमूलकैः ॥ कुलत्थमाष
निष्पावशाकादिपललेक्षुभिः ॥ दध्यारनालसौवीरशुक्ततक्रसुरासवैः ॥ विरुद्धा
ध्यशनक्रोधदिवास्वप्नातिजागरैः ॥ प्रायसः सुकुमाराणां मिष्टाहारविहारिणां

साधयेत्पुद्गलस्तुष्कस्य तत्सुतस्य च तुष्पजं ॥ क्षीरोदके चतुर्गुणिते क्षीरशेषं च पाचयेत् ॥ वा
तपुत्तरावर्त्तगृध्रसीविषमज्वरं व्रध्नो गे विद्रधिं शोथं साधयत्याशु तत्पयः ॥

॥२६०॥

स्थूलानां सुखीनां चापि प्रकुप्येद्वातशोणितं ॥ हस्त्यश्वोष्ट्रैर्गच्छतश्चाश्नतश्च विदाह्यन्नं
सविदाहाध्यशनस्य ॥४॥ क्षारेणेत्यत्र क्षारादिः ॥ अजीर्णे भोजनं अजीर्णे च भोजनं अतिमा
त्रभोजनमित्यर्थः ॥ क्लिन्नादीनि मांसस्य विशेषणानि ॥ क्लिन्नं शटितं ॥ शुष्कमातपे
शोषितं ॥ अंबुजं मत्स्यादि मांसं ॥ आनूपं गौडादिपूर्वदेशजं मांसं ॥ पिण्याकेति स
खलिः ॥ मूलकं प्रसिद्धमेव ॥ निष्पावः शिंबिः ॥ शाकं पत्रशाकं ॥ आदिशब्देन रक्तालो
दीनि फलशाकानि गृह्यन्ते ॥ पर्युषितं शटितत्वादिदोषरहितमपि मांसं संयातशोणितं
प्रकोपयेत् ॥ शटितादि तु मांसं विशेषतो वातशोणितं प्रकोपयेदिति ॥ पललं तिलक
ल्क इति मधुकोशकृत् ॥ आरनालं संधानभेदः ॥ सौवीरं संधानभेदः ॥ तक्रं चतुर्थांश
जलयुक्तं यत्स्वेदं पूतं दधि ॥ सुरा संधानभेदः ॥ विरुद्धं क्षीरमत्स्यादि ॥ अध्यशनं अजी ॥२६०॥

तैर्भुज्यते यत्तु तदध्यशनं न भुज्यते ॥ अतिजागरो निशि प्रायशः या हुस्येन ॥ सुकुमाराणां
अल्पकायव्यापाराणां तेषामल्पचेष्टत्वाद्ध्यवराणादिभिः रक्तं तिक्तादिभिर्वा तच्च कुप्य
तीति शानः ॥ अथ च मिथ्याहारविहारिणां ॥ स्थूलानां सुखिनां च रक्तं कुप्या ॥ हस्तस्यो
र्ध्वे गच्छत इति तस्य पादो वा पूर्वं हुते रुधिरं चाधो गच्छति ॥ हस्तपादयवउपलक्षणानि ॥
पद्भ्यामप्यतिचलतः ॥ अध्वनतश्च विदाहत्वन्नमिति विदाहि निष्पावकुलत्थसर्षपशा
कादि ॥ सं विदाहाध्यशनस्य सं विदाहे अशनं च स्य भुक्ते विदग्धे तदुपरि भुंजानस्येत्य
र्थः ॥ अध्यशनमुक्तमप्येतद्वचनं विदग्धाजीर्णे भोजनस्य विशेषतो हेतुत्वार्थं ॥ यात
शोणितं प्रकुप्येदिति पूर्वेणान्वयः ॥ एतेषां कारणानां मध्ये केनचिद्वायुः केनचि
द्रक्तं केनचिद्रक्तं केनचिदुभयमपि कुप्येत ॥ न तु त्र्यस्त्रीश्चाः संसंतापारत्यादिना

२६१

रक्तगतस्य वातस्य लक्षणं वातव्याधावेवोक्तं ॥ ततश्च वातरक्ताभिधानं पुनरुक्तं
स्यात् ॥ वातरक्तं हि दुष्टेन वातेन रक्तेन च विशिष्टसंप्राप्तिकं विकारांतरमेव ॥ उक्तं
हि चरके ॥ वायुर्विवृद्धो वृद्धेन रक्तेनावारितः पथि ॥ क्रुद्धः संदूषयेद्रक्तं ज्ञेयं वा
तशोणितमिति ॥ रक्तगतवाते तु वात एव दुष्टो रक्तमदुष्टमेव गच्छतीति भेदः ॥
१॥२॥३॥४ अथ संप्राप्तिमाह ॥ कृत्स्नं रक्तं विदहत्याशु तच्च दुष्टं स्रुतं पाद
योश्चिपतेत्तु ॥ तत्संपृक्तं वायुना दूषितेन तत्प्राबल्यादुच्यते वातरक्तं ॥५॥ पूर्वो
क्तैर्हेतुभिः कृत्स्नं समस्तं रक्तं विदहति ॥ अत्र दहधातुरविवक्षितकर्मकः ॥
तेन विदहति विदग्धं भवतीत्यर्थः तच्च दुष्टं रक्तं स्रस्तं अधोगतं पादयोश्चि
पते संचितं भवति ॥ ततरक्तं दूषितेन स्वहेतुभिर्दुष्टेन वायुना संपृक्तं मिलि ॥ २६१ ॥

तेवातरक्तमुच्यते॥ ननु चैतस्य संप्राप्तिरुक्ता सुश्रुतेन॥ पीड्यं रक्तं दुष्टिमायाति
तच्च वायोर्मार्गं संरुध्याशु पातः॥ क्रुद्धोत्यंतं मार्गरोधात्स वायुरत्युद्रिक्तं दूषये
द्रक्तमाशु चेति॥ तस्मादत्र प्रथमं रक्तस्य दुष्टिः अतो रक्तवातमितिव्यपदेशमु
चितं भवति तत्कथमत्र वातरक्तमितिव्यपदेशः॥ इतीमामाशंकां परिहर्तुमाह
तत्प्राबल्यादिति॥ तस्य वातस्य दोषत्वेन प्राधान्यात्॥ प्राधान्यात्तु वातरक्तमु
च्यते॥ न तु रक्तवातमिति॥ ५ अथ तस्य पूर्वरूपमाह स्वेदोत्यर्थं न वा कार्ष्ण्यं स्प
र्शाज्ञत्वं क्षतेतिरुक्॥ संधिशैथिल्यमालस्यं सदनं पिटकोद्गमः॥ ६ जानु
जंघोरुकट्यंसहस्तपादांगसंधिषु॥ निस्तोदः स्फुरणं भेदो गुरुत्वं सुप्तिरेव
च॥ ७ कंडूः संधिषु रुग्भूत्वा भूत्वा नश्यति चासकृत्॥ वैवर्ण्यं मंडलोत्पत्ति

॥ २६२ ॥

वातस्य रूक्षपूर्वलक्षणं ॥ प्रस्वेदोत्यर्थं न वेति धर्मागमनमत्यर्थं भवति सर्वथा न भ
वति ॥ क्षतेति रूक्षं यदि कारणं तदा क्षतं स्यात् तदा तत्राति रुक् स्यात् तद्देशस्प
र्शत्वात् ॥ सुप्तिः त्वक्शून्यतेति क्षयः ॥ ६।७॥ अथाधिकवातस्य वातरक्तस्य लक्ष
णमाह ॥ वातेऽधिकेऽधिकं तत्र शूलं स्फुरणं तोदनं ॥ शोथस्य रौक्ष्यं कृष्णत्वं श्या
वता वृद्धिहानयः ॥ धमन्यंगुलिसंधीनां संकोचोऽगग्रहोऽतिरुक् ॥ शीतद्वेषानु
पशयौ स्तंभवेपथुसुप्तयः ॥ १० तत्र पादयोः शूलाधिकमधिकं ॥ एतत्राह सुप्
तः ॥ स्पर्शो द्विगुणौ तोदभेदप्रशोषो स्वापोपेतौ वातरक्ते न पादाविति ॥ वृद्धिहा
नय इति वातरक्तलक्षणानां ॥ अत्र सुप्तिः स्पर्शासहता ॥ १० रक्ते शोथोऽति रुक् तो
दस्ताम्रश्चिमिचिमायते ॥ स्निग्धै रूक्षैः शमं नैति कंडूक्लेदसमन्वितः ॥ ११ र ॥ २६२ ॥

धि

ते धिक इति शेषः ॥ अतिरुक्तोदः अतिरुक्तोदो यत्र सः शोथः ॥ चिमिचिमेति कं
डूभेदः स्पर्शाग्नियते तियावत् ॥ तद्युक्तः ॥ क्लेदसमन्वितः क्लेद आर्द्रता तद्युक्तः ॥
११ अथाधिके पित्तं तदाह ॥ पित्ते विदाहः संमोहः स्वेदो मूर्च्छा मदस्तृषा ॥ स्पर्शास
हत्वं रुग्रागः शोथपाकोष्मशोष्माता ॥ १२ पित्ते धिके ॥ विदाहः विशेषेण दाहः ॥
विदाहश्च पादयोरेव बोद्धव्यः यत आह सुश्रुतः ॥ पित्तासृग्भ्यां पुंदाहौ भवेता
मयपर्योहिमौ रक्तश्लेष्मौ च ॥ पादाविति शेषः ॥ संमोह आतुरस्य ॥ मूर्च्छा पाद
योः समुच्छ्रायः शोथ इति यावत् ॥ न तु मूर्च्छा मोहः संमोहस्योक्तत्वात् ॥ १२ ॥ अ
थाधिककफं तदाह ॥ कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताकंडूर्मेदाच
रुकहृद्दसवीलिंगं च संकरे ॥ १३ कफे अधिके ॥ स्तैमित्यं शरीरस्यार्द्रचर्मी

ग्र

॥ २६३ ॥

यगुंठितत्वमिव ॥ गुरुत्वादयः पादयोरेव ॥ यत आह सुश्रुतः ॥ कंडूमंतौ श्च्येतशीतौ सघणौ
कौपीतस्तब्धौ श्वेस्मदुष्टेतु रक्तइति ॥ पादावितिशेषः ॥ सर्वलिंगं च सकलरक्तत्वने
नाधिकद्विदोषमधिकत्रिदोषं ॥ संकरे द्वित्रिदोषसंसर्गे द्वंद्वलिंगं सर्वलिंगं च क्र
माद्वातरक्तं भवति ॥ १३ ॥ अथ पादयोर्जातमप्रतिक्रियमाणं प्रदेशांतरं प्राप्नोति पा
दयद्वस्तयोरपि भवतीति दर्शयन्नाह ॥ पादयोर्मूलमास्थाय कदाचिद्धस्तयोरपि ॥
आखोर्विषमिवक्रुद्धं तद्देहमनुसर्पति ॥ १४ ॥ आखोर्मूषकस्य ॥ आखोर्विषमिवेत्य
नेनमंदविसर्पणं बोद्धव्यं ॥ देहमनुसर्पति अप्रतिक्रियमाणं ॥ एतद्वातरक्तं च र
के द्विविधमुक्तं ॥ उत्तानमथ गंभीरं द्विविधं वातशोणितं ॥ त्वङ्मांसाश्रयमुत्तानं गं
भीरं त्वंतराश्रयमिति ॥ १५ ॥ अथ वातरक्तस्योपद्रवानाह ॥ अस्वप्नारोचकश्वास ॥ २६३ ॥

मांसकोथशिरोग्रहाः ॥ मूर्छा च मंदरुक् तस्माज्ज्वरमोहप्रवेपकाः ॥ १५ हिक्कायांगस्
थीसर्पपाकतोदभ्रमक्लमाः ॥ अंगुलीवक्रतास्फोटदाहमर्मग्रहार्बुदाः ॥ १६ ॥ मांस
कोथो मांसगलनं ॥ मूर्छा तंद्रासमुच्छ्रायः ॥ प्रवेपकः प्रवेपनं स्यात्पर्यायैः ॥ १५ ॥ १६ ॥
अथासाध्यत्वादिकमाह ॥ एतैरुपद्रवैर्वर्ज्यं मोहेनैकेन वापि यत् ॥ अरूढस्नोपद्र
वं याप्यं साध्यं स्यान्निरुपद्रवं ॥ १७ मोहेनैकेनेति वचनमल्पत्वप्राद्दिभिः समस्तैरसा
ध्यत्वं बोधयति ॥ १७ ॥ एकदोषानुगं साध्यं नवं याप्यं द्विदोषजं ॥ यत्त्रिदोषमसाध्यं
स्याद्यस्य चास्युरुपद्रवाः ॥ १८ ॥ नवं संवत्सरादर्वाचीनं ॥ तत्साध्यं ॥ १८ ॥ आजानुस्फु
टितं यच्च प्रभिन्नं प्रस्रुतं च यत् ॥ उपद्रवैश्च यज्जुष्टं प्राणमांसक्षयादिभिः ॥ वात
रक्तमसाध्यं स्याद्याप्यं संवत्सरोषितं ॥ १९ ॥ आजानु यज्जाजानुर्य्यं तं यद्भूऽतित

दसाध्यं स्यात् ॥ यच्चस्फुटितत्वक्प्राप्ते किंचिद्विदीर्णं प्रभिन्नं अधिकविदीर्णं प्रस्रुतं
वहत् ॥ प्राप्तसंवत्सरोषितमित्यनेन संवत्सरादर्वाक् साध्यं ॥ १९ ॥ इति वातरक्तनि
दानं ॥ अथ वातरक्तचिकित्सा ॥ वातशोणितिनो रक्तं स्निग्धस्य बहुशो हरेत् ॥ अस्या
ल्पं रक्षयेद्वायुं यथादोषं यथाबलं ॥ रक्षयेद्वायुमिति यथा वायुर्न वर्द्धते तथा रक्तं हरे
दित्यर्थः ॥ रुग्रागदाहतोदेषु जलौकाभिर्विनिर्हरेत् ॥ शृंगतुंबैश्चिमिचिमाकंडूरुग्वि
दाहान्वितं ॥ प्रच्छनेन शिराभिर्वा देशाद्देशांतरं व्रजत् ॥ व्रजदिति रक्तविशेषणं ॥ मंजि
ष्ठोग्रावत्सकितिक्ता निशानिंबामृतामरैः शात्रिवत्वचादिरैः क्वाथः सर्वकुष्ठानि तापजि
त् ॥ इति लघुमंजिष्ठादिः ॥ अमृतैरंडवासानां क्वाथ एरंडतैलयुक् ॥ पीतः सर्वांगसंचा
रि वातरक्तं नयेत् ध्रुवं ॥ इत्यमृतादिः ॥ मंजिष्ठामुस्तकुटजगुडूचीकुष्ठनागरैः ॥ भार्गी

॥२६४॥

कृष्णापथ्यानिंबनिशाद्वयफलत्रिकैः ॥ पटोलकटुकामूर्वाविडंगासनचित्रकैः ॥ शताव
रीत्रायमाणाकृष्णेंद्रयववासकैः ॥ भृंगराजमहादारुपाठाखदिरचंदनैः ॥ त्रिवृद्वरुण
कैरातवाकुचीकृतमालकैः ॥ शाखोटकमहानिंबकरंजातिविषाजलैः ॥ इंद्रवारुणिका
नंतासारिवापर्पटैः समैः ॥ एभिः कृतं पिबेत्क्वाथं कणागुग्गुलुसंयुतं ॥ अष्टादशेषु
कुष्ठेषु वातरक्ते हितं तथा ॥ उपदंशे श्लीपदे च मसूर्यां पक्षघातके ॥ मेदोदोषे नेत्ररोगे मं
जिष्ठादिः प्रशस्यते ॥ इति बृहन्मंजिष्ठादिः ॥ वनमहिषलोचनोदरसंनिभवर्णस्य गुग्गु
लोः प्रस्थं ॥ प्रक्षिप्य तोयराशौ प्रत्येकं त्रैफलं प्रस्थं ॥ द्वात्रिंशच्छिन्नरुहापलानि सकीलि
संक्षुद्य ॥ क्षिप्त्वा पचेत्सपलोदव्या संघट्टयन्मुहुर्वैद्यः ॥ अर्द्धक्षयं तु यावत्तोयं स्यात्तत्र
चैतावत् ॥ अवतार्य वस्त्रपूतं पुनरपि संसाधयेदयःपात्रे ॥ सांद्रीभूते गुग्गुलुमग्ने

२६५

रवतार्व्यधारयेद्भुमौ ॥ पीतेक्षिपेच्च तस्मिन्यानि द्रव्याणि तान्याह ॥ पारदंगौरीरसः सोः क
ज्जलिकां विल्वपरिमाणं ॥ त्रिफलां पथ्यागडूचीं पत्रां प्रत्येकं त्रिकटु विल्वार्द्धं विल्वार्द्धकं
विडंगं कर्षकं कर्षं त्रिवृद्दन्ती ॥ एतमेकत्र गडूच्याः संचूर्णं प्रक्षिपेत्सर्वं ॥ उपभुज्य चानु
पेयं क्षीरं च बंसगंधिसतिलंच ॥ र्ष्याहारविहारी मेघजमिति सर्वकालीनं ॥ तन्नरोहि
यातश्लेष्मितमैकजमथ सर्वजं हरति ॥ नेत्रकाशग्रसकुष्ठपथ्यं दरथोडु मेहांश्च
मंदाग्निं च विवंधं प्रमेहपिटकांश्च नाशयत्याशु ॥ सततं निषेव्यमाणः सर्वान्रोगा
न्हरत्येषः ॥ अभीभूपजेण दोषान्करोति कैशोरकं रूपं ॥ इति कैशोरगुग्गुलुः ॥ निमं
ज्जंति जले यास्ताम हृातक्यस्ताताः हिताः ॥ तास्ता सर्वा विधातव्याः संछिन्नमुस्तम
द्विकाः ॥ तासां प्रस्थद्वयं छित्वा जलद्रोणे परिक्षिपेत् ॥ प्रस्थद्वयं गडूच्याश्च क्षुण्णं

२६५

तत्रांभसिनिक्षिपेत् ॥ चतुर्थांशावशेषंतुकषायमवतारयेत् ॥ वस्त्रपूतेकषायेतुवक्ष्यमा
णानिनिक्षिपेत् ॥ सर्वाण्येकत्रभांडेषुपचेन्मृद्वग्निनाशनैः ॥ सर्वद्रव्येघनीभूतेपा
ऽकास्ववतारयेत् ॥ तत्रक्षेप्याणिचूर्णानिमूमौविल्वमितामता ॥ वाकुचीचक्रमर्द्दश्च
पिचुमर्दोहरीतकी ॥ धात्रीरात्रिश्चमंजिष्ठामरिचंनागरकेशरा ॥ यवानीसैंधवंमुस्तेल्व
गेलानागकेसरं ॥ पर्पटःपद्मकंवासमुष्टीरंचंदनंतथा ॥ गोक्षुरस्यचबीजानिकच्
रोरक्तचंदनं ॥ पृथक्पलार्द्धमात्राणिमेषांचूर्णमिहक्षिपेत् ॥ सम्यक्संमिश्रित
दृढेतुभाजनेस्थाप्यमयेनवे ॥ प्रभातेभक्षितेजीर्णेमितमहात्रतकाभिधं ॥ अवलेहंस
मश्नियात्पलमात्रंजलेनहि ॥ वातरक्तसमुद्भूतानविकारान्नाशुनाशयेत् ॥ कुष्ठानि
सकलान्येवदुर्नामानिहरेदरं ॥ विसर्पमंडलंकेदुश्रोमयेदेषसेवितः ॥ विकारान्

॥२६६॥

वातजां सर्वजान् तथा रुधिरसंभवान् ॥ हृत्वैषम्ययोगोयं पललं ततः सेवितः सदा ॥ व्यायाम
मातपं वह्निं मत्स्यमांसं दधि स्त्रियं ॥ तैलाभ्यंगं तथा ध्यानं नरो भगन्दराती त्यजेत् ॥ इत्यमृ
तभगन्दरांतकावलेहः ॥ तालकस्य तु पस्येह पञ्चाशिस्युः पृथक् पृथक् ॥ आमलकस्यैव तत्
क्राथं हरितालं विचिचक्षलैः ॥ पुनर्नवाखाः स्वरसे तालकं तद्धि मर्दयेत् ॥ दिनमेकं ततस्त
स्मिन् पुनर्नवां गमिते सति ॥ कुर्वीत चक्रिकां तां तु शोषयेत्सम्यगातपे ॥ पुनर्नवासम
स्तांगक्षारैः स्थालीं गलावधिं ॥ प्रपूरयेच्च ततः क्षारं दृढं पेत्पीडनेन हि ॥ क्षारस्योपरि
तां सम्यक् दध्यात्तालकचक्रिकां ॥ ततः आच्छादनं दत्वा मुद्रां कृत्वा विशोषयेत् ॥ स्था
लीं चुल्ल्यां विधायाग्निमसमं दद्यात्तयेद्भिषक् ॥ निरंतरमहोरात्रं पंचकं तेन सिद्ध्यति ॥ ॥२६६॥
स्वांगशीतं समुत्तार्य गृह्णीयाद्रसमुत्तमं ॥ तालकेश्वरनामायं रसो गुंजामितोऽशितः

गुडूच्यादिकषायेण गदानेतान्विनाशयेत् ॥ सोपद्रवं वातरक्तं कुष्ठान्यष्टादशानि च
किरंगदेशजं जंतोर्हंति रोगं सुदुस्तरं ॥ विसर्पमंडलं कंडूयामां विस्फोटकं तथा ॥ वात
रक्तकृतान्रोगानन्यानपि विनाशयेत् ॥ एतद्भेषजसेवी तु तत्र एणान्सौ विवर्जयेत् ॥
तथा कटुरसं वह्निमातपं दूरतस्त्यजेत् ॥ तत्र एणं यः परित्यक्तुं न शक्नोति कथंचने
स तु सैंधवयुमश्नीयान्मधुरोपरसोहितं ॥ इति तालकेश्वरो रसः ॥ पक्वानीतु षोडशु
मात्रीभक्षणीयतेर्वर्जितः ॥ कर्ष एकस्तदेतत् ॥ हृदोत्स्वेसमीसलैष्मावघातेर श्ल
स्यैरथास्ततोयं विचूर्णगुडं गोघृतं मात्रिकार्द्धं प्रमाणं पचकसेनिधायापच
श्चोविधेयाः ॥ पुगोवीमिताश्लाहितापृणासमेतो भजेत्स्मात्तैकैकशः शस्तमस्य ॥ अप
द्वात्म्यभू बिबगोधमजान्नं सर्वोरमंजतंभहरितां वृत्तयोगः ॥ मुखं याति चेदीश्व

॥ २६७ ॥

जोवद्धदीप्योविपक्वंपयस्तत्रगंडूषरूवं ॥ तथैक्षुरस्य हृत्वासरूवोमिषेकेचहिङ्गुपिप्पा
ने निषेधोनकश्चित ॥ मरुद्धोशितोत्पाः परंसंधिपीडाः ॥ प्रदुष्टांगनासंगजाताश्च
तीव्राः ॥ जयन्त्येकए वाचिरेणक्षतानि क्षतोत्थाश्च पीडावरांगेविरूढाः ॥ इत्येकोयो
गः ॥ पक्वातीतुषंकात्विकं शंभुबीजाहिफेनोभ्रकाशांपथकचाद्धिकेषं ॥ विचूर्णपी
क्षिकंवाद्धिकर्षप्रदद्याद्दुग्धितोदके प्रातरव्यंचसायं ॥ चतुर्भिर्दिनैर्मारुतास्त्रोपजाता
रुजस्त्वंस्थिसंधिस्थिताहंतितीव्राः ॥ अपद्वस्यैर्मस्तमन्यान्नमिष्टरदातैर्वमौदुग्ध
गंडूषयोगः प्रशस्तः ॥ इतिद्वितीयोयोगः ॥ उमादुग्धपिष्टापथैरंडबीजं प्रलेपेनवा
तान्वेदनाहन्तिहारि ॥ ससिद्धार्थ एकस्तिलानांतुपिंडः परंचोपनाहेनश्रूलघ्नउक्तः ॥ २६७ ॥
गोपीसर्जमधूच्छैर्मंजिष्ठासंयुतैः सिद्धं ॥ तैलंसमीररुधिरंहन्याद्दाघंजंतस्पदि ना

प्रसादनीकषायः पीतो नूनं पत्तंकषायुक्तः ॥ दोषांतरानुरुद्धं वातासृजे तु मधुयुक्तः ॥
तिसृणां पंच पथ्यायः उपयुक्ताः श्वासस्य निर्यूहं ॥ अमृतोद्भवं भजेन्नतु वातासृक्तान्मुच्यते
जंतुः ॥ तिक्तावरायपटोलच्छिन्नाभीरुद्भवः क्वाथः ॥ दाहार्तिघ्नः कृतृतीव्रं वातासृग्निर्हरे
त्पीतः ॥ कनकभुजगवल्लीमालतीपत्रदूर्वारसगदकुनटीभिर्मर्दितं तैलयोगात ॥
अपहरति रसेंद्रः कुष्ठकंडूविसर्पस्फोटितचरणरंध्रानष्टपामत्वचापाः ॥ अस्य
तैलस्य लेपेन वातरक्तं प्रशाम्यति ॥ सारिवासर्जमंजिष्ठापद्मोसिक्थैः पयोन्वितैः ॥
तैलं पक्त्वा प्रयोक्तव्यं पिंडाख्यं वातशोणिते ॥ इति पिंडतैलं ॥ मूर्छामदज्वरार्तेषु स्वप्ने
पद्धातशोणितं च ज्ञेयं ॥ युक्तं शिरोरोगग्रहो दीर्घश्वासैः सस्फोटकोपसंकोचैः ॥ अथ पथ्य
माह ॥ उक्तानेभ्यंजनं सेकः सोपनाहः प्रलेपनं ॥ गंभीरे लेहपानं चास्थापनं च विरे

॥२६६॥

चनं ॥ सर्वं चास्रकृत्कृतिस्तुं बीजलौकाध्वंगपलामुषि ॥ स्नातधौतघृताभ्यंगोमेषी।
दुग्धावसेचनं ॥ यवषष्टिकनीवारकलमारक्तशालयः ॥ गोधूमाश्च मसूरा मु
द्गाश्चाढक्यो पि मकुष्ठकाः ॥ अप्यजा महिषी लोच गवामपि पयांसि च ॥ दुग्धोदि
काकाकमाची वेत्राग्रं सुनिषण्णकं ॥ वास्तुकं कारवेल्लं च तंदुलीयः प्रसारिणी
पटोलं दवुतैलं च मद्वीका श्वेतसर्षपाः ॥ नवनीतं सोमवल्ली कस्तुरी सितचंदनं
तिक्तं च पथ्यमुद्दिष्टं वातरक्तगदे नृणां ॥ अथापथ्यमाह ॥ दिवास्वप्नाग्निसंताप
व्यायामातपमैथुनं ॥ माषाः कुलत्था निष्पावाः कलायाः क्षारसेवनं ॥ इक्षवो मू
लकं मद्यं पिण्याकाम्लानि कांजिकं ॥ कटूष्णगुर्वभिष्यंदि लवणानि च सक्तवः ॥ ॥२६६॥
एतानि वातरक्तेषु न प्रयुंज्याद्भिषग्वरः ॥ इति वातरक्तचिकित्सा ॥ अथोरुस्तंभ

निदानं। तत्रोरुस्तंभस्य विप्रकृष्टसन्निकृष्टनिदानसंप्राप्तिपूर्वकं लक्षणमाह ॥
शीतोष्णद्रवसंशुष्कगुरुस्निग्धैर्निषेवितैः। जीर्णाजीर्णे तथायाससंक्षोभस्वप्न
जागरैः ॥१॥ सश्लेष्ममेदःपवनमाममत्यर्थसंचितं। अभिभूयेतरं दोषमूरू चेत्प्र
तिपद्यते ॥२॥ सक्थ्यस्थीनि प्रपूर्यांतः श्लेष्मणा स्तिमितेन सः। तदा स्तभ्नाति तेनो
रू स्तब्धौ शीतावचेतनौ ॥३॥ परकीयाविव गुरू स्यातामतिभृशव्यथौ। ध्यानांगम
र्दस्तैमित्यतंद्राछर्द्यरुचिज्वरैः ॥४॥ संयुक्तौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः ॥ त
मूरुस्तंभमित्याहुराढ्यवातमथापरे ॥५॥ शीतोष्णादिग्रहणमनुक्तपरस्परविरो
धिद्वंद्वदोषोपलक्षणार्थं ॥ तेन गुरुस्निग्धाभ्यां लघुरूक्षयोर्ग्रहणं बोद्धव्यमि
ति जेज्जटः। संशुष्कं कठिनं द्रव्यविरोधित्वात्। जीर्णाजीर्णे किंचिज्जीर्णे किंचि

॥२ द्दि॥

दर्जीर्णे तत्र शीतादिभिर्निषेवितैस्तैर्भुक्तैः ॥ संक्षोभेन संचलनेन ॥ स्वप्नेन दिवा ॥ जाग
रणेन रात्रौ ॥ स्वश्लेष्मभेदः पवनः स्वश्लेष्मभेदान्मासौ पवनश्चैति स्वश्लेष्मभेदः पव
नः ॥ अभिभूय दूषयित्वा ॥ इतरं दोषं पित्तं ॥ स्तिमितेन आर्द्रेण द्रुतेनेति यावत् ॥ न
तु घनेन ॥ श्लेष्मणा सः पवनस्तदा ऊरुस्तम्भमिति तेन स्तंभेन अचेतनौरू न्यौ ॥
पत्क्रीः यापि च अक्रियाचित्यर्थः ॥ ध्मानादिभिर्ज्वरितैः स्वलक्षितः पुरुष इति शेष
अयं प्रकुप्तेन वातप्राधान्यकथनार्थं महावातव्याधौ पठितः ॥ चरकेणानुकफ।
प्राधान्यमुक्तं उरः श्लेष्मासमोदाक्षयातयितेऽभिभूय चेत्यादि ॥ तत्रारंभकस्य
श्लेष्मणः प्राक् चिकित्सात्वेन प्राधान्यमुक्तं ॥ अत्रारंभकत्वेन पवनस्येति न वि
रोधः ॥ १॥२॥३॥४॥५॥ अथ तस्य पूर्वरूपमाह ॥ प्राग्रूपं तस्य निद्रातिध्यानं

॥२ द्दि॥

स्तिमितताज्वरः। रोमहर्षोऽरुचिश्छर्दिर्जंघोर्वोः सदनं तथा ॥ २ ॥ अथ तस्यानुपशाय
माह ॥ वातशंकिभिरस्नानात्तत्र स्यात् स्नेहात्पुनः ॥ पादयोः सदनं सुप्तिः कृच्छ्रादुद्धर
णं तथा ॥ ३ ॥ जंघोरुग्लानिरत्यर्थं शश्वच्च दाहवेदना ॥ पदं च व्यथते न्यस्तं शीतस्प
र्शं न वेत्ति च। स्पंसस्थाने पीडने गत्यां च तेनेवाप्यनीश्वरः ॥ अन्यनैवाहि संभग्नावूरू
पादौ च मन्यते ॥ ४ ॥ अस्नानादनिष्पत्यात ॥ स्तंभसुप्तिकंपादिदर्शनेन वातशंकिभिः
वातव्याधिशंकिभिः तत्र ऊरुस्तंभे स्नेहनात् स्नेहादिचिकित्सया पादयोः सदनादयो वि
काराः स्फुः उद्धरणमूर्ध्वचालनं ॥ जंघोरुग्लानिः जंघोर्वोर्गमनादावशक्तिः ॥ अ
दाहवेदना ईषद्दाहेन सह वेदना ॥ संभग्नौ संभग्नाविव ॥ ५ ॥ अथोरुस्तंभ
स्यारिष्टलक्षणमाह। यदा दाहार्तितोदार्त्तो वेपनः पुरुषो भवेत् ॥ ऊरुस्तंभस्तदा

॥ २७० ॥

हन्यात्साधयेदन्यथा नवं ॥ १० ॥ अन्यथा दाहायुक्तोपद्रवरहितं ॥ तत्रापि नवमुत्पन्न
मात्रं साधयेत् ॥ १० ॥ इत्यूरुस्तंभनिदानं ॥ अथोरुस्तंभचिकित्सा ॥ स्नेहासृक्स्रावव
मनवस्तिकर्मविरेचनं ॥ वर्जयेदाढ्यवाते च यदेतत्तस्य कोपनं ॥ तस्मादत्र सदाका
र्य्यं स्वेदलंघनरूक्षणं ॥ आममेदःकफाधिक्यान्मारुतं परिरक्षता ॥ यत्स्यात्कफप्र
शमनं न च मारुतकोपनं ॥ तत्सर्वं सर्वदा कार्य्यमूरुस्तंभस्य भेषजं ॥ सर्वो रूक्षः क्र
मः कार्य्यस्तत्रादौ कफनाशनः ॥ पश्चाद्वातविनाशाय विधातव्याखिला क्रिया ॥
रूक्षाद्वातप्रकोपश्चेन्निद्रानाशार्तिसूचकः ॥ स्नेहस्वेदविधिस्तत्र कार्य्यो वातामय
पापहः ॥ त्रिफलाग्रंथिकव्योषचूर्णं लिह्यात्समाक्षिकं ॥ ऊरुस्तंभविनाशाय पुरं
मूत्रेण वापिवेत् ॥ भल्लातकामृताशुंठीदारुपथ्यापुनर्नवाः ॥ पंचमूलीद्वयोन्मि ॥ २७० ॥

ष्णा ऊरुस्तंभनिबर्हणाः ॥ क्षौद्रसर्षपवल्मीकमृत्तिकासहितं भिषक् ॥ गाढमुत्सादनं
कुर्यादूरुस्तंभे सवेदने ॥ पिबेत्स्वरसं कुरण्टं च रसोनं मूरुस्तंभेऽमृतांबुना ॥ पिप्पली पिप्पली
मूलभल्लातकाथरश्च ॥ कल्को वा समधुः पेय ऊरुस्तंभे सवेदने ॥ ऊरुस्तंभविनाशाय
पिप्पलीमथनागरं ॥ शिलाजतु वा प्रपिबेद्गोमूत्रसहितं नरः ॥ फलं खर्जूरसंभूतं तत
था वल्मीकमृत्तिका ॥ ऊरुस्तंभे प्रलेपोऽयं मधुना सर्षपान्वितः ॥ पिप्पलीवर्द्धमानं वा मा
क्षिकेण गुडेन च ऊरुस्तंभं प्रणश्यंति विडंगारिष्टमेव च ॥ सर्षपा ॥ विडंगं गंगुपिकं रास्ना
कुटजत्वक्फलानि च ॥ पाठेलावालुकं धात्रीभागानेतान्पंचपलं पृथक् पृथक् ॥ अष्टद्रोणेंऽभसः
पक्त्वा कुर्याद्द्रोणावशेषितं ॥ पूते शीते क्षिपेत्तत्र क्षौद्रं पलशतं तत्र च ॥ धातकी विंशतिप
लं त्रिजातं द्विपलं तथा ॥ प्रियंगुकांचनाराणां सलोध्राणां पलं पलं ॥ व्योषस्य च प

॥२०१॥

तान्यष्टौ चूर्णीकृत्य प्रदापयेत् ॥ घृतभांडे विनिक्षिप्य मासमेकं विधारयेत् ॥ ऊरुस्तंभाद्भ
दीमेहानष्टावष्टीलाभगंदरान् ॥ गंडमालां हनुस्तंभं विडंगारिष्टसंज्ञितः ॥ जयेत् पीतो यथा
ह्रीति तथा विद्रधिमुत्थितं ॥ इति विडंगारिष्टः ॥ त्रिदोषज्वराधिकारे पूर्वोक्तपंचवक्त्रर
सोऽप्यत्र प्रशस्तः ॥ अथ पथ्यमाह ॥ रूक्षः सर्वो विधिः स्वेदः कोद्रवास्तृशालयः ॥ यवाः कु
लत्थाः श्यामाकाउद्दालाश्च पुरातनाः ॥ सौभांजनं कारवेल्लं पटोलं तंडुलानि च ॥ वेत्रा
ग्रं वास्तुकं पथ्या वार्ताकं तप्तवारि च ॥ शाल्याकशाकं पिण्याकं तक्रारिष्टमधूनि च ॥ क
टुतिक्तकषाया ये क्षाराः सेवा गवां जलं ॥ व्यायामश्च यथाशक्ति स्नानं चंक्रमणानि
च ॥ स्पृष्ठे हृदे संतरणं प्रतिस्रोतो नदीषु च ॥ श्लेष्मापहरणं यच्च नतु मारुतकोपनं ॥
एतत्पथ्यं समुद्दिष्टमूरुस्तंभविकारिणां ॥ अथापथ्यमाह ॥ गुरुशीतद्रवस्निग्धवि ॥२०१॥

रुद्धा स्याल्पभोजनं । विरेचनं स्नेहनं च वमनं रक्तमोक्षणं ॥ वस्तिं च न हितं प्राहुरूरुस्तंभ

विकारिणां ॥ इत्यूरुस्तंभचिकित्सा ॥ अथामवातनिदानं ॥ तत्रामवातस्य निदानपूर्वि

कां संप्राप्तिमाह ॥ विरुद्धाहारचेष्टस्य मंदाग्नेर्निश्चलस्य च ॥ स्निग्धं भुक्तवतो ह्यन्नं

व्यायामं कुर्वतस्तथा ॥१॥ वायुना प्रेरितो ह्यामः श्लेष्मस्थानं प्रधावति । तेनात्यर्थमपक्को

सौ धमनीभिः प्रपद्यते ॥२॥ वातपित्तकफैर्भूयो दूषितः सोन्नजो रसः ॥ स्रोतांस्यभिष्यं

दयति नानावर्णोतिपिच्छिलः ॥३॥ जनयत्यग्निदौर्बल्यं हृदयस्य च गौरवं । व्याधीना

माश्रयो ह्येष आमसंज्ञोतिदारुणः ॥४॥ विरुद्धाहारचेष्टस्य विरुद्धाहारः क्षीरमत्स्या

दिः ॥ विरुद्धा चेष्टा भुक्त्वा व्यायामादिः तद्युक्तस्य । निश्चलस्य निर्व्यापारस्य ॥ स्निग्धं भु

क्तवतो ह्यन्नं व्यायामं कुर्वत इति मिलितो हेतुः । श्लेष्मस्थानं आमाशयसंध्यादि । तेन

॥२७२॥

ऽश्लेष्मस्थानगमनेनात्यर्थमपक्वः ॥ पित्तस्थानगमनेतु पक्वो भविष्यदित्यभिप्रायः ॥ असौ
आमः धमनीभिः प्रपद्यते धमनीमार्गेष्वस्तति ॥ भूयो दूषितः आतिशयेन दूषितः ॥ स्रो
ल्लजो रसः आमः स्रोतांसि अभिष्यंदयति स्रष्ट्वा रसवहशिरावरोधं कृत्वा स्रोतांसि
गुरूणि करोति ॥ नानावर्णैः वातादिजनितवर्णभेदान्नानावर्णैः ॥ १॥२॥३॥४॥ अथा
मस्य लक्षणमाह ॥ अजीर्णेद्योरसोजातः संचितो हि क्रमेण वै ॥ आमसंज्ञां स लभते शि
रोगात्ररुजाकरः ॥५॥ अजीर्णमिति भुक्ताजीर्णमिति ॥ तथा च तंत्रांतरे ॥ आमाशयस्थः कायाग्ने
र्दौर्बल्याद्दविपाचितः ॥ आद्य आहारधातुर्यः स आम इति कीर्तित इति ॥५॥ अथामवात
स्य सामान्यं लक्षणमाह ॥ युगपत्कुपितावेतौ त्रिकसंधिप्रवेशकौ ॥ स्तब्धं च कुरुतेगा
त्रमामवातः स उच्यते ॥६॥ एतौ वातकफौ ॥ त्रिकसंधिप्रवेशकौ वेदनयेति योद्धुव्यं ॥

॥२७२॥

ई। तत्रांतरे त्वस्यैव लक्षणांतरमाह॥ अंगमर्दोऽरुचिस्तृष्णालस्यं गौरवं ज्वरः॥९॥ अपाकः
शूनतांगानामामवातस्य लक्षणं॥९॥ अपाको भुक्तस्य॥ विष्टोपार्थमस्य संग्रहः॥७॥ ता
स्यैवातिवृद्धस्य लक्षणमाह॥ स कष्टः सर्वरोगाणां यदा प्रकुपितो भवेत्। हस्तपादशि
रोगुल्फत्रिकजानूरुसंधिषु। करोति सरुजं शोथं यत्र दोषः प्रपद्यते॥ स देशो रुज्यतेत्य
र्थं व्याविद्ध इव वृश्चिकैः॥ जनयेत्सोग्निदौर्बल्यं प्रसेकारुचिगौरवं॥ध॥ उत्साहहानिं वै
रस्यं दाहं च बहुमूत्रतां॥ कुक्षौ कठिनतां शूलं तथा निद्राविपर्ययं॥१०॥ तृट्छर्दिभ्रमम
र्छा हृद्ग्रहं विड्विबंधतां॥ जाड्यांत्रकूजमानाहं कष्टांश्चान्यानुपद्रवान्॥११॥ यदा प्रकु
पितो भवेत्प्रकर्षेण कुपितः स्यात्तदावश्यमाणानुपद्रवान्करोति॥ तानाह हस्ते
त्यादि। यत्र दोषः दव आमः प्रपद्येते गच्छति॥ सः आमवातः॥ जाड्यमकर्मण्यत्वं॥ अ

॥ २७३ ॥

न्यानुपद्रवानकसायस्वंजलादीन् ॥ चा० टी० ॥ १० ॥ ११ ॥ तस्यैव विशिष्टानि लक्षणान्याह पि
त्तात्सदाहरागं च सशूलं पवनात्मकं ॥ स्तिमितं गुरु कंडूकं कफदुष्टं तमादिशेत् ॥ १२ ॥ गुरु कं
डूकं च गुरुकंडूकं ॥ १२ ॥ अथ तस्य साध्यत्वादिकमाह ॥ एकदोषानुगः साध्यो द्विदोषो याप्य उच्य
ते ॥ सर्वदेहचरः शोथः स कष्टः सान्निपातिकः ॥ इति आमवातनिदानं ॥ अथामवातचि
कित्सा ॥ लंघनं स्वेदनं तिक्तं दीपनानि कटूनि च ॥ रेचनं स्नेहनमपि वस्तयश्चाममारुते ॥
रूक्षः स्वेदो विधातव्यो वालुकापुटकैरिह ॥ उपनाहाश्च कर्तव्यास्तेऽपि स्नेहविवर्जिताः
चित्रकं कटुका पाठा कलिंगातिविषामृता ॥ चूर्णिताः कोष्णतोयेन पिबेदामानिलापहाः
इति ॥ इति चित्रकाद्यं चूर्णं ॥ रास्नासप्तकक्वाथोऽत्र देयः ॥ आमवातगजेंद्रस्य शरीरवन
चारिणः ॥ एक एवाग्रणीर्हन्ति एरंडस्नेहकेसरी ॥ दशमूलीकषायेण पिबेद्वा नागरांभ

॥ २७३ ॥

सा ॥ कुक्षिवस्तिकटीशूलैस्तैस्समेरंडसंभवं ॥ पारदं गंधकं व्योषं द्वौ क्षारौ लवणानि च ॥ त
वणांचेतिगुल्याग्निर्जैपालं सकलैः समं ॥ भावनाबीजपूरस्य सूक्ष्मं शुष्कं विचूर्णयेत् ॥ से
व्या गुंजा रक्तिकायुग्ममामवातविनाशनं ॥ गोदुग्धं कैवर्तं पथ्यं देयं मुद्गोपयोपवा ॥ अन्नं
च वर्जयेत्तावद्यावच्छोथं निवारयेत् ॥ इत्यामवातारिरसः ॥ अजमोदा मरिचं पिप्पली वि ८
डंगं सुरदारु चित्रकं शताह्वाः सैंधवं मागधिमूलं भागा नवकस्य पलिकाः स्युः ॥ शुंठी द
शपलिकास्यात् तुल्यानि तावंति च वृद्धदारस्य ॥ अभयापंचानि पंचपलक्षणं चूर्णं विधाय
येद्देषां ॥ समगुडवटकानद्यात् चूर्णं वा कोष्णवारिणा पिबतः ॥ नश्यंत्यामानिलजाः स
र्वे रोगाः सुदारुणाः शीघ्रं ॥ आनाहस्फुलतूनी प्रतितूनी गृध्रसी गुल्माः ॥ कटिपृष्ठपरि
स्फुटनं स्फुटनं चैवास्थिजंघयोः शोथं ॥ श्वयथुं तथांगसंधिषु वेपथुं चान्येप्यामवातजा

॥२७४॥

रोगाः ॥ सर्वे प्रयांति नाशितं तमरश्च सूर्यांशुविध्वस्तं ॥ इत्यजमोदादिमोदकश्चूर्णया ॥ विश्वौषधपलान्यष्टौ सर्पिषः पलविंशतिः ॥ मत्स्यंडवं च गोक्षीरं शर्करा द्वुतं तथा ॥ त्रिकटुत्रिसुगंधं च प्रत्येकं च पलं पलं ॥ साधयेद्विह विधिना सम्यक् शुंठी रसायनं ॥ नाम्ना सौभाग्यशुंठ्याख्यं पुंसां सौभाग्यदायिनी ॥ आमवाते हरेदाशु त्वचि कांतिं प्रयच्छति ॥ धातुवृद्धिं बलं बुद्धिमायुष्यं कुरुते चिरं ॥ वलीपलितनाशं च कुर्यादिंध्यत्वनाशनं ॥ इति सौभाग्यशुंठी ॥ नागरान्नागमेकं तु द्वौ भागौ कृमिजित्तथा ॥ त्रिवृद्भागत्रयं क्षिप्य चूर्णं गुडसमं पटी ॥ भक्षयेदुष्णतोयेन पुनश्चोष्णं पयः पिबेत् ॥ रोगेन जायते चामे विरेकः सुखकारकः ॥ इति नागरादिमोदकः ॥ पिंडितं गुग्गुलुः प्रस्थं कटुतैलं पलाष्टकं ॥ प्रत्येकं त्रिफला प्रस्थं सार्द्धं द्रोणजले पचेत् ॥ पादशेषं ततः पूतं पुनरग्नावधिश्रयेत् ॥ त्रिकटुत्रिफलामुस्तं वि

॥२७४॥

ङ्गं सुरदारु च ॥ गुडूच्यग्नित्रिदन्तीवचा सूरणं कन्दकं ॥ पारदं गंधकं चैव समस्तं कोष्ठ
क्ति संमितं ॥ शुद्धं सहस्रसमत्वग्नेजयपाल फलं बुधः ॥ त्वगंकुर विनिर्मुक्तं सिद्धं संचू
र्ण्य निक्षिपेत ॥ ततो माषद्वयं जग्ध्वा पिबेत्तप्तजलादिकं ॥ अग्निं च कुरुते दीप्तं वडवा
नलसंनिभं ॥ धातुवृद्धिं वयोवृद्धिं यसं सुचिपुर्सं तथा ॥ आमवातं शिरावातं गृध्रसीवातं
भगंदरं ॥ जानुजंघास्थितं वातं कटिवातं तथैव च ॥ स्रोतवृद्धिं चमूलानि गुदजानि विना
शयेत ॥ इति व्याधिसार्दूलगुटिका ॥ मेथिकायाः पलान्यष्टौ शुंठ्या अष्ट पलानि च ॥
तयोश्चूर्णं पटे पूते दुग्धे ॥ मंदाग्निना पचेत ॥ दुग्धाढकयुगं गव्यं घृतमष्टपलं क्षिपे
त ॥ तत्तावत्सुपचेद्यावद्भवेदतिघनं पयः ॥ पुनः पचेच्छनैस्तत्र दत्वाढकमितां सि
तां ॥ ततः पाके सुचिक्कणे जलनादं न तारयेत ॥ मरिचं पिप्पली शुंठी करेणुमूलं स

॥२७५॥

चित्रकं ॥ यवानी जीरकं धान्यं कारवी सतपुष्पिका ॥ जातीफलं सटी त्वक् च पत्रकं भद्रमु
स्तकं ॥ गहल्लीयास्वलमेतेषां सर्वेषां च पथक् पथक् ॥ षडक्षं नागरं तत्र मरिचं च व
उक्षकं ॥ एषां चूर्णं परिक्षिप्य सर्वं संमिश्र रक्षयेत ॥ एतत्तु भेषजं प्रोक्तं मेथिकापा
कसंज्ञकं ॥ भक्षयेत्स्वतमात्रं त तयथाः चाग्निबलं तथा ॥ आमवातहरेदेतत्सर्वा
न्पवननामयान् ॥ ज्वरंश्च विषमान् हंति पांडुरोगं सकामलं ॥ हंत्युन्मादमपस्मारं
प्रमेहं वातशोणितं ॥ अम्लपित्तं शीतपित्तं शिरःपीडां दृगामयं ॥ प्रदरं सूतिकारो
गं हन्यादेतन्नसंशयः ॥ वपुषः पुष्टिकृद्बल्यं वीर्यवृद्धिकरं परं ॥ इति मेथीपाकः
आमपासैंधवंश्यामा विशालापिप्यभेषजं ॥ इंद्रवारुणिका मज्जा तथा सर्वं विम
र्दयेत् ॥ लोहभांडे विनिक्षिप्य दद्यादग्निं शनैः शनैः ॥ यद्दल्लाभाप्रमानेन वटी

॥२७५॥

क्राथ्यमभिषग्वरैः ॥ उष्णोदकानुपानेन भुक्ता दोषाद्यपेक्षया ॥ पथ्यं घृतौदनं देयमा
मरोगविनाशकृत् ॥ इत्यामारिवटी ॥ सामान्यवातव्याधिलिखितं रसोनाष्टकमत्रा
तीवगुल्मादं ॥ शुंठीकल्कं विनिपिष्य रसैरेरंडमूलजैः ॥ विपचेत्पुटपाकेन तद्रसः स्नौ
द्रसंयुतः ॥ आमवातसमुद्भूतां पीडां जयति दुस्तरां ॥ इति शुंठीपुटपाकः ॥ वातारितै
लसंयुक्तं गंधकं पुरसंयुतं ॥ फलत्रययुतं कृत्वा पिंडं पित्वा चिरं स्त्री ॥ भक्षयेत्प्रत्य
हं प्रातरुष्णतोयानुपानतः ॥ आमवातरुजं हंति कटिशूलं च गृध्रसीं ॥ वातरक्तं स
शोफं च सदा हंति क्रोष्टुजं रुजं ॥ इति वातारिगुग्गुलुः ॥ महारास्नादिनाजग्धो योगरा
जो हि गुग्गुलुः ॥ आमवाते कटिपृष्ठजानुजंघाग्रहं जयेत् ॥ अत्रापि वातनाशनो
रसो योज्यः ॥ तथा वातारिरसश्चापि योज्यः ॥ आमवाते हितौ तीव्रपथ्यादिर्गुग्गुलु

॥२७ ह्री

र्मतः ॥ तथैरंडस्य तैलेन पथ्यायात्र हिता मता ॥ आरग्वधस्य पत्राणि भृष्टानि कटुतै

लतः ॥ आमवातप्रशांत्यर्थं खादेद्भक्तावृतानि च ॥ शुंठीगोक्षुरकक्वाथः प्रातः प्रातर्निषे त

वितः ॥ आमवाते कटीशूले पाचनं रूक्षप्रणाशनं ॥ रसोरसोनस्य पिचुप्रमाणः क्षिप्ते

घृते त्र्याक्षमितं घृतं गोः ॥ पिबेदुमेतेन दहत्यवश्यं क्षिप्रं खीवततैलं हिमहामवातं ॥ मार्कं

डीतन्द्रालां शुंठी पथ्याचैतिसमांशकं ॥ चूर्णमुष्णांबुना पेयमामकं तन्नकृंतनं ॥ अपथ्य

थ्यमाह ॥ दुष्टः स्वेदो संघनं स्नेहपानं वस्तिर्लेपो रेचनं पाणवर्तिः ॥ आर्वेत्सन्नाः श्या

स्योपेकुलत्थाजीर्णमत्स्यां गासानां रसाम्ल ॥ यातस्लेष्मघ्नानि सर्वाणि तक्रं वर्षा

मत्स्यैरंडतैलं रसोनं ॥ पटोलपत्रं कारवेल्लवार्ताकुशिग्रूणि च तप्तनीरं ॥ मंदा ॥२७ ह्री

रगोक्षुरकयवद्रुदारु भल्लातकं गोजलमार्द्रकं च ॥ कटूनि तिक्तानि च दीपनानि सर्व

रामवातामयिने हितानि ॥ अथापथ्यमाह ॥ दधिमत्स्यगुडक्षीरोपोदिकामाषपिष्टकं
दुष्टनीरं पूर्ववातं विरुद्धान्यशनानि च ॥ असात्म्यं वेगरोधं च जागरं विषमाशनं
वर्जयेदामवातार्त्तो गुर्वभिष्यंदिकारि च ॥ इति आमवातचिकित्सा ॥ अथ शूलनिदा
नं ॥ तत्र शूलस्य सन्निकृष्टं निदानमाह ॥ दोषैः पृथक् समस्तामद्वंद्वैः शूलोष्टधा भवे
त् ॥ सर्वेष्वेतेषु शूलेषु प्रायेण पवनः प्रभुः ॥ १ ॥ शूल इति शूलसंभवत्वादस्य शूलसं
ज्ञः ॥ तथा च ज्वरादिवच्छूलस्यापि प्रागुत्पत्तिमाह हारीतः ॥ अनंगनाशाय हरस्त्रि
शूलं मुमोच कोपान्मकरध्वजस्य ॥ तमापतंतं सहसा निरीक्ष्य भयातुरो विष्णुत
नुं प्रविष्टः ॥ स विष्णुहुंकारविमोहितात्मा पपात भूमौ प्रथितः स शूलः इति ॥ किं च शू
लनिखातवेदनाजनकत्वादप्यस्य शूलसंज्ञा ॥ यदाह वृद्धसुश्रुतः ॥ शंकुकीले

॥२७॥

व
कृत्त्रयस्मातीमाहिवेदना। ऊरुस्तम्भस्य भवतित्तस्मात्स्थूलस्यैमीहोच्यत इति। कफपि

त्तादिष्वपूर्णेष्वपि सग्रयश्वं भावीवायुरित्याह॥ सर्वैष्वित्यादि॥ प्रभुकेती॥१॥ अथवात

रक्तस्यपूर्वस्य विप्रकृष्टनिदानसंप्राप्तिपूर्वकं लक्षणमाह॥ व्यायामयानादतिमै

थुनाच्च प्रजागराच्छीतजलातिपानात॥ केन्यायमुद्राठकिकोरदूर्षदित्यपि रुक्ष्याध्य

यनाभिघातात॥२॥ कषायतिक्तातिविरुद्धजोन्नायिरुद्धवध्वरकेष्टुधूर्णाकैः॥ वि

रुद्धकमृत्वानिलवेगरोधाच्छोकोपवासाद्दतिहास्यभावात॥३॥ वायुःप्रवृद्धो जन

येद्धिस्थूलं हत्यश्वपोष्ट्रिकबस्तिदेशे॥ जीर्णेप्रदोषेच घनागमेच शीतेच कोपं स

मुपैतिगाढं॥४॥ मुहुर्मुहुश्चोपचमानमप्रकोपौ विद्धातसंस्तंभनतोदभेदैः॥ संस्वेदनाभ्यं॥२७॥

जनमर्दनाद्यैः स्निग्धोष्णभोज्यैश्च शमंप्रयाति॥५॥ शीतजस्तोर्पिा नेध्वीतजलस्यप्रभ ति

तपानं ॥ विदह्यं क्षीरमत्स्यादि ॥ वल्लूरं शुष्कमांसं ॥ यद्यपि सर्वैरेव वातकोपनैर्वातशू
लं स्यात् तथापि विरुद्धपानाशनादि पाठेनैतद्दर्शयति व्यायामादयो यथा वातहेतवस्तथा
शूलहेतवोपीति ॥ दोषाख्याधिहेतवस्त्वपर्यंतः ॥ एवं पित्तशूलादीन्यपि द्रष्टव्यं ॥ तस्य
शूलस्य देशमाह ॥ हृदित्यादि ॥ तत्र हृच्छूलस्य पृथगपि लक्षणं पठंति ॥ तद्यथा ॥ कफ
पित्तावरुद्धः खलु मारुतो रसमूर्छितः ॥ हृदिस्थः कुरुते शूलमुच्छ्वासस्यावरोधकं ॥ स हृ
च्छूल इति ख्यातो रसमारुतकोपज इति ॥ पार्श्वशूलस्यापि लक्षणं पृथक् पठंति ॥ त
द्यथा ॥ कफं निगृह्य पवनः सूचीभिरिव निस्तुदन् ॥ पार्श्वस्थः पार्श्वयोः शूलं कुर्या
दाध्मानसंयुतं ॥ तेनोच्छ्वसिति वक्रेण नरोन्नं च न कांक्षति ॥ निद्रां च नाप्नुयादेष
पार्श्वशूलः प्रकीर्तित इति ॥ वस्तिशूलस्यापि लक्षणं पृथक् पठंति ॥ तद्यथा ॥

संरोधात्कुपितो वायुरस्थिसंधिमाश्रित्य तिष्ठति ॥ वस्तिर्वंक्षणनाडीषु ततः स्थूलोऽस्य जायते
विलम्बिवातसंरोधी वस्तिः स्थूलः स उच्यत इति ॥ प्रकृतमनुसरामि ॥ जीर्णे भुक्ते ॥ प्रदो
षे रात्र्यागमे ॥ रात्रिमध्यशीतेन वातप्रकोपात् ॥ घनागमे वर्षासु मेघोदये च ॥ मुहुर्मुहुः प्रको
पश्च प्रकोपो वा वायोरत्यन्तेति भावः विज्ञातसंस्तंभनतोदभेदैः सह याति शूलमेव ॥
एतस्योपशममाह ॥ संस्वेदनेत्यादिना ॥१॥२॥३॥४॥५॥ अपथ्यैरितिकमाह ॥ क्षारेति ती
क्ष्णोष्णविदाहितैलनिष्पावपिण्याककुलत्थसूपैः कट्वम्लसौवीरसुराविकारैः क्रोधा
नलायासरविप्रतापैः ॥ ग्राम्यातियोगाद्दशनैर्विदग्धैः पित्तं प्रकुप्याशु करोति शू
लं ॥ तृण्मोहदाहार्तिकरं हि नाभ्यां संस्वेदमूर्छाभ्रमशोषयुक्तं ॥ मध्यंदिने कुप्यति चा
र्द्धरात्रे निदाघकाले जलदात्यये च ॥ शीते च शीतैः समुपैति शांतिं सुस्वादुशीतैर

पिंभो जनैष्टः ॥ पक्षारो यवक्षारादिः ॥ तीक्ष्णो हमं मरिचादि ॥ विदाहि वंशकरीरादि तैलं ति
लविकृतिः ॥ निष्पावो राजमाषः ॥ पिण्याको निःस्नेहसर्षपादिकल्कः ॥ कुलत्थ पृथोत्र
कुलत्थात् यानो पलक्षणः ॥ सौवीरं संधानभेदः ॥ सुराप्रकारैः ॥ रविप्रतापं आतपः ॥
ग्राम्यातियोगो मैथुनाधिक्यं ॥ विदाहीति पूर्वं पठित्वा अशनैर्विदाहिरत्वेनोक्ता विदाहि
वस्तुनो विदाहो यत्क्रमेण विदाहित्वं भवतीति प्रदर्शितं ॥ न तदात्वयेपाठ दृष्टे शीते शीतकाले
शीतैर्वातादिभिः ॥ ६॥ ७॥ य ॥ अपथ्यं स्थैरिकमाह ॥ आनूपवारिजकिलाटपयोविका
रैर्मांसविस्तु पिच्छक शरत्तिलमाषकुलत्थीभिः ॥ अमैर्वल्लासजनकैः रपिहेतुभिश्च पथ्यं ष्मा
मकोपमुपगम्य करोतीति प्रपूर्तं ॥ ८ ॥ हृत्स्वासकाससदनारुचिसंप्रसेकैः रामाश्रये स्ति
मितको षष्ठि रोगरत्वैः ॥ मुक्तेसदेव हि रनंकु रतेति मात्रं रुप्यौ दवेपाशिशिरेकु

सुमागमे च ॥१०॥ आनूपं वनजं तद्देशजं मत्स्य ॥ वारिजं शालूकादि ॥ किलाटः पक्वं दुग्धमाम
मं क्षीरं विज्ञेया दधिकूर्चिका ॥ तक्रेणातक्रकूर्चीस्यात योः पिंडः किलाटकः ॥ वयो वि
कारः पायसादिः ॥ पिष्टमाषादिकृशराणि तेतंडुलयवागूः ॥ अन्यैः गुर्वादिभिः ॥ स्नि
मितमार्द्रचर्मावगुंठितमिव यत्कोष्ठं शिरास्त्रतयोर्ग्रहित्वैः सह ॥ सूर्योदय इति त्रिधा
विभक्तदिवस प्रथमभागस्योपलक्षणं ॥ शिशिरेत त्रकफस्यातिसंचयात ॥ कुसुमा
गमे वसंते ॥ टी॰१०॥ अथ द्वंद्वजमाह ॥ द्विदोषलक्षणैरेतैर्विद्याच्छूलं द्विदोषजं ॥१०॥
अथ त्रिदोषजमाह ॥ सर्वेषु देशेषु समस्तलिंगं वदंति तं सर्वभवं प्रवीणाः ॥ सुक
ष्टमेनं विषवज्रकल्पं विवर्जनीयं प्रवदंति तज्ज्ञाः ॥११ सर्वेषु देशेषु इत्युपलक्षणपार्श्वी
त्रिकवस्तिनाभ्यामाशयेषु ॥ सर्वभवं त्रिदोषजं ॥११॥ अथामजमाह ॥ आटोप हृ

ष्ठा सप्तमी गुरुत्वसौमित्यस्मान्नाहकफप्रसेकैः ॥ कफस्य लिंगेन समानलिंगमामोद्भ-
वंशूलमुदाहरंति ॥ १२ ॥ कफस्य लिंगेन कफशूलोक्तलिंगेन ॥ आमोद्भवं आमादुद्भ-
वो यस्य तं ॥ अत्रामाच्छूले जाते पश्चाद्दोषसंबंधः ॥ अत एव शूलस्यापत्यमुक्तं
स च प्रथममामाशये भवेति पश्चात्संबंधि दोषैर्वस्तिनाभिहृत्पार्श्वकुक्षिषु भ-
वतीति पश्चाद्दोषसंबंधः ॥ १२ ॥ अथामशूलस्य दोषविशेषेण देशविशेषमाह ॥ वाता-
त्मकं वस्तिगतं वदंति पित्तात्मकं चापि वदंति नाभ्यां ॥ हृत्पार्श्वकुक्षौ कफसन्निविष्टं
सर्वेषु देशेषु च सन्निपातं ॥ १३ ॥ हृत्पार्श्वकुक्षौ हृत्पार्श्वाभ्यां सहिते कुक्षौ ॥ कफस-
न्निविष्टं कफेनाविष्टं ॥ १४ ॥ वस्तौ हृत्कंठपार्श्वेषु स शूलः कफवातिकः ॥ कुक्षौ हृन्नाभि-
मध्येषु सः शूलः कफपैत्तिकः ॥ दाहज्वरकरो घोरो विज्ञेयो वातपैत्तिकः ॥ १४ ॥

२८०

यातपैत्तिको यातपैत्तिकशूलस्यानेदृक्लक्षणः ॥१४॥ अथ पक्तांतरोक्तमामशूलमाह ॥ आति
मात्रेपदाभुक्तं पाचकेनद्रुतां गते ॥ स्थिरीकृतं तु तत्काष्ठे वायुरावृत्य तिष्ठति ॥१५॥ यदा
न्नं न गतं पाकं तच्छूलं कुरुते भृशं ॥ मूर्छाध्मानविदाहांश्च हृल्लेखं सविसूचिकं ॥१६॥ कंपं
वांतिमतीसारं प्रमोहं जनयेदपि ॥ आविपाकोद्भवं शूलमेतन्माहुर्मनीषिणः ॥१७॥
आविपाकोद्भवमामोद्भवमित्यर्थः ॥१७॥ अथ शूलस्योपद्रवानाह ॥ वेदनातितृषामू
र्छानाहो गौरवं ज्वरः ॥१८॥ भ्रमो रुचिः कृशत्वं च यत्र हानिस्तथैव च ॥ कासः श्वा
सश्च हिक्का च शूलस्योपद्रवाः स्मृताः ॥१९॥ अथ साध्यत्वादिकमाह ॥ एकदोषानुगि
तः साध्यः कृच्छ्रसाध्यो द्विदोषजः ॥ सर्वदोषोत्थितो घोरस्त्वसाध्यो भूर्युपद्रवः ॥
२०॥ अथ शूलस्यैव भेदं परिणामशूलमाह ॥ स्वैर्निदानैः प्रकुपितो वायुः संनि

२८०

हितः सदा ॥ कफपित्ते समायत्तः शूलकारी भवेद्धसौ ॥ भुक्ते जीर्यति यच्छूलं तदेव परिणा-
मजं ॥ २१ ॥ स्वैर्निदानैरित्यादिना निदानपूर्विका संप्राप्तिरुक्ता ॥ भुक्ते जीर्यतीत्यादिना
लक्षणमुक्तं ॥ भुक्ते जीर्यति आहारे पच्यमाने ॥ अस्य च त्रिदोषजस्यापि सतः परिणा-
मकालसंभवत्वेन पित्तोल्वणत्वं द्रष्टव्यमिति मधुकोशकृत ॥ २१ ॥ अथान्नद्रवनामानं
शूलविशेषमाह ॥ जीर्णे जीर्यत्यजीर्णे वा यच्छूलमुपजायते ॥ पथ्यापथ्यप्रयोगेण
भोजनाभोजनेन च ॥ न शमं याति नियमात् सोन्नद्रव उदाहृतः ॥ २२ ॥ जीर्णे आहारे इ-
ति शेषः ॥ एवं जीर्यति अजीर्णे चेति सर्वदैत्यर्थः ॥ न शमं याति नोपशाम्यतीत्यर्थः
नेदं शूलमसाध्यं चिकित्साभिधानात् ॥ २२ ॥ इति शूलपरिणामशूलान्नद्रवशूलनि-
दानं ॥ अथ शूलचिकित्सा ॥ वमनं लंघनं स्वेदः पाचनं फलवर्तयः ॥ क्षारश्चूर्णा

॥२८१॥

निगुटिका ॥ शस्यं तेऽशूलशांतये ॥ आशुकारी हि पवनस्तस्मात्तं त्वरया जयेत् ॥ वातस्यानु
जयेत् पित्तं पित्तस्यानुजयेत्कफं ॥ विसायवातशूलं तु स्नेहस्वेदैरुपाचरेत् ॥ शूलशस्याकु
तस्य स्यात्स्वेदः पुनः सुखावहः ॥ मृत्तिकां सजलां पाकां चनीमृतां पटे क्षिपेत् ॥ कृत्वा तु
पोटलीं शूली तया स्वेदं विधापयेत् ॥ पक्वानी सैंधवं हिंगु क्षारसौवर्च्चलाभयाः ॥ पि
बेत्कोष्णांबुना वातोद्भवशूलनिवृत्तये ॥ इति पक्वान्यादिचूर्णं ॥ सौवर्च्चलाग्निकाजा
जी मरिचैर्हिंगुलोन्नतैः ॥ मातुलिंगरसैर्वद्धा गुटिका वातशूलनुत् ॥ इति सौवर्च्चलादि
गुटिका ॥ शुंठी हरीतकी कृष्णा त्रिवृत्सौवर्च्चलं तथा ॥ समभागानि सर्वाणि सूक्ष्माण्ये
कत्र कारयेत् ॥ सेव्यं पंचसमं नाम चूर्णं शूलहरं परं ॥ आध्मानजठरार्शोघ्नमामवा
तविनाशनं ॥ इति पंचसमं चूर्णं ॥ विश्वमेरंडजं मूलं क्वाथयित्वाऽथ तं पिबेत् ॥ हिं ॥२८१॥

ग सौवर्च्चसोपेतं सद्यः शूलनिवारणं ॥ विश्वजरं हुतैलविमिश्रं हिंगुघृतं रुचकेन च
घृतं ॥ पीतमतित्वरितं विनिहन्याच्छूलमपूलमिदं हि यथा स्यात् ॥ शंखरजो सवर्णं
चसहिंगुव्योषघृतं त्वहिमांबुनि पीतं ॥ शूलमुग्रतरं विनिहन्यान्नाभिविलेपनतो म
र्दनेच गरलहृतमुग्विश्वाजाजीवचोषरणाहिंगुभिः ॥ विधिविमर्दितैर्भंगरावैर्गुटी हरि
मंथघृत ॥ हरति विविधं भुक्ताशूलं तथानिलमूढतां ॥ अनलविरतिं सैषा भाति ह्रदी
पुविविश्रुता ॥ शंखंदग्धं करंजंच हिंगु अभयासैंधवं ॥ एतच्चूर्णीकृतं सर्वं पिबेच्चो
ष्णेन वारिणा ॥ सर्वशूलहरं चूर्णं विख्यातं रससागरे ॥ चित्रकं रामठं पाठा व्योषं त
वणपंचकं ॥ अजाजी धान्यकं हिंसा दीप्यकं ग्रंथिकं तथा ॥ एतानि समभागानि सूक्ष्म
चूर्णानि कारयेत् ॥ वीरस्य रसैनैव वटिकां कारयेद्बुधः ॥ हृच्छूलं पार्श्वजं शूलमा

॥२८२॥

मयातमरोचकं ॥ अशीतिर्वातजा रोगाः क्षराान्नश्यंति भक्षणात ॥ इति चित्रकादिवटी

हरीतकी त्रिकटुकं कुचिलं गंधं हिंगु च सैंधवं च समं सर्वं वटीः कुर्यात् सुखावहाः

लघु कोलप्रमाणास्ता भक्ष्यंते प्रातरेव हि ॥ एकामेव वटीं भुक्त्वा जनः पथ्यं तु निवारिणी

गृहणीं पांडुतामतीसारं साजीर्णं मंदपावके ॥ उष्णोदकानुपानेन सुखमाप्नोति निश्चः

इति हरीतक्यादिगुटी ॥ कर्षैकं च कुबेराक्षं कर्षैकं च महौषधं ॥ सौवर्चलं चकर्षार्द्धं के

षार्द्धं मर्षहिंगुकं ॥ शिग्रुमूलरसेनैव रसोनस्य रसेन वा ॥ पिष्ट्वा सर्वं प्रयत्नेन स्वच्छां

गारे विपाचयेत ॥ भुक्त्वा तेन विनश्येच्च शूलमष्टविधं तथा ॥ इति कुबेराक्षवटकः ॥

त्रिफला लोहजं चैव लांगली मधुकं मेव च ॥ मधुसर्पिर्युतं लीढ्वा शूलं हंति त्रिदोषजं ॥

शुद्धसूतं विषं गंधं प्रत्येकं पलमात्रकं ॥ मरिचं पिप्पली शुंठी हिंगु चैव पलद्वयं ॥ प

॥२८२॥

ताम्रपंचपलं तालं चिंचाक्षारं पलताम्रकं ॥ सप्तवारं दग्धं ग्राह्यं जंबीराम्लेन सेचयेत् ॥ पंचा
ष्टकं च संयोज्य तत्सर्वं निंबुकद्रवैः ॥ दिनमध्ये कोलमात्रं भक्षयेत्सर्वशूलनुत् ॥ शूल
दायानलो नाम्ना शूलरोगनिकृंतनः ॥ इति शूलदावानलो रसः ॥ दरदामृतकं हेमवृती
समेतास्त्रियान्मांतु षादे विषतिंदुबीजात् ॥ कटुत्रिकं क्षारयुग्मे हिंदीप्यकजमि द्व हिंगुत्रि
वृट्त्रिचित्रं ॥ एषकं तुतं जंभजतेर्वटीं ये मगास्त्वपूर्वा दरप्रमाणा ॥ शूलतानि गुल्मा। वै
जमिमे दवन्हि सीहा मयाता नजयति प्रसह्य ॥ इत्यगस्त्य वटी ॥ गंधार्कुष्ठुकुलुतं प्रह
रयुगलकं मर्दयेद्द्वं दतुत्यं शुत्यं शुद्धं निरुद्धं लेपणा परिणते मार्त्तंडआधाय भांडे ॥ पक्को
तात्त्यां गर्भीतं मर्दितं मथ्यमितं च ह्यतो नागवल्ली पत्रेणा ख्याता त्स्पशूलतद्दिव पहरि रसहृदि
तोहंति शूलं समस्तं ॥ इति शूलहृदि पहरी रसः ॥ अजाजिकौ षधो वराम्सरा मतोग्र

२८३

गंधिकं ॥ विचूर्ण्य कार्षिकं पिबेद् शीतवारिणा नच ॥ इति जात्यादिचूर्णं ॥ पलैकं त्रि-
फलाचूर्णं पलार्द्धं गंधकस्य तु ॥ लोहभस्म तु कर्षैकं सर्वं संचूर्ण्य मिश्रयेत ॥ कर्षार्द्धं
मधुसर्पिभ्यां लेहयेत्सर्वशूलनुत ॥ वातविस्फोटकान्हंति सेवनात्त्रिमासतः ॥
गताः केशाः पुनर्यांति गंधकस्य रसायनात इति गंधकरसायनं ॥ गुडामलकपथ्या-
नां चूर्णं प्रत्येकशः पलं ॥ त्रिपलं लोहकिट्टस्य तत्सर्वं मधुसर्पिषा ॥ समालोड्य ततः
खादेद् दक्षमात्रं प्रमाणतः ॥ आदिमध्यावसानेषु भोजनस्य निहंति तत ॥ अन्नद्रवं
जरत्पित्तमम्लपित्तं सुदारुणं ॥ परिणामसमुत्थं च शूलं सर्वत्सरेष्वपि तं ॥ इति गुड-
मंडूरः ॥ विडंगं चित्रकं चव्यं त्रिफला त्र्यूषणानि च ॥ नवभागानि चैतानि लोह-
किट्टसमानि च ॥ गोमूत्रं द्विगुणं दत्वा मृद्वग्निकगुडान्वितं ॥ शनैर्मृद्वग्निना पचे

२८३

त्वा सुसिद्धं पिंडतां गतं ॥ स्निग्धभांडे विनिक्षिप्य भक्षयेत्कोलमात्रया ॥ प्राङ्मध्यांते
क्रमेणैव भोजनस्य प्रयोजितः ॥ योगोयं शमयत्याशु पंक्तिशूलं सुदारुणं ॥ काम
लां पांडुरोगं च शोथं मंदाग्नितामपि ॥ अर्शांसि ग्रहणीरोगं कृमिगुल्मोदराणि
च ॥ नाशयेदम्लपित्तं च स्थौल्यं चैवापकर्षति ॥ वर्जयेच्छुष्कशाकानि विदाह्यम्लक
टूनि च ॥ पंक्तिशूलांतकोह्येष गुडो मंडूरसंज्ञितः ॥ शूलार्त्तानां कृपाहेतोस्तारयाप
रिकीर्तितः ॥ इति तारामंडूरवटकः ॥ पंथ्याटंकणविश्वहिंगुमरिचैर्वन्हिर्विडंगं
धकं तुल्यं सैंधवसंयुतं तु कुचितं सर्वैः समं संयुतं शूलाध्मानविबंधगुल्मक
सनश्लेष्मामवातापहा जीर्णास्य गुदरारुचिज्वरहरी शूलस्य हृत्पद्मिपटी ॥ इतिशू
लहृत्पद्मीवटी ॥ करंजहिंगुसौभाग्यवरनागरजेरजः ॥ तप्तोदकेन संपीतं महाशू

॥२८४॥

तनिग्राररतां ॥ कर्पासास्थिकुलत्थिकातिलयवैरेरंडबीजातसीवर्षाभूशणबीजकांजि
कप्लुतैरेकीकृतैर्वा पृथक् ॥ स्वेदः स्यादपकूर्परोदरशिरःस्फिग्गुल्फजानुपादांगुलीगु
ल्फस्कंधकटीरुजो विजयते निःशेषवातार्तिहा ॥ इति स्वेदः ॥ चूर्णं कुबेराक्षविडौष
धानामुष्णांबुपीतं सहसिंधुमूलं ॥ जयेत्स्वरुग्व्योषरसोनगंधैर्युतः कुबेराक्ष इदं स
हिंगुः ॥ तुंबरुपुष्करबेतसपथ्यासिंधुयुतेरुचकेन सहिंगु ॥ आर्द्रपतंत्रकहारिनिपी
तं नूनमिदं यवक्षारिमिश्रकं ॥ पक्कारुवूकतैले पथ्यां स्वादेत्तदेयात्तु ॥ तैः संपिबेद्धिमुक्तकः
प्लुताद्द्विगुणं मितोपि स्यात ॥ तुलासंमिते पञ्च पूते तु जंभद्रवे जीरयुग्मं विडं क्षारयुग्मंच
रासौवर्चलं राजिकां षट्कं टं निक्षिपेद्विल्वमात्राणि संचूर्णितानि ॥ सहिंगु द्विविल्वा
नि मूमौ निं ध्यात्रिसप्ताहमेतानि मद्भांडगानि ॥ सक्तुतुल्यमात्रांनि षेवेति युक्तामतः ॥२८४॥

शूलदुर्नामगुल्माग्निसादी ॥ इतिजंबीरासवः ॥ विडंगंयावशूकपटुदाडीमहिंगुत्रि
कटूनिचैतसहुताशयुतानि ॥ सहतिंतडीकगदजीरकयुग्मैर्यपिदीप्यचव्यरुचको
षलोममूलैः ॥ परिकल्कितैरितिघृतेनचतेपिःफलपूरजैःसहपचेदपिदध्ना ॥ गुदव
क्षेणलपवृककटीहृत्पार्श्वहार्त्तिजयिदाधिकसर्पिः ॥ इतिघृतं ॥ द्विक्षारत्रिकटुव
तानिशायुगाब्दगुडूच्यग्नित्रिलवणचव्यहृग्विडंगं ॥ सूक्ष्मैलापुराणदपितासुरंस
चायंस्यात्तुवर्विभचपतासमाक्षिकाच ॥ तत्सर्वंसमंमहिषाक्षयुक्तंचूर्णंकर्षो
न्मानपगुटिकांघृतेनकुर्यात ॥ क्षीरांभसुषजलमुद्गयूषधीतावातार्त्तिच्चपगुद
दादिशूलजित्सा ॥ अपस्मृतिक्षयभूमोर्ध्ववातमेहपांडुजित ॥ किलासकुष्ठकाम
लारुयंविनाशयत्यलं ॥ इतिगुग्गुलुवटिका ॥ चूर्णंतुवरुरामठत्रिलवणलाक्षारा

॥२८५॥

जमोदामयावेहस्वक्षूवणपुष्करान्हयकृतंकुंभत्रिभागान्वितं॥ मंदोष्णेनजलेनपीता
मखिलंशूलंसगुल्मोदराध्मानाजीर्णविबंधमामयवनानाहौचशीघ्रंजयेत्॥ अ
त्रत्रिवृत्दोषाधिक्येसर्वौषधात्रिगुणान्यथाज्ञायौषधात्रिगुणेतिज्ञेयं॥ इतित्रि
वर्गादिचूर्णं॥ रसविषगंधकपदक्षारोषणसिंधुपिप्पलीचीन्यैः॥ अहिवल्लीस्वं
रसनिघर्षैः शूलेमहरिहिंगुंजोयं॥ इतिशूलेमहरिः॥ इंद्रवारुणिकामूलंकटुत्रयंस
मेन्वितं॥ हरेद्गुडांबुनापीतंशूलमन्यंतदुद्धरं॥ हिंगुसौवर्चलंपाठाहिंक्षारौलवण
त्रयंचूर्णंकृत्वाप्रदातव्यंभिषजालक्ष्मनेरसे॥ हृच्छूलेपार्श्वशूलेचमन्याशंभेचदा
रुणे॥ प्रयोज्यंकुक्षिशूलेचकोष्ठशूलेविशेषतः॥ इतिहिंग्वादि॥ सपिप्पलीगुडंस
र्पिःपचेत्क्षीरेचतुर्गुणे ज्वरपितानिलान्हंतिशूलंचपरिणामजं॥ इतिसर्पिः॥ ॥२८५॥

पटुपंचकं पलमितं समरिचं चामसितं स्नुतरं दशाठस्परसेन ॥ परितापयक्वं खयलम
त्रनि पिंचेद्दुग्धो रजावधिकटुत्रिकचित्रं ॥ सहिंगुगंधविषसंभुजविडैगुटिकेति
कोतं तु सितानि तच्छूलं ॥ गुडहरीतकी मयामयपरिणाममहार्तिशमये द्रियं दधि रसा
द्विनिपीता ॥ शूंखगुटी ॥ त्रिफलाकृतमासमवक्वाथनं सितया मधुनामिलितं हर
ति ॥ ननु दाहयुतास्रकपित्तरुजं किल पित्तजशूलदरं प्रवरं ॥ लवणत्रयसंयुक्तं पंच
कोलं रामठं ॥ सुखोष्णेनांबुना पीतं कफशूलं प्रणाशयेत ॥ तीक्ष्णचूर्णेन संयुक्तं।
त्रिफलाचूर्णमुत्तमं ॥ प्रयोज्यं मधुसर्पिर्भ्यां सर्वशूलनिषूदनं ॥ तीक्ष्णराजिका
दारुहैमवतीकुष्ठशताह्वाहिंगुसैंधवैः ॥ अम्लपीष्टैः सुखोष्णैश्च प्रतिलेपश्च शूलयु
तोदरे ॥ रतिलेपः ॥ मूलं चित्रं तथैरंडचित्रकं विश्वभेषजं ॥ हिंगुसैंधवसंयुक्तं

२८ही

सद्यः शूलनिवारणं ॥ इति विश्वाख्यचूर्णं ॥ वातरोगांतर्गताध्मानचिकित्सायां त्रिवि
तो माहानाराचनामा रसो ऽन्यश्च विरेचनं शूले हितं ॥ व्योषग्रंथिकचाग्निहिंगुजरण
द्वंद्वं विषं निंबुजद्रावैरार्द्रकजै रसैर्विमर्दितं तु स्यं मरीचोपमा ॥ कर्त्तव्या गुटिका पयसादि
नमुखे मुक्ता कवोष्णांबुना शूलं त्वष्टविधं निहंति सहसा सूर्यप्रभा नामतः ॥ अस्या
सैंधवमपि स्यादार्थ्य द्वयं ॥ इति सूर्यप्रभावटी ॥ नागरतिलगुडकल्कं पयसा संसाध्य
यः पुमान घात ॥ उग्रं परिणतिशूलं स माहात्म्यात्प्रमायाति ॥ इति कल्कः ॥ अपथ्य
पथ्यमाह ॥ अग्निवृंतास्तैलाः शालयो वाप्यमंडसंपत्तीरं जांगलानां रसाश्च ॥ पटोलसौभां
जनफारवेहवं साम्रुद्रसौवर्चलं हिंगुविश्वं वार्ताकुपत्राणि च हारवूरा विडं शताव्हा
तत्पुनं तवयं ॥ एरंडतैलं [illegible]सुरभीजलं च कपित्थपाम्लकम्निपालकुवं ॥ तथ्यं निच २८ही

पुरीषमूत्रयोः॥ पक्वाम्रपजे शकृत्संचयजे आनाहे॥ अत्र सोक्तानि तक्षरणानि आध्मा
नेवातनिरोधादीनि॥ २१॥ इत्यक्तदावर्त्तानाहनिदानं॥ अथोदावर्त्तानाहचिकित्सा॥ स
र्वेष्वेतेषु विविधेषूदावर्त्तेषु कृत्स्नशः॥ वायोः क्रियाविधातव्यास्वमार्गप्रतिपत्तये
त्रिवृत्कृष्णाहरीतक्यो द्विचतुःपंचभागिकाः॥ गुटिका गुडतुल्यास्ता विड्धादिगदाप
हाः॥ इति त्रिवृदादिगुटी॥ खंडपलं त्रिवृत्तो ऽक्षन्तु पकुल्याकर्षचूर्णितं श्लक्ष्णं॥ प्रागभो
जनस्य मधुना विडालपदकं लिहेत्प्राज्ञः॥ एतद्गाढपुरीषेवाते सकफे च विनियोज्यं॥
नपयोग्यमिदंस्वादु चूर्णं नाराचकं नाम्ना॥ इति नाराचचूर्णं॥ जैपालेन समैः सूतव्योष
टंकणगंधकैः॥ नाराचः स्याद्रसो नाम्ना माषः सर्पिसितायुतः॥ हंत्युदावर्तमानाहमाम
शूलं नवज्वरं॥ इति नाराचरसः॥ वच्याभयाचित्रकयावशूकानसपिप्पलीकोति

॥२९०॥

पिषान सकुष्ठान ॥ उष्णांबुनानाहविबंधवातान् पीत्वाजयेदाशु रसौदनाशी ॥ इति वचादिचू-
र्णं ॥ तठधूमविडव्योषगुडमूत्रैर्विपाचिता ॥ गुदेंगुष्ठसमा वर्त्ति विधेयानाहशूलनुत् ॥ इति
मदनफलादिवर्त्तिः ॥ हिंगुगृहधूमाविडत्वं सजाजी हरीतकी पुष्कर मूलकुष्ठं ॥ भागोत्तरं चू-
र्णितमेतदिष्टं गुल्मोदरानाहविसूचिकासु ॥ इति हिंग्वादिचूर्णं ॥ त्रिवृद्धरीतकीश्यामाः
स्नुहीक्षीरेण भावयेत् ॥ गोमूत्रेण च वटी पीताश्चैव ह्यानाहभेदिनी ॥ इति त्रिवृदादिगु-
टी ॥ मूत्रकं पुष्करं मांस्यं चव्यं भृंगमूलपंचकं ॥ आरेयतपक सैंधवैतत्क्वाथेन घृतं पचेत् ॥
तत्पीतं शमयेत्क्षिप्रमुदावर्त्तं नसंशयः ॥ पंचमूत्रकं च हृतं ॥ इति मूत्रकाद्यं घृतं ॥ अथो
यातनिरोधोत्थेष्वेषु दायुक्तो हितं मतं ॥ स्नेहपानं तथा स्वेदो वंस्तिर्यद्यानुलोमनं ॥ विड्वि-
घातसमुत्थे तु विड्वियन्नं तथौषधं ॥ सुरा सौवर्चलं तथा तीक्ष्णमूत्रेत्वभिहते पचेत् ॥ कुस्थ

॥२९०॥

जवखार २ सज्जीखार १ पंचलवण ५ चित्रक १ अजमोद १ त्रिकुटु ३ वासहरडे १ वायविडंग १
निसोत १ वालवच्छ १ इनका महीन चूर्ण करी ते घृत का दुस्की भावना ३ फीर २० कुमासा
प्रमाण लेने चूर्ण गोमूत्र का अनुपान से देनो गुल्म शूल उदर अंड्डावर्त्तरत्यादिक रोग दूर होय

श्रीस्वरसं चापि कषायं कुंकुमस्य वा ॥ एर्वारुबीजं तोयेन पिबेद्वा लवणीकृतं ॥ सितामिक्षुर
सं क्षीरं द्राक्षारसमथापि वा ॥ सर्वमेव प्रकुर्वीत मूत्रकृच्छ्राश्मरीविधिं ॥ जंभोप्यितमुद्रा
वर्त्ते स्निह स्वेदैः शमं नयेत ॥ अभ्यंजनं चाप्युमोरसे लास्निग्धस्वेदैरथवलतः ॥ नासांतन्यस्ता
पावल्पी क्षुतं कुर्यात्सचोद्भवे ॥ प्रकुर्यात्स्नेहिकं धूममुद्गार प्रतिरोधजे ॥ छर्दिनिग्रहसं
जाते वमनं लंघनं हितं ॥ विरेचनं चात्रमतं तैलेनाभ्यंजनं तथा ॥ रमयेत्प्रियानार्यःपिबु
क्षौद्रावर्त्तिनं नरं ॥ क्षुद्विघातहत मुक्तुंते स्निग्धमुष्णं तथा लघु ॥ तृष्णाम म्लं हितं भक्ष्यं पुष्पं
सेव्यं सुगंधि यत ॥ तस्माविघातसंभूते शीतः सर्वो विधिः हितः ॥ कर्पूरं शिशिरं स्वल्पं

॥ २६१ ॥

पिबेत्तोयं शनैः शनैः ॥ आयासशोषिते शस्तो विश्रामः सरसौदनः ॥ निद्रावेगविघातोत्थे
पिबेत्क्षीरं सितायुतं ॥ संवाहनं च सुस्वप्नात्र हिताश्च न प्रियाः कथाः ॥ क्षीरमत्र माहिषं ॥
माहिषं रजनीमुखे रतितैत्रांतरोक्तेः ॥ अथानाहचिकित्सामाह तुल्यकारणकार्यत्वा
दुदावर्त्तहरीं क्रियां ॥ आनाहे विचकुर्वीत तथा योग्यं भिषग्वरः ॥ अथ पथ्यमाह ॥ स्ने
हस्वेदविरेकाश्च वस्तयः फलवर्त्तयः ॥ अभ्यंगश्च यवाः सर्वे सिद्धवि मूत्रमाहृतं ॥ या
तमूत्रकम्पाकहतु तैलं च वारुणी ॥ शुंठे गेवेरं मातुलुंगं यवक्षारो हरीतकी ॥ लवंगं राम
ठं द्राक्षा गोमूत्रं लवणानि च ॥ रुक्षाणि चान्नपानानि तथा रक्तस्य मोक्षणं ॥ इति पथ्य
मुदावर्त्तेन रणामुक्तं महर्षिभिः ॥ अथापथ्यमाह ॥ वमनं वेगरोधं च शमीधान्यानि क्रो
द्रवाणि ॥ पिण्याकं मातुलुंकं सर्वं करीरं पिष्टवैकृतं ॥ विषं मीनि विरुद्धानि कषायाणि ॥ २६१ ॥

गृह्णीयाच्च ॥ उदावर्त्तप्रयत्नेन वर्जयेत्सततं नरः ॥ उदावर्त्तो हितं सर्व्वं पाचनं सेपनं तथा
आनाहे तु यथा योग्यं योजयेन्मतिमान्भिषक् ॥ अपथ्यानि प्रदिष्टानि यान्युदावर्त्तिनः
पुरा ॥ आनाहार्त्तः परिहरेत्तानि सर्वाणि यत्नतः ॥ २ ॥ उदावर्त्तानाहचिकित्सा ॥ अथ गुल्म
निदानं ॥ तत्र गुल्मस्य सन्निकृष्टविप्रकृष्टकारणं कथनपूर्वकं सामान्यं लक्षणमा
ह ॥ दुष्टा वातादयोत्यर्थं मिथ्याहारविहारतः ॥ कुर्वंति पंचधा गुल्मं कोष्ठांत्रग्रंथिरूपि
णं ॥ १ ॥ कोष्ठांतः हृद्बस्ति पर्यंतं कोष्ठस्तस्य मध्ये कुत्रापि ॥ ग्रंथिरूपिणं गुटिकाका
रं ॥ अथ तस्य पंचविधत्वं विवृणोति ॥ सव्यस्तैर्जायते दोषैः समस्तैरपि चोच्छ्रितैः ॥
पुरुषाणां तथा स्त्रीणां ज्ञेयो रक्तेन चापरः ॥ २ ॥ अथार्त्तवरूपादपि रक्ताद्गुल्मो भवती
त्याह ॥ आर्त्तवादपि गुल्मः स्यात्तत्तु स्त्रीणां प्रजायते ॥ अन्यस्य स्वगमच्च ः पुंसां तथा

॥ २८२ ॥

स्त्रीणां च जायते ॥ ३ ॥ अथ तस्य कोष्ठे पि स्थाननियममाह ॥ तस्य पंचविधं स्थानं पार्श्वे
हृन्नाभिवस्तयः ॥ २ ॥ अथ गुल्मस्य सामान्यं लक्षणमाह ॥ हृद्वस्त्योरंतरे ग्रंथी संचारी या
दि वाचलः ॥ चयापचयवान्वृत्तः स गुल्म इति कीर्तितः ॥ ४ ॥ अरुचिं कृच्छ्रविण्मूत्रवा
तत्वं चांत्रकूजनं ॥ आनाहं चोर्ध्ववातं च सर्वगुल्मेषु लक्षयेत ॥ ५ ॥ वृत्तो वर्तुलः ॥ चयापच
यवान् दोषस्य चयेनोपचयवान् ॥ गुल्म इति लतादि पिहिते संस्थानविशेषाद्दोतो
के गुल्म इति व्यपदेशः ॥ तस्माद्दृश्यात्संचितपरिपिंडितदोषपिंडं गुल्मसं सेत्याहुः ॥ या
ध्यं च दृश्यसंपिंडितो दोषो गुल्मकेन मीयत इति गुल्म इत्याहु निरुक्तिं ॥ अरुचिमन्नाभि
लाषः ॥ कृच्छ्रविण्मूत्रवाततत्वं कष्टेन विण्मूत्राधोवातानां प्रवृत्तिं ॥ ७ ॥ ५ अथ तस्य
पूर्वरूपमाह ॥ उद्गारबाहुल्यपुरीषबंधतृप्त्यक्षमत्वांत्रविकूजनानि ॥ आटोपमाध्मा

॥ २८२ ॥

नमपक्तिश्शक्तिमासन्नगलमस्यवदंतिचिन्हं॥६पुरीषबंधः विड्बंधः॥ तत्पिरनन्नाभि
लाषः॥ अक्षमत्वमसामर्थ्यं॥ आटोपो रुजापूर्वकः क्षोभस्तेमनेया॥ नतु गुडगुडाशब्दं
तस्यांत्रकूजेन संगृहीतत्वात्॥ अपक्तिशक्तिः मंदाग्निता॥ ६॥ अथ तस्य वातिकस्य नि
दानमाह॥ रूक्षान्नपानं विषमातिमात्रं विचेष्टनं वेगविनिग्रहश्च॥ शोकाभिघातो
तीमलक्षयश्च निरन्नता चानिलगुल्महेतुः॥७॥ विषमातिमात्रं अन्नपानमेव॥ विचे
ष्टनं विरुद्धचेष्टा बलवद्विग्रहादिः॥ शोकाभिघातः शोकेन मनोधिष्ठानस्य हृदय
स्याभिघातः॥ अतिमलक्षयः विरेचनादिना॥ निरन्नता उपवासः॥७॥ अथ वातस्य ल
क्षणमाह॥ यः स्थानसंस्थानरुजाविकल्पं विड्वातसंगं गलवक्त्रशोषं॥ श्यावारुण
त्वं शिशिरज्वरं च हृत्कुक्षिपार्श्वांससिरोरुजं च॥ यः करोति जीर्णेभ्यधिकं प्रकोपं

॥ २८३ ॥

भुक्ते मृदुत्वं समुपैति पक्ष्म ॥ यातात्स्यग्रस्यो न च तत्र रूक्षं तिक्तं कषायं कटु चोपशेते ॥ ध
स्थानसंस्थानरुजां विकल्पमित्यत्र विकल्पशब्दः प्रत्येकं स्थानादिभिर्योज्यः ॥ तत्र स्था
नविकल्पो यथा ॥ कदाचिन्नाभौ कदाचिद्बस्तौ कदाचित्पार्श्वयोरित्यादिस्थानांतरग
मनं ॥ संस्थानविकल्पो यथा ॥ कदाचिद्ध्रस्वः कदाचिन्महान्वृत्तो दीर्घश्चेति ॥ रुजावि
कल्पो यथा ॥ कदाचिदल्पा कदाचिन्महती तोदरूपा भेदरूपा च अनेकरूपा चेति ॥ छाया
रूपत्वं शरीरस्य ॥ शिशिरज्वरं शीतज्वरं ॥ जीर्णे भुक्ते ॥ भुक्ते भुक्तमात्रे जीर्णतामना
गते ॥ न उपशेते न सुखयति ॥ ध अपथ्यैः पित्तकफस्य तस्य निदानमाह ॥ कट्वम्लतीक्ष्णो
ष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा ॥ आमाभिघातो रुधिरं च दुष्टं पैत्तस्य
गुल्मस्य निमित्तमुक्तं ॥ १० ॥ आमो न विदग्धाजीर्णं ॥ अभिघातो लगुडादिना ॥ १० ॥ ॥ २८३ ॥

अथ तस्य लक्षणमाह ॥ ज्वरः पिपासा सदनांगरागौष्ठूलं महज्जीर्यति भोजने च ॥ स्वे-
दो विदाहो न्नलवस्य ग्रस्तः स्यक्षीसहः पैत्तिकगुल्मरूपं ॥ ११ ॥ अंगरागो देहस्य लौहि-
त्यं ॥ जीर्यतीति भुक्ते ॥ विदाहः आहारस्य ॥ अन्नलवस्य अक्षीसहः इति पौरुष्यं ॥ ११ ॥ अथ श्लैष्मि-
कस्य सान्निपातिकस्य च हेतुमाह ॥ शीतं गुरुस्निग्धमचेष्टनं च संपूरणं प्रस्वपनं
दिवा च ॥ गुल्मस्य हेतुः कफसंभवस्य सर्वस्तु दृष्टो निचयात्मकस्य ॥ १२ ॥ संपूरणं सं-
पूर्णोदरपूरणं ॥ निचयात्मकस्य सान्निपातिकस्य ॥ सर्वो हेतुः वातजाद्युक्तो हेतुः
१२ ॥ अथ श्लैष्मिकस्य गुल्मस्य लक्षणमाह ॥ स्तैमित्यशीतज्वरगात्रसादहृल्लास
कासारुचिगौरवाणि ॥ कफस्य लिंगानि चयानि तानि भवंति गुल्मे कफकोपजाते
१३ ॥ कफस्य लिंगानि वेदनाल्पतावह्निमांद्यादीनि ॥ स्त्यं हृगल्पाकठिनोन्नतत्व

मितिपाठांतरं ॥ कठिनत्वमुन्नतत्वं च गुल्मस्य ॥ सान्निपातिकगुल्मे सर्वाणि उक्तलक्ष
णानि योद्धव्यानि ॥ धातुरूपस्कंजस्यापि निदानानि तल्लक्षणानि च पैत्तिकस्येव यो
द्धव्यानि ॥ परमत्राभिघातादिरूपो हेतुर्विशेषः ॥ १३ ॥ अथ द्वंद्वजेषु त्रिषु एकजे हेतुल
क्षणानिर्देशार्थमाह ॥ निमित्तलिंगान्यपलभ्य गुल्मे द्विदोषजे दोषबलाबलं च ॥
विमिश्रलिंगानपरांश्च गुल्मांस्त्रीनादिशेदौषधकल्पनार्थं ॥ १४ ॥ निमित्तलिंगा
नि निमित्तानि च लिंगानि चेति द्वंद्वः ॥ औषधकल्पनार्थमिति एकदोषजाभिहि
तचिकित्सामेलकेन तं चिकित्सेदित्यर्थः ॥ ननु पंचगुल्मा इत्यनेन कृतयासंख्य
याविरोधः स्यात् उच्यते ॥ न हि तत्रावधारणं कृतं पंचधैवेति अत एव निमित्त
लिंगानीत्यायत्राभिहितं ॥ किंच द्वंद्वजा अप्रकृतिसमसमवायारब्धत्वान्न

संख्यया षष्ठ्या गर्भो रोगवद्ध्यं तदिति ॥ २४ अथार्त्तवस्य स्वरूपमाह ॥ नवप्रसूता हि
तभोजना या वा चामगर्भं विसृजेदृतौ वा ॥ वायुर्हितस्याः परिगृह्य रक्तं करोति गु
ल्मं स रुजं सदाहं ॥ २५ ॥ पैत्तस्य लिंगेन समानलिंगं विशेषणं चाप्यपरं निबोध
यः स्पंदते पिंडित एव नांगैश्चिरात्सशूलः समगर्भलिंगः ॥ स रौधिरः स्त्रीभव
एव गुल्मो मासे व्यतीते दशमे चिकित्स्यः ॥ २६ ॥ या नवप्रसूता प्राक्कृताग्नियत्नव
र्णमांसहीनाऽहितभोजना ॥ या चामगर्भं विसृजेत् नवमासादर्वाक्प्रसूय
ते साप्यहितभोजना ॥ ऋतौ या आर्त्तवप्रवृत्तिकालेऽहितभोजना ॥ भोजनपदं
विहारस्याप्युपलक्षणं ॥ पतत्याह चरकः ऋतावनाहारतया तपातवेन विरूक्षणै
र्वेगविनिग्रहैश्च ॥ संस्तंभनोल्लेखनयोनिदोषैर्गुल्मः स्त्रियां रक्तभवोऽपि

॥ २८८ ॥

पैतीति ॥ पैत्तस्य पैत्तिकगुल्मस्य ॥ विशेषणं पैत्तिकगुल्माद्विशेषलक्षणं ॥ चिरात्
स्पंदते चलति पिंडीतः समुदितः एव कालेव धारणे ॥ तदेव स्पष्टयति नांगै रिति
अंगैर्हस्तपादाद्यवयवैः ॥ समगर्भलिंगः अत्र समशब्दः सर्वस्वर्थीयः ॥ तेन समा
नि सर्वाणि गर्भलिंगानि आर्तवादर्शनमुखवैतता ॥ स्तनमुखकृष्णता दोह
दादीनि यत्रसः ॥ एतच्च व्याधिप्रभावात ॥ यथापक्षिणो रिरंसा ॥ स तैर्धिरः आ
र्तवरूपरक्तजः स्त्रीभवराव ॥ अतएवोक्तं पूर्वमिथजेज्जटगावदासमदारहरिद्रं
द्राणाम भिप्रायानुसारिणा क्षीरपाणिना ॥ आर्तवादपिगुल्मः स्यात्सतु स्त्री
णां प्रजायतइति ॥ गर्भसमानलिंगत्वे विशेषज्ञानार्थमाह ॥ मासेव्यतीते दश
मे चिकित्स्यइति ॥ नवमदशममासयोः प्रसवकालत्वादित्यैके ॥ तन्न यः स्पंद ॥ २८८ ॥

तेपिंडीतएवनांगैरित्यादिनैवसंशयस्यनिराकृतत्वात् ॥ गर्भःप्रत्यंगैर्निरंतरंनिः
स्यूतस्यंदते गुल्मस्त्वेतद्विपरीत इति ॥ किंच ॥ नवमेदशमे प्रसूयते रक्तगुल्मी नतुनि
यमः ॥ तदधिककालेपिप्रसवदर्शनादागमाच्च ॥ अतएवाह चरकः ॥ तं स्त्री प्रसूते सु
चिरेण गर्भं पुष्टो यदा वर्षगणैरपि स्यादिति ॥ तस्मान्मासे व्यतीते दशमे ॥ चिकि
त्स्य इति मत्संशयव्यवच्छेदार्थं किंतु तदानीं सुखे न चिकित्सार्थी ॥ रक्तगुल्मे पुराण
त्वं सुखसाध्य(स्य)लक्षणमित्यर्थः ॥ पुराणता चास्य दशममासातिक्रमे लैव भव
तीति ॥ अत्रोक्तविशेषणत्वेन स्त्रीभवत्वेतच्चे स्त्रीग्रहणेन कुमारीमतिवृद्धां च निषे
धयति ॥ अनुद्भूतक्षीणरक्तत्वात्तयोरिति मधुकोशाकृत ॥ अस्य स्थाने तु गर्भाशया
यो ज्ञेयः ॥ यत्पूर्वं पंचस्थानान्युक्तानि तानि दोषजाभिप्रायेण बोद्धव्यानि ॥ ३६ ॥

अथ सान्निपातिकगुल्मस्यासाध्यत्वमाह ॥ महारुजं दाहपरीतमश्मवत्घनोन्नतं शी
घ्रविदाहि दारुणं ॥ मनःशरीराग्निबलापहारिणं त्रिदोषजं गुल्ममसाध्यमादिशे
त् ॥ १७ ॥ दाहपरीतं दाहेन व्याप्तसकलदेहं ॥ अश्मवद्घनोन्नतं पाषाणवत्कठिनमु
न्नतं च ॥ शीघ्रविदाहिनं शीघ्रं विदग्धाजीर्णकरं ॥ दारुणं मारकं ॥ मनोपहारिणं
मनोवैकल्यकरं ॥ शरीरापहारिणं शरीरस्य कार्श्यकरं ॥ अग्न्यपहारिणं अग्नि
वैषम्यादिकरं ॥ बलापहारिणं असामर्थ्यकरं ॥ केचिदयं विकृतिविषमसमवाया
रब्धः साध्यः प्रकृतिसमसमवायारब्धोसाध्य इत्याहुः ॥ १७ अथापरं चासाध्यल
क्षणमाह ॥ संचितक्रमशो गुल्मो महावास्तुपरिग्रहः ॥ कृतमूलः शिरानद्धो यदा
कूर्म इवोन्नतः ॥ १ ॥ दौर्बल्यारुचिहृल्लासकासछर्द्यरतिज्वरैः ॥ तृष्णातंद्राप्र

क्षारद्रजां सिचेपथ्यं वर्गो हितः शूलगदार्द्दितेभ्यः ॥ अथापथ्यमाह । विरुद्धान्यन्नपानानि
जागरं विषमासनं ॥ रूक्षतिक्तकषायाणि शीतलानि द्रव्याणि च । व्यायामं मैथुनं म
द्यं वैदलं तंदुलं कटु ॥ वेगरोधं शुचं क्रोधं वर्जयेच्छूलवान्नरः ॥ इति शूलचिकित्सा
अथोदावर्त्तनिदानं ॥ तत्रोदावर्तस्य विप्रकृष्टं निदानमाह । वातविण्मूत्रजृंभाश्रुक्ष
वोद्गारवमींद्रियैः क्षुत्तृष्णोच्छ्वासनिद्राणां धृत्योदावर्त्तसंभवः ॥१॥ इंद्रियमत्र शुक्रं अ
त्र तृतीया सहार्थे धृत्या वेगविघातेन । तथापि सर्वोदावर्तेषु वायुरेव कारणं यदाह
सुश्रुतः ॥ सर्वेष्वेतेषु विधिवदुदावर्तेषु कृत्स्नशः । वायोः क्रिया विधातव्या तस्मार्ग
प्रतिपत्तय इति ॥१॥ अथोदावर्त्तस्य सामान्यं तल्लक्षणमाह ॥ यत्रोर्द्ध्वं जायते वायो राव
र्त्तः संक्लिष्टकैः ॥ उदावर्त इति प्रोक्तो व्याधिस्तत्रानिलः प्रभुः ॥२॥ आवर्त्तो भ्रमः ॥ प्र

मि

॥२८॥

मुक्तौ ॥ २ ॥ तत्रापानवातनिग्रहरोधजस्योदावर्त्तस्य लक्षणमाह ॥ वातमूत्रपुरीषाणां
संगाध्मानेक्लमौ रुजा ॥ जठरे वातजाश्चान्ये रोगाः स्युर्वातनिग्रहात ॥ ३ ॥ संगः अप्रवृ
त्तिः ॥ ध्मानं आध्मानं ॥ रुजा जठरे ॥ अन्ये तोदशूलगुल्मादयः ॥ ३ ॥ अथ पुरीषनिरोधज
स्य लक्षणमाह ॥ आटोपशूलौ परिकर्तिका च संगः पुरीषस्य तथोर्ध्ववातः ॥ पुरी
षमास्याद्यथवा निरेति पुरीषवेगेभिहते नरस्य ॥ ४ ॥ परिकर्त्तिका गुदे कर्त्तनवत्पीडा
उर्ध्ववात उद्गार वा कुत्स्यं ॥ ४ ॥ अथ मूत्रनिग्रहजस्य लक्षणमाह ॥ बस्तिमेहनयोः शू
लं मूत्रकृच्छ्रं शिरोरुजा ॥ विनामो वंक्षणानाहः स्याल्लिंगं मूत्रनिग्रहे ॥ ५ ॥ विनामः
व्यथया वपुषो नमनं ॥ वंक्षणानाहः वंक्षणयोराकर्षणवद्वेदना ॥ ५ ॥ अथ जृंभा
निरोधजस्य लक्षणमाह ॥ मन्यागलस्तंभशिरोविकाराजृंभोपघातात्पवना

॥२८॥

त्मकाः स्फुः तथाक्षिनासावदनामयाश्च भवंति तीव्राः सह कर्णरोगैः ॥ ६ ॥ अथाश्रु

निरोधजस्य लक्षणमाह ॥ आनंदजं वा प्यथ शोकजं वा नेत्रोदकं प्राप्तममुंचतो हि

शिरोगुरुत्वं नयनामयाश्च भवंति तीव्राः सह पीनसेन ॥ ७ ॥ प्राप्तमागतं ॥ अमुंचतो न

रस्येति शेषः ७ अथ क्षिकानिरोधजस्य लक्षणमाह ॥ मन्यास्तंभः शिरःशूलम

र्दितार्द्धावभेदकौ ॥ इंद्रियाणां च दौर्बल्यं क्षवथोः स्याद्विधारणात् ॥ ८ ॥ अर्द्धावभेदकेः

अर्द्धशिरःशूलं ॥ ९ ॥ अथोद्गारनिरोधजस्य लक्षणमाह ॥ कंठास्यपूर्णत्वमतीवतो

दः कूजश्च वायोरथवाप्रवृत्तिः ॥ उद्गारवेगे भिहते भवंति जंतोर्विकाराः पवनप्रसूता

ट कंठास्यपूर्णत्वं कफपूरेनेव ॥ तोदो हृद्यामाशये च कूजोव्यक्तः शब्दः उदरे वायो

रप्रवृत्तिः कृच्छ्रात्स्यादितिरोधः ॥ पवनप्रसूताः पवनाज्जाताः विकारा हिक्कादयः

द॥ अथ वातनिरोधजस्य लक्षणमाह॥ कंडूकोठारुचिव्यंगशोथपांड्वामयज्वराः॥
कुष्ठहृल्लासवीसर्पाः छर्द्दिनिग्रहजा गदाः॥ १० अथ शुक्रनिरोधजस्य लक्षणमाह
मूत्राशये वै गुदमुष्कयोश्च शोथो रुजा मूत्रविनिग्रहश्च॥ शुक्राश्मरी तत्स्रवणं भवे
च्च ते ते विकारा विहते तु शुक्रे॥ ११॥ मूत्राशये वस्तौ॥ तत्स्रवणं शुक्रस्रावः॥ ते ते विका
रा वातकुंडलिकादयः॥ ११॥ अथ क्षुधाभिघातजस्य तृष्णाभिघातजस्य च लक्षण
माह॥ तंद्रांगमर्द्दावरुचिश्रमश्च क्षुधाभिघातात्कृशता च दृष्टेः॥ कंठास्यशोषः श्र
वणावरोधस्तृष्णाभिघाताद्धृदये व्यथा च॥ १२॥ अथ श्वासनिरोधजस्य निद्रा
विघातजस्य च लक्षणमाह॥ श्रांतस्य निश्वासविनिग्रहेण हृद्रोगमोहावथवा
पि गुल्मः॥ जृंभांगमर्द्दोक्षिशिरोजिताड्यं निद्राभिघातादथवापि तंद्रा॥ १३॥

२८८

आर्तिजाड्यं गौरवं ॥ शिरोगाश्चाक्षिगौरवमितितंत्रांतरेपाठात् ॥१३॥ अथवेगाधारो
धजानुदावर्त्तानभिधायरूक्षादिकुपितवातजमाह ॥ वायुःकोष्ठानुगोरूक्षैःकषा
यकटुतिक्तकैः ॥ भोजनैःकुपितःसद्यउदावर्त्तंकरोतिच ॥१४॥ वातमूत्रपुरीषासृ
कफमेदोवहानिवै ॥ स्रोतांस्युदावर्त्तयतिपुरीषंचातिवर्त्तयेत् ॥१५॥ ततोहृद्वस्ति
शूलार्तोहृल्लासारतिपीडितः ॥ वातमूत्रपुरीषाणिकृच्छ्रेणलभतेनरः ॥१६॥ श्वा
सकासप्रतिश्यायदाहमोहतृषाज्वरान् ॥ वमिहिक्काशिरोरोगमनःश्रवणविभ्रमा
न् ॥ बहूनन्यांश्चलभतेविकारानवातकोपजान् ॥१७॥ उदावर्त्तयतिऊर्ध्वंभ्रमयेन
आवर्त्तयति ॥ अतिवर्त्तयेत्प्रवर्त्तयेत् ॥ मनोविभ्रमःरज्जौसर्पज्ञानादिःश्रवणवि
भ्रमःअन्यथाश्रवणं ॥१४॥१५॥१६॥१७॥ अथासाध्यलक्षणमाह ॥ तृष्णार्दितंप

॥२८८॥

रिक्लिष्टं क्षीणं शूलैरुपद्रुतं ॥ शकृद्वमंतं मतिमानुदावर्तिनमुत्सृजेत् ॥१४॥ परिक्लिष्टं
रोगांतरेण ॥१५॥ अथ विगुणानिलजत्वेन समानचिकित्सात्वेन चात्रैवानाहस्या
तल्लक्षणमाह ॥ आमं शकृद्वा निचितं क्रमेण भूयो विबद्धं विगुणानिलेन ॥ प्रवर्तमा
नं न यथास्वमेनं विकारमानाहमुदाहरंति ॥१६॥ आममपक्वमाहाररसं ॥ नेति पूर्वे
ण संबध्यते ॥१७॥ तत्रामजमानाहमाह ॥ तस्मिन्भवत्यामसमुद्भवे तु तृष्णा प्रतिश्या
यः शिरसि विदाहः ॥ आमाशये शूलमथो गुरुत्वं हृत्स्तंभ उद्गारविघातनं च ॥२०॥ वि
घातनमप्रवृत्तिः ॥२०॥ अथ पक्वाशयजमानाहमाह ॥ स्तंभः कटीपृष्ठपुरीषमू
त्रे शूलोथ मूर्छा शकृतो वमिश्च ॥ श्वासश्च पक्वाशयजे भवंति तथालसोक्तानि च
लक्षणानि ॥२१॥ स्तंभशब्दः कटीपृष्ठयोस्तब्धतावाची पुरीषमूत्रयोरप्रवृत्तिवाची ॥२८८॥

ति श्वायैर्युज्यते सन्निसिद्धुति ॥ १८ ॥ महावास्तुपरिग्रहः व्यापकतयाच हस्तसंग्रहणे
ति ॥ कृतमूलो धात्वंतरावगाही ॥ शिरानद्धः शिराजालग्रथान ॥ युज्यते युक्तो भवति
१९ ॥ १९ ॥ अपरं च ॥ गृहीत्वा सज्वरश्वासं छर्द्यतीसारपीडितं ॥ हृन्नाभिहस्तपादे
षु शोफः कर्षति गुल्मिनं ॥ २० ॥ हृदयं गृहीत्वा शोफः गुल्मिनं कर्षति मारणाय ।
कर्षति ॥ २० ॥ अन्यच्च ॥ श्वासः शूलं पिपासान्नविद्वेषो ग्रंथिमूढता ॥ जायते दुर्ब
लत्वं च गुल्मिनो मरणाय वै ॥ २१ ॥ ग्रंथिमूढता ग्रंथिरूपस्य गुल्मस्याकस्माद्विल
यनं ॥ नन्वं तर्विद्रधिगुल्मयोः को भेदः उच्यते ॥ विद्रधिः पच्यते गुल्मो न पच्यते गुल्म
स्य निराश्रयत्वात् विद्रधेः साश्रयत्वाच्चेति ॥ २१ ॥ इति गुल्मनिदानं ॥ अथ गुल्मस्य
चिकित्सा ॥ गुल्मे प्रायशः शस्ताः स्नेहाः स्वेदाश्च वातघ्नाः संतर्पणानि तद्वत्स्निग्धो

॥२६१॥

ह्मान्यन्नपानानि स्वर्जिकाक्षारराम्नान स्याल्लावदेवगुडो भवेत् ॥ उभयोर्वटिकां खादे
द्गुडं स्याः भवेचिनाशिनी ॥ इति स्वर्जिकावटी ॥ पलासवजिम्रिरेवरीचिंचार्कैतिलना
लजाः ॥ यवजः स्वर्जिकाचेति क्षाराश्चाष्टौ प्रकीर्त्तिताः ॥ गुल्मशूलहराः क्षाराश्चाजीर्ण
स्य च पाचनाः ॥ इति गुल्मरोगे क्षाराष्टकं ॥ सामुद्रं सैंधवं काचं पैक्षारं स च र्चितं ॥ टं वं
कणं स्वर्जिकाक्षारं तुल्यं चूर्णं प्रकल्पयेत् ॥ वज्रीक्षीरै रविक्षीरैरातपे भावयेन्मुहुः
वेष्ठयेदर्कपत्रेण रुध्वा भांडपुटे पचेत् ॥ तत्क्षारं चूर्णयेत्स्वच्छमाज्यं वर्णांत्रिफलातथा
पञ्चानीजीरकं चव्हिमूर्णमेषां तु कारयेत् ॥ सर्वचूर्णसमः क्षारः सर्वमेकत्रकार
येत् ॥ तच्चूर्णं टंकयुगलं सलिलेन प्रयोजयेत् ॥ गुल्मे शूले तथाजीर्णे शोथे सर्वोद
रेषु च ॥ मंदवन्हौ वदावर्त्ते प्लीह्नि चापि परं हितं ॥ वातोधिके जलैः कोष्णैर्हितं पि

॥२६१॥

णाधिक्येघृतैः॥ गोमूत्रेणकफाधिक्ये कांजिकेनत्रिदोषजे॥ यवक्षारइतिख्यातः प्रोक्तः
पूर्वैर्ल्पयंभुवा॥ सेवितोहरतेजीर्णंतथाजीर्णमभ्यानगदान्॥ इतियवक्षारः॥ सौवर्चि
काटंकमिताश्वाणमानामताद्रिका॥ उभौयुंजीतयुगपद्गुल्मामयनिवृत्तये॥ सौवर्चि
कासारइतिलोके॥ इतिसौवर्चिकायोगः॥ शुक्तिकाचूर्णगुटिकांटंकमात्रांसुयेष
येत्॥ गुडेनश्वाणमानेनतांगिलेद्गुल्मरोगवान्॥ इतिशुक्तिकागुटी॥ गृहीकुमारिका
मांसंकर्षार्द्धंगोघृतान्वितं॥ त्रिदिनेयोषाभयासैंधुसूक्ष्मचूर्णावचूर्णितं॥ इतिकुमा
रीयोगः॥ कुडवंलशुनाद्विश्रुद्धुष्कादिपचेत्क्षीरजलेषुभागवद्धे॥ प्रपिवेच्चपयोव
शेषमेतत्वतिगुल्मज्वरशूलविद्रधिघ्नं॥ इतिलशुनयोगः॥ एरंडवह्निशुंठीरुक्ष्मा
मूलोद्भवःक्वाथः॥ विडसिंधुहिंगुयुक्तोपिबेन्मानाहगुल्मघ्नः॥ इतिएरंडादिक्वा

॥ २८८ ॥

थः॥ यवानीजीरकं धान्यं मरिचं गिरिकर्णिका ॥ अजमोदोपकुंचीच चतुर्थांशं पृथक्
पृथक् ॥ हिंगुषड्भागकं कार्यं क्षारौ तु लवणपंचकं ॥ तत्र द्विमितैर्भागैः प्रत्येकं क
ल्पयेत्सुधीः ॥ दंतीशठी पौष्करं च विडंगं दाडिमं शिवा ॥ चित्राम्लवेतसौ शुंठी भागैः षो
डशभिः पृथक् ॥ बीजपूररसैरेषां गुटिकां कारयेद्भिषक् ॥ घृतेन पयसा मद्यैः रसैः रु
ष्णोदकेन वा ॥ पिबेत्कांकायनप्रोक्तां गुटिकां गुल्मनाशिनीं ॥ मद्येन वातिकं गुल्मं गो
क्षीरेण च पैत्तिकं ॥ मूत्रेण कफगुल्मं च दशमूल्या त्रिदोषजं ॥ उष्ट्री दुग्धेन नारीणां
रक्तगुल्मं निवारयेत् ॥ हृद्रोगं ग्रहणीशूलं कृमीन अर्शांसि नाशयेत् ॥ इति कांकायन
गुटिका ॥ तुवरी नवसारं च माक्षिकं पंच त्रिकं समं ॥ सोरकं द्विगुणं प्रोक्तं द्रावयेत्कांच
भाजने ॥ हंति गुल्मं यकृत्प्लीहं पंक्तिशूलं विषूचिकां ॥ अग्निमांद्यमजीर्णं च आ ॥ २८८ ॥

मसंग्रहण्णीगदं ॥ शंखद्रावरसः प्रोक्तो गुल्मार्त्तीनां हितायवै ॥ माणिमंथं सैंधवं ॥ इति
शंखद्रावः ॥ सामुद्रं यवजः सूर्य्यपर्पटी नवसादरः ॥ फटकी सिंधु सौवर्च्चौ प्रत्येकं पल
पंचकं ॥ कासीसं द्विपलं ग्राह्यं सर्वमेकत्र योजयेत् ॥ वारुणी यंत्रयोगेन चुल्ह्यां वै स्वा
दिरैंधनैः ॥ साधयेद्ग्राहयेद्वा चूर्णं शंखद्रावरसं परं ॥ गुल्मादि सर्वरोगेषु देयः सर्व
सुखप्रदः ॥ इति द्वितीयशंखद्रावः ॥ सामुद्रमर्धकार्षं च सौवर्च्चं पंचकर्षकं ॥ गुष्टि
कं सैंधवं धान्यं चपला विडपत्रकं ॥ अम्लवेतस ताली संकुस्तुं जीरकमेव च ॥ नाग
केसरकं सर्वं द्विकर्षं च पृथक् पृथक् ॥ यवानि जंजीरकं शुंठी कर्षकर्षं च योजयेत् ॥ अ
द्रिकर्षं त्वगेते च चतुःकर्षं हिंगुदाडिमं ॥ चूर्णीकृतं समस्तं च तत्पलं भास्कराभिधं
आसवेन च तक्रेण मस्तुना वापि योजयेत् ॥ सेवितं श्वासमात्रेण विविधं च भगं

॥२८६॥

दरं व्योषं समं चूर्णं तं च क्षयं सीहानमेव च ॥ वातश्लेष्मभवं गुल्ममुदरं कुष्ठमेव च ॥
अर्शांसि ग्रहणीं शोफमग्निमांद्यं च हृद्ग्रहं ॥ सामदोषं नाशयति दीपनं पाचनं परं
लोकानां च हितार्थाय भास्करेण प्रयोजितं ॥ इति सर्वत्र भास्कररसः ॥ सूतं लवणं पंच
लवणं यवक्षारमात्रं च ताम्रकं ॥ गुल्मशूलं हरत्येव विषूचीशूलवारणं ॥ इति ताम्रयोगः
पारदं टंकणं गंधं चित्रकं व्योषतालकं ॥ विषं ताम्रं च जैपालं मंगल्य रसमर्दितं ॥
गुंजामात्रा वटी कार्या आर्द्रकस्य रसान्विता ॥ गुल्मे कुठारको प्रोक्तः सर्वगुल्मनिवा
रणः ॥ इति गुल्मकुठारो रसः ॥ शिलाताल ताम्रानि गंधोऽप्यसुल्वं मतं शुद्धसूतं च
तुल्यांशमेतत ॥ करंजाद्यारिणा वज्रिनीरेण मर्द्यं दिनैकं रसोऽयं तु विद्याधराख्यः
तमह्नि निष्कमात्रकं विविधसारघेण तु ॥ पिबेच्च गोजलं नरः ऽतीव्र गुल्मशूल

॥२८६॥

वान् ॥ इति विद्याधरो रसः ॥ क्षीरं च वज्रतरुद्भवं दशपलं तावत्पयोप्यर्कजं प्रत्येकं पलयं
चकं च सवर्णं क्षारं च पंचात्मकं ॥ पिष्ट्वार्कदलैर्युतं पचितरोभित्तिस्त्रतुभिः पलै
र्द्रुंडे गुरुमार्गतो गजपुटे वन्हौ विपक्वीकृतं ॥ संचूर्ण्याथ कटुत्रयं त्रिपलमप्येके
पलं रामठं सर्वं च सुप्तपुनीतमेतदमलेपात्रे सुखं स्थापयेत ॥ वज्रक्षारमिदं निहंति
सकलान् गुल्मानुदग्रान्नरां पीतं तक्रयुतं प्रभातसमये कर्षप्रमाणं क्रमात ॥ मं
दाग्निं सविषूचिकामरुचितामापांडुतां क्षीणतां श्वासं कासमजीर्णप्रौढमपचं
नव्याधीनचलासोद्भवान् ॥ वज्रक्षारमिदं निवार्य्य भिषजां कीर्त्तिं विधत्तेतरां मां
संद्राववयति स्फुटं घटिकयो द्वे द्वे किमन्यं पुनः ॥ पंचक्षारा यवक्षारः स्वर्जिक्षारं
कणक्षारनवसागरसूर्यक्षाराः ॥ इति द्वितीय वज्रक्षारः ॥ विश्वहिंगुविडैः सार्द्धं

ऋव्यादो भक्षितो नूनं रसः ॥ गुल्मानष्ठीलानप्लीहांश्च विद्रधीनपि नाशयेत् ॥ इति क्रव्याद
योजनं ॥ प्रस्थं निंबूकसंभूतं तोयमादाय यत्नतः ॥ तन्मध्ये प्रक्षिपेत्कल्कं नवसा
रं सटंकणं ॥ सूतेथ स्फटिकाख्यं जीक्षारो पिप्पलूकजः ॥ प्रत्येकं च पलं सार्द्धं कांच
कुप्यां निवेशयेत् ॥ एकविंशद्दिनं यावत् मृदुमध्ये विनिक्षिपेत् ॥ ततो गद्याणमेकं
तु प्रपिबेत्प्रातरुत्थितः ॥ गुल्मलीहोदरानाहे विसूच्यां च विशेषतः ॥ इति निंबासवः
महत्पंचतक्रानां द्विपलं क्रेनीयः पंचाग्निविल्वं चैव चतुर्थशेषं ॥ तोपाठकं साध्यमथास
तुस्यं सर्पिः समक्षीरं पुतं च पाच्यं ॥ शठी पञ्चाक्षार विडंगाग्नि हिंगु सिंधूत्थ वेल्लौषं
ध पिप्पलीभिः एलाजोगुगंधामधुकोन्विताभिः प्रत्येकमक्षप्रमिताभिरेतत् ॥ महत्पा
त सर्पिः कफगुल्म पांडु प्लीहामयश्वासगदांकुरघ्नं ॥ गृहण्यरोचकरोध किलासकुष्ठ

यामापहं स्यान्नियतं निपीतं ॥ इति महातसर्पिः कफगुल्मपांडुप्लीहा ॥ त्रिफलादशमू

लं च त्रिवृद्दंतीपलं पलं ॥ पक्त्वा चतुर्गुणे जले चतुर्भागावशेषितं ॥ सर्पिरेरंडतैलं क्षीरं

चैकत्र साधयेत् ॥ संस्निग्धो मिश्रकस्नेहः सक्षौद्रः कफगुल्मनुत् ॥ कफवातविकारेषु

कुष्ठप्लीहोदरेषु च ॥ प्रयोज्यो मिश्रकस्नेहो योनिशूलेषु चाधिकं ॥ इति मिश्रकस्नेह ॥

चित्रकं शंखिनी पथ्या कंपिल्लस्त्रिवृता पुरां ॥ वृद्धदारस्य मूलानि श्यामा कोदंती दंतीकं फलं तत

था ॥ कोशातकी देवदाली नीलिका गिरिकर्णिका ॥ श्यामलता पिप्पलीमूलं विडंगं कटुकी

तथा ॥ हेमक्षीरं च विपचेत्कल्कैरेभिः पिचून्मितैः ॥ घृतप्रस्थं तु हि क्षीरे षड्गुणे तु प

त द्रव्यं ॥ अर्कक्षीरस्य मतिमान् तत् सिद्धं गुल्मकुष्ठनुत ॥ हंति शूलं समुदावर्तश्वयथ्वाध्मा

न भगंदरान् ॥ आमपक्वदरण्येषौ निपीतं विंदुसंख्यया ॥ गुडुच्येनो घृतं दुग्धेन कौ

॥३०१॥

तस्येनभ्रष्टेनवा ॥ उष्णोदकेनयापीतं विंदुघैर्गौ विरिच्यते ॥ एतद्विंदुघृतंनाममनाभिसेपाद्वि
रिच्यते ॥ इतिविंदुघृतं ॥ कंन्यारससमुत्पांडुतु तद्द्विगुणमिश्रितः ॥ चातुर्जातलवंगानां प्रत्येकं
तुपलंपलं ॥ प्रस्थंचाजंपयःप्रोक्तं सूक्ष्मामहिषीनागरं ॥ पथ्याचूर्णं गमपलंनिवीतेपकं
स्सघृतः ॥ हंतिकातंतथान्त्रगांत्रवृद्धिलांगुल्मविद्रधिं ॥ इतिकुमार्यासवः ॥ क्षारच्छिंचा
मानुमत्तसुहीनांविल्वविल्वं शंखभस्म द्विविल्वं ॥ आर्द्रतस्माद्रामठंतस्यचार्द्रगंधा
द्विल्वंव्योषतोऽग्नेःपुरस्थ ॥ कर्षकर्षचामतं हिंगु तंचप्रोक्तंतस्मिनविल्वमात्रेप्रयुंज्याः
जंयीरपमलैमातुलुंगैरस्थिरात्रंमर्दभंगात्सिंधुवारस्य प्रयुज्यात् ॥ आर्द्रद्रव्याद्विर्वीसरंत
त्यपकसाकोलोन्मानाचेद्दीप्तातरेव ॥ मुक्तागुल्मजीर्णशूलाग्निमांद्यानाहान्हन्या
द्विल्विकोक्षारपूर्वी ॥ इतिल्विकाक्षारपूर्वगुटी ॥ गुल्मेपित्तसमुत्थेतिक्तंवासाघृतं ॥३०१॥

चेद्धं ॥ वैरेचनिकसुसिद्धैः सर्पिर्भिर्वा विरेचयेदेनं ॥ द्राक्षामधुकपयस्याचंदनमधुपद्म
कानि पयतां ॥ तंदुलतोयेन पीतं पित्तजगुल्मार्तिहृत्कथितं ॥ यायाव्हपंचांगुलदीप्यपास
काय सुकोष्णाति विदाहहारी ॥ यायाव्हयैरंडकुलोत्थमूलं सदाहविश्वंच तथापि पक्वं
पथ्योकं तिलपत्राणि तथा धात्रीफलं तथा ॥ चूर्णं मध्वाज्यसंलीढं पित्तगुल्मनिवारणं
समतीतसूतिकाला नारीगुल्मे सरुजे स्थिरे ला ॥ स्निग्धा च तज्जयाय स्नेहविरेकं भजेत्पुत्तम
तिलक्वाथः पलागुडव्योषघृतकणाविश्वमरिचैर्युतः पीतो गुल्मं रुधिरभवं मे को विजय
ते ॥ करणाभार्गीमूलामरतरुकरंजोद्भवरजस्तिलक्वाथैः पुष्पप्रतिहतिमस्रग्गुल्मं पिच
पात्रद्वयं पलाशक्षारोद्भैतेलसर्पिर्षौः पात्रे ॥ पक्का प्रयोजयेत्तां मात्रां गुल्मे सरुजे संभू
ते ॥ चूर्णं तिलानां पयपा सुधायाः क्षीरेणयायोनिविशोधनाय ॥ विभावितामत्स्य

यरूहपित्तैर्योन्यंतरस्थाः पिचयो पितद्रुत ॥ निकुंभकुस्मागुडकीश्वराठैः ससोमवल्कैः सपञ्चा
गूजैक्ष ॥ वर्तिः सुहीक्षीरविभाविते यं योन्यंतरस्थार्त्तयनिर्गमाय ॥ गुडक्षारवुकुकिण्वमलं च
रागे रजो यं धगुल्मापहं कामिनीनां ॥ रसोनः सतीक्ष्णसुरस्थूस्वमस्याः पुरं स्कगुल्माप
हो यगलवः ॥ पित्तगुल्मे त्रिवृच्चूर्णं पातव्यं त्रिफलांबुना ॥ विरेकाय सितायुक्तं कैंपि हस्वं
या समाक्षिकं ॥ अभयां द्राक्षया खादेत् पित्तगुल्मी गुडेन वा ॥ इति पित्तरक्तगुल्मयोर्योगाः
त्रिवृद्धारुदंत्फत्तमापंचकोत्तं सकटुगदस्य जिकायावप्स्कुक ॥ घृतं तद्भकीनाकुलीकृस्म
जीरैर्हिंकि यंभकैः पाक्तिकं सिंधुजादि ॥ विचूर्णं च हुतं तैः तसर्पिर्विसाभिर्वर्यातः पचे।
दह्निय लौत्र पक्कं ॥ पिवेक्षीरसर्पिः सरातक्रमद्यैर्गूहत्यपार्त्तगुल्मोदरीक्षारमेतं ॥ अ
पस्मारमानर्हमूर्छ्यानितार्त्तिकृमीनयोनिश्रुक्रामयानस्वरींच ॥ विषंचाख स

वैद्ध्रुवं वर्धते द्रुद्रुरं क्षारः रसं वः क्षारेण क्षिप्रमेति ॥ इति त्रिवृदादिक्षारः ॥ अथ पथ्यमाह ॥
संवत्सरसमुत्पन्नाः कलमाः षष्टिकाः शालयः ॥ गवामजायाश्च पयो मद्यं काचपरूषकं ॥ ख
र्जूरं दाडिमं धात्री नागरं चाम्लवेतसं ॥ तक्रमेरंडतैलं च मुनेयातलकं मूलकं ॥ कुलत्थयूषोऽपि
गुल्मवास्तुकं च हरीतकी ॥ लसुनं मातुलुंगं च अम्लवर्गं सुरभीजलं ॥ वर्धनं स्निग्धमुष्णं च
ग्रहणं दीपनं ॥ वातानुलोमनं चैव पथ्यं गुल्मेन रोगे भवेत ॥ अथापथ्यमाह ॥ वातका
रीणि सकलानि विरूढान्यन्नानि च ॥ वल्लूरं मूलकं मत्स्यं मधुराणि फलानि च ॥ शुष्क
शाकं शमीधान्यं विषमाशीनि निद्राक्षराणि च ॥ अधोवातशकृन्मूत्रक्षुत्तृष्णाभ्यासविधारणं
वमनं जलपानं च गुल्मरोगी परित्यजेत ॥ अत्र शमीधान्यनिषेधे पिनमाषकुलत्थनि
षेध इति प्राचीनाः तथापि पृथक् धान्येषु वस्यापि न निषेधः ॥ इति गुल्मरोगचिकित्सा

अथसीहयकृन्निदानं ॥ तत्रसीहरोगस्यनिदानसंप्राप्तिपूर्वकंलक्षणमाह ॥ शोणिता
ज्जायतेसीहावामतोहृदयादधः ॥ रक्तवाहिशिराणांसमूलंख्यातोमहर्षिभिः ॥१॥
विदाह्यभिष्यंदिरतस्यजंतोः प्रदुष्टमत्यर्थमसृक्कफश्च ॥ सीहाभिवृद्धिंकुरुतःप्रवृ
द्धौतंसीहसंज्ञंगदमाननंति ॥२॥ वामेसपार्श्वेपरिवृद्धिमेतिविशेषतःसीदतिचातु
रोत्र मंदज्वराग्निःकफपित्तलिंगैरुपद्रुतःक्षीणबलोतिपांडुः ॥३॥ विदाहिकुलत्थ
माषसर्षपशाकादि ॥ अभिष्यंदिमाहिषदध्यादि ॥ कफपित्तलिंगैरुपद्रुतइतिप्रदु
ष्टमत्यर्थमसृक्कफश्चेतिसंप्राप्तिः ॥ असृजःपित्तस्यचसमानधर्मत्वात् ॥१।२।
३॥ अथरक्तजलक्षणमाह ॥ क्लमोभ्रमोविदाहश्चवैवर्ण्यंगात्रगौरवं ॥ मोहोरक्तोद
रत्वंचज्ञेयंरक्तजलक्षणं ॥४॥ अथपैत्तिकलक्षणमाह ॥ सज्वरःसपिपासश्चसा।

दाहो मोहसंयुतः। पीतगात्रो विशेषेण प्लीहा पैत्तिक उच्यते ॥५॥ अथ श्लैष्मिकस्य तल्ल
क्षणमाह ॥ प्लीहा मंदव्यथः स्थूलः कठिनो गौरवान्वितः। अरोचकयुतः शीतः श्लेष्मसं
भव उच्यते ॥६॥ अथ वातिकस्य लक्षणमाह ॥ नित्यमानद्धकोष्ठः स्यान्नित्योदावर्तपीडितः
वेदनाभिः परीतश्च प्लीहा वातिक उच्यते ॥ दोषत्रितयरूपाणि प्लीहन्यसाध्ये भवंति
हि ॥७॥ अथ शरीरावयवविशेषस्य यकृतः स्वरूपमाह ॥ अधो दक्षिणतश्चापि हृद
याद्यकृतः स्थिते। तत्तु रंजकपित्तस्य स्थानं शोणितजं मतं ॥८॥ अथ यकृद्रोगमाह ॥ प्ली
हामयस्य हेत्वादि समस्तं यकृदामये ॥ किंतु स्थितिस्तयोर्ज्ञेया वामदक्षिणपार्श्वतः
॥९॥ इति प्लीहयकृन्निदानं ॥ अथ प्लीहयकृच्चिकित्सा ॥ पातव्यो शुक्तितः क्षारः क्षीरेणो
दधिशुक्तिदः ॥ तथा दुग्धेन पातव्याः पिप्पल्यः प्लीहशांतये ॥ इति योगद्वयं ॥ साडुपलं

॥२०४॥

सैंधवमभ्रगलोजलेनक्षिप्यचतुर्थांवशेषंतज्जलंपिबेत ॥ प्लीहगुल्मादिप्रशमोभवति ॥
इतिसैंधवयोगः ॥ अर्कपत्रंसलवणंपुटदग्धंविचूर्णितं ॥ निहंतिमस्तुनापीतंप्लीहानं
मतिदारुणं ॥ इतिअर्कपत्रक्षारः ॥ हिंगुत्रिकटुकंकुष्ठंयवक्षारश्चसैंधवं ॥ मातुलुंगरसो
पेतंप्लीहशूलहरंरजः ॥ इतिहिंग्वादिचूर्णं ॥ पलाशक्षारतोयेनपिप्पलीपरिभाविता ॥
प्लीहगुल्मार्तिशमनीवह्निमांद्यहरीमता ॥ इतिपिप्पलीयोगः ॥ रसेनजांबीरफलस्य
शंखनाभेरजःपीतमवश्यमेव ॥ क्षालप्रमाणंशमयेद्घोरंप्लीहामयंकूर्मसमान
माशु ॥ इतिशंखयोगः । शरपुंखमूलकल्कस्तक्रेणलोडितःपीतः ॥ प्लीहानंपदिनेह
रतिक्षौतोपितज्जलेहयेत ॥ इतिशरपुंखयोगः ॥ सुपक्वसहकारस्यरसःक्षौद्रसम
न्वितं ॥ पीतःप्रशमयत्येवप्लीहानंनैवसंशयः ॥ इत्याम्रस्वरसपानं ॥ सुस्विन्नं

२०४॥

शाल्मलीपुष्पंनिशायांपर्युषितं नरः ॥ राजिकाचूर्णसंयुक्तंखादेत्प्लीहोपशांतये ॥ इतिशा
ल्मलीकुसुमयोगः ॥ यवानिकाचित्रकयावशूकषड्ग्रंथदंतीमगधोद्भवानां ॥ चूर्णंहरे
त्प्लीहोषगदंत्रिपीतमुष्णांबुनामस्तुसुरासवैर्वा ॥ इतियवान्यादिचूर्णं ॥ प्लीहोदिष्टाः
क्रियाःसर्वायकृत्यपिसमाचरेत ॥ कार्यंचदक्षिणेबाहौतत्रशोणितमोक्षणं ॥ क्षारंच
पिउफूस्नाप्यांपूतिकस्यांबुनिःसृतं ॥ पिबेत्प्रातर्यथावन्हियकृत्प्लीहप्रशांतये ॥ इतिक्षा
रंजक्षारः गुडाभयारुष्करजीरजातः प्लीहापहोमोदककार उक्तः ॥ रसोनपिप्पलीषणमू
त्रचूर्णंगोमूत्रगंडूषनिपीतमेवं ॥ इतिप्लीहयकृच्चिकित्सा ॥ अथहृद्रोगनिदानं
तत्रहृद्रोगस्यविप्रकृष्टंनिदानमाह ॥ अत्युष्णगुर्वम्लकषायतिक्तश्रमाभिघाता
ध्यशनप्रसंगैः ॥ संचिंतनैर्वेगविधारणैश्चहृदामयःपंचविधःप्रदिष्टः ॥ १ ॥

॥ ३०५ ॥

प्रसंगः सततं सेवा । संचितमं अतिचिंता रुजभयादिकमिति यावत् ॥ पंचविधः वाति-
कः पैत्तिकः श्लैष्मिकः सान्निपातिकः क्रिमिजश्चेति १ ॥ अथ तस्य संप्राप्तिपूर्वकं लक्षण-
माह ॥ दूषयित्वा रसं दोषा विगुणा हृदयं गताः ॥ हृदि बाधां प्रकुर्वंति हृद्रोगं तं प्रचक्ष-
ते ॥ २ ॥ विगुणाः दुष्टाः । बाधां दोषभेदेन नानाविधां व्यथां ॥ मंगवत्पीडामिति गयदा-
सः ॥ २ ॥ अथ वातिकहृद्रोगमाह ॥ आयम्यते मारुतजे हृदयं तुद्यते पर्सो वा ॥ निर्मथ्यते
दीर्यते च स्फोट्यते पाट्यतेपि वा ॥ ३ ॥ मारुतजे हृद्रोग इति शेषः ॥ आयम्यते व्यथया
विस्तार्यत इव ॥ तुद्यते सूचीभिरिव विध्यते ॥ निर्मथ्यते मंथानेनेव ॥ दीर्यते कर-
पत्रेण द्विधा क्रियत इव ॥ स्फोट्यते आरयेव ॥ पाट्यते कुठारेणेव बहुधा क्रियते ॥
३ ॥ अथ पैत्तिकहृद्रोगमाह ॥ तृष्णोष्मदाहचोषाः स्युः पैत्तिके हृदयक्लमः ॥ धू मा ॥ ३०५ ॥

यनेच मूर्छा च स्वेदः शोषो मुखस्य च ॥४॥ उष्मा शीतगात्रस्यैव शीतयातभिलाषहेतुः
किंचिद्दाह इति यावत् उष इति पाठांतरेप्यर्थः स एव ॥ दाहः पार्श्वस्थेनवह्निनेव दुः
खहेतुर्गात्रसंतापः ॥ चोषाचूषणेनेव पीडा ॥ हृद्यक्लमः हृदयाकुलत्वं ग्लानिरिति
यावत् ॥ धूमायनं कंठाद्धूमनिर्गम इव ॥ स्वेदः किंचिद्दुर्गंधसहित इव ॥४॥ अथ श्लैष्मि
क हृद्रोगमाह ॥ गौरवं कफसंस्रावोऽरुचिस्तंभोऽग्निमार्दवं ॥ माधुर्यमपि चास्यस्य
बलासावतते हृदि ॥५॥ गौरवं हृदयस्य ॥ बलासावतते कुपितकफव्याप्ते ॥५॥ अथ त्रि
दोषज हृद्रोगमाह ॥ विद्यात्त्रिदोषमप्येवं सर्वलिंगं हृदामयं ॥५॥ अथ कृमिज हृद्रो
गमाह ॥ अत्र कृमयो जायंतेऽस्मिन्निति कृमिज इति निरुक्तिः तत्र तस्य निदानपूर्वि
कां संप्राप्तिमाह ॥ त्रिदोषहेतुहृद्रोगे यो दुरात्मा निषेवते ॥ तिलक्षीरगुडादींश्च ग्रंथि

॥ ३०६ ॥

स्तस्योपजायते ॥ ६ ॥ मर्मैकदेशे संक्लेदं रसश्चाप्युपगच्छति ॥ संक्लेदात्कृमयश्चास्य भवं-
त्युपहतात्मनः ॥ ७ ॥ मर्मैकदेशे हृदयैकदेशे ॥ संक्लेदं शाटितत्वं रसः उपगच्छति ॥ संक्ले-
दाद्रसस्य शाटितत्वात् उपहतात्मनस्तिलाद्यहिताहारेण ॥ ६ ॥ ७ ॥ अथ तस्य लक्षण-
माह ॥ उत्क्लेदः ष्ठीवनं तोदः शूलं हृल्लासकस्तमः । अरुचिः श्यावनेत्रत्वं शोषश्च कृमि-
जे भवेत् ॥ उत्क्लेदः वमनमुपस्थितमिव ॥ शोषो शोपक्ष्मा ॥ ननु त्रिदोषजांतरायस्यापि विशे-
षत्वात्कृमिजोपि त्रिदोषज एव तत्कथं हृद्रोगः पंचविध इति ॥ नैवं रोगजस्यापि रो-
गस्य पृथक् दर्शनार्थमुक्तं ॥ निदानार्थकरो रोगो रोगस्याप्युक्तेः ॥ अत्र हि दोषजे-
ष्वनुक्तोपि प्रकृतिसमसमवायारब्धो बोद्धव्यः ॥ ८ ॥ अथ हृद्रोगस्योपद्रवानाह
क्लमः सादो भ्रमः शोषो ज्ञेयास्तेषामुपद्रवाः ॥ कृमिजे तु कृमीणां ये श्लैष्मिकाणां

॥ ३०६ ॥

हितेमतः ॥४॥ क्लोमनः पिपासास्थानं स्वसादः शोषः ॥ शोषः मुखस्य तेषां हृद्रोगाणां ॥
कृमिजे तु हृद्रोगे स्मै क्रिमिकानां कृमीणां ये उद्रवाः हृद्रोगास्यस्यश्च रोगान्नाधिपाका द
यस्ते मताः ॥५॥ इति हृद्रोगनिदानं ॥ अथ हृद्रोगचिकित्सा ॥ घृतेन दुग्धेन गुडांभसा वापि
वंति चूर्णं ककुभत्वचो ये ॥ हृद्रोगजीर्णज्वररक्तपित्तं हत्वा भवेयुश्चिरजीवितस्ते ॥ इ
ति हृद्रोगे चूर्णं ॥ पिबेन्मूत्रेण संयुक्तं चूर्णं कुस्माविडंगयोः ॥ हृदयस्यपतं त्येव कृ
मयो हृद्रुजापहः ॥ इति कुस्माविडंगचूर्णं ॥ मूत्रं नागरवलायास्तु चूर्णं दुग्धेन वा पचे
त ॥ हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलं ॥ इति योगद्वयं ॥ चूर्णं पुष्करजं लिह्यात्
माक्षिकेण च संयुतं ॥ हृच्छूलश्वासकासघ्नं छर्दिहिक्कानिवारणं ॥ इति पुष्करमूल
चूर्णं ॥ हरीतकीवचारास्नापिप्पलीनागरोद्भवं ॥ शठीपुष्करमूलोत्थं चूर्णं हृद्रोगे

॥२०७॥

नागरानं ॥ इति हरीतक्यादिचूर्णं ॥ पुटदग्धहरिणशृंगं पिष्टं गव्येन सर्पिषा पिवतः ॥
हृत्पृष्ठशूलमचिरादुपैति शांतिं सुकष्टमपि ॥ इति हरिणशृंगभस्म ॥ वातोपसृष्टे हृद
ये वामयेत्स्निग्धमातुरं ॥ द्विपंचमूलीक्वाथेन सस्नेहलवणेन च ॥ सपुष्करजयं फ
लं पूरमूलं महौषधं शटिमयाचकल्कः ॥ क्षाराम्लसर्पिर्लवणैर्विमिश्रः स्याद्वातहृद्रो
गहरो नराणां ॥ इति पुष्करादिकल्कः ॥ हारहूरा हरीतक्योस्तुल्यशर्करयोरजः ॥ पिवेत् हि
मां पुनाहंति पित्तहृद्रोगमंजसा ॥ इति द्राक्षादियोगः ॥ हिंगूग्रगंधाविडविश्वकृष्णा
कुष्ठाभयाचित्रकयावशूकां ॥ पिवेद्धि सौवर्चलपुष्कराढ्यं यवांभसा शूलहृदामय
घ्नं ॥ इति हिंग्वादिचूर्णं ॥ अर्जुनस्य त्वचः क्वाथकल्काभ्यां साधितं घृतं ॥ सततं सेवि
तं हन्यात्सर्वमेव हृदामयं ॥ इत्यर्जुनघृतं ॥ अजीर्णाधिकारे पूर्वोक्तलोहासवोपिस

॥२०७॥

त्तः ॥ अथ पथ्यमाह ॥ शालिर्मुद्गो यवो मांसं जांगलं मरिचान्वितं ॥ पटोलं कारवेल्लं च प
थ्यं प्रोक्तं च भिषग्वरैः ॥ अथापथ्यमाह ॥ तैलाम्लतक्रगुर्वन्नकषायश्रममातपं ॥ रोष
स्त्रीमार्गचिंताश्च वाक्यं हृद्रोगवान्स्त्यजेत ॥ इति हृद्रोगचिकित्सा ॥ अथ मूत्रकृच्छ्रनिदानं
तत्र मूत्रकृच्छ्रस्य विप्रकृष्टं निदानमाह ॥ व्यायामतीक्ष्णौषधरूक्षमद्यप्रसंगनृत्यद्रु
तपृष्ठयानात ॥ आनूपमत्स्याध्यशनादजीर्णात्स्युर्मूत्रकृच्छ्राणि नृणां तथाष्टौ ॥ १ ॥
तीक्ष्णौषधं राजिकाद्युष्णद्रव्यादि प्रोक्तं ॥ रूक्षेति मद्यविशेषणं ॥ प्रसंगः सततं सेवा ॥ नृ
त्यं नर्त्तयं ॥ नित्येति द्वितीयः पाठः द्रुतपृष्ठयानात ॥ आनूपं प्रचुरजलदेशभवं वक्ष्यं
अष्टौ वातिकपैत्तिकश्लैष्मिकसान्निपातिकशल्यजपुरीषजशुक्रजाश्मरीजानि
१ ॥ अथ तस्य संप्राप्तिपूर्वकं लक्षणमाह ॥ पृथङ्मलाः स्वैः कुपितानिदानैः स

र्वेऽथवा कोपमुपेत्य वस्तौ॥ मूत्रस्य मार्गं परिपीडयंती यदा तदा मूत्रयतीह कृच्छ्रात्॥२॥
कृच्छ्रात् महतो दुःखात्॥२॥ अथ तेषु वातिकं पैत्तिकं चाह॥ तीव्रा रुजो वंक्षणवस्तिमेढ्रे
स्वल्पं मुहुर्मूत्रयतीह वातात्॥ पीतं सरक्तं सरुजं सदाहं कृच्छ्रं मुहुर्मूत्रयतीह पित्तात्
३॥ कृच्छ्रमिति क्रियाविशेषणं॥३॥ अथ श्लैष्मिकं सान्निपातिकं चाह॥ वस्तेः सलिंगस्य
गुरुत्वशोथौ मूत्रं सपिच्छं कफमूत्रकृच्छ्रे सर्वाणि रूपाणि च सन्निपाताद्भवंति तत्कृ
च्छ्रतमं हि कृच्छ्रं॥४॥ सपिच्छं पिच्छिलं॥ कृच्छ्रं मूत्रकृच्छ्रं॥४॥ अथ शल्यजमाह॥ मूत्रवाहि
षु शल्येन क्षतेष्वभिहतेषु वै॥ मूत्रकृच्छ्रं तदाघाताज्जायते भृशदारुणं॥ वातकृच्छ्रे
ण तुल्यानि तस्य लिंगानि निर्दिशेत्॥५ मूत्रवाहिषु स्रोतस्सु शल्येन कंटकेन क्ष
तेषु सक्षतीकृतेषु॥ अथवा अभिहतेषु मुद्गरादिभिरभिहतेषु॥ तदाघातात् मू

॥२०८॥

त्रमार्गघातात्मूत्रकृच्छ्रंजायते ॥ मूत्रदास्त्रांमारकं ॥ तस्यशस्त्रजस्य ॥ ५ ॥ अथपुरीष
जमाह ॥ शकृतस्तुप्रतीघाताद्वायुर्विगुणतांगतः ॥ आध्मानंवातशूलंचमूत्रकृच्छ्रंक
रोतिच ॥ ६ ॥ प्रतीघातान्निरोधात् ॥ विगुणतांदुष्टतां ॥ ६ ॥ अथशुक्रजमश्मरीजंचाह ॥
शुक्रेदोषैरुपहतेमूत्रमार्गेविधारिते ॥ सशुक्रंमूत्रयेत्कृच्छ्राद्बस्तिमेहनशूलवान् ॥
अश्मरीहेतुतत्पूर्वंमूत्रकृच्छ्रमुदाहृतं ॥ ७ ॥ उपहतेदूषिते तत्पूर्वंसा अश्मरीपूर्वंयस्य
तत्तत्पूर्वं ॥ अतएवाश्मरीहेतु ॥ ७ ॥ सश्रुतेशर्कराजमपिमूत्रकृच्छ्रमुक्तं ॥ अत्रतुतस्यन
पृथक्संख्यानिरासार्थमश्मरीशर्करयोःसाम्यमाह ॥ अश्मरीशर्कराचैवतुल्यसंभव
लक्षणे ॥ विशेषणंशर्करायाःशृणुकीर्तयतोमम ॥ ८ ॥ संभवःकारणं ॥ विशेषणं
विशेषं ॥ ८ ॥ पच्यमानाश्मरीपित्ताच्छोष्यमाणाचवायुना ॥ विमुक्तकफसंधानाक्ष

॥ ३०९ ॥

रंतो शर्करामता ॥ ८ ॥ मूत्राश्मर्यश्लेष्मसंहतिः प्रथमं पित्तेन रंधनकर्मणा पच्यमाना पक्वा वायुना शोषिता कफेनाश्लिष्टा अश्मरी ॥ सैव विमुक्तकफसंधाना स्वल्पश्लेष्मानुसेवना शर्करा स्यान्मूत्रमार्गप्रसरं तो शर्करामता ॥ एतावता किंचिदेव भेद इति सूचितं ॥ ९ ॥ अथ शर्करापा उपद्रवानाह ॥ हृत्पीडा वेपथुः शूलं कुक्षावग्निश्च दुर्बलः ॥ तथा भवति मूर्च्छा च मूत्रं कृच्छ्रं सुदारुणं ॥ १० ॥ शूलं कुक्षाविति स्पष्टार्थः तथा शर्करया ॥ १० ॥ इति मूत्रकृच्छ्रनिदानं ॥ अथ मूत्रकृच्छ्रचिकित्सा ॥ त्रिकंटकारग्वधदर्भकाशयवासधात्रीगिरिभेदपथ्याः ॥ निघ्नंति पीता मधुनाश्मरीं च समीपमृत्योरपि मूत्रकृच्छ्रं ॥ इति त्रिकंटकादिकाथः ॥ अमृतानागरं धात्री वाजिगंधा त्रिकंटकं ॥ निकाथ्य प्रपिबेत्काथं मूत्रकृच्छ्रसमन्वितः ॥ इति अमृतादिकाथः ॥ हरीतकीगोक्षुरराजवृक्षपाषाणभिद्धन्वयवासकानां

॥ ३०८ ॥

क्वाथं पिबेन्माक्षिकसंप्रयुक्तं कृच्छ्रे सदाहे सरुजे विबंधे ॥ इति हरीतक्यादिक्वाथः । कुश-
काशः शरो दर्भ इक्षुश्चेति तृणोद्भवं ॥ पीतं कृच्छ्रं हरेत्पंचमूलं बस्तिविशोधनं । एतत्सि-
द्धं पयः पीतं मेढ्रगं हंति शोणितं ॥ इति तृणपंचकं । कूष्मांडकस्य स्वरसः सितया मूत्र-
कृच्छ्रजित् ॥ इति कूष्मांडस्वरसः । एलाश्मभेदकशिलाजीतपिप्पलीनां च चूर्णानि तंडुल-
जलेन तु सितानि पीत्वा ॥ प्रवृद्धगुडेन सहितानि लिहेत्स सम्यगासन्नमृत्युरपि जीवति
मूत्रकृच्छ्री ॥ इति एलादिचूर्णं । अयोरजः श्लक्ष्णं पिष्टं मधुना सह योजितं ॥ मूत्रकृ-
च्छ्रं जयत्याशु त्रिभिर्लेहैर्न संशयः ॥ इति अयोरजयोगः ॥ सितातुल्यो यवक्षारः सर्व-
कृच्छ्रनिवारणः ॥ यवक्षारोऽत्र सपादशाणो देयः ॥ इति यवक्षारयोगः ॥ अष्टाविंशति
संख्यानि पलान्यानीय गोक्षुरात् ॥ विपचेत्षड्गुणे नीरे क्वाथो ग्राह्योऽर्द्धशोषितः ॥

॥३१०॥

पूतंपुनःपचेत्तत्रपुरंसमप्रपरांक्षिपेत् ॥ त्रिकटुत्रिफलामुस्तंचूर्णयेद्दंपलसमकं ॥ ततःपिं
डीकृतस्यास्यगुटिकामुपयोजयेत् ॥ हन्यात्कामेहंकृच्छ्रंचप्रदरंमूत्रघातकं ॥ वातास्रंवात
रोगांश्चशुक्रदोषंतथाश्मरीं ॥ इतिगोक्षुरादिगुग्गुलुः ॥ अजाजीगुडसंयुक्ताप्रत्येकंद्वि
पलोन्मिता ॥ भुक्त्वानिवारयत्याशुमूत्रकृच्छ्रंसुदारुणं ॥ इतिजीरकयोगः ॥ यवक्षारेण
संयुक्तंपिबेत्तक्रंप्रकामतः ॥ मूत्रकृच्छ्रप्रशांत्यर्थमश्मरीनाशनायच ॥ इतिद्वितीयय
वक्षारयोगः ॥ गुडेनमिश्रितंक्षीरंकदुष्णंकामतःपिबेत् ॥ मूत्रकृच्छ्रेषुसर्वेषुशर्करा
यांचनित्यशः ॥ इतिपयोगुडयोगः ॥ निंबूफलरसंक्षिप्त्वागोपयःकामतःपिबेत् ॥ यो
निदोषजकृच्छ्रंहिमेहकृच्छ्रहरंपरं ॥ इतिनिंबूकदुग्धयोगः ॥ पंचपंचैववीजपद्भीः
सुतंद्वांभिरव्यापिकेल्लकः ॥ द्राक्षाभयःपर्युषिताह्रिरिषःसिंहीरसोमाक्षिकयुक्ते

३१०॥

चकृच्छ्रे ॥ इति योगत्रयं ॥ समूलगुच्छदंष्ट्राकषायाणि पीतः सिताक्षौद्रयुक्तं मूत्रकृच्छ्रोस्र
वातं ॥ जयेत्येव माषीत मात्रं विघट्टं समंतं दुलोदैः सितायुक्तं च पीतं ॥ इति योगद्वयं
पिचूर्णितं तंदुलतोयपीतं प्रवालमेवं मुनिभिः प्रदिष्टं ॥ एवं मूत्रकृच्छ्रहरमित्यर्थः
इति प्रवालभस्मयोगः ॥ यवतिलकिंशुककरंभामार्जक्षारोपि मूत्रयुक्तपीतः ॥ सस्रुत
मुत्थमनी द्रुतकोयं शर्कराश्मरीहारी ॥ इति यवादिक्षारयोगः ॥ एतादृशमेदकं शिला
जीतुगोक्षुरांतां मर्विचारियीजलव एलोत्तमकुंकुमानां चूर्णानि तंदुलजलेन सितानि पी
त्वां प्रत्यक्षमत्क रपिजीवेतिमूत्रकृच्छ्री ॥ इत्येलादिचूर्णं ॥ क्षारस्याभिधानतोस्थित मूत्र
कृच्छ्रे कार्या क्रिया मारुतकृच्छ्रतुल्या ॥ इति शल्यजमूत्रकृच्छ्रे ॥ सगंधकयवक्षारं स
सितं तक्रतः पिबेत ॥ मूत्रकृच्छ्राद्विमुच्येत साध्यासाध्यान्न संशयः ॥ इति गंधक

॥३११॥

योगः॥ कफकृच्छ्र विनाशाय सूक्ष्मां पिष्ट्वा त्रुटिं पिबेत्॥ ते हंसुक विबंधो त्ये शिलाजीतु
समाक्षिकं॥ इति योगद्वयं॥ रसभस्म च भागैकं चतुरंशुद्ध गंधकात्॥ पिष्ट्वा चरादिकाः
पूर्व्यरस पादेन टंकणां॥ क्षीरैः पिष्ट्वा च रुध्वा स्वं भांडे रुध्वा पुटे पचेत्॥ स्वांगशीतं वि
चूर्णपिप्पल घुतो केश्वरो रसः॥ चतुर्गुंजो घृते देयो मरिचै कोनविंशतौ॥ जातीमूलपले
कं तु अजाक्षीरेण पाचयेत्॥ शर्करा भावितं चानु पीतं कृच्छ्रहरं परं॥ इति लघुलोकेश्व
रो रसः॥ अथ पथ्यमाह॥ मुद्गशालियवजीर्णगोधूमा अपि शर्करा॥ पयश्चामल
कं सर्पिस्तंदुलीयं कटिल्लकं॥ पटोलं चेति पथ्यं स्यान्मूत्रकृच्छ्री विवर्जयेत्॥ इति मू
त्रकृच्छ्रचिकित्सा॥ अथ मूत्राघातनिदानं तत्र मूत्राघातस्य विप्रकृष्टं सन्निकृष्टं
निदानं संख्या चाह॥ प्रायो मूत्रविघाताद्यैरित्यत्रोयग्राद्धेनपुरीषशुक्रादिवेग ॥३११॥

विघातानां लक्षणाश्मनादीनां च गृहणं || मूत्रविघातायैः कुपितैर्दोषैरित्यन्वयः || ननु मू-
त्रकृच्छ्रमूत्राघातयोः को भेदः उच्यते || मूत्रकृच्छ्रे कृच्छ्रमधिकं विबंधोल्पः || मूत्राघा-
ते तु विबंधो बलवान् न कृच्छ्रमत्यंतमित्यनयोर्भेदः || १ तत्र वातकुंडलिकाया निदानं सं-
प्राप्तिं लक्षणं चाह || रौक्ष्याद्वेगविघाताद्वा वायुर्बस्तौ सवेदनः || मूत्रमाविश्य चरति
विगुणः कुंडलीकृतः || २ || मूत्रमल्पाल्पमथवा सरुजं संप्रवर्त्तते | वातकुंडलिकां तां तु
व्याधिं विद्यात्सुदारुणं || ३ || रौक्ष्यात् कायस्य वेगविघातात् मूत्रादिवेगनिरोधा-
त् || आविश्य आवृत्य || विगुणः दुष्टः कुंडलीकृतः वातावर्त्तवद्बस्तावेव भ्रमंस्तिष्ठ-
ति || ३ || अष्ठीलामाह || आध्मापयन् बस्तिगुदं रुध्वा वातश्चलोन्नतां कुर्यात्ती-
व्रार्त्तिमष्ठीलां मूत्रविण्मार्गरोधिनीं || ४ || वातः बस्तिं गुदं बस्तिगुदं च रुध्वा अष्ठीं-

॥३१२॥

तर्गतं मूत्रं मलं च निरुध्य वस्तिगुदमेवाध्मापयन् ॥ आध्मानं वृत्तं कुर्वन् अष्ठीलां अष्ठी
लातुल्यं ग्रंथिं कुर्यात् ॥ चलोन्नतां च सामुन्नतां च ४ ॥ अथ वातवस्तिमाह ॥ वेगं विधा
रयेद्यस्तु मूत्रस्याकुशलो नरः ॥ निरुणद्धि मुखं तस्य वस्तेर्वस्तिगतोऽनिलः ॥ ५ ॥ मूत्र
संगो भवेत्तेन वस्तिकुक्षिनिपीडितः ॥ वातवस्तिः स विज्ञेयो व्याधिः कृच्छ्रप्रसाध
नः ॥ ६ ॥ वस्तिकुक्षिनिपीडितो वायुरिति संबंधः ॥ वस्तिकुक्षिनिपीडकरत्वपि पाठां
तरं ॥ निपीडको रुजाकरः ॥ मूत्रसंगः मूत्रावरोधः ॥ ६ ॥ अथ मूत्रातीतमाह ॥ चिरं धा
रयतो मूत्रं त्वरया न प्रवर्त्तते ॥ मेहमानस्य मंदं वा मूत्रातीतः स उच्यते ॥ ७ ॥ त्वरया न
प्रवर्त्तते मूत्रमेव ॥ मेहमानस्य मूत्रमुत्सृजतः ॥ मंदं वा अल्पं वा ॥ ७ ॥ अथ मूत्रजठर
माह ॥ मूत्रस्य वेगेऽभिहते तदुदावर्त्तहेतुकः ॥ अपानः कुपितो वायुरुदरं पूरयेद्भृशं ॥

॥३१२॥

ऽनाभेरधस्तात्स्याध्मानं जनयेत्तीव्रवेदनं ॥ तं मूत्रजठरं विद्यादधोवस्तिनिरोधजं ॥ टी
तदुदावर्त्तहेतुकः मूत्रवेगधारणाजनितोदावर्त्तीतिमितः ॥ अधोवस्तिनिरोधनं वस्ते
रधोदेशे विवंधकारकं ॥ टी० ॥ अथ मूत्रोत्संगमाह ॥ वस्तौ वाप्यथवा नाले मणौ वा यस्य
देहिनः ॥ मूत्रं प्रवृत्तं सज्येत सरक्तं वा प्रवाहतः ॥ १० स्रवेच्छनैरल्पमल्पं सरुजं वाथ
नीरुजं विगुणानिलजो व्याधिः स मूत्रोत्संगसंज्ञितः ॥ ११ ॥ मणौ मेहनाग्रे वस्तौ सज्जे
त निरुद्धं स्यात ॥ सरक्तं या प्रवाहत इति कंठ हद्धलेन सशब्दं मूत्रपुरीषयोस्तानामधः प्रे
रणां प्रवाहसां तेन कुपितेन वायुना वस्त्यादिमेदात्स रक्तं मूत्रं स्रवेदित्यर्थः ॥ १०
॥ ११ ॥ अथ मूत्रक्षयमाह ॥ रूक्षस्य क्लांतदेहस्य वस्तिस्थौ पित्तमारुतौ मूत्रक्षयं सरु
ग्दाहं जनयेतां तदाह्वयं ॥ १२ क्लांतदेहस्य म्लानदेहस्य ॥ तदाह्वयं मूत्रक्षयसंज्ञं ॥ १२

॥ ३१३ ॥

अथ मूत्रग्रंथिमाह ॥ अंतर्वस्तिमुखे वृत्तः स्थिरोल्पः सहसा भवेत् ॥ अश्मरीतुल्यरुग्ग्रंथि
मूत्रग्रंथिः स उच्यते ॥ १३ ॥ अंतर्वस्तिमुखे वस्तिमुखस्याभ्यंतरे ॥ अल्पः क्षुद्रामलकप्रमा
णः ॥ नन्वस्याश्मर्याः सह को भेदः उच्यते ॥ अश्मरी क्रमशः संचयेन स्यात् अयं तु सह
सा भवेदिति भेदः ॥ अपरोपि भेदः ॥ अश्मर्यां पित्तादिकं संहन्यते अत्र तु रक्तमेव ॥ यत
उक्तं तंत्रांतरे ॥ रक्तं वातकफादुष्टं वस्तिद्वारे सुदारुणं ॥ ग्रंथिं कुर्यात्स कृच्छ्रेण सृजन्मूत्रं
तदावृतमिति ॥ १३ ॥ अथ मूत्रशुक्रमाह ॥ मूत्रितस्य स्त्रियं यातो वायुनाशुक्रमुद्धृतं ॥
स्थानाच्च्युतं मूत्रयतः प्राक् पश्चाद्वा प्रवर्तते ॥ भस्मोदकप्रतीकाशं मूत्रशुक्रं तदुच्य
ते ॥ १४ ॥ मूत्रितस्य मूत्रवेगितस्य ॥ स्थानाच्च्युतं मूत्रं शुक्रं ॥ भस्मोदकप्रतीकाशं भस्म
सहितमलसदृशं ॥ १४ ॥ अथोष्णवातमाह ॥ व्यायामाध्वातपैः पित्तं वस्तिं प्राप्यानि ॥ ३१३ ॥

त्वायतं ॥ यस्मिन्मेढ्रं गुदं चैव प्रदहेन्मारुपेदधः ॥ १५ मूत्रं हारिद्रमथवा सरक्तं रक्तमेव वा
कृच्छ्रात्पुनः पुनर्जंतो ह्युष्णवातं वदंति तं ॥ १६ ॥ सरक्तं स्वेषितो हितं ॥ १५॥१६ अथ मूत्रसा
दमाह ॥ पित्तं कफो द्वावपि वा संहन्येते निलेन चेत ॥ कृच्छ्रान्मूत्रं तदा पीतं रक्तं श्वेतं घनं
सृजेत ॥ १७ ॥ सदाहं रोचनाशंखचूर्णवर्णं भवेत्ततः ॥ शुष्कं समस्तवर्णं वा मूत्रसाद
वदंति तं ॥ १४ संहन्येते घनीक्रियेते शुष्कं मत्स्यं ॥ समस्तवर्णं उक्तसकलवर्णं ॥ सान्नि
पातत्क्षरणात्वात ॥ ५॥१४ अथ विविघातमाह ॥ रूक्षदुर्बलयोर्वातेनोदावर्त्तं शकृ
द्यदा मूत्रस्रोतोनुपद्येत विरुद्धं सरुषं तदा नरः ॥ विड्विघं मूत्रयेत्कृच्छ्राद्विड्विघातं तमा
दिशेत ॥ १८ उदावर्त्तं ऊर्ध्वं नीतं ॥ अनुपद्येत प्राप्नुयात ॥ विड्विघमित्यत्र यथा शब्दो यो
जनीयः ॥ विड्विघं येत्यर्थः ॥ १८ ॥ अथ वस्तिकुंडलमाह ॥ द्रुताध्वलंघनायासैरभिघा

नात्प्रपीडनात् ॥ त्वस्यानाद्बस्तिरुद्वृतः स्थूलस्तिष्ठति गर्भवत् ॥ २० ॥ शूलस्पंदनदाहार्त्तो बिं-
दुं बिंदुं स्रवत्यपि ॥ पीडितस्तु सृजेद्धारां संस्तंभोद्वेष्टनार्तिमान् ॥ २१ ॥ बस्तिकुंडलमाहुस्तं
घोरं शस्त्रविषोपमं ॥ पवनप्रबलं प्रायो दुर्निवारमबुद्धिभिः ॥ २२ ॥ तस्मिन् पित्तान्वि-
ते दाहः शूलं मूत्रविवर्णता ॥ श्लेष्मणा गौरवं शोफो मूत्रं स्निग्धं घनं सितं ॥ २३ ॥ द्रुता-
ध्वतं घनं शीघ्रं मार्गचलनं ॥ उद्वृत्तः उत्थितः ॥ गर्भवत् गर्भिण्या उदरांतर्गता यथा
वत् ॥ स्पंदनं किंचिच्चलनं ॥ पीडितः नाभेरधः ॥ उद्वेष्टनं रूपायाऽऽर्त्तिः ॥ उद्वेष्टनार्त्तिः
घोरं मारकं ॥ शस्त्रविषोपमं शस्त्रं खड्गादि तद्वच्छीघ्रं मारकं ॥ विषमप्यगरं तद्वच्चिरे-
ण मारकं ॥ एतावता मारकमप्यथ शीघ्रं विलंबेन वा ॥ तस्यैव दोषांतरानुबंधितस्व-
रूपमाह ॥ तस्मिन्नित्यादि ॥ श्लेष्मणा अन्विते तस्मिन्निति योज्यं ॥ २० ॥ २१ ॥ २२ ॥ २३ ॥

२३४

अथ तस्यैवासाध्यसाध्यस्य लक्षणमाह ॥ श्लेष्मरुद्धविलो वस्तिः पित्तोदीर्णो न सि
द्ध्यति ॥ अविभ्रांतविलः साध्यो न च यः कुंडलीकृतः ॥ स्याद्वस्तौ कुंडलीभूते तृण्मोहः
श्वासएव च ॥ २४ ॥ विलं वस्तिमुखं रुंध्यं ॥ पित्तोदीर्णः पित्तेनोद्भूतः ॥ उपचितपि
त्त इति मधुकोशकृत ॥ अविभ्रांतविलः कफेनानावृतविलः पश्चात्कुंडलीकृतः स
साध्यः ॥ एतेन कुंडलीभूतोऽसाध्यः ॥ कुंडलीभूतस्य लक्षणमाह ॥ तद्वित्यादि ॥ कुंड
लीभूतस्यायमर्थः ॥ कफेन विलावरोधात्तत्र यातः कुंडलाकारेण तिष्ठतीत्यर्थः
२५ ॥ इति मूत्राघातनिदानं ॥ अथ मूत्राघातचिकित्सा ॥ मूत्राघातकरं दोषं मूत्र
कृच्छ्रहरैर्जयेत ॥ वस्तिमुत्तरवस्तिं च दद्यात ॥ स्निग्धं विरेचनं ॥ नतकाशकुशोक्षु
त्रिफलाक्कथितं पीतः सुशीतलं ससितं ॥ पिवेत्तः प्रयाति नियतं मूत्रग्रहः स्फया

॥३१५॥

चक्रविः ॥ कविः श्रुक्रः ॥ नताद्विरुद्धतं ॥ कर्पूररजसा युक्ता वस्त्रवर्त्तिः शनैः शनैः ॥ मेढ्रमार्गां
तरे न्यस्ता मूत्राघातं व्यपोहति ॥ इति कर्पूरवर्त्तिः ॥ घृतशीतपयोन्नाशी चंदनं तंदुलां
बुना ॥ पिबेत्सशर्करं स्यचेत मुत्सवा तेस्य शोणिते ॥ इति चंदनयोगः ॥ स्वगुप्ताफलमृद्धी
काकुस्मांक्षुरसितारजः ॥ समांशमद्भुमागानि क्षीरक्षौद्रघृतानि च ॥ सर्वे सम्यग्विम
थ्याक्षमानं लिट्टुपयः पिबेत् ॥ हंति शुक्राशयोत्थांश्च दोषान्वंध्या सुतप्रदं ॥ इति
स्वगुप्तादियोगः ॥ पिष्ट्वा सुवर्चलैः कोष्णेन कांजिकेन प्रलेपयेत् ॥ रुद्धं मूत्रं निहंत्याशु
रंभाकंदस्तथैव च ॥ इति योगद्वयं ॥ पीतो गोकंटकक्वाथः सशिलाजीतुकौ शिकः
मूत्राघातान्मूत्रशुक्रान्मूत्रोत्संगाच्च मुच्यते ॥ इति गोकंटकश्रृतं ॥ धान्यगोक्षुर
कक्वाथकल्कसिद्धं हितं घृतं ॥ मूत्राघाते मूत्रकृच्छ्रे शुक्रदोषे च दारुणे ॥ इति

॥३१५॥

घृतं ॥ त्रिफलाकल्कसंयुक्तं तरुणं चापि यः पिबेत् ॥ निदिग्धिकायाश्च रसं पिबेद्घृ
तं कुलांबुना ॥ इति योगद्वयं ॥ निष्पेषितं जलेकल्कं सद्वौद्वंकुंकुमं स्वच ॥ पीत्वा विना
शयेत्सर्वां मूत्राघातान्नसंशयः ॥ इतिकेसरकल्कः ॥ स्त्रीराममत्तिमसंगो न ह्यधिरं
यस्तु मूत्रयेत् ॥ मैथुनोपरमस्तस्य वृंहणीयो विधिर्हितः ॥ चित्रकं सारिवे द्वेच बला
द्राक्षा च पिप्पली विशाला त्रिफला पथ्या मधु धात्रीफलानि च ॥ अक्षमात्रैः पचेद्दि
तैः कल्कैः राज्याढकं भिषक् ॥ दुग्धद्रोणेजलद्रोणे सिद्धं तदवतारयेत् ॥ शीते परिस्रु
ते तस्मिन्सिताप्रस्थसमन्विते ॥ तवक्षीर्यप्यथ तत्सर्वं मतिमान्परिमिश्रयेत्
यथाबलं यथादोषं तच्च नित्यं पिबेन्नरः ॥ वातशुक्रः पित्तशुक्रः कफशुक्रो भवे
च्च यः ॥ गंधिशुक्रो त्रशुक्रश्च पीत्वैस्तु रवमान्प्रयात् ॥ घृतमायुःकरं वृष्यं प्र

३१६

जोत्पत्तिकरं नृणां ॥ स्त्रीणां गर्भप्रदं योनिदोषासृग्दोषनाशनं ॥ मूत्रदोषेषु सर्वेषु स
र्वेषां मेव शस्यते ॥ इति चित्रकाद्यं घृतं ॥ अथ पथ्यमाह ॥ पुराणाः शालयस्तक्रं मा
षयूषः पयो दधि ॥ उराणा कूष्मांडफलं पटोलं समहाद्रकं ॥ कोमलं नारिकेलस्य फ
लं खर्जूरकं तथा ॥ मद्यं चैतद्धितं मूत्राघातिनां परमं स्मृतं ॥ अथापथ्यमाह ॥ रूक्षं वि
दाहि विष्टंभि व्यायामं वेगधारणं ॥ करीरं वमनं चापि मूत्राघाती परित्यजेत् ॥
इति मूत्राघातचिकित्सा ॥ अथाश्मरीनिदानं ॥ तत्राश्मर्याः सन्निकृष्टं निदानं सं
ख्यां चाह ॥ वातपित्तकफैस्तिस्रश्चतुर्थी शुक्रजा मता ॥ प्रायः श्लेष्माश्रयाः सर्वा अ
श्मर्यः स्युर्यमोपमाः ॥ १ ॥ श्लेष्माश्रयाः श्लेष्म समवायिकारणाः शुक्रजो विना
शुक्रजायास्तु शुक्रस्यैव समवायिकारणत्वात् ॥ अन्ये तु शुक्राश्मर्यामपि कफ ३१६ ॥

कारणमिच्छंति ॥ प्रायशब्दोत्र विशेषार्थः ॥ यमोपमाय मयन्मारकाः चिकित्सां

विना १ ॥ अथ संप्राप्तिमाह ॥ विशोषयेद्वस्तिगतं सशुक्रं मूत्रं सपित्तं पवनः क

फं वा ॥ यदा तदाश्मर्युपजायते तु क्रमेण पित्तेष्विव रोचना गौः ॥ २ ॥ पवनो बस्तिग

तं सशुक्रं मूत्रं सपित्तं कफं वा विशोषयेत् शोषमुपनयेत् गदा ॥ तदाश्मर्युपजाय

ते भवति ॥ क्रमेण क्रमशो वर्द्धमाना ॥ यथा गोः पित्तेष्विव रोचनेत्यन्वयः २ अथ पू

र्वरूपमाह ॥ नैकदोषाश्रयाः सर्वा अश्मर्यः सां पूर्वलक्षणं ॥ बस्त्याध्मानं तदासन्नदे

शेषु परितोतिरुक् ॥ मूत्रे च बस्तगंधत्वं मूत्रकृच्छ्रं ज्वरोरुचिः ३ रुक् शूलं ॥ बस्तः

छागलकः ॥ ३ अथ सामान्यं लक्षणमाह सामान्यलिंगं रुक् नाभिसेवनीबस्ति

मूर्द्धसु ॥ विशीर्णधारं मूत्रं स्यात्तया मार्गनिरोधनं ॥ ४ ॥ तत व्यायामतस्तु स्वंमे

॥३२॥

हेदच्छं गोमेदकोपमं । तत्संक्षोभात्स ते सा सन्नमायासाच्छ्वा तिरुग्भवेत् ॥५॥ यस्मिन्मूत्रीना मेरध्योदेशः । विशीर्णधारं सविच्छेदधारं । तयाऽश्मर्यपी । मार्गः मूत्रवाहिस्रोतः । तत्पथ्याघातात् कदाचिद्वायुनाऽश्मर्यामूत्रमार्गादन्यत्रगमनात् सुखं मेहेत् मूत्रयेत् । गोमेदकोपमं गोमेदकोमणिः किंचिद्धोहितसद्दृशी । तत्संक्षोभात् ते स्याऽश्मर्यकः संक्षोभात् । संचारणसंघर्षणेन मूत्रवहे स्रोतसि क्षते जाते सा सं सरक्तं मेहेत् अयासात् प्रवाहणादिजनितात् ॥४॥५॥ अथ वातोल्वणमाह । तत्र वाताद्दुःखार्त्तो दंतान् खादति वेपते । मृद्गाति मेहनं नाभिं पीडयत्यपि संकेरणनु ॥६ सानिलं मुंचति शकृन्मुहुर्मेहति विंदुशः ॥ श्यावा रूक्षाश्मरी चास्य स्याच्चिता कंटकैरिव ॥७॥ संक्करणेन आर्त्तनादं कुर्वन् ॥ नाभिं नाभिदेशं पीडयति ॥ श

॥३२॥

कत्सुदीर्घं ॥ सानिलं सशब्दं मुंचति ॥ मुहुर्वारंवारंविंदुशः विंदुंविंदुं मेहति मूत्रयति
श्यावा किंचित्श्यामा ॥ अरुणा किंचिद्रक्ता ॥ एतच्चाश्मर्याः कथनेनाश्मकानां
प्रत्यक्षसंवादेन ॥ शास्त्रप्रमाणप्रत्यायनार्थमित्याहुः ॥ चिताकंटकैरिव वदरी
वीजवत्क्षुद्रांकुरैर्वेष्ठिता ॥ ६ ॥ ७ ॥ अथ पित्तोल्वणमाह ॥ पित्तेन दह्यते वस्तिः
पच्यमान इवोष्मवान् ॥ भल्लातकास्थिसंस्थाना रक्तापीताऽसिताश्मरी ॥ ८ ॥
दह्यते साक्षाद्गिनेव ॥ वस्तिर्मूत्राशयः ॥ पच्यमान इव क्षारेणेव ॥ उष्मस्यार्थः
८ अथ कफोल्वणमाह ॥ वस्तिर्निस्तुद्यत इव श्लेष्मणा शीततो गुरुः ॥ अश्मरी
महती श्लक्ष्णा मधुवर्णाथवा सिता ॥ ९ ॥ महती कुक्कुटांडतुल्या ॥ मधुवर्णा ईषत्पिं
गम्भुक्ता ॥ १० ॥ एता भवंति बालानां तेषामेव हि भूयसा ॥ आश्रयोपचयाल्पत्वाद्ग्र

॥३१८॥

हरणाहरणोत्सुखाः ॥१०॥ एता दोषत्रयजनिताः बालानां भूयसा प्रायेणास्फः ॥ यतः
सर्वेणावाश्मर्य्यो विशेषतः श्लेष्मसमवायिकारणाः ॥ बालास्तु विशेषतस्तन्नि।
दानसेविनो भवंति ॥ यतउक्तं चरके ॥ प्रायेणैताश्मर्य्यो दिवास्वप्नसमसनाध्य
शनस्निग्धशीतलगुरुमधुराहारप्रियत्वाद्विशेषेण बालानां भवंतीति ॥ भूयः य
दोषादानात् महतामपि त्रिदोषजनिता भवंति ॥ तेषामेव बालानामेव गृहरणाहर
णोत्सुखाः ॥ गृहणं निष्कासनार्थमंगुलिभ्यां ॥ आहरणं पाटनादिपूर्वकं निष्कास
नं तत्र सुखाः सुखेदाः ॥ तत्र हेतुमाह ॥ आशयोपचयाल्पत्वात् आशयो वस्तिस्तस्यो
पचयः स्थौल्यं तस्याल्पत्वात् ॥१०॥ अथ पक्वकाश्मर्य्याः संप्राप्तिमाह ॥ स्थानाच्युत
तममुक्तं हि मुष्कयोरंतरे निरोधः ॥ स्रोतः स्वपत्यपसंहत्यप्रकांत शुक्रमश्मरी ॥११॥ अ ॥३१८॥

नितः मैथुनवेगेन स्थानाच्च्युतं मैथुनवेगनिवारणेनामुक्तं धृतं शुक्रं मुष्कयोः मे
ढ्रसहितयोः ॥ मेढ्रवृषणयोरंतर इति सुश्रुतवचनात् । तेन मेढ्रवृषणमध्यगतेव
स्तिमुखे उपसंहृत्य एकीकृत्य शोषयति ॥ तच्छुक्रमश्मरी तस्यां भूतं शुक्रमेवाश्मरी
इयं महतामेव भवति न बालानां ॥ तदुक्तं तंत्रांतरे शुक्राश्मरी तु महतां जायते शुक्र
धारणादिति ॥ ११ ॥ अथ तस्या लक्षणमाह बस्तिरुग्मूत्रकृच्छ्रत्वमुष्कश्वयथुकारिणी
तस्यामुत्पन्नमात्रायां शुक्रमेति विलीयते ॥ पीडिते त्ववकाशेऽस्मिन्नश्मर्येव हि शर्क
रा ॥ १२ ॥ तस्यां शुक्राश्मर्यां शुक्रमेति मूत्रमार्गात् प्रवर्त्तते । पीडिते त्ववकाशेऽस्मिन्नु
तु शब्दो व्यवधारणे तेनास्मिन्नेवावकाशे स्थाने मेढ्रवृषणयोरंतरे पीडिते सति सा
विलीयते ॥ अंतर्लीना भवति ॥ अवस्थाभेदादश्मरी शर्करा सिकता च भवतीत्या

॥३१८॥

ह ॥ अश्मर्य्येव च शर्करा इति ॥ चकारात्सिकता च भवति ॥ शर्करासिकतयोरभेदो महत्वा
ल्पत्वाभ्यां च स्तेयः ॥ १२ कथमश्मरी शर्करा भवतीत्याशंकायामाह ॥ सा भिन्नमूर्त्तिर्वाते
न शर्करेत्यभिधीयते ॥ १३ सा अश्मरी ॥ १२ अथ शर्करायाः पातमवरोधं च सहेतुक
माह ॥ अणुशो वायुना भिन्ना सा तस्मिन्ननुलोमगे ॥ निरेति सह मूत्रेण प्रतिलोमे वि
वध्यते ॥ मूत्रस्रोतःप्रवृत्ता सा सक्ता कुर्यादुपद्रवान् ॥ १४ ॥ सा अश्मरी तस्मिन्वायौ
अनुलोमगे मूत्रस्रोतस्सु सम्यक्प्रवृत्ते मूत्रेण सह निरेति पतति ॥ प्रतिलोमे ऊर्ध्वप्र
वृत्ते वायौ विवध्यते ॥ तदा सा शर्करा मूत्रस्रोतः सक्ता लग्ना सती उपद्रवान् ॥ १४ अथ ता
नेवोपद्रवानाह ॥ दौर्बल्यं सदनं कार्श्यं कुक्षिशूलमथारुचिं ॥ पांडुत्वमुष्णवातं च त
ष्णां हृत्पीडनं वमिं ॥ १५ ॥ उष्णवातं मूत्रघातविशेषं ॥ १५ अथाश्मरीशर्करासिकता

॥३१८॥

नामरिष्यमाह ॥ अश्मनाभिव्ररवर्णं च हृमूत्रं रजान्वितं ॥ अश्मरीक्षयपवत्स्याश्च शर्करा
सिकतान्विता ॥१६॥ शर्करा सिकतेति नामद्वयमन्वर्थं ॥१६॥ इत्यश्मरी शर्करा सिकतानि
दानं ॥ अथाश्मरी चिकित्सा । अश्मरी दारुणो व्याधिरंतकप्रतिमो मतः ॥ औषधैस्त
रुणः साध्यः प्रवृद्धो भेदमर्हति ॥ वरुणस्य त्वचां श्रेष्ठां शुंठी गोक्षुरसंयुतां ॥ काथयि
त्वा पिबेत्तस्य यवक्षारगुडान्वितं ॥ पीतं वाताश्मरीं हंति चिरकालानुबंधिनीं ॥ इति व
रुणादिकाथः ॥ शुंठ्यग्निमंथपाषाणभिद्वरुणगोक्षुरैः ॥ अभयारग्वधयुतैः
काथं कृत्वा विचक्षणः ॥ रामठक्षारलवणचूर्णं दत्वा पिबेन्नरः ॥ अश्मरीं मूत्र
कृच्छ्रं च नाशयत्याशु निश्चितं ॥ काथः शुंठ्यादिनामायं दीपनः पाचनः परं ॥ हंति
कोष्ठाश्रितं कष्टं रक्तमेदजं ॥ इति शुंठ्यादिकाथः ॥ एलोपकुल्या मधुकाश्मभे

॥२२०॥

रकौ ताभ्यां दंष्ट्रावृषभोरुबूकैः ॥ शृतं पिबेदश्मजतुप्रगाढं सशर्करं साश्मरिमूत्रकृच्छ्रे ॥
इत्यश्मरीरोगे एलादिक्काथः ॥ यवक्षारगुडोन्मिश्रं पिबेत्पुष्पफलोद्भवं ॥ रसं मूत्रविबं
धघ्नं शर्करार्श्मरिनाशनं ॥ इति कूष्मांडस्वरसपानं ॥ त्रिकंटकस्य बीजानां चूर्णं माक्षिक
संयुतं ॥ अविक्षीरेण सप्ताहं अश्मरीनाशनं पिबेत् ॥ इति त्रिकंटकचूर्णं ॥ वरुणत्वक्क
षायस्तु पीतो गुडसमन्वितं ॥ अश्मरीं पातयत्याशु वस्तिशूलं च नाशयेत् ॥ इति वरुण
त्वक्काथः ॥ मंजिष्ठा त्रपुसीबीजं जीरकः शतपुष्पिका ॥ धात्रीफलं च दरकं गोक्षुरं
च मतः स्थिता ॥ एतेषां समभागानां चूर्णं टंकमितं नरः ॥ भक्षयेन्मधुना सार्द्धं पतेत्त
स्याश्मरी ध्रुवं ॥ इति मंजिष्ठादिचूर्णं ॥ पलद्वयमिते कोष्णे कुलत्थस्य स्य शृते तु यः ॥ तव
लां शर्करायुं खवस्य साद्धुं मासं बद्धयोन्मितं ॥ हिंगु यापि बेत्यतेतस्य मूत्रेण समम अश्मरी ॥२२०॥

शर्करासिकतायापिदृष्टमेतदनेकधा ॥ इतिशरपुंखक्षारपानं ॥ कर्कोटीमूलिकापीताद्
श्माहंपयसासह ॥ भिनत्तिशर्करांक्षिप्रंप्रोपयत्येवकृच्छ्रतः ॥ इतिकर्कोटीमूलपानं ते
क्षारोनिपीतस्तिलनालजातःसमाक्षिकःक्षीरयुतस्त्रिरात्रात ॥ हंत्यश्मरींसौर्युविमि
श्रितंयानिपीयमानंहृच्चकंप्रयत्नात ॥ इतियोगद्वयं ॥ गोपालकर्कटीमूलंपिष्टंपर्यु
षितांभसा ॥ पीयमानंत्रिरात्रेणपातयेच्चाश्मरींहठात ॥ गोपालकर्कटीयालमखीरा
इतिलोके ॥ इतिगोपालकर्कटीयोगः ॥ घृतंश्वदंष्ट्रास्वरसेनसिद्धंक्षीरेणचैवाष्टगुणे
नपेयं ॥ इतिगोक्षुरघृतं ॥ क्वाथःश्वदंष्ट्राविगुमूलोत्थःकटुतैलाश्मरीनाशनः ॥ इतिश्वदंष्ट्रा
गुमूलक्वाथः ॥ गोक्षुरस्यचबीजानांधातुमाक्षिकसंयुतं ॥ महिषीपयसाचूर्णंपाना
च्चाश्मरीपातनं ॥ इतिधातुमाक्षिकयोगः ॥ मनतामूत्रजाक्षीरेपाच्यंतुस्येगतेद्रवे ॥

॥३२१॥

ततामंत्रं शुद्धसूतं त्वभ्रगंधकं च समं त्रयं ॥ निर्गुंडीस्वरसैर्मर्द्यं दिनं तद्गोलमुद्धरेत् ॥ यामैकं वा
लुकायंत्रे पाच्यं योज्यं द्विगुंजकं ॥ बीजपूरकमूलोत्थसलिलं चानुपाययेत् ॥ सितोपेतं ज
येत्सर्वमूत्रकृच्छ्राश्मरीं रुजं ॥ मासैकं सेवितो हन्यादश्मरीं नात्र संशयः ॥ रसस्त्रिविक्रमो
नाम सर्वमूत्रामयापहः ॥ इति त्रिविक्रमो रसः ॥ अथ पथ्यमाह ॥ पुराणयवकुल्माषगोधूमशा
लयः क्षीरसर्पिषी तंदुली सैंधवं चेति पथ्यमश्मरिभेदने ॥ अथापथ्यमाह ॥ उष्ट्रादिया
नं विषमाशनं तीक्ष्णाग्निसेवनं ॥ शोकव्यायाममद्यानि त्यजेदश्मरिमान्नरः ॥ इत्यश्म
रीचिकित्सा ॥ अथ प्रमेहनिदानं ॥ तत्र प्रमेहस्य विप्रकृष्टं निदानमाह ॥ आस्यासुखं स्व
प्नसुखं दधीनि ग्राम्यौदकानूपरसाः पयांसि ॥ नवान्नपानं गुडवैकृतं च प्रमेहहेतुः
कफकृच्च सर्वं ॥ ३ ॥ आस्यासुखं आसनं आस्या उपविष्टस्यासुखं अव्यायामे ॥ ३२१ ॥

इति पाययेत् ॥ सप्तमसुखं दधिज्ञाः सप्तमसरखं दधीनीति चक्रुत्वं दध्नोऽष्टविधत्वात् ॥ ग्राम्यौदका
नूपरसाः ग्राम्याः छागमेषमेदःपुच्छप्रभृतयः औदकानूपाः मत्स्यकूर्मादयस्तेषां रसाः
रस्यंत इति रसा अत्र मांसानि ॥ पयांसीति चक्रुत्वं दधियेत् ॥ नवान्नपानेन च मन्ले पीयत
इति पानं पानीयं तन्न नवं ॥ गुडवैकृतं गुडविकाराः शर्करादयोऽन्यान्यपि गुडकृतानि भ
क्ष्याणि ॥ अत्र कसंग्रहार्थमाह कफकृच्च सर्वमिति ॥ तदा दध्यादीनां पृथक् निर्देशो
विशेषार्थः ॥ १ ॥ अथ श्लैष्मिकपैत्तिकवातिकानां मेहानां क्रमात् संप्राप्तिमाह ॥ मेदश्च
मांसं च शरीरजं च क्लेदं कफो बस्तिगतं प्रदूष्य ॥ करोति मेहान् समुदीरितानुष्णैस्तानेव
पित्तं परिदूष्य चापि ॥ क्षीणेषु दोषेष्ववकृष्य धातून् संदूष्य मेहान् कुरुतेनिलश्च ॥
२ ॥ अत्र कफजा दशमेहा भूयस्त्वेन साध्यत्वेन चादावुच्यंते ॥ शरीरजं क्लेदमंबुवस्ति

॥३२२॥

गतं बस्तिमाप्तं ॥ कफः प्रदुष्य श्लैष्मिकान् प्रमेहान् करोति ॥ उष्णैरुष्णसवीर्यस्पर्शद्रव्यैः समु
दीर्णं उद्धूतं पित्तं च तानेव मेदोमांसशरीरजक्लेदानेव बस्तिगतान् प्रदुष्य पैत्तिकान् प्रमेहा
न् करोति ॥ वायुः स्वमानापेक्षया क्षीणेषु दोषेषु कफपित्तेषु धातून् आकृष्य मज्जौजोवी
र्य्यं हृत्वा न् आकृष्य बस्तिमुखं नीत्वा वातजान् प्रमेहान् करोति ॥ दोषेष्वतिबहुत्वं तयो
र्मेदसा बहुत्वात् ॥ रसलसीकासृग्वसामज्जौजः शुक्राण्यपि सर्वेष्वेव प्रमेहेषु दुष्याणि
अत एवोष्मानाः प्राह ॥ कफः सपित्तः पवनश्च दोषा मेदोऽस्रशुक्राम्बुवसालसीकाः ॥ मज्जा
रसौजः पिशितं च दूष्याः प्रमेहिणां विंशतिरेव मेहा इति ॥ मांसं रुधिरं आम्बु शरीरजः
क्लेदः वसा मांसस्नेहः ॥ लसीका उदकविशेषः उक्तं च चरकेण ॥ सामगंधिपत्वगातमु
दकं तत्र लसीकाशब्दं तमत इति ॥ ओजस्तु आत्मांजलिमितं श्लेष्मरूपं ॥ उक्तं च श्लेष्मा

३२२॥

रूपस्यौजसोऽर्द्धांजलिः परिमाणमिति॥ नन्वष्टविंशत्यात्मकं॥ तस्य मूत्रेण मरणमभिधाना
त्॥ सर्वमेहानामपथ्या विशेषेण मधुमेहेन संख्याधिक्यसंकानिरासार्थमाह॥ विं
शतिरेव मेहा इति॥ २॥ अथ सर्वेषां प्रमेहेषु मूत्रमपरं दूष्यमित्याह॥ दोषो हि वस्तिं
समुपेत्य मूत्रं संदूष्य मेहान् कुरुते यथास्वं॥ ३॥ दोषः कफः पित्तं वायुश्च यथास्वं यथा
त्मीयत लक्षणं स्वकीयं दूष्यं दूषयित्वा पश्चान्मूत्रं दूष्य मेहान् कुरुते॥ तथा च प्रमेहे दू
ष्यसंग्रहः॥ मेदो मांसं तनुक्लेदो वसा मज्जा लसीका॥ ओजो रसो सरक्तं शुक्रं च मूत्रं
मेहे षड्दूष्यतीति॥ ३॥ अथ क्रमेण कफपित्तवातजानां मेहानां साध्यत्वादिकमाह॥ साध्याः
कफोत्था दश पित्तजाः षड्याप्यास्त्वसाध्याः पवनाच्चतुष्काः॥ समक्रियत्वाद्विषमक्रिय
त्वान्महात्ययत्वाद्यथाक्रमं ते॥ ४॥ अस्यायमर्थः॥ कफोत्था दश साध्याः समक्रियत्वात्

॥२२३॥

अत्रायमभिप्रायः ॥ अत्र व्याधिस्वभावात्तु स्वदुष्यतासाध्यतायां हेतुः ॥ यत उक्तं ॥ ज्वरे तुल्य
र्तु दोषबलं प्रमेहे तु स्वदूष्यता ॥ रक्तगुल्मे पुराणत्वं सुखसाध्यस्य लक्षणमिति ॥ पित्तजाः
षड्याप्याः ॥ विषमक्रियत्वात् ॥ पित्तस्य दोषस्य दूष्याणां मेदःप्रभृतीनां विषमोपक्र
मत्वात् । यत् पित्तहरं शीतं मधुरादि तन्मेदःप्रभृतिकरं । यन्मेदःप्रभृतिहरं कटुकादि तत्
पित्तकरमिति चिकित्सायां वैषम्यं ॥ पवनात्मकास्तु चत्वारः असाध्याः ॥ महात्ययत्वात् महतां
मज्जादिगंभीरधातूनां अत्ययो नां शोषेण प्रमहात्ययः स्तद्भावात् ॥ मज्जादिधातुत्वे च क
र्षकत्वेन वहुव्याप्तिकरत्वादिति मधुकोशकृत ॥ आशुकारित्वादिति श्रीकण्ठः ॥ ६ ॥ अ
थ पूर्वरूपमाह ॥ दंतादीनां मलाढ्यत्वं प्राग्रूपं पाणिपादयोः ॥ दाहश्चिक्कणता देहे तृट्
स्वाद्वास्यं च जायते ॥ ७ ॥ दंतादीनामित्यत्रादिशब्देन तात्वादीनां ग्रहणं ॥ यदुक्तं सु ॥ २२३ ॥

ष्णुते॥ तालुगलजिह्वादंतेषुमलोपलिप्तिरिति॥ अत्रमलमुपलत्वं मेदोदोषात्॥ हस्तपाद
योर्दाहः संतापः॥ देहे चिक्कणता॥ मेदःकफदुष्टेः॥ स्वाद्वास्यं मधुरास्यता॥ चकारात्सु
ष्णुतोक्तं केशकुटिलीभावनखवृद्धी बोद्धव्ये॥ एतच्च व्याधिविशेषनियतं अन्यथान्यत्र
कफमेदोदुष्टेरेवं कर्तुं न क्षमा॥ ५॥ अथ सामान्यलक्षणमाह॥ सामान्यं लक्षणं तेषां प्र
भूताविलमूत्रता॥ ५॥ प्रभूतत्वं द्रव्यद्रवधातुसंबंधात्॥ आविलत्वं दोषदूष्यसंसस
र्गात्॥ ५॥ ननु दोषास्त्रयो दूष्याश्चैकादश तत्कथं विंशतिर्मेहा इति व्यवस्थापयतः कार
णभेदात्कार्यभेदः॥ इत्याशंक्यापामाह॥ दोषदूष्याविशेषेपि तत्संयोगविशेषतः॥
मूत्रवर्णादिभेदेन भेदो मेहेषु कल्प्यते॥ ६॥ तत्संयोगविशेषतः तेषां दोषदूष्याणामुत्क
पकर्षविकृतात्संयोगभेदात्॥ एतदुक्तोप्याह॥ यथा पंचानां वर्णानामुत्कर्षापकर्षविकृते

॥ ३२४ ॥

न संयोगविशेषेणैकपित्तादिना नानावर्णोत्पत्तिरेवं दोषदूष्यसंयोगभेदान्मेहे बहुना नानात्व
मिति ॥ पंचानां वर्णानां श्वेतपीतलोहितहरितकृष्णानां ॥ ६ ॥ अथ कफजानां दशानां ल
क्षणं ॥ तत्रोदकमेहस्य लक्षणमाह ॥ अच्छं बहु सितं शीतं निर्गंधमुदकोपमं ॥ मेहत्युद
कमेहेन किंचिदाविलपिच्छलं ॥ ७ ॥ अच्छं प्रमेहांतरापेक्षया ॥ नत्वच्छमेव ॥ प्रभूतावि
लमूत्रतेति सामान्यलक्षणात् ॥ अतः पुनर्विशेषणमाह ॥ किंचिदाविलपिच्छलमि
ति मेहति मूत्रयते ॥ ७ ॥ अथेक्षुमेहसांद्रमेहावाह ॥ इक्षो रसमिवात्यर्थं मधुरं चेक्षुमे
हतः ॥ सांद्रीभवेत्पर्युषितं सांद्रमेहेन मूत्रितं ॥ ५ ॥ अथ सुरामेहपिष्टमेहावाह ॥ सुरा
मेही सुरातुल्यमुपर्यच्छमधो घनं ॥ संहृष्टरोमा पिष्टेन पिष्टवद्बहुलं सितं ॥ ९ ॥ सुरा
तुल्यं मेहतीति शेषः ॥ पिष्टेन पिष्टमेहेन ॥ पिष्टवत् पिष्टतंडुलवत् ॥ बहलं गाढं मे ॥ ३२४ ॥

हतीतिशेषः ॥९॥ अथ शुक्रमेहसिकतामेहावाह शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्र

मेहति ॥ मूत्रेण सिकतामेही सिकतारूपिणो मलान् ॥१०॥ शुक्राभं शुक्रवन्मूत्रं ॥

मलान् मेदः प्रभृतीन् ॥ मेहतीतिशेषः ॥१०॥ अथ शीतमेहशनैर्मेहावाह ॥ शीतमेही

सुबहुशो मधुरं भृशशीतलं ॥ शनैः शनैः शनैर्मेही मंदं मंदं प्रमेहति ॥११॥ भृशशीत

लं मूत्रमपतरतिशेषः ॥ शनैः शनैः कालविलंबेन ॥ मंदं मंदं अस्वमल्पं ॥११॥ अथला

लामेहमाह ॥ तालालातंतुयुतं मूत्रं लालामेहेन पिच्छिलं ॥११॥ पिच्छिलं मेहतीतिशेषः

॥११॥ अथ पित्तजानां षण्णां लक्षणमाह ॥ तत्र क्षारमेहनीलमेहकालमेहानाह ॥ गंध

वर्णरसस्पर्शैः क्षारेण क्षारतोयवत् ॥ नीलमेहेन नीलाभं कालमेही मषीनिभं

१२ ॥ क्षारेण क्षारमेहेन ॥ अत्र मूत्रं मूत्रयेदिति योजनीयं त्रिष्वपि ॥१२॥ अथ हा

॥३२५॥

रिद्रमेहमांजिष्ठमेहावाह॥ हारिद्रमेही कटुकं हरिद्रासन्निभं दहत्॥ विस्रं मांजिष्ठमे
हेन मंजिष्ठसलिलोपमं॥१२ दहदिति मूत्रविशेषणं॥ विस्रमामगंधि॥ मूत्रं मूत्रये
दिति योजनीयमुभयत्रापि॥ अथ रक्तमेहमाह॥ विस्रमुष्णं सलवणं रक्ताभं रक्तमे
हतः॥ रक्ताभं मूत्रं मूत्रयेदिति शेषः॥१३॥ अथ वातजानां चतुर्णां लक्षणं॥ तत्र व
सामेहमज्जमेहावाह॥ वसामेही वसामिश्रं वसाभं मूत्रयेन्मुहुः॥ मज्जाभं मज्जमि
श्रं वा मज्जमेही मुहुर्मुहुः॥१५॥ मज्जाभं मज्जमिश्रं वा मूत्रयेदिति योजनीयं॥१५॥
अथ क्षौद्रमेहहस्तिमेहावाह॥ कषायं मधुरं रूक्षं क्षौद्रमेहं वदेद्बुधः॥ हस्ती मत्त इ
वाजस्रं मूत्रं वेगविवर्जितं॥ सलसीकं विबद्धं च हस्तिमेही प्रमेहति॥१६॥ अजा
स्रमनवरतं॥ अत एव वेगविवर्जितं॥ विबद्धं घनं॥१६॥ अथोपद्रवानाह॥ अ

॥३२५॥

विपाको ऽरुचिः छर्दिर्निद्रा कासः सपीनसः ॥ उपद्रवाः प्रजायन्ते मेहानां कफजन्मनां
१३ ॥ बस्तिमेहनयोस्तोदो मुष्कावदरणं ज्वरः । दाहस्तृष्णाम्लको मूर्छा विड्भेदः पित्त
जन्मनां ॥ १४ ॥ वातजानामुदावर्तकंठहृद्ग्रहलोलताः । शूलमुन्निद्रताः शोषः कासः
श्वासश्च जायते ॥ १५ ॥ कफजे कासश्वासार्द्रः वातजे शुष्कः ॥ तोदः संसर्गिवातजन्यः ॥
मेहानां त्रिदोषजन्यत्वात् ॥ मुष्कावदरणं पाकेन ॥ अम्लको ऽम्लोद्गारः ॥ लोलता ।
सर्वरसभक्षणेच्छा ॥ इयं च प्रभावात् धातुक्षयाद्वा भवति । यथा वातग्रहण्यां गृ
द्धिः सर्वरसानामित्युक्तं ॥ शोषो मुखस्य ॥ १३॥१४॥१५॥ अथासाध्यमाह ॥ यथो
क्तोपद्रवाविष्टमतिप्रस्रुतमेव च ॥ पिडिकापीडितं गाढं प्रमेहो हंति मानवं ॥ २० ॥
यथोक्तोपद्रवैरविपाकादिभिः ॥ अन्यैश्च सुश्रुतोक्तास्तस्योपदेहशैथिल्यकफ

प्रसेकमक्षिकाद्युपसर्पणादिभिर्युक्तं ॥ अतिप्रवृत्तं अतिशयबहुमूत्रस्राविनं ॥ पिटिका
पीडितं बहुभिः शराविकादिपिटिकापीडितं ॥ २० ॥ अथापरानप्युपद्रवांस्तैरसाध्य
तां चाह ॥ मूर्छाछर्दिज्वरश्वासकासवीसर्पगौरवैः ॥ उपद्रवैरुपेतो यः प्रमेही दुःप्रति
क्रियः ॥ २१ ॥ अथ सर्वेषां प्रमेहाणां चावस्थाविशेषं मधुमेहमाह ॥ सर्वएव प्रमेहास्तु
कालेनाप्रतिकारिणः ॥ मधुमेहत्वमायांति तदासाध्या भवंतीहि ॥ २२ ॥ अप्रतिकारि
णः अप्रतिकारो येषामस्ति ते अप्रतिकारिणः उपेक्षिता इत्यर्थः ॥ कालेन बहुभिर्दिनैः
२३ ॥ मधुमेहशब्दस्य प्रवृत्तौ निमित्तमाह ॥ मधुरं यच्च सर्वेषु प्रायो मध्विव मेहति ॥
सर्वेपि मधुमेहाख्या माधुर्याच्च तनोरतः ॥ २४ ॥ यत् हेतोः तनोः शरीरस्य माधुर्यात्
पुरुषः प्रायः बाहुल्येन सर्वेषु प्रमेहेषु मध्विव मधुरं मेहति ॥ अतः हेतोः सर्वेपि प्र ॥ ३२६ ॥

मेहामधुमेहाख्याभवंतीत्यर्थः ॥ २३ ॥ मधुमेहीत्वसाध्यएवकिंतुमधुमेहितोजातोय
साध्य ॥ इत्याह ॥ जातःप्रमेहीमधुमेहिनोपिनसाध्यंमेहःसहिबीजदोषात ॥ येचापि
केचित्कुलजाविकाराभवंतितांश्चप्रवदंत्यसाध्यान ॥ २४ ॥ जातोयीत्यन्वयः ॥ बीजदो
षात पितुर्मधुमेहारंभकदोषैर्बीजस्यदूषितत्वात ॥ मधुमेहशब्देनात्रमेहमात्रमुच्य
ते ॥ यदितुयातिकउपेक्षितोमधुमेहउच्यतेतदातदितरमेहयुक्तमातापितृजनि
तप्रमेहित्वंनासाध्यमुक्तंस्यात ॥ अन्यत्रापिमधुमेहशब्देनमेहमात्रमुक्तं ॥ तद्य
था ॥ गुल्मीचमधुमेहीचराजयक्ष्मीचयोनरः ॥ अचिकित्स्याभवंत्येतेबलमांसप
रिक्षयात ॥ यद्यत्रमधुमेहोभीष्टःस्यात्तदाबलमांसपरिक्षयादितिनवक्तुंयुक्तंस्यात
तस्यस्वभावतएवासाध्यत्वात ॥ कुलजमेहस्यासाध्यत्वप्रसंगेनापरेषामपिकु

॥ ३२७ ॥

लज्जानामसाध्यतामाह ॥ पिडकापीत्यादि ॥ विकाराः कुष्ठादयः ॥ तथाचवक्ष्यते ॥ दंपत्योः कु
वाहुल्याद्दुष्टशोणितशुक्रयोः ॥ यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितमिति ॥ २४ ॥ अ
थ धातुक्षयावरणाभ्यां कुपितवातेन मधुमेहे मधुसमं जायते सङ्किलद्विधा ॥ कु
द्धधातुक्षयाद्वायोर्दोषावृतपथे दोषैः ॥ पित्तादिभिरावृतः एवं यामार्गोपि स्वतया
मृते वायौ कुद्धे सति ॥ २५ ॥ आवृतो दोषलिंगानि सोनिमित्तं प्रदर्शयन् ॥ क्षीणः क्ष
णात्क्षणात्पूर्णो भजते कृच्छ्रसाध्यतां ॥ २६ ॥ मधुसमं मूत्रमिति शेषः ॥ सः मधु
मेहः ॥ सावरणलिंगमाह ॥ आवृत्त इत्यादि ॥ आवृत्तवातो मधुमेहः ॥ दोषलिं
गानीति येन पित्तादिनावृत्तस्तस्य वातस्य च लिंगानि प्रदर्शयन् ॥ अनिमित
मकस्मात्क्षणात्क्षीणः क्षणादावरणेन पुनः पूर्णो भवन् कृच्छ्रसाध्यतां ॥ ३२७ ॥

भजते ॥ तथा च चरकः ॥ समारुतस्य पित्तस्य कफस्य च मुहुर्मुहुः ॥ दर्शयित्वाकृतिं
गत्वा क्षयमाप्यायते पुनरिति ॥ २५॥२६॥ अथ प्रमेहनिवृत्तिलक्षणमाह ॥ प्रमे
हिणो यदा मूत्रमनाविलमपिच्छलं ॥ विशदं कटुकं तिक्तं तदारोग्यं विनिर्दिशे
त् ॥ २७ ॥ अनाविलं स्वच्छं ॥ विशदं श्वेतं ॥ २८ ॥ अथ प्रमेहोपेक्षया पिटिकाश्चापि
भवंतीत्याह ॥ शराविका कच्छपिका जालिनी विनतालजी ॥ मसूरिका सर्षपिका
पुत्रिणी सविदारिका ॥ २९ ॥ विद्रधिश्चेति पिटिका प्रमेहोपेक्षया दश ॥ संधिमर्म
सु जायंते मांसलेषु च धामसु ॥ ३० ॥ संधिमर्मसु संधिषु मर्मसु च ॥ धामसु अंगे
षु ॥ ३१ ॥ अथ तासां लक्षणानि ॥ तत्र शराविकालक्षणं कच्छपिकालक्षणं चाह ॥
अंतोन्नता च तद्रूपा निम्नमध्या शराविका ॥ सदाहा कूर्मसंस्थाना ज्ञेया कच्छपि

॥३२८॥

कायुधैः॥२०॥ तद्रूपाणारुणरूक्ष्या॥ कूर्मसंस्थाना कूर्माकृतिः॥२०॥ अथ जालिनीलक्षणमाह॥ जालिनी तीव्रदाहा मांसजालसमावृता॥२०॥ अथ विनतालक्षणमाह॥ अवगाढरुजाक्लेदा पृष्ठे वाप्युदरेऽपि वा॥ महती पीटिका नीला विनता विनता स्मृता॥२१॥ अवगाढरुजाक्लेदा अंतःपीडाक्लेदयुक्ता॥ विनता अधःप्रसृता॥२१॥ अथालजीलक्षणं मसूरिकालक्षणं चाह॥ रक्ता सिता स्फोटचिता दारुणा त्वलजी भवेत्॥ मसूरसमसंस्थाना विज्ञेया तु मसूरिका॥२२॥ स्फोटचिता स्फोटैराचिता॥ दारुणा दुःसहा॥ संस्थानमाकृतिः॥२२॥ अथ सर्षपिकालक्षणं पुत्रिणीलक्षणं चाह॥ गौरसर्षपसंस्थाना तत्प्रमाणा च सर्षपी॥ महत्यल्पचिता ज्ञेया पिटिका चापि पुत्रिणी॥२३॥ अल्पचिता अल्पैः सूक्ष्मैः स्फोटैराचिता॥२३॥

॥३२८॥

अथ विदारिकालक्षणं विद्रधिलक्षणं चाह॥ विदारिकंदवद्वृत्ता कठिना च विदा
रिका॥ विद्रधेर्लक्षणैर्युक्ता ज्ञेया विद्रधिका तु सा॥३४ वृत्ता वर्त्तुला॥३४॥ अथ
पिडिकानां दोषानाह॥ ये यन्मताः स्मृता मेहा तेषामेतास्तन्मताः॥३४॥ येय
द्दोषोल्वणा मेहास्तद्दोषोल्वणा त्वेनैव तत्र पिडिका भवंतीत्यर्थः॥३४॥ प्रमेहं
विनाप्येताः स्फुरित्याह॥ विना प्रमेहमप्येता जायंते दुष्टमेदसः॥ तावच्चैता न ल
क्ष्यंते यावद्वास्तुपरिग्रहः॥३५॥ वास्तुग्रहणात्वं तस्य परिग्रहः॥३५॥ अथ पीडिको
नामुपद्रवानाह॥ तृट्कासमांससंकोचमोहहिक्कामदज्वराः॥ विसर्पमर्मसं
रोधाः पिडिकानामुपद्रवाः॥३६॥ अथासाध्यानां पिडिकानां लक्षणमाह
गुदे हृदि शिरस्यंसे पृष्ठे मर्मणि चोत्थिताः॥ सोपद्रवा दुर्बलाग्नेः पिडिकाः प

रिवर्जयेत् ॥३४॥ अथ केचित्स्त्रीणां प्रमेहो न भवतीत्याहुस्तन्मतमाक्षिप्य सहेतुकं
प्रमेहानुद्भवमाह। रजः प्रसेकान्नारीणां मासि मासि विशुध्यति ॥ कृत्स्नं शरीरं दो
षाश्च न प्रमेहंत्यतः स्त्रियः ॥३५॥ दोषा धातादयः ॥ किंतु स्त्रीणां मेतद्धेतुवले नान्य
रोगासंभवोपपत्तेरेतद्वचः प्रायिकं ॥ तेन स्त्रियोपि मेहंतीति सिद्धांतः ॥३५॥ अथ
रक्तपित्तरक्तप्रमेहयोर्भेदज्ञानार्थमाह ॥ हारिद्रवर्णं रुधिरं च मूत्रं विना प्रमेह
स्य तु पूर्वरूपैः ॥ यन्मूत्रयेत्तन्न वदेत्प्रमेहं रक्तस्य पित्तस्य सहि प्रकोपः ॥३६॥ हारि
द्रोवर्णो यस्य तन्मूत्रं रुधिरं च यन्मूत्रयेत्तत्प्रमेहं न वदेत् ॥ किंतु रक्तपित्तस्य प्रको
पः विकारः ॥ रक्तपित्ताख्यो व्याधिर्येधिव्याः ॥ इति प्रमेहनिदानं ॥ अथ प्रमेहचि
कित्सा ॥ वसीविशोध्यः प्रथमं प्रमेही तिकुंभकुंभाक्षकरंजतैलैः ॥ स्निग्धस्ततो ॥२२८॥

यष्टामलैर्निम्बकिरातयो विश्वो धवान् हरिद्रा दित सु॥ दोषावसाने समधुः पिबेद्वा द्विर्दोषा
निपीता जयति प्रमेहान् फलत्रयं दारुसपीत दारुधात्रा घनं ते तिष्ठते न तद्धत॥ इ
ति योगद्वयं॥ गौरीयरायन्निकलिंगयुक्तं समाक्षिकं मेहहरं प्रयुक्तं॥ छिन्नोद्भवा या
रि समाक्षिकं वा शिवाजलं तद्धदि हप्रदिष्टं॥ इति योगत्रयं घरविश्राला द्धकटंकट
रीद्धाथः स्वपाकल्कयुतो निपीतः॥ समाक्षिको पोषयुक्तमेहो यशोषायभिष
गिभक्तः॥ इति त्रिफलादिषुतं॥ पयोधरप्रस्तरजं त्वभीरुमुशल्यनतेक्षुरमर्कटी
नां॥ सशर्करालां सद्दश विभागानि पिष्टप्रसूतानि चतुर्लयानि॥ आद्रीलिसचू
र्णरजो ऽक्ष मात्रं पयो निपीतं जयति प्रमेहान्॥ इति मुस्तादिचूर्णं॥ रवयचि विपि
च्छा सहितः कुमारी रसः सितायुक्त च वियर्जितास्त्रः॥ इति कुमारीस्वरसः॥ अत्र

॥३३०॥

पूर्वोक्तो गोक्षुरादिगणस्तु रथ्यतीव हितः ॥ शिलाजतु नरः पीत्वा प्रातः क्षीरसितायुतं ॥
मुच्यते सर्वमेहेभ्य ह्यिसप्तदिवसैर्ध्रुवं ॥ इति शिलाजतुजोगः ॥ प्रस्थद्वयं निस्तुषधात
रीजबीजं समस्येत मथ्याष्ट विल्वं ॥ घृतं च दुग्धाढकयुग्विधिज्ञः पचेत्कृशानौ मृदु
कीलएतत ॥ दर्वीविलेपिन्यपतत्र चूर्णं जातीफलव्योषसुरंगसूना त ॥ सजातिपत्री
करभक्षुराख्य त्रिजातवर्षाभुचलाबुगाच ॥ सतालमूली कलिफेनसूतलोहाभ्रका
द्दईपलं पृथक च ॥ प्रदायशीते गुडदर्पशीतमा शर्करा कतः शाणाच तुष्टयंच ॥ लेहाद
तस्य दुईपलं प्रगेद्यान्मेहारिनारीशतदर्पहारि ॥ करीवरीती रतिमात्रचित्रा नरीक
रोत्यस्य निषेवणेन ॥ रतिकलुलेहा ॥ चूर्णं गोक्षुरतण्मूतः कुंडविकं निक्षिप्य दुग्धा
ढकेश्री संगोधरालोहजातिजफलाकूपारश्रोषोपणाः ॥ एलं दष्टकजातिपत्रि

कपि ॥३३०॥

॥३३१॥

कुर्याद्वृष्यं शुक्रमदं पूर्गंगर्भकरं पारंगदहरं स्त्रीणामसकृद्दोषजित् ॥ इतिपूगपाकः ॥ चंद्रप्रभा वचा मुस्ता भूनिंबसुरदारु च ॥ हरिद्रातिविषा दार्वी पिप्पलीमूलचित्रकं ॥ धान्यकं त्रिफला चव्यं विडंगं गजपिप्पली ॥ सुवर्णमाक्षिकं व्योष द्वौ क्षारौ लवणत्रयं ॥ एतानि टंकमात्राणि संगृह्णीयात्पृथक्पृथक् ॥ द्विकर्षं हतलोहं स्याच्चतुःकर्षा सिता भवेत् ॥ शिलाजित्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलोः ॥ विधिना योजितैरेतैः कर्त्तव्या गुटिका शुभा ॥ चंद्रप्रभादिर्विख्याता सर्वरोगप्रणाशिनी ॥ भुक्त्वा चंद्रप्रभाख्यामुषसि किल वटीं क्षौद्रसर्पिः ॥ समेतां हन्यान्मेहान्गुदार्शः क्षयमपि चिरजं शुक्रसादं तरोगान् ॥ पांडुकंडूश्च पूतं कटिरुजमुदरानाहकच्छ्राणि मूत्राघातसीहांत्रवृद्धर्बुदकसनमेहं मेहनेग्रंथिकुष्ठं ॥ अत्र केचित्स्वर्णगंधाभ्रकौ लिप्र

॥३३१॥

रजनीधाम्नः कुवेरात्सततो बीजं सर्वजफेनेऽप्यविलम्बमप्येतस्यककार्षिकं ॥ श्वेता
सर्वसमांशं तस्य विजयासर्पिः पुनः प्रास्थिकं पक्त्वा उक्तित एतद्भक्षत्तुलितं प्रातर्भ
जेद्भेषजं ॥ मेहस्तंभनयोषतो षरुद्रति प्रौढांगनासंगमोद्दामानेकमनोजसंगर
चिधावत्वं ततेजः प्रदं ॥ इति गोक्षुरावतेहः ॥ हेमांभोधरचंदनं त्रिकटुकं धात्रीकुह
स्पारिवामज्ञानखित्रिसुगंधिजीरकद्वयं शृंगाटकं वंशजां ॥ जातीकोशलवंगधान्य
कयुतं प्रत्येककर्षद्वयं पूगस्यापयते विचूर्ण्य च पयः प्रस्थत्रये सर्पिषः ॥ द्व्या
ढ्येः कुडवं सिताद्विकतुलां धात्रीवरीयं जलीमंदाग्नौ विपचेद्भिषक् शुभदिने सु
स्निग्धभांडे क्षिपेत ॥ यः खादेद्दनिशं प्रभातसमये मेहांस्तजीर्णज्वरं पित्तं सामल
म सरक्तमूत्रतिंग्रदपरोऽयैक्राक्षिनासासुच ॥ मंदाग्निं च विजित्य पुष्टिमतुलां

त्येकं पलमितानि गुग्गुलोः कर्षाय ददाति ॥ चंद्रप्रभा कर्चूर इति भावप्रमिश्रादयः ॥ इति चंद्रप्र
भावटी ॥ मृतं सूतं मृतं गंधं अर्जुनस्य त्वचा सिता ॥ तुल्यांशं मर्दयेत् खल्वे एलास्या मृ
लजैर्द्रवैः ॥ दिनांते वटिका कार्या माषमात्रा प्रमेहहा ॥ एषा इंद्रवटी नाम मधुमेहवि
नाशिनी ॥ इति इंद्रवटी ॥ वराक्वाथयुते लोहं च चूर्णं मधुसमन्वितं ॥ प्रमेहं हंति येव
तगोदं चैतेन वर्जितं ॥ इति योगद्वयं ॥ गुडूचीसत्वत्रिफलामृतलोहं समन्वितं ॥ मधु
ना भक्षयेन्नित्यं प्रमेहं दारुणं जयेत ॥ इति गुडूचीसत्वादियोगः ॥ सिताष्टं गाटकं
चैव वरेवस्थीनी समन्वितं ॥ कृत्वा चूर्णमिदं देयं कर्षमात्रं प्रमाणतः ॥ प्रमेहमखिलं
हंति चिरकालोद्भवं नृणां ॥ इति शार्करादिचूर्णं ॥ पलमात्राण्यपक्वानि औदुंबरफला
नि च ॥ तद्वणेन समं भुक्ता प्रमेहं हंति दारुणं ॥ इत्यौदुंबरयोगः ॥ रसस्य भस्मना

॥३३२॥

तुल्यं वंगभस्म प्रकल्पयेत् ॥ अस्य माषद्वयं हंति मेहान् क्षौद्रसमन्वितं ॥ पक्कौदुंबरचू
र्णं च मधुना चानुपाययेत् ॥ इति वंगेश्वरः ॥ एकभागो रसो देयो द्वौ भागौ वंगतो म
तौ ॥ गंधको वंगतुल्यः स्यात् कन्यारसविमर्दितं ॥ पक्त्वा च वालुकायंत्रे मधुकपिप्प
लीयुतः ॥ देयः सर्वप्रमेहेषु रसो वंगेश्वरः परः ॥ पथ्यं क्षीरोदनं चाम्लतांबूलं च विव
र्जयेत् ॥ त्यजेद्वातकरं वस्तु क्षारं पित्तकरं तथा ॥ इति द्वितीयो वंगेश्वरः ॥ पलार्द्धं नव

पलार्धंच

नीतं चैतथा सिता ॥ त्रुटिगधाणकं चैव भक्षयेद्दिनसप्तकं ॥ अनेन भेषजेनाशु प्रमे
हान्मुच्यते ध्रुवं ॥ इति नवनीतादियोगः ॥ दग्धा मत्स्यचूलिका पार्श्वजीर्णलोध्रः सखा
दिरः ॥ एतच्चूर्णं समसितं धातुष्णायं जपेदहात ॥ इति चूलिकादग्धमत्स्ययोगः ॥
चित्रकं गंधपाषाणं त्र्यूषणं पारदो विषं ॥ त्रिफला मुस्तकं चैव षांम्लस्त्वग्गच्चूर्णं ॥३३२॥

कृतं समं ॥ भृंगराजद्रवेणाथ वटिकां कारयेद्बुधः ॥ गुंजानुमानकीं तां तु प्रातरेकां तु भक्ष
येत् ॥ अष्टादशविधं कुष्ठं वातगुल्मं सशूलकं ॥ वातरोगं कफं सर्वं प्रमेहाश्मरिकृ
च्छ्रकं ॥ प्लीहानां राजरोगं च वह्निसादमरोचकं ॥ त्वरितं हंति चाभ्यासात्तस्य रश्मीः सं
प्रकीर्तिता ॥ पंचाननवटी ह्येषा रोगारण्यांक्षयकारिणी ॥ इति पंचाननवटी ॥ हिमा
षफेनं जातीजं लवंगं गगुग्गुतैस्तथा ॥ शिवप्रियो सच पसातवक्षीरी तथैव च ॥ पथ्य
कं सर्वतोतमात्रं सूक्ष्मं गगुग्गुलुवर्जितं ॥ कृत्वा पुरजेलेनास्य गुग्गुवः कोलास्थिमात्र
काः ॥ कृत्वा गोपयसा देयास्तथापायषुषितांभसा ॥ अनेनसमाचरेत्पथ्यं मेहाच्छी
घ्रं विमुच्यते ॥ इत्यहिफेनादिगुटी ॥ जीरकं सोरकक्षारः पथ्या रेवतचीनिका ॥ ए
बांचूर्णमाषवद्धं सूक्ष्मं कृत्वाप्रपलतः ॥ हरीतक्यादिकाथेन दद्यान्मेहनिवृ

॥ ३३३ ॥

नयेत् ॥ मूत्राघातास्मरिहरं मूत्रकृच्छ्रनिवर्तकं ॥ इति जीरकादिचूर्णं ॥ गयांपयःसरवं
डकं त्रिकटुं त्वचं गमहत्वकं ॥ प्रमेहमहत्वकं परं वुधा वदंति सादरं ॥ इति वंगयोगः ॥ न्यग्रो
धोदुंवराश्वत्थश्योनाकारग्वधासनं ॥ आम्रं कपित्थं जंवूं च प्रियालं ककुभं धवं ॥
मधुकं मधुकं तोध्रं वरुणं पारिभद्रकं ॥ पटोलं मेषशृंगी च दंती चित्रकमाठकी ॥
करंजं त्रिफला शाकं भल्लातकफलानि च ॥ एतानि समभागानि सूक्ष्मचूर्णानि
कारयेत् ॥ न्यग्रोधाद्यमिदं चूर्णं मधुना सह लेहयेत् ॥ फलत्रयं पंचतुल्यं पिवेत्तेन मू-
त्रं विशुद्ध्यति ॥ एतेन विंशतिर्मेहा मूत्रकृच्छ्राणि यानि च ॥ प्रशमं यांति योगेन पि
टिकाश्च विशेषतः ॥ इति न्यग्रोधाद्यं चूर्णं ॥ रसस्य भस्मनां तुल्यमभ्रभस्म प्रक
ल्पयेत् ॥ आमलक्याश्च स्वरसैः सप्ताहं भावयेद्रसं ॥ हरिशंकरसंज्ञः स्याद् ॥ ३३३ ॥

क्तः सर्वप्रमेहजित् ॥ इति हरिशंकररसः ॥ एलासकर्पूरसितातत धात्रीजातीफलं गोक्षु-
रश्चाल्मलीत्वक् ॥ सूताभ्रवंगायसभस्म सर्वमेतत्समानं परिमर्दनीयं ॥ निष्कार्द्ध-
मात्रो मधुनावलीढो निहंति सर्वामयं मेहजातं ॥ इति प्रमेहकुठारो रसः ॥ त्रिकंटकं
प्रतिविषा वचाश्मंतक लोध्रकं ॥ सोमवल्कार्जुनारिष्टभल्लातकपटोलकं ॥ मंजिष्ठा
दीप्यकनिशापाठापद्मकमुस्तकं ॥ चंदनं सागरुसमैरेभिः स्नेहं तु साधयेत् ॥ कफ
वातप्रमेहेषु सिद्धं तैलं प्रशस्यते ॥ द्वंद्वजेषु प्रमेहेषु घृतं शस्तं प्रकीर्तितं ॥ त्रिदोषजे
षु मेहेषु तैलाज्यं तु प्रशस्यते ॥ इति त्रिकंटकाद्यः स्नेहः ॥ तुलार्द्धं देवदारोः स्याद्वासा
याः पलविंशतिः ॥ मंजीष्ठेंद्रयवा दंती तगरं रजनीद्वयं ॥ रास्नाक्रमिघ्नं मुस्तं च शिरीष
ष खदिरार्जुनाः ॥ भागान्दशपलान्दद्याद्यवान्यावत्सकस्य च ॥ चंदनस्य गु-

॥२२४॥

उष्मार्द्रिं दग्धरोहिण्या क्षित्रकस्य च ॥ मागानष्टपलानेतनष्टद्रोणेंभसः पचेत ॥ द्रोणशे
षेकषायेच पूते शीते प्रदापयेत ॥ धातक्याः षोडसपलं माक्षिकस्य तुलात्रयं ॥ व्योष
स्य द्विपलं दद्यात्रिजातं च चतुःपलं ॥ प्रियंगोश्च द्विपलं नागकेसरं ॥ सर्वाण्येतानि संचू
र्ण्य घृतभांडे विधारयेत ॥ मासादूर्ध्वं पिबेदेनं प्रमेहं हंति दुर्जयं ॥ वातरोगान् ग्रहण्य
र्शो मूत्रकृच्छ्राणि नाशयेत ॥ देवदार्व्यादिकोरिष्टो दद्रुकुष्ठविनाशनः ॥ इति देवदार्व्यरि
ष्टः ॥ माक्षिकं धातुमाक्षिकं शिलाभेदं शिलाजतुं चंदनं रक्तधातुं च तथा कर्चूरकं करणा

नवसारं सैंधवं च पंच विख्यमिदं पथक् ॥ विधाय समरूपं त्रेव निंपामचतुष्टयं ॥ प्रज्वालयेदूर्ध्वं
भांडेलग्नं वर्जमात्मना हरेत ॥ तस्सत्वं च शीतिं रंगे गंधकं च तयोः समं ॥ विचूर्णैकत्र कोचोपि
कूपिकायां विनिक्षिपेत ॥ मंद्रिमवालुकायंत्रे स्थितायां दिनसार्द्धकं तु ह्यामग्निमधो दद्याद्या
द्बाह्मयामकं ॥ कूपीतस्स्वांतदुस्म स्वर्णगं सांग शीतलं ॥ गृह्णीयान्मारितस्वर्णं द्रुये कुर्यात् ॥२२५॥

द्विपलिकं

रसं

वध्यमाधुः प्रदं सर्वप्रमेहनाशनं परं ॥ क्वाथं च रमणे तद्धिमगांको गुडूच्योपितः ॥ इति गुडूच्योपितमृगांकः

वं सरोचनक्वाथैर् क्षीरेणसहितं पिबेत् ॥ मधुप्रमेहं हरते मूत्ररोधादि मुच्यते ॥ इति माक्षिका
दियोगः ॥ निंबपत्रपटोलानि गुडूचीमुस्तमेव च ॥ पित्तप्रमेहे विहितः क्वाथो यं मधुना स
ह ॥ इति निंबपत्रादिक्वाथः ॥ नीलोत्पलमुशीरं च पथ्यामलकमुस्तकं ॥ पिबेत्पित्तप्रमेहार्त्तः
क्वाथं मधुविमिश्रितं ॥ इति नीलोत्पलादिक्वाथः ॥ कमलं चंदनं लोध्रं उशीरमर्जुनान्वितं
पेयः क्वाथः पित्तमेहविकारे मधुना सह ॥ इति कमलादिक्वाथः ॥ लोध्रं सटीपुष्करमूलमेला
मूर्वीविडंगं त्रिफलायवानी ॥ चव्यं प्रियंगुक्रमुकं विशालाकिराततिक्तं कटुरोहिणी च
भार्गीनतं चित्रकपिप्पलीनां मूलं सकुष्ठं तिविषासपाठा ॥ कलिंगयावाम्रातककेसराणि
नखं सपत्रं मरिचं प्लवं च ॥ द्रोणेंभसः कर्षसमानि पक्वा पूते च तु भागजलावशेषे

रसेर्द्दुग्धागोमधुनः प्रदेयो घृतभाजनस्थः॥ लोध्रासवोयं कफपित्तमेहान् क्षिप्रं निहन्या
त् द्विपलप्रयोगात्॥ पांडुत्वमर्शांस्यरुचिं ग्रहण्या दोषं किलासं विविधं च कुष्टं॥ इति लो
ध्रासवः॥ भस्मायः स्नुतगुडाद्विजतुकुनटिकातोप्यमांको ह्यवीजव्योषसैंधवं च भाव्यं न
व परिमितितस्तद्धिघृत्य द्रवेण॥ दोषामं गांधुनाचेत्य गुमयमधुनानिष्क्रमात्रं वि
ष्णुध्रुं खादेन्मेहाभिभूतो हितमितभुजि पुष्पैपथ्यबद्धाभिधानं॥ महानिंबबीजानि ष
ट्तंदुलांभः पलेन प्रघृष्टानि निष्कद्वयेन॥ घृतेनान्वितानि प्रपीयानुतस्माद्दृनव्य
प्रमेहं निहन्याद्दवश्यं॥ इति मेघवदुरसः॥ ष्णुहुस्य चमतस्याहेजो वह्वमितं लिहे
त्॥ स निशामलकक्षौद्रं सर्वमेहप्रशांतये॥ इति नागभस्मयोगः॥ प्रमेहपिटिकानां
प्राक्कार्यं स्नावसेचनः॥ शराविकाद्याः पिटिकाश्च पक्वाः शोफोपचारैर्व्रणवत्तु

पक्काः ॥ सिद्धं तिवस्त्रांशुतदीपपूर्वं हत्वे पिवेत्क्षीरतरुद्रकं च ॥ पर्व्वपादकरणा अति मंदोत्सा
हमेहपरिपीडितदेहं ॥ हन्कारं सहदृढ्यसत्तनमूर्च्छीपानपर्वीसिस्थताः पिटिकास्ता ॥ अथ
पथ्यमाह ॥ श्यामकंकोद्रवो द्दालगोधूमाश्च णकाढकी ॥ कुलत्थाः कथिता भोज्ये पुराणा
मेहिनो हिताः ॥ उद्दालो वनकोद्रवः ॥ यवान्नविकृतिर्मुद्गाः शालयः षष्टिकादयः ॥
सौभाजनं कारवेल्लं पटोलं लशुनं तथा ॥ श्रीदं वरं कपित्थं च नूतनं कदलीफलं ॥ तथा
तिक्तानि शाकानि खर्जूरं तांगलीफलं ॥ हस्त्यश्ववाहनं चैव व्यायामाकीत षौतथा ॥
प्रमेहरोगिणामेतत्पथ्यं प्रोक्तं भिषग्वरैः ॥ अथापथ्यमाह ॥ मूत्रवेगं धूमपानं स्वेदं
शोणितमोक्षणं ॥ सदासनं दिवानिद्रां नवान्नानि दधीनि च ॥ तैलं क्षीरं घृतं गुडं पिष्टा
न्नानि च मैथुनं ॥ कूष्मांडमिक्षुंड षांवु स्याद्दम्लतपणानि च ॥ यस्त्रवातं रक्तं वसुं तोय

॥ २३ ही ॥

लंचोल्लभोजनं ॥ अभिष्यंदि चपलेन प्रमेही परिवर्जयेत् ॥ इति प्रमेहचिकित्सा ॥ अथ मे
दो निदानं ॥ तत्र मेदसो विप्रकृष्टं निदानमाह ॥ अव्यायामदिवास्वप्नश्लेष्मलाहारसे
विनः ॥ मधुरोन्नरसः प्रायः स्नेहान्मेदो विवर्द्धयेत् ॥ १ ॥ अन्नरसः आममध्यगः ॥ स्नेहा
दन्नरससंभवात् ॥ कथंभूत प्रायो मधुरः मधुरतरः इत्यर्थः ॥ तथा च सुश्रुतः ॥ आमर
सान्नरसो मधुरतरश्च भवतीति ॥ ४ ॥ अथ मेदसोतिप्रवृद्धौ वैरूप्यमाह ॥ मेदसावृत
मार्गत्वात्पुष्यंत्यन्येन धातवः ॥ मेदस्तु चीयते तस्मादशक्तः सर्वकर्मसु ॥ २ ॥ अन्ये धा
तवोऽस्थ्यादयः मेदआक्रांताः ॥ न पुष्यंति न पुष्टा भवंति ॥ चीयते संचितं भवति वर्द्धत
इति यावत् ॥ तस्मान्मेदस्वी सर्वकर्मसु अशक्तः स्यात् ॥ मेदसः सौकुमार्य्यात्वात् ॥
२ ॥ अपरानेपि दोषानाह ॥ क्षुद्रश्वासतृषामोहस्वप्नक्रथनसादनैः ॥ युक्तः क्षुत्स्वे ॥ २३ ही ॥

द्दौर्गंध्यैरल्पप्राणोल्पमैथुनः॥ मेदसःस्वेदद्दौर्गंध्याज्जायंतेजंतवोऽरागवः ३ कथ
नमुखास्रावरोधः॥ कंठेघुर्घुरहत्यन्ये॥ जंतवः क्रमयः ३ अथमेदसःस्थानमाह॥
मेदस्तुसर्वभूतानामुदरेष्वस्थिषुस्थितं॥ अतएवोदरेवृद्धिःप्रायोमेदस्विनोभवेत्॥
४॥ अथमेदःस्विनोग्निवृद्धौहेतुमाह॥ मेदसावृतमार्गत्वाद्वायुःकोष्ठेविशेषतः॥
चरन्संधुक्षयत्यग्निमाहारंशोषयत्यपि॥ ५ तस्मात्सशीघ्रंजरयत्याहारंचापिकांक्षति
विकारान्सोश्नुतेघोरान्कांश्चित्कालव्यतिक्रमात्॥ ६ संधुक्षतिप्रदीपयति॥ समेद
स्वीआहारंशीघ्रंजरयतिपुनर्भोक्तुंचाकांक्षति॥ सःदीप्ताग्निःकालव्यतिक्रमात् भो
जनकालातिक्रमात्कांश्चिद्विकारान्वातवीकारान्अश्नुतेप्राप्नोति॥ ५॥ ६ एतेवात
पित्तेमेदसोरुद्धेविशेषादुपद्रवकरौ॥ इत्याह॥ एतावुपद्रवकरौविशेषात्पित्तमारुतौ

एतौ हि दहतः स्थूलं वनं दावानलो यथा ॥७॥ एतौ पित्तमारुतौ मेदसारुद्धमार्गत्वात् कोष्ठ
मध्ये प्रवृद्धौ संतौ विशेषादुपद्रवकौ ॥ मेदस्विनं दहतः नाशयेतां ॥७॥ अथ मेदसोऽति
वृद्धेर्विनाशहेतुत्वमाह ॥ मेदस्यतीव संवृद्धे सहसैवानिलादयः ॥ विकारान्दारुणा
न्कृत्वा नाशयंत्याशु जीवितं ॥८॥ विकारान्प्रमेहपिटिकाज्वरभगंदरविद्रधिवा
तरोगानन्यतमान् ॥८॥ अथातिस्थूलस्य लक्षणमाह ॥ मेदोमांसातिवृद्धत्वाच्चे
लस्फिगुदरस्तनः ॥ अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते ॥९॥ अयथोपचयो
त्साहो न यथावृत उचित उपचयः मांसोपचयः उत्साहोपि तं च यस्य सः ॥९॥ अथा
तिस्थूलतायां वैगुण्यमाह ॥ अतिस्थूलेषु संदष्टा विसर्पाः सभगंदराः ॥ ज्वरातीसा
रमेहार्शःश्लीपदापचिकामलाः ॥१०॥ इति मेदोनिदानं ॥ अथ मेदश्चिकित्सा ॥ श्रम

॥३३७॥

चिंताव्यवायाध्वक्षौद्रजागरणप्रियः ॥ हंत्यवश्यमतिस्थौल्यंयवश्यामाकभोजनः
प्रातर्मधुयुतंवारिसेवितंस्थौल्यनाशनं ॥ चणकान्नंचोष्णमंडंपथ्यंदेयंकृशोभवे
त् ॥ पिप्पलीमधुनासेव्यामेदःकफविनाशिनी ॥ बिल्वपत्ररसोवापिदेहदौर्गंध
नाशनः ॥ वासादलरसोपेतःशंखचूर्णेनमिश्रितः ॥ क्षौद्रेणत्रिफलाक्वाथःपी
तोमेदोहरःपरः ॥ शीतीभूतंतथोष्णांबुमेदोघ्नंक्षौद्रसंयुतं ॥ व्योषजीरकचव्यानि
हिंगुसौवर्चलान्वितं ॥ एतैर्मधुयुताःपीताःसक्तवःस्थौल्यनाशनः ॥ कृष्णालो
हरजःक्षारोयवज्ञामलकनागरं विडंगंचेतियोगोयंस्थौल्यनाशकरःपरः ॥
व्योषोग्नित्रिफलामुस्ताविडंगंगुग्गुलुंसमं ॥ भक्षयन्नाशयेद्रोगान्मेदःश्लेष्मा
मवातजान् ॥ इतिदशांगोगुग्गुलुः ॥ तांबूलपत्रचूर्णंतुचूर्णंकिंचशिलाभवं ॥

॥ ३३८ ॥

वारिणालेपनं कुर्याद्गात्रदौर्गंध्यनाशनं ॥ कुलत्थस्तक्रवःकृष्णं मांसी चंदनजं रजः ॥ सक्तवश्चूर्णकस्यैव त्वक्चैवैकत्र कारयेत् ॥ स्वेददौर्गंध्यनाशश्च जायते स्याद्बधूलनात् ॥ फलत्रयं त्रिकटुकं सतैलं लवणान्वितं ॥ षण्मासादुपयोगेन कफमेदोनिलापहं ॥ हरीतकीतु संपिष्य गात्रमुद्वर्त्तयेन्नरः ॥ पश्चात्स्नानं प्रकुर्वीत देहस्वेदप्रशांतये ॥ क्षारं वा तांरिपत्रस्य हिंगुयुक्तं पिबेन्नरः ॥ सहितं भक्तमंडेन मेदोवृद्धिनिवृत्तये ॥ धत्तूरपत्रस्वरसेन गाढमुद्वर्त्तनं स्यौल्यहरं प्रदिष्टं ॥ शरीरदौर्गंध्यहरः प्रदेहः पत्रांबुलोध्रामयचंदनानां ॥ बंबूलस्वरसैः सम्यक् वारिणा परिपेषितैः ॥ देहमुद्वर्त्तयेत्पश्चाद्धरीतक्यास्तु पिष्टया ॥ मासमुद्वर्त्तनं कुर्यात्पश्चात् स्नानं समाचरेत् ॥ प्रस्वेदान्मुच्यते शीघ्रं मेदोवृद्धिसमुद्भवात् ॥ अपरसः ॥ सूतं ताम्रमयो वो ॥ ३३८ ॥

लंमर्द्दयेत्सूर्य्यावर्त्तरसा ॥ तद्द्वयंमधुनालीढ्वापिवेच्च सजलंमधु ॥ मेदोरोगंजयेन्मा
सार्द्धसोयंवडवानलः ॥ सूर्यावर्तरसाःकेपर्णसा ॥ मध्वत्रपलंतथाजलमपिपलं
चानुपानेह्येयं ॥ इतिवडवानलरसः ॥ अथपथ्यमाह ॥ पुराणाःशालयोमुद्गाः
कुलत्थोद्दालकोद्रवाः ॥ मसूराश्चणकास्तप्तसलिलंचोष्ठकीतथा ॥ तक्रंचसार्षि
पंतैलंपत्रशाकानिगुग्गुलुः ॥ सर्वमेतद्धितंमेदोगदार्तानांनिषेवणात ॥ अथा
पथ्यमाह ॥ संवेशंभोजनस्यांतेश्लेष्मलानिदधीनिच ॥ मधुराणिश्रमाभावंमे
दस्वीसर्वदात्यजेत ॥ इतिमेदश्चिकित्सा ॥ अथकार्श्यनिदानं ॥ तत्रकार्श्यस्यनि
दानमाह ॥ वातोल्बणान्नपानानिसंघनंप्रमिताशनं ॥ क्रियातियोगोशोकश्च
वेगानिद्राधिनिग्रहः ॥१॥ नित्यरोगोरतिर्नित्यंव्यायामोभोजनाल्पता ॥ भीतिर्ध्य

॥२३५॥

नातिचिंताचकार्श्यकारणमीरितं॥२॥संघनमुपवासः॥प्रमितमल्पं॥क्रियातियोगः वमनविरेकाद्यतिविधानं॥वेगानिद्राविनिग्रहः॥त्वत्र निद्रानिर्देशो विशेषाय॥१॥१२॥अकृशस्य लक्षणमाह॥शुष्कस्फिगुदरग्रीवो धमनीजालसंततः॥त्वगस्थिशेषोतिकृशः स्थूलपर्वा नरो मतः॥३॥अपकृशस्य ये रोगा भवंतितानाह॥प्लीहकासक्षयश्वासगुल्मार्शांसि उदराणि च॥मर्शं कृशं प्रधावंति रोगाश्च ग्रहणीमुखाः॥४॥कश्चित्कृशोपि बलवान् दृश्यते ॥ तद्धेतुमाह॥आधानसमये यस्य शुक्रभागोधिको भवेत्॥मेदोभागस्ततो हीनः स्यात्स कृशोपि महाबलः॥५॥यस्याधानसमये जनयितुः शुक्रस्याधिक्यं भवति मेदसोल्पता च॥तस्य कृशस्यापि बहुबलमित्यर्थः॥५॥कस्यचित्स्थूलस्यापितादृग्बलं न दृश्यते तत्र

॥२३५॥

हेतुमाह ॥ मेदसोंशोधिकोपस्य शुक्रभागो स्वकोभयेत् ॥ सस्निग्धोपिसुपुष्टोपि
वलहीनो विलोक्यते ॥ ९ ॥ अत्रव्याख्यानं पूर्ववत् ॥ ९ ॥ इतिकार्श्यनिदानं ॥ अथकार्श्य
चिकित्सा ॥ रूक्षान्नादिनिमित्तैस्तु कृशे पुंजीतभेषजं चंहणं वसवल्कूष्य तथावा
जीकरंचयत् ॥ स्वभावात्कृशकायोयः स्वभावादल्पपावकः ॥ स्वभावाद्दवतोयस्य
तस्यनास्तिचिकित्सितं ॥ सदानंदमनःशांतश्चिंताशोकादिवर्जितः ॥ पथ्योक्ता
हारयोगेननरःकार्श्याद्विमुच्यते ॥ इतिकार्श्यचिकित्सा ॥ अथोदरनिदानं ॥ तत्रो
दररोगस्यनिमित्तमाह ॥ रोगाःसर्वेपिमंदेग्नौ सुतरामुदराणिच ॥ अजीर्णान्म
लिनैश्चान्नैर्जायंतेमलसंचयात् ॥ १ ॥ अग्नौमंदेसर्वेरोगाजायंते ॥ किंतु सुतरा
मतिशयेनोदराणिजायंते ॥ अपरमपि हेतुमाह ॥ अजीर्णादित्यादि ॥ मलि

॥३४०॥

नैः अत्यंतदोषजनकैः ॥ मलसंचयात् मलानां दोषाणां पुरीषस्य चातिवृद्धेः ॥ अत्रो
दरशब्देनोदरस्थो रोग उच्यते ॥ यत आह ॥ तास्य तद्धर्मनाभ्यां च तत्समीपतयापि च
तत्साहचर्याच्छब्दानां वृत्तिरुक्ता चतुर्विधेति ॥ १ ॥ अथ संप्राप्तिमाह ॥ रुध्वा स्वेदांबुवाहि
नि दोषाः स्रोतांसि संचिताः ॥ प्राणाग्न्यपानान् संदूष्य जनयंत्युदरं नृणां ॥ स्वेदांबु
वाहीनीति स्वेदवहानि अंबुवहानि च ॥ २ ॥ अथ तस्य पूर्वरूपमाह ॥ तत्पूर्वरूपं बल
वर्णकांक्षावलीविनाशो जठरे हि राज्यः ॥ जीर्णापरिज्ञानविदाहवत्यो वस्तौ रुजः पा
दवङ्क्षणशोथः ॥ ३ ॥ अथ तेषां सामान्यरूपमाह ॥ आध्मानं गमने शक्तिर्दौर्बल्यं दु
र्बलाग्निता ॥ शोथः सदनमंगानां संगो वातपुरीषयोः ॥ दाहस्तंद्रा च सर्वेषु जठरेषु
भवंति हि ॥ ४ ॥ अथ सन्निकृष्टनिदानपूर्विकां संख्यामाह ॥ पृथग्दोषैः समस्तै

३४०॥

ग्रसीहवद्दुष्टतोदकैः॥ संभवंत्वष्टधात्वथैतेषांलिंगंपृथक्छृणु॥५॥ तत्रवातोदर
स्यलक्षणमाह॥ तत्रवातोदरेशोथःपाणिपान्नाभिकुक्षिषु॥ कुक्षिपार्श्वोदरक
टीपृष्ठरुक्पर्वभेदनं॥६॥ शुष्ककासोंगमर्दोधोगुरुतामलसंग्रहः॥ श्यावारुणत्वगा
दित्वमकस्माद्वृद्धिह्रासवत्॥७॥ सतोदभेदमुदरंतनुकृष्णशिराततं॥ आध्मातदृतिव
च्छब्दमाहतंप्रकरोतिच॥ वायुश्चात्रसरुक्शब्दोविचरेत्सर्वतोगतिः॥ पाणिपादि
त्यत्रव्यंजनांतःपाच्छब्दःआर्षत्वात्॥ कुक्षिपार्श्वोदरेत्यत्रकुक्षिशब्देनउदरस्यवाम
दक्षिणभागद्वयवाची॥ अकस्माद्वृद्धिह्रासवत्अनिमित्तवृद्धिह्रासयुक्तं॥ आध्मा
तदृतिवत्वातपूर्णचर्मपुटवत्॥ सर्वतोगतिःसकलकोष्ठेसंचरन्॥६।७।८॥
अथपित्तोदरमाह॥ पित्तोदरेज्वरोमूर्च्छादाहस्तृट्कटुकास्यता॥ भ्रमोतिसारः

॥ ३४१ ॥

पीतत्वं त्वगादावुदरं हरितं ॥ ९ ॥ पीततान्मूत्रशिरानद्धं सस्वेदं सोष्म दह्यते ॥ धूमायते म-
दुस्पर्शं क्षिप्रपाकं प्रदूयते १० हरितश्याकवर्णं सोष्मअंतस्तापयुक्तं ॥ दह्यते वहिर्दी-
ह्युक्तं ॥ धूमायते धूममिवोद्गमति ॥ क्षिप्रपाकमिति क्षिप्रपाकाज्जलोदरतां याति
प्रदूयते व्यथते ॥ ८ ॥ १० अथ कफोदरमाह ॥ श्लेष्मोदरे गौरवं पच्यपश्चगौरवं ॥ तंद्रोत्क्ले-
शो रुचिः श्वासः कासः शुक्लत्वगादिता ॥ ११ उदरस्तिमितं स्निग्धं शुक्लराजीततं मह-
त ॥ चिराभिवृद्धं कठिनं शीतस्पर्शं गुरु स्थिरं ॥ १२ स्वापः स्पर्शाज्ञानता ॥ गौरवमंगानां
तंद्रा निद्रा याकुत्स्यं ॥ उत्क्लेशो हृल्लासः ॥ शुक्लराजीततं शुक्लशिराव्याप्तं ॥ ११ ॥ १२ ॥ अथ
सन्निपातोदरमाह ॥ स्त्रियोन्नपानं नखरोममूत्रविडार्त्तवैर्युक्तमसाधुवृत्ताः ॥ य-
स्मै प्रयच्छंत्यरयो गरांश्च दुष्टांबुदूषीविषसेवनाद्वा ॥ १३ ॥ तेनाशु रक्तं कुपिताश्च ३४१ ॥

सदनं

दोषाः कुप्युः सुघोरं जठरं त्रिलिंगं ॥ तच्छीतवाताभ्रसुदुर्द्दिने च विशेषतः कुप्यति दह्यते
च ॥३४॥ स चातुरो मूर्छति हि प्रसक्तं पांडुः कृशः शुष्यति तृष्णया च ॥ दूष्योदरं कीर्त्तित
मेतदेव प्लीहोदरं कीर्त्तयतो निबोध ॥३५॥ स्त्रिय इति अविवेकिसन्निहितजनोपल
क्षणं ॥ तान्यस्य सौभाग्यमिच्छंत्यः ॥ विट्माजीरादीनां ॥ आर्त्तवं रजः ॥ गरा न संयोग
जानि विषाणि ॥ दुष्टमंबु सविषमत्स्यतृणपर्णादिप्लुतं पाटितं च ॥ दूषीविषं विषमे
वाग्न्याद्युपघातेनाल्पस्य प्रभावं दूषीविषमुच्यते ॥ तदुदरं शीतादिषु कुप्यति ॥ दू
षीविषस्य तथैव प्रकोपात् ॥ मूर्छति विषयोगात् ॥ प्रसक्तं निरंतरं ॥ एतदेव सन्निपा
तोदरं तंत्रांतरे दूष्योदरं कीर्त्तितं ॥ न पुनरधिकमित्यर्थः ॥ रक्तं दुष्टं दूषयित्वा भव
तीति दूष्योदरं ॥ अथवा परस्परं दूषयंतीति दोषा एव दूष्यास्तैः कृतमुदरं दूष्यो

॥३४२॥

दरं ॥१३॥१४॥१५॥ अथ प्लीहोदरमाह ॥ विदाह्यभिष्यंदिरतस्य जंतोः प्रदुष्टमत्यर्थमसृक्
कफश्च ॥ प्लीहाभिवृद्धिं कुरुतः प्रवृद्धो प्लीहोत्थमेतज्जठरं वदंति ॥१६॥ तद्वामपार्श्वे परि
वृद्धिमेति विशेषतः सीदति चातुरोत्र ॥ मंदज्वराग्निः कफपित्तलिंगैरुपद्रुतः क्षीणबल
लोतिपांडुः ॥ सव्येच पार्श्वे यकृति प्रदुष्टे ज्ञेयं यकृद्दाल्युदरं तदेव ॥१७॥ उदावर्त्तरुजानाना
हमोहतृड्दहनज्वरैः ॥ गौरवारुचिकाठिन्यैर्विद्यात्तत्र मलान्क्रमात् ॥१८॥ अस्रक्कफ
श्चेति अस्रक्कफदुष्टि कफपनेन तुल्यकारणतया पित्तदुष्टिरपि कथ्यते ॥ विदाहिनापि पित्तं
रक्तं च दुष्यति ॥ अत एव वक्ष्यति कफपित्तलिंगैरुपद्रुत इति ॥ अत्र पित्तस्य लिंगं मं
दोज्वरः कफस्य लिंगं मंदोग्निरिति गदाधरः ॥ प्लीहोदरस्यैव भेदो यकृद्दाल्युदरं न
पुनरधिकमित्याह ॥ सव्येत्यादि ॥ तदेव प्लीहोदरमेव ॥ अवधारणेन तद्धिलक्ष

॥३४२॥

ग्गो भावः सूचितः ॥ यकृद्दालयति दोषैर्भेदयतीति यकृद्दाल्युदरं ॥ तत्र दोषसंबं
धमाह ॥ उदावर्त्तेत्यादि ॥ उदावर्त्तरुजानाहैर्वातं मोहतृट्दहनज्वरैः पित्तं गौरवा
रुचिकाठिन्यैः कफं जानीयात् ॥ १६ ॥ ७ ॥ ३य ॥ अथ बद्धगुदमाह ॥ यस्यांत्रमन्नै
रुपलेपिभिर्वा वालाश्मभिर्वा पिहितं यथावत् ॥ संचीयते यस्य मलः सदोषः श
नैः शनैः संकरवच्च नाड्यां ॥ १९ ॥ निरुध्यते यस्य गुदे पुरीषं निरेति कृच्छ्रादपि चाल्प
मल्पं ॥ हृन्नाभिमध्ये परिवृद्धमेति तस्योदरं बद्धगुदं वदंति ॥ २० ॥ उपलेपिभिः श्ले
ष्मलैः शालूकादिभिः ॥ वालाश्मभिः वालुकाभिः कर्करैर्वा ॥ यथावत् यथार्हं मलः
पुरीषं ॥ सदोषः दोषत्रयसहितः ॥ संकरवत् संमार्जनीक्षिप्तगरलोष्ठ्यादिव
त् ॥ नाड्यां अंत्रनाड्यां ॥ हृन्नाभिमध्ये हृन्नाभ्योर्मध्ये ॥ बद्धगुदमिति गुदोपरि

अंत्रस्य बद्धत्वात् बद्धगुदं ॥ १८॥२० ॥ अथ क्षतोदरमाह ॥ शल्यं तथान्नोपहितं यदंत्रं भुक्तं
भिनत्त्यागतमन्यथा वा ॥ तस्मात्स्रुतोंत्रात्सलिलप्रकाशः स्रावः स्रवेद्वै गुदतस्तु भूयः ॥
२१ ॥ नाभेरधश्चोदरमेति वृद्धिं निस्तुद्यते दाल्यति चातिमात्रं ॥ एतत्परिस्राव्युदरं प्रदि-
ष्टं दकोदरं कीर्त्तयतो निबोध ॥ २२ ॥ शल्यं कंटकं कर्करादि ॥ अन्नोपहितं अन्नयुक्तं भुक्तं
यदंत्रं भिनत्ति ॥ तथाऽन्यथा आगतं भोजनं विना आगतं शल्यं इति यदि यदंत्रं भिनत्ति
एतदुपलक्षणं ॥ जंभरणमत्यशनं वा यदंत्रं भिनत्ति ॥ यदुक्तं चरके ॥ शर्करातृणकाष्ठा-
दिकं टकैरन्नसंयुतैः ॥ भिद्यते त्रं यदा भुक्तैर्जृंभयात्यशनेन चेति ॥ तस्माद्भिन्नांत्रात्
गुदतस्तु भूयः स्रवति अंत्रात् संस्नुत्य पुनर्गुदतः स्रवेदित्यर्थः ॥ दाल्यति विदीर्यते इव
एतत्क्षतोदरं तेत्रांतरे परिस्राव्युदरं प्रदिष्टं ॥ २१॥२२ ॥ अथ उदकोदरमाह ॥ यः स्नेह

पीतोप्यनुवासितो वा वांतो विरिक्तोप्यथवा निरूढः ॥ पिबेज्जलं शीतलमाध्मातस्य स्रो
तांसि दूष्यंति हि तद्वहानि ॥ २३ स्नेहोपपत्तिष्वथवापि तेषु दकोदरं पूर्ववदभ्युपैति
स्निग्धं महत्तत्परिवृत्तनाभिसमाततं पूर्णमिवांबुनाच ॥ यथा दृतिः क्षुभ्यति कंपते
च शब्दायते चापि दकोदरं तत् ॥ २४ ॥ स्नेहपीतस्त्वत्राप्यनुवासितादित्वात्कर्तीरिक्तः ॥
तेन स्नेहं पीतवानित्यर्थः ॥ अनुवासितः गृहीतानुवासनविधिः ॥ वांतः कृतापि पूर्व
वत्कर्तीरिक्तः तेन वांतवानित्यर्थः ॥ एवं विरिक्तः विरिक्तवान् ॥ तथा निरूढः गृहीतनि
रूढबस्तिः ॥ स चेदाध्मातः शीतलं जलं पिबेत तस्य तद्वहानि जलवहानि स्रोतांसि दुष्यं
ति ॥ जलवहेषु दुष्टेषु तस्य दुष्टेषु स्नेहोपपत्तिष्वपि पूर्ववदेव यथा पूर्वं अन्नरसे उपस्नेहन्या
येन वहिर्निस्रुते दकोदरमायाति ॥ तथा जलेपि वहिर्निःसृते दकोदरमायाति ॥ तदुदरं

॥ २४४ ॥

परिक्तनाभिगंभीरनाभिसमाततंसाध्यंयथाइतिअन्नमयंजलाहरणपात्रंक्षुभ्यतिअंतर्जि
लदोलनेनसंचलति ॥ कंपतेबहिः शब्दायतेकंपमानंसतशब्दंकरोति ॥ २३॥२४ ॥ अथासा
ध्यलक्षणमाह ॥ जन्मनैवोदरंसर्वंप्रायःकृच्छ्रतमंमतं ॥ बलिनस्तदजातांबुयत्नसाध्यं
नवोत्थितं ॥ २५ ॥ बलिनः अजातांबुनवोत्थितंचयत्नसाध्यमित्यन्वयः ॥ २५ ॥ पक्षाद्बद्धगु
दंतूर्ध्वंसर्वंजातोदकंतथा ॥ प्रायोभवत्यभावायछिद्रांत्रंदकोदरं ॥ २६ ॥ छिद्रांत्रंशस्त्रा
दिनाछिद्रमंत्रंयस्यतत्दकोदरं अभावायनाशायभवति ॥ २६ ॥ अथजातोदकस्योद
रस्यलक्षणमाह चरकः ॥ पयःपूर्णदृतिरिवक्षोभशब्दकरंमृदु ॥ अप्रव्यक्तशिराम
लंनितांतमुदरंमहत् ॥ २७ ॥ आलस्यमास्यवैरस्यंमूत्रेचबहुशोकृच्छ्रतं ॥ जातोदकस्यलिं
गंस्यान्मंदोग्निःपांडुतापिच ॥ २८ ॥ पुनरप्यसाध्यंलक्षणमाह द्वाभ्यां ॥ शूनाक्षंकुटि ॥ २४४ ॥

लोपस्थमुपक्लिन्नतनुत्वचं ॥ बलशोणितमांसाग्निपरिक्षीणं च वर्जयेत् ॥ रथी ॥ कुटि
लोपस्थं वक्रमेहनं ॥ उपक्लिन्नतनुत्वचं उपरिष्टाद्गतिर्न्यौल्यस्यस्थतं ॥ उदरिणामि
तिशेषः ॥ रथी ॥ पार्श्वभंगान्नविद्वेषशोफातीसारपीडितं ॥ विरिक्तं चाप्युदरिणं पूर्य
माणं विवर्जयेत् ॥ २० ॥ विरिक्तमपि पूर्यमाणोदरं उदरिणं विवर्जयेत् ॥ २० ॥ इति उ
दरनिदानं ॥ अथोदरचिकित्सा ॥ शस्तो विरेचनविधिर्जठरेषु पूर्वं मूत्रेण चापि पय
पसाप्युरुबूकतैलं ॥ मासं तथा द्विगुणमत्र पिबेत्समग्रं मूत्रं तदिष्टमथ माहिष
मल्पहं च ॥ गोक्षीरभुग्गभवेद्याकारभदुग्धैकवर्त्तनो यद्वा ॥ दाहानाहपिपासामूर्छा
शूलीविशेषेण ॥ इति योगद्वयं ॥ पुनर्नवादारुनिसासतिक्तापटोलपथ्यापिचुमंद
दाह ॥ सनागरा छिन्नरुहेति सर्वैः कृतः कषायो विधिना विधिर्त्तः ॥ गोमूत्रयुग्ग

॥३४५॥

ग्गुलुनाचयुक्तः पीतः प्रभाते नियतं नराणां सर्वांगशोथोदरपार्श्वशूलश्वासान्वितं पांडु
गदं निहंति ॥ इति पुनर्नवादि क्वाथः ॥ शुंठ्यं यवानीमादाय चतुर्दश पलानि च ॥ द्विपलं
टंकणं मरिचं चूर्णं कृत्वा विनिक्षिपेत् ॥ कर्षमात्रं ततो भुक्त्वा जठरामयनाशनं ॥ इति यवा
न्यादिचूर्णं ॥ पिप्पलीं पंचपलिकां स्नुहीक्षीरे विनिक्षिपेत् ॥ छायाशुष्कां ततः कृत्वा
दापयेत्पुटसप्तकं ॥ चूर्णं कृत्वा ततः खल्वे शाणमात्रं च भक्षयेत् ॥ दिनांतरे ततो भुक्त्वा
जठरामयनाशनं ॥ तक्रौदनं चरेत्पथ्यं नाशयेन्नात्र संशयः ॥ इक्षुदरामयहरं चूर्णं
सहस्रसंमितो वराः स्नुहीपयो विभाविताः ॥ हरीतकी च गोजसैरसे षजाठरांतिजि
त् ॥ इति योगद्वयं ॥ चव्यचित्रकविश्वानां साधितो देवदारुणा ॥ क्वाथश्छिवच्चूर्णं
युतो गोमूत्रेण दरान् ॥ जयेत् ॥ इति चव्यादि क्वाथः ॥ कुंभानिकुंभापुवतीयवानी ॥३४५॥

फलत्रिकं दारु निशा विशाला ॥ राज्ञी रसोनं हपुषा विडंगं हरीतकी रामठकुष्ठरुस्माः
कंपिह्रसोफं लवणानि त्रिगुरयो रजसत्तं चरुचाप्यजंघा ॥ एतानि नूनं विदधीत चू
र्णं गुडेनासव गुटिकाः प्रकल्प्याः ॥ निहंत्यजीर्णं जठराग्निचाधैप्लुतं तथाध्मान
मथाग्निघातं ॥ सर्वांगजं शोथमथामवातं शोफोदराणां प्रवरः प्रयोगः ॥ इति कुं
भादिगुग्गुलुः ॥ क्षीरेणैरंडजं तैलं पिबेन्मूत्रेणवासकृत ॥ ज्योतिष्मत्या पिबेत्तैलं
पयसा च दिने दिने ॥ सर्वेभ्यो ह्युदरेभ्यश्च मुच्येत मानवः ॥ इति योगद्वयं ॥ वा
तोदरी पिबेत्तक्रं पिप्पलीलवणान्वितं ॥ शर्करामरिचोपेतं स्वादु पित्तोदरी पिबे
त् ॥ यवानी सैंधवाजाजी व्योषयुक्तं कफोदरी ॥ सन्निपातोदरी तक्रं त्रिकटुक्षार
सैंधवैः ॥ इति तक्रप्रयोगः ॥ लवणं रजनी राजी प्रत्येकं पलयं चकं ॥ चूर्णितं नि

॥३४६॥

क्षिपेद्भांडे श्रुततक्रपलान्विते ॥ त्रिदिनं मुद्रितं रक्षेत्पश्चात्त्वं च पलं सदा ॥ पित्वा विनाश
येच्छीघ्रं त्रिसप्ताहान्महोदरं ॥ इति वैद्यामृतादि रसः ॥ अत्र पिप्पली वर्द्धमानकल्कोपि प्रश लव
स्तः ॥ दीप्यकव्योषोत्तमाम्लामिश्रिराजेरणवुगाक्षारयुग्माग्निमध्याया याव्याघ्रह्वस्वरोद्गुग्धा
कृमिरिपुविपुषाग्रंथिकुष्ठं पटूनी ॥ पंचैवैर्गिराजगंधार्द्रभवि समस्तं वंसर्वमितांत्रिभा
गा दंती श्यामा विशालेहिररपि चे चतुर्भागिका श्वेतसैषा ॥ देयः सर्वोदराणां निलरुजि
भिषजा तक्रसारं बुमध्ये गुल्मानाहार्तिशूले वदरजसुरातितिंतडीकोदकैश्च ॥ विट्सं
गे मस्तुनाथो विषकसनचिरानग्निपांडुज्वरार्तिश्वासे हृत्कंठरोधे पयसिशिरजे
लेष्मूत्रे नारायणाख्यः ॥ अथ धान्यकं ॥ सारं बुदाडिमांबु ॥ इति नारायणचूर्णं ॥३४६॥
पटोलमूलत्रिफलाविडंगनिकीथिमीनां पयगाक्षमानं ॥ द्विश्वक्षविल्वप्रमितं

कासे ला कं पिहत्वकासा त्रिवृत्तं विचूर्णये ॥ गोमूत्रपीतं नियतं निहन्यादेतत्पैलादि महो

दराणि ॥ प्रजातवारिशपयिगुल्मशोथपांडुमयप्रिचिग्रहणीमकांक्ष्म ॥ कालानि लिनी

इति पटोलमूलाद्यं चूर्णं ॥ स्नुक्क्षीरयुक्त दुग्धानमात्क्षीता तालवजाहताज्जातं ॥ स्नुक्क्षी

रसिद्धमाज्यं गुल्मप्लीहोदराणि हंत ॥ इति स्नुक्क्षीराज्यं ॥ क्षीरद्रोणे प्रस्थमर्द्धं सुधा

या दुग्धाज्जातं दध्यथैतन्मथित्वा ॥ यत्स्यादाज्यं कुंभसिद्धं च गुल्मानाहाष्ठीलाजाठरा

र्तीर्निहंति ॥ इति स्नुग्दुग्धाज्यं ॥ द्रोणाई पक्वकन्यादत्तभवरसतो मानिमेथाच्च मा

नीमेकीकृत्यस्नुतेतत दृढतरवसनाद्धाजनेन्वस्यमान्ये ॥ युक्तं लोहप्रस्त्याऽनवगु ३

जनितमप्रस्थवन्मुद्रितास्यां मासं वन्हेरधरास्थितमपि गालितं वासः सो युक्तमेतैः

गूंधि व्योषाग्निदीप्यत्रिफलजलधरा जाजिका युग्मकुंभद्रेकावक्षाम्लपर्णा

॥ ३६७ ॥

वृहद्दलरजनीधावनीक्षारसुगंधैः ॥ सोगूपेहैवैर्यवानीं दूसुरसतितक्षक्षारकुष्मांडज
म्लक्षौद्रैःसत्र्याक्ष्ववापाकुपयपदुसहितैश्छंगिकाहिंगुयुक्तैः ॥ कर्षांशैरातपस्थं वि
मर्दितमथतद्राक्ष्लाकर्षमात्रं पथ्याशीप्रातरद्याददुदरगुदभवहृत्तीहविद्रध्यनगौ
ल्मलानाहगूहार्तिव्वजरकविद्रचौपांड्वृस्मामवातेतृन्पोरष्टीलकोदावपिच निग
दितौयःकुमार्यासवोयं ॥ वृहद्दंतालीसपत्रे ॥ इतिकुमार्यासवः ॥ अत्रपूर्वोक्तं विद्
घृतमपिप्रशस्तं ॥ तुंवर्वीधान्यंच चूर्णमपिहितं ॥ चतुर्गुणेजलेमूत्रेद्विगुणेचित्रकात्पले
कल्कसिद्धं घृतप्रस्थं सक्षारं जठरीपिवेत ॥ इति चित्रकघृतं ॥ पुनर्नवादेवदारुश्रंग
वेरंचभार्गिका ॥ पत्रानीचविडंगंचचित्रकश्चाद्वभागिकः ॥ त्रिवृत्रिगुणितंचूर्णमु
ष्णेनपयसापिवेत ॥ गोमूत्रेणाथवासीहगुल्मोदरसजापहं ॥ इतिपुनर्नवाद्यंचूर्णं ॥ ३६७ ॥

र्णं ॥ चतुः सूतस्य गंधाब्धौ रजनी त्रिफला शिला ॥ प्रत्येकं च द्विभागं स्यात्त्रिवृज्जैपालचि-
त्रकं ॥ प्रत्येकं च त्रिभागं स्यात् ऋषभं दंती च जीरकं ॥ प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णि-
येत् ॥ जयंती स्नुक्पयो भृंगवह्नियानारितैलकैः ॥ प्रत्येकेन क्रमाद्भाव्यं सप्तधा च पथ्य-
कृपकं ॥ महावह्निरसो नाम निष्कमुस्तजलैः पिबेत् ॥ विरेचनं भवेत्तेन तक्रभक्तं च
सैंधवं ॥ दिनांते दापयेत्पथ्यं वर्जयेच्छीतसंजलं ॥ सर्वोदरहरः प्रोक्तो मूढवातहरः प-
रः ॥ इति महावह्निरसः ॥ अथैकव्याद्रोरसोपिहितः ॥ सूतगंधकयोः पथ्यातुल्यार-
ग्वधकानद्दढं ॥ मर्द्दयेद्द्विजिद्दुग्धेन तन्माषं चाद्दयेद्दिनं ॥ स्त्रीणां जलोदरं हंति पथ्यं
शाल्योदनं दधि ॥ चिंचाफलरसं चानुपानमत्र प्रयोजयेत् ॥ इत्युदरारिरसः ॥ अ-
ष्टटंकणतुल्यं तु मरिचं च रसं समं ॥ गंधकं पिप्पली शुंठी द्वौ द्वौ भागौ विचूर्णयेत्

॥३४८॥

सर्वतुल्यं क्षिपेद्दंतीबीजं सर्वमकल्मषं ॥ द्विगुणं रेचनं चैतद्दुर्नामान्यपोहति ॥ इतिना
राचोरसः ॥ श्रीरघुरत्नाजटाकल्कः पीतस्तक्रेण संयुतः ॥ शीघ्रं सीहोदरं हंति चिरकाल
समुद्भवं ॥ इति श्रीरघुरत्नाजटाकल्कः ॥ प्रस्थं गंधर्वबीजस्य पयस्यष्टगुणे पचेत् ॥ शुंठी
चूर्णं समं दद्यात् कुडवं सर्पिषः पचेत् ॥ शुद्धं खंडं तथा प्रस्थं मानैर्मृद्वग्निना पचेत् ॥ स
म्यक्पक्वं विजानीयात् पश्चादेतद्विनिक्षिपेत् ॥ चातुर्जातलवंगानि पिप्पली मरिचं
सठी ॥ अश्वगंधा धात्री तावत्यो गोक्षुरं हपुषा वरा ॥ कपिकच्छुर्बला रास्ना वधदारुर्धनं
जयः ॥ प्रत्येकं च पलार्द्धं तु चूर्णीकृत्य प्रदापयेत् ॥ सर्वेषु वातरोगेषु तथा सर्वोदरेषु च
सर्वसंधिं समाश्रित्य वायावन्येपि येश्रिताः ॥ कुब्जवामनखंजेषु गृध्रस्यामवाहुके
वहुवाते च पांडुत्वे वहूनीडीषु भग्नरोगेषु च ॥ भक्षयेच्च यथासाम्यं प्रभाते नित्यमादरात्

३४८ ॥

अथसंखद्राव ॥ ९६ ॥ चिवडुंगरसेर। चिंच १ पलस १ केल १ तिलनाल १ अघाडा १ मोरवाक्ष १
कयडी १ शंखु १ पाचे भस्म करून त्याचा क्षार काढावा तो १ पारा १ पंचलवण पंचक्षार १ ५
गंधक ३ तुरटी ४ सोरा ८ हिंगुलकस ८ नवसागर ॥ घसल्यायाच्या एकत्र खलकरून निवडुंचे र
सात मर्दन करावे नंतर नलिकायंत्रात घालून ४ प्रहर अग्नी घ्यावा ॥ अर्क निघतो पं
चक्षार १२ खावा दिसा असता त्रिविध ॥ हृद्रोगवगुल्मचअरुचिपथ्यांचा ० नाश करितो

आमवातगजेंद्रस्यैकशरीकल्पितः शुभगः ॥ वलकृद्देहरणो व्यथाः शुचिदोधातुसाम्यकृत
रक्षेरंडपाकः ॥ अथपथ्यमाह ॥ विरेचनं लंघनमब्दसंभवा कुलत्थमुद्गा हरणाः शालयो य
वाः ॥ तिक्तं रसो नोरुवुतैलमाद्रकं पुनर्नवा शिग्रुफलं हरीतकी ॥ तांबूलमेलायवक्षारक
मायसं पटोलशम्याककटिल्वकं मधु ॥ अजाखरोष्ट्री महिषी पयो जलं तप्तघृति तीक्ष्णा
नि चदीपनानि ॥ चह्वेगसंवेधनमग्निकर्मताविषप्रयोगो वपुतोयथापथ्यं

॥३४९॥

विशेषतः प्लीहसमुद्भवेषु नचीनेचवा हौ धमनीव्यधः परं ॥ बद्धाच्छिद्रे चोदरे जे स्रुतो स्थितेना
मेरधः शस्त्रविधिर्यथाविधि ॥ समीरणोत्थे घृतपानमादितः सोत्संजने स्यादनुवास
नं तथा ॥ पथ्यामलं पथ्यगणोयमाश्रितः ॥ सलोनरणां स्यादुदरामयेषु च ॥ अथापथ्यमा
ह ॥ संस्नेहनं धूमपानं जलं पानं शिराव्यधं ॥ छर्द्दिर्दिनं दिवानिद्रा व्यायामं पिष्टवैकृतं
औदकानूपमांसानि पत्रशाकं तिलानपि ॥ उष्णानि च विदाहीनि लवणान्यम्लानि च
महेंद्रगिरिमातानां सरितां सलिलानि च ॥ शमीधान्यं विरुद्धान्नं दुष्टनीरं गुरूणि च ॥ वि
षमाणि विशेषाज्जु वर्जयेदुदरामयी ॥ इत्युदररोगचिकित्सा ॥ अथ शोथनिदानं ॥
तत्र शोथस्य विप्रकृष्टं निदानमाह ॥ शुद्ध्यामयाभक्तकृशाबलानां क्षाराम्लतीक्ष्णो
ष्णगुरूपसेवा ॥ दध्याममृच्छाकविरोधिपिष्टगरोपसृष्टान्ननिषेवणं च ॥ १ ॥ अ ॥ ३४९ ॥

र्शांस्यचेष्टा वपुषो ह्यशुद्धिर्मर्माभिघातो विषमा प्रसूतिः ॥ मिथ्योपचारः परिकर्मणां
च निजस्य हेतुः श्वयथोः प्रदिष्टः ॥२॥ अशुद्धिः वमनविरेकादिः । आमयाः पांडुरोगादयः
अभक्तं अभोजनं ॥ आमः अपक्वभुक्तस्य रसः ॥ विषगरोपसृष्टान्नं विषयोगः गरः सं
योगजं विषं तेन संसृष्टमन्नं ॥ वपुषो ह्यशुद्धिः शोधनार्हस्य वपुषोऽशोधनं ॥ मर्मोप
घातः दोषकृत एव ज्ञेयः ॥ बाह्यहेतुकृतस्तु मर्मोपघात आगंतुजशोथहेतुरेव ॥ विष
मा प्रसूतिः आमगर्भपतनादिका ॥ परिकर्मणां वमनादीनां पंचकर्मणां मिथ्यो
पचारः असम्यक्करणं ॥ श्वयथोः शोथस्य निजस्य आत्मीयस्य सन्निकृष्टस्य
हेतोर्वातादेः हेतुः प्रदिष्टः कथितः ॥१॥२॥ अथ सन्निकृष्टं निदानमाह ॥ दोषैः पृथ
क् द्वयैः सर्वैरभिघातात् विषादपि ॥ सर्वो हेतुविशेषैस्तु रूपभेदान्नवात्मकः ॥३॥ दो

अत्रप्रभृतिभिर्हेतुविशेषैर्वा रूपभेदस्तस्मात्सर्वःशोफो थोनयात्मक इति संबंधः॥

॥३५०॥

२॥ अथसंप्राप्तिपूर्वकंसामान्यंलक्षणमाह॥ रक्तपित्तकफान्वायुर्दुष्टोदुष्टान्ब
हिःशिराःनीत्वारुद्धगतिस्तैर्हिकुर्यात्त्वङ्मांससंश्रयं॥ उत्सेधंसंहतंशोथंतमाहुर्नि
चयादतः॥४॥ सगौरवंस्यादनवस्थितत्वंसोत्सेधमूष्माथसिरातनुत्वं॥ सलोम
हर्षंचविवर्णताचसामान्यलिंगंश्वयथोःप्रदिष्टं॥५॥ वायुर्दुष्टःस्वहेतुकुपितःस
न्दुष्टान्स्वहेतुभिःकुपितान्रक्तपित्तकफान्बहिःशिराःबाह्याःअगंभीराःनीत्वा
गमयित्वातैरक्तपित्तकफैःरुद्धगतिराव्रतमार्गःउत्सेधंउन्नतत्वंकुर्यादितियो
जना॥ किंविशिष्टंउत्सेधंअतःपूर्वोक्तान्निचयात्रक्तपीतकफवातानांसमु
दायात्संहतंघनंतमुत्सेधंशोथमाहुरित्यन्वयः॥ तस्यशोथस्यकिंस्यादि

॥३५०॥

त्याकांक्षायामाह ॥ अनवस्थितत्वं स्यात् अनियतावस्थितिः स्यादित्यर्थः ॥ चिकित्सा

व्यतिरेकेणापि निवर्तते ॥ तच्चानवस्थितत्वं स गौरवं स्यात् ॥ गौरवमप्यनवस्थितं स्या

त् ॥ च्यवच सोत्सेधं स्यात् ॥ उन्नतत्वमपि अनवस्थितं स्यादित्यर्थः ॥ सोत्सेधमि

ति अनवस्थितस्य विशेषणं ॥ सलोमहर्षमिति शिरातनुत्वस्य विशेषणं ॥ ४॥५

अथ तस्य पूर्वरूपमाह ॥ तत्पूर्वरूपं दवथुः शिरायामो गौरवं ॥ ६ ॥ दवथुरूपतापः

शिरायामः शिराप्रसारणं व्यथा ॥ ६ ॥ अथ वातिकं शोफमाह ॥ चरस्तनुत्वक्प

रुषोरुणोसितः प्रसुप्तिहर्षार्त्तियुतोनिमित्ततः ॥ प्रशाम्यति शोन्नमति प्रपीडि

तो दिवा बली स्यात् दवथुः समीरणात् ॥ ७ ॥ चरः संचारी ॥ तनुत्वक् अबलत्वक् ॥

असितः कृष्णः प्रसुप्तिः स्पर्शाज्ञता ॥ हर्षो झिंझिनी रोमांचो वा ॥ आर्तिः पीडा

॥३५१॥

एवुक्तः॥ दिशावलीविकृतिविषमसमवायारब्धत्वात्॥ अतएवोक्तंचरकेण॥ ले
होस्रमर्द्दनाद्यैर्यः प्रशम्येत्सचयातिकः॥ पथ्याप्यरुणवर्णैः स्याच्छोथो नक्तं प्रशा
म्यतीति॥ ७॥ अथपैत्तिकमाह॥ मदुःसगंधोसितपीतरागवान्भ्रमज्वरस्वेदतृषा
मदान्वितः॥ यउष्यते स्पर्शरुगाक्षिरागकृत्सपित्तसोथो भृशदाहपाकवान्॥
उष्यते संतप्यते॥ भृशदाहपाकवान् भृशदाही यः पाकस्तद्युक्तः॥ ८॥ अथश्लैष्मि
कमाह॥ गुरुः स्थिरः पांडुररोचकान्वितः प्रसेकनिद्रावमिवह्निमांद्यकृत॥ सकृच्छ्
जन्मप्रशमो निपीडितो न चोन्नमेद्रात्रिवलीकफात्मकः॥ ९॥ कृच्छ्रजन्मप्रशमः
चिरोत्पत्तिविनाशः॥ रात्रिवलीति रात्रौ स्रोतोवरोधजेन देहक्लेदेनाचेष्टापायकफ
स्यवृद्धत्वात्तज्जः शोथो बलवान्भवति॥ दिवा स्फुटस्रोतसि शरीरे चेष्टायुक्ते च

॥३५१॥

कफस्य वृद्धिर्न भवतीति ॥ ९ ॥ अथ द्वंद्वजसान्निपातिकावतिदेशेनाह ॥ निदानाकृति
संसर्गाच्छ्वयथुः स्याद् द्विदोषजः ॥ सर्वाकृतिः सन्निपाताच्छोफो व्यामिश्रलक्षणः
१० व्यामिश्रलक्षणः उक्तवातादिदोषत्रयलिंगः ॥ व्यामिश्रलक्षण इत्युक्ते सर्वा
कृतिरिति उक्तवातादिसकलशोफेतिपमार्थं ॥ १० ॥ अथाभिघातजमाह ॥ अभिघा
तेन शस्त्रादिछेदभेदक्षतादिभिः ॥ हिमानिलोदध्यनिलैर्भल्लातकपिकच्छुजैः ॥
११ रसैः शूकैश्च संस्पर्शाच्छ्वयथुः स्याद्विसर्पवान् ॥ भृशोष्मा लोहिताभासः ॥
प्रायशः पित्तलक्षणः ॥ अभिघातेन यः शोथः स शस्त्रादिभिर्भवेदिति योजना ॥
तत्र छेदः खड्गादिना ॥ भेदः पाषाणादिना ॥ क्षतं शरादिना ताडनमणादि ॥ आदि
शब्देन लगुडप्रहारादिग्रह्यते ॥ उदधिः समुद्रः ॥ भल्लातजैः रसैः कपिकच्छुजैः रसैः

॥ ३५२ ॥

कपिकच्छुजैः शूकैः ॥ विसर्पवान् प्रसरणशीलः ॥ क्षिप्त स्वक्षरणः पैतिकफो घत्क्षरणः ॥
१३॥१२ अथ विषजमाह ॥ विषजः सविषप्राणिपरिसर्पणमूत्रणात् ॥ दंष्ट्रादंतनखा
घातादविषप्राणिनामपि ॥ १३ विण्मूत्रशुक्रोपहतमलवद्वस्त्रसंकरात् ॥ विषवृक्षा
निलस्पर्शाद्गरयोगावचूर्णनात् ॥ मण्डलोऽवलंबी यशीघ्रो वहुलज्वाकरः ॥ १४ प
रिसर्पणं प्राणिनोपरिसर्पणं ॥ दंष्ट्रा हुष्टणोक्ता दंतो पली दाढा इति लोके ॥ दंताग्रे
प्रभवाः ॥ अविषप्राणिनां मपीत्वनेन दंष्ट्रादंतनखानां स्वभावदृस विषत्व मुक्तं
किंतु सर्पादिविषं मात्रकं भवति ॥ अविषप्राणिना दंष्ट्रादिविषंश्रो पथ्य धादिकरं
भवतीति विशेषः ॥ विण्मूत्रेत्यादि ॥ सविषप्राणिनां विडाद्युपहतं मलिनं च यद्वस्त्रं
तस्यासंकरः संमार्जनीनिक्षिप्तो घेत्यादिस्तयोः संपर्कात् ॥ गरयोगावचूर्णनात् ॥ ३५२ ॥

गरः संयोगजं विषं तस्य योगो यस्य तेन यत्तु मायधूसनात् ॥ अथ वर्तेषि तं समानः ॥
अयमप्यागंतुजस्तथापि सामान्यागंतुजश्चोपचिकित्सा तोस्यापि पृथक् चिकि
त्साभिधानात् पृथक् पठितः ॥ १३ ॥ १४ यत्र स्थिता दोषा यत्र छर्दिं कुर्वंति तदाह ॥
दोषा आमाशयमूर्ध्वं हि कुर्वंत्यामाशये स्थिताः ॥ पक्वाशयस्यामध्ये तु यच्चैस्यामे
गतास्त्वधः ॥ कृत्स्ने देहमनुप्राप्ताः कुर्युः सर्वसरं तथा ॥ १५ ऊर्ध्वं उरः प्रभृत्यूर्ध्वं ॥
मध्ये उरः पक्वाशयमध्ये ॥ अधः पक्वाशयादधः ॥ सर्वसरं सर्वशरीरप्रसरणशीलं
१५ अथोपद्रवानाह ॥ छर्दिः श्वासोऽरुचिस्तृष्णा ज्वरो तीसार एव च ॥ सप्तकोयं
सदैवैष्यः शोषोपद्रवसंग्रहः ॥ १६ अथ सोपद्रवस्यासाध्यत्वमाह ॥ श्वासः तं
पिपासा छर्दिश्च दौर्बल्यं ज्वर एव च ॥ यस्य चान्ते रुचिर्नास्ति शोषिते विवर्जी

॥३५३॥

येत्॥ १५॥ अथ कष्टसाध्यत्वादिकमाह॥ यो मध्यदेशे श्वयथुः स कष्टः सर्वगश्च यः॥ अर्द्धां
गेरिष्टभूतः स्याद्यश्चोर्ध्वं परिसर्पति॥ १६॥ मध्यदेशे उरःपक्वाशयमध्ये॥ सर्वगः
सकलशरीरभवः॥ सर्वज इति पाठे सान्निपातिकः॥ अर्द्धांगे अर्धनारीश्वराका
रेण॥ अरिष्टभूतः अरिष्टतुल्यः॥ यश्चोर्ध्वं परिसर्पतीति पुरुषविषयं तथा च
तंत्रांतरे॥ ऊर्ध्वगामी नरं पद्भ्यामधोगामी मुखात्स्त्रियं॥ उभयं बस्तिसंजातः शोथो
हंति न संशय इति॥ ऊर्ध्वगामी मुखगामी॥ अधोगामी पादगामी॥ उभयं पुरुषं ना
रीं च॥ तथा तंत्रांतरे चापि पादप्रवृत्तः श्वयथुर्नराणां यः प्राप्नुयान्मुखं॥ स्त्रीणां
वक्त्राद्यदि याति बस्तिं जघनं स हंतीति॥ १७॥ अपथ्यं च॥ अनन्त्योपद्रवकृतः शो
थः पादसमुत्थितः॥ पुरुषं हंति नारीं तु मुखजो बस्तिजो द्वयं॥ १८॥ पादसमु ॥३५३॥

स्थितः पादाभ्यामुत्थितो मुखगामीति यावत् शोथः पुरुषं हंति ॥ स किंविशिष्टः ॥ अन
न्योपद्रवकृतः शोफादन्येव्याधयोतीसारगूहलापर्षः प्रभृतयस्तेषामुपद्रवैः कृतस्तदु
पद्रवत्वेन जात इति यावत् न अन्योपद्रवकृत अनन्योपद्रवकृतः ॥ अर्थात् स्वहेतु
भिरेव जातः ॥ तु पुनः मुखजः मुखेज्जातः पादगामीति यावत् शोथः नारीं हंति ॥ सो
प्यनन्योपद्रवकृत एव ॥ यस्त्रिजः शोथः द्वयं पुरुषं नारीं च हंति सोप्यनन्योपद्रवकृ
त एव ॥ १९ ॥ किंच ॥ न योऽनुपद्रवः साध्यः शोफोः साध्यः पुरेरितः ॥ २० पुरेरितः अ
र्द्धांगेरिष्टमुत इत्यादिनोक्तोऽसाध्यः ॥ २० ॥ इति शोथनिदानं ॥ अथश्लोथैकित्सा चि
सर्वत्र सर्वांगगाचरेच सामेदोवोद्भवेतुष्णयष्टीपुराख्यात ॥ विशोधितो विष्यविषा
विडंगकलिंगातीक्ष्णामरमृत्पवारा ॥ गुडार्द्रकं वागुडनागरं वागुडाभयां वागुड

॥३५४॥

पिप्पलीं वा ॥ कर्षाभिवृद्ध्या त्रिपलप्रमाणां खादेन्नरः पक्षमथापि मासं ॥ शोथप्रतिश्या-
यगलास्यरोगान् सश्वासकासारुचिपीनसादीन् ॥ जीर्णज्वरार्शोग्रहणीविकारा-
न् हन्त्यात्तथान्यामकफवातरोगान् इति योगपंचकं ॥ मुनिंबविश्वकल्कं जग्ध्वा पिबेत्
पुनर्नवाक्वाथः ॥ अपहरति निषतमाशु शोथं सर्वांगगं नृणां ॥ इति मुनिंबादिक-
ल्कः ॥ पथ्यानिशाभार्ङ्गिमृताग्निदार्वीपुनर्नवादारुमहौषधैश्च ॥ क्वाथैर्निपीयो-
दरपाणिपादमुखाश्रितं हंत्यचिरेण शोथं ॥ इति पथ्यादिक्वाथः ॥ वृश्चिकं वदेव-
द्रुमनागरैर्वा दंतीत्रिवृद्व्यूषणचित्रकैर्वा ॥ दुग्धं ससिद्धं विधिनाभिपीतं गीतं प-
रं शोथहरं भिषग्भिः ॥ इति योगद्वयं ॥ पुनर्नवादार्व्यमृतापाठाविश्वं च दंडिका
समभागो निसंचूर्ण्य गवां मूत्रेण तानि पिबेत् ॥ वहुमकारंच्यपयुं सर्वगात्रेषि ॥३५४॥

सारिणां ॥ हंति चाश्रूदरात्यष्ठीवन्नणांश्चैवोद्भूतानपि ॥ इति पुनर्नवादिचूर्णं ॥ विश्वं
गुडेन तुल्यं वृक्षाग्नीवरसानुपानमभ्यसेत् ॥ विनिहंति सर्वशोथं घनवंदंचेंडवाशुरि
व ॥ वह्निवः श्वेतवर्णी भूः ॥ विश्वगुटी ॥ करणामाजोरजं चूर्णं सगुडं शोथनाशनं ॥
आमाजीर्णप्रशमनं शूलघ्नं वस्तिशोधनं ॥ करणादिगुटी ॥ गुडात्पलत्रयं ग्राह्यं श्वं
गवेरं पलत्रयं ॥ श्वंगवेरसमा कृष्णा तोहयिऊतिलयोः पलं ॥ चूर्णमेतत्समुद्दिष्टं
सर्वश्वयथुनाशनं ॥ इति गुडादिवटिका ॥ कृष्णाग्निविश्वघनजीरककंटकारीया
ठानिश्लाकरिकणामगधाजटानां ॥ चूर्णीकृतोस्म सलिलेन विलोड्य पेयं नातः ॥
परं श्वयथुरोगहरं नराणां ॥ इति पिप्पल्यादिचूर्णं ॥ शुंठीकल्के धृतं सर्पिर्द
शमूलस्य तेजसे ॥ सिद्धं निहन्यात् श्वयथुं ग्रहणीमामजामयान् ॥ इति शुंठीघृ

तं॥ आमवाताधिकारोक्तमजमोदादिचूर्णमत्रप्रशस्तं॥ अजीर्णाधिकारोक्तोलोहा
सवोपिप्रशस्तः॥ आर्द्रकस्वरसःपीतःपुराणगुडमिश्रितः॥ अजाक्षीराशिनांशी
घ्रंसर्वशोफहरोभवेत॥ अत्रपलमितेनार्द्रकरसेनकर्षमितोगुडः॥ आलोड्यपेयः
त्रिकटुलोहचूर्णंचद्व्येमेतत्समांशकं॥ पीतमुस्मांभसाहंतिशोफरोगमसंशयं
इतित्रिकटुलोहभस्मयोगः॥ त्रिफलागरहूकुष्मानांत्रिपंचैकांशयोजिता॥ गुडेन
गुटिकाहंतिशोफपांडुभगंदरं॥ त्रिफलाकाथपानंहिमहिषीसर्पिषासह॥ हंति
शोफंप्रमेहंचनाडीव्रणभगंदरं॥ इतित्रिफलाकाथः॥ विष्णामयादारुपुनर्नवंवा
नवायसंवाथविशुद्धिहेतोः॥ मूत्रेणपथ्यामथकौशिकंवातथापिशिलाजंचभ
जेद्धिशुद्धं॥ इतियोगपंचकं॥ आमयकृगुरुमिश्रपुरीषत्वक्समाक्षिकपट्टत्रय

॥३५५॥

युक्तं ॥ तक्रमेव तु पिबेदिति श्लोपस्तेन यागुडप्रिवेंगुडप्युंनी ॥ इति योगत्रयं ॥ दद्यश्चि
त्रकगर्भात्सर्पिस्तत्तक्रसंयुतं पक्वं ॥ चित्रककल्कसमेतं श्लोफस्तीहार्त्तिहृत्कथितं
इति चित्रकघृतं ॥ दशमूलतुलाकषायके सेशतमेकं तु हरीतकीर्विपाच्य ॥ गुडतोपि
तुलां प्रदाय चूर्णी त्रिकटुक्षारयुतत्रिजातकाद्यं ॥ यपगाक्षमितं स्निपेच्छरावं मधु
नः के सहरीतकीर्निहन्यात् ॥ श्वयथुज्वरमेहगुल्मपुक्रानिलमूत्रार्तिमयाम्ल
काम्लपित्ते ॥ दशमूलतुलाकषायकं स इति दशमूलक्क्यनोद्भवे पादावशेषे द्रोरो
कं सोभयतीत्यर्थाज्जलद्रोणोत्सपतहत्यर्थः ॥ उक्तं च ॥ तुलाकाथे जलं द्रोणं द्रोणे
द्रव्ये तुला मतेति ॥ शरावो षपसं ॥ इति कंसाभया ॥ श्चुक्कमूलकपुनर्नवरास्नादारु
विच्छ्यपरिपाचितै तैलं ॥ श्लोपहारिसपुनर्नवपूतिर्निवमातुजलमप्यवगाहैः

॥ ३५ ह ॥

अप्यगाहोत्रसेकः ॥ इति योगद्वयं ॥ वासकस्य तुलां दत्त्वा द्रोणे चापां पचेत् ॥ द्रोणशे-
षे शेषितं तस्य पूतशीते प्रदापयेत् ॥ गुडस्य च तुलां तत्र धातक्याः प्रस्थमेव च ॥ क्षि-
पेच्चूर्णीकृतं तस्मिन्न्त्वगेलापत्रकेसरं ॥ कंकोलव्योषतोयानि पत्तिकान्यकपकल्प-
येत् ॥ निदध्यात् घृतभांडे तु पक्षादूर्ध्वं ततः पिबेत् ॥ वासकासव इत्येष सर्वक्षयप्रणा-
शनः ॥ इति वासकासवः ॥ शुंठीपुनर्नवैरंडपंचमूलीशृतं जलं ॥ वातिकेश्वयथौ शस्-
स्तं पानाहारपरिग्रहे ॥ इति शुंठ्यादिक्वाथः ॥ पटोलत्रिफलारिष्टदार्वीक्वाथः सगु-
ग्गुलुः ॥ हंति पित्तकृतं शोथं तृष्णाज्वरसमन्वितं ॥ इति पटोलादिक्वाथः ॥ पुनर्नवा
पिप्पलत्रिवृद्गुडूचीशम्याकपथ्यामरदारुकल्कं ॥ शोफैककफोत्थे महिषाक्षमूत्रयु-
तं पिबेद्वासलिलं तयैषां ॥ इति पुनर्नवादिकल्कः क्वाथश्च ॥ स्नुक्क्षीरभाविताः ॥ ३५ ह ॥

कृष्णाः पथ्यामूत्रेण वा युताः ॥ योजिताः शमयंत्याशु श्लीपदं श्लेष्मसमुत्थितं ॥ इतियो
गद्वयं ॥ सिद्धं सिद्धक्रमं कुर्यात्सर्वजं सर्वमेव हि ॥ बिल्वपत्ररसं पूतं सोषणं त्रिभ
वे पिबेत् ॥ विडंगं धे[?] चैव दंतीं त्रिवि[?] दध्यात्कामलास्वपि ॥ इति बिल्वपत्रस्वरसः ॥ श्ली
पे[?] त्यागं तु जे कुर्यात्सेकलेपादि शीततं[?] ॥ तत्सजयेती[?] फलपूरमूलदेवदुहिंसौषध[?]
जः पृसेपः[?] ॥ श्लीपदे नीलाछादुग्ध[?] लवणं शिक्षीत[?] तनसोप्यसां[?] भोऽभयजस्तु पैत्ते ॥ अभयंड[?]
शीरं ॥ पक्वकरोध्नमुश्ची[?] रंदो बाशीतद्वयं पूर्वा ॥ वश्मीवगौरिकशिवारसांजनैर
क्तजे तथ्यागतौ ॥ होबाशीतद्वयं हरिद्राद्वयं चंदनद्वयं च ॥ पुराणपिण्याकयवातशी
युकृष्णाशिग्रुजत्वकसिकतासु खोष्णैः ॥ मूत्रैः सुतालेपनतः कफोत्थं श्लीपदं समूलं
जयति प्रसह्य ॥ स्तुतं जं स्तुतजे विशोधनी पंच्चपथौ[?] विश्रुति तेपरेकसेकैः ॥ विषे

॥२५७॥

जे विषहारि यच्च दोषोद्भवं रुचं तदपीह वीक्ष्य योज्यं ॥ नवनीततिलै रजःपयोभिः परिपि
ष्टैर्विहितः प्रलेप एकः ॥ अथ पुंभल्लातकतप्तं निहन्यादथवाक्कस्मदा तिलैर्विमि
श्रैः ॥ भल्लातकमहृत्रातः ॥ इति लेपाः ॥ पाठाजाजीपंचकोलांबुयाहृत्वा भ्रीपीताः कोष्ण
तोयेन पीताः ॥ शोथं हन्युः सन्निपातोपजातं तद्वद्भूमिनिंबपिप्पल्यौ पथ्ये च ॥ पीता हरि
द्रा ॥ इति पानाद्यं चूर्णं सन्निपातशोथे ॥ अथ पथ्यमाह ॥ संशोधनं लंघनमस्रमो
क्षः स्वेदः प्रलेपः परिषेचनं च ॥ पुराणतंदुलशालियवाः कुलत्थाः मुद्गाश्च भल्लातकं मधुजी
र्णसर्पिः ॥ निष्पावकाष्टिक्तकरस्कं शिगुरसोनककर्कोटकयालमूलं ॥ सुवर्चलं गंज
नकं पटोलं चेत्राग्रू धात्रीफलं मूलकानि ॥ पुनर्नवाचित्रकपारिभद्रश्रीपर्णीनिं
बेक्षुरपद्मयानि ॥ एरंडतैलं कटुकाहरिद्राहरीतकीक्षारनिषेवणं च ॥ भल्लातकं ॥२५७॥

गुग्गुलपसंचकटुनितिक्तानिचदीपनानि॥ मूत्राणिगोजामहिषीभवानिकंसहरि
कायाविधिशिलाजतूनि॥ यत्पांडुरोगेप्यभिवन्हिकर्मपुराणमदिष्टंचतदेवचापि॥ य
थामलंपथ्यमिदंनिरुक्तंशोथामयान्सत्वरमुच्छिनत्ति॥ अथापथ्यमाह॥ आम्लं
विदाहितवणं दिवाशयं मद्यं स्त्रियं॥ मद्यामिषगुरुस्निग्धं शोथरोगी परित्यजे
त्॥ कुत्रचित्तंत्रे तैलघृतयोरपि निषेधोक्तः स्त्रीतैलघृतमद्यानीत्यायुक्तेः॥ इति
शोथचिकित्सा॥ अथवृद्धिनिदानं॥ तत्रवृद्धेर्निदानंसंख्यांचाह॥ दोषास्त्रमेदोमू
त्रांत्रैः सवृद्धिः सप्तधागदः॥ मूत्रांत्रजावप्यनिलाद्धेतुभेदस्तुकेवलः॥१॥ वृद्धिशब्दे
नपुंल्लिंगः॥ सुश्रुतेतुस्त्रीलिंगः प्रयुक्तोस्ति॥ हेतुभेदः विप्रकृष्टहेतुभेदः॥ अनयोः
पृथक्पाठोवातजात्पृथक्चिकित्साभिधानात्॥ मधुकोशकृत्तु अनयोर्वात

||३५८||

जत्वेपिनिमित्तचिकित्साभेदात्पृथगभिधानमित्याह॥१॥ अथ संप्राप्तिमाह॥ क्रुद्धोनूर्ध्व
गतिर्वायुःशोथशूलकरश्चरन्॥ मुष्कौ वंक्षणतः प्राप्य फलकोशाभिवाहिनीः॥ प्रपीड्य
धमनीर्वृद्धिंकरोतिफलकोशयोः॥२॥ अनूर्ध्वगतिरधोगतिः॥ मुष्कौचरन्गच्छन्॥ वं
क्षणतः मेढ्रजंघासंधिसकाशात्॥ फलकोशाभिवाहिनीः मूत्रगामिनीर्धमनीः
मधुकोशाकृतु फलंच कोशश्च फलकोशौ अथवा फलयोः कोशौः फलकोशौ तद्वा।
हिनीरित्याहु॥ प्रपीड्य संदूष्य वृद्धिंकरोति॥ फलकोशयोरिति द्विवचनमुपलक्षणं
तेनैकफलकोशेदृश्यमानोवृद्धिः संगता॥२॥ अथ वातिकपैत्तिकावाह॥ वातपूर्णदृ
तिस्पर्शो रूक्षो वातादहेतुरुक्॥ पक्वोदुंबरसंकाशः पित्ताद्दाहोष्मपाकवान्॥३॥ अहेतु
रुगित्यत्रैवदर्शनत्र॥ तेन स्वस्थादपिविप्रकृष्टाकारणात् रुक्पीड्यत्रैसः॥ दाह

||३५८||

आभ्यंतरः उष्णाश्च हि स्तमता॥ ३ अथ श्लैष्मिकरक्तजामाह॥ कफाच्छीतोगुरुः स्निग्धः
कंडूमान् कठिनोल्परुक्॥ कृष्णस्फोटावृतः पित्तवृद्धिलिंगस्तु रक्तजः॥ ४ कृष्णस्फो
टावृत इति पैत्तिकाद्भेदः॥ तेन हेतुलिंगचिकित्साभेदाद्रक्तजवृद्धिः पृथग्गण्यते॥ ४
अथ मेदोजमूत्रजावाह॥ कफवन्मेदसो वृद्धिर्मृदुस्तालफलोपमः॥ मूत्रधारणशी
लस्य मूत्रजः स तु गच्छतः॥ ५ अंभोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः॥ मूत्र
कृच्छ्रमधः कुर्यात्संचलन्फलकोशयोः॥ इ तालफलोपमः नीलवर्णो रसः॥ संचलन्फल
कोशयोरधः मूत्रकृच्छ्रं मूत्रे रोधं च पीडां कुर्यात्॥ ५॥ इ॥ अथांत्रवृद्धिमाह॥ वातकोपि
भिराहारैः शीततोयावगाहनैः॥ धारणेरणभाराध्वविषमांगप्रवर्त्तनैः॥ ७॥ क्षो
भणैः क्षोभितोन्यैश्च क्षुद्रांत्रावयवं यदा॥ पवनो द्विगुणीकृत्य स्वनिवेशादधो

२५८

नयेत्॥ कुर्याद्वंक्षणसंधिस्थो ग्रंथ्याभं श्वयथुं तदा॥ ६॥ धारणमुपस्थितस्य वेगस्य धारणं॥ अनुपस्थितस्य वेगस्य प्रेरणं॥ विषमांगप्रवर्त्तनं वक्रत्वेनांगमोटनं॥ अन्यानि क्षोभणानि च यत्नवद्विगुरुहरणतोरधनुराकर्षणादीनि॥ तैः क्षोभितः संदूष्य संचालितः पवनः पदाक्षुद्रांत्रावयवं द्विगुणीकृत्य स्वनिवेशादधो नयेत्॥ तदा वंक्षणसंधिस्थः वंक्षणसंधौ ग्रंथिवत् श्वयथुं कुर्यादित्यर्थः॥ ७॥ अथोपेक्षितां पाश्चात्यवृद्धेरवस्थामाह॥ उपेक्षमाणस्य [illegible] वृद्धिमाध्मानरुक्स्तंभवतींच कुर्यात्॥ स पीडितोंतः स्वनवान्प्रयाति प्रध्मापयन्नेति पुनश्च मुक्तः॥ ८॥ उपेक्षमाणस्यार्थादेतद्वृद्धिमित्यर्थः॥ मरुत् वायुः वृद्धिं मुष्कवृद्धिं आध्मानरुक्स्तंभवतीं कुर्यात्॥ तत्राध्मानमुदरे रुक्प्रवृद्धयोर्मुष्कयोः॥ स्तंभो गात्रे तद्युक्तां कुर्यादित्यर्थः॥ भोजोप्याह॥ अंत्रवृद्धिगुणे

२५८

मारुतयवातोनयतियंक्षरणं॥ यंक्षरणात्तदुज्ञापुक्तं फलकोषं प्रपद्यत इति॥ स अत्रवृद्धिः
अंतःउदरे॥ प्रधापयत् आगमनमार्गमुच्छूनं कुर्वन् एति आयाति॥ ८॥ अथासाध्यं
मंत्रवृद्धिमाह॥ स्तद्वांत्रायपवाण्लेषानुक्छयोवीतसंचयात्॥ अंत्रवृद्धिरसाध्योयंवा
तवृद्धिसमाकृतिः॥१०॥ सकीटकस्यादित्याकांक्षायामाह॥ वातवृद्धिसमाकृतिरिति॥
नन्वसाध्योयमितिकथं॥ चिकित्साभिधानात्॥ मैवं॥ अप्राप्तफलकोशायां चिकित्सा
विधिः प्राप्तफलकोषात्वसाध्या॥ पाप्यायां वातस्यचिकित्साविधिः॥ यदुक्तं भोजेन॥
पाप्यां तामंत्रजां विदुरिति मधुकोशकृत॥१०॥ सामीप्यादत्रैव वर्ध्मामाह॥ अथाभिष्यं
दिगुर्वन्नाष्णुष्कूपूत्याभिषाशनात्॥ करोतिगूंथि वद्धोयंदोषोवंक्षणसंधिषु॥ ज्वर
शूलांगसादाढ्यं तं वर्ध्ममितिनिर्दिशेत्॥ इतिवृद्धिवर्ध्मनिदानं॥ अथवृद्धिचिकित्सा

॥ २६७ ॥

गुग्गुलुं रुबुतैलं वा गोमूत्रेण पिबेन्नरः ॥ अंत्रवृद्धिं निहंत्याशु चिरकालानुबंधिनीं ॥ इति
योगद्वयं ॥ सक्षीरं वा पिबेत्तैलं मासमेरंडसंभवं ॥ तैलं नारायणं वापि योज्यं पानाभ्यंजनब
स्तिषु ॥ इति योगद्वयं ॥ त्रिफलाक्वाथगोमूत्रं पिबेत्प्रातरतंद्रितः ॥ कोष्ठवातोद्भवं शोफं
निहन्याद्वृषणोद्भवं ॥ इति त्रिफलाक्वाथयोगः ॥ रास्नायष्ट्यमृतैरंडबलारग्वधगोक्षुरैः
पटोलैर्वृषेणापि विधिना विहितं शृतं ॥ रुबुतैलेन संयुक्तमंत्रवृद्धिं व्यपोहति ॥ इ
ति रास्नादिक्वाथः ॥ गंधर्वहस्ततैलेन क्षीरेण च युतं पिबेत् ॥ विशालामूलजं चूर्णं व
द्धिं हन्यान्नसंशयः ॥ इति विशालाचूर्णं ॥ हरीतकीचकैरातं धान्यं कर्षं पपकुष्ठ
क ॥ तैवगं सार्द्धकर्षं स्यात्सनाप्यक्षचतुष्टयं ॥ सर्वतः सार्द्धगुणिता सिता तावेत्त
प्यामेधु ॥ तेहोंडवृद्धिनाशाय द्वितीयो नास्यतः परः ॥ इति हरीतक्यादिलेहः ॥ गो

२६७ ॥

मुत्रयुक्तां रुबुतैलभृष्टांहरीतकीसैंधवचूर्णयुक्तां ॥ खादेन्नरः कोष्णजलानुपानांनि
हंतिवृद्धिंचिरजांप्रवृद्धां ॥ इतिहरीतकीयोगः ॥ भृष्टोरुबुकतैलेनकल्कः पथ्यासमुद्भ
वः ॥ कृष्णासैंधवसंयुक्तोवृद्धिरोगहरःपरः ॥ इतिपथ्याकल्कः ॥ तैलमेरंडजंपीत्वाब
लासिद्धपयोन्वितं ॥ आध्मानशूलोपचितामंत्रवृद्धिंजयेन्नरः ॥ बलाएकपलंपयः
पलद्वयंषोडशपलंजलं ॥ एतत्क्वाथेनावशिष्टंपयः बलासिद्धपयः ॥ इतिबलासिद्धप
यः ॥ मृतमात्रेतुवैकाकेविशस्तेनुप्रयोजयेत ॥ बध्नंमुहूर्त्तमेधावीतस्त्रणाद्रुजो
भवेत ॥ अस्यार्थः ॥ काकेहत्वातदुदरंविदार्यतत्क्षणमेवकवोष्णेतस्मिन्नब्रध्नंप्र
वेशयेतमुहूर्त्तमात्रंनिक्षिप्यपश्चात्निष्कास्यबंधःकार्यः ॥ पित्तगूंथिकेमेलौनं
पित्तवृद्धिमुपाचरेत ॥ जलौकाभिर्हरेद्रक्तंवृद्धौपित्तसमुद्भवे ॥ चंदनंमधुकंपद्म

३६१

मुशीरं नीलमुत्पलं ॥ क्षीरपिष्टं प्रलेपेन दाहशोथरुजापहं ॥ इति चंदनादिलेपः ॥ पंचव
ल्कलकल्केन प्रलेपः सर्पिषायुतः ॥ मुखरोगं प्रशमयेत पित्तास्रकफसंभवं ॥ इति
पंचवल्कलेपः ॥ मुहुर्मुहुर्जलौकाभिः शोणितं रक्तजे हरेत ॥ पिवेद्धि रेचनं चापि शर्क
राक्षौद्रसंयुतं ॥ शीतमालेपनं सर्वं सर्वपित्तहरं तथा ॥ पित्तवृद्धिक्रमं कुर्यादामेप
क्के च रक्तजे ॥ इति रक्तवृद्धौ ॥ त्रिकटुत्रिफलाक्काथं सक्षारलवणं पिवेत ॥ विरेचनमि
दं श्रेष्ठं कफवृद्धिविनाशनं लेपनं कटुतीक्ष्णोष्णं स्वेदनं रूक्षमेव च ॥ परिषेकोप
नाहौ च सर्वं रूक्षमिहेष्यते ॥ पीतदारुकषायं च पिवेन्मूत्रेण संयुतं ॥ वचासर्षप
कल्केन प्रलेपः शोथनाशनः ॥ शिग्रुत्वक्सर्षपैः पिष्टैर्लेपः शोथकफापहः ॥ इ
ति श्लेष्मवृद्धौ ॥ छिन्नं मेदः समुत्थं तु लेपयेल्लसुरसादिना ॥ शिरो विरेचनैर्द्र ॥ ३६१ ॥

वैः सुखोष्णैर्मूत्रसंयुतैः ॥ संस्वेद्य मूत्रमथवंचस्नुयदेनवेष्टयेत् ॥ सोयन्याः पार्ष्णि
तोधस्ताद्विद्रुद्धीहीमुखेनवै ॥ गुग्गुलोप्य मगाच्छंत्यां मत्रवद्धौ विचक्षणः ॥ व्री
हीमुखेनशस्त्रविशेषेण ॥ प्रोक्षोपरिचकर्णं तेत्यक्षा सिवनिमादरात् ॥ व्य
त्यासाद्याशिरां विद्धे दंस्त्रवद्धिनिवर्त्तये ॥ अथ रसः ॥ शुद्धं सूतं तथा गंधं मृता
न्येतानि योजयेत् ॥ लोहं रंगं तथा ताम्रं कांस्यं चाभ्रं विशोधितं तालकं तुत्थकं
चापि तथा संखं वराटकं ॥ त्रिकटु त्रिफला चव्यं विडंगं चद्रदालकं ॥ कर्चूरमाग
धीमूलं पाठा च हवुषा वचा ॥ एलाबीजं देवकाष्ठं तथा लवणपंचकं ॥ एतानि
समभागानि चूर्णयेद्दप्पकारयेत् ॥ कषायेण हरीतक्या वटिकां टंकसंमितां
एकां तां वटिकां पश्चात् निगलेद्वारिणा सह ॥ अंडवृद्धिरसाद्योपितस्य नश्यति

॥३६२॥

सत्वरं ॥ इति वृद्धिबाधिका वटी ॥ अजाजी हपुषा कुष्ठ गोधूम बदरास्तिलाश्च ॥ कांजिकेना
सममं पिष्ट्वा कुर्याद्बृध्नप्रलेपनं ॥ इति बृध्ने लेपः ॥ पातालजंत्रयोगेन तैलं वृश्चिक सं
भवं ॥ प्रलेपान्नाशयेत्येव वृद्धिमासानसंशयः ॥ इति वृश्चिक तैलं ॥ गोघृतं सैंधवो
पेतं शोवृक कस्थं रचेकरैः ॥ पक्कं स मदिनैर्हन्यात् श्रीघ्रं वर्द्धं कुरंडकं ॥ इति घृतं लेपे ॥
मूलं विल्व कपित्थयो ररलुक स्याग्निर्वृहत्योर्द्वयोः श्यामा पूतिकरंज शिग्रुकतरु
विंश्चौषधार स्वरं ॥ कुस्मागृंथिकचव्यपंचलवणाः क्षाराजमोदान्वितं ॥ पीतं कांजि
कको स्वतोयम पितैष्म्यलीकृतं बध्न जित ॥ इति विल्वमूलादि चूर्णं ॥ अथ पथ्य
माह ॥ संशोधनं वस्तिरसृग्विमोक्षः स्वेदः प्रलेपो रक्तशालयश्च ॥ एरंडतैलं सुर

॥३६२॥

भीजलं च तक्रं घृतं शिग्रुफलं पटोलं ॥ पुनर्नवा गोक्षुर काग्निमथ तां वृत पथ्या

लवणं रसोनं ॥ यदाम्रवातापहमग्निकारि नवाल्पपानं मधुतप्तमंभः ॥ अंडवृद्धेस्त
ला योऽश्च दाहोऽस्त्यासतो वा क्रुधिरा व्यधश्च ॥ तथा श्रुतं शास्त्रविधिश्च वर्गः स्याद्वृ
धनवृद्धामयिनां सुखाय ॥ अथापथ्यमाह ॥ वच्चाबल्यशनं मार्गमुपवासं गुरूणि च
वेगाघातं पृष्ठपानं व्यायामं मैथुनं त्यजेत ॥ इति वृद्धिचिकित्सा ॥ अथ गलगंडादिनि
दानं ॥ तत्र गलगंडस्य सामान्यं लिंगमाह ॥ निबद्धः श्वयथुर्यस्य मुष्कवल्लंबते गले
महान्वा यदि वा ह्रस्वो गलगंडं तमादिशेत ॥ १ ॥ निबद्धः दृढः अचलो वा ॥ मुष्कवत् अं
डवत् ॥ गल इति हनुमन्ययोरुपलक्षणं ॥ तथा च भोजः ॥ महांतं शोथमस्यं वा हनुमन्या
गलाश्रयं ॥ मुष्कवल्लंबमानं तु गलगंडं विनिर्दिशेदिति ॥ १ ॥ अस्य संप्राप्तिमाह ॥ वा
तः कफश्चापि गले प्रदुष्टौ मन्ये तु संसृत्य तथैव मेदः ॥ कुर्वंति गंडं क्रमशः स्वलिंगै

॥ ३६३ ॥

समन्वितं तं गलगंडमाहुः ॥ २ ॥ क्रमशः शनैः शनैः ॥ स्वलिंगैः वातकफमेदोलक्षणैः
पैत्तिकस्तु गलगंडो न भवत्येव ॥ व्याधिस्वभावात् चातुर्थिकज्वरवत् ॥ तदुक्तं चातु
र्थिको दर्शयतीत्यादिना ॥ २ ॥ तत्र वातिकमाह ॥ तोदान्वितः कृष्णशिरावनद्धः श्यावा
रुणो वा पवनात्मकस्तु ॥ पारुष्ययुक्तश्चिरवृद्ध्यपाको यदृच्छया पाकमियात्कदा
चित् ॥ वैरस्यमास्यस्य च तस्य जंतोर्भवेत्तथा तालुगलप्रशोषः ॥ ३ ॥ चिरवृद्ध्यपाकः
चिरेण वृद्धिरपाकश्च यस्य स तथा ॥ यदृच्छया पाकमियादिति कारणप्रतिनियमे
न कदाचित्पाकं गच्छति ॥ कारणप्रतिनियमश्च वाह्योभिमतः ॥ आभ्यंतरं तु पाकका
रणं पित्तरक्तं च नियतमेव ॥ कदाचिदिति न सर्वकालं ॥ ३ ॥ अथ श्लैष्मिकमाह ॥
स्थिरः सवर्णो गुरुरुग्रकंडूः शीतो महांश्चापि कफात्मकस्तु ॥ चिराच्च वृद्धिं भज

॥ ३६३ ॥

तेचिराद्वाप्रपच्यतेमंदरुजःकदाचित्॥ माधुर्य्यमास्यस्यचतस्यजंतोर्भवेत्तथातालुग
लप्रलेपः॥४॥ सवर्णःप्रकृतिसमवर्णैः॥ कदाचित्चिरात्प्रपच्यतेपाकोपिचिरात्
भवतीत्यर्थः॥ प्रलेपःश्लेष्मरणा॥४॥ अथमेदोजमाह॥ स्निग्धोमृदुःपांडुरनिष्टगंधो
मेदोन्वितःकंडुयुतोऽरुजश्च॥ प्रलंबतेऽलाबुवदस्यमूलोदेहानुरूपक्षयवृद्धियुक्तः॥
स्निग्धास्यतातस्यभवेच्चजंतोर्गलेनुशब्दंकुरुतेचनित्यं॥५॥ देहानुरूपक्षयवृद्धियु
क्तइतिदेहक्षयेक्षयंदेहवृद्धौवृद्धिंयातीत्यर्थः॥ अथासाध्यमाह॥ कृच्छ्रात्प्रश्वसंतंमृ
दुसर्वगात्रंसंवत्सरातीतमरोचकार्त्तं॥ क्षीणंचवैद्योगलगंडयुक्तंभिन्नस्वरंनैवन
रंचिकित्सेत्॥६॥ कृच्छ्राद्दुःखेनप्रश्वसंतंश्वासविमोक्षकारिणं॥ भिन्नस्वरंस्वरभेद
युक्तं॥६॥ अथपेयान्नतुस्वतयागंडमालामंत्रेयाह॥ कर्कंधुकोलामलकप्रमाणैःक

॥३६४॥

क्षांसमन्यागलवंक्षणेषु॥मेदःकफाभ्यांचिरमंदपाकैःस्याद्गंडमालाबहुभिस्तुगंडैः॥१॥
कर्कंधुःक्षुद्रबदरी॥कोलंवृहद्वदरं॥मेदःकफाभ्यामितिमेदोदूष्यंकफोत्रदोषआरं
भकः॥मेदःकफौचप्राधान्येनोक्तौतेनवातपित्तसंबंधोप्यत्रद्रष्टव्यः॥वातपित्तकफा
वद्धामेदश्चापीत्यादिभोजवचनात्॥चिरमंदपाकैः॥चिरेणमंदोल्पःपाकोयेषांतैः
गंडमालेतिमालातुल्यगंडयोगात्संज्ञा॥गंडमाला॥१॥अपगंडमालाया एवावस्थावि
शेषमपचीमाह॥तेग्रंथयःकेचिदवाप्तपाकाःस्रवंतिनश्यंतिभवंतिचान्ये॥काला
नुबंधंचिरमादधातिसैवापचीतिप्रवदंतिकेचित्॥२॥तेग्रंथयःगंडमालायाए
वगंडाःकेचिदवाप्तपाकाःसंतःस्रवंतिकेचिन्नश्यंतितिरोभवंति॥अन्येभवंति
च॥कालानुबंधंचिरमादधातियागंडमालाचिरंतिष्ठतिसैवापचीइतिकेचि॥३६४॥

इदंति॥ अथ अपच्याः साध्यत्वादिकमाह॥ साध्या स्रुता पीनसपार्श्वशूलकासज्वर

च्छर्दियुता त्वसाध्या॥ पी॥ सा अपची साध्या स्रुता कथिता॥ पीनसपार्श्वशूलादिभि

रुपद्रवैस्तु असाध्या स्रुतेति योजना॥ पी॥ अपचीगुडकतुल्यतया ग्रंथिमाह॥ वाता

दयो मांसमसृक्च दुष्टाः संदूष्य मेदस्तथा शिराश्च॥ वृत्तोन्नतं विग्रथितं तु शोफं कु

र्वंत्यतो ग्रंथिरिति प्रदिष्टः॥१॥ वातादयः वातपित्तकफाः॥ दुष्टिः स्वमात्रवृद्धिरेव क्षी

णानां विकारकरत्वाक्षमत्वात्॥ यद्येवं तर्हि वातक्षये कथं मंदचेष्टता दृश्यः॥ उच्यते

तत्क्षये विरोधिदोषकोपात्॥ यथा मधुरस्निग्धादिभिः तैक्ष्ण्यरौक्ष्यसात्म्यात् श्लेष्मा

कुप्यति॥ वृद्धिर्विपि विरोधिनामिति वचनात्॥ वृत्तोन्नतं वृत्तं वर्तुलं उन्नतमुच्छूनं॥

विग्रथितं ग्रंथिरूपं॥ अतएव ग्रंथिसंज्ञा॥ स पंचधा वातिकः पैत्तिकः श्लैष्मिकः

३६५

मेदोजः शिराजश्चेति ॥१०॥ तेषु वातिकस्य लक्षणमाह ॥ आयम्यते वृश्च्यते तुद्यते च प्रभ-
ज्यते मथ्यति भिद्यते च ॥ कृष्णो मन्दस्रावी शिरावाततो भिन्नः स्त्रवेच्छानिलजो सव्रणश्च
आयम्यते आकृष्य दीर्घीक्रियत इव ॥ वृश्च्यति आश्रयं छिनत्तीव ॥ प्रभज्यते खलती-
व ॥ मथ्यती आलोडयतीव ॥ भिद्यते विदार्यत इव ॥ आततः विस्तारितः वर्त्तिरिव मृ-
दुः ॥ न त्वं ततः कठिनः ॥ असृजं रुधिरं अच्छं प्रकृतं स्त्रवेदित्यर्थः ॥११॥ अथ पैत्तिकस्य ल-
क्षणमाह ॥ दंदह्यते धूप्यति चूष्यते च पापच्यते प्रज्वलतीव चापि ॥ रक्तः स पीतोप्य-
थवापि पित्ताद्भिन्नः स्त्रवेदुष्णमतीव चास्रं ॥१२॥ दंदह्यते भृशं दाहं करोति सकलशरीरे
धूप्यति अंतस्तापं करोति ॥ चूष्यते ऽग्रं गेनेव ॥ पापच्यते भृशं पाकं करोति ॥ प्रज्व-
लतीव ज्वालाव्युक्त इव भवति ॥ सः गंरूपि ॥ असृजं रुधिरं ॥ अतीव दुष्टं रक्तं सम्तादिषु

३६५

क्तं मज्जप्रयुक्तं च ॥ १२ ॥ अथ पैष्टिकस्य लक्षणमाह ॥ पीतो विवर्णोऽस्य रुजोतिकंडुः
पाषाणवत्संहननोपपन्नः ॥ चिराभिवृद्धिश्च कफप्रकोपाद्भिन्नः स्रवेच्छुक्लघ
नं च पूर्वं ॥ १३ ॥ अविवर्णः प्रकृतिवर्णः संहननोपपन्नः संहततायुक्तः ॥ १३ ॥ अ
थ मेदोजस्य लक्षणमाह ॥ शरीरवृद्धिक्षयवृद्धिहानिः स्निग्धो महानल्पकंडुयुतो
रुजोऽल्पः ॥ मेदःकृतो गच्छति चात्र भिन्ने पिण्याकसर्पिःप्रतिमं च मेदः ॥ १४ ॥ श
रीरवृद्धिक्षयवृद्धिक्षयाभ्यां यथाक्रमं वृद्धिहानी यस्य स तस्तथा ॥ पिण्याकसर्पिः
प्रतिमे तिलखलिसदृशं सर्पिःसदृशं वा मेदः गच्छति स्रवतीत्यर्थः ॥ १४ ॥ अथ
शिराजस्य लक्षणमाह ॥ व्यायामजातैरबलस्य तैस्तैराक्षिप्य वायुस्तु शिराप्र
तानं ॥ संकोच्य संपीड्य विशोष्य चापि ग्रंथिं करोत्युन्नतमाशु वृत्तं ॥ १५ ॥ ग्रंथिः

॥३६६॥

सिराजः स तु कृछ्रसाध्यो भवेद्यदि स्यात्सरुजश्चलश्च ॥ अरुक्सएवाप्यचलो महां
श्च मर्मोत्थितश्चापि विवर्जनीयः ॥३६॥ तैस्तैर्वं सर्वद्विग्रहादिभिः ॥ आक्षिप्यचारे
पित्वा संपीड्य संहतीकृत्य ॥ उन्नतमाक्षुवतमिति पुनरुक्तिरतिशयार्थं चकारा
दन्येपि ग्रंथयोऽरुजत्वादियोगादसाध्याः ॥ तथा च भोजः ॥ पंचैतान्रुजो ग्रंथीन्मर्म
जातां च तांस्त्यजेत ॥ कपोलगलमन्यासु दुश्छिद्रिक्लिस्या हि संधिषिविति ॥१५॥१६॥ अथ
मांसप्रकोपितदुष्टिसामान्यादत्रैवार्बुदमाह ॥ तत्र तस्य संप्राप्तिपूर्वकं सामान्यं ल
क्षणमाह ॥ गात्रप्रदेशे क्वचिदेव दोषाः संमूर्छितामांसमसृक्प्रदूष्य ॥ वृत्तं स्थिरं म
दरुजं महांतमनल्पमूलं चिरवृद्धपाकं ॥ कुर्वंति मांसोच्छ्रयमत्यगाधं तदर्बुदं शास्त्र
विदो वदंति ॥३७॥ क्वचिदेवैत्यनियतदेशे ॥ संमूर्छिताः प्रवृद्धाः ॥ महांतं ग्रंथ्यपेक्षं ॥३६६॥

या॥ चिरेणवृद्धिरपाकश्च यस्य तं चिरवृद्ध्यपाकं अपाकमिति ग्रंथेः सकाशादस्य भे-
दत्वापर्कं ॥ मांसोच्छ्रयं मांसोच्छ्रयतया प्रतीयमानं ॥ अत्यगाधं दूरानुप्रविष्टं ॥ अत-
एवानस्य मूलमित्युक्तं ॥ १४ ॥ अथ तस्य निदानपूर्विकाति विशिष्टानि लक्षणान्या-
ह ॥ वातेन पित्तेन कफेन चापि रक्तेन मांसेन च मेदसा च ॥ तज्जायते तस्य च लक्षणा-
नि ग्रंथेः समानानि सदा भवंति ॥ १५ ॥ ग्रंथेः समानानि वातिकपैतिकश्लैष्मिकमे-
दोजानां ग्रंथीनां लक्षणैर्वीति कपैत्तिकश्लैष्मिकमेदोजानामर्बुदानां लक्षणानि
तुल्यानि भवंति ॥ १५ ॥ अथ रक्तार्बुदमाह ॥ दोषः प्रदुष्टो रुधिरं शिरास्तु संकोच्य सं-
पीड्य ततस्त्वपाकं ॥ सस्रावमुन्नह्यति मांसपिंडं मांसांकुरैराचितमाशुवृद्धं ॥ १६ ॥
करोत्यजस्रं रुधिरं प्रवृत्तमसाध्यमेतद्रुधिरात्मकं तु ॥ रक्तक्षयोपद्रवपीडितत

॥३६७॥

त्वात्तां दुर्भवेदर्बुदं पीडितरक्त ॥२०॥ दोषोत्रपीतं ॥ रुधिरं शिराश्च संकोच्य संपीड्य संहती
कृत्य ॥ मांसास्रजोः सर्वेष्वर्बुदेषु दूष्यत्वं रक्तजे तु विशेषतो दुष्टिः एवं मांसार्बुदे विशेष
तो मांसस्य दुष्टिर्बोद्धव्या ॥ ततः मांसपिंडं उन्नाहति उन्नतं करोति ॥ अपाकं ईषत्पाकं केप
थ्या स्यादेवमिति क्रियाविशेषणं ॥ ईषत्पाके च्छेकदेशपाकेन ॥ कथंभूतं सास्रावमी
षत्स्रावं ॥ आप्लुष्टदेहशीघ्रवर्द्धनं ॥ ईक्षयोपद्रवपीडितत्वात् रक्तक्षयोपद्रवाः ॥ स्रप्रु तो
तोक्तास्तैः पीडितत्वात् ॥ अर्बुदपीडितः रक्तार्बुदपीडितः ॥१८॥२०॥ अथ मांसार्बुद
स्य संप्राप्तिमाह ॥ मुष्टिप्रहारादिभिरर्दितेगे मांसं प्रदुष्टं समुपैति शोथं ॥ अवेदनं
स्निग्धमनन्यवर्णमपाकमश्मोपममप्रचाल्यं ॥२१॥ मांसं प्रदुष्टं वातेन ॥ अपाकं
पाकरहितं ईषत्पाकं वा ॥ अश्मोपमं पाषाणवत्कठिनं ॥ अप्रचाल्यं स्थिरं ॥२१

॥३६७॥

तस्य निदानमाह ॥ प्रदुष्टमांसस्य नरस्य गाढमेतद्भवेन्मांसपरायणस्य ॥ २१ ॥ प्रदुष्टे
ति मांसाशनाभ्यासेन यः प्रदुष्टमांसस्तस्यैतद्भवतीत्यर्थः ॥ २१ ॥ अथासाध्यमाह ॥
मांसार्बुदं त्वेतदसाध्यमाहुः साध्येष्वपीमानि विवर्जयेच्च ॥ संप्रस्रुतं मर्मणि य
च्च जातं स्रोतःसु वा यच्च भवेदचाल्यं ॥ २२ ॥ साध्येष्वपि वातजादिष्वपि ॥ इमानि व
क्ष्यमाणानि संप्रस्रुतादीनि ॥ संप्रस्रुतं स्राववद्युक्तं ॥ स्रोतःसु नासादिषु ॥ अचाल्यं
स्थिरं ॥ २२ ॥ अपरमसाध्यमाह ॥ यज्जायतेऽन्यत्खलु पूर्वजाते ज्ञेयं तदध्यर्बुदमर्बुद
ज्ञैः ॥ यद्द्वंद्वजातं युगपत्क्रमाद्वा द्विरर्बुदं तच्च भवेदसाध्यं ॥ २३ ॥ युगपदेकदेशो ॥ त
था च भोजः ॥ अर्बुदं त्वर्बुदे जातं द्वंद्वजं चानुजं च यत् ॥ द्विरर्बुदमिति ज्ञेयं तदसाध्यं
विनिर्दिशेत ॥ २३ ॥ अथार्बुदानां पाकाभावे हेतुमाह ॥ न पाकमायांति कफाधि

॥३६८॥

कल्पान्ते दोषकृत्वाच्च विशेषतस्तु । दोषस्थिरत्वाद्ग्रथनाच्च तेषां सर्वार्बुदान्येव निस
र्गतः स्मृताः ॥२४॥ दोषस्थिरत्वात् सदा सदृश दोषत्वात् ॥ रक्तपित्तं हि अधिकं स तत्काला
न्तरेण पाकमालभते ॥ अत्र तु सदा शुद्धसत्वेन पाकारंभकं न भवतीत्यर्थः ॥ ग्रंथेना
त ग्रंथिरूपत्वात् ॥ मन्यपच्यां कफमेदसोरधिकेपि विपाको दृश्यते ॥ तथात्र क
थं न पाक इत्याह ॥ निसर्गतः स्वभावात् ॥२४॥ इति गलगंड गंडमालापची ग्रंथ्यर्बुद
निदानं ॥ अथ गलगंडादीनां चिकित्सा ॥ कांचनारत्वचः क्वाथः शुंठीचूर्णेन संयुतः
गंडमालां हरत्याशु चिरकालानुबंधिनीं ॥ इति कांचनारत्वक्क्वाथः ॥ गंधकं कर्षमा
त्रं च त्रिवाराः स्यात् कर्षपंचकं ॥ द्विकर्षं माक्षिकं चैव गोघृतं च पलोन्मितं ॥ एकीकृ
त्य ततः सर्वं किंचित्किंचित् पिबेन्नरः ॥ गोमूत्रेण संयुक्तं गलरोगं विनाशयेत् ॥२॥ ॥३६८॥

तिगंधकाद्यं चूर्णं ॥ तरुणं जलकुंभ्याः सुकरणा चूर्णेन संयुतं ॥ प्रभाते नित्यमश्नीया
त् गलगंडप्रशांतये ॥ इति जलकुंभीक्षारः ॥ मधुनाढ्योऽसकृत्पीतः क्वाथो वरुणमू
लजः ॥ गंडमालां निहंत्याशु चिरकालानुबंधिनीं ॥ इति वरुणमूलक्वाथः ॥ सर्षपा
न् शिग्रुबीजानि शणबीजानि तसीयवा ॥ मूलकस्य तु बीजानि तक्रेणाम्लेन पेषयेत्
गलगंडो गंडमाला ग्रंथयश्चैव दारुणाः ॥ प्रलेपादस्य नश्यंति विलयं यांति सत्वरं
इति सर्षपादिलेपः ॥ रक्षोघ्नतैलयुक्तेन जलकुंभीकभस्मना लेपनं गलगंडस्य चि
रोत्थस्यापि नाशनं ॥ इति जलकुंभीभस्मलेपः ॥ स्वापयेद्गलगंडेषु प्रच्छन्ना निघृह्
नि च ॥ गंडगोपालिकां पिष्ट्वा तत्र लेपं प्रकल्पयेत ॥ अवश्यं नश्यति क्षिप्रं गलगं
डगदो मुना ॥ प्रलेपस्य तु भूतो यं बहुधा बहुभिर्जनैः ॥ गंडगोपालिकाज्ञा मू

॥३ हृदि॥

वाटिकायांसुतमः कीटविशेषः ॥ इतिगंडगोलिकालेपः ॥ आरग्वधशिफाक्षिप्रं पिष्ट्वा
तंडुलवारिणा ॥ सम्यक्कृतस्याः प्रलेपेनगंडमालांव्यपोहति ॥ इतिसम्याकजटालेपः
गंडमालामपाक्तांनश्यंकर्मलियोजयेत् ॥ निर्गुंड्यास्तुशिफासम्यक्वारिणापं
रिपेषिता ॥ इतिनिर्गुंडीमूललेपः ॥ पीतसर्षपकंचैवशिग्रुबीजंवाराहजंमलं ॥ समभागं
द्रव्यंचैवकृत्वामस्मप्रयत्नतः ॥ वस्त्रपूतंततःकृत्वाकटुतैलेनलेपयेत् ॥ गंडमालां
जयत्युग्रांसाध्यासाध्यांनसंशयः ॥ इतिपीतसर्षपादिलेपः ॥ पिप्पलीपंचपण्णं
र्णांचशुंठीपंचमितंतथा ॥ सैंधवंचद्रव्यंमार्पगुडंजीर्णंपलोन्मितं ॥ जतेनदेयंनश्यं
वैगलरोगंविनाशयेत् ॥ इतिपिप्पल्यादिनस्यं ॥ पलमर्द्धपलंवापिपिष्ट्वातंडुलवा
रिणा ॥ कांचनारत्वचंपीत्वागंडमालांव्यपोहति ॥ इतिकांचनारत्वक्पानं ॥ ॥३ हृदि॥

कांचनारत्वचो ग्राह्याः पलविंशतिकाबुधैः ॥ त्रिकटुद्वादशपलं त्रिफलाष्टपलाभ
वेत ॥ पलैकं वरुणः कार्य्यः एलात्वक्पत्रकं तथा ॥ एकैकं कर्षमात्रं स्यात्सर्वाण्ये
कत्र चूर्णयेत ॥ यावच्चूर्णमिदं सर्वं तावन्मात्रस्तु गुग्गुलुः ॥ संक्षुद्य सर्वमेकत्र पि
डं कृत्वा च धारयेत ॥ गुटिकाः शाणिकाः कृत्वा प्रातर्ग्राह्या यथोचिताः ॥ गंडमालां
जयत्युग्रामपचीमर्बुदानि च ॥ ग्रंथीन व्रणान्न सगुल्मांश्च कुष्ठानि भगंदरं ॥ प्र
देयश्चानुपानार्थं क्वाथो मुंडीतिकाभवः ॥ क्वाथः खदिरसारस्य पथ्याक्वाथः कवो
ष्णकः ॥ इति कांचनारगुग्गुलुः ॥ चक्रमर्दकमूलस्य कल्कं दत्वा विपाचयेत ॥ केश
राजरसे तैलं कटुकं मृदुवह्निना ॥ पाकशेषे विनिक्षिप्य सिंदूरमवतारयेत ॥ एत
त्तैलं निहंत्याशु गंडमालां सुदारुणां ॥ केशराजो भृंगराजः ॥ इति चक्रमर्दकैतैलं

३७०

गुंजामूलकसैंसैतैलं विपक्वं हिङ्गुलगां भसा॥ हरेत्स्यंगनस्याभ्यांगंडमालां सुदारु
णां॥ इति गुंजातैलं॥ व्योषं विडंगं मधुकं सैंधवं देवदारु च॥ तैलमेभिः श्रितं नस्या
त्कृच्छ्रामप्यपचीं हरेत॥ इति व्योषादितैलं॥ चंदनं साभयो लाक्षा वचा कटुकरो
हिणी॥ एभिस्तैलं श्रृतं पीतं समूलामपचीं हरेत॥ इति चंदनादितैलं॥ तिक्तालावु
फले पक्वे सप्ताहमुषितं जलं॥ मद्यं वा गलगंडघ्नं पानात्पथ्यानुसेवनात॥ इति
जलादिपानं॥ स्वर्जिकामूलकक्षारः शंखचूर्णसमन्वितः॥ एतेनाविहितो
लेपो हंति गृध्रीस्तथार्बुदं॥ गृध्रिनियोनश्यति मेषजेन निष्कास्यतं शस्त्रचिकि
त्सकेन॥ जात्यादिपक्वेन घृतेन वैद्योऽन्नरोपेन वान्येन च संचिकित्सेत॥ गूढार्बु
दानां नयतो विशेषः प्रदेशहेत्वाकृतिदोषदूष्यैः॥ अतश्चिकित्सेद्भिषग

३७०

र्बुदानि विधानविद्धं चिकित्सितेन ॥ हरिद्रालोध्रपत्तंगगृहधूममनःशिलाः
मधुप्रगाढो लेपोयं मेदोर्बुदहरः परः ॥ इति हरिद्रादिलेपः ॥ मूलकस्य कृतः क्षा
रो हरिद्रायास्तथैव च ॥ शंखचूर्णेन संयुक्तो लेपः सिद्धोर्बुदापहः ॥ इति मूलक
क्षारादिलेपः ॥ वटदुग्धकुष्ठरोमकलिप्तं वद्धं वटस्य पत्रेण ॥ अष्टभिस्त्रिः सप्त
रात्रान्महदल्पकयशांतिमर्बुदं गछेत ॥ इति वटदुग्धादिलेपः ॥ शिग्रुमूलकयोर्वी
जैः रक्षोघ्नं सुरसां यवान् ॥ तक्रेणाम्लारिष्टुपिष्टानि लिंपेदर्बुदशांतये ॥ सुरसां तु
लसीं ॥ यवान्निंद्रयवान् ॥ इति शिग्रुमूलादिलेपः ॥ चिंडुंग्गानतसिंधूत्यरास्नो
ग्राक्षारदारुभिः ॥ तैलंचेत्तुगीरिसे सिद्धं कटुतुंबीरसे शुभे ॥ गंडमालाहरं श्रेष्ठं
गलगंडेपि शस्यते ॥ तैलमत्र कटु ॥ स्वरसस्तु कटुतुंब्याः फलानां पत्राणां वा

॥२०१॥

इति कटुतुंबीतैलं ॥ निर्गुंड्याः स्वरसे तैलं लांगलीमूलकल्कितं ॥ सिद्धं नस्यान्निहंत्याशु गंडमालां सुदारुणां ॥ इति निर्गुंडीतैलं ॥ सूर्यावर्त्तरसो नाम्ना गलगंडोपनाहनात् स्फोटास्रावैः प्रशमं याति गलगंडो न संशयः ॥ रक्तं कुपनाहनं ॥ कोशातकीनां स्वरसे न नस्यं स्तुंब्यास्तु वापि प्रतिसंयुतेन तैलेन वारिष्ठमवेन कुर्याद्धचोपकुल्येन समाक्षिकेण ॥ इति योगचतुष्टयं ॥ छुछुंदर्यां विपक्वं तु क्षरणात्तैलं वरं ध्रुवं ॥ अभ्यंगान्नाशयेन्नृणां गंडमालां सुदारुणां ॥ इति छुछुंदरीतैलं ॥ श्वेतापराजितामूलं प्रातः पिष्ट्वा पिबेन्नरः ॥ सर्पिषा नियताहारो गलगंडप्रशांतये ॥ इति विष्णुक्रांतामूलयोगः ॥ हिंस्रावचागुडूचीत्रिफलानतदारुपिप्पलीकल्कैः ॥ [illegible]ंगस्वरसे सिद्धं तैलं गलगंडजिन्मधुना ॥ इति हिंस्राद्यं तैलं ॥ क्षेत्रमुंडीदलोद्धृतं द्विपलं प्रपिबे

॥२०१॥

दूसं ॥ कामलां गंडमालां च नाशयेद् दपचीमपि ॥ क्षेत्रमुंडी लघुमुंडी ॥ नवकार्यासि

कामूलं तंदुलैः सहयोजितं ॥ कृत्वा पूपलिकां खादेद् दपचीनाशनाय च ॥ सर्षपा

रिष्टपत्राणि दग्ध्वा भल्लातकैः सह ॥ छागमूत्रेण संपिष्टमपचीघ्नं प्रलेपनं ॥ सो

भांजनं देवदारुकांजिकेन तु पेषितं ॥ कोष्णं प्रलेपनाद्धन्याद् दपचीमपि दुस्तरां ॥ शो

थक्रियां प्रकुर्वीत ग्रंथिकाये बुद्धिमान् ॥ पक्वे भिन्ने व्रणवत् कुर्यात् शोधनं रोपणं ॥

तथा ॥ पित्तग्रंथौ निषेचेत क्षीरोदकनिषेचनं ॥ पथ्याचूर्णं पिबेद् द्राक्षारसेनेक्षुर

सेन वा ॥ जलौकाभिर्हरेद्रक्तं पित्तग्रंथिप्रशांतये ॥ जंबूमधूककुभं वेतसानां तु

वल्कलैः ॥ प्रलेपं कल्पयेद् ग्रंथौ वेदनापरिशांतये ॥ अथ पथ्यमाह ॥ छर्दिर्विरेचनं

नस्यं स्वेदो धूमः शिरोव्यधः ॥ अग्निकर्म क्षारयोगः प्रलेपो लंघनानि च ॥ उरा

॥३७२॥

णेघृतपानेयमीर्ली लोहितष्ठालयः॥ यवमुद्गपटोलच रक्तशिग्रुः कटि स्वकं॥ दोषना
नियसर्पींषि गुग्गुलुक्षारशिलाजतु॥ विशेषाद्गलगंडेषु विध्याज्जिव्हातले शिरे॥
गलगंडगंडमालापचीग्रंथ्यर्बुदातुरे॥ यथादोषं यथावस्थं पथ्यमेतत्प्रकीर्तितं॥ अ
पथ्यमाह॥ दुग्धेक्षुविकृतिः सर्वा मांसं चानूपसंभवं॥ पिष्टान्नमम्लमधुरं गुर्व
भिष्यंदि कारि च॥ गलगंडगंडमालापचीग्रंथ्यर्बुदामयान्॥ चिकित्सन्नगदंकारो
पथ्योर्थी परिवर्जयेत॥ इति गलगंडगंडमालापचीग्रंथ्यर्बुदचिकित्सा॥ अथ श्लीप
दनिदानं॥ तत्र श्लीपदस्य विप्रकृष्टं निदानमाह॥ पुराणोदकभूयिष्ठाः सर्वर्तुषु च
शीतलाः॥ ये देशास्तेषु जायंते श्लीपदानि विशेषतः॥१॥ विशेषत इति वचनेनान्य
त्रापि श्लीपदं भवतीति बोध्यते॥१॥ तस्य सामान्यं लक्षणमाह॥ यः सज्वरो वं

३७२॥

क्षणजोभृशार्त्तिःशोथोयोनृणांपादगतःक्रमेण॥ तत्श्लीपदंस्यात्करकर्णनेत्रशिश्नौ
ष्ठनासास्वपिकेचिदाहुः॥२॥ तत्त्रिविधंवातिकंश्लैष्मिकंचेति॥ तत्रतेषांलक्षणान्या
ह॥ वातजंकृष्णरूक्षंहिस्फुटितंतीव्रवेदनं॥ अनिमित्तरुजंचास्यवहुशोज्वरएवच
॥३॥ पित्तजंपीतसंकाशंदाहज्वरयुतंभृशं॥ श्लैष्मिकंतुभवेत्स्निग्धंतथापांडुगुरुस्थि
रं॥४॥ त्रीण्येतानिविजानीयात्श्लीपदानिकफोच्छ्रयात्॥ गुरुत्वंचमहत्वंचयस्मा
न्नास्तिविनाकफात्॥५॥ अथासाध्यमाह॥ वल्मीकमिवसंजातंकंटकैरुपचीयते
अब्दात्मकंमहत्तत्तुवर्जनीयंविशेषतः॥६॥ संजातंप्रवृद्धंसतवल्मीकमिवकंटकैः
वहुशिखराकारगुंथिभिःउपचीयतेउपचितंभवति॥ अब्दात्मकंसंवत्सराती
तं॥ महदत्यंतमुच्छूनं॥६॥ अपरमसाध्यलिंगमाह॥ यत्श्लेष्मलाहारविहारजा

पैत्तिकं

॥ ३०३ ॥

तं पुंसः प्रकृत्या च कफात्मकस्य च ॥ साध्यं यमत्कफलतं सर्वलिंगं सकंडुरं चापि विवर्जनी-
यं ॥ १ ॥ अत्कफलतसर्वलिंगं येन दोषेण पज्जातं श्लीपदं तस्यात्कफलतानि अतिप्रवृ-
द्धानि सर्वाणि लिंगानि यत्र तत ॥ सकंडुरं अत्यंतकंडुमत् ॥ ७ ॥ इति श्लीपदनिदानं
अथ श्लीपदचिकित्सा ॥ लंघनालेपनस्वेदरेचनै रक्तमोक्षणैः ॥ प्रायः श्लेष्महरै-
रुष्णैः श्लीपदं समुपाचरेत ॥ सिद्धार्थसौभांजनदेवदारुविश्वौषधैर्मूत्रयुतैः प्र-
लिंपेत ॥ पुनर्नवानागरसर्षपानां कल्केन या कांजिकमिश्रितेन ॥ श्लीपदमिति।
प्रलेपः ॥ धत्तूरैरंडनिर्गुंडीवर्षाभूशिग्रुसर्षपैः ॥ प्रलेपः श्लीपदं हंति चिरोत्थमपि
दारुणं ॥ गंधर्वतैलभृष्टां हरीतकीं गोजलेन यः पिबति ॥ श्लीपदबंधनमुक्तो भव-
त्यसौ सप्तरात्रेण ॥ धत्तूरकस्य बीजानि पिप्पली वर्द्धमानयते ॥ पीतोदकेन पी-

॥ ३०३ ॥

तानि श्लीपदं घ्नंति दारुणं ॥ रजनीगुडसंयुक्तां गोमूत्रेण पिपिबेन्नरः ॥ वर्षोत्थं श्लीप
दं हंति दद्रुकुष्ठं विशेषतः ॥ वर्षाभूस्त्रिफलाचूर्णं पिप्पल्या सह योजितं ॥ सक्षौद्रं वि
तिहंत्येवहं चिरोत्थं श्लीपदं जयेत् ॥ त्रिफलां त्र्यूषणं चव्यं क्षेत्रमुंडीं च गोक्षुरं ॥ गुडू
ची वरुणं दार्वीमेकीकृत्या यच्चूर्णयेत् ॥ वृद्धदारुभवे चूर्णं सर्वचूर्णसमं क्षिपे
त् ॥ कांजिकेन पिबेच्चूर्णं प्रातःकाले ऽमात्रकं ॥ जीर्णे च भोजनं कुर्यात्त्याज्यं तत्र
किंचन ॥ नाशयेत् श्लीपदं स्थूलमामवातमरोचकं ॥ गुल्मं कुष्ठं वातकफप्रभवांश्चा
मयानपि ॥ इति वृद्धदारुकचूर्णं ॥ कृष्णा चित्रकदंतीनां कर्षमर्द्धपलं पलं ॥ विंशति
श्च हरीतक्यो गुडस्य तु पलद्वयं ॥ मधुना मोदकं खादेत् श्लीपदं हंति दुस्तरं ॥ इति
कृष्णाद्यो मोदकः ॥ सुरसा ग्रंथिकव्योषं विडंगानि वचासनी पाठेता हपुषाश्या

मादेवदारुचलाग्निकौ ॥ सपंचलवणैः क्षारैः कार्षिकैर्विपचेत् घृतं ॥ प्रस्थं चयवसाधे
न्या दशमूलांबुमस्तुभिः ॥ पक्वं तद्धृतं कल्कात् पिबेत् कर्षत्रयं हविः ॥ श्लीपदं कफवा
तोत्थं मांससक्तं स्थितं चयत् ॥ घृतं सर्वेश्वरं नाम श्लीपदकृमिकोपनुत् ॥ इति सर्वेश्व
रं घृतं ॥ विडंगमरिचार्केषु नागरे चित्रके तथा ॥ भद्रेलादार्विकल्केषु कारवीलवणे
षु च ॥ तैलं पक्वं पिबेद्वापि श्लीपदानां निवृत्तये ॥ इति विडंगाद्यतैलं ॥ दारुसुंठीशिशिषा
युक्तं पिबेन्मूत्रेण गुग्गुलुं ॥ श्लीपदं नाशयत्येष दद्रुमूलं चिरोत्थितं ॥ इति गुग्गुलुयो
गः ॥ इति वैलेपनान्नित्यं चित्रको देवदारु च ॥ सिद्धार्थशिग्रुकल्को वा सुखोष्णो मूत्र
पेषितः ॥ मंजिष्ठा मधुरारास्ना सहिंस्रा सपुनर्नवा ॥ पिष्टारनालैर्लेपोयं पित्तश्ली
पदशांतये ॥ चव्यदारुकं चूर्णं वा मूत्रे सौवीरकादिभिः ॥ श्लीपिते श्लीपदं हंति रू ॥३७४॥

थं संवत्सरोत्थितं ॥ पिबेत्सर्षपतैलेन श्लीपदानां निवृत्तये ॥ पूतीकरंजछदजं रसं
वापि यथाबलं ॥ पलाशमूलस्य रसं पिबेद्वा तैलेन तुल्यं सितसर्षपाख्यं ॥ अथपथ्य
माह ॥ प्रछर्द्दनं लंघनमस्रमोक्षः स्वेदो विरेकः परिलेपनं च ॥ पुरातनाः षष्टिकरक्त
लपञ्चयवाः कुलत्थास्तरुणं पटोलं ॥ वार्ताकुसौभांजनकारवेल्लं पुनर्नवा मूलक
पोदिका च ॥ एरंडतैलं सुरभीजलं च कटूनि तिक्तानि च दीपनानि । गुरसको परिष्ठा
च्चतुरंगुले च वातोद्भवे गुल्फतले तु पैत्ते ॥ अंगुष्ठमूले कफजे विशेषात्सिराव्यधा
श्चापि यथाविधानं ॥ एतानि पथ्यानि भवंति पुंसां रोगे सति श्लीपदनामधेये
अथापथ्यमाह ॥ पिष्टान्नदुग्धविकृतिं गुडमानूपमामिषं ॥ स्वादुरसे पारिपा
त्रसिंधुविंध्यनदीजलं ॥ पिच्छिलं गुर्वभिष्यंदि श्लीपदी परिवर्जयेत् ॥ इति श्ली

॥ ३७८ ॥

पदचिकित्सा ॥ अथविद्रधिनिदानं ॥ तत्रविद्रधेः संप्राप्तिपूर्वकं सामान्यंलक्षणमाह
त्वग्रक्तमांसमेदांसिप्रदूष्यास्थिसमाश्रिताः ॥ दोषाः शोफंशनैर्घोरंजनयंत्युच्छ्रिता
भृशं ॥ १ महामूलंरुजावंतंवृत्तंवाप्यथवायतं ॥ सविद्रधिरितिख्यातोविज्ञेयः षड्वि
धश्चसः ॥ २ ॥ अस्थिसमाश्रितादोषा इतिवक्ष्यमाणाद्व्रणशोफाद्विद्रधेर्भेदार्थं ॥
यतोव्रणशोफेदोषाणांअस्थिसमाश्रयणनियमोनास्ति ॥ घोरंव्रणशोफाद्दारुणं
भृशमुच्छ्रिताअत्यर्थमुद्गताः ॥ महामूलंगंभीरमूलं ॥ आयतंदीर्घं ॥ १ ॥ २ ॥ षड्विधत्वंवि
वृणोति ॥ पृथक्दोषैः समस्तैश्चक्षतेनाप्यसृजातथा ॥ षण्णामपिहितेषांतुलक्ष
णंसंप्रवक्ष्यते ॥ ३ ॥ अथविशिष्टानिलक्षणानि ॥ तत्रवातिकस्यलक्षणमाह ॥ ३७५ ॥
कृष्णोरुणोवाविषमोभृशमत्यर्थवेदनः ॥ चित्रोत्थानप्रपाकश्चविद्रधिर्वात

संभवः ॥४॥ मरुकं विषमकस्याचिद्रूपः कदाचिन्महान् ॥ चिरेणैनानाविधा तु दुःसमप्रपाको
पस्यसः ॥४॥ अथ पैत्तिकमाह ॥ पक्वौदुंबरसंकाशः श्यावो वा ज्वरदाहवान् ॥ क्षिप्रो
त्थानप्रपाकश्च विद्रधिः पित्तसंभवः ॥५॥ अथ श्लैष्मिकमाह ॥ शरावसदृशः पांडुः शी
तः स्निग्धोऽल्पवेदनः ॥ चिरोत्थानप्रपाकश्च विद्रधिः कफसंभवः ॥ तनुपीतसिताश्चै
षामास्रावाः क्रमशो मताः ॥६॥ शरावसदृश इति महत्वसूचनं ॥ क्रमशः यथाक्रमं
तेन वातेन तनुः ॥ पित्तेन च पीतः ॥ कफेन सितः ॥६॥ अथ सान्निपातिकमाह ॥ नानाव
र्णरुजास्रावो घाटालो विषमो महान् ॥ विषमं पच्यते चापि विद्रधिः सान्निपाति
कः ॥७॥ नानाअनेकविधाः वर्णाः कृष्णरक्तपांडुरूपाः रुजाः तोददाहकंड्वादिरूपाः
स्रावाः तनुपीतसिताद्यस्वरूपाः ॥ घाटालः घाटाकृकाटिकाऽस्याः सा इति घाटालः

॥ ३७ ह ॥

अल्पछिद्रतागूढत्वपर्यः ॥ विषमः निम्नोन्नतः ॥ विषमं पच्यते वापि चिराच्चिरं भीरेत्तानो र्ध्वनूर्ध्वभेदेन विषमं यथा स्यात्तथा पच्यते ॥ ७ ॥ अथाभिघातजस्यागंतोः संप्राप्तिपूर्वकं तल्लक्षणमाह ॥ तैस्तैर्भावैरभिहते क्षते वापथ्यकारिणः ॥ क्षतोष्मा वायुविसृतः सरक्तं पित्तमीरयेत् ॥ ज्वरस्तृष्णा च दाहश्च जायते तस्य देहिनः ॥ आगंतुविद्रधिर्ह्येष पित्तविद्रधिलक्षणः ॥ ८ ॥ तैस्तैर्भावैः काष्ठलोष्टपाषाणादिभिः अभिहते यथा स्त्रस्तायोन भवति तथा अभिहते ॥ क्षते वा अपथ्यपावेद्रुशास्त्रकादिभिर्यथा लोष्ठा योभवति तथा क्षते क्व तेक्षतोष्मा ॥ अत्र क्षतशब्देन हतमात्रमुच्यते ॥ तेनाभिहतक्षतयोरूष्मा वायुविसृतः अभिहते अभिघातात् क्षते रक्तक्षपात कुपितेन वायुना प्रसृतः सरक्तं रक्तसहितं पित्तं ईरयेत् कोपयेत् ॥ पित्तविद्रधिलक्षण इति पक्वोदुंबरसंकाश ॥ ३७ ह ॥

त्वादेरेव वादः॥ ९॥ अथ रक्तजमाह॥ कृष्णस्फोटावृतः श्यावः तीव्रदाहरुजाज्वरः
पित्तविद्रधिलिंगस्तु रक्तो विद्रधिरुच्यते॥ १०॥ अथाधिष्ठानविशेषेण लिंगविशेषं
बोधयितुमाभ्यंतरान्विद्रधीनाह॥ आभ्यंतरानतस्तूर्ध्वं विद्रधीन्परिचक्षते॥ गुर्व
सात्म्यविरुद्धान्नशुष्कशाकाम्लभोजनात्॥ ११॥ अतिसंचीयव्यायामवेगाघातविदा
हिभिः॥ पृथक्संभूय वा दोषाः कुपिता गुल्मरूपिणं॥ १२॥ वल्मीकवत्समुन्नद्धमंतः
कुर्वंति विद्रधिं॥ गुदे वस्तिमुखे नाभ्यां कुक्षौ वंक्षणयोस्तथा॥ १३॥ वृक्कयोः प्लीह्नि य
कृति हृदि वा क्लोम्नि वाप्यथ॥ एषां चिन्हानि जानीयाद्बाह्यविद्रधिलक्षणैः॥ १४॥ सं
भूय वापि भिन्नो वा समुन्नद्धं समंततः॥ ११॥ १२॥ १३॥ १४ अथ स्थानविशे
षेण रूपविशेषमाह॥ गुदे वातनिरोधस्तु वस्तौ कृच्छ्राल्पमूत्रता॥ नाभ्यां हिक्का त

॥ ३७ ॥

मुष्टिप्रमाणो गुल्मस्तु विद्रधिस्तु ततः परं ॥ गुल्मास्तिष्ठति कोष्ठे भु विद्रधिर्मांसशोणिते ॥ विद्रधिः पच्यते यस्मात् गुल्मस्तु न हि पच्यते ॥

आटोपः कुक्षौ मारुतकोपनं ॥ १५ कटिपृष्ठग्रहस्तीव्रो वंक्षणोत्थे च विद्रधौ ॥ वृक्कयोः पार्श्वसंकोचः प्लीह्नि श्वासावरोधनं ॥ १६ सर्वांगप्रग्रहस्तीव्रो हृदि कासश्च जायते श्वासो यकृति हिक्का च क्लोम्नि पेपीयते पयः ॥ १७ वृक्कयोरिति वृक्कौ गृ मांसं ॥ सर्वांगप्रग्रहः प्रत्यंगव्यथा ॥ क्लोम पिपासास्थानं ॥ पेपीयते पयः पुनः पुनर्जलं पातुमिच्छतीत्यर्थः ॥ १५ ॥ १६ ॥ १७ ॥ अथ पक्वापक्वमार्गमाह ॥ नाभेरुपरिजाः पक्वा यांत्यूर्ध्वमितरे त्वधः १४ ॥ नाभेरुपरिजाः पक्वा हि जाताः ॥ यांति स्रवंति ऊर्ध्वं मुखात् ॥ इतरे वस्त्यादिजाः ॥ अधो गुदात् ॥ नाभिजस्तूभाभ्यां मार्गाभ्यां ॥ तथा च हारितः ॥ ऊर्ध्वं प्रभिन्ने मुखान्नालराणां प्रवर्त्तते सकफसहितो हि पूयः ॥ अधः प्रभिन्ने गुदपायुमार्गात् द्वाभ्यां प्रवर्त्तिस्ति

॥ ३७ ॥

हृन्नाभिजेष्विति ॥ १७ ॥ असाध्यत्वादिकमाह ॥ अधःस्रुतेषु जीवेत स्रुतेषूर्ध्वं न जीव-
ति ॥ हृन्नाभिवस्तिवर्ज्या ये तेषु भिन्नेषु बाह्यतः ॥ जीवेत्कदाचित्पुरुषो नेतरेषु कदाचन
॥ १८ ॥ ये हृन्नाभिवस्तिवर्ज्याः प्लीहक्लोमादिजाः तेषु बाह्यतः शस्त्रवैद्यव्यापारेण भिन्ने-
षु पुरुषः कदाचित् जीवेत ॥ इतरेषु हृन्नाभिवस्तिजेषु तथा भिन्नेषु न जीवेत ॥ हृदादि-
नां मर्मत्वात ॥ अतएवाभोजः ॥ असाध्यो मर्मजो ज्ञेयः पक्वोऽपक्वोऽथ विद्रधिः ॥ सन्नि-
पातोत्थितोप्येवं पक्व एव च वस्तिजः ॥ त्वग्जो नाभेरधोगश्चासाध्यो मर्मसमीपगः ॥
अपक्वश्चैव पक्वश्चासाध्यो नोपरिणामित इति ॥ अत्र मर्मजशब्देन हृदयनाभिव-
स्तिजा उच्यंते ॥ १९ ॥ अपरं च ॥ आध्मातं बद्धनिस्यंदं छर्दिहिक्कातृषान्वितं ॥ रुजाश्वा-
ससमायुक्तं विद्रधिर्नाशयेन्नरं ॥ २० ॥ बद्धनिस्यंदं विबद्धमूत्रं ॥ एतद्वस्तिजप्रायः

॥ ३७८ ॥

२० ॥ अथ बाह्यविद्रधीनां साध्यासाध्यत्वमाह ॥ साध्या विद्रधयः पंच विवर्ज्यः सान्निपा
तिकः ॥ आमपक्वविदग्धत्वं तेषां शोथवदादिशेत् ॥ २१ ॥ शोथवत वक्ष्यमाणव्रणाशो
थवत ॥ २२ ॥ इति विद्रधिनिदानं ॥ अथ विद्रधिचिकित्सा ॥ शोफोपचारेण समस्तमाम
मुपाचरेद्विद्रधिमस्त्रमस्मात् ॥ हरेच्च सम्यक्परिपक्वएव व्रणोपचारैरुपचार्य आ
र्येः ॥ वातघ्नमूलककल्कैस्तु वसातैलसमन्वितैः ॥ सुखोष्णो बहलो लेपः प्रयोज्यो वातवि
द्रधौ ॥ यवगोधूममुद्गैश्च पिष्टैराज्येन लेपयेत् ॥ विलीयते क्षणेनैव ह्यविपक्वस्तु वि
द्रधिः ॥ शिग्रुशोफकालिकैर्वा यवगोधूममुद्गकैः ॥ सुखोष्णो बहलो लेपः प्रयोज्यो वात
विद्रधौ ॥ पैत्तिके सर्पिषा लाजमधुकैः शर्करान्वितैः ॥ प्रलिंपेत्सीरपिष्टैर्वा पयस्योशी
रचंदनैः ॥ पयस्यां क्षीरकाकोली तदला भेष्यच जं धागृष्मा ॥ इक्षुकासिकतातो हर्किंद्रं

॥ ३७८ ॥

वि

गोशकृता सह ॥ सुखोष्णश्च प्रदेहोयं मूत्रैः स्यात्श्लेष्मविद्रधौ ॥ रक्तचंदनमंजिष्ठानिशा
मधुकगैरिकं ॥ क्षीरेणविद्रधौलेपो रक्तागंतुनिमित्तजे ॥ हिंगुसैंधवसंयुक्तो निर्यूहः शि
ग्रुसंभवः ॥ नाशयेद्विद्रधिं क्षिप्रं प्रातःप्रातर्निषेवितः ॥ श्वेतवर्षाभुवो मूलं मूलं तु व
रुणस्य च ॥ जलेन क्वथितं पीतमपक्वं विद्रधिं जयेत् ॥ कासीससैंधवशिलाजतु हिंगुचू
र्णैर्मिश्रः कृतो वरुणवल्कलजः कषायः ॥ अभ्यंतरोत्थितमपक्वमतिप्रमाणं नूनं प्रम
यं जयति विद्रधिमुग्रशोथं ॥ अपक्वे क्वथिते ह्येतत्पक्वे व्रणविधिं चरेत् ॥ प्रियंगुधात
कीलोध्रकट्फलाह्वतिनिशात्वचा ॥ एतैस्तैलं पक्वं विद्रधौ व्रणलेपनं ॥ इति प्रियं
ग्वादितैलं ॥ शिग्रुमूलं जले धौतं पिष्टं वस्त्रेण गालितं ॥ तद्रसं मधुना पीत्वा हंत्यंतर्वि
द्रधिं नरः ॥ त्रीण्यपामार्गशिफलत्र्यपात्पलबुगंकृत्स्नांतरां तत्पुरात्वं च्या मूलपुतं तथा

॥ ३७८ ॥

विधिमज्जेत्पक्वेपूयस्रुति ॥ रोगेविद्रधिसंसक्तेप्रणागगोनाडीशुक्तेठामयेतद्वत्शोथ
मंगदरातिग्रदूजश्रीहामवृद्धिष्वपि ॥ इतित्रिफलादिगुग्गुलुः ॥ हरीतकीत्रिवृद्भ्यां
तुचूर्णंमधुसमन्वितं ॥ लीढ्वासुखमवाप्नोतिपित्तविद्रधिपीडितः ॥ वरुणादिकषा
येणारसगंधककज्जलीं ॥ भुक्त्वानिहंतिघचिराद्ध्यामंतस्थविद्रधिं ॥ कुष्माजाजीवि
शालाचधामार्गवफलंतथा ॥ पीताश्चैतेनिहंत्याशुविद्रधिंकोष्ठसंभवं ॥ धामार्गव
फलंकोशातकीफलं ॥ अथपथ्यमाह ॥ आमावस्थेरेचनाविलेपःस्वेदोस्रमोक्षणं
अस्रमोक्षणंजलौकोभिः ॥ जीर्णाःश्यामाककलमाःकुलत्थालघूनानिच ॥ रक्तशि
ग्रुःस्नानिष्पावःकारवेल्लंपुनर्नवा ॥ श्रीपर्णीचित्रकंक्षौद्रंश्लोकोक्तानिचसर्वशः
पक्वावस्थेशास्त्रकर्मपुराणारक्तशालयःघृततैलंमुद्गरसोपटोलंकदलंतथा ॥ ३७८ ॥

चेदनं तत्प्रशीतां च सर्वं चापि प्रलेपितं ॥ नराणां विद्रधौ व्याधौ पथ्यापथ्यं यथामतं
पथ्यान्येतानि सर्वाणि निर्दिष्टानि महर्षिभिः ॥ अथापथ्यमाह ॥ श्लो॰ पिष्टान्नं यान्यप
थ्यानि व्रणिनां महितानि च ॥ क्रमादामे च पक्के च वर्जयेद्विद्रधौ नरः ॥ इति विद्रधि
चिकित्सा ॥ अथ व्रणशोथनिदानं ॥ तत्र व्रणशोथस्य संख्याविवरणपूर्वकं सामा
न्यं लक्षणमाह ॥ पृथक्समस्तदोषोत्था रक्तजागंतुजौ तथा ॥ शोथाः षडेते विज्ञे
याः संयुक्ताः शोथलक्षणैः ॥१॥ शोथलक्षणैः पूर्वोक्तैः ॥१॥ अथ विशिष्टं रूपमाह
विषमं पच्यते वातात्पित्तोत्थश्चाचिरं चिरं ॥ कफजः पित्तवच्छोफौ रक्तागंतुनिमि
त्तजौ ॥२॥ पित्तवत् पित्तशोथवत् ॥२॥ अथापक्वस्य व्रणशोथस्य लक्षणमाह ॥
मंदोष्मता त्वक्शोथत्वं काठिन्यं त्वक्सवर्णता ॥ मंदवेदनता चैव शोथस्यामस्य

लक्षणं॥३॥ अथ तेस्यपच्यमानस्य लक्षणमाह॥ दह्यते दहनेनेव क्षारेणेव च पच्य
ते॥ पिपीलिकागणेनेव दश्यते छिद्यते तथा॥४॥ भिद्यते चैव शस्त्रेण दंडेनेव च
ताड्यते॥ पीड्यते पाणिनेवांतः सूचीभिरिव तुद्यते॥५॥ सोषचोषो विवर्णः स्याद
गुल्येवावपीड्यते॥ आसने शयने स्थाने शांतिं वृश्चिकविद्धवत॥६॥ न गच्छेदात
तः शोफो भवेदाध्मातवस्तिवत॥ ज्वरस्तृष्णा रुचिश्चैव पच्यमानस्य लक्षणं॥७॥
छिद्यते द्विधा क्रियते॥ भिद्यते विदार्यते इव॥ सोषचोषः ऊषो दाहः चोषः पार्श्व
स्थिताग्निनेव संतापः॥ ताम्यांस हवर्त्तते यः सुप्ता॥ आततः त्वक्संकोचरहितः
६॥५॥ टी०॥ अथ पक्वस्य लक्षणमाह॥ वेदनोपशमः शोफो लोहितोल्पो न
चोन्नतः॥ प्रादुर्भावो वलीनां च तोदः कंडूर्मुहुर्मुहुः॥ ५ उपद्रवाणां प्रशमो नि

म्नतास्फुटनं त्वचा। वस्ता विवांबुसंचारः स्याच्छोथेंगुलिपीडिते॥ पूयपक्वंपीडय
त्येकमंतमंते च पीडिते। वमुक्षाञ्चलाश्लोपस्यमयेत्पक्वस्य लक्षणं॥१०॥ वेदनोपश
मदाहादिदुःखोपशमः॥ अस्यो लोहित इत्यन्वयः॥ नचोन्नतः पक्वमामापेक्षया
उपद्रवाणां ज्वरदाहादीनां॥ निम्नतास्वरूपनोंगुलीपीडनाद्वा॥ त्वचांस्फुटनं किंचि
द्विदरणं॥ वस्ताविपेत्यादि॥ शोथेंगुलिपीडिते सति अंगुलिपीडिताद्देशात्। अन्य
देशेंबुसंचारः॥ किंचित॥ वस्तौ चर्मपुटके इव॥ अंते एकदेशे पीडिते एकमंतमप
रमंतं पीडयति॥८॥८॥१०॥ एकदोषारब्धेपि शोथे पाककाले सर्वदोषसंबंधमाह

पूयस्येति पाठे अयमर्थः वस्तौ पीडिते सति यथांबुसंचारः तथा सोथेंगुलिपीडिते पूयस्य
संचारः पूयमप्यं अंते एकदेशे पीडिते अंतं अपरं देशं पीडयति अवगाहति पूय इति शेषः

अतेनिलाद्गुणविनानपित्तेपाकःकफंचापिविनानएवं॥तस्माद्धिसर्वेपरिपाककाले
पचंतिशोफांस्त्रिभिरेवदोषैः॥११॥पचंतिपाकंप्रापयंति॥एवशब्दोत्राप्यर्थे॥अन्य
यानामनेनकार्यत्वात्॥११॥पाकेमतांतरमाह॥कालांतरेणास्फदितेचपित्तंकृत्वाचवशे
यातकफौप्रसह्य॥पचत्यतःशोणितमेषपाकोमतःपरेषांविदुषांद्वितीयः॥१२॥
वशेकृत्वाचच्छेयातंकफौप्रसह्यहीनीकृत्य॥शोणितकर्म॥पूर्वत्रकफात्एवं॥अ
त्रशोणितान्यपरइतिभेदः॥१२॥गंभीरपाकेशोफेपाकस्यानाथतल्लक्षणंतरमाह॥युक्त
तः॥कफजेषुचशोफेषुगंभीरंपाकमेत्यसक्तं॥पक्कलिंगंततःस्पष्टंयत्रस्यात्सोपि
शीतता॥त्वक्सावर्ण्यंस्वल्परुजोल्पशोथघनस्पर्शत्वमेत्क्लिन्नताश्मवत्॥स्रक्तपाकमितिवृ
पात्तंप्राप्नोमुक्तसंशयः॥१३॥कफजेषुशोफेषुगंभीरमसकृत्पाकमेति॥तत्रकथं

पाकज्ञानमित्याह॥ तत्रततःकारणात्पक्वलिंगंस्यदं। यतःपच्यमानावस्थांतर्गतरा
गदाहव्यथाद्यनंतरंशोथसीततादयोभवेति॥१३॥ अथानिर्हृतस्यपूयस्यदोषमाह
कक्षंसमासाद्ययथैववह्निर्वायीरितःसंदहतिप्रसह्य॥ तथैवपूयोप्यविनिःसृतस्तुमां
संसिरास्नायुचखादतीह॥१४॥ कक्षंतृणवनं॥१४॥ अथशोथस्यामपक्वतज्ञानाज्ञा
नाज्ञानेभिषजांगुणदोषावाह॥ आमंविदह्यमानंचसम्यक्पक्वंचयोभिषक्जानी
यात्सभवेद्वैद्यःशेषास्तस्करवृत्तयः॥१५॥ विदह्यमानंपच्यमानं॥ तस्करवृत्तयइ
तितेषांतस्कराणामिवद्रव्यलाभमात्रंनतुधर्मयशोमैत्रीलाभः॥१५॥ यच्छिन
त्याममज्ञानाद्यश्चापक्वमुपेक्षतेश्वपचाविवमंतव्यौतावनिश्चितकारिणौ॥
१६॥ इतिव्रणशोथनिदानं अथव्रणनिदानंसद्विविधेत्याह॥ व्रणोद्विधाय

॥३८२॥

रिस्ते यो दोषजागंतुभेदतः॥ दोषजो दुष्टदोषैः स्यादन्यः शस्त्रादिसंभवः॥१॥ दोषजस्या
दिनानिदानमुक्तमिति सेयं॥ अन्यः आगंतुः॥ अस्य निरुक्तिः अस्रसुश्रुते नोक्ता॥ व
णोति यस्माद्रूढोपि व्रणवास्तु न नश्यति॥ आदेहधारणाज्जंतोर्व्रणस्तस्मान्निरुच्य
ते इति॥१॥ तत्र वातिकस्य तल्लक्षणमाह॥ स्तब्धः कठिनसंस्पर्शो मंदस्रावो महारुजः॥
तुद्यते स्फुरति श्यावो व्रणो मारुतसंभवः॥२॥ स्तब्धः अचलः॥२॥ अथ पैत्तिकस्य त
ल्लक्षणमाह॥ तृष्णामोहज्वरक्लेददाहदुष्ट्यवदारणैः॥ व्रणं पित्तकृतं विद्यात्स्रावैर्गं
धैश्च पूतिकैः॥३॥ क्लेद आर्द्रता॥ दुःखं व्यपारूपं॥ अवदारणं व्रणो विदारणावृत्सी
डा॥३॥ अथ श्लैष्मिकस्य तल्लक्षणमाह॥ बहुपिच्छो गुरुः स्निग्धः स्तिमितो मंदवेदनः॥
पांडुवर्णोल्पसंक्लेदश्चिरपाकी कफव्रणः॥४॥ बहुपिच्छः बहुपिच्छलः॥ अस्य सं

॥३८२॥

क्लेदः द्विषदाद्रिः ॥ ४ ॥ अथ रौधिरं द्वंद्वजं सान्निपातिकं चाह ॥ रक्तो रक्तस्रुती रक्तात् द्वि
त्रिजः स्यात्तदन्वयः ॥ ५ ॥ तदन्वयः द्वित्रिलिंगसंबंधः ॥ ५ ॥ अथ शुद्धव्रणस्य लिंगमा
ह ॥ जिह्वातलाभोतिमृदुः श्लक्ष्णः स्निग्धोऽल्पवेदनः ॥ सुव्यवस्थो निरास्रावः शुद्धो
व्रण इति स्मृतः ॥ ६ ॥ जिह्वातलाभः तत्त्वशाद्योत्रस्य स्वरूपार्थः ॥ तेन जिह्वावद्रक्तः ॥
सुव्यवस्थः ऊर्ध्वतारहितः ॥ ६ ॥ अथ दुष्टव्रणलिंगमाह ॥ पूतिपूयातिदुष्टास्रक्
स्राव्युत्संगी चिरस्थितिः । दुष्टव्रणोतिगंधादिः शुद्धलिंगविपर्ययः ॥ ७ ॥ पूतिपूया
तिदुष्टास्रक्स्रावी इति पूयपूर्णम् अतिदुष्टं रक्तं सततं स्रवतीत्यर्थः उत्संगी कोटर
वान् ॥ अतिगंधादिरित्यत्र आदिशब्देन स्राववेदनाविवर्णतादयः संगृह्यते ॥ शुद्ध
लिंगविपर्ययः उक्तात् शुद्धलिंगविपरीतः ॥ ७ ॥ अथ सरोहद्व्रणलिंगमाह ॥ कपोत

वर्णप्रतिमाप्रस्रावास्ताःक्लेदवर्जिताः॥ स्थिराश्चपिटिकावंतोरोहंतीतितमादिशेत्॥
य॥ कपोतवर्णप्रतिमाःपांडुधूसराः॥ स्थिराविवर्णतारहिताः॥ पिटिकावंतः॥
संरोहणार्थीयेमांसांकुरास्तैर्युक्ताः॥ य॥ अथप्रवृत्तलिंगमाह रूढवर्त्मानमग्रंथि
मशूनमरुजंव्रणंत्वक्सवर्णंसमतलंसम्यक्रूढंविनिर्दिशेत्॥ य॥ रूढवर्त्मानं र
उद्गाढमार्गं समतलमनिम्नं॥ य॥ अथसुखसाध्यत्वादिकमाह॥ त्वङ्मांसजः
सुखेदेशेतरुणस्यानुपद्रवः॥ धीमतोभिनवःकालेसुखसाध्यःसुखव्रणः
१०॥ सुखेदेशेमर्मरहिते॥ अनुपद्रवःज्वरतृष्णाश्वासकासारोचकादिरहि
तः॥ धीमतःअतरलबुद्धेः॥ पथ्यसेविनोवा॥ सुखेकालेहेमंतेशिशिरेच॥ १०
गुणैरन्यतमैरेभिर्हीनःकष्टोव्रणःस्मृतः॥ सर्वैर्विहीनोविज्ञेयस्त्वसा

ध्योनिरुपक्रमः ॥ १० ॥ एभिस्त्वङ्मांसजत्वादिभिः ॥ निरुपक्रमः अनुपक्रमः चि
रमुपेक्षित इति याप्यत ॥ ११ ॥ वसा मेदो मज्जानं मस्तुलुंगं च यः स्रवेत ॥ आगं
तुजो व्रणः सिद्ध्येत न सिद्ध्येद्दोषसंभवः ॥ १२ मज्जानं अस्थि स्नेहं ॥ मस्तुलुंगमस्त
काभ्यंतरस्नेहं ॥ १२ ॥ कुष्ठिनां विषजुष्टानां शोषिणां मधुमेहिनां ॥ व्रणाः कृच्छ्रेण
सिद्ध्यंति येषां वापि व्रणा व्रणा ॥ १३ ॥ विषदुष्टानां दूषीविषार्तानां ॥ १३ ॥ अथापरि
षमाह ॥ दह्यंते चांतरत्यर्थं बहिः शीताश्च ये व्रणाः ॥ दह्यंते बहिरत्यर्थं भवंत्यंत
श्च शीतलाः ॥ १४ ॥ प्राणमांसक्षयश्वासकासारोचकपीडिताः ॥ प्रवृद्धपूयरु
धिरा व्रणा ये चापि मर्मसु ॥ १५ ॥ क्रियाभिः सम्यगारब्धा न सिध्यंति च ये व्र
णाः ॥ चिकित्सेज्जैवतान्वैद्यः संरक्षन्नात्मनो यशः ॥ १६ ॥ प्राणोऽत्र बलं

व्रणस्यापचारमाह ॥ व्रणोऽल्पयुष्पुरायासात्सच रागश्च जागरात् ॥ तीव्रश्च रुक्च दिवास्वापा
त्ताच मृत्युश्च मैथुनात्

॥ ३८४ ॥

मर्मसु पापु हृदयादिषु ॥ १४ ॥ १५ ॥ १६ ॥ अरिष्टरूपां गंधविकृतिमाह ॥ मद्याग्रुवाज्य सु
मनःपद्मचंदनचंपकैः ॥ सगंधा दिव्यगंधाश्च मुमूर्षिलिंगव्रणाः स्मृताः ॥ १७ ॥ सुमना
जातिः ॥ सगंधाः समानगंधाः ॥ दिव्यगंधाः अपरिकल्पितामृतपारिजातादिगंधाः
१७ ॥ अथागंतुव्रणस्य निदानमाह ॥ नानाधारामुखैः शस्त्रैर्नानास्थाननिपातितैः ॥
भवंति नानाकृतयो व्रणांस्तांस्तान्निबोध मे ॥ १८ ॥ नानाधारामुखानि च येषां तैः शस्त्रैः
अर्द्धचंद्रवत्कुमहत्कुंतत्रिशूलशरादिभिः ॥ नानाकृतयः षडाकृतयः ॥ १८ ॥ ता आकृ
तीराह ॥ छिन्नं भिन्नं तथा विद्धं क्षतं पिच्चितमेव च ॥ घृष्टमाहुस्तथा षष्ठं तेषां वक्ष्या

॥ ३८४ ॥

मिलक्षणं ॥ १९ तत्र छिन्नस्य लक्षणमाह ॥ तिर्यक्छिन्न ऋजुर्वापि यो व्रणस्त्वायतो
भवेत् ॥ गात्रस्य पातनं तद्धि छिन्नमित्यभिधीयते ॥ २० ॥ यो व्रणस्तिर्यक्छिन्नः खड्गा
दिकृत तिर्यक्छेदेन ॥ ऋजुर्वापि अथवा खड्गादिकृतोऽवक्रो व्रणः ॥ आयतः दीर्घः
आयत इति तिर्यक्छिन्नस्य ऋजोश्च विशेषणं ॥ गात्रस्य पातनं तद्धि इति गात्रस्यैक
देशस्य छेदनेन पृथक्करणं या छिन्नमित्यभिधीयते ॥ २० ॥ अथ भिन्नमाह ॥ शक्ति
कुंतेषु खड्गाग्र विषाणैराशयो हतः ॥ यत्किंचित्प्रस्रवेत्तद्धि भिन्नमित्यभिधीयते ॥
२१ ॥ आशयः कोष्ठः २१ ॥ अथ कोष्ठस्य तद्भेदस्य च लक्षणमाह ॥ स्थानान्यामाग्निप
क्वानां मूत्रस्य रुधिरस्य च ॥ हृदुंडुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥ २२ ॥ तस्मिन्
भिन्ने रक्तपूर्णे ज्वरो दाहश्च जायते ॥ मूत्रमार्गगुदास्येभ्यो रक्तं घ्राणाच्च गच्छति

३८५

२३ ॥ मूर्छाश्वासतृषाध्मानमभक्तछंदएव च ॥ विण्मूत्रवातसंगश्च स्वेदाश्रावोऽस्थिर
क्तता ॥ २४ ॥ लोहगंधित्वमास्यस्य गात्रदौर्गंध्यमेव च ॥ हृच्छूलं पार्श्वयोश्च विशेष
श्चाभिधीयते ॥ २५ ॥ डुंडुकः रक्तरसपाके मलवच्चः शोणितमलः स डुंडुकः ॥ फुप्फुसः
हृदयस्य वामपार्श्वे फुप्फुस इति ख्यातः ॥ तस्मिन् कोष्ठे भिन्ने शस्त्रयादिना ॥ रक्तपू
र्णे तस्माद्गात्रच्छिन्नाच्छ्रुतेन रक्तेन पूर्णे वाज्वरादयो जायंते ॥ स्वेदाश्रावः स्वेदास्रवं त
श्रुतिः ॥ २३ ॥ २४ ॥ २५ ॥ अथामाशये पक्वाशये च रक्तपूर्णे लक्षणमाह ॥ आमा
शयस्थे रुधिरे रुधिरं छर्दयत्यपि ॥ आध्मानमतिमात्रं च शूलं च भृशदारुणं ॥ २६ ॥
पक्वाशयगते रक्ते रुजा गौरवमेव च ॥ अधःकाये विशेषेण शीतता च भवेदिह ॥
२७ ॥ रुजा शूलं ॥ गौरवं पक्वाशयस्य ॥ अधःकाये नाभेरधोदेशे विशेषेण गौ

३८५

रथमित्यन्वयः ॥ शीतता च भवेद्देहे इति । देहनाम्ने रुधिरोदेशे शीतता च स्यात् ॥ सा च व्याधि
स्वभावात् ॥ २३ ॥ २४ ॥ अथ विद्धमाह ॥ सूक्ष्मास्यशल्याभिहतं पदं गत्वाप्यायं विना ॥ उ
त्तुंडितं निर्गतं वा तद्विद्धमिति निर्दिशेत् ॥ २५ ॥ आप्रायं विना कोष्ठं विना उत्तुंडितं अ
निर्गतशल्यं निर्गतं वा निर्गतशल्यं वा ॥ २५ ॥ अथ सशल्यस्य व्रणस्य लक्षणमाह ॥ श्या
वं सशोफं पिटिकाचितं च मुहुर्मुहुः शोणितवाहिनं च ॥ मृदूद्गतं बुद्बुदतुल्यमांसं व्रणं
सशल्यं सरुजं वदंति ॥ २६ ॥ मुहुर्मुहुः शोणितवाहिनं पदा पदा शल्ये चलति तदा तदा
रुधिरं वहति ॥ उद्गतं उच्छ्रितमुखं ॥ २६ ॥ अथ कोष्ठस्थितस्य शल्यस्य लक्षणमाह ॥ त्वचो
तीत्य शिरादीनि भित्वा वा परिहृत्य वा ॥ कोष्ठे प्रतिष्ठितं शल्यं कुर्यादुक्तानुपद्रवान्
२७ ॥ त्वचः सप्तापि अतीत्य अतिक्रम्य ॥ उक्तान् उपद्रवान् ॥ आटोपानाहौ व्रणमु

लेनाचमूत्रपुरीषदर्शनंच ॥२०॥ अथासाध्यस्यकोष्ठस्थस्यपुरुषस्यलक्षणमाह ॥
कोष्ठांतर्लोहितंपांडुशीतपादकराननं ॥ शीतोच्छ्वासंरक्तनेत्रमानद्धंचविवर्जयेत् ॥२१॥
आनद्धमानाहवंतं ॥२१॥ अथक्षतमाह ॥ नातिछिन्नंनातिभिन्नमुभयोर्लक्षणान्वि
तं ॥ विषमंव्रणमंगेयत्तत्क्षतंपरिकीर्त्यते ॥२२॥ नातिछिन्नंनातिदीर्घघातं ॥ नातिभि
न्नंनातिगंभीरघातं ॥ उभयोःछिन्नभिन्नयोः ॥ विषमंव्रणमंगेयत्तद्व्रणमंगवै
षम्यकरं ॥२२॥ अथपिच्चितमाह ॥ प्रहारपीडनाभ्यांतुयदंगंपृथुतांगतं ॥ सास्थिता
त्पिच्चितंविंद्याद्रक्तमज्जपरिप्लुतं ॥२३॥ प्रहारोमुद्गरादिना ॥ पीडनंकपाटादिना
पृथुतांचिपिटतां ॥२३॥ अथघृष्टमाह ॥ घर्षणादभिघाताद्वायदंगंविगततत्वचं
उष्माश्रावान्वितंतत्तुघृष्टमित्यभिधीयते ॥२४॥ घर्षणात्कर्कशेषिकपाषाण

भित्यादिभि ॥२४॥ अथ मांसशिरास्नायुसंध्यस्थिमर्मसु क्षतेषु सामान्यं लक्षणमाह
भ्रमप्रलापः पतनं प्रमोहो विचेष्टनं ग्लानिरथोष्णता च ॥ स्रस्तांगता मूर्छनमूर्ध्व
वातस्तीव्रा रुजो वातकृताश्च तास्ताः ॥२५॥ मांसोदकाभं रुधिरं च गच्छेत्सर्वेंद्रियार्थो
परमस्तथैव ॥ दशार्द्धसंख्येष्वथ विक्षतेषु सामान्यतो मर्मसु लिंगमुक्तं ॥२६॥ पत
नं भूमौ ॥ विचेष्टनं विरुद्धचेष्टनं ॥ हस्तपादादिप्रक्षेपणादिकं ॥ मूर्छनं इंद्रियमोहः ॥
प्रमोहः मनोमोहः ॥ तीव्रा रुजा वातकृताश्च तास्ताः दंडापतानकादयः ॥ रुधिरं च गच्छे
त् मेहनभगगुदास्यघ्राणेभ्यः स्रवेत् ॥ सर्वेंद्रियार्थोपरमः सर्वेंद्रियाणां कार्यनाशः
२५॥ २६॥ अथ मर्मशिरास्नायुसंध्यस्थिनां विद्धानां पृथक् लक्षणमाह ॥ सुरेंद्रगो
पप्रतिमं प्रभूतं रक्तं स्रवेत् क्षतजश्च वायुः ॥ करोति रोगान् विविधान् यथोक्ता।

॥ ३८७ ॥

नृशिरास्तु विद्रुमस्य यथा प्रतताः ॥ ३४ ॥ सैरंध्र्योपप्रतिमं सैरंध्रगो यो वार्षिको तिरक्तः
कीटविशेषः वीरबहूटी इति लोके प्रसिद्धस्तस्य देसं प्रभृतं यद्धु ॥ रोगान्निशिरोभितायां
धताक्षेपकादीन् ॥ चिकित्सु गरादिना ॥ क्षतासु खेड्गादिना ॥ ३५ ॥ कौब्रं शरीरावयवाव
स्पादः क्रियास्य शक्ति स्कं मलाहृजा च ॥ चिरा दूरो रोहति यस्य चापि तस्लापुविद्रुप
रूपं वदेति ॥ ३६ ॥ कौब्रं विद्रुस्यांगस्य वक्रता ॥ तु मला महती ॥ ३७ ॥ श्रोष्याति वृद्धिस्तु
मलाहृजं प्रयलक्षपः सर्वत एव शोषः ॥ क्षतेषु संधि प्रचलाचलेषु स्या संधिक
मोपरमस्थिसिंगं ॥ ३८ ॥ सर्वत एव शोषः सर्वसंधीन् व्याप्य शोषः ॥ अचलाचलेषु
अचलेषु निश्चलेषु चलाचलेषु चेष्टावत्सु ॥ संधयश्च चलाचलभेदेन द्विविधाः ॥
उपक्रमो नाम्नः ॥ ३९ ॥ घोरा रुजो यस्य निपाता दिनेषु सर्वास्वस्थासु नवे शांतिं

॥ ३८७ ॥

भिषग्विपश्चिद्विदितान्यसूत्रस्तत्र मर्मस्वपि विद्धं पुरुषं व्यपनयेत ॥४०॥ सर्वास्वपि स्यात्सुश्रु
यनासमाधिकारस ॥ विदितार्थसूत्रः स्यात शास्त्रतंत्रः ॥४०॥ अथ मर्मशिरादि विद्ध
लिंगान्यभिधाय मर्मशिरादीनां विद्धानां पृथक्लिंगान्याह ॥ यथास्वमेतानि विभा
वयेच्च लिंगानि मर्मस्वपि ताडितेषु ॥४१॥ यथास्वं यथात्मीयं तल्लक्षणं शिरादीनां एता
नि लिंगानि पृथग्युक्तानि लिंगानि चकारादूर्ध्वमर्मसाधारणानि च मर्मस्वपि शिरादिषु
ताडितेषु विद्धेषु विभावयेत् विजानीयात् ॥४१॥ अथानुक्तमांसमर्मणो विद्धस्य लिं
गमाह ॥ पांडुर्विवर्णः स्पर्शं न वेत्ति यो मांसमर्मण्यभिताडितः स्यात् ॥४१॥ स्पर्शि
तं स्पर्शनं ॥ न तु शिरादिविद्धलिंगवन्मांसविद्धलिंगं पूर्वं कुतो नो यदिदं उच्यते ॥
केवलमांसविद्धस्यापि कृपाकल्पात् पूर्वमनुपादानं ॥४१॥ अथ सर्वेष्वेतानामुप

॥३८५॥

ष्टानाह॥ विसर्पःपक्षघातश्चशिरस्तंभोपतानकः॥ मोहोन्मादौव्रणेपीडाज्वरस्तृष्णा
हनुग्रहः॥४२॥ कासश्छर्दिरतीसारोहिक्काश्वासःसवेपथुः॥ षोडशोपद्रवाःप्रोक्ताव्रणा
नांव्रणचिंतकैः॥४३॥ इतिव्रणस्योपद्रवनिदानं॥ अथाग्निदग्धनिदानं॥ तत्राग्नि
र्द्विविधोज्ञेयःस्नेहरूक्षसमाश्रितः॥ स्नेहस्तत्रतुतैलादिरूक्षंतोहादिकथ्यते॥१॥ अ
थाग्निदग्धचतुर्विधमाह॥ अग्निदग्धंचतुर्धास्यात्प्लुष्टंदुर्दग्धमेवच॥ सम्यक्
दग्धंतथातीवदग्धंचपरिकीर्त्तितं॥२॥ अथतेषांलक्षणान्याह॥ यद्विवर्णमग्निप्लु
ष्टं तत्प्लुष्टमभिधीयते॥ तीव्रदाहव्यथायंतोयत्रस्फोटाभवंतिहि॥३॥ चिरेणतेप्रश
म्यंतितद्दुर्दग्धमुदाहृतं॥ ताम्रवर्णमगंभीरंदाहपीडासमन्वितं॥ सुसंस्थितंचक
थितंसम्यग्दग्धंभिषग्वरैः॥४॥ त्वङ्मांसंयत्रदग्धंस्याद्धिस्नेषोवगुषस्तथा

॥३८८॥

शिरास्नाय्वस्थिसंधीनां यश्च स्याद् अतिदग्धकं ॥५॥ अत्यर्थवेदना दाहो ज्वरस्तृष्णा मूर्छ-
या सह ॥ स्याद् व्रणश्चिराद्रोहेद्रूढो याति विवर्णतां ॥६॥ इत्यग्निदग्धनिदानं ॥ अ-
थ शोथव्रणचिकित्सा ॥ आदौ विम्लापनं कुर्याद्द्वितीयमवसेचनं ॥ तृतीयमुपना-
हं च चतुर्थं पाटनं तथा ॥ पंचमं शोधनं कुर्यात्षष्ठं रोपणमिष्यते ॥ एते क्रमा व्रणस्यो-
क्ताः सप्तमं वैकृतापहं ॥ क्रमात् चिकित्सा ॥ तत्रादौ शोथहरलेपनमाह ॥ यथा प्रज्व-
लितवेश्मन्येव भस्मापरिषेचनं ॥ क्षिप्रं प्रशमयत्यग्निमेवमालेपनं रुजां ॥ बीजपूरज-
टाहिंस्रादेवदारुमहौषधं ॥ रास्नाग्निमंथौ लेपोयं वातशोथविनाशनः ॥ इति वा-
तशोथे ॥ मधुकं चंदनं दूर्वा नलमूलं च पद्मकं उशीरं वालकं पद्मं लेपोयं पित्तशो-
थहा ॥ इति पित्तशोथे ॥ कृष्णा पुराणं पिण्याकं शिग्रुत्वक् सिकता शिवा ॥ मूत्र-

॥२८८॥

पित्तघ्नः सरलोष्मोयं प्रलेपः शैत्यात्प्रशोथहा ॥ इतिश्लेष्मशोथे ॥ द्विनिशोच्चंदनेद्वेच शि
ग्राद्दूर्वाथुनर्नवा ॥ उशीरपद्मकंरोध्रंगैरिकंचरसांजनं ॥ आगंतुजेरक्तजेचशोथे।
कुर्यात्प्रलेपनं ॥ इतिरक्तजागंतुजशोथे ॥ नरात्रौलेपनंदद्याद्दत्तंचपतितंतथा ॥ न
चपर्युषितंशुष्यमाणंतत्रैवधारयेत् ॥ दत्तमितिदत्तंपुनर्नदद्यात् ॥ पतितमिति
च्यवमानंपदंगात्पतितंतन्नदद्यात् ॥ पर्युषितंलेपनद्रव्यंकल्कीकृतंपर्यु।
षितंतन्नदद्यात् ॥ रात्रावपिप्रलेपस्तुविधातव्योविचक्षणैः ॥ अपाकिशोथेगं
भीरेरक्तपित्तसमुद्भवे ॥ शुष्यमाणमुपेक्षेतप्रलेपंपीडनंप्रति ॥ प्रलेपंपीडनंप्रतीति
पीडनद्रव्यप्रलेपंशुष्यंतमपिधारयेदित्यर्थः ॥ नचापिमुखमालिंपेत्तेनदोषप्र
सिच्यते ॥ अथविम्लापनं ॥ अभ्यज्यस्वेदयित्वातुवेणुनाड्यापाणिनैःशनैः ॥ वि

॥२८८॥

स्रावनार्थं मर्दीयात्तलैर्नाग्रष्ठकेन वा ॥ अथ पायसेचनं ॥ शोथे महति संस्तब्धे व्रणे वा

वेदनावृति ॥ योनयाति शमं लेपस्वेदसेकापतर्पणैः ॥ शोपि नाशं व्रजत्याशु शोथः

शोणितमोक्षणात ॥ एकतस्तु क्रियाः सर्वा रक्तमोक्षणमेकतः ॥ रक्तं हि वेदनामू

लं तच्चेन्नास्ति न चापि रुक ॥ अपि रोग्यतिते शोथे रक्तश्रावणमाचरेत ॥ हरत्यष्टां

गुलात्तुंवीश्टंगंचद्वादशांगुलात ॥ शिरासर्वांगजं रक्तं जलौका हस्तमात्रतः ॥ तुंबी

कफोथे वातो श्टंगी पित्ते जलौकसः ॥ संनिपातोद्भवे नाडी वर्हदोषे प्रयोजयेत ॥

नाडीः शिराः ॥ वातं विना न रुक पित्तं विना पाको न जायते ॥ कफं विना न पूयः स्यात

तस्मात्पाकस्त्रिदोषजः ॥ वातेन विषमं पित्तात्क्षीघ्रं चिरतरं कफात ॥ पच्यते पित्त

यद्रक्तागंतुभूतोद्भवो व्रणः ॥ अथोपनाह ॥ उपनाहो तसीवीजदध्यम्लतिलस

॥३८०॥

कृमिः ॥ नाश्यते किरातवल्कलकैः शोथव्रणामये ॥ उपनाहः स्वेदः ॥ अपपाटनं ॥ हस्तिदंतो जले पिष्टो विंदुमात्रप्रलेपतः ॥ अत्यर्थकठिने शोथे कंपितो भेदनः परं ॥ हेमदुग्धाप्रलेपश्च भेदनः परमीरितः ॥ हेमदुग्धा चोक इति भाषायां प्रसिद्धा ॥ चिरविल्वोऽग्निको दंती चित्रको हयमारकः ॥ कपोतकंकगृध्राणां मलं लेपेन दारणं ॥ चिरविल्वः करंजः ॥ अग्निको भल्लातः ॥ क्षारद्रव्यं तथा क्षारो दारणं परिकीर्त्तितं ॥ क्षारद्रव्यमपामार्गादि ॥ क्षारो यवक्षारादिः ॥ अथ शोधनं ॥ व्रणस्यात्यर्थिमुद्रस्य क्वाथः शुद्धिकरः परः ॥ पटोलनिंबपत्रोत्थः सर्वत्रैव प्रयुज्यते ॥ वातिके दशमूलानां क्षीरिणां पैत्तिके व्रणे ॥ आरग्वधादेः कफजे क्वाथः शोधने हितः ॥ अश्वत्थोदुंबरप्लक्षवटवेतसजं स्मृतं ॥ व्रणशोथोपदंशानां नाशनं क्षालनात्स्मृतं ॥ तिलसैंधवयष्ट्या

॥३८०॥

क्वा निंबपत्रनिष्पावगुडैः त्रिवृद्धुनवुतैः पिष्टैः प्रलेपो व्रणशोधनः ॥ राजैवसारिवा
मूलं सर्पव्रणविशोधनं ॥ निंबपत्रतिलादंतीत्रिवृत्सैंधवमाक्षिकं ॥ दुष्टव्रणप्र
शमनो लेपः शोधनकेशरी ॥ निंबपत्रमधोलेपो व्रणशोधनरोपणः ॥ पक्वाम्ली
काभयैर्वीजैर्लेपः शोधनरोपणः ॥ दाहपीडास्रकंडूनां हरः मत्स्यपकारकः ॥ निंब
पत्रोद्भवो लेपः सर्पदुष्टशोधनः ॥ करंजारिष्टनिर्गुंडीलेपो हन्याद्व्रणक्रिमीन् ॥
लशुनस्यापथ्यालेपो हिंगुनिंबभवोऽपि वा ॥ कंपिल्लटंकणं तिंबस्तैलं सर्षपसंभ
वं ॥ किंचित्तुत्थंव्रणे लेपः शस्तः शोधनरोपणः ॥ व्रणान् संशोधयेद्वर्त्या सूक्ष्मास्या
न् संधिमर्मजान् ॥ तिलकल्कः सलवणो द्वे निशे च त्रिवृत् घृतं ॥ मधुकं निंबप
त्राणि लेपः स्याद्व्रणशोधनः ॥ निंबपत्रवचाहिंगुसर्पिर्लवणसर्षपैः ॥ धू

॥२८९॥

पनं स्याद्व्रणरक्षः कृमिकंडूरुजापहं ॥ अथ रोपणं ॥ अक्षतपूतिमांसानां मांसस्थान
मरोहतां ॥ कल्कः कार्यो रोपणो दैयस्तिलजो मधुसंयुतः ॥ प्रियंगुधातकीपुष्पं यष्टीम
धुजं तूनि च ॥ सूक्ष्मचूर्णीकृतानि स्युरोपणान्यवधूलनात् ॥ पवचूर्णं समधुकं
सतैलं सहसर्पिषा ॥ दद्याद्रोपनं कोष्णं दाहशूलोपशांतये ॥ तैलं समं च नीरं
चपालिम्यां महद्वैपेदढं ॥ पंचशुक्तिमितं तस्मिन्नर्गसाचूर्णं च तत्समं ॥ खदिरं पले
मानेच कंकुष्टं च पलार्द्धकं ॥ सार्द्धटंकद्वयं तुत्थं मरिचं च तदर्द्धकं ॥ क्षिप्त्वा सम्यक्
विनिर्मथ्य स्यात्पो महत्त्वहरः परः ॥ शोधनो रोपणः सर्वव्रणानामेतकैः परः
इति रसादि महत्त्वमहरः ॥ अथ पलोन्मितं सिक्थं लाक्षा सर्ज्जरसौ पलैकैकं ॥ मांजि
ष्ठं पलमात्रं पलमेकं चालकं चेति ॥ हीरादक्षिणकर्षेकर्षमितं केपित्थकं च विज्ञेयं ॥२८९॥

संकुचन्मानसिक्थेसंयुक्तमौषधंसमग्रंच॥ गजकुंभात्स्थेयंचैतैतेलंनिस्सारयेत्तीव्र
शिखिना॥ पाद्स्याहतंशिखिजातंअग्रेणव्रणांस्पर्शजंयातं॥ रक्तप्रकुपितदोषाःप्र
शमंयांतिस्पर्शमात्रेण॥ इतिसिक्थतैलं॥ अर्कमूलंरसोनंगास्तालवृंकेमितंपथक्
श्रणंचसंपुटस्थरजसोस्यसमाचरेत॥ धूपेनसिकयाक्षुद्रोव्रणोभवतिसर्वथा
क्षुद्रामृतानिंबपटोलवासादलांबुवाहकेपनेनवाज्यं॥ व्रणपुरव्योषयुतंविपक्वं
व्रणेषुशस्तंसभगंदरेषु॥ इतिक्षुद्रादिसर्पिः॥ जातीनिंबपटोलपत्रकटुकीदार्वी
निशासारिवामंजिष्ठाभयसिक्थतुत्थमधुकैर्नक्तकबीजैःसमैः॥ सर्पिःसिद्ध
मनेनसूक्ष्मवदनामर्माश्रिताःस्राविणोगंभीराःसरुजोव्रणाःसगतिकाःशु
ध्यंतिरोहंतिच॥ अभयमुशीरंजात्यादिघृतंव्रणांस्यरसःसर्पिषश्चतुर्गुणोदेयः

॥ ३८२ ॥

मूर्दक्षादीनां कल्क इति विवेकः ॥ सिक्थमत्र जातीघृते संसिद्धं क्षेमव्यं ॥ इति जात्यादि
घृतं ॥ स्वर्जिकाचयवक्षारः केपित्थं च मेहंटिका ॥ टंकणंच्चैतखदिरसत्वं चूर्णं च
गोघृतं ॥ सर्वं समांसं संचूर्ण्य मर्दयेत्प्रहरद्वयं ॥ स्वर्जिकाद्यमिदं सर्पिः सर्वव्रण
हरं परं ॥ लेपनं कृमिकंडूघ्नं सर्वव्रणकरणं परं ॥ इति स्वर्जिकाद्यघृतं ॥ रसगंधकयो
श्चूर्णं तत्समं मृद्दारशृंगकं ॥ सर्वं तुल्यं तु केपित्थं किंचित्तुत्थसमन्वितं ॥ सर्वं सम्य
क् मेलयित्वा घृते सर्वं चतुर्गुणे ॥ पिचुप्लुतं प्रदातव्यं दुष्टव्रणविशोधनं ॥ नाडी
व्रणहरं चैव सर्वव्रणनिषूदनं ॥ येव्रणा न प्रशाम्यंति भेषजानां शतैरपि ॥ अने
न ते प्रशाम्यंति सर्पिषा स्वल्पकालतः ॥ इति पारदादिमलमहरः ॥ रसगंधकके
पित्थरालसिंदूरमृडकं ॥ तुल्यं खदिरकेचूर्णं सर्वं घृते चतुर्गुणे ॥ उक्त्यासंमे।

३८२ ॥

स्यपिचुर्नाव्रणेदेयं विजानता ॥ सर्वव्रणप्रशमनं घृतमेतन्नसंशयः ॥ इति द्वितीय
पारदादिमल्हमहरः ॥ जातीनिंबपटोलानां नक्तमालस्य पल्लवाः ॥ सिक्थं समधु
कं कुष्ठं द्वे निशे कटुरोहिणी ॥ मंजिष्ठापद्मकं पथ्या लोध्रं त्वक्नीलमुत्पलं ॥ सारिवा
तुत्थकं चापि नक्तमालफलं तथा ॥ तैलमेभिः पचेत्सम्यक् वैद्यः पाकविचक्षणः
विषव्रणे समुत्पन्ने स्फोटके कछुरोगिणि ॥ दद्रुयी सर्परोगेषु कीटदष्टे सर्वथा
सद्यः शस्त्रप्रहारेषु दग्धविद्धेषु चैव हि ॥ नखदंतक्षते देहे दुष्टमांसापकर्षणे
मृक्षणे नहितं तैलमिदं शोधनरोपणं ॥ तैलं जात्यादिनामेतत्प्रसिद्धं भिषगादृ
तं ॥ इति जात्यादितैलं ॥ नक्तमालस्य पत्राणि तरुणानि फलानि च ॥ सुमनापाप्र
पत्राणि पटोलारिष्टयोस्तथा ॥ द्वे हरिद्रे मधूच्छिष्टं मधुकं तिक्तरोहिणी ॥ मंजि

॥३८३॥

ध्याचंदनोशीरमुत्पलं सारिवा त्रिवृत ॥ एते षांकार्षिकैर्भागैः स्नेहप्रस्थं विपाचयेत ॥
दुष्टव्रणप्रशमनं तथा नाडीविशोधनं ॥ सद्यःछिन्नव्रणानां तु करंजाद्यमिदं शु
भं ॥ इति करंजाद्यं तैलं ॥ मस्तकीटंकणं चैव दाडिमत्वक् समन्वितं ॥ व्रणं शुष्कं करो
त्येतत्क्षणादवधूलनात ॥ मस्तकीटंकणामपि व्रणशुष्कत्वकारकं ॥ शरपुंखाम
धूपेता व्रणस्याशु प्ररोहणी ॥ रसनायाः शुनो भस्मावधूलनात व्रणरोपणं ॥ चि
त्रकरसोनरामठश्शरपुंखा तांगलीकसिंदूरैः ॥ सविषैस्तथा सकुष्ठैः कटुतैलं
साधुपंचक्कं ॥ विपरीतमल्लसंज्ञं तैलं दुष्टव्रणं तथा नाडीं ॥ वहुभेषजेरसाध्या
मपथ्यभोक्तुर्व्रण निर्णुदति ॥ इति वीपरीतमल्लतैलं ॥ अथ वैकृतापहं ॥ मनःशि
ला समंजिष्ठा सलाक्षा रजनीद्वयं ॥ प्रलेपः सघृतक्षौद्रस्त्वचःसावर्ण्यकृत्स्मृ ॥३८३॥

तः ॥ अयोरजः सकासीसं त्रिफलाकुसुमानि च ॥ प्रलेपः कुरुते कार्ष्ण्यं सद्य एव नवत्व
चि ॥ कालीयकलतामूलाभ्यां हेमकालासु रोत्तमैः ॥ लेपः सगोमयरसः स्वकृ सवर्णी
करः परः ॥ विडंगत्रिफलाव्योषचूर्णं गुग्गुलुना समं ॥ सर्पिषा वटिकां कृत्वा खा
देद्धितभोजनः ॥ दुष्टव्रणापचीमेहकुष्ठनाडीविशोधनः ॥ इति विडंगादिगुग्गु
लुः ॥ अमृतापटोलमूलत्रिकटुत्रिफलाकृमिघ्नानां ॥ समभागानां च चूर्णं कृत्वा त
त्तुल्य गुग्गुलुर्योज्यः ॥ प्रतिवासरमेकैकां गुटिकां खादेद्भ्याक्षपरिमाणां ॥ जेतुं व्र
णवातासृग्गुल्मोदरपांडुशोफादीन् ॥ इत्यमृताद्यो गुग्गुलुः ॥ येकेद्याकस्तुति
गंधयेतो व्रणमहांतः स रुजः सप्रोथाः ॥ प्रयांति ते गुग्गुलुमिश्रितेन पीतेन
शांतिं त्रिफलारसेन ॥ इति त्रिफलाक्वाथः ॥ पटोलनिंबासनसारधात्रीपथ्या

॥ ३८४ ॥

स्र निर्यूहमहर्मुखेतु ॥ पिबेत्सु तं गुग्गुलुना विसर्पविस्फोटदुष्टव्रणशांतिमिच्छ
न् ॥ इति पटोलादिक्काथः ॥ त्रिफलाचूर्णसंयुक्तो गुग्गुलुर्वटकीकृतः ॥ निर्यत्रशो
धिर्वेधश्लो व्रणशोधनरोपणः ॥ इति त्रिफलागुग्गुलुः ॥ व्रणोऽथ्यपथ्यगुरतया सा
तू सचरणात्स्नजागरात ॥ तौ च रुक्च दिवा स्वापात तेच मत्स्कण्ठमैथुनात ॥ सुश्रु
ते तु व्रणस्यषष्ठिरुपक्रमाः लिखितास्तेतु विस्तरभयादत्र न लिखिताः ॥ इति
श्लोथव्रणचिकित्सा ॥ अथ सद्योव्रणचिकित्सा ॥ उद्यागं तु व्रणं वैद्यो घृतक्षौ
द्रसमन्वितां ॥ शीतां क्रियां चरेदस्त्रु रक्तपित्तोष्मनाशिनीं ॥ कुड्ये सद्योव्रणे
युंज्यादूर्ध्वाधो चाधश्लोधनं ॥ लंघनं च वलं सान्त्वा भोजनं चास्त्रमोक्षणं ॥
चषडेविदंलितेचैवणस्तरामिष्यते विधिः तयोरस्थं स्त्रवसस्त्रं पाकस्तेना ॥ ३८४ ॥

प्रुजायते ॥ छिन्ने भिन्ने तथा विद्धे क्षते वासृगतिस्रवेत् ॥ रक्तक्षयात्तत्र रुजः करोति
पवनो भृशं ॥ स्नेहपानपरिषेकलेपस्वेदोपनाहनं ॥ कुर्वीत स्नेहवस्तिं च मारुत
घ्नौषधैः शृतैः ॥ खड्गादिछिन्नगात्रस्य तत्कालं पूरितो व्रणः ॥ गांगेरुकी मूल
कल्कैः सद्यः स्याद्गतवेदनः ॥ पट्टसूत्रेण संसीव्य निर्यातभवनस्थितः ॥ क्लिन्ना
या याति मूत्रेण खरमूत्रेण वाश्मनैः ॥ तौचिकारंचयित्वा तु समितायाः कवोष्ण
या ॥ तया संस्वेदयेत्सद्यो व्रणं व्रणविशारदः ॥ मुहुर्मुहुर्यथा दुःखं न प्राप्नोति
व्रणी नरः ॥ अश्वत्थादिप्लतव्रणा योऽस्य स्वेदयेन्मुहुः ॥ संतप्तपात्रया वालो
हपात्रस्य योगतः ॥ दुष्टं रक्तं स्थितं चापि शृंगयत्तोकादिभिर्हरेत् ॥ सद्यः क्षतव्र
णो वैद्यः सम्यक्तं परिषेचयेत् ॥ यष्टीमधुकमिश्रेण नातिशीतेन सर्पिषा ॥

॥३८६॥

केषायमधुराःशीताःक्रियासर्वाःप्रयोजयेत्॥सद्योव्रणानांसप्ताहात्पश्चात्पूर्वोक्तमा
चरेत्॥पूर्वोक्तंशारीरव्रणचिकित्सितं॥आमाशयस्थेरुधिरेविदध्याद्वमनंनरः
पक्वाशयस्थेदेयंचविरेचनमसंशयं॥कोष्ठोविशल्यगैरंडज्यदंष्ट्राश्मभिदोत्क
तः॥हिंगुसैंधवसंयुक्तःकोष्णंस्रावयेदसृक्॥यवकोलकुलत्थानांनिःस्नेहेनर
सेनच॥भुंजीतान्नंयवागूंवापिबेत्सैंधवसंयुतां॥शस्त्रक्षतेदशनचर्वितयाशरांगुं
त्वम्रलोद्भवंतुविनिधीतरसंप्रयत्नात्॥तस्मान्नपुरीषमथवामहिषीसुतस्यमा
क्षिसतंमसृणचूर्णितमाशुदद्यात्॥अथाग्निदग्धचिकित्सा॥सुषस्याग्नि
प्रतपनंकार्यमुष्णंतथौषधं॥शीतामुष्णांचदुर्दग्धेक्रियांकुर्यात्ततःपुनः॥घृ
तालेपनसेकांश्चशीतानेवावचारयेत्॥सम्यक्दग्धेतुगाक्षीरीप्लक्षचं ॥३८६॥

दनगैरिकं ॥ साम्रैः सर्पिषायुक्तैरालेपं कारयेद्भिषक् ॥ प्रलांगुडूचीपत्रैर्वाच्छाद
येदथवौदनैः ॥ अतिदग्धे विशीर्णानि मांसान्यपहृत्य शीतलां ॥ क्रियां कुर्या
ततः पश्चाच्छालितंदुलकंडनैः ॥ तिंदुक्यास्त्वक्कषायैर्वा घृतमिश्रैः प्रलेपयेत्
मधूच्छिष्टं समधुकं लोध्रं सर्जरसं तथा ॥ मंजिष्ठा चंदनं मूर्वा पिष्ट्वा सर्पिर्वि
पाचयेत् ॥ सर्वेषामग्निदग्धानामेतद्रोपणमुत्तमं ॥ इति सिक्थाद्यं घृतं ॥
सुधांशुरातनीं दग्धो वारिणा परिषेचयेत् ॥ लेपेन तैलदग्धा सा विस्फोट
व्याधिनाशिनी ॥ तिलतैलं पक्वादग्धारात हेवेपेन निश्चितं ॥ अग्निदग्धा
व्रणारोहं यांति दुःखं प्रशाम्यति ॥ जीरकं पक्वं पश्चात् सिक्थकसर्जरसा
मिश्रितं हरति ॥ घृतमभ्यंगात्पावकदग्धतदुःखं क्षणार्द्धेन ॥ सिद्धंक

॥ ३८६ ॥

पापकल्काभ्यां पटोल्याः कटुतैलकं ॥ दग्धव्रणरुजास्रावदाहविस्फोटनाशनं ॥ अ
ग्निदग्धव्रणे सम्यक् प्रयुंजीत चिकित्सकः ॥ पित्तविद्रधिवीसर्पशमनं लेपना
दिकं ॥ अग्निदग्धव्रणे सेवपत्रलेपाद्विनश्यति ॥ तिलतक्रैलवालेपो दाडिमी
पत्रजोथवा ॥ सेवपत्रं सेवनपत्रं ॥ चंदनं वटशुंगाम्र मंजिष्ठा मधुकं तथा ॥ प
पौंडरीकं दुर्वा च पतंगं धातकी तथा ॥ एतैस्तैलं विपक्तव्यं सर्पिः क्षीरसमन्वितं
अग्निदग्धव्रणेप्येवं मूर्छनार्णां द्रोपणं परं ॥ इति चंदनाद्यं पमकं ॥ यातास्रमस्त
तेदुष्टं स्वेद्योष्य गृथितं(?) व्रणं ॥ कुर्पासदाहकंडूघ्नं व्रणग्रंथिस्फोटसस्रुतः(?) ॥ कं
पिल्लकं विडंगानि लवचंदाव्याः सायैवच ॥ पिष्ट्वा तैलं पचेत्तत्तु व्रणग्रंथिहरं परं
क्षीरं तत्र प्रयुंजीत दुष्टव्रणहरं परं ॥ इति श्रोषधव्रणे सद्यो व्रणाग्निदग्धचि ॥ ३८६ ॥

क्रिया ॥ अथ भग्ननिदानं ॥ तत्र भग्नस्य भेदमाह ॥ भग्नं समासाद्द्विविधं हुताशकां
डे च संधावपि तत्र संधौ ॥ उत्पिष्टविश्लिष्टविवर्तितानि तिर्यग्गतं क्षिप्तमध
श्च षड्वं ॥ १ ॥ भग्नमस्थि विश्लेषलक्षणं ॥ समासात् संक्षेपात् ॥ हुताशहे अग्नि
वेश ॥ चरके च अग्निवेशस्य हुताश इति नामांतरमुक्तं ॥ कांडे संधिपर्यंते एकरवं
डे अस्थि ॥ संधौ द्वयोरस्थ्नोः संधानस्थाने ॥ तत्र संधौ उत्पिष्टादिभेदैः ॥ षट्प्रका
रकं भग्नं भवति ॥ स्वस्वपक्तव्यत्वेन संधिभग्नस्यादौ विवरणं उत्पिष्टत्वादि
अधः अधो भग्नं ॥ १ ॥ अथ संधिभग्नस्य सामान्यं लिंगमाह ॥ प्रसारणाकुंच
नवर्त्तनोग्ररुक्स्पर्शविद्वेषणमेतदुक्तं ॥ सामान्यतः संधिगतस्य लिंगमु
त्पिष्टसंधेश्वयथुः समंतात् ॥ विशेषतो रात्रिभवा रुजा च विश्लिष्टके तौ च

रुजा च नित्यं ॥ ४ ॥ वर्त्तनं परिवर्त्तनं ॥ प्रसारणादिषु उग्रा प्रसारणाद्युग्रा ॥ संधिगत
स्य भग्नस्य ॥ अथ विश्लिष्टलिंगमाह ॥ उतिष्ठेत्यादिना ॥ तत्रोत्पिष्टस्य लिंगमाह ॥ उ
त्पिष्टसंधेः उत्पिष्टः द्वाभ्यामस्थिभ्यां घृष्टः संधिर्यस्तस्य संमंतात् उभयभागयोः
विश्लिष्टमाह ॥ विश्लिष्टइत्यादिना ॥ विश्लिष्टं मनाक् संधिविश्लेषः स्याद्येकप्र
त्ययः ॥ तस्मिन् तौ उभयतः शोफो रुजा च नित्यं सदा स्यात् चाधिका भवतीति उत्पि
ष्टाद्भेदः ॥ ५ ॥ अथ विवर्त्तिततिर्य्यग्गतक्षिप्ताधोगतान्याह ॥ विवर्त्तिते पार्श्वरुज
श्चातीव्रास्तीर्य्यग्गते तीव्ररुजो भवेति क्षिप्तेति स्थूलं विषमा हेग स्योः क्षिप्तेत्वधो
रुक् विघटनं संधोः ॥ अ ॥ विवर्त्तिते संधावप्युक्ते अस्थिद्वये परिवर्त्तिते पार्श्वरुजः
संधिस्थितास्थिखंडद्वयपार्श्वरुजः संधिस्थितास्थिखंडद्वयपार्श्वरुजः ॥ तिर्य्य

विवर्त्तितेविपरीतंवर्त्ततेइतिविवर्त्तितंसंधौद्वयोरस्थ्नोर्विच्युतिर्भ्रमणंअनार्जवतावा

कूगतेसंधिगतेएकस्मिन्नस्थ्निसंधिस्थानंत्यक्त्वातिर्य्यग्गते॥ क्षिप्तेएकस्मिन्नस्थि

परस्यास्थ्नःउपरिगतेअतिपूतंविषमाकदाचिदधिकाकदाचिन्न्यूना॥ अधः

क्षिप्तेसंधिगतेएकस्मिन्नस्थ्निअधोगतेसंधेस्तुविघटःविघटनंच॥३॥ अपकां

डभग्नमाह॥ भग्नंतुकांडेबहुधाप्रपातिविशेषतोनामभिरेवतुस्यं॥४॥ भग्नंकां

डेकांडविषयेबहुधाबहुभिःप्रकारैःप्रपाति॥ अत्रबहुविधत्वंद्वादशविधत्वंबो

द्धव्यं॥ बहुविधस्यकांडभग्नस्यपृथक्लक्षणंनोक्तंकिंतुनामभिरेवतुस्यंकर्क

टकादिनामानुरूपमेवतल्लक्षणंबोद्धव्यं॥४॥ तान्प्रकारानाह॥ कांडेत्वतःकर्कट

काश्वकर्णविचूर्णितंपिच्चितमस्थिछल्लितं॥ कांडेषुभग्नंत्वतिपातितंचमज्जा

गतंविस्फुटितंचवक्रं॥५॥ छिन्नंद्विधाद्वादशधाचकांडे॥ स्रस्तांगतस्योपद्र

जातिर्वृद्धिः ॥ संपीड्यमाने भवतीह शब्दः स्पर्शासहस्पंदनतोदशूलाः ॥ सर्वास्ववस्था
सु न शर्मलाभो भग्नस्य कांडे खलु चिह्नमेतत् ॥ ६ ॥ अतः संधिमुक्तं भग्नानंतरं कांडे
भग्ने ॥ तदाह ॥ कर्कटकः अस्थिविश्लेषपूर्वको मध्ये प्रोन्नतः पार्श्वयोरवनतः क
र्कटतुल्यरूपत्वात् कर्कटकः ॥ अश्वकर्णः अश्वकर्णवद्विपुलास्थिनिर्गमादश्व
कर्णः ॥ विचूर्णितं चूर्णितमस्थि ॥ तच्च शब्दस्पर्शाभ्यां बोद्धव्यं ॥ पिच्चितं पत्रितं व
हुलोध्यं ॥ छल्लितं विश्लिष्टं सत्वकस्त्वं ॥ कांडेषु भग्नं कांडभग्नं ॥ यद्यपि कर्कटा
दि सर्वमेव कांडभग्नं तथापि द्वयं कांडभग्नसंज्ञाविशिष्टा ॥ अत्र भग्नं त्रुटिः तेन
सर्वथा त्रुटितं पृथक्भूतं त्वचि यत्कांडं तत्कांडभग्नं ॥ अतिपातितं अशेषेण छि
न्नापातितं अस्थि मज्जागतं अस्थ्यावयवोऽस्थिमध्ये प्रविश्य मज्जानं गतः ॥

विस्फुटितं सशोफं विदीर्णं ॥ वक्रं स्थानं त्यक्त्वा कुब्जीभूतं ॥ छिन्नं द्विधा ॥ एकं दीर्णं वि
से लग्नं अपरं विदीर्णं द्विधाभूतं ॥ द्वादशधा च कांडे कांडे च भग्नं द्वादशधेत्यन्व
यः ॥ तच्चोक्तमेव कर्कटकादि ॥ अतः परं कांडभग्नस्य सामान्यं लक्षणमाह ॥ स्रस्तां
गतेत्यादिना ॥ स्पर्शासहमिति कांडभग्नस्य विशेषणं ॥ स्पंदनं नाडीस्फुरणं
शूलः शूलैनेव व्यथा रुजा सामान्यपीडा ॥ सर्वास्ववस्थासु शयनादिषु ॥ ५ ॥ ६
अथ कृच्छ्रसाध्यमाह ॥ अल्पाशिनो नात्मवतो जंतोर्वातात्मकस्य च ॥ उपद्रवैर्वा
जुष्टस्य भग्नं कृच्छ्रेण सिध्यति ॥ ७ ॥ अनात्मवतः रोगप्रतीकारे यत्नरहितस्य ॥ वा
तात्मकस्य वातप्रकृतेः ॥ उपद्रवैः ज्वराध्मानमोहमूत्रपुरीषसंगादिभिः ॥ ७ ॥ अथ
साध्यमाह ॥ भिन्नं कपालं कट्यां तु संधिमुक्तं तथा च्युतं ॥ जघनं प्रतिपिष्टं च

॥३८९॥

वर्जयेत् चिकित्सकः॥ ५ भिन्नं कपालमित्यत्र भग्नमिति वाच्ये भिन्नमिति यत्कृतं तत्क
पालानां प्रायशो भेदात्॥ अत एवाग्रे कपालानि विभिद्यंत इति वक्ष्यते॥ ननु कट्य
स्थ्नः कपालसंज्ञाया अभावात् कथमुच्यते भिन्नं कपालं कट्यामिति॥ उच्यते॥ पटु
कं स्पृशते॥ जानुनितंबांसगंडतालुशंखवंक्षणशिरःस्वीति कपालानीति॥ अतो
नितंबगूहणे न तत्र कटीगूहणाद्दोषः॥ तथाच्युतं अधःक्षिप्तं॥ प्रतिपिष्टं उपि
ष्टं॥ ५॥ पुनरसाध्यमाह॥ असंश्लिष्टकपालं च ललाटे चूर्णितं च यत्॥ भग्नं स्तने गु
दे पृष्ठे शंखे च मूर्द्धनि वर्जयेत्॥ ६॥ असंश्लिष्टकपालमिति भग्नविशेषणं॥ स्तने
स्तनयोरंतरे उरसि॥ मूर्द्धनि चूडास्थाने॥ ६॥ अपरमप्यसाध्यलक्षणमाह॥ सम्य
क् संहितमप्यस्थि दुर्न्यासाद्दुर्निबंधनात्॥ संक्षोभाद्वापि यद्गच्छेद्विक्रियां तच्च।

॥३८९॥

वर्ज्जयेत् ॥१०॥ सम्यक्संहितमपि सम्यक्योजितमपि अस्थि दुर्न्यासात् दुःस्थाप
नात् ॥ सुन्यस्तमपि दुष्टबंधनात् ॥ सुबद्धमपि संक्षोभात् अभिघातादिना संचाल
नात् ॥ यदि विक्रियां गच्छेत् विकृतं भवति तद्विवर्ज्जयेत् ॥१०॥ अथास्थिविशेषेण भ
ग्नविशेषमाह ॥ तरुणास्थीनि नम्यंते भिद्यंते नलिकानि तु ॥ कपालानि विभज्यंते
स्फुटंति रुचकानि च ॥११॥ तरुणास्थीनि घ्राणकर्णाक्षिकूटेषु कोमलास्थीनि तानि
नम्यंते वक्रीभवंति तेनात्र वक्रतालक्षणं भग्न नलिकानि नालाढीनि नाडीवत्सर
घ्राणि अस्थिपर्वाणि भिद्यंते अस्थ्यंतरानुप्रवेशात् विदार्यंते ॥ कपालानि जानु

व

नितंबांसगंडतालु ॥ शंखवंक्षणशिरोस्थीनि विभज्यंते स्फुटंति ॥ रुचकानि दंताः
स्फुटंति त्रुटंति अस्थीनि तरुणनलककपालरुचकवलयभेदात् पंचविधानि

॥४००॥

हृत्यकामिचेतिचकाराद्वलयान्यपित्रुटंतीतिबोधव्यं ॥११॥ वलयानांस्थानान्याह ॥ पा
ण्योः पार्ष्णियुगे पृष्ठवक्षोजठरपार्श्वयुग्मे ॥ पादयोरपिचास्थीनिवलयानिवभाषिरे ॥१२
इतिभग्ननिदानं ॥ अथभग्नचिकित्सा ॥ भग्नानुपाचरेद्धीमान्सेकालेपनबंधनैः
शीतलैरेवविविधैः प्रयोगैश्चप्रशाम्यति ॥ तत्रातिशिथिलेबंधे संधिस्थैर्यंनजायते
दृढेनापित्वगादीनांशोथोरुक्पाकएवच ॥ तस्मात्साधारणंबंधं भग्नेशंसंतितद्वि
दः ॥ आदौभग्नंविदित्वातुसेचयेच्छीतलांबुना ॥ पंकेनालेपनंकार्यंबंधनंचकुशा
न्वितं ॥ भग्नेलेपायमंजिष्ठामधुकंचाम्लपेषितं ॥ शतधौतघृतोन्मिश्रंशालिपिष्ट
प्रलेपनं ॥ सघृतंवास्थिसंहारंलाक्षागोधूममर्जुन ॥ संधिभग्नेस्थिसंभग्नेपि
बेत ॥ क्षीरेणवापुनः ॥ घृतेनवाक्षीरेणापिबेदित्यर्थः ॥ लाक्षास्थिसंहृतककु

॥४००॥

भाश्वगंधाचूर्णीकृता नागवला पुरश्च॥ संभग्नमुक्तास्थिरुजं निहन्यादंगानि कु

र्यात्कुलिशोपमानि॥ ईषद्दग्धगोधूमचूर्णं पीतं समाक्षिकं॥ कटिसंधिप्रभ

ग्नेषु भग्नेष्वस्थिषु पूजितं॥ धात्रीमेदातिलैः सर्पिःपिष्टै[illegible]भिर्वचं च॥ अस्थिभंगे

संधिभंगे एवं ताकोतिप्रपूजितः॥ न मधुसमसर्पिर्वो ह्रवं लीठं क्षौद्रेण मात्र यावद्ध्या

अस्थिस्रावुसिरा संध्याद्याय भग्नानि संधयति॥ न्यग्रोधादिकषायैस्तु सुशीतैः

परिषेचनं॥ पंचमूलीश्रृतं क्षीरं दद्याद्द्वावेदनावति॥ सकृत्प्रसूतगोक्षीरं साधि

तं मधुरौषधं॥ लाक्षाघृतयुतं शीतं प्रातर्भग्नज्वरी पिबेत॥ आभाचूर्णं मधुयुतास्थि

भंगे ग्रहे पिबेत॥ पीत्वा चास्थि भवेत्सम्यक् वज्रसारनिभं दृढं॥ आभाफलत्रिकं

व्योषं तुल्यां संचात्र गुग्गुलुः॥ सर्वैः समस्तभग्नास्थिकुर्याद्वज्रोपमं दृढं॥ मांसं

॥४०१॥

मांसरसःक्षीरंसर्पिर्यूषःकलापनः॥वृंहणांचान्नपानंचदेयंभग्नायजानता॥
वालानांतरुणानांचभग्नान्याशुभवंतिहि॥प्रायंतिनतुवृद्धानांरोगिणांचविशे
षतः॥आशुभवंतिशीघ्रंसिद्ध्यंतीत्यर्थः॥इतिभग्नचिकित्सा॥अथनाडीव्रणानि
दानं॥तत्रनाडीव्रणस्यसंप्राप्तिपूर्विकांनिरुक्तिमाह॥यःशोथमामरतिपक्वमुपे
क्षतेसैयोवाव्रणांप्रचुरपूयमसाधुवृत्तः॥अभ्यंतरंप्रविशतिप्रविदार्यतस्यस्था
नानिपूर्वविहितानिततःसपूयः॥तस्यातिमात्रगमनाद्गतिरिष्यतेतुनाडीवयद्वह
तितेनमताचनाडी॥१॥उपेक्षतेतस्यपुरवंनकारयति॥योवाऽथवामामरतिमन्याप
क्वव्रणांचोपेक्षतेशोधनैर्नशोधयति॥प्रचुरपूयमितिशोथस्यव्रणस्यापिविवि
शेषणं॥असाधुवृत्तःअहिताहारः॥सपूयस्ततस्तदनंतरंतस्यपूर्वविहि

॥४०१॥

तानि स्थानानि सश्रुतोक्तानि त्वङ्मांसशिरास्नायुसंध्यस्थिकोष्ठमर्माणि प्रविद
ध्यदूषितानि कृत्वा अभ्यंतरं प्रविशति ॥ तस्य प्रपस्यातिमात्रगमनात् अभ्यंत
रे दूरप्रवेशनत्वगातिरिच्यते सर्वदेह्याव इष्यते इति संप्राप्तिः ॥ अथ निरुक्तिः ॥ अथं
प्रणः नाडीवसरंध्रनलादिनाडी वर्षहेतोर्वहति तेन नाडी मता ॥ अथास्या दोषानु
बंधेन संख्यामाह ॥ दोषैस्त्रिभिः भवतिसा पृथगेकशो द्वंद्वसंमूर्छितैरपि च यशास्त्र
निमित्ततोन्या ॥ २ ॥ सा नाडी पृथक् त्रिभिर्दोषैस्त्रिसो भवेति एकशो द्वंद्वसंमूर्छितैः
प्रत्येकं द्वंद्वामिश्रीभूतैस्त्रिभिरेको ॥ शस्त्रनिमित्ततोन्येति आगंतुरूपैरन्यथः ॥
२ ॥ तत्र वातजां पित्तजां कफजां च नाडीमाह ॥ तत्रानिलात्पृथसूक्ष्ममुखो सस्थूला
फेनाग्निचिह्नमधिकं स्रवति क्षयास्तु ॥ पित्तात्तु तत्स्वरकरी परिदाहयुक्तो पि

॥ ४०२ ॥

तं सत्त्वत्यधिकमुष्ममहस्तच्चापि ॥ ज्ञेयाकफाद्बहुघना सितपिच्छिला स्त्रावास्त्राव्यास केतु
रसृजा रजनीप्रवृद्धा ॥ ३ ॥ स्त्रवा पाण्डिति शैत्येन वातवद्धे रात्रावधिकं स्त्रावणां ॥ अधिक
मुष्ममहण्डिति दिवाऔष्ण्येन पित्तप्रकोपात ॥ सितपिच्छिला स्त्रावाः स्त्रं स्त्रकं तेऽयोप
लक्षणं पूयादिस्थवोद्धव्यं ॥ बहुघनार्जुन पिच्छिला स्त्रेति पाठे अर्जुनो ऽच्येतः घनः
सान्द्रः आस्त्र शब्द आस्त्रावे शावैकदेशः पदे पि भवति ॥ स केतुरसृजा केतुप्रधानवेद
नायुक्ता ॥ ३ ॥ अथ त्रिदोषजामाह ॥ दाहज्वरश्च सनमूर्छनयक्ष्माशोषा यस्यां भवंत्य
भिहितानि च लक्षणानि ॥ तामादिशेन्मवन पित्तकफप्रकोपात् घोरागतिं त्वसु
हरामिव कालरात्रिं ॥ ४ ॥ अभिहितानि प्रत्येकयातादिजानामाडीकथितानि ॥ घोरागति
घोरा आगतिर्यस्यास्तां ॥ घोरागतित्वे हेतुमाह ॥ यतः कालरात्रिमिव यमभगि

॥ ४०२ ॥

९

नीमिवअर्सर्जे रंमारिकां ॥४॥ अथ वातस्य निमित्तमाह ॥ तच्चंक्रमं चिदरणमार्गमुद्दीरि-
तेषु स्थानेषु वातस्य मचिरेण गतिं करोति ॥ सा फेनितं मथितमुष्णमस्रग्विमिश्रं
स्नावं करोति सहसा सहजं च नित्यं ॥५॥ उदीरितेषु स्थानेषु त्वड्मांसादिषु कफं चि-
त्तषं आदह्यमानं वातस्यं ॥ किं विशिष्टं आरणमार्गं आतरपवादह्यमानं ॥ तदचिरे-
ण शीघ्रं गतिं स्नावं करोति ॥ सा वातस्य निमित्ता नाडी मथितं मथितमिव स्नावं करो-
ति ॥ मुष्णमुष्णस्पर्शं ॥ एते च धर्माः प्रसारणादौ चलता वातेन मांसादिदोषेण
भवेति ॥५॥ अथासाध्यां कष्टसाध्यां चाह ॥ नाडी त्रिदोषप्रभवा न सिद्ध्येद्द्वेषात्म-
तस्तः खलु यत्नसाध्याः ॥६॥ ननु नाडी त्रिदोषप्रभवा न सिद्ध्येदिति पुनरुक्तं आयुष्य-
करीमित्यनेनैवासाध्यस्योक्तत्वात् ॥ मैवं ॥ अयं ग्रंथः सुश्रुतेन निदानस्थाने

क्रमेव त्रिदोषजनाड्या असाध्यत्वमनूद्य तदन्यासां दोषत्वनिश्चयेन साध्यत्वप्र
तिपादनार्थं चिकित्सितेति पठितः ॥ सा एवात्र माधवाचार्येण लिखित इत्यदोषः
॥ इति नाडीव्रणनिदानं ॥ अथ नाडीव्रणचिकित्सा ॥ नाडीनां गतिमन्विष्य शस्त्रे
णोत्कृष्य कर्मवित् ॥ सर्वव्रणक्रमं कुर्यात् शोधनारोपणादिकं ॥ स्नुह्यर्कदुग्धदा
र्वीभिर्वर्त्तिं कृत्वा प्रपूरयेत् ॥ एषा सर्वशरीरस्थां नाडीं हन्यात्स योगराट् ॥ आरग्व
धनिशाकालाचूर्णाज्यक्षौद्रसंयुता ॥ सूत्रवर्त्तिर्व्रणे योज्या शोधिनी गतिनाशिनी
नाड्याः शस्त्रेण वदनं व्रणस्य कृत्वा प्रयोजयेत् ॥ कुशलो वर्त्तिविधिना तैलं जात्यादि
साधितं ॥ एवमन्यच्चापं तैलं घृतं वा स्वरसं तथा ॥ नाड्या अप्यंतरे वैद्यो लघुहस्तः
प्रयोजयेत् ॥ गुग्गुलुत्रिफलाव्योषैः समांशैराज्ययोजितां ॥ अपूपमाणां गुटि

॥४०३॥

कोरवादेत्छीतांपुनानरः ॥ नाडीदुष्टव्रणंशूलमुदावर्त्तभगंदरं ॥ गुल्मंचगृहजानह
न्यात्पक्षिराट्पन्नगानिव ॥ इतिसप्तांगोगुग्गुलुः ॥ कृशदुर्बलभीरूणांनाडीमर्म
गतातुया ॥ क्षारसूत्रैरणतांछिंधांल्लशस्त्रेणकदाचन ॥ समूलपत्रनिर्गुंडींपेष
यित्वारसंनयेत् ॥ साधितंतेनतुस्थेनतैलंनाडीव्रणापहं ॥ दुष्टव्रणेषुसर्वेषुस्फो
टेषुविविधेषुच ॥ पानेचाभ्यंजनेचैवनावनेचप्रशस्यते ॥ इतिनिर्गुंडीतैलं ॥ स्व
र्जिकासैंधवंदंतीनीलीमूलफलंतथा ॥ मूत्रेचतुर्गुणेसिद्धंतैलंनाडीव्रणापहं
इतिस्वर्जिकातैलं ॥ गुग्गुलुत्रिफलाव्योषैःसमांशैर्योजितंघृतं ॥ नाडीव्रणदुष्ट
शूलभगंदरविनाशनं ॥ इतिगुग्गुलुघृतं ॥ भल्लातकार्कमरिचैर्लवणोत्तमेन
सिद्धंविडंगरजनीद्वयचित्रकैश्च ॥ स्यान्मार्कवस्यचरसेननिहंतितैलंनाडीं

कफानिलकृतानपचींव्रणांश्च॥ इति महद्व्रातकादितैलं॥ वर्तीकृतं माक्षिकसंप्रयुक्तं ना
डीव्रणघ्नं लवणोत्तमं च॥ इति नाडीव्रणचिकित्सा॥ अथ व्रणशोथव्रणसद्योव्रणभग्न
व्रणनाडीव्रणानां पथ्यमाह॥ विम्लापनं रक्तमोक्षमुतिलपनाहो विपाटनं॥ शोधनं रोपणं
शस्तं पुराणाः शालितशालयः॥ यवषष्टिकगोधूमाः कटुतैलं घृतं मधु॥ तैलं मसूरस्तु
वरी मुद्गयूषश्च शर्करा॥ लाजमंडश्च वर्ताककर्कोटकपटोलकं॥ कारवेल्लं निंबपत्रं
वेत्राग्रं बालमूलकं॥ वास्तुकं तंदुलीयं च चपनसं दाडिमं तथा॥ त्रिफला सैंधवं द्राक्षा
स्वादुतिक्तकषायकाः॥ समस्तमेतद्दुग्धं तु स्निग्धमुष्णं द्रवोत्तरं॥ उशीरं बालव्यज
नं चंदनं तिललेपनं॥ तमसीतांबुकर्पूरं यैः कृता पद्धतिः परा॥ एतत्पथ्यं नरैः सेव्यं
यथावस्थं यथामतं॥ व्रणशोथे व्रणे सद्योव्रणे नाडीव्रणे विच॥ शीतांबुसे

॥४०५॥

व्रनं पंकमदेहो वंधनक्रिया ॥ शालिप्रियंगुगोधूमा यूषो मुद्गसतीनयोः ॥ नवनीतंघ
तं तैलं क्षीरं मांसरसो मधु ॥ पटोलं लशुनं शिग्रु गोस्तनीयासमूलकं ॥ पथ्यं वृंह
णं तद्वदेयं भग्ने तु जानता ॥ अपथ्यमाह ॥ नवानि धान्यानि तिलान् कषायान्
माषान् कुलत्थान् कटुकांहि मांसं ॥ क्षीरेक्षुजातान् विविधान् विकारान् मद्या
नि शाकानि च पर्युषीति ॥ अजांगलं मांसमसात्म्यमन्नं विदाहि विष्टंभि गुरूणि ।
चापि ॥ कद्वम्लशीतं लवणं व्यवायमायासमुच्चैः परिभाषणं च ॥ प्रियासमालोक
नमन्हि निद्रां प्रजागरं चंक्रमणं नितांतं ॥ प्रचंडवातातपधूमवह्निक्षोभप्रको
धवमपि प्रहर्षान् ॥ श्लोकं विरूक्षाशनमंबुपानं तीक्ष्णोष्णरूक्षाणि विघट्टनं च
कंडूयनं कायघनत्वोदितोदनस्यानितांबूलमजीर्णतां च ॥ वैद्यश्चिकित्सन्

॥ ४०५ ॥

व्रणशोथरोगं व्रणं च सद्योव्रणनामकं च ॥ नाडीव्रणं चापि विशोभिलाषी विवर्जयेत्संततमम्लमन्नः ॥ तथा लांकटुकं क्षारमस्लं मैथुनमातपं ॥ व्यायामं च न सेवेत भगंदरे रूक्षान्नमेव च ॥ इति शोथव्रणसद्योव्रणनाडीव्रणभगंदरव्रणानां पथ्यापथ्यानि ॥ अथ भगंदरनिदानं ॥ तत्र भगंदरस्य स्वरूपमाह ॥ गुदस्य द्व्यंगुले देशे पार्श्वतः पिटिकार्तिकृत ॥ भिन्ना भगंदरो ज्ञेयः स च पंचविधः स्मृतः ॥ १ ॥ आर्तिकृत पीडाकृत ॥ पंचविधः वातिकपैत्तिकश्लैष्मिकसान्निपातिकआगंतुजभेदैः ॥ एतच्च संख्याकथनं स्कंजद्वंद्वजभगंदरसंभावनानिरासार्थं ॥ १ ॥ अथ भगंदरस्य निरुक्तिः

तदुक्तं वाग्भटे भगंदरः स सर्वश्च दारयत्यक्रियावतः ॥ भगवस्तिगुदांस्तेषु दीर्यमाणेषु भूरिभिः वातमूत्रसकृच्छुक्रैर्यैः सूक्ष्मैर्वमतिक्रमात ॥

भगगुदवस्तिप्रदेशदारणात भगंदर इत्युच्यते इति स्मृतः

॥ ४०५ ॥

कटीकपालनिस्तोददाहकंडूरुजादयः । भवंति पूर्वरूपाणि भविष्यति भगंदरे
माह ॥ भगं परिसमंताच्च गुदवस्तीतथैव च ॥ भगवद्दारयेद्यस्मात्तस्मादेष भगंदरः
२ भजैत्वनेनेति भगं मैहनं भजंत्यस्मिन्निति भगं योनिः ॥ अत्र भगशब्देन तद्रूपमपि
कथ्यते ॥ भगवद्योतियत् पूर्वरूपं त्वस्य सुश्रुते पठ्यते ॥ तद्यथा ॥ कटीकपालवेद
नागुदकंडूदाहस्तोदोगुदपार्श्वे तत्सामान्यं पूर्वरूपमिति ॥ कटीकपालमत्र कटी
फलकं ॥ २ ॥ अपथ्यातिकेशातयोनकसंज्ञकमाह ॥ कषायरूक्षैरत्यर्थं कोपितो निल
स्त्वपानदेशे पिटिकां करोतिपां ॥ उपेक्षणात्पाकमुपैति दारुणं रुजाच भिन्नार
णफेनवाहिनी ॥ तत्रागमो मूत्रपुरीषरेतसां व्रणैरनेकैः शतपोनकं वदेत ॥ ३ ॥
अपानदेशे गुददेशे ॥ दारुणमतिदारुणं ॥ रुजा रुजाचिता ॥ आर्गा आदिभ्यो

दच॥ भिन्ना विदीर्णा॥ व्रणैरनेकैः सूक्ष्ममुखैः॥ शतपोनकं शतपोनश्चालनी तत्तुल्यं
३॥ अथ पैत्तिकमुष्ट्रग्रीवसंज्ञकमाह॥ प्रकोपनैः पित्तमतिप्रकोपितं करोति रक्तां॥
पिटिकां गुदाश्रितां॥ तदाशुपाकाहिमपूतिवाहिनीं भगंदरं चोष्ट्रशिरोधरं वदेत॥
४॥ आशुपाकाहिमपूतिवाहिनीं पित्तजत्वेन शीघ्रपाकां उष्णदुर्गंधवाहिनीं च॥
तदा तद्भगंदरं उष्ट्रग्रीवसंज्ञकं वदेत॥ ४॥ उष्ट्रग्रीवसंज्ञा च पिटिकाकारीनेवक्रत
पा उष्ट्रग्रीवाकारत्वेन॥ ४॥ अथ श्लैष्मिकं परिस्राविसंज्ञमाह॥ कंडूयनो घनस्रा
वी कठिनो मंदवेदनः॥ श्वेतावभासः कफजः परिस्रावी भगंदरः॥ ५॥ कठिनः पिटि
कावस्थायां॥ परिस्रावी निरंतरस्रावशीलः॥ ५॥ अथ सान्निपातिकं शंबूकाव
र्तसंज्ञमाह॥ बहुवर्णरुजास्रावा पिटिका गोस्तनोपमा॥ शंबूकावर्तवन्नाडी

॥४०६॥

शंबूकावर्त्तको मताः ॥ ३ ॥ बहुशब्दो वर्णादिभिः प्रत्येकं संबध्यते ॥ प्रत्येकदोषजातभ
गंदरपठितवर्णवेदनास्रावेत्यर्थः ॥ नाडीस्रावमार्गः ॥ ३ ॥ अथ शल्यज उन्मार्गि
संज्ञमाह ॥ क्षताकृतिः पायुगताद्विवर्द्धते त्यवेक्षणात्स्फोः कृमयो विदार्यते ॥ प्र
कुर्वते मार्गमनेकधा मुखैर्व्रणैस्तमुन्मार्गिभगंदरं वदेत ॥ ७ ॥ क्षतात कंटकादिना
नखेन कंडूयनादिना अभिघातात ॥ गतिः स्रावः ॥ उन्मार्गिभगंदरमिति एतस्य केमि
कृन्मार्गैः पुरीषादिनिर्गमादुन्मार्गिसंज्ञा ॥ ७ ॥ अथ पतेचांतरोक्तमर्शोभगंदरमाह
कफपित्ते तु पूर्वोक्ते दुर्नामाख्यित्वकुप्यतः ॥ अर्शोमूले ततः सोफः कंडूदाहादि
मान् भवेत ॥ ५ ॥ स शीघ्रं पक्वभिन्नोस्य क्लेदयन्मूलमर्शसः ॥ स्रवत्यजस्रं ग
तिभिरयमर्शोभगंदरः ॥ ६ ॥ अथ कष्टसाध्यानसाध्यंश्चाह ॥ घोराः साधयि

॥४०७॥

तुं दुःखाः सर्वएव भगंदराः॥ तेष्वसाध्यस्त्रिदोषोत्थो क्षतजश्च विशेषतः॥१०॥
दुःखेः दुःखप्रदाः कृच्छ्रसाध्या इत्यर्थः॥ क्षतजश्च विशेषतो तिशयेनासाध्यः
१०॥ अथावस्थायामसाध्यतामाह॥ वातमूत्रपुरीषाणि शुक्रं च क्रमयस्तथा
भगंदरात्प्रस्रवंति नाशयंति तमातुरं॥११॥ इति भगंदरनिदानं॥ अथ भगंदर
चिकित्सा॥ अथास्य पिटिकामेव तथा यत्नादुपाचरेत॥ शुद्ध्यस्रस्रुतिसेको
श्चैर्यथा पाकं न गच्छति॥ वटपत्रेष्टिकाशुंठी गुडूच्यः सपुनर्नवाः॥ सुपिष्टाः
पिटिकावस्थे लेपः शस्तो भगंदरे॥ पयःपिष्टैस्तिलारिष्टमधुकैः शीतलैः कृतः
लेपो भगंदरे शस्तः पैत्तिके वेदनावति॥ सुमनावटपत्राणि गुडूची विश्वभेषजं
जं॥ सैंधवं तक्रसंपिष्टैर्लेपाद्धंति भगंदरे॥ रसांजनं हरिद्रे द्वे मंजिष्ठा निंबप

॥४०७॥

लवाः ॥ तद्वत्तेजोवतीदंतीकल्को नाडीव्रणापहः ॥ स्वरक्षधिरसंमेतं मलतायाः श

रीरं द्रवदिसहितमस्थ्नासारमेयस्य पिष्टं ॥ भवंति समुपलेपादाशु भगंदरिणा

मपि विविषमतराणामापदां नाशहेतुः ॥ त्रिफलारससंयुक्तं विडालास्थिप्रलेपनं

भगंदरं निहंत्याशु दुष्टव्रणहरं परं ॥ विडालास्थिभवं भस्म स्वष्ट्यास्थिभस्माथवाय

से ॥ पायेगोसर्पिषा घृष्ट्वा व्रणे लेपनमाचरेत ॥ एतद्भगंदरे दुष्टे व्रणेऽन्यस्मिन् प्र

शस्यते ॥ त्रिफलापुरकृष्णानां त्रिपंचैकांशयोजिता ॥ गुटिकाशोथगुल्मार्शो भगंद

रविनाशिनी ॥ इति नवकार्षिको गुग्गुलुः ॥ श्वावृकं भक्षयेन्मांसं प्रकारैर्व्यंजनादि ॥

भिः ॥ अजीर्णवर्जी मासेन मुच्यते तु भगंदरात ॥ दंतीवन्हिनिशालेपो भगंदरवि

नाशकृत ॥ त्रिफलाचारिणाते यो गुग्गुलोऽपि प्रयत्नतः ॥ स्नुह्यर्कदुग्धदार्वीभि

॥ ४०८ ॥

वर्तिं कृत्वा विचक्षणः ॥ भगंदरगतिं ज्ञात्वा पूरयेत्सं प्रयत्नतः ॥ दुष्टां सर्वशरीरस्थां
नाडीं हन्यान्न संशयः ॥ तिलाभयाकुष्ठमरिष्ठपत्रवचानिशालोध्रमगारधूमः ॥
भगंदरे नाड्युपदंशयोश्च दुष्टव्रणे शोधनरोपणोयं ॥ करवीरनिशादंती लांग
लीलवणाग्निभिः ॥ मातुलुंगार्कपयसा पचेत्तैलं भगंदरे ॥ इति करवीराद्यं तैलं
रसेंद्रभागद्वितयं सोमलं च चतुर्गुणं ॥ काकजंघारसैर्मर्द्यं खल्वे दिवसपंचकं ॥ ताम्र
संपुटके रुध्वा सच्छिद्रे हंडिकांतरे ॥ निवेश्य वालुकां दत्वा दद्यादग्निः प्रहराष्टकं ॥ स्वांग
शीतं समुद्धृत्य मधुटंकेन संयुतं ॥ धमेन्मूषागतं तावद्यावद्भूमतितारयेत ॥ रूपरा
जरसो ह्येष भगंदरकुलांतकः ॥ वल्लमात्रमिदं लिह्यान्मधुना सह पथ्यभुक् ॥ त्रिफ
लायाः पिबेत्क्वाथं पश्चात्पथ्यं हितं चरेत ॥ मुक्तः स्वल्पैरहोभिः स्याद्भगंदरम

॥ ४०८ ॥

हागदात् ॥ इति हृदराजरसः ॥ चित्रकार्कौ त्रिवृत्पाठे मलपूहयमारकौ ॥ सुधां वचां लां
गली च हरितालं मनःशिलां ॥ ज्योतिष्मती च संहृत्य तैलं धीरो विपाचयेत् ॥ एता
द्विष्यंदनं नाम तैलं दद्याद्भगंदरे ॥ शोधनं रोपणं चैव दुष्टनाडीव्यपोहति ॥ इति
चित्रकाद्यं तैलं ॥ भागो रसस्य गंधस्य द्वौ कन्याद्विर्विमर्दयेत् ॥ कृत्वा गोलं ताम्रपा
त्रे तावत्तस्योपरि क्षिपेत् ॥ भस्मना पूर्यतद्भांडं वन्हिकुर्याद्दिनैस्तते ॥ शीतमुद्धृत्य
जंबीरद्रावात्तस्य प्रधावुटेत् ॥ गुंजास्य मधुसर्पिर्भ्यां हंति सद्यो भगंदरं ॥ तालमूलीं
सलशुनां पिबेद्दनुसकांजिकौ ॥ इति रविताडवो रसः ॥ नीशार्कक्षीरसिंध्वग्नि हे
पुष्पास्वच्छवासकैः ॥ सिद्धमभ्यंजनात्तैलं भगंदरहरं परं ॥ इति निशाद्यं तैलं ॥ अथ
पथ्यमाह ॥ आमे संशोधनं लेपो लंघनं रक्तमोक्षणं ॥ पक्वे पुनः शस्त्रवन्हि

क्षारकर्म यथाविधि ॥ सर्पत्वक्शालयो मुद्गा विलेपी जांगलो रसः ॥ पटोलशिग्रू वेत्राग्र
पत्तूरो वास्तमूलकं ॥ तिलसर्षपयोस्तैलं तिक्तवर्गो घृतं मधु ॥ एतत्पथ्यं नरैः सेव्यं य
था दोषं भगंदरे ॥ अथापथ्यमाह ॥ व्यायामं मैथुनं युद्धं पृष्ठयानं गुरूणि च ॥ संवत्स
रं परिहरेदपि रूढव्रणो नरः ॥ इति भगंदरचिकित्सा ॥ अथोपदंशनिदानं ॥ तत्रोपदं
शस्य विप्रकृष्टं निदानं हस्ताभिघातान्नखदंतघाताद्धावनादत्युपसेवनाद्वा
योनिप्रदोषाच्च भवंति लिंगे पंचोपदंशा विविधोपचारैः ॥ ५ ॥ हस्ताभिघातात् ह
स्तेन मैथुनात् ॥ नखदंतघातात् ॥ नखदंतस्यानल्पेनात्युक्तेपि मेहने नखदंतघातो
वलवदत्युग्रो गोदुग्धात् ॥ उक्तं च कोमशास्त्रे ॥ शास्त्रस्य विषयस्तावद्यावन्मंदरसो
नरः ॥ रतिचक्रे प्रवृत्ते तु नैव शास्त्रं नापि च क्रमः इति ॥ कृतेहेतुष्वस्त्रीकृतो यानख ॥४०६॥

दंतघातः ॥ उक्तस्तदौहित्रियोमनुष्ययोनयोर्भवंतिताभिर्यो मेहनेनखदंतघातस्तस्मा
त् ॥ अधावनात् अप्रक्षालनात् ॥ अत्युपसेवनात् व्यवायस्यात्यंतसेवनात् ॥ योनि
प्रदोषात् दीर्घकर्कशयोनिलोमयोगात् । योनिछिद्रस्यातिसूक्ष्मत्वात् वातादिदुष्ट
ताद्वायोनिदोषात् ॥ विविधोपचारैः आहननगमनादिभिः ॥ पंचोपदंशाः वाति
कः पैत्तिकः श्लैष्मिकः सान्निपातिकः आगंतुजश्चेति ॥ १ तत्रवातिकस्यपैत्तिकस्य
चोपदंशस्यलक्षणमाह ॥ सतोदभेदस्फुरणैः सकृष्णैः स्फोटैर्व्यवस्येत्पवनोप
दंशं ॥ पीतैर्बहुक्लेदयुतैः सदाहैः पित्तेन रक्तैः पिशितावभासैः ॥ २ व्यवस्येत्ज्जा
नीयात् ॥ पीतैः रक्तैर्वेतिविकल्पः ॥ पिशितावभासैः मांसवर्णाभैः ॥ २ अथ श्लै
ष्मिकं सान्निपातिकं चाह ॥ सकंडुरैः शोफयुतैर्महद्भिः शुक्लैर्घनैः स्रावयुतैः

कफेन ॥ नानाविधश्वापदजो पयन्नमसाध्यमाह त्रिमलोपदंशं ॥ ३ ॥ नानाविधश्वा
पदजो पयन्नं प्रत्येकदोषोक्तश्वापदवेदनायुक्तं ॥ त्रिमलोपदंशं त्रिदोषोपदंशं ॥ आगं
तुजस्य दोषलिंगयुक्ततया दोषजेष्वेवांतर्भावात् पृथक् लक्षणं नोक्तमिति शेषं ॥
रक्तैः पिशिताशमासैरित्यत्र रक्तोत्पिपिशिताशमासैरिति पाठांतरं तेन रक्तजः पंचम
इति मधुकोशकृतोभिप्रायः ॥ २ ॥ अथासाध्यमाह ॥ विशीर्णमांसं कृमिभिः प्रजग्धं
मुष्कावशेषं परिवर्जयेत्तु ॥ विशीर्णमांसं गलितमांसं ॥ प्रजग्धं खादितं ॥ मुष्कावशे
षं विशीर्णसमस्तमेहनमांसत्वेनावशिष्टफलकोषमात्रं ॥ ४ ॥ अथोत्पन्नमात्रस्य
चिकित्साप्राप्यकरणे दोषमाह ॥ संजातमात्रे न करोति मूढः क्रियां नरो यो विष
येप्रसक्तः ॥ कालेन शोथकृमिदाहपाकैः प्रशीर्णशिश्नो म्रियते स तेन ॥ ५ ॥ वि

बधेप्रसक्तः अतिस्त्रीसक्तः॥ कालेनचिरकालेन॥ पराकस्यानत्वेनात्रलिंगार्शः आह
अंकुरैरिवसंजातैरूर्ध्वमुपरिसंस्थितैः॥ क्रमेणजायतेवर्तिस्तामूचूडशिखोपमा
॥ कोषस्याभ्यंतरेसंधौपर्वसंधिगतापिच॥ सवेदनापिच्छिलाचदुश्चिकित्स्या
त्रिदोषजा॥ लिंगवर्तिरितिख्यातालिंगार्शइतिचापरे॥ ७ तामूचूडशिखोपमाता
मूचूडः कुक्कुटः तच्चूडातुल्यालिंगवर्त्तेःस्थानमाह॥ कोषस्येउ कोशस्यांभ्यंतरेसं
धौलिंगरंध्रसंधौ॥ पर्वसंधिगतामणिपर्वणोःसंधिगता॥ ६।७॥ इतिउपदंश
नीदानं॥ अथोपदंशचिकित्सा॥ उपदंशेभिनवेसोमध्येमेढ्रेशिरांविध्या॥ विस्रा
वयेदिहेच्चंकर्मस्सुशीतंविरेचनंचाग्रे॥१॥ तुल्यातलोध्रगिरिमृत्ताक्ष्यशिलाउ
ष्ककासीसैः॥ त्रुटिमाशिनेयकौंतीसौराष्ट्रीपुग्भिरन्वितैर्मधुना॥ उपदंश।

॥ ४११ ॥

जम्बूलोष्ठो लेपः सिद्धो पथ्यादग्धा ॥ त्रिफलानेककपालेस घृतासंरोपणायाशु ॥ इतियो
गद्वयं ॥ जलौकापातनं शस्तं ऊर्ध्वाधः शोधनं तथा ॥ सद्योपहृतदोषस्य रुक्शोका
वुपशाम्यतः ॥ पाको रक्ष्यः प्रयत्नेन शिश्नक्षयकरस्तु यत् ॥ वटप्ररोहार्जुनजंबुलोध्र
पथ्याहरिद्रारचितः प्रलेपः ॥ व्यपास्य पाकं श्वयथुं करोति सर्वोपदंशेषु ततो हितो
यं ॥ पूगीफलं हरिद्रा च ग्रस्तां पिष्ट्वा प्रलेपयेत् ॥ लिंगशोथं पथ्यया केंडुनाशनं नास्य
तः परं ॥ पटोलनिंबत्रिफलाकिरातक्काथं पिबेद्वा खदिरासनाभ्यां ॥ सगुग्गुलुं वा त्रिफ
लायुतं वा सर्वोपदंशापहरः प्रयोगः ॥ घृतानि यानि प्रोक्तानि दुष्टनाडीव्रणे व्रणे
उपदंशे प्रयोज्यानि सेकाभ्यंजनभोजने ॥ सपादमाषमिति संप्रदायः ॥ तवंग ॥ २८
मिरच ॥ ४० ॥ पथ्यं गोधूमान्नं सघृतं च कर्षैकं रसकर्पूरलेत वंगानि चषोडश ॥ ॥ ४११ ॥

द्वात्रिंशन्मरिचान्यत्र चूर्णमेषां प्रकल्पयेत् ॥ अष्टौ च गुटिकाः कार्यास्तेषामेकां सि-
वाय च ॥ दत्वाह्नि प्रथमे भुंज्यात् गुटिकैकां दिने बुध ॥ द्वे द्वे चापि प्रदातव्ये पथ्यं दुग्धो-
दनं मतं ॥ उपदंशहरं ह्येतद्विषल्लीतमिदं परं ॥ इति रसकर्पूरादियोगः ॥ पारदो गंधकं
तालं सिंदूरं च मनःशिलां ॥ ताम्रपात्रे तु सघृते ताम्रेनैव विमर्दयेत् ॥ घर्मे दिनैकं म-
र्दितं ह्येतत्क उपदंशजित् ॥ इति पारदादिघृतं ॥ तथं गंधपारदं शुद्धं मरिचं करहाटकं
जंतुघ्नमस्तकी चैव प्रत्येकं कर्षसंमितं ॥ चतुःकर्षजयाली च गुडं तद्द्विगुणं क्षिपेत्
भल्लातकानां च पुण्यं भागं विंशतिं द्विगुणं बुधः ॥ चूर्णयित्वा तु तत्सर्वं गुटिकां कार-
येद्भिषक् ॥ कर्षमात्रां ततः खादेदेकां प्रातर्हिमाम्भसा ॥ तांबूलं भक्षयेत्पश्चात्तपथ्यं
दुग्धोदनं हितं ॥ सप्ताहान्मुच्यते जंतुः फिरंगाख्योपदंशतः ॥ सेधि शोफास्थि

श्लेष्मातिस्थूलसंधिरुजापहः॥ उपदंशेभसिंहाख्यो रसो सौश्लोभुनेरितः॥ सोपदंश
नाणां चैव कुष्ठिनां च सुखाय वै॥ इत्युपदंशगजकेसरीरसः॥ रसगंधाककरभो
त्र्यंगं मरिचं तथा॥ विडंगं मस्तकी चैव प्रत्येकं त्रिलवं मतं॥ आरग्वधफलाणां दातव्या
द्विगुणा त्वेकविंशतिः॥ दीप्यस्य द्वादश तथा गुडस्यापि तथा मता॥ पुनर्यासं मेल्य
गुटिकाः स्वादेत्कर्षद्वयोन्मितां॥ पथ्यं दुग्धोदनं रम्यं तावत्तं परिशीलयेत्॥ घस्त्राणा
मेकविंशत्या मुच्यते तूपदंशतः॥ इत्यपरोपदंशेभकेशरी॥ त्र्यंगं मरिचं चैव गंधकं
शुद्धपारदं॥ संचूर्ण्य सप्तपर्णानां तोयेनाथ विमर्दयेत्॥ घृतपक्वं मर्दनाय भक्ष्ये लो
घृतवर्जितं॥ दुग्धोदनाशी पुरुषो लिंगस्फोटाद्विमुच्यते॥ इति त्र्यंगाद्यो योगः॥ रे
ही मूलभवं चूर्णं गुडेन गुटीकृतं॥ भक्षयेद्दुर्वलिकं मुपदंशाहरं परं॥ कर्षमात्रं रसं॥ ४१२॥

रसोपशामी भवात: पारसीकयवानिका ॥ मजाजीरणि नारिकेरफलस्य हिंगुणो गुडः । अन्य
त्सर्वमेकभागं मरल्पवद्राकृतिः । मध्ये दधि गुटीं वामू संधिते तेन रोगभजेत ॥ न भवेन्नुलेपा
को स्नाय्येछं पानभोजने ॥ फिरंगनागवल्लीज्ञोयममृतं हि फिरंगिणां ॥ इति फिरंगनाशनो रसः

शुद्धं हिंगुलं गंधकं समं ॥ विधिवत्कज्जलीं कृत्वा तच्च गोघृतसंयुतं ॥ माषमात्रं प्रतिदिनं
दद्यादेवं त्रिसप्तकं ॥ गोधूमान्नं घृतं पथ्यं कारयेत्लवणं विना ॥ उपदंशापहः श्रेष्ठो योगो
यं मुनिभिः स्मृतः ॥ इति रसगंधककज्जली ॥ घातपथ्यापलैकं च तुल्यं शरणमितं तथा ॥
निवुद्रवे णासंमर्द्य दृढं सप्तदिनानि चै ॥ इति हरीतकीतुल्ययोगे ॥ मोचारसं पूगविभ
तिकां च कोतल्लं निर्मलं सं त्वेजीरं पिष्ट्वोपदंशी त्वेतुनिः क्षिपेत्तत्र हेलारोगं सकलं
निहंति अस्योत्तरं कुरंटकेक्वाथगंडूषः ॥ अयं योगवरो रस्यो भिषग्भिः परिकीर्तितः

॥ ४१३ ॥

यंचूर्णदलचूर्णेन दाडिमीत्वग्गजेन वा ॥ गुडेनं लिंगदेशस्थेलेपः पूगपत्रस्य वा ॥ इति योगत्रयं ॥ कुडवं चोपचिन्यास्य शर्करायाः पलं तथा ॥ पिप्पली पिप्पलीमूलं मरिचं देवपुष्पकं ॥ आकल्लकं क्षुरं भृंगबीजं तु प्रंचवरांगकं ॥ प्रत्येकं कोलमितं ग्राह्यं एतच्चूर्णीकृतं परं ॥ सर्वमेकत्र संपेष्य कर्षार्द्धं प्रतिवासरं ॥ भक्षयेन्मधुसर्पिभ्यां पुक्तं पथ्यं समाचरेत् ॥ शाल्योदनं तथा सूपं तुवरीणां घृतं मधु ॥ गोधूमं सैंधवं शिगूर्विर्वीकोशातकीफलं ॥ आर्द्रकं जलमं दोष्णं हितं चात्र प्रकीर्त्तितं ॥ पंचोपदंशरोगाणां प्रमेहाणां तथैव च ॥ नराणां वातरोगाणां कुष्ठानाम पिनाशनं ॥ इति चोपचीन्यादिचूर्णं ॥ चोपचिन्याः कृतं चूर्णं पलं द्वादशसंमितं ॥ पिप्पली पिप्पलीमूलं मरिचं नागरं त्वचं ॥ आकल्लकं लवंगं च प्रत्येकं कर्षसंमितं ॥ शर्करा समचूर्णा च पाचयेत्सर्वमेकतः ॥ मोदकान्कार

ना

॥ ४१३ ॥

येतस्य कर्षमात्रप्रमाणतः॥ सायं प्रातर्निषेव्यास्तु पथ्यं पूर्वोक्तचूर्णवत्॥ उपदंशे
प्रलोकुष्ठे वातरोगे भगंदरे॥ धातुक्षये कृशे कासे प्रतिश्याये च यक्ष्मणि॥ सर्वान्रो
गान्निहन्त्याशु ततः पुष्टिकरो भवेत्॥ इति चोपचीनीपाकः॥ शुद्धं रसं पिचुमितं हि
वलिप्रमर्द्य सर्वं हि भागनवनीतमपि प्रमर्द्य॥ वस्त्रेण लिप्य पिचुमंदविशीर्णपर्ण
रवां संवेष्टयेत्तत मुखीं परिदीपयेच्च॥ तस्माद्घृतं स्रवति काचमये च पात्रे धृत्वा हि
वह्निदलसाकमिदं प्रदेयं॥ सर्वोपदंशकरिकेसरिणं प्रणघ्नं पड्गादिकं रसघृते च या
वि यर्जनीयं॥ इति फोरंग रसघृतं॥ करवीरस्य मूलेन परिपिष्टेन वारिणा॥ असाध्या
पि प्रजत्यस्तं लिंगस्था रुक्प्रलेपनात्॥ आमूगंधारव्यरजनीकारवी मरिचं तथा॥ ए
षां चूर्णेन सूक्ष्मेण गुग्गुलोक्षप्रमितांशुभागः॥ कृत्वा देयामेद्ररोगे प्रातः शीतेन वा

॥४१४॥

रिला ॥ सा घ्नाभ्यंतरमेढ्रोत्थरोगघ्नो योगराडयं ॥ अनुभूतोऽयं योगः ॥ खदिरो हिंगुलं तुल्यं मरिचं पूगफलं तथा ॥ चासवथ्याच सवीरिणि सूक्ष्मचूर्णानि कारयेत् ॥ पंचापि पंचक षीरिणि पंचाप्नान्निंबुकाद्रवैः ॥ संमर्द्य गुटिकाः कार्य्या बदरास्थि प्रमाणतः ॥ पंचोप दंशरोगेषु देयः पर्युषितांभसा ॥ मेढ्रोगं निहंत्येषा भास्कर रश्मिरिं तमथा ॥ इति ख दिरसादि गुटी ॥ अथ पथ्यमाह ॥ शालयो यव मुद्गाश्च घृततैलमधूनि च ॥ कटि ल्वकं शिग्रुफलं पटोलं नवमूलकं ॥ कषाय तिक्तौ च रसौ कपोत्थमुदकं तथा ॥ एतत्प थ्यं समुद्दिष्टमुपदंशवतां नृणां ॥ अथापथ्यमाह ॥ दिवा निद्रां मूत्रवेगं तुर्यं नारीमैथु नं गुडं ॥ आयासमम्लं तक्रं च वर्जयेदुपदंशवान् ॥ इत्युपदंशचिकित्सा ॥ अथ शू कदोषनिदानमाह ॥ अकस्माच्छेफसो वृद्धिं योऽभिवांछति मूढधीः ॥ व्याधय

॥४१४॥

त्तस्य जायंते दशचाष्टौ च मूत्रजाः ॥१॥ अक्रमात् अनुचितवृद्धिक्रमात् ॥ मूत्रकोजल
मूत्रकः विषोजलजंतु विशेषः ॥ सतु जलमलोद्भूतः अस्य डुंडुभः ॥ तथोमूत्रकप्रधानो
त्तिं गवादिकरोवा स्यायनायुक्तो भक्ष्यातेकास्थिजं तन्मूत्रकमथापवत्रमित्यादि
योगः मूत्रकृत्स्कृच्छ्रते ॥ तस्माज्जाताः ॥ ते च मूत्रकदोषजा व्याधयो दशचाष्टौ च भवं
ति ॥१॥ अथ तेष्वादौ सर्षपिकामाह ॥ गौरसर्षपसंस्थाना मूत्रकदंशहेतुका ॥ पि
टिकाश्लेष्मवाताभ्यां ज्ञेया सर्षपिका तु सा ॥२॥ मूत्रकदंशहेतुका मूत्रकनिमित्ता
दुष्टयोनिनिमित्ता च ॥२॥ अथाष्ठीलिकां ग्रथितं चाह ॥ कठिनो विषमैर्भुग्नैर्वायु
नाष्ठीलिका भवेत् ॥ मूत्रकैर्ग्रथितैः शश्वद्ग्रथितं नाम तत्कफात् ॥३॥ अष्ठीलिका
लोहकारस्य भांडविशेषः ॥ तत्तुल्यत्वादष्ठीलिका ॥ विषमैर्भुग्नैरिति वक्ष्यमा

॥४३५॥

णाच्छूकविशेषणां ॥ विषमैः ह्रस्वदीर्घैः भुग्नैः वक्रैः ॥ पह्निंगं सर्वदाच्छूकैः पूरि
तं तद्ग्रथितं ग्रथितत्वाद्ग्रथितं ॥२॥ अथ कुंभिकामलजीं चाह ॥ कुंभिका रक्तपित्तोत्था
जांबवास्थिनिभासिता ॥ अलजीं स्यात्तथा याद्दक् प्रमेहपिटिकालजी ॥४॥ सा
च रक्तासितस्फोटा चारुणा कथितावसा ॥४४॥ कुंभिका कुंभतुल्यत्वात् ॥
असितारुणा ॥ अलज्यपि रक्तपित्तनिमित्ता सेयं ॥४॥ अथ मृदितं संमू
ढपिडिकां चाह ॥ मर्दितं पीडितं यत्तु संरब्धं वातकोपतः ॥ पाणिभ्यां भृशसं
मूढे संमूढपिटिका भवेत् ॥५॥ शूकदोषे जाते पीडितं लिंगमिति शेषः ॥ सं
रब्धं सशोथं ॥ पाणिभ्यां शूकदोषोत्पन्ने तं भृशसंमूढे पिचिते लिंगे ॥
अत्रापि वातकोपतः इत्यनुवर्त्तते ॥५॥ अथावमंथमाह ॥ दीर्घा वह्व्यश्च पिडि

॥४३५॥

कादीर्घ्यते मध्यतस्तथा ॥ सोच मंथः कफासृग्भ्यां वेदनारोमहर्षकृत ॥ ६ ॥ दीर्घी दी-
र्घीकुरुतः ॥ कफासृग्भ्यां शूकपातकुपिताभ्यां ॥ एवमन्यत्रापि सामान्येन शूक-
दोषाभिभूतेन शूकपातो नुक्तोपि ज्ञेयः ॥ ७ ॥ अथ पुष्करिकामाह ॥ पिटिकापिटि-
काव्याप्ता पितशोणितसंभवा ॥ पद्मकर्णिके संस्थाना ज्ञेया पुष्करिका तु सा ॥
८ ॥ पिटिकाव्याप्ताश्च दूषिपिटिकाचिता ॥ अत एव पद्मकर्णिकसंस्थाना ॥ ८ ॥ अथ
स्पर्शहानिमुत्तमांचाह ॥ स्पर्शहानिं तु जनयेच्छोणितं शूकदूषितं ॥ मृदुमाषोप-
मा रक्ता रक्तपित्तोद्भवाचया ॥ व्याधिरेषोत्तमानाम शूकाजीर्णनिमित्तजा ॥ ९ ॥ शोणि-
तं कर्तृ ॥ स्पर्शहान्यां स्पर्शसहत्वमेव लक्षणं ॥ शूकाजीर्णं पुनःपुनः दुरवचा-
रितशूकविकृतिरूपं ॥ ९ ॥ अथ पेशतपोनकमाह ॥ छिद्रैरणुमुखैर्यस्य चितं।

॥४१६॥

लिंगं समंततः ॥ वातशोणितजो व्याधिर्विज्ञेयः शतपोनकः ॥ ९ ॥ शतपोनकं चलनी
तत्तुल्यत्वाच्छतपोनकः ॥ ९ ॥ अथ त्वक्पाकं शोणितार्बुदं चाह ॥ वातपित्तकृतो ये
यस्त्वक्पाकोज्वरदाहकृत ॥ कृत्स्नैः स्फोटैः सरक्ताभिः पिटिकाभिर्निपीडितं ॥ लिं
गं वास्रक्रुजघ्नोग्रासेयं तच्छोणितार्बुदं ॥ १० ॥ त्वक्पाकस्यं लिंगं त्वक्पाकलक्ष
णमेव ॥ वास्रक्रुजः स्फोटपिटिकाधिष्ठानवेदनाः ॥ वास्रक्व्रणाधिष्ठानमिति
मधुकोशकृत ॥ १० ॥ अथ मांसार्बुदं मांसपाकं चाह ॥ मांसदोषेण जानीयादर्बुदं
मांससंभवं ॥ शीर्यंते यस्य मांसानि यस्य सर्वाश्च वेदनाः ॥ विद्यात्तं मांसपाकं
तु सर्वदोषकृतं भिषक ॥ ११ ॥ मांसदोषेणाष्यकृजश्शोणितकृतमांसदोषेण ॥
शीर्यंते गलंति ॥ सर्ववेदनाः वातपित्तकफवेदनाः ॥ ११ ॥ अथ विद्रधिमाह ॥ ॥४१६॥

विद्रधिं सन्निपातेन यथोक्त मभिनिर्दिशेत् ॥ ११ ॥ सन्निपातेन यथोक्तं उक्तसान्नि
पातिकविद्रधिवत्स्यं ॥ अभिनिर्दिशेत् कथयेत् ॥ ११ ॥ अथ तिलकालकमाह ॥ कृष्णा
नि चित्राण्यथवापि शूकानि सविषाणि तु ॥ पानि तानि पचेत्याशु मेद्रं निरवशेषतः
॥ १३ ॥ कालानि भूत्वा मांसानि शीर्यंते यस्य देहिनः ॥ सन्निपातसमुत्थांश्च तान्वि
द्यात्तिलकालकान् ॥ १४ ॥ चित्राणि नानावर्णानि ॥ शूकानि शूकव्रणानि ॥ मेद्रं चाः
क्रोशंतीति यतः ॥ सविषाणि सविषशूकाव्येजंतु विशेषकृतत्वात् ॥ कालानि
कृष्णानि ॥ शीर्यंति गलंति कृष्णतिलतुल्यवर्णत्वात्तिलकालकसंज्ञा ॥ १३ ॥ १४
असाध्यानाह ॥ तत्र मांसार्बुदं यच्च मांसपाकश्च यः स्मृतः ॥ विद्रधिश्च न सिद्ध्यं
ति ये च स्फाः सि तिलकालकाः ॥ १५ ॥ इति शूकदोषनिदानं ॥ अथ शूकदोषचिकि

॥४१७॥

स्रा॥हितंचसर्पिषःपानंपथ्यंचापिविरेचनं॥हितःशोणितमोक्षश्चशूकरोगेषुदे
हिनां॥सर्षपींलिखितांसूक्ष्मैःकषायैरवचूर्णयेत्॥तैरेवाभ्यंजनेतैलंसाधयेद्व
णरोपणं॥क्रियेयमवमंथेपिरक्तंस्राव्यंतथोभयोः॥अष्ठीलायांहृतेरक्तेश्लेष्म
ग्रंथिवदाचरेत्॥कुंभीकायांहृतेरक्तेव्रणंपक्वंविशोधयेत्॥साध्योलेपस्तथातै
लंत्रिफलालोध्रतिंदुकैः॥अलज्यांचहृतेरक्तेह्ययमेवविधिस्मृतः॥ग्रथितेस्वेदये
द्घोनाडीस्वेदविधानतः॥उपनाहैःसुखोष्णैश्चसुस्निग्धैरुपनाहयेत्॥पिटिका
मुत्तमाख्यांतुसंशोध्यविडशोधितां॥क्षौद्रयुक्तैःकषायाणांचूर्णैःकल्कैरुपाच
रेत्॥पुष्करीमूढयोःपित्तविसर्पोक्तोहितोविधिः॥त्वक्पाकेस्पर्शहान्यांचसे
चयेन्मृदितंपुनः॥बलातैलेनकोष्णेनमधुरैश्चोपनाहयेत्॥रसक्रियांचरेद्घो॥४१७॥

ते त्वनेक्ष्मतयो नके ॥ पपक्वपत्राम्रादिसंसिद्धं तैलं चानंतरं क्षिपेत् ॥ रक्तविद्रधिवत्कु
र्यात्कर्म क्षोणितजे र्वुदे ॥ मांसार्वुदे प्रकुर्वीत क्रियां सद्योव्रणोदितां ॥ त्रिफलागु
ग्गुलुं चापि विशेषेण चारयेत् ॥ मांसपाके यदाद्यस्य गणस्य विधिवत्कृतैः
कषायचूर्णकल्कैश्च सेकोद्धूलनलेपनं ॥ विद्रधौ विधिवत्कार्य्यं रक्तविद्रधिभे
षजं ॥ वटूलादिकषायैश्च पाने प्रक्षालने हितः ॥ तिलकालकमुत्सिव्य क्षुरेण ल
घुपाणिना ॥ भिषजाप्यत्र कर्त्तव्यः सद्योव्रणविधिः सता ॥ मांसार्वुदं मांसपाकं
विद्रधिं तिलकालकं ॥ प्रत्याख्येय प्रकुर्वीत भिषक्तेषां प्रतिक्रियां ॥ रसांजनाक्त
पंचैकं सेयमात्रा त्वणांतिकृत ॥ सर्वेषां प्रकृदोषाणां शोधनं रोपणं परं ॥ कल्कैः
कषायैर्घृततैलचूर्णैः रसक्रियाभिश्च भिषग्वरस्तु ॥ चलाचलं वीक्ष्य निदाने

॥ ४१८ ॥

दोषमुपाचरेच्छूकगदान्प्रयत्नात् ॥ उपदंशक्रियाः सर्वाः प्रशस्ताश्शूकदोषजे ॥
अथ पथ्यमाह ॥ वमो विरेको रक्तस्रावः सर्पिःपानं च शालयः ॥ यवा जांगलमांसा
नि मुद्गयूषः कटित्रकः ॥ पटोलं शिग्रुकर्कोटं पत्तूरं वालमूलकं ॥ तिक्तं कषायं तैलं च
स्यात्पथ्यं शूकदोषिणां ॥ अथापथ्यमाह ॥ मूत्रवेगं दिवानिद्रां व्यायामं मैथुनं गु
डं ॥ विदाहि गुरु तक्रं च शूकदोषी परित्यजेत् ॥ इति शूकदोषचिकित्सा ॥ अथ कु
ष्ठनिदानं ॥ तत्र विशेषेण कुष्ठजनकं निदानमाह ॥ विरोधीन्यन्नपानानि द्रवस्नि
ग्धगुरूणि च ॥ भजतामागतां छर्दिं वेगांश्चान्यान्प्रतिघ्नतां ॥ १ ॥ व्यायाममग्नि
संतापमतिभुक्त्वा निषेविणां ॥ शीतोष्णलंघनाहारान् क्रमं मुक्त्वा निषेविणां ॥ ॥ ४१८
२ ॥ घर्मश्रमभयार्तानां द्रुतं शीतांबुसेविनां ॥ अजीर्णाध्यशिनां चापि पंचक

णोपचारिणां ॥ ३ नवान्नदधिमत्स्याम्ललवणानि निषेविणां ॥ माषमूलकपिष्टा
न्नतिलक्षीरगुडाशिनां ॥ ४ व्यवायं चाप्यजीर्णेन्ने दिवानिद्रां निषेविणां ॥ विप्रा
न् गुरून् धर्षयतां पापं कर्म च कुर्वतां ॥ ५ वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमंबु च
दूषयंति स कुष्टानां सप्तको द्रव्यसंग्रहः ॥ अतः कुष्टानि जायंते सप्त चैकादशैव च
ह ॥ विरोधीन्यन्नपानानि क्षीरमत्स्यादीनि दधिदुग्धादीनि ॥ भजतामिति पूर्वेण
संबध्यते ॥ आगतान् उपस्थितान् अन्यान् मूत्रपुरीषादिवेगान् ॥ व्यायाममित्या
दि ॥ अतिभुक्त्वा व्यायामं अग्निसंतापं अग्निरूपलक्षणं सूर्यादिसंतापं च निषेवि
णां ॥ अत्र व्यायाममग्निसंतापमिति द्वितीया षष्ठ्यर्थे ॥ एवमग्रे शीतोष्णलंघना
हारान् इत्यादिष्वपि ज्ञेयं ॥ क्रमं विधिं ॥ घर्मेत्यादि ॥ घर्मादिनार्तत्वे सति द्रुतम

४१८

विश्रम्यपानस्नानादिना शीतांबुसेविनां ॥ घर्मआतपः ॥ अजीर्णाध्यशिनां पूर्वदिना
हारेजीर्णेतामप्राप्ते तदुपरिभुंजानानां ॥ व्यवायमित्यादि ॥ अन्नेअजीर्णे विदग्धा
दिरूपे सति व्यवायमैथुनं निषेविणां ॥ दिनानिद्रां निषेविणामिति भिन्नो हेतुः ॥
धर्षयतामभिभवतां ॥ दोषदूष्यसंग्रहार्थमाह ॥ वातादय इत्यादि ॥ अत्रादिशब्दे
न त्रिष्वपि प्रतीतेषु त्रय इति पदं सर्वकुष्ठेषु त्रयाणामपि वातादीनां दुष्टिबोध
नार्थं ॥ त्वक्रसः असृक्लसीका ॥ द्रव्यसंग्रह इति द्रव्यमारंभककारणमुच्यते ॥ संख्यामा
ह ॥ अतः कुष्ठानीत्यादि ॥ अतः पूर्वोक्ताद्दोषदूष्यसमुदायात् ॥ सप्तचैकादशैव चेति सं
ख्याविच्छेदपाठेन सप्तानां महाकुष्ठत्वमेकादशानां क्षुद्रकुष्ठत्वं च बोधयति ॥ १ ॥ २ ॥
॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ अथ महाकुष्ठान्याह ॥ पूर्वत्रिकं तथा सिध्मं ततः काकणकं तथा ॥

पुंडरीकर्क्षजिह्वं तु महाकुष्ठानि सप्त च ॥ ७ ॥ पूर्वी त्रिकं कपालोदुंबर मंडलाख्यं ॥ सिध्म म
ध्याद्वोऽकारांतो नपुंसकलिंगः ॥ ननु कथं सिध्मस्य महाकुष्ठेषु गणना सुश्रुते न क्षुद्र
कुष्ठेषूक्तत्वात ॥ उच्यते ॥ त्वक्स्था सगता सिध्मा पुष्पिका सुश्रुते न क्षुद्रकुष्ठेषूक्ता ॥ धातु
प्रविष्टं तु सिध्मं महाकुष्ठमेव ॥ एवंविधस्य सिध्मस्य चरकेण महाकुष्ठेषु दर्शितत्वात
एषां महाकुष्ठत्वं च शीघ्रमुत्तरोत्तरधात्ववगाहनात ॥ उत्वण दोषजन्यत्वाच्चिकित्सा
वाहुल्याच्च ॥ ७ ॥ अथ क्षुद्रकुष्ठान्याह ॥ एककुष्ठं स्मृतं पूर्वं गजचर्म ततः परं ॥ ततश्चर्म
दलं प्रोक्तं ततश्चापि विचर्चिका ॥ च विपादिकाभिधा स्यैव यामाकच्छू ततः परं ॥ ततो
दद्रुश्च विस्फोटकिटिभे च तत परं ॥ ९ ॥ ततश्चालसकं प्रोक्तं प्रतताःस्ख्रू तत परं ॥ क्षुद्रकु
ष्ठानि चैतानि कथितानि भिषग्वरैः ॥ १० ॥ ननु दद्रुः कथं क्षुद्रकुष्ठेषु गणिता ॥ सु

श्रुते महाकुष्ठेषूक्तत्वात् ॥ उच्यते ॥ असिताय गाढमूलादद्रूः स्मृता तेन महाकुष्ठेषूक्ता ॥ अ
सितेतरा न च गाढमूला दद्रूः क्षुद्रकुष्ठमेव ॥ एवंविधायाऽप्यरुके क्षुद्रकुष्ठेषु दर्शितत्वात्
॥८॥९॥१०॥ अथ कुष्ठानां त्रिदोषजत्वे नैकत्वेपि दोषस्योल्बणतया सप्तधात्वमाह ॥ कु
ष्ठानि सप्तधा दोषैः पृथग्द्वंद्वसमागतैः ॥ ११ ॥ सर्वेष्वपि त्रिदोषजेषु कुष्ठेषु सत्सु ॥ व्यप
देशाधिकत्वतः कुष्ठानि सप्तधा दोषैरिति व्यपदेशः कपालादिसंज्ञास्तेषां मध्याद
शात्वहुवंपदाधिक्यं ततः कुष्ठानि अष्टादशानि सप्तधा दोषैः कथंभूतैः दोषैः पृथ
ग्द्वंद्वसमागतैः ॥ समागतैः संगतैर्मिलितैरिति यावत् ॥ अस्यार्थः ॥ कमपि कुष्ठं वा
तोल्बणं कमपि पित्तोल्बणं कमपि कफोल्बणं कमपि वातपित्तोल्बणं कमपि वात
श्लेष्मोल्बणं कमपि पित्तश्लेष्मोल्बणं कमपि त्रिदोषोल्बणमिति सर्वकुष्ठेषु यो

द्वयं ॥११॥ अथ पूर्वरूपमाह ॥ अतिश्लक्ष्णः खरस्पर्शः स्वेदास्वेदौ विवर्णता ॥ दाहः कं
डूस्त्वचि स्वापस्तोदः कोठोन्नतिः श्रमः ॥१२॥ व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थि
तिः ॥ रूढानामपि रूक्षत्वं निमित्तेल्पेपि कोपनं ॥ रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणम
ग्रजं ॥१३॥ अतिश्लक्ष्णः अतिमृदुः अथवा खरः रूक्षः कर्कशो वा स्पर्शः ॥ स्वेदास्वेदौ
घर्मादिनिसंगाभावेपि स्वेदः अथवा घर्मादिनिसंगे स्वेदाभावः ॥ त्वचि स्वापः स्पर्श
ज्ञता ॥ कोठोन्नतिः वरटीदष्टनिकाशः शोथः कोठस्तस्योन्नतिः ॥ शीघ्रोत्पत्तिः शीघ्रा
उत्पत्तिः चिरस्थितिः व्रणानामित्यन्वयः ॥१२॥१३॥ अथ संप्राप्तिपूर्वकं सामान्यं ल
क्षणमाह ॥ शिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषं ॥ दूषयंति श्लथीकृत्य नि
श्चरंतो बहिस्त्वचः ॥ कुर्वंति पञ्चैवैतान्दोषाः कुष्ठमुपक्रांतिमते ॥१४॥ तिर्यग्गाः ति

र्ध्वगाताः शिराः प्रपद्येत्यन्वयः ॥ १४ ॥ अथ येनोल्वणेन दोषेण यत्कुष्ठमुत्पद्यते तदाह ॥
वातेन कुष्ठं कापालं पित्तेनौदुंबरं कफात् ॥ मंडलाख्यं विचर्चीच ऋक्षाख्यं वातपित्तजं ॥
१५ ॥ चर्मैककुष्ठं किटिभं सिध्मालसविपादिकाः ॥ वातश्लेष्मोद्भवाः पित्तकफाद्दद्रूशतारु
षी ॥ १६ ॥ पुंडरीकं सविस्फोटं पामा चर्मदलं तथा ॥ सर्वैर्योल्वणैर्दोषैराहुः काकणकं
बुधाः ॥ १७ ॥ विचर्चीच कफादित्यन्वयः ॥ पुंडरीकं सविस्फोटं पामा चर्मदलं तथा ॥ पित्त
कफादित्यन्वयः ॥ १५ ॥ १६ ॥ १७ ॥ अथ महाकुष्ठानां मध्ये कपालस्य तल्लक्षणमाह ॥ रू
क्षारुणं कपालाभं यद्रूक्षं परुषं तनु ॥ कपालं तोदबहुलं तत्कुष्ठं विषमं स्मृतं ॥ १८ ॥ किं
चित्रूक्षाः किंचिदरुणाः ये कपालाः स्फटितमृत्पात्रखंडाः स्वर्परा इति यावत् तद्वर्णं
परुषं खरस्पर्शं तनु तनुत्वक् ॥ कपालं कपालसंज्ञं ॥ विषमं दुश्चिकित्स्यं ॥ १८ ॥ औ

४२१

डुंबरमाह ॥ रूक्षदाहरुजाकंडूभिः परीतं रोमपिंजरं ॥ उदुंबरफलाभासं कुष्ठमौदुंबरं वदेत् ॥ १६ ॥
रोमपिंजरं रोमभिः पिंजरं कपिशरोमेत्यर्थः ॥ उदंबरफलाभासं ॥ उदंबरफलाकारं ॥ १६ ॥
मंडलमाह ॥ श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमंडलं ॥ कृच्छ्रमन्योन्यसंसक्तं कुष्ठं मंडलमुच्यते ॥ २० ॥ श्वेतं रक्तं किंचिच्छ्वेतं किंचिद्रक्तं स्थिरं चिकित्सां विना अविनाशि ॥ स्त्यानं आर्द्रं सदरं च ॥ उत्सन्नमंडलं उद्गतमंडलं ॥ कृच्छ्रं कृच्छ्रसाध्यं ॥ अन्योन्यसंसक्तं परस्परं मिलितं ॥ २० ॥ सिध्ममाह ॥ श्वेतं ताम्रं च तनु च यद्रजो घृष्टं विमुंचति ॥ प्रायेणोरसि तत्सिध्ममलाबुकुसुमोपमं ॥ २१ ॥ श्वेतताम्रं श्वेतताम्रं ॥ तनु तनुत्वकं ॥ प्रायेणोरसीति प्रायःशब्दात् ॥ अन्यत्रापि बोद्धव्यं ॥ २१ ॥ अपकाकणमाह ॥ यत्काकणंतिकावर्णमपाकं तीव्रवेदनं ॥ त्रिदोषलिंगं तत्कुष्ठं काकणं नैव सिध्यति ॥ २२ ॥ काकणंतिका गुंजा गुंजा

वर्त्मत्वेन मध्ये कृष्णमंते रक्तं ॥ अथवा मध्ये रक्तमंते कृष्णं । अपाकं स्वभावात् । त्रिदोषलिंगं
सर्वेषां कुष्ठानां त्रिदोषजत्वे पि उल्बणदोषत्रयलिंगं ॥ २२ ॥ पुंडरीकमाह ॥ सश्वेतं रक्तप
र्यंतं पुंडरीकदलोपमं ॥ सोत्सेधं च सरागं च पुंडरीकं प्रचक्षते ॥ २३ ॥ पुंडरीकं कमलं तत्प
त्रोपमं ॥ तेन सश्वेतं रक्तपर्यंतं सरागमिति मध्ये श्वेतं लोहितमंते रक्तमित्यर्थः ॥ सराग
मिति अत्यंतं लोहित्याधिका ॥ योधनार्थं सोत्सेधं उद्धृतं ॥ २३ ॥ ऋक्षजिह्वमाह ॥ कर्कशं ।
रक्तपर्यंतमंतःश्यावं सवेदनं ॥ यदृक्षजिह्वासंस्थानमृक्षजिह्वं तमुच्यते ॥ २४ ॥ रक्त
पर्यंतं अंते रक्तं ॥ अंतः मध्ये श्यावं तमो धूम्रवर्णं ॥ ऋक्षजिह्वासंस्थानं ऋक्षो भल्लूक
स्तज्जिह्वाकृति ॥ अथ्यजिह्वासंस्थानमिति पाठे अथ्यो निलांडो हरिणस्तस्य जिह्वा
कारं ॥ २४ ॥ अपरस्कुष्ठानां मध्ये रोककुष्ठस्य गजचर्मणोऽल्पलक्षणमाह ॥ अस्वे

॥४२२॥

दतं महावास्तुकं यन्मत्स्यशकलोपमं ॥ तदेककुष्ठं चर्माख्यं बहलं हस्तिचर्मवत् ॥२५॥ महावा
स्तु महासंस्थानं ॥ मत्स्यशकलोपममित्यत्र मत्स्यशकलशब्देन तल्लक्षणापोत्वमुच्यते ॥
तेन च कांकणभूर्जपत्रसदृशं भवति ॥ एककुष्ठमिति क्षुद्रकुष्ठेषु मुख्यत्वात् प्रथमोपा
दानं ॥ चर्माख्यमित्यादिना गजचर्म तल्लक्षणं ॥ बहलमपि तत्तलं ॥ हस्तिचर्मवत हस्तिसंस्पर्श
६ च ॥२५॥ अथ चर्मैतमाह ॥ रक्तं सशूलं कंडूमत् सस्फोटं दलयत्यपि ॥ तच्चर्मदलमाख्या
तं स्पर्शस्यासहनं च यत् ॥२६॥ दलयत्यपि विदारयत्यपि चर्मेति शेषः ॥२६॥ अथ वि
चर्चिकामाह ॥ सकंडूः पिटिका श्यावा बहुस्रावा विचर्चिका ॥२७॥ पिटिकाः क्षुद्रपिटिका
ननु क्षुद्रकुष्ठानां कथमेकादशत्वं ॥ विपादिकया ह्येकादशत्वसंभवात् ॥ उच्यते ॥ विचर्चि
कैव पादयोर्भवतीति विपादिका ॥ तेन न संख्यातिरेकः ॥ अत एव भोजः ॥ दोषाः प्र

दुष्यत्वङ्मांसं पाणिपादसमाश्रिताः ॥ पिटिकां जनयत्याशु दाहकंडूसमन्वितां ॥ दाल्यते रू
क्षत्वेन रूक्षा पाण्योर्ज्ञेया विचर्चिका ॥ पादे विपादिका ज्ञेया स्थानभेदाद्विचर्चिके इति ॥ दा
ल्यते विदार्यते ॥ केचिद्विचर्चिकातो विपादिकां भिन्नामाहुः ॥ ये पादिकं पाणिपादस्फुटनं
तीव्रवेदनमिति ॥ पाणिपादस्फुटनं पाण्योः पादयोश्च स्फुटनं दारणं येन तत् ॥ २४ ॥ वि
अथ पामां कच्छुं चाह ॥ सूक्ष्मा बह्व्यः पिटिकाः स्रावमत्यः पामेत्युक्ताः कंडूमत्यः सदाहा
सैव स्फोटैस्तीव्रदाहैरुपेता ज्ञेया पाण्योः कच्छुरुग्रा स्फिजोश्च ॥ २५ ॥ स्फिजोः प्रोथयोः
अन्ये तु सैवेत्यनेनाभिधानेन पामैव कच्छुः नातो भिन्नेत्याहुः ॥ २५ ॥ अथ दद्रुं विस्फोटं
चाह ॥ सकंडूरागपिटिकं दद्रूमंडलमुद्गतं ॥ स्फोटाः श्यावारुणाभासा विस्फोटाः स्फ
स्तनुत्वचः ॥ २६ ॥ दद्रूमंडलमिति मंडलरूपेणोत्पद्यते ॥ उद्गतं उच्छूनं ॥ २६ ॥ अथ कि

टिभमलसकं चाह ॥ श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतं ॥ कंडूमद्भिः सरागैश्च गं
डैरलसकं चितं ॥ ३० ॥ किणः शुष्कव्रणस्थानं तद्वत्कर्कशस्पर्शी परुषं रूक्षं ॥ गंडैः महा
पिटिकाभिः चितं वेष्टितं ॥ ३० ॥ अथ शतारुमाह ॥ रक्तं श्यावं सदाहार्ति शतारुः स्याद्बहु
व्रणं ॥ ३० ॥ ननु सुश्रुते कंडूचितायाः पिटिका शरीरे संज्ञायहीनार्कसौच्यते सेत्या
दीनि कुष्ठान्यन्यानि उक्तानि तान्यत्र नोक्तानि ॥ उच्यते ॥ कुष्ठानामसंख्येयत्वात ॥
केचिच्चरके केचित्सुश्रुते कुष्ठप्रकारा उच्यंते ॥ उक्तं हि चरके ॥ कुष्ठं सप्तविधमष्टा
दशं संख्योयमसंख्येयं चेति ॥ ३० ॥ अथ सप्तधातुगतानां कुष्ठानां लक्षणं ॥ तत्र र
सगतस्य लक्षणमाह ॥ त्वक्स्थे वैवर्ण्यमंगेषु कुष्ठे रौक्ष्यं च जायते ॥ त्वक्स्वा
पो रोमहर्षश्च स्वेदस्याति प्रवर्त्तनं ॥ ३१ ॥ त्वक्शब्देनात्र रस उच्यते ॥ धातु

प्रसारवात्॥ त्वक्स्थमाह॥ त्वक्स्थापः स्पर्शाज्ञत्वं॥३१॥ अथ रुधिरगतमाह॥ केऽर्विपूयक
ऊणे च कुषे शोणितसंभवे॥३२॥ विपूयकः विशेषेण पूयः॥ केचित्वकस्थापरेत्यादि
केरक्तगतस्य लिंगमन्यते॥३२॥ अथ मांसगतमाह॥ वाहुल्यं वक्रशोषञ्च कार्कश्यं
पिटिकोद्गमः॥ तोदः स्फोटः स्थिरत्वं च कुषे मांससमाश्रिते॥३३॥ वाहुल्यं कुषस्य
पुष्टिः॥ पिटिकोद्गमः॥ क्षुद्रपिटिकोद्गमः॥ स्फोटः बृहत्पिटिकाः॥ स्थिरत्वमसंचा
रित्वं॥३३॥ अथ मेदोगतमाह॥ कौण्यं गतिक्षयोंगानां संभेदः क्षतसर्पणं॥ मेदः
स्थानगते लिंगं प्राग्युक्तानि तथैव च॥३४॥ कौण्यं हस्तनाशः॥ अंगानां संभेदः अं
गभेदः क्षतसर्पणं क्षतप्रसरणं॥ प्राग्युक्तानि रसरक्तमांसगतानि लिंगानि॥३४
अथास्थिमज्जागतमाह॥ नासाभंगोक्षिरागश्च क्षते कृमिसंभवः॥ स्वरोप

घातः पिटिका भवेत्कुष्ठे स्थिमज्जगे ॥ ३५ ॥ अथ शुक्रागतमाह ॥ दंपत्योः कुष्ठबाहुल्या
त् दुष्टशोणितशुक्रयोः ॥ यदपत्यं तयोर्जातं ज्ञेयं तदपि कुष्ठितं ॥ ३६ ॥ दंपत्योः स्त्रीपुरु
षयोः ॥ शुक्रागतकुष्ठमपत्येन व्यज्यत इति श्लोकाभिप्रायः ॥ ननु दुष्टशोणितशुक्रयो
र्जातमसंगतं ॥ शुद्धशोणितशुक्रयोरेव दंपत्योर्गर्भसंभवात् ॥ यत आह ॥ कामान्मि
थुनसंयोगे शुद्धशोणितशुक्रजः गर्भः संजायते नार्याः स जातो बाल उच्यत इति ॥
अन्यच्च वातादिदुष्टरेतसः प्रजोत्पादनेन समर्था इति ॥ उच्यते ॥ गर्भोत्र शुद्धो वा दुष्यः
असुद्धस्तु गर्भो दुष्टशोणितशुक्रयोरपि भवति ॥ यतो धवधिरादीनां संभवात् ॥
शोणितमत्रार्त्तवं ॥ कुष्ठितं कुष्ठं संजातमस्येति तारकादित्वादितच् ॥ ३६ ॥ अथ कु
ष्ठेषु त्वग्वातादिदोषलिंगमाह ॥ खरं श्यावारुणं रूक्षं वातकुष्ठं सवेदनं ॥ पि

॥ ४२५ ॥

न्नात् प्रकुपितं दाहरागस्रावान्वितं मतं ॥ ३४ कफात्क्लेदि घनं स्निग्धं सकंडूशैत्यगौरवं ॥ द्विलिंगं द्वंद्वजं कुष्ठं त्रिलिंगं सान्निपातिकं ॥ ३५ ॥ खरं कर्कशं ॥ श्यावारुणाभं श्यावं वारुणं च ॥ प्रकुपितं क्लेदपूतिपक्वं तं क्लेदि आर्द्रतायुक्तं ॥ घनं पुष्टं ॥ ३७ ॥ ३८

अथ साध्यत्वादिकमाह ॥ साध्यं त्वग्रक्तमांसस्थं वातश्लेष्माधिकं च यत् ॥ मेदोगं द्वंद्वजं याप्यं वर्ज्यं मज्जास्थिसंश्रितं ॥ कृमितृड्दाहमंदाग्निसंयुक्तं यत्त्रिदोषजं ३९ वातश्लेष्माधिकं च यदित्यनेन सिध्मैककुष्ठगजचर्मविपादिकाकिटिभालसकानि साध्यानि ॥ अत्र मज्जगतत्वात्सत्वात् शुक्रगतमप्यसाध्यं बोद्धव्यं ॥ कृमितृड्दाहाद्यमपि वर्ज्यमित्यन्वयः ॥ ४० ॥ प्रभिन्नं प्रस्रुतांगं च रक्तनेत्रं हतस्वरं ॥ पंचकर्मगुणातीतं कुष्ठं हंति हि कुष्ठिनं ॥ ४१ ॥ प्रभिन्नं विदीर्णं ॥ पंचकर्मगुणातीतं असं

॥ ४२५ ॥

जातपंचकर्मगुणं॥४०॥अथत्वगदुष्टिसामान्यात्कुष्ठभेदत्वाच्छ्वैत्रेवश्वित्रमाह॥कुष्ठैक
संभवंश्वित्रंकिलासंचारुणंभवेत्॥निर्दिष्टमपरिस्रावित्रिधातूद्भवसंश्रयं॥४१॥
कुष्ठैकसंभवंकुष्ठेनसहएकस्तुल्यःसंभवोनिदानंयस्यतत्॥श्वित्रस्यभेदमाह
किलासंचारुणंभवेदिति॥श्वित्रमेवरक्तमांसाश्रयात्अरुणंकिलासंचभवेदि
त्यर्थः॥ननुकुष्ठश्वित्रयोःकोभेदः॥इत्यतआह॥निर्दिष्टमपरिस्रावीतिश्वित्रमप
रिस्राविभवतिकुष्ठंतुस्रावि॥अपचत्रिधातूद्भवसंश्रयमिति॥त्रयोधातवोवात
पित्तकफास्तेभ्यःपृथक्भूतेभ्यउद्भवोयस्यतत्॥अपचत्रयोधातवोरक्तमांसमेदांसि
संश्रयोधिष्ठानंयस्यतत्॥कुष्ठंसान्निपातिकंसर्वधातुगतंचभवतीतिभेदः॥४१॥अ
थदोषभेदेनलक्षणभेदानाह॥वाताद्रूक्षारुणंपित्तात्ताम्रंकमलपत्रवत्॥सदा

हं रोमविध्वंसि कफात्स्येनं घनं गुरु ॥४२॥ सकंडूकं क्रमाद्रक्तमांसमेदस्सु चादिशेत्
वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरं ॥४३॥ आह ताम्रमीषल्लोहितं ॥ क्रमतस्पत्रवदित्यत्ते
न मध्ये श्वेतमंते लोहितं बोधयति ॥ घनं गुरु ॥ क्रमाद्रक्तमांसमेदस्सु चादिशेदिति रक्ते
मांसमेदस्सु यथाक्रमेणादिशेत् ॥ तथा च चरकः ॥ अरुणं रक्तगे वाते ताम्रं पित्ते पलं
गते ॥ श्वेतं श्लेष्मणि मेदस्थे श्वित्रे कुर्यं परात्परमिति ॥ उभयं दोषजं व्रणजं च द्विवि
धमपि श्वित्रं वर्णेनेदृगेव अरुणं ताम्रं श्वेतं च ॥ उभयमित्यत्र भोजः ॥ श्वित्रं च द्वि
विधं विद्याद्दोषजं व्रणजं तथेति ॥४२॥४३॥ अथ तस्य साध्यत्वं चाह ॥ अशुक्लरोमाव
हलमसंसृष्टमथो नवं ॥ अनग्निदग्धजं साध्यं श्वित्रं वर्ज्यमतोऽन्यथा ॥४४॥ अवहलं
तनु ॥ असंसृष्टं परस्परमसंयुक्तं ॥ अतोऽन्यथा उक्तसर्वप्रकारविपरीतं वर्ज्यं असा

ध्यं ॥८४॥ अन्यच्च ॥ ग्रघपालितसौषेषु जातमप्यचिरंतनं ॥ वर्जनीयं विशेषेण किलासं
सिद्धिमिच्छता ॥८५॥ गुह्यं मेहनं भगं च ॥ तलमत्र पादतलं ॥ सम्भूते नां ते जातमिति सामान्य
तो निर्दिष्टत्वात् ॥ अचिरंतनं नवमपि ॥८५॥ कुष्ठस्य संसर्गजत्वप्रसंगेनान्यानपि संसर्गि
जान्रोगानाह ॥ प्रसंगाद्गात्रसंस्पर्शान्निश्वासात्सहभोजनात् ॥ एकशय्यासनाच्चापि ।
वस्त्रमाल्यानुलेपनात् ॥८६॥ कुष्ठं ज्वरश्च शोषश्च नेत्राभिष्यंद एव च ॥ औपसर्गिकरोगा
श्च संक्रामंति नरान्नरं ॥८७॥ प्रसंगात् प्रकर्षेण संगः प्रसंगः मैथुनं तस्मात् ॥ अथवा
प्रसंगात्सातत्येन कृताद्गात्रसंस्पर्शात् ॥ शोषो यक्ष्मा ॥ औपसर्गिकरोगाः शीतला ।
दयः ॥८६॥८७॥ अथ सकुष्ठस्य मृतस्य पुनर्जातस्यापि कुष्ठं भवतीत्याह ॥ म्रियते य
दि कुष्ठेन पुनर्जातस्य तद्भवेत् ॥ नातो निंद्यतरो रोगो यथा कुष्ठं प्रकीर्त्तितं ॥८८॥ तत्कुष्ठं

एतावताकुष्ठिनाकुष्ठंसर्वथाप्रतिकरणीयंनतछेषणीयं ॥ ४५ ॥ इतिकुष्ठनिदानं ॥ अथ
कुष्ठचिकित्सा ॥ पंचकर्मस्यकुशलोयःकुष्ठेकुरुतेक्रियां ॥ उपहासंसलभतेनसिद्धिंभू
तमानसः ॥ वातोत्तरेषुसर्पिर्वमनंश्लेष्मोत्तरेषुकुष्ठेषु ॥ पित्तोत्तरेषुमोक्षोरक्तस्यविरे
चनंश्रेष्ठं ॥ कुष्ठेविरेचनंशस्तंत्रिवृद्दंतीफलत्रिकैः ॥ पथ्याकरंजसिद्धार्थनिशावल्गु
जसैंधवैः ॥ विडंगसहितैःपिष्टैर्लेपोमूत्रेणकुष्ठनुत ॥ सोमराजीभवंचूर्णंशृंगवेरंस
मन्वितं ॥ उद्वर्तनमिदंहंतिकुष्ठरोगंकृतास्पदं ॥ चित्रकंत्रिफलाव्योषमजाजीकारवीव
चा ॥ सैंधवातिविषाकुष्ठंचव्यैलायावशूकजं ॥ विडंगान्यजमोदाचमुस्तायामरदारुच
यावंत्येतानिसर्वाणितावन्मात्रंतुगुग्गुलुं ॥ संक्षुद्यसर्पिषासार्द्धंगुटिकांकारयेद्भिषक ॥ ४२७ ॥
प्रातर्भोजनकालेचखादेदग्निवलंयथा ॥ हंत्यष्टादशकुष्ठानिकृमीनदुष्टव्रणानि

पि॥ गूढहृत्पार्श्वशूलविकारं स्त्रमुख्यामयगलग्रहान्॥ गृध्रसीमथ भग्नं च गुल्मं चापि विनिय
छति॥ व्याधीन्कोष्ठगतांश्चापि जयेद्विस्फुटितानसृगान् इति॥ एकविंशतिको गुग्गुलुः॥
हरिद्रायाः पलान्यष्टौ षट्पलं हविषस्तथा॥ क्षीराढकेन संयुक्तं खंडस्यार्द्धशतं पचेत्
व्योषं त्रिजातकं चैव कृमिघ्नं त्रिवृता तथा॥ त्रिफलाकेसरं मुस्तं प्रत्येकं च पलं पलं॥ सं
चूर्ण्य प्रक्षिपेत्तत्र स्निग्धभांडे निधापयेत्॥ सप्तरात्रात्परं चैव पलमेकं च भक्षयेत्॥ कं
डूविस्फोटदद्रूणां नाशनं परमौषधं॥ प्रतप्तकांचनाभासं देहं कुर्याच्च नान्यथा॥ इति ह
रिद्राखंडः॥ त्रिफलाष्टपला कार्या भल्लातानां चतुःपलं॥ वाकुचीपंचपलिका विडंगा
नां चतुःपलं॥ हतलोहं त्रिवर्षश्चैव गुग्गुलुश्च शिलाजतु॥ एकैकं पलमात्रं स्यात्पलार्द्धं पौ
ष्करं भवेत्॥ चित्रकस्य पलार्द्धं स्यात् द्विक्षारं मरिचं भवेत्॥ नागरं पिप्पली मुस्तं

॥४२८॥

त्वगेलापत्रकुंकुमं ॥ शाणोन्मितं स्यादेकैकं चूर्णयेत्सर्वमेकतः ॥ ततस्तु प्रक्षिपेच्चूर्णं पक्व
खंडे च तत्समे ॥ मोदकान्पलिकान्कृत्वा प्रभुंजीत यथोचितं ॥ हन्यकः सर्वाणि कुष्ठानि त्रि
दोषप्रभवामयान् ॥ भगंदरं श्लीहगुल्मजिव्हातालुगलामयान् ॥ शिरोक्षिभ्रूगतान्रोगा
न्मन्यापृष्ठगतानपि ॥ प्राग्भोजनस्य देयं स्यादधःकायस्थिते गदे ॥ भोजने भक्तमध्ये च रो
गे जठरसंस्थिते ॥ भोजनस्योपरि ग्राह्यं मूर्द्धजत्रुगदेषु च ॥ इति त्रिफलादिमोदकः ॥ मूलं
पत्रं फलं पुष्पं त्वचं निंबात्समाहरेत् ॥ कृत्वा सूक्ष्ममिदं चूर्णं पलं पंचदशोन्मितं ॥ लोह
भस्म हरीतक्यो चक्रमर्दकचित्रकौ ॥ भल्लातकं विडंगानि शर्करामलकं निशा ॥ पिप्पली
मरिचं शुंठी वाकुचीकृतमालकः ॥ गोक्षुरस्तु पुलोन्मानमेकैकं कारयेद्बुधः ॥ सर्वमेकीकृ
तं चूर्णं भृंगराजेन भावयेत् ॥ अष्टभागावशिष्टेन खदिरासनवारिणा ॥ भावयित्वा

॥४२५॥

च संचूर्ण्य कर्षमात्रं ततः पिबेत् ॥ खदिरासनतोयेन सर्पिषा पयसाथवा ॥ मासेन सर्वकुष्ठा
नि विनिहंति रसायनं ॥ पंचनिंबमिदं चूर्णं सर्वरोगप्रणाशनं ॥ परिहारो न चात्रास्ति पं
चनिंबाख्यचूर्णके ॥ इति पंचनिंबचूर्णं ॥ वातरक्ताधिकारोक्तो लघुमंजिष्ठादिकाथो व
हन्मंजिष्ठादिक्वाथः कैशोरगुग्गुलुश्चात्र हितः ॥ जंबीरद्रवमध्ये तु प्रक्षाल्य नटमंडनं ॥
दृष्टां प्रांटकरां दत्वा खंडशः परिमेलयेत् ॥ चतुर्गुणे गाढपट्टे निबध्य प्रहरद्वयं ॥ दोलायं
त्रेण संस्वेद्यं प्रदीपप्रमितेनिले ॥ चूर्णतोयकांजिके च कूष्मांडांबुनि तैलतके ॥ त्रिफलांबु
नि तत्क्वाथा सालपिन्यामलवारिभिः ॥ ततः पलाशात्वग्वारि पिष्ट्वं घर्मे प्रशोषयेत् ॥ महि
षीमूत्रसंपिष्टं पुनस्तं परिशोषयेत् ॥ तं गोलकं शरावाभ्यां संपुटीकृत्य पल्लतः ॥ खातेत
गजाख्ये पक्वात् स्वांगशीतं समुद्धरेत् ॥ अजादुग्धे पुनः पिष्ट्वा शोषयेद्गोलकीकृतं ॥

॥ ४२८ ॥

आकंठं भस्मयातासं हंडिकायां दृढं क्षिपेत् ॥ सम्यक्चूर्णस्य कुडवं दत्वा तत्र विचक्षणः ॥
स्थापयेद्गोलकं तत्र पुनश्चूर्णं च भस्म च ॥ पश्चाद्धूमो च हिर्याति न तथा तां विमुद्रयेत् ॥ द्वा
त्रिंशत्प्रहरान्वह्निं मंदं वै द्यापयेत्तथा ॥ स्वांगशीतं समुद्धृत्य रसं चूर्ण्य नटमंडनं ॥ हिंगुकुं
दप्रतीकासं निर्धूमं कृष्णवर्त्मनि ॥ रक्तिकास्य प्रदातव्या पुराणगुडयोगतः ॥ पथ्यं तु
चणकस्योक्तं रोटिका चणिकोदनं ॥ एकविंशद्दिनं यावत्तावल्लवणं च वर्जयेत् ॥ अष्टा
दशानि कुष्ठानि वातरक्तं तथोद्भवं ॥ फिरंगदेशजं रोगं दुस्तरं च व्यपोहति ॥ अन्यानपि
व्रणानस्य वा नंधकारमिवांशुमान् ॥ इति ताम्रमारणं ॥ पारदं गंधकं शुद्धं हरितालं म
नःशिला ॥ वत्सनागं धूमसिंदूरं तथा च जैनीद्वयं ॥ नवकर्षाणि चैतानि सोमराजीद्विक
र्षिकी ॥ घृतेन लेपयेच्चूर्णं मातपे संस्थितो भवेत् ॥ यामैकं यामयुग्मं वा ततः स्नानं ॥ ४२८ ॥

समाचरेत॥ कंडूं दद्रूं तथा कुष्ठं अष्टादश विनाशयेत॥ इति पारदादि लेपः कुमारी रसतो म
र्द्दिः समभागेन शुक्तिकाः॥ रोटिकां कारयेद्वह्नि द्रव्याद्गजपुटे दृढं॥ द्वादशप्रहरं यावत् तत
तः पश्चात् समुद्धरेत॥ निर्गंधं चापि निश्चंद्रं निर्धूमं च निरीक्षयेत॥ समभागेन तालकेने
ति शोधः॥ इति तालकमारणे द्वितीयो योगः॥ पलाशजटावल्कलं संशोष्य भस्म कारये
त्॥ तद्भस्म पंचविंशति पलपरिमितं ग्राह्यं तन्मध्ये शुद्धतालकं पंचविंशति माषपरि
मितं खंडशः कारयित्वा भस्मना सह मिश्रयेत॥ नूतन हंडिकायां दृढं यथा स्यात्तथा स्था
पयेत॥ हंडिकोपरि शरावं दत्वा विना मुद्रां चुल्यां स्थापयेत॥ यामदशपर्यंतं हठाग्निं
ना दाहयेत॥ सम्यग्दग्धं ज्ञात्वा वस्त्रपूतं कारयेत॥ तद्भस्म रक्तिकाद्वयं अर्द्धदग्धजीरकं
माषचूर्णपरिमितं तं एकीकृत्य पर्णखंडेन सह भक्षयेत॥ शीतलजलमनुपाययेत्॥

पथ्यं चणकचूर्णं चणकरोटिकां भजित चणकान्वा दापयेत् ॥ मंडलपर्यंतं चतुर्वातातपौ व
र्जयेत् ॥ अनुभूतो ॥ अष्टादशविधं कुष्ठं विविधवातशोणितं ॥ विविधव्रणान्प्रमेहं पिटि
कां मरुद्वातव्रणध्मादीं आशु नाशयेत् ॥ अनुभूतोयं प्रयोगः ॥ इति तृतीयतालकमारणयोगः
शुद्धतालकमादाय मल्लमये संपुटे क्षिपेत् ॥ अधऊर्ध्वं च दातव्यं भस्म पालाशकाष्ठजं ॥
तीव्राग्निना पचेत्सम्यक्यावद्यामद्वयं भवेत् ॥ सितवर्णं समुद्भूतं तालं शुभं भवे
त् ॥ गुंजामात्रं प्रदातव्यं सितया जीरकेण च ॥ भोक्तव्यं पटुनाहीनं विशेषान्मसूरान्नरण
इति चतुर्थतालमारणयोगः ॥ तालमाप्यपिष्टासूतं शुद्धं सैंधवटंकणं ॥ समांशं चूर्णी
येत् खल्वे सूताद्द्विगुणगंधकं ॥ गंधतुल्यं मृतं ताम्रं लोहभस्म चतुःपलं ॥ जंबीराम्लेन तत्
सर्वं दिनं मर्द्यं पुटे लघु ॥ त्रिंशद्दंशं विषं चास्य क्षिप्त्वा सर्वं विचूर्णयेत् ॥ माहिषाज्ये

नसम्निश्च्यनिष्कार्द्धं भक्षयेत्सदा॥ मध्वाज्यैर्वा कुचीचूर्णं कर्षमात्रं लिहेद्दनु॥ सर्वकुष्ठं निहं
त्याशु महातालेश्वरो रसः॥ इति महातालेश्वरो रसः॥ कासीसं द्वे निशे मुस्तं हरितालं म
नःशिला॥ कंपिल्लकं गंधकं च विडंगं गुग्गुलुं तथा॥ सिक्थकं मरिचं कुष्ठं तुत्थकं गौरसर्ष
पान्॥ रसांजनं च सिंदूरं श्रीवासं रक्तचंदनं॥ अरिमेदं निंबपत्रं करंजं सारिवां वचां॥ मंजि
ष्ठां मधुकं मांसीं शिरीषं लोध्रपद्मकं॥ हरीतकीं प्रपुन्नाटं चूर्णयेत्कार्षिकान् पृथक्॥ तत
श्चूर्णमात्रे तु चतुर्गुणं पलमिते घृते॥ स्थापयेत्ताम्रजे पात्रे घर्मे सप्तदिनावधि॥ अस्या
भ्यंगेन कुष्ठानि दद्रूः पामा विचर्चिका॥ शूकदोषा विसर्पाश्च विस्फोटा वातरक्तजाः
शिरःस्फोटोपदंशाश्च नाडीदुष्टव्रणानि च॥ शोथो भगंदरश्चैव लूताः शाम्यंति देहिनां॥
शोधनं रोपणं चैव वर्ण्यं कांतिकरं घृतं॥ श्रीवासः सरलनिर्यासः॥ इति कासीसाद्यं

रि

॥ ४३१ ॥

घृतं ॥ पिष्ट्वा सूतसिलालगंधरजनीजीरद्वयं नागजे दद्रुघ्नो बलवाकुचीरपि घृतं लोहेन लोहे
दृढं ॥ संमर्द्यौषविलेपितं विजयते विस्फोटपामाः क्षतं कंडूमंडलपुंडरीककिटिभं माहेश्व
रं निश्चितं ॥ इति माहेश्वरं घृतं ॥ मरिचालकुंभकुनटीकरवीरैर्घनरक्तसारजटिलाद्वि
निशाभिः ॥ सुरदारुमांसजलकुष्ठविशालाः सुरभीपुरीषसहितैः पिचुभागैः पृथगर्द्ध
विल्वविषप्रमितैः रसैः कटुतैलतो पिचवराक्षयुग्मं ॥ द्विगुणोत्तु गोपसिकारिलि
चेतद्विपचेन्त्व दिव्यमपिविभिर्मरिचाद्यं ॥ विस्फोटश्वित्रपामाकंडूरुग्नाशस्तथा श्वित्रं ॥
दद्रुमंडलकुष्ठव्रणनाडीश्मा चिरज्जयति ॥ रक्तसारं रक्तचंदनं ॥ भानुजलं अर्कदुग्धं गो
गोपयसि गोमूत्रे ॥ इति लघुमरिचादितैलं ॥ विस्लांष्ठं मरिचं त्रिवृद्दद्रुविपयोदंतीहरिद्राद्वयु
गं दार्वैद्रीगदरक्तसारजटिलानैपालिकालांगिनिपुक्क ॥ लज्जावासकसप्तपर्णीजल

॥ ४३१ ॥

दमंडीकृमिघ्नस्तु हिक्किन्नानि च शाकृदूसेंडसकलज्योतिष्मतीदद्रुहृत॥ नक्ताह्वागर्वध
वालपत्रकवृचं पिष्ट्वा मूत्रयुग्मं विषादत्वा सार्षपे तैलमाठकमितं मत्रे च तु भागिके॥
लोहामत्र गतं विपाच्यतदिदं पामा हृद्व्यंजनातकंडूस्फोटविचर्चिकाव्रणकृमिव्यं
गास्त्रदोषापहं॥ मंडी मंजिष्टा॥ तथा च मदनपालः॥ मंजिष्टा विजया रक्ता रक्तांगी काल
मेषिका॥ मंजूसा चिकसा मंडी समंगा वस्त्रमूषराणा इति॥ कवचः पर्पटः॥ इति च ह
मरिचाद्यं तैलं॥ त्रिक्षारत्रिपटुकटुनिवेह्य दोषाद्युग्मो ग्राम यन्नपवक्षहव्यवाहाः
जेपाली मदनरसांजनालगंधसिंदूरशिलाच सरसो नरामठानि॥ स्नुह्यर्कस्वरसविभा
विता तु कल्कादेतस्मात्कटुजनिष्कुलं तु तैलं॥ पक्वव्यंस्तुरभिजले चतुर्गुणे तन्मंदाग्ना
विदमुपहंति युज्यमानं॥ कुष्टान्यपि पामा भगंदरसत्तदोषा तिदुष्टव्रणा पाडुकीलान्॥

॥४३२॥

अभ्यंगकर्मणैवातिमात्रकुष्ठान्यतकुष्ठकालानलनामधेयं ॥ आमयंकुष्ठं मदनेसि
क्थं ॥ इतिकुष्ठकालानलतैलं ॥ इतिसामान्यचिकित्सा ॥ अथविशिष्ठचिकित्सा ॥ कुष्ठं
मूलकबीजंप्रियंगवः सर्षपारजनी ॥ एतत्केसरघृष्टं निहंतिबहुवार्षिकंसिध्मं ॥ चि
त्रकरसेनपिष्टंमूलकबीजंप्रलेपतः सिध्मं ॥ क्षारेणवाकदल्यारजनीमिश्रेणनाशये
ल्लिपतं ॥ दार्वीमूलकविजानितालकः सुरदारुच ॥ तांबूलपत्रंसर्वाणिकार्षिकाणिपृथ
क्पृथक् ॥ शंखचूर्णंतुभागैकंस्यात्सर्वाण्येकत्रवारिणा ॥ पिष्टपेतत्प्रलेपस्तुसिध्मा
नांनाशनःपरः ॥ इतिसिध्मे ॥ कर्षत्रयंचमरिचंगंधकंचपलार्द्धकं ॥ घृतंसार्द्धपलं
कौलन्नूनंमधुपलाष्टकं ॥ सर्वंदिनाष्टकंभक्ष्यंकंडूर्नश्यतिनिश्चितं ॥ लोहभाजन
युग्मेनतस्यंपारदंगंधकं ॥ क्रमेणमर्दयेत्सर्पिर्मिश्रंकंडूविनाशनं ॥ सेगंधक

॥४३२॥

योपिष्टिं कटुतैलेन भंगमग्नैः॥ द्रवैः संमर्द्यतद्वेयात्सर्वकुष्टं विनश्यति॥ इति कंडौ॥ सलिले
नामृये श्रीतु क्विंचित्सैंधवसंयुता॥ तामृपात्रे विनिर्घृष्टा लेपाच्चर्मदलापहा॥ सलिलेन
तुष्णुक्ता शिगिघृष्टा धात्रीफलानि च॥ लेपेन सुखमाप्नोति नरश्चर्मदलान्वितः॥ इति च
र्मदले॥ प्रपुन्नाटस्य बीजानि वाकुचीसर्षपास्तिलाः॥ कुष्टं निशाद्वयं मुस्तं पिष्ट्वा त
क्रेण चैकतः॥ प्रलेपाद्यस्य नश्यंति दद्रूकंडूविचर्चिकाः॥ इति चक्रमर्दकादियोगः
पलाशभवबीजानां पिष्टानां निंबुकद्रवैः॥ लेपान्नश्यति द्राग्दद्रुश्चिरकालानुबंधि
नी॥ चक्रमर्दकसिंधूत्थकुष्टसिद्धार्थकांजिनैःकृतः॥ सविडंगैश्चयं लेपो दद्रुमंडलकु
ष्ठनुत्॥ पत्राण्यारग्वधस्यापि पेषयेदारनालकैः॥ लेपनात्कुष्टकिटिभदद्रूसिध्म
हराणि वै॥ चंद्रसूर्याख्यबीजानि प्रपुंनाटस्य तानि च॥ ककम्याश्चापि बीजानि स

॥४३३॥

मांशं त्रितयं क्षिपेत् ॥ सर्वाद्विगुणतक्रेण सूक्ष्मं संपेष्य संधयेत् ॥ दिनत्रयं ततो वन्य
गोमयेन प्रघर्षयेत् ॥ तत्कल्कं लेपयेत्पश्चाद्दद्रूर्गच्छति निश्चितं ॥ इति दद्रौ ॥ पारदं टंक
णं गंधं मल्लकाद्रूक्षपोद्रवैः ॥ दिनं मर्द्येत्तत्स्वेपाद्याति सिध्मं रसातलं ॥ नारिकेलोद्रवेन्य
स्तं तंडुलं पूतितां गतां ॥ विपादिकां जयेल्लेपात्स्वेपनाच्चिरकालजां ॥ पिबति यः कटुतैलं
गंधकचूर्णं विलानुमानेन ॥ रविकिरणेन सुतप्तस्त्रिदिनं यामत्रमात्रं सः ॥ तदनु
स्नातो विधिनाक्षीराशी शीघ्रमालभेत ॥ शमीसुवर्णीक्षीरी रंस्पर सौंदर्याधिकं जंतुः
दूर्वादोषा कल्कलेपः कंडूपामाविनाशनः ॥ दद्रुकुमिहरः शीतपित्तजित परिकी
र्त्तितः ॥ तंदुलं कोद्रवस्यापि गृहीत्वा सेटकार्द्धकं ॥ भावयित्वार्कदुग्धेन छायाशुष्कीं
कृतं तथा ॥ स्वरमंजरिका क्षारं चतुःकर्षं विमिश्रयेत ॥ आरण्योपलकेनाप्य संघ ॥४३३॥

ष्वांगं विमर्दयेत् ॥ तदौषधं सप्तदिनान्नाशयेद्दद्रुमंडलं ॥ असलं चर्मदलं रक्तं वातपूर्वेन
संभवः ॥ सिंदूरस्य पलं पिष्ट्वा द्विपलं जीरकस्य च ॥ कटुतैलं पचेताभ्यां द्रुतं पामार्तिनु
द्भवेत् ॥ कटुतैलमत्र प्रस्थमितं ग्राह्यं ॥ इति लघुसिंदूराद्यं तैलं ॥ सिद्धार्थतैलं यदि नाग
जन्म सिक्थामृतासंगपलेकयामिः ॥ सतार्क्ष्यजाभिः सहपक्वमेतद्दार्द्रीविच्छुक्षांमपि
हंति कच्छुं ॥ अमृतासंगं तुत्थं इति मध्यसिंदूराद्यं तैलं ॥ सिंदूरामयदंतधावनवचा
मांसी हरिद्रायुगारिष्टार्कत्रिवृदग्निजातिफलनीनक्तान्हशीतोषरोः ॥ कृस्माश्ना
वरचक्रमर्दविकसायष्ट्याव्हवेश्यामृतैस्तैलं पक्वं मयाकरोति विविधान्स्यंजना
त्वगादान ॥ दंतधावनतः खदिरः ॥ कलिनी प्रियंगुः ॥ शीतं चंदनं ॥ विकसा मंजिष्ठा
अमृतं विषं ॥ इति वृहत्सिंदूराद्यं तैलं ॥ रसगंधकं सोमलं त्रिनिष्कं नवनीताद्

दधि षट्पिचून्विमर्द्य ॥ रदमक्त तनुर्निकामं घर्मप्रतितप्त सुजयत्यशेषकंडूः ॥ इति
॥४३४॥ कंडौ मंजिष्ठा त्रिफला लाक्षा शिला गंधकैस्त्रिभिः ॥ तैलमादित्यसंपक्वं पामाकंडूवि
सर्पनुत् ॥ इत्यादित्यपाकतैलं ॥ इंद्राशनं समादाय प्रशस्तं हनिचोद्धृतं ॥ चूर्णं मधुस
र्पिर्भ्यां लिहेत्क्षीरघृताशनः ॥ हत्वा स सर्वकुष्ठानि जीवेद्वर्षशतत्रयं ॥ भुक्तिकाभ
स्म सिंधूत्थ सर्पिः सर्जरसं पचेत् ॥ पादस्फुटनहा लेपः सिक्थालाबुव्यवस्थितः ॥ सर्जि
सिक्थ सिंधूत्थघनगुग्गुलु गैरिकैः ॥ गुडक्षौद्रयुतैर्लेपः पादस्फुटननाशनः ॥
पलंपलं समादाय सर्जनिर्याससर्पिषोः ॥ तयोस्तुल्यं गुडं दत्त्वा सम्यक्दग्धविपच
येत ॥ अर्कदुग्धपलार्द्धं तु क्षिप्यते पं प्रकल्पयेत ॥ तेनैवालेपितौ पादौ स्यातामव्रुद
तोपमौ ॥ अत्र पादाविस्फुटदोषाविति पाठे हस्तावित्यर्थः ॥ एरंडतैलसिंधूत्थ ॥४३४॥

तद्गुष्ट्वान्वितेनतु ॥ मदनस्यफलैःशुद्धैर्मिश्रितेनम्रपलतः ॥ नवनीतेनचरणौमहिषे
णापुनःपुनः ॥ लेपितौचघृवंस्यातांविकचाब्जदलोपमौ ॥ इतितेपाविषादिकायां
स्वरसेनहिदूर्वायाःपचेत्तैलंचतुर्गुणं ॥ कच्छूविचर्चिकापामाअभ्यंगादेवनाशये
त् ॥ इतिदूर्वाद्यतैलं ॥ खदिरस्यतुलार्द्धंतु देवदारुचतत्समं ॥ वाकुचीद्वादशपलात्स
र्वौस्यात्पलविंशतिः ॥ त्रिफलाविंशतिपलाअष्टद्रोणेंऽभसःपचेत् ॥ कषायेद्रो
णशेषेचपूतेशीतेविनिक्षिपेत ॥ तुलाद्वयंमाक्षिकस्यतुलैकाशर्करामता ॥ धा
तक्याविंशतिपलंकंकोलंनागकेसरं ॥ जातीफललवंगौलात्वक्पत्राणिपृथक्
पृथक् ॥ पलोन्मितानिकृष्णायादद्यात्पलचतुष्टयं ॥ घृतभांडेविनिक्षिप्यमासो
र्द्धंपिबेततः ॥ महाकुष्टानिहृद्रोगंपांडुरोगार्बुदंतथा ॥ गुल्मग्रंथीनेवकृमीन्

॥४३५॥

क्ष्मासं तथा स्वीहोदरं जयेत् ॥ इति खदिरादिः ॥ अथ श्वित्रचिकित्सा ॥ किलासस्यच्यते पुरा
विरेकोधनविरेषतः रसस्तुग्धाकुचाभवो गुडान्वितो विरेचनं ॥ पीत्वाभ्यक्ततनुस्तं
यथावलं सूर्यसंतापं ॥ सेवेतरेचितस्त्रित्रिदिनं पेयां पिवेत्पिपासुश्च ॥ [illegible]हीरा
जवक्षाकपूतिकजातीदलं मूत्रपिष्टं प्रलेपेन हन्यात् ॥ द्रुतं श्वित्रदुर्नामदद्रून्रणां दी
त्तथा कोठकंडूतिविस्फोटपामाः ॥ चित्रकगुंजावल्गुजेमलपूकल्कं प्रपिष्टं मिभ
मूत्रे ॥ लेपाद्धंति श्वित्रं कतिचिदहोभिश्चित्ररस्यमपि ॥ विभीतकत्वक्मलपूजटानां
क्वाथेन पीते गुडसंयुतेन ॥ अवल्गुजं बीजमपाकरोति श्वित्राणिकुष्ठारेपपिंडु
डरीकं ॥ तुल्यटंकणयोर्भागौ द्विभागा रोमराजिका ॥ भृंगराजरसेनैव भावयेद्दिन
सप्तकं ॥ श्वित्रलेपः प्रशस्तोपमो विभूतौ विगतैः ॥ धात्रीखदिरयोः क्वाथं पी

मि ॥४३५॥

त्वाग्गुग्गुलुसंयुतं ॥ सस्वेदधवलं श्वित्रं तद्रोगं हंति न संशयः ॥ गुंजाफलोद्भवं चूर्णं लेपनात् जा
श्येतकुष्ठनुत् ॥ शिलायां मार्गभस्मापि लेपनात् श्वेतकुष्ठहृत् ॥ मथितेन पिबेच्चूर्णं
काकोदुंबरवल्कजं ॥ तैलाक्तो घर्मसेवी स्यात् तक्राशी श्वित्रमुद्धरेत् ॥ तैलमत्रसार्ष
ये ॥ शृंगिविन्याः काकमाच्याश्च वासायाश्च तुलापृथक् ॥ लोहचूर्णं टंकं चैव त्र्याढकं
त्रिफला भवेत् ॥ अंबुद्रोणाद्वितीये च क्वाथः षोडशभागिकः ॥ सर्पिःप्रस्थं पचेत्तेन कल्क
र्षमात्रैः प्रयोजितैः ॥ व्योषवाकुचिकागुंपीच्याग्नीदारुहक्कलिंगकैः ॥ भृंगशश्यामाकव
ल्गौः पारावतपदीयुतैः ॥ परं श्वित्रापहं चैव नीलीनाम घृतं स्मृतं ॥ कुष्ठानि हंति
सर्वाणि लोकपालव्याधिनाशनं ॥ इति नीलीघृतं ॥ आरग्वधरुक्श्वित्रकसोमराजी स्नुही
पयो वायसपादिका च ॥ एभिः समस्तैः सहपाचनीयं तैलं खरांशोः किरणैः पी

॥४३६॥

धावत् ॥ योभ्यंजनं तेन करोतितिनित्यं चुक्रे गाचाप्नाति च सोमरजीं ॥ काकाभिधोदुंबर
कासमेतं कुष्ठं सितं न श्यपति तस्य मासात् ॥ इति महत्रातकं तैलं ॥ कुडवोवल्गुजवीजा
द्दुरितालचतुर्थभागसंमिश्रः ॥ मूत्रेण गवां पिष्टः सवर्णीकरणं परं श्वित्रे ॥ इति स
वर्णीकरणो ॥ वायस्येडगजाकुष्ठकृष्णाभिर्गुटिकाकृता ॥ वस्तमूत्रेण संपिष्टा प्रा
लेपात् श्वित्रनाशिनी ॥ इति गुटी ॥ रात्रौ गोजलवासितान् प्रातःकृतानि हत्य तान्
जर्जरान् छायायां दिवसे विशोष्य रचयेद् वैत्रिवारं ततः ॥ पिष्टास्तु कृपयसा
प्रदेह इति सः श्वित्रापहः संमतः कृष्णाहेस्तु मषी कलिंकुमफलतैलेन तद्वद्भुतं
इति योगद्वयं ॥ क्षारेतु दग्धेगजविड्भुनिते तदीयमूत्रैः स्नुते घटमिते दशभागयु
क्तं ॥ वीजं त्ववल्गुजभवं प्रणिधाय यावच्चिक्कणत्वमुपगच्छति पाच्यमेवं ॥ ॥४३६॥

च्छित्रं प्रलिप्तम् स्नुहीजेन विद्धं प्रणाशमायाति ॥ कुष्ठं मषः सतिलकं यन्मांसं स्या
द्धृणोधिकं तच्च ॥ भल्लातकाग्निसुधार्कमूलसहितं गुंजाफलं त्र्यूषणं शंखं पंचपटूनि
तुत्थगदयुक्क्षारद्वयं लांगली ॥ पक्वास्तु गव्ये जयपयस्यस्यसितैस्तांद्रं शलाकादिभि
र्लिप्तं कुष्ठकिलासमायुजमषव्यंगान्सकीलान्जयेत् ॥ अथ पथ्यमाह ॥ पक्षात्
पक्षात्छर्दनानि मासात्मासाद्विरेचनं ॥ नस्यं त्र्यहात्त्र्यहान्मासि षष्ठे षष्ठे जामो
क्षसां ॥ सर्पिस्तैलपक्षिरोत्पन्नाय यवगोधूमशालयः ॥ मुद्गाढकी मसूराश्च माक्षिकं
जांगलामिषं ॥ काकमाची निंबपत्रं लशुनं कुलकं तथा ॥ पुनर्नवा चवेत्राग्रं चक्रम
र्द्दरसानि च ॥ भल्लातकं पक्वतालं खदिरं छित्रकोवरा ॥ कोशातकी करंजौ च तित
तसर्षपतिंवजं ॥ तैलं तथैंगुदोत्थं च लघून्यन्नानि पानि च ॥ स्नेहाः सरतदेया

॥४३७॥

कृच्छ्रं त्वग्गतं संभवात्॥ मूत्राणि गोखरोष्ट्राश्व महिषीजनितानि च॥ कस्तूरिकाकुंकु
मं च जातिजं क्षारकर्म च॥ यथादोषं समस्तानि पथ्यान्येतानि कुष्ठिनां॥ अथापथ्यमा
ह॥ स्वेदं व्यवायं च निवेगनिस्तं व्यायाममम्लानि तिलांश्च माषान्॥ अनूपमांसं दधि
दुग्धमद्यं गुडं च कुष्ठामपि न त्यजेत्तुः॥ स्नाक्ष मत्स्य च तैलं कृमिगुडं क्षीर्यमाण्यं गं॥
तस्माति सारयुक्तं विवर्जयेत् कुष्ठिनं वैद्यः॥ इति कुष्ठरोगश्चित्ररोगचिकित्सा॥ अथा
सीतपित्तादिनिदानं॥ तत्र शीतपित्तस्य विप्रकृष्टसन्निकृष्टनिदानपूर्विकां संप्राप्ति
माह॥ शीतमारुतसंस्पर्शात् प्रदुष्टौ कफमारुतौ॥ पित्तेन सह संभूय बहिरंतर्विसर्पतः
१॥ शीतमारुतसंस्पर्शात् शीतो यो मारुतस्तस्य संस्पर्शात्॥ पित्तेन स्वहेतुदुष्टेन संभू
य संगम्य॥ बहिस्त्वचि॥ अंतः रुधिरादौ॥ विसर्पतः प्रसरतः॥१॥ अथ पूर्वरूपमाह॥ ॥४३७॥

पिपासारुचिहृल्लासदेहसादांगगौरवं ॥ रक्तलोचनता तेषां पूर्वरूपस्य लक्षणं ॥१॥
पूर्वरूपस्य लक्षणं पूर्वरूपस्योपसंभवं ॥२॥ अथ शीतपित्तस्य लक्षणमाह । वरटीदष्ट-
संस्थानः शोथः संजायते बहिः ॥ सकंडूस्तोदबहुलः छर्दिज्वरविदाहवान ॥ वाताधिकं
चतं विद्याच्छीतपित्तमयं भिषक् ॥३॥ अथोदर्दस्य लक्षणमाह ॥ सोत्संगैश्च सरागै-
श्च कंडूमद्भिश्च मंडलैः ॥ शैशिरः श्लेष्मबहुलः उदर्द इति कीर्तितः । उदर्दमिति तं विद्या-
च्छीतपित्तमथापरे ॥ वाताधिकं शीतपित्तमुदर्दस्तु कफाधिकः ॥४॥ सोत्संगैः मध्या-
निम्नैः शैशिरः शिशिरसंभवः ॥४॥ अथ कोठोत्कोठयोर्लक्षणमाह ॥ असम्यग्वमनो-
दीरीपित्तश्लेष्मान्ननिग्रहैः ॥ मंडलानि सकंडूनि रागवंति बहूनि च ॥ सकोठः सानुबं-
धः स उत्कोठ इति कथ्यते ॥५॥ अन्ननिग्रहः छर्दिनिग्रहः । वमनस्यासम्यक्त्वम

॥४३८॥

योगमिथ्यायोगाभ्यां ज्ञेयं ॥ सानुबंधः पुनः पुनर्भवः । तथा चोक्तं ॥ क्षणिकोत्पत्तिनाशो यः
स कोठ इति कीर्त्तितः ॥ सानुबंध स कृत्सं प्रासैरुत्कोठ इति कथ्यत इति ॥५॥ इति शीतपित्तोदर्द-
कोठोत्कोठनिदानं ॥ अथ शीतपित्तादिचिकित्सा ॥ शीतपित्ते तु वमनं पटोलारिष्टवास-
कैः ॥ त्रिफलापुरक्षौद्रैर्विरेकश्चात्र शस्यते ॥ पः सर्पिः सैंधवाभ्यक्ते देहे आरक्तकं
वसी ॥ शपीत तस्य शाम्यंति शीतपित्तादयो गदाः ॥ अभ्यज्य कटुतैलेन सिंचेदुष्णेन वा-
रिणा ॥ त्रिफलां समधुं चाद्यादुदर्दीति प्रशांतये ॥ सगुडं दीप्यकं यस्तु किंचित्सक-
टुतैलकं । भक्षयेत तस्य नश्यंति शीतपित्तादयो गदाः ॥ घृतगैरिकसिंधूत्थकुंतीनक-
मुमेति च ॥ उद्वर्त्तनं प्रशंसंति कोठोदर्दादिनाशने ॥ आर्द्रकस्य रसः पेयः पुराणगु-
डसंयुतः ॥ शीतपित्तापहः श्रेष्ठो वह्निमांद्यविनाशनः ॥ सिद्धार्थरजनीकल्कैः ॥४३८॥

प्रपुन्नाटतिलैः सह ॥ कटुतैलेन संमिश्रमेतदुद्वर्तनं हितं ॥ भूनिंबवासाकटुकापटोल
फलत्रिकाचंदननिंबसिद्धः ॥ विसर्पदाहज्वरवक्त्रशोषविस्फोटतृष्णावमिनुत्क
षायः ॥ उद्वर्तनं शीतपित्ते गोशकृद्रूक्षस्नानतैलौ ॥ कैरतं लंघनं चाथ त्रिफला मधुसंयु
ता ॥ क्षिप्रं नश्यति सप्ताहकुदद्रुः प्राशनेन च ॥ असृजो मोक्षणं कार्यं कुष्ठोक्तं च क्रमं च
रेत् ॥ पुष्पमूलकयूषेण कौलत्थेन रसेन वा ॥ भोजनं सर्वदा कार्यं लावतित्तिरिजेन वा
यवानीं गुडसंयुक्तां भस्मसूतो द्विवल्लकः ॥ शीतपित्तं निहन्त्याशु कटुतैलस्य मर्दनं
आर्द्रकं भक्षयेदेकं स्यात् गोघृतं कुडवद्वयं ॥ गोदुग्धं भक्ष्यपुगलं तदर्धा शर्करा मता
पिप्पली पिप्पलीमूलं मरिचं विश्वभेषजं ॥ चित्रकं च विडंगं च मुस्तकं नागकेसरं ॥
त्वगेलापत्रकं चूर्णं प्रत्येकं पलमात्रकं ॥ विधाय पाकं विधिवत्तत्खादेत्त्वरी

॥४३८॥

न्विते ॥ इदमार्द्रकखंडाख्यं प्रातर्भुक्तं व्यपोहति ॥ शीतपित्तमुदर्दं च कोठमुत्कोठमेव च ॥ इत्यार्द्रकखंडाख्यस्नेहः ॥ निंबामलकचूर्णं च प्रत्येकं शाणमात्रकं ॥ गोघृतं माषयुगलं मिश्रितं भक्षयेत्पुनः ॥ दुग्धोदनं चरेत्पथ्यं मितिचात्र प्रयोजयेत् ॥ गैरिकं सैंधवं चैव कुसुंभकुसुमं नवं ॥ घृतलिप्ताङ्गमीग्धेति शीतपित्तमुदर्दकं ॥ पक्वानीं पाचयेद्वापि सव्योषां क्षीरसंयुतां ॥ पिप्पलीवर्द्धमानं वा देयमत्र विचक्षणैः ॥ सेव्यो ह्युचीहरिद्राभ्यां शीतपित्तहरः स्मृतः ॥ उशीरनिंबयोः क्वाथं मधुना संयुतं पिबेत् ॥ शीतपित्तमुदर्दघ्नं कोठघ्नं कुष्ठनाशनं ॥ कुष्ठोक्तं च क्रमं कुर्यादम्लपित्तघ्नमेव च ॥ उदर्दोक्ताः क्रियाश्चात्र कोठरोगे समासतः ॥ अथ पथ्यमाह ॥ छर्दिर्विरेचनं लेपो दुस्स्नो ष्णौ जीर्णशालयः ॥ जांगलैरामिषैर्मुद्गैः कुलत्थैर्वा कृतो रसः ॥ कर्कोटकं कारवेल्लं शिग्रुमू

वि

तकदाडिमं॥ कटुतैलं तप्तनीरं पित्तश्लेष्महराणि च॥ कटुतिक्तकषायाणि सर्वाण्येतिग
णाः संख्या॥ शीतपित्तोदर्दकोठरोगिणां स्यात्पथ्यामतं॥ अथापथ्यमाह॥ क्षीरेक्षु
जातानि धान्यविकारान् मत्स्यौदकानूपभवामिषाणि॥ नवीनमद्यं च मिथो विरोधः प्राग्
दक्षिणाशापवनो दिवानिद्रा॥ स्नानं विरुद्धाशनमातपश्च स्निग्धं तथाम्लं मधुरं व्यवा
यः॥ गुर्वन्नपानानि च शीतपित्तकोठामयोदर्दयुतां विषाणि॥ इति शीतपित्तोदर्द
कोठोत्कोठचिकित्सा॥ अथाम्लपित्तनिदानं। तत्राम्लपित्तस्य विप्रकृष्टं निदानमाह
विरुद्धदुष्टाम्लविदाहिपित्तप्रकोपिपानान्नभुजो विदग्धं॥ पित्तं स्वहेतूपचितं पु
रा यत्तदम्लपित्तं प्रवदन्ति संतः॥१॥ विरुद्धं क्षीरमत्स्यादि दुष्टं व्यापन्नमन्नं॥ पित्तप्र
कोपीत्युक्तेपि अम्लविदाहीति विशेषार्थी॥ पित्तप्रकोपि पानं तक्रसुरादि॥ अन्नमा

॥४४०॥

याधि॥ तदम्लपित्तं वदंति अम्लपित्ताख्यं रोगं वदंति॥१॥ अथाम्लपित्तस्य व्याधेर्लक्षण
माह॥ अविपाकक्लमोत्क्लेदतिक्ताम्लोद्गारगौरवैः॥ हृत्कंठदाहारुचिभिरम्लपित्तं वदे
द्भिषक्॥२॥ अविपाकः आहारापाकः॥ क्लमो नायाससंजन्यश्रमः॥२॥ अम्लपित्तं द्विवि
धमूर्ध्वगमधोगं च॥ तत्रोर्ध्वगस्य लक्षणमाह॥ वांतं हरित्पीतकनीलकृष्णमार
क्तरक्ताभमतीव चाम्लं॥ मांसोदकाभं त्वतिपिच्छलाभं श्लेष्मानुयातं विविधं रसेन
२ आरक्तं दृषद्वोहितं॥ रक्ताभं वा श्लेष्मानुयातं कफमिश्रितं॥ रसेन कटुतिक्तरूपे
ण॥३॥ अधोगस्य लक्षणमाह॥ तृड्दाहमूर्छाभ्रममोहकारि प्रयात्यधो वा विवि
धप्रकारं॥ हृल्लासकोठानलसादहर्षस्वेदांगपीतत्वकरं कदाचित्॥४॥ मूर्छा सर्व
थास्मानस्मृत्वेता॥ मोहो विपरीतज्ञानं॥ अधो चेति वा शब्द उर्ध्वगोपेक्षया॥ वि

॥४४०॥

विधप्रकारं हरिसीतादिचर्यायोगात् ॥ कदाचित् हस्त्रासादिकं भवति ॥ ४ ॥ आहारेऽक्षि

तेः अम्लतेच अम्लपित्तस्यावस्थाविशेषमाह ॥ भुक्ते विदग्धेत्वथवाप्यभुक्ते करोतितिति

क्ताम्लवमीं कदाचित् ॥ उद्गारमेयं विधमेव कंठहृत्कुक्षिदाहं शिरसो रुजं च ॥ ५ ॥ करे

चरणदाहमौष्ण्यं महतीमरुचिं ज्वरं च कफपित्तं जनयति कंडूमंडलपिटिकाशत

निचितगात्रे रोगचयं ॥ ६ ॥ तिक्ताम्लवमीं तिक्तस्याम्लस्य वा वमी ॥ रोगचयं अम्ला

विपाकस्रमादिकं ॥ अथवा कदाचित् ॥ अभुक्तेपि तिक्ताम्लवम्यादिकरोगचयां

तं करोति ॥ ५ ॥ ६ ॥ अथाम्लपित्ते दोषसंसर्गमाह ॥ सानिलं सानिलं सकफं सकफं तच्च

तक्षयेत ॥ दोषलिंगेन मतिमान् भिषङ्मोहकरं हि तत् ॥ भिषङ्मोहकरं उर्ध्वाधोः

प्रवृत्याद्धेद्यीति साराभ्यां तुल्यतया वैद्यमूढं तिकृते ॥ ७ ॥ दोषभेदेन तक्षणाभेद

नि

॥ ४४१ ॥

माह ॥ कंपप्रलापमूर्छाचिमिचिमिगात्रावसादप्रभूतानि ॥ तमसो दर्शनविभ्रमभ्रमो
ह हर्षाश्चानि लपुते ॥ यः कफनिष्ठीवनगौरवजडतारुचिश्चीतसादवमिलेपाः ॥ दह
नवलसादरूकेडुनिद्राश्चिन्हं कफानुगते ॥ उभयमिदमेवचिन्हं माहूतकफसंभवेम
वत्यम्ले ॥ ८ ॥ चिमिचिमिः क्विक्विनीति लोके हर्षो रोमांचः ॥ सादोंगसादः ॥ तेषश्ले
ष्मातिमास्यता ॥ दहनवलसादेति सादशब्दो दहनवलाभ्यां संवंध्यते ॥ अम्ले आ
म्लपित्ते ॥ ९ ॥ ८ ॥ अथाम्लपित्तस्य साध्यत्वादिकमाह ॥ रोगोयमम्लपित्ताख्योयत्ना
त्संसाध्यते नवः ॥ चिरोत्थितो भवेद्याप्यः कृछ्रसाध्यः स कस्यचित ॥ १० ॥ कस्य
चित् अहिताहाराचारशीलस्य नवोपि कृछ्रसाध्यः ॥ १० ॥ अथश्लेष्मपित्तस्य
लक्षणमाह ॥ तमोमूर्छारुचिछर्छिरालस्यं च शिरोरुजः ॥ प्रसेको मुखमाधुर्य्यं

॥ ४४१ ॥

श्लेष्मपित्तस्य लक्षणं ॥ ११ ॥ इत्यम्लपित्तनिदानं ॥ अथाम्लपित्तचिकित्सा ॥ ऊर्ध्वगं वम
नैर्विद्वानधोगं रेचनैर्हरेत ॥ कृतवमनविरेकस्यापि दोषोऽप्रवर्तते भवेति यदि
न कार्य्यो रक्तमोक्षोस्य युक्त्या ॥ अप्रवृत्तिः निवृत्तिः ॥ अम्लपित्ते तु वमनं पटोलारि
ष्टवासकैः ॥ कारयेन्मदनक्षौद्रसिंधुयुक्तैस्ततो भिषक् ॥ विरेचनं तिवृच्चूर्णं म
धुधात्रीफलद्रवैः ॥ सम्यग्वांतविरिक्तस्य सुस्निग्धस्यानुवासनं ॥ आस्थापनं
चिरोत्थे च देयं दोषाद्यपेक्षया ॥ तिक्तभूयिष्ठमाहारं पाचने च प्रयोजयेत ॥ पुरा
णशालिलाजानां शक्तून्सम मधुशर्करान ॥ घोलयित्वाम्लपित्तार्तः पिबेतद्रोगः
शांतये ॥ पूतीकरंजपत्राणि घृतभृष्टानि भक्षयेत ॥ द्राक्षापथ्ये समे कृत्वा तयो
स्तुल्यां सितां क्षिपेत ॥ संकुष्याऽक्षद्वयमितां तां तयोर्रचयेद्भिषक् ॥ तां खादे

॥४४२॥

रम्लपित्तार्त्तौ हृत्कंठदहनापहां ॥ तथा मूर्छाभ्रमं मंदाग्निनाशिनी मामयातहां
इति द्राक्षादिगुटी ॥ व्योषवैरेलामुस्तविडंगं पत्रमखिलसममत्रलवंगं तद्वे
दपिसर्वौषधतो द्विगुणासिता सकलतुलिताभ्रमवलो ॥ प्रागशनात्छारगा
द्वयमात्रं नारिकेरशीतलजलयुक्तं ॥ भक्षणीयमिति शेषः ॥ तदनंतरमशनं कर
णीयं क्षीररसादियथाकमनीयं ॥ जनयति जेतोनलवलवृद्धिं हरति मलद्वय
वंधसमृद्धिं ॥ आमवातमतिशूलसमूहं अम्लपित्तमपि हरति दुरूहं ॥ अवि
पत्तिकरमेतच्चूर्णं रोगपित्तहरं किलतूर्णं ॥ अविपत्तिकरंचूर्णं ॥ कुडवं ना
रिकेलस्य सूक्ष्मं दृषदि पेषितं ॥ अभ्रं खंडस्य कुडवं सर्वमेतच्चतुर्गुणे ॥ आ
लोड्य नारिकेलस्य जले मंदाग्निना पचेत् ॥ नारिकेलजलाभावे गव्ये पयसि

॥४४२॥

तत्पचेत॥ धान्यकं पीप्पलीमूलं चातुर्जातं विचूर्णितं॥ प्रत्येकं टंकमात्रं तु सीते तस्मि
न्विनिक्षिपेत॥ पलमर्द्धं तु तद्भक्षी विभक्षितः प्रत्यहं नरैः॥ नारिकेलकखंडोयं पुं
स्त्वनिद्रावलप्रदः॥ इति नारिकेरखंडः॥ गुडपिप्पलिपथ्याभिस्तुल्याभिर्मोदकः
कृतः॥ पित्तश्लेष्महरः प्रोक्तो मंदाग्नित्वं च नाशयेत॥ इति गुडाद्यो मोदकः॥ नि
स्तुषयवयूषा धात्रीक्वाथश्च सुगंधिमधुयुतः पीतः॥ अपनयति चाम्लपि
त्तं यदि भुक्ते मुद्गयूषेण॥ एलातुगाचोचशिवाभयानां त्वग्ग्रंथिपाटीरदला
ह्वकानां॥ चूर्णं सितातुल्यमपाकरोति प्रौढाम्लपित्तं विवसाद्य भुक्तं॥ इति ए
लादिचूर्णं॥ कूष्मांडस्य रसो ग्राह्यः पलानां शतमात्रकं॥ रसतुल्यं गवां क्षीरं
धात्रीचूर्णं पलाष्टकं। तद्वग्निना पचेतावद्यावद्भवति पिंडितं॥ धात्रीतुल्या

॥४४३॥

सितायोज्यापलार्द्धं लेहयेदनु ॥ अम्लपित्तं वातपित्तं मूर्छांभ्यासं च नाशयेत् ॥ इति
कूष्मांडावलेहः ॥ पिप्पल्याः कुडवं चूर्णं घृतस्य कुडवद्वयं ॥ पलषोडशकं खंडाच्छ
तावर्य्याः पलद्वयं ॥ शिवायाः स्वरसस्यापि पलषोडशकं मतं ॥ क्षीरं प्रस्थद्वये सा
ध्यं लेहीभूते तत्र निक्षिपेत् ॥ त्रिजातकाभयाजाजीधान्यमुस्तशिवातुगाः ॥ एतेषां
कार्षिकं चूर्णं कर्षार्द्धं हस्तमीरकं ॥ नागरं नागकं जातीफलं समरिचं हिमं ॥ दत्वा
पलत्रयं क्षौद्रं स्निग्धभांडे निधापयेत् ॥ प्रातर्यथाबलं लिह्यादम्लपित्तप्रशांतये
हृल्लासारोचकच्छर्दिपिपासादाहनाशनं ॥ शूलहृद्रोगशमनं हृद्यं चेदं रसायनं
इति खंडपिप्पली ॥ सार्द्धं पंचपलं ग्राह्यं नारिकेरफलोद्भवं ॥ बीजं तथा पिप्पलीच ॥४४३॥
तत्समानैव गव्यघृते ॥ दुग्धं दशगुणं मंदवह्निना च विपाचयेत् ॥ त्रिकटुकेसरं

चैव धान्यकं चैव सर्जं तथा ॥ जातीपत्रं फलं चैव कुसुमं पत्रजं बला ॥ शठी मांसी च गंधा च
चातुर्जातं शतावरी ॥ शृंगाटकं छिन्नाजाजी च वाराही च विदारिका ॥ त्रिकंटको हिमं मुस्ता
कस्तूरी च समांशकं ॥ एतच्चूर्णसमा देया सिता कुर्याच्च मोदकान् ॥ मध्वाज्याभ्यां त
तः खादेन्निशायां हंति दारुणं ॥ मंदाग्निमम्लपित्तं च प्रमेहमामयोत्कटं ॥ वृद्धानां च
बलं कुर्यात्कामं चापि हि कामिनां ॥ इति वृहन्नारिकेलपाकः ॥ सुस्विन्नश्रुतवारिपि
ष्टकलं कूष्मांडतो द्वं तुलां भृष्टां साधुशरावसंमितघृते खंडेथ तुल्ये पचेत् ॥ व्यो
षाह्वात्रिसुगंधजीरकगजै रैते घृतं त्वामृकैः क्षौद्राद्दृढशरावकेण च जये पित्ता
र्ति यक्ष्मामयान् ॥ इति कूष्मांडावलेहः ॥ त्रिकटु त्रिफला मुस्तं विडंगं दहनाः समाः ॥
एतेषां चूर्णितानां च प्रत्येकं च पलं भवेत् ॥ कर्षद्वयं गंधकस्य तद्द्वयं पारदस्य च

विडालपदमात्रं तु लिह्यात्समधुसर्पिषा ॥ शीतोदकं चानुपिबेत्कमाद्यूषं पयस्तथा
अम्लपित्तं चाग्निमांद्यं परिणामरुजं तथा ॥ कामलां पांडुरोगं च हन्यादेव न संशयः
इति सामृतचूर्णं ॥ यष्टी धात्री बला द्राक्षा एला चंदन वालकं ॥ मधुपुष्पं च खर्जूरं दा
डिमं पैषयेत्समं ॥ सर्वतुल्या सिता योज्या पलार्द्धं भक्षयेत्सदा ॥ रससारमिदं ख्यातं
सर्वपित्तविनाशकृत ॥ इति रससारचूर्णं ॥ एकांशाः पंचनिंबानां द्विगुणो वृद्धदा
रुकः ॥ सक्तुर्दशगुणो देयः शर्करामधुरीकृतः ॥ शीतेन वारिणा पित्तं शूलं पित्तक
फोत्थितं ॥ निहंति चूर्णं सक्षौद्रमम्लपित्तं सुदुस्तरं ॥ इति पंचनिंबाद्यं चूर्णं ॥ पिष्ट्वा
जाजीं समधुकां घृतप्रस्थं विपाचयेत ॥ कफपित्ताम्लकहरं मंदानलवमिप्रणुत
इति जीरकाद्यं घृतं ॥ पटोलशुंठिकल्काभ्यां केवलं कुलकेन वा ॥ घृतप्रस्थं विप

॥४४४॥

क्ष्व्यं कफपित्तहरं परं ॥ इति पटोलघृतं ॥ शुद्धं सूतं शुद्धगंधं मृतताम्राभ्रलोहकं ॥ तु
ल्यं संमर्दयेद्यामं रुध्वा लघुपुटे पचेत् ॥ अक्ष धात्रीहरीतक्यः क्रमवृद्ध्या विपाच
येत् ॥ जलेनाष्टगुणेनैव ग्राह्यमष्टावशेषितं ॥ अनेन भावयेत्पूर्वं पक्वं सूतं पुनः
पुनः ॥ पंचविंशतिवारं च तावता भृंगजद्रवैः ॥ शुष्कं च चूर्णितं खादेत्पंचगुंजं मधु
प्लुतं ॥ रसो लीलाविलासोयमम्लपित्तं नियच्छति ॥ इति लीलाविलासो रसः ॥ अ
थ पथ्यमाह ॥ यव गोधूम मुद्गान्न पुराणाः शालिषष्टिकाः ॥ जलानि तप्तशीतानि श
र्करामधुसक्तवः ॥ कर्कोटकं कारवेल्लं पटोलं हिलमोचिका ॥ वेत्राग्रं वृद्धकूष्मांड
रंभापुष्पं च वास्तुकं ॥ कपित्थं दाडिमं धात्री तिक्तानि सकलानि च ॥ पानान्नानि स
मस्तानि कफपित्तहराणि च ॥ अम्लपित्तामये नित्यं सेवितव्यानि मानवैः ॥ अ

॥४४५॥

थापथ्यमाह॥ यत्निवेगंतिलान्माषान्कुलत्थांस्तैलभक्षणं॥ अविदग्धंचधान्याम्लंल
वणाम्लकटूनिच॥ गुर्वन्नंदधिमस्तुंचवर्जयेदम्लपित्तवान्॥ इत्यम्लपित्तचिकित्सा
अथविसर्पनिदानं॥ तत्रविसर्पस्यविप्रकृष्टंनिदानंसंख्यांनिरुक्तिंचाह॥ लवणा
म्लकटूष्णादिसंसेवाद्दोषकोपतः॥ विसर्पःसप्तधाज्ञेयःसर्वतःपरिसर्पणात्॥
१॥ आदिशब्देनचरकोक्तहरितशाकशुंडाकीप्रभृतीनांग्रहणं॥ संसेवादोषकोप
तःसंसेवयासततसेवयादोषकोपःसंसेवादोषकोपस्ततः॥ १ सप्तधात्वंविवृ
णोति॥ वातिकःपैत्तिकश्चैवकफजःसान्निपातिकः॥ चत्वारएतेविसर्पावक्ष्यंते
द्वंद्वजास्त्रयः॥ २॥ आग्नेयाख्योवातपित्ताभ्यांग्रंथ्याख्यःकफवातजः॥ यस्तुकर्दमको
घोरःसपित्तकफसंभवः॥ ३॥ अथविसर्पेदोषदूष्याणिसंग्रहणाह॥ रक्तंलसीका

॥४४५॥

त्वङ्मांसं दूष्यं दोषास्त्रयो मलाः॥ विसर्पारंभं समुत्पत्तौ विसर्पः सप्तहेतवः॥४॥ त्रयो म
ला वातपित्तकफाः दोषाः दूषकाः॥ अन्यथा दोषा मला इत्यत्र पुनरुक्ति दोषो लगिष्यत
४॥ अथ ग्रंथांतरोक्तं सामान्यं लक्षणमाह॥ ख्यद्रूपामाकृतिं देहे सर्वतः परिसर्पणा
त्॥ विसर्पो जायते जंतोः स्तोदस्त्राव स्त्राकरः॥ सर्वतः परिसर्पणादिति परिसर्पणा
त् परिसर्पः विविध विसर्पणाद्विसर्पः॥ यदुक्तं चरके॥ विविधं विसर्पतीति यतो विस
र्पस्तेन सः स्मृतः॥ परिसर्पोथवा नाम्ना सर्वतः परिसर्पणादिति॥५॥ अथ वातिकल
क्षणमाह॥ तत्र वातात्परीसर्पो वातज्वरसमव्यथः॥ शोफस्फुरणनिस्तोदभेदया
मार्तिहर्षवान्॥६॥ परीसर्पः विसर्पः॥ वातज्वरसमव्यथः॥ शिरोहृद्गात्रशूलादि
युक्तः॥ भेदः विदारणे नेत्र व्यथा॥६॥ अथ पैत्तिकं श्लैष्मिकं सान्निपातिकं चाह

||४४ ही||

पित्ताद्द्रुतगतिःपित्तज्वरलिंगोतिलोहितः ||कफात्कंडूयुतःस्निग्धःकफज्वरसमान
रुक् ||सन्निपातसमुत्थश्चसर्वरूपसमन्वितः ||७ द्रुतगतिःशीघ्रप्रसरणशीलः
७ ||अथवातपैत्तिकस्याग्निविसर्पाख्यस्यलक्षणमाह ||वातपित्ताज्ज्वरच्छर्दिमू
र्छातीसारतृड्भ्रमैः ||अस्थिभेदाग्निसदनतमकारोचकैर्युतः ||८ ||करोतिसर्वमंगंच
दीप्तांगारावकीर्णवत् ||यंयंदेशंविसर्पश्चविसर्पतिभवेत्समः ||९ ||शांतांगारा
सितोनीलोरक्तोवाश्वप्रचीयते ||अग्निदग्धइवस्फोटैःशीघ्रगत्वाद्द्रुतंचसः ||१०
मर्मानुसारीवीसर्पःस्याद्वातोतिबलस्ततः ||व्यथयेतांगंहरेत्संज्ञांनिद्रांचश्वासमीर
येत ||११ ||हिध्मांचसगतोवस्थामीदृशींलभतेनच ||क्वचिच्छर्मरतिग्रस्तोभूमिशय्यास
नादिषु ||१२ ||चेष्टमानस्ततःक्लिष्टोमनोदेहसमुद्भवां ||दुःप्रबोधोश्नुतेनिद्रांसोग्नि ||४४ ही||

वीसर्पउच्यते ॥९॥ दीप्तांगारावकीर्णंवत्ज्वलदंगारेलोवव्याप्तमंगंमन्यते ॥ शांतांगारा
सीतः निर्वाणांगारवत्कृष्णवर्णः ॥ अग्निदग्धइव अग्निदग्धदेशइव ॥ स्फोटैः उपची
यतइत्यन्वयः ॥ शीघ्रगत्वाच्छीघ्रकारित्वात् ॥ मर्मानुसारीहृदयानुसारी ॥ संसोहरेत
वीसर्पइत्यन्वयः ॥ निद्रांचेत्यत्रहरेदितिसंबध्यते ॥ हिध्मांहिक्कां ॥ श्रमंखेदं ॥ मनो
देहसमुद्भूतांनिद्रांमरणरूपांअश्नुवते प्राप्नोति ॥ ८॥९॥१०॥११॥१२॥१३॥ अथवा
तस्मैग्रंथिकंग्रंथिवीसर्पमाह ॥ कफेनरुद्धःपवनोभित्वातंबहुधाकफं ॥ रक्तंवावृद्धरक्त
स्यत्वक्शिरास्नायुमांसगं ॥ दूषयित्वातुदीर्घाणुवृत्तस्थूलखरात्मनां ॥ ग्रंथीनांकुरु
तेमालांरक्तानांतीव्ररुक्ज्वरां ॥१४॥ श्वासकासातिसारास्यशोषहिक्कावमिभ्रमैः
मोहवैवर्ण्यमूर्छांगभंगाग्निसदनैर्युतां ॥ इत्ययंग्रंथिवीसर्पोवातश्लेष्मप्रकोपनः प्र

१६ ॥ कफेन स्याद्धेतुदुष्टेन ॥ पवनोपि स्याद्धेतुदुष्टः ॥ तेनायं वातश्लैष्मिकः ॥ तं कफं बहुधा
भित्त्वा रक्तं वा दूषयित्वेत्यन्वयः ॥ त्वगादिष्वपीति रक्तविशेषणं ॥ दीर्घाणुवृत्तस्थूल
खरात्मनामिति ॥ वृत्तं वर्तुलं ॥ स्थूलमुच्छूनं ॥ खरं कठिनं ॥ एवं रूपाणां ग्रंथीनां मालां
करोति ॥ १९ ॥ अथ पित्तश्लैष्मिकं कर्दमाख्यं विसर्पमाह ॥ कफपित्ताज्ज्वरः स्तंभो नि
द्रा तंद्रा शिरोरुजा ॥ अंगावसादविक्षेपप्रलापारोचकभ्रमः ॥ ३७ ॥ मूर्छाग्निहा
निर्भेदोस्थ्नां पिपासेंद्रियगौरवं ॥ आमोपवेशनं लेपः स्रोतसां स च सर्पति ॥ ३८
प्रायेणामाशयं गृह्णन्नेकदेशं न चातिरुक् ॥ पिटिकैरवकीर्णोतिपीतलोहितपां
डुरैः ॥ ३९ ॥ स्निग्धोऽसितो मेचकाभो मलिनः शोफवान्गुरुः ॥ गंभीरपाकः प्राज्योष्मा
स्पृष्टः क्लिन्नोवदीर्यते ॥ २० ॥ पंकवत्शीर्णमांसश्च स्पष्टस्नायुशिरागणः ॥ ॥

शववर्गंधिश्रवी सर्पः कर्दमाख्यमुशंतितं ॥ २७ ॥ स्तंभः गात्रस्य स्तब्धता ॥ आमोपवेशनं आ
मस्य वर्च्चसस्य जनं ॥ स च सर्पति एकदेशमित्यन्वयः ॥ पिटिकैः पिटिकाभिः ॥ अवकी
र्णो व्याप्तः ॥ असितः कृष्णः ॥ मेचकाभः रूक्षकृष्णः ॥ प्राज्योष्मा प्रचुरोष्मा ॥ स्पष्टः क्लि
न्नो विदीर्य्यत इति स्पष्टः सन्नार्द्रो भवति ॥ विदीर्य्यते च ॥ पंचवत् कर्दमवत् शीर्ण
मांसः गलितमांसः अत एव स्पष्टस्नायुशिरागणः ॥ कर्दमाख्यमुशंतितमिति तं क
र्दमसादृश्यात् कर्दमाख्यमुशंति ॥ २७ ॥ १८ ॥ १८ ॥ २० ॥ २१ ॥ अथ क्षतजं विसर्पमाह ॥
बाह्यहेतोः क्षतात् क्रुद्धः सरक्तं पित्तमीरयन् ॥ विसर्पं मारुतः कुर्यात् कुलत्थसदृशैश्चि
तं ॥ स्फोटैः शोफज्वररुजादाहाढ्यं श्यावलोहितं ॥ २२ ॥ बाह्यहेतोः शस्त्रप्रहारव्यालदं
तनखाद्यागंतुहेतोः ॥ श्यावलोहितं धूम्ररक्तवर्णं अयं च पित्तजविसर्पेऽन्तर्भा

वनीयः ॥ तेन नसंख्याधिक्यं ॥ २३ ॥ अथोपद्रवानाह ॥ ज्वरातिसारवमथुत्वङ्मांसदरणक्लमाः
अरोचकाविपाकौ च विसर्पाणामुपद्रवाः ॥ २३ ॥ अथ साध्यत्वादिकमाह ॥ सिध्यंति वात
कफपित्तकृता विसर्पाः सर्वात्मकः क्षतकृतश्च न सिद्धिमेति ॥ पित्तात्मकोंजनवपुश्च भ
वेदसाध्यः कृच्छ्राश्च मर्मसु भवंति हि सर्व एव ॥ २४ ॥ पित्तात्मकोंजनवपुः पित्तजः सम
कृष्णवर्णः ॥ मर्मसु सर्व एव कृच्छ्राः असाध्याः भवंति ॥ २५ ॥ इति विसर्पनिदानं ॥ अ
थ विसर्पचिकित्सा ॥ विरेकवमनालेपसेचनास्रविमोक्षणैः ॥ उपाचरेद्यथादोषं वि
सर्पानविदाहिभिः ॥ मृद्वीकारग्वधपालिनिकाजलानां मेकेन पीतं त्रिवृतस्य चूर्णं क्षीरे
ण वद्वाहविषापि युक्तं विसर्पहृद्रेचनमेतदुक्तं ॥ पातिनिकात्रापमाणं ॥ इति रेचनं ॥
प्रच्छर्दने राठफलं कलिंगयष्ट्याह्वितं सर्वविसर्पहारि ॥ पटोलकृस्नागुतनिंबपत्रै ॥ ४४८ ॥

रघ्वान्वितं दोषवसेन युक्तं ॥ इति वमनं ॥ शिरीषयष्टीनतचंदनैलामांसीहरिद्राद्वयकुष्टवा
लैः लेपो दशांगः सघृतः प्रयोज्यो विसर्पकुष्टज्वरशोथहारी ॥ शतधौतघृतविमिश्रः
कल्कस्त्वक्पंचकस्य लेपेन ॥ बहुदाहकलितमुष्ठे रग्निविसर्पं विनाशयति ॥ न्यग्रोधपा
दो गुंद्राच कदलीगर्भस्तथैव च ॥ एतैर्ग्रंथि विसर्पघ्नो लेपो धौताज्यसंयुतः ॥ शतधौतघृतो
न्मिश्रः शिरीषत्वग्गजाह्वतः ॥ लेपः शमयति क्षिप्रं विसर्पं कर्दमाभिधं ॥ जलौकापातनं
श्रेष्ठं चातुर्जातं वसेचनं ॥ प्रदेहाः परिषेकाश्च शस्यंते पंचवल्कलैः ॥ रास्नानीलोत्पलं
दारुचंदनं मधुकं बलं ॥ घृतक्षीरयुतो लेपो वातविसर्पनाशनः ॥ मृणालं चंदनं लोध्र
मुशीरं कमलोत्पलं ॥ सारिवामलकीपथ्या लेपः पित्तविसर्पनुत् ॥ नव्यन्यग्रोधपादाश्च
बिसनवकदलीगर्भयुक्ता विशोष्य ग्रंथिपिष्टा नैकधौतं घृतमिति सुहिमः पद्मिनीक

॥४४८॥

ईमोया ॥ मुक्तास्फोटः प्रवालं जलपरिमर्दितं मौक्तिकं वापिकं वुः सर्पिर्युक्ता गिरेश्रीमर्दि
तिनु विहिताः पित्तवीसर्पले पाः ॥ त्रिफलापद्मकोशीरसमंगाकरवीरकं ॥ नलमूलमनं
ताचलेपः स्लेष्मविसर्पनुत ॥ शिरीषोदुंवरो जंवूः सेकलेपनयोर्हिताः ॥ श्लेष्मातकत्वचो
लेपो विसर्पस्फुतिनाशनः ॥ मेस्तारिष्टपटोलानां क्वाथः सर्वविसर्पनुत ॥ धात्रीपटो
लमुद्गानामथवा घृतसंयुतः ॥ उपक्रमा इमे विला विसर्पएकतो मताः ॥ प्रदुष्टशोणि
तस्य यद्धि मोचनं तदेकतः । कुष्टामयस्फोटमसूरिकोक्तचिकित्सया प्याशु हरेद्धिंस
पीन ॥ कुष्टाधिकारोक्तं कासीसाद्यं घृतमप्यत्रातीव हितं । अथ पथ्यमाह पुराणायव
गोधूमकंगु षष्टिकशालयः ॥ मुद्गामसूरचणकाः स्कवेष्यो जांगलो रसः ॥ नवनीतं
घृतं द्राक्षा दाडिमं कारवेल्लकं ॥ वेत्राग्रं कुलकं धात्री खदिरो नागकेशरं ॥ लाक्षाशिरी ॥४४८॥

षः कर्पूरं चंदनं तोयनं तथा ॥ सदा सेवं पथ्यमिदं सेवितव्यं विसर्पिभिः ॥ अथापथ्यमा
ह ॥ व्यायाममह्निस्वापनं सुरतं प्रवातं क्रोधं शुचं च मलवेगनिरोधनं च ॥ गुर्वन्नपान
मखिलं लशुनं कुलत्थान् माषान् स्निग्धान्नसकलमांसमज्जांगनांश्च ॥ स्वेदं विदाहिलवणा
म्लकटूनि मद्यमर्कप्रभामपि विसर्पगदी त्यजेत् ॥ इति विसर्पचिकित्सा ॥ अथ विस्फो
टनिदानं ॥ तत्र विस्फोटकस्य विप्रकृष्टनिदानपूर्विकां संप्राप्तिमाह ॥ कट्वम्लतीक्ष्णो
ष्णविदाहिरूक्षक्षारैरजीर्णाध्यशनातपैश्च तथर्तुदोषेण विपर्ययेण कुप्यंति
दोषाः पवनादयस्तु ॥१॥ त्वचमाश्रित्य ते रक्तमांसास्थीनि प्रदूष्य च ॥ घोरान् कुर्वंति
विस्फोटान् सर्वान् ज्वरपुरस्सरान् ॥२॥ अजीर्णाध्यशन इति अजीर्णाशनमध्य
शनं च ॥ अजीर्णाशनमपक्वद्रव्याशनं ॥ अध्यशनमजीर्णभोजनं ॥ ऋतुदोषेण

ऋतुहेतुकशीतोष्णादीनामतियोगेन ॥ विपर्य्ययेण ऋतुचिताहारविहारवैपरीत्येन
त्वमसात्म्यं स्वल्पचिविस्फोटान्कुर्वतीत्यर्थः ॥ ज्वरपुरस्सरान् ज्वरपूर्वजान् इत्यनेन
ज्वरस्य पूर्वरूपतां दर्शयति ॥ १ ॥ २ अथ रूपमाह ॥ अग्निदग्धनिभाः स्फोटाः सज्वरा र
क्तपित्तजाः ॥ क्वचित्सर्वत्र वा देहे विस्फोटक इति स्मृतः ३ ॥ रक्तपित्तमा इत्यनेन सर्वेषु
विस्फोटेषु रक्तपित्तयोः प्रधानकारणत्वं यथाप्युक्तेषु वातस्य ॥ तथा वातानुगतिरपि
वोद्धव्या ॥ तथा च भोजः यदा रक्तं च पित्तं च वातेनानुगतं त्वचि ॥ अग्निदग्धनिभान्
स्फोटान्कुरुतः सर्वदेहगानिति ॥ ३ ॥ अथ वातिकमाह ॥ शिरोरुक्शूलभूयिष्ठं ज्वर
तृट्पर्वभेदनं ॥ सकृष्णवर्णता चेति वातविस्फोटलक्षणं ॥ ४ ॥ शूलमत्र तोदरूपं ४
अथ पैत्तिकमाह ॥ ज्वरदाहरुजास्रावपाकतृष्णासमन्वितं ॥ पीतलोहितवर्णं च

॥ ४५० ॥

पित्तविस्फोटलक्षणं ॥५॥ रुजादित्रयं स्फोटेषु ॥५॥ अथ श्लैष्मिकमाह ॥ छर्दिरोचकजाड्या
निकंडूकाठिन्यपांडुताः ॥ अवेदनश्चिरात्पाकी सविस्फोटः कफात्मकः ॥६॥ अथ कफ
पैत्तिकं वातपैत्तिकं चाह ॥ कंडूर्दाहो ज्वरः छर्दिरेतैश्च कफपैत्तिकः । वातपित्तकृतो यस्त
तत्र स्फती व्रवेदनाः ॥७॥ अथ वातश्लैष्मिकं सान्निपातिकं चाह ॥ सैमित्यं गौरवं कं
डूर्भवेद्धातवलासजे ॥ मध्ये निम्नोन्नतश्चांते कठिनः स्वल्पपाकवान् ॥य॥ रोगदाहतृ
षामोहछर्दिमूर्छारुजज्वराः । प्रलापो वेपथुर्यत्र सोऽसाध्यश्च त्रिदोषजः ॥८॥ मध्ये
निम्नोन्नतश्चांत इति मध्ये निम्नः अंते च उन्नत इत्यर्थः ॥ मोहो विपरीतज्ञानं ॥ मूर्छा
सर्वथा ज्ञानशून्यता ॥९॥ रक्तजानाह ॥ वेदितव्याश्च रक्तेन पैत्तिकेन च हेतुना ॥ गुं
जाफलसमा रक्ता रक्तश्चाया वा विदाहिनः ॥ न ते सिद्धिं समायांति सिद्धैर्योगशतैरपि

॥४५३॥

१०॥ पैत्तिकेन हेतुना पित्तस्य हेतुना कट्वम्लादिना॥ रक्तस्य पित्तस्य च तुल्यत्वात्॥ न च ते सा
ध्याः॥१०॥ एते चाष्टविधा बाह्या आभ्यंतरोपि भवेदयं॥ तस्मिन्नंतर्व्यथा तीव्रा ज्वरश्चैवा
भिजायते॥११॥ तस्मिन् बहिर्गतौ स्यात्स्वास्थ्यं कृच्छ्रात्स्यस्य बहिर्गतिः॥ तत्र वातिक विस्फोट
क्रियाकार्या विजानता॥१२॥ उपद्रवानाह॥ तृष्णा श्वासमांससंकोचदाहहिक्कामदज्वराः॥
विसर्पो मर्मसंरोधस्तेषामुक्ता उपद्रवाः॥१३॥ मांससंकोचः मांसस्य शाटितत्वं॥ मर्म
संरोधः मर्मव्यथा॥१३॥ केचिदुपद्रवाणां लक्षणांतरं पठंति॥ तदेवाह॥ हिक्का श्वासो रुचि
स्तृष्णा सांगमर्दो हृदि व्यथा॥ विसर्पज्वरहृल्लासा विस्फोटानामुपद्रवाः॥१४॥ अथ सा
ध्यत्वादिकमाह॥ एकदोषोत्थितः साध्यः कृच्छ्रसाध्यो द्विदोषजः॥ सर्वरूपान्वितो घो
रो ह्यसाध्यो भूर्युपद्रवः॥१५॥ घोरो रौत्यंतदुःखदः॥१५॥ इति विस्फोटकनिदानं॥ अथ ॥४५३॥

विस्फोटकचिकित्सा॥ विस्फोटे लंघनं कार्य्यं वमनं पथ्यभोजनं॥ यथादोषं वलं वीक्ष्य युं
ज्यात्तु विरेचनं॥ किराततिक्तकारिष्टपथ्याक्वाथं वुदपर्पटैः॥ पटोलवासकोशीरत्रिफला
कोटजैः शृतं॥ द्वादशांगं नरः पीत्वा विस्फोटेभ्यो विमुच्यते॥ इति किराततिक्तादिः क्वाथः
विसर्पोक्तो दशांग से योथवात रत्नोक्तः केशो रकश्चात्र हितः॥ द्राक्षाकाश्मरिखर्जूरप
टोलारिष्टवासकैः॥ कटुकीलाजदुस्पर्शैः पैत्तिके ससितं घृतं॥ इति द्राक्षादिः क्वाथः॥
विस्फोटव्याधिनाशाय तंडुलांबु प्रयोषितं॥ वीजैः कुटजवृक्षस्य लेपः कार्य्यो विजान
ता॥ चंदनं नागपुष्पं च सारिवा तंडुलीयकं॥ शिरीषवल्कलजाती लेपः स्याद्दाहनाश
नः॥ उत्पलं चंदनं लोध्रं तुशीरं सारिवाद्वयं॥ जलेन पिष्टं लेपेन स्फोटदाहार्तिनाशनं॥
पुत्रंजीवस्य मज्जानं जले पिष्ट्वा प्रयोजयेत्॥ कालस्फोटं विषस्फोटं सद्यो हन्यात्सवे

॥४५२॥

दनं॥ कृष्णागुरुप्रियंगत्वगुरुप्रियंकरं गुरुप्रियंच नाशयेत्॥ अन्तश्च स्फोटकं ताम्रं पुत्रंजीवो विना
शयेत्॥ पटोलसप्तछदनिंबवासाफलत्रिकछिन्नरुहाविपक्वं॥ तत्पंचतिक्तं घृतमाशु
हन्यात्रिदोषविस्फोटविसर्पकंडूः॥ इति पंचतिक्तं घृतं॥ शिरीषपत्रादितुषोदकेन
कल्कीकृतं चैव घृतेन युक्तं॥ निहंति विस्फोटकमुग्ररूपं सदाहपाकं श्रुतिरागयुक्तं
इति पंचांगशिरीषलेपः॥ कंपिल्लकं विडंगं च वत्सकं त्रिफलावला॥ पटोलं पिचुमंदं
च लोध्रं दारुप्रियंगुकं॥ धातकीं खदिरं सर्ज्जं सिक्थकागरुचंदनां॥ विपक्वासाध्यं भवेत्तै
लं तत्परं व्रणरोपणं॥ इति कंपिल्यादितैलं॥ अथ पथ्यमाह॥ जीर्णशालिर्यवा मुद्गा
मसूरा आढकी तथा॥ मकुष्टा जांगलाका गव्यघृतं चैव कटिल्लकं॥ पटोलकं निंबदलं
तैलं शीतोदकं तथा द्रव्याण्येतानि विस्फोटे हितानि मुनयोऽब्रुवन्॥ अथापथ्य

॥४५२॥

माह || स्वेदं व्यवायं व्यायामं क्रोधं गुर्वन्नमातपं || वमिवेगं पत्रशाकं प्रवातं शयनं दिवा

ग्राम्यौदकानूपमांसं विरूढान्यशनानि च || तिलान्माषान्कुलत्थांश्च लवणाम्लरू

क्षाणि च || विदाहि रूक्षमुष्णं च विस्फोटी परिवर्जयेत || इति विस्फोटचिकित्सा || अ

थ स्नायुकनिदानं || शाखासु कुपितो दोषः शोथं कृत्वा विसर्पवत || भित्वेतं क्षतं

तत्र कृत्वा स्नायु विशोष्य च ||३|| कुर्यात्तंतुनिभं जीवं वृतं सितस्फतिं च हि || शनैः श

नैः क्षताद्याति छेदात्तत्कोपमावहेत ||५|| तत्पातात्छोथशांतिः स्यात्पुनः स्थानांतरे भ

वेत || स स्नायुक इति ख्यातः क्रियाचोत्र विसर्पवत ||६|| बाह्वोर्यदि प्रमादेन जंघयो

स्तुट्येति क्वचित || संकोचं खंजतां वापि छिन्नस्तंतुः करोत्यसौ ||७|| वातेन श्याव रूक्षः

सरुगग्पदहनान्नीलपीतः सदाहो घोरः शीतः श्लेष्मणा स्यात पृथुगुरिमतोथ

॥४५३॥

द्विदोषो द्विलिंगः॥ रक्तेनास्तकांतिः समधिकदहनोथ्वाखिलैः। सर्वलिंगो रोगोस्ना
वष्टधेत्थं मुनिभिरभिहितः स्नायुकस्तंतुकीटः॥५॥ इति स्नायुकनिदानं॥ अथ स्ना
युकचिकित्सा॥ स्नेहस्वेदप्रलेपादिकर्मकुर्याद्यथोचितं॥ रामठं शीततोयेन पीतं।
स्नायुकरोगनुत्॥ कुष्ठनागरशिग्रूत्थं कल्कः शुंठीसमन्वितः॥ निहन्यात्स्नायु
जां रुजं तेषु तः पानेतोपि च॥ धत्तूरकदलैः स्वेदस्तैलाभ्यंगश्च शस्यते॥ शोशितं श्रा
वयेद्रूपः स्नायुके शोथकारिणि॥ अंगारसिद्धं चंताकं तैलं रामठसैंधवैः॥ संयुतं
स्नायुकं हंति मुखेवद्धं न संशयः॥ स्वेदात्कांजिकसंसिद्धैर्भक्षैरपि चिनश्यति॥ त
द्वद्वकूलजे बीजं पिष्टं हंति प्रलेपनात्॥ गव्यं सर्पिस्त्र्यहं पित्वा निर्गुंडीस्वरसं त्र्यहं॥

॥४५३॥

पिबेत्स्नायुकमत्युग्रं हंत्यवश्यं न संशयः॥ शिग्रूमूलदलैः पिष्टैः कांजिकेन

ससैंधवैः ॥ लेपः स्नायुकरोगाणां शमनः परमुच्यते ॥ अहिंस्रामूलकल्केन तोयपिष्टे
न यत्नतः ॥ लेपात्संबंधनात्तंतुर्निःसरत्येव निश्चितं ॥ अतिविषमुस्तकभार्गीविश्वौ
षधपिप्पलीविभीतक्यः ॥ चूर्णमिदं तंतुघ्नं पुंसामुष्णेन वारिणा पीतं ॥ कटुतैलान्वि
तैर्लेपात्सर्पकंचुकभस्मभिः ॥ स्नायुकः साम्यति क्षिप्रं प्रकोपात्स्फटति ध्रुवं ॥ इति
स्नायुकचिकित्सा ॥ अथ फिरंगनिदानं ॥ तत्र फिरंगस्य निरुक्तिमाह ॥ फिरंगसं
ज्ञके देशे बाहुल्येनैव यद्भवेत ॥ तस्मात्फिरंग इत्युक्तो व्याधिर्व्याधिविसारदैः ॥
१ ॥ अथ फिरंगस्य विप्रकृष्टं निदानमाह ॥ गंधरोगः फिरंगोयं जायते देहि
नां ध्रुवं ॥ फिरंगिणोतिसंसर्गात फिरंगिण्याः प्रसंगतः ॥ २ ॥ व्याधिरागंतु
जो ह्येष दोषाणामत्र संक्रमः ॥ भवेत्तं लक्षयेत्तेषां लक्षणैर्भिषजां

वरः ॥ ३ ॥ अथ रूपमाह ॥ फिरंगस्त्रिविधो ज्ञेयो बाह्य आभ्यंतरस्तथा ॥ बहिरंतर्भवश्चापि
तेषां लिंगानि च ब्रुवे ॥ ४ ॥ तत्र बाह्यः फिरंगः स्याद्विस्फोटसदृशोऽल्परुक् ॥ स्फुटितो
व्रणवद्वेद्यः सुखसाध्योऽपि स स्मृतः ॥ ५ ॥ संधिस्थोऽभ्यंतरः स स्यादुभयोर्लक्षणै
र्युतः ॥ कष्टदोऽतिचिरस्थायी कष्टसाध्यतमश्च सः ॥ ६ ॥ अथ फिरंगस्योपद्रवाना
ह ॥ कार्श्यं बलक्षयो नासाभंगो वह्नेश्च मंदता ॥ अस्थिशोषोऽस्थिवक्रत्वं फिरंगोप
द्रवा अमी ॥ ७ ॥ अथ साध्यत्वादिकमाह ॥ बहिर्भवो भवेत्साध्यो नूतनो निरुपद्रवः
आभ्यंतरस्तु कष्टेन साध्यः स्यादयमामयः ॥ ८ ॥ बहिरंतर्भवो जीर्णः क्षीणस्योप
द्रवैर्युतः ॥ बोध्यो व्याधिरसाध्योऽयमित्यूचुर्मुनयः पुरा ॥ ९ ॥ इति फिरंगनिदानं ॥
अथ फिरंगचिकित्सा ॥ हितं च सर्पिषः पानं पथ्यं चापि विरेचनं ॥ हितः शोणि

॥ ४५४ ॥

तमोक्षम्यहितं च लघु भोजनं ॥ फिरंग संज्ञकं रोगं रसः कर्पूरसंभवः ॥ अवश्यं नाशये
देतद्दृष्टः पूर्वचिकित्सकैः ॥ तिष्ठते रसकर्पूरप्राशने विधिरुत्तमः ॥ अनेन विधि
ना खादन् कर्षैकं रसकर्पूरं तु वंगानि च षोडश ॥ द्वात्रिंशन्मरिचान्यत्र चूर्णमेषां प्रक
ल्पयेत् ॥ अथ चैव पुटिका कार्या तेषामेकां शिवाय च ॥ दत्वान्हि प्रथमे भुंज्यात्त्रुटि
कैकां दिने बुध ॥ देहे चापि प्रदातव्ये पथ्यं दुग्धोदनं मतं ॥ उपदेशाहरं ह्येतद्विवर्गी
तमिदं परं ॥ इति रसकर्पूरयोजना मुखे शोथं न विंदति ॥ गोधूमचूर्णं संनीय विद
ध्यात्सूक्ष्मकूपिकां ॥ तन्मध्ये निक्षिपेत्सूतं चतुर्गुंजामितं भिषक् ततस्तु त्रुटिकां कू
पिधयथा न स्याद्रसो वहिः ॥ सूक्ष्मचूर्णैर्लवंगस्य तां गुटीमवधूलयेत ॥ दंतस्पर्शो
यथा न स्यात्तथा तामंभसा गिलेत् । तांबूलं भक्षयेत्पश्चात्क्षाराम्ललवणं त्यजेत्

॥४५५॥

अममातपमध्वानं विशेषात्स्त्रीनिषेवणं ॥ इतिरसयोजना ॥ पारदष्टंकमानः स्यात्खदि
रष्टंकसंमितः ॥ आकारकरभश्चापि ग्राह्यष्टंकद्वयोन्मितः ॥ टंकत्रयमितं क्षौद्रं खल्वे
सर्वं विनिक्षिपेत् ॥ संमर्द्य तस्य सर्वस्य कुर्यात्सप्तवटीर्भिषक् ॥ स रोगी भक्षयेत्प्रात
रेकैकामंबुना वटीं ॥ वर्जयेदम्ललवणौ फिरंगस्तस्य नश्यति ॥ अनुभूतोयं योगः ॥
इति सप्तशालिकावटी ॥ अर्द्धकर्षमितं सूतं कुरंटकरसैः सह ॥ खल्वे विमर्दयेत्तत्रप
लार्द्धं गुग्गुलुं क्षिपेत् ॥ तत्राक्ककरभं कुष्ठं त्रिफलां च पृथक्पृथक् ॥ अर्द्धकर्षमितं सर्वं
चूर्णयित्वा तु निक्षिपेत् ॥ तत्सर्वं मधुसर्पिर्भ्यां द्विपलाभ्यां पृथक्पृथक् ॥ मर्दयेदथ
तत्खादेदर्द्धकर्षमितं नरः ॥ व्रणः फिरंगरोगोत्थस्तस्याचिरं विनश्यति ॥ अन्योपि
चिरजातोपि प्रशाम्यति महाव्रणः ॥ एतद्भक्षयतः शोथो मुखस्य च न जायते ॥ ॥४५५॥

वर्जयेदम्लतक्रलवणानेकविंशतिवासरान् ॥ इतिपारदगुग्गुलादियोगः ॥ कालाजाजीतुकं
कुष्ठं टंकत्रयमितं पृथक् ॥ उभयोः सार्द्धगुलितं गुडं जीर्णं विनिक्षिपेत् ॥ संचूर्ण्य स
र्वमेकत्र गुटीः पंचदशाचरेत् ॥ प्रातः शायं च भोक्तव्या गुटिकाः सप्तवासरं ॥ गोधूम
रोटिकाः सर्पिर्युक्ता भक्ष्यास्तु केवला ॥ फिरंगजनिताः सर्वे व्रणा यांति संक्षयं ॥ ना
स्त्यनेन समो योगो फिरंगजनिते गदे ॥ इति फिरंगगजकेसरीरसः ॥ सौभांजनमहा
निंबशम्बुकारिष्टमंगराट् ॥ श्रीरपुंखाकेंटकारिकांचनारत्वचः समाः ॥ एतेषां तुल्य
चोगृाघाः समभागास्तु गुग्गुलिताः ॥ घृतमध्वावशिष्टं तत्पलं हंति फिरंगकं ॥ वातमंत
गतं व्याधिं सप्तरात्रान्न संशयः ॥ अनुपाने प्रयोक्तव्यं चूर्णीमूषरगासंभवं ॥ इति
क्वाथः ॥ चूर्णयेन्निंबपत्राणि यष्ट्यानिं वा षमांशिकीं ॥ धात्रीं च तावतीं रात्रीं नि

वषोडशमाषिकां ॥ शाणमात्रमिदं चूर्णमश्नीयादंभसा सह ॥ फिरंगं नाशयेदेतद्बाह्य
माभ्यंतरे तथा ॥ इति निंबादिचूर्णं ॥ चोपचीनीभवं चूर्णं शाणमात्रं समाक्षिकं ॥ फि
रंगव्याधिनाशाय भक्षयेल्लवणं त्यजेत् लवणं यदि वा त्यक्तुं न शक्नोति हि यो जनः
सैंधवं स हि भुंजीत मधुरोपरसंहितत् ॥ इति चोपचीनीचूर्णं ॥ पारदः कर्षमात्रः स्या
त्तावानेव हि गंधकः ॥ तेदुलाष्म्राक्षमाल्लैः त्राःस्फलेषां कुर्वीत कज्जलीं तस्याः सप्तव
टीः कुर्यात्ताभिर्धूमं प्रयोजयेत् ॥ दिनानि सप्त तेन स्यात्फिरंगं तो न संशयः इति पा
रदादिधूमः ॥ सूतकं दरदं तुल्यं कासीसं गंधकं समं ॥ त्र्यवघृष्टोपदंशानां कृतो ले
पः प्रशस्यते ॥ आलातांगारपिरिविना स्वेदनं कार्यते बुधैः ॥ सप्तरात्रादयं योगः सुखि
नं कुरुते नरः ॥ इति सूतकाद्यो लेपः ॥ राकोत्तरप्रातं धौतं नवनीतं प्रलेपयेत् ॥ सूतुल्यं

सिक्थमथवा घृतपक्वं निहंतितं ॥ इति योगद्वयं ॥ पलमात्रं कटुतैलं यं क्षं सिक्थं च कर्ष
मेव पथ्यक ॥ कंपिल्लक विहरोजा सिंदूरं सोरकं चेति ॥ पुरस्य ग्रां त्वचेति पित्तलपात्रे वि
पाचितं शिखिना ॥ मंदेनाग्नौ मध्य त्वेपालिनो द्रुत्यत सिद्धं ॥ सितवस्त्रे संलिप्य व्रणो
परि स्थापयेत्सम्यक ॥ क्षतमुपदंशं सर्वं सम्यक् दोषं फिरंगजं हन्यात ॥ शस्त्रकृतंते
त्वजातं दंतजमाग्नि व्रणं क्षितिरिवजं ॥ दुष्टव्रणमपमेतत्प्रकाशितं बालबोधाय ॥ इति कटु
तैलादि मलहरः ॥ सेटकस्याष्टमोभागः सिंदूरः सेटमात्रकं ॥ गोसर्पिः सम्यगामर्द्य
पश्चात्संलेपयेत्ततो ॥ फिरंगिनां त्रिदिवसात्कोद्रवो मध्य पतालकैः ॥ संयष्टु वपुषां प
थ्य दुग्धोदन निषेविणां ॥ व्रणा विस्फोटकाः सर्वे विलयं प्राप्नुवंति सर्वतः ॥ पतंत्यंगान्न
संदेहो गोपालकृत निश्चयः ॥ इति सिंदूरादि लेपः ॥ रसनागौ समौ प्रकृत्यौ सम्यक

॥४५७॥

त्वक्ले विमर्द्दयेत् ॥ गोधूमवल्कलं चिंचाफलं निंबदलं तथा ॥ आरग्वधं मंसं मर्द्यै निंबू
फलरसेन तु ॥ शालह्वयेन गुटिकां खदिरांगारके क्षिपेत ॥ वस्त्रेणाच्छादयेत तस्मात
सम्यक् धूमं च पाययेत् ॥ सप्तरात्रिप्रयोगेण सर्वविस्फोटनाशनः ॥ क्षीरं श्रास्यौद
नं देयं मेकविंशतिवासरं ॥ त्रिफलाखादिरं सारं जातीपत्रं समांशकं ॥ निक्काथ्य क्षा
लयेदास्यं धूमव्यापत्तिनाशनं ॥ इति रसनागादिचूर्णं धूमः ॥ षलमाषं हिंगुलं चैव
टंकणं दशमाषकं ॥ आकारकरभं सिक्थं दशमाषं पृथक्पृथक् ॥ प्रोक्तसिक्थे।
नवटिकाबदरीबीजसन्निभा ॥ धूमपानाय देयैका प्रातर्वैवूलजाग्निना ॥ गोघृता
क्ताय वस्यैव रोटिकाउलवणाश्रिते ॥ फिरंगिणे प्रदातव्याऽनिशं तांवूलवीटकं
पस्तुवांपु फिरंगार्त्तः स नरः सुखभाग्भवेत ॥ चतुर्दशदिनैरेव नात्र संदेहः ॥४५७॥

रितः ॥ इति हिंगुलादिधूमः ॥ ष्माणं हिंगुलकं शाणं कुनट्याः पवचूर्णकं ॥ शाणाद्धा
दशकं वध्वा वटीं वदरसन्निभां ॥ वदरीमूलशिखिनि प्रक्षिप्यैकां वटीं प्रगासायं
धूमं गृहेद्ध्याद्धुंति सापि फिरंगकं ॥ यातनचात्र संदेहो नुर्निर्णीतास्थितस्यच ॥ परि
त्यक्त पटोः सप्तदिनाद्धाद्धिंगुण्णायधेः ॥ इति द्वितीयो हिंगुलादिधूमः ॥ दरदस्यैक
माषः स्याद्यवचूर्णं त्रितोलकं ॥ टंकणं कर्षमेकं च घृष्टैत त्रितयं क्षणात ॥ आ
वध्य वटिकां चारा वदरी प्रमितां बुधः ॥ तस्याधूमं प्रगे दद्यात्पातुं कोलाग्निना
स्पृतु ॥ आद्यादिनां गिनः सायं गोदुग्धौदनसेविनः ॥ चतुर्द्दशदिनाज्जंतो सोव
सर्वदिराग्निनः ॥ सोपिमुक्तो भवेद्रोगात् फिरंगजनिताद्धुतं ॥ इति त्रितीय हिंगु
लादिधूमः ॥ अथ पारदोत्पन्नमुखपाकचिकित्सा ॥ पंचवल्कलकषायेण

॥४५८॥

गंडूषं कारयेद्भिषक् ॥ किंच ॥ पलांडुजीरकं चैव खदिरं कर्षमात्रकं ॥ जलेन पेषयि
त्वा तु कवलं कारयेद्भिषक् ॥ तेनैवोपशमं याति मुखपाकः सुदारुणः ॥ स्वरसं यः
पिवेत्प्रातः शाकपुष्पजटात्वचः ॥ तदस्थि पारदो वेगान्निर्गच्छति न संशयः ॥ द्वि
गुंजं गंधकं शुद्धं शाणार्द्धं तु लवंगकं ॥ नागवल्लीरसैः सम्यग्भक्षयेत्प्रातिवासरं
तदस्थि पारदं वेगात्कर्षतीति न संशयः ॥ इति फिरंगचिकित्सा ॥ अथ मसूरि
कानिदानं ॥ तत्र मसूरिकाया विप्रकृष्टनिदानपूर्विकां संप्राप्तिमाह ॥ कट्वम्लल
वणक्षारविरुद्धाध्यशनाशनैः ॥ दुष्टनिष्पावशाकाद्यैः प्रदुष्टपवनोदकैः ॥ १ ॥
क्रूरग्रहेक्षणाच्चापि देहे दोषाः समुद्धताः ॥ जनयंति शरीरेस्मिन्दुष्टरक्तेन सं
गताः ॥ मसूराकृतिसंस्थानाः पिटिकाः स्युर्मसूरिकाः ॥ २ ॥ क्षारः पवस्तारादिः ॥४५८॥

कद्वादिविरुद्धानामशनैः अध्यच अध्यशनात् अशनं अधिकमशनं मध्यशनं तत्राश-
नं तेन च ॥ दुष्टनिष्पावशाकाद्यैः दुष्टो व्यापन्नो निष्पावः शाकं च आद्यशब्दान्मध्वा-
लुकादिभिः ॥ प्रदुष्टपवनोदकैः सविषकुसुमादिसंसर्गात् प्रदुष्टः पवनः उदकं च
तैः ॥ क्रूरग्रहेक्षणाच्चापि देशे ॥ देशे क्रूरग्रहा धनुः शनैश्चरादयो देशक्षोभकरास्ते-
षामीक्षणात् दृष्टेः ॥ यस्मिन्देशे क्रूरग्रहदृष्टिस्तत्रापि मसूरिकोत्पत्तिरित्यर्थः दुष्ट-
क्तेन संगता इत्यनेन कद्वादिभिर्हेतुभिर्विशेषेण लक्षणं दर्शयेति ॥ अतएवोक्तं तन्त्रान्त-
रे ॥ पित्तं शोणितसंसृष्टं यदा दूषयति त्वचं ॥ तदा करोति पिटिकाः सर्वगात्रेषु देहिनां
मसूरमुद्गमाषाणां तुल्याकोलोपमा अपि ॥ मसूरिकास्तु विज्ञेयाः पित्तरक्ताधिको-
द्भवैरिति ॥ मसूराकृतिसंस्थानाः मसूरस्य यथा आकृतिस्तद्वत्संस्थानमाकृतिर्या-

॥ भै० ५८ ॥

स्रांताः ॥ ११२ ॥ अथ पूर्वरूपमाह ॥ तासां पूर्वं ज्वरः कंडूर्गात्रभंगोऽरुचिर्भ्रमः ॥ त्वचि शो
फः सवैवर्ण्यो नेत्ररोगश्च जायते ॥ ३ ॥ अथ वातपायाम सूरिकायालक्षणमाह ॥ स्फो
टाः कृष्णारुणा रूक्षास्तीव्रवेदनयान्विताः ॥ कठिनाश्चिरपाकाश्च भवंत्यनिलसंभ
वाः ॥ ४ ॥ संध्यस्थिपर्वणां भेदः कासः कंपारतिभ्रमः ॥ शोषस्तालोष्ठजिह्वानां तृष्णा
चारुचिसंयुता ॥ ५ ॥ चिरपाका इति विकारप्रभावात् ॥ ४ ॥ ५ ॥ अथ पित्तजायां मसू
रिकायालक्षणमाह ॥ रक्ताः पीताः सिताः स्फोटाः सदाहास्तीव्रवेदनाः ॥ भवंत्य
चिरपाकाश्च पित्तकोपसमुद्भवाः ॥ विड्भेदश्चांगमर्दश्च दाहस्तृष्णारुचिस्तथा
मुखपाकोऽक्षिपाकश्च ज्वरस्तीव्रः सुदारुणः ॥ ६ तीव्रश्चंडवेगः सुदारुणः ब
हुदुःखत्वेनातिदुःसहः ॥ ६ ॥ ७ ॥ अथ रक्तजायां मसूरिकायालक्षणमाह ॥

॥ भै० ५८ ॥

रक्तजायां भवंत्येते विकाराः पित्तलक्षणाः ॥ ५ पित्तलक्षणाः पित्तजमसूरिकातल्लक्ष
णत्वेनोक्ताः ॥ अत्र कफजामसूरिकेव पित्तजाया अनंतरं रक्तजाया उक्तिः पित्त
तल्लक्षणस्याव्यवहितत्वेन सुखग्रहणार्थं ॥ ५ ॥ अथ कफजामसूरिकायाल
क्षणमाह ॥ श्वेताः स्निग्धा भृशं स्थूलाः कंडूरा मंदवेदनाः ॥ मसूरिकाः कफोद्भूता
श्चिरपाकाः प्रकीर्तिताः ॥ ९ ॥ कफप्रसेकः स्तैमित्यं शिरोरुक् गात्रगौरवं ॥ हृल्ला
सारुचिनिद्रालस्यतंद्रालस्यसमन्विताः ॥ १० ॥ अथ सान्निपातिकमसूरिकायाल
क्षणमाह ॥ नीलाश्चिपिटविस्तीर्णा मध्ये निम्ना महारुजाः ॥ पूतिस्रावाश्चि
रपाकाः प्रभूताः सर्वदोषजाः ॥ ११ ॥ चिपिटविस्तीर्णाः चिपिटच्छिद्रउआ इति ख्या
तस्तद्वद्धिताः ॥ १२ ॥ ताः सप्तधातुगताः प्राह ॥ तत्र रसस्था मसूरिकामाह ॥ म

॥४६०॥

सूरिकास्त्वचं प्राप्तास्तोयबुद्बुदसन्निभाः ॥ स्वल्पदोषाः प्रजायंते भिन्नास्तोयं स्रवं
ति च ॥१२॥ त्वचं प्राप्तास्त्वक्शब्देनात्र रस उच्यते ॥ रसाश्रयत्वात् ॥१२॥ अथ र
क्तस्थां मसूरिकामाह ॥ रक्तस्था लोहिताकाराः शीघ्रपाकास्तनुत्वचः ॥ साध्या ना
त्यर्थदुष्टास्तु भिन्ना रक्तं स्रवंति च ॥१३॥ साध्या रक्तस्था इत्यन्वयः ॥ नात्यर्थं दु
ष्टास्तु अत्यर्थदुष्टशोणिताः पुनर्न साध्याः किंतु कष्टसाध्याः ॥१३॥ अथ मांसस्था
मसूरिकामाह ॥ मांसस्थाः कठिनाः स्निग्धाश्चिरपाका घनत्वचः ॥ गात्रशू
ला रतिकंडूमूर्छादाहसमन्विताः ॥१४॥ अथ मेदःस्थां मसूरिकामाह ॥ मेदोजा
मंडलाकारा मृदवः किंचिदुन्नताः ॥ घोरज्वरपरीताश्च स्थूलाः स्निग्धाः सवे
दनाः ॥ संमोहारतिसंतापाः कश्चिदाभ्यो विनिस्तरेत् ॥१५॥ अथास्थिमज्ज ॥४६०॥

गतेमसूरिके प्राह ॥ श्लक्ष्णा गात्रसमा रूक्षाश्चिपिटाः किंचिदुन्नताः ॥ मज्जस्था मसूराः सं
मोहवेदनारतिसंयुताः ॥१६॥ भ्रमरेलोचवविद्धानि कुर्वन्त्यस्थानि सर्वतः ॥ छिंदंति
मर्मधामानि प्राणानाशुहरंति ताः ॥१७॥ गात्रसमाः गात्रतुल्यवर्णाः चिपिटाः
चिपिटाकाराः ॥ मज्जग्रहणेनास्थ्नोपि ग्रहणं ॥ तदाधारत्वात् ॥ अतएवाग्रे भ्रमरे
लोचवविद्धानि कुर्वन्त्यस्थीनि सर्वतइति ॥ मर्मधामानि मर्मस्थानानि ॥१५॥१६॥
अथ शुक्रगतां मसूरिकामाह ॥ पक्वाभाः पिटिकाः स्निग्धाः सूक्ष्माश्चात्यर्थवे
दनाः ॥ स्तैमित्यारतिसंमोहदाहोन्मादसमन्विताः ॥१७॥ शुक्रजया मसूर्यांतु ल
क्षणानि भवंति हि ॥ निर्दिष्टं केवलं चिन्हं जीवनं तु न दृश्यते ॥१८॥ पक्वाभाः प
क्वाकाराः ॥ न तु पक्वाः ॥ सूक्ष्माः कोमलाः ॥ निर्दिष्टं केवलं चिन्हमिति न त्वसा

॥४६१॥

श्चिकित्साउक्ता॥ यतोजीवनंनदृश्यते॥ गंभीरधातुगतदोषदुष्टैः॥१७॥१९॥ सम्प्राप्यतादोषहेतुर्विनानभवंति दोषमंतरेणरसादिदुष्टेरभावादित्याह॥ दोषमिश्रास्तुसर्वैताद्रष्टव्यादोपलक्षणैः॥१९॥ अथचर्मजायामसूरिकायालक्षणमाह॥ कंठरोधारुचिस्तंद्राप्रलापारुचिसंयुताः॥ दुश्चिकित्स्याःसमुद्दिष्टाःपिटिकाश्चर्मसंज्ञिताः॥२०॥ अथरोमांतिकायामसूरिकायालक्षणमाह॥ रोमकूपोन्नतिसमारागिण्यःकफपित्तजाः॥ कासारोचकसंयुक्तारोमांत्योज्वरपूर्विकाः॥२१॥ अथसाध्यायामसूरिकायालक्षणमाह॥ त्वग्गतारक्तगाश्चैवपित्तजाःश्लेष्मजास्तथा॥ श्लेष्मपित्तकृताश्चैवसुखसाध्यामसूरिकाः॥ एताविनाचिकित्सयायाप्रशमंयंतिशरीरिणां॥२२॥ अथकष्टसाध्यायालक्षणमाह॥ ॥४६१॥

वातजा वातपित्तोत्था वातश्लेष्मकृतास्त्रयः ॥ कृछ्रसाध्या यतस्तस्माद्देतायत्नादु
पाचरेत् ॥ २३ ॥ अथासाध्यावातलक्षणमाह ॥ असाध्याः सन्निपातोत्थास्तासां सं
वक्ष्यामि लक्षणं ॥ प्रवालसदृशाः काश्चित्काश्चिज्जंबूफलोपमाः ॥ २४ ॥ तोहना
तसमाः काश्चिच्चतक्षौसीफलसन्निभा ॥ आसां बहुविधा वर्णा जायंते दोषभे
दतः ॥ २५ ॥ आसां प्रवालजंबूफलतोहगुटिका अतसीफलसादृश्यं वर्णेन ॥
अनुक्तवर्णसंग्रहार्थमाह ॥ आसां बहुविधा वर्णा इति ॥ दोषभेदतः वातादिदो
षविशेषात्तद्धिविशेषादित्यर्थः ॥ २४ ॥ २५ ॥ अथापरांचासाध्यामाह ॥ कासो
हिक्का प्रमोहश्च ज्वरस्तीव्रः सुदारुणः ॥ प्रतापारतिमूर्छाश्च तस्मा स्राहोतिघूर्णि
ता ॥ २६ ॥ मुखेन प्रस्रवेत्कंतपाघाणेन चक्षुषा ॥ कंठेघर्घरकं कृत्वा यस्य स

त्पर्यदारुणां॥२४॥मसूरिकाभिभूतस्यपस्यैतानिभिषग्वरैः॥लक्षणानि प्रपश्ये
द्भिनदद्यात्तत्रभेषजं॥२५॥अतिघूर्णितानिम्लायनं॥तथाघ्राणेनचक्षुषेत्यत्र
रक्तंअप्रवेदितिसंबध्यते॥उच्छ्वसतीतिश्वासोभवतीत्यर्थः॥२६॥२७॥२५॥अथ
मसूरिकायाअरिष्टमाह॥मसूरिकाभिभूतोयोभृशंघ्राणेननिःश्वसेत्॥स
भृसंत्यजतिप्राणांस्तृषार्तोवायुदूषितः॥२८॥वायुदूषितःअपतानकादिवा
तव्याधिदूषितः॥२८॥अथमसूरिकादिहेतुकेशोथेविशेषमाह॥मसूरिकां
तेशोथःस्यात्कूर्परेमणिवेधके॥तथांसफलकेवापिदुश्चिकित्स्यःसुदारुणः
३०॥दुश्चिकित्स्यःकष्टसाध्यः॥दुःशब्दोत्रनिषेधे॥तेनासाध्यइत्यके॥३०
अथमसूरिकाभेदस्यशीतलारोगस्यनिदानं॥तत्रशीतलायाःस्वरूपमाह॥४६२॥

देव्याः शीतलयाक्रांतामसूर्य्यैवहि शीतला ॥ ज्वर एव यथाभूताधिष्ठितो विषम
ज्वरः ॥ ३१ ॥ साच सप्तविधाख्याता तासां भेदान्प्रचक्ष्महे ॥ ज्वरपूर्वां बृहत्स्फोटैः
शीतलां बृहतीं भवेत् ॥ ३२ ॥ सप्ताहान्निस्सरेद्देषा सप्ताहात्पूर्णतां व्रजेत् ॥ ततस्तृ
तीये सप्ताहे शुष्यति स्खलति स्वयं ॥ ३३ ॥ यातश्लेष्मसमुद्भूता कोद्रवाकोद्रवाकृ
तिः ॥ तां तु कष्टेन त्वाहः पक्कां सा तु पाकं न गच्छति ॥ ३४ ॥ जलशूके इवांगानि सा वि
ध्यति विशेषतः ॥ सप्ताहाद्द्वादशाहाद्वा शांतिं याति विनौषधं ॥ ३५ ॥ उष्मरागात्
श्मजा रूपा सर्केडुः श्वसनेप्रिया ॥ नाम्ना पापाणिसहाख्याता सप्ताहाच्छुष्यति स्व
यं ॥ ३६ ॥ उष्मजा रूपा उष्मा राजिकातद्रूपा ॥ ३६ ॥ चतुर्थी सर्षपाकारा पीतसर्षप
वर्णिनी ॥ नाम्ना सार्षपिका ज्ञेया ऽभ्यंगमत्र विवर्जयेत् ॥ ३७ ॥ किंचिदुष्मनि

॥४६३॥

मिते न जायते राजिका वृतिः ॥ एषा भवति बालानां सुखं गच्छति च स्वयं ॥ ३५ ॥ एषाः
दुःखकोद्रवा इति लोके ॥ ३५ ॥ कोठवज्जायते षष्ठी लोहितोन्नतमंडला ॥ ज्वरपूर्वा
व्यथायुक्ता ज्वरस्तिष्ठेद्दिनत्रयं ॥ ३६ ॥ एषा मगधदेशे हामस इति प्रसिद्धा ॥ ३९ ॥
स्फोटानां मीलनादेषा बहुस्फोटा च दृश्यते ॥ एकस्फोटेव रूक्षा च चोद्रुव्या चर्म
जाभिधा ॥ ४० ॥ चर्मजाभिधा च मरगोटी इति लोके ॥ ४० ॥ एताः सप्तापि चोद्रुव्याः शी
तलादेव्यधिष्ठिताः ॥ शीतलोचितमाचारमासु सर्वासु चाचरेत् ॥ ४१ ॥ एतासां सा
ध्यत्वादिकमाह ॥ काश्चिद्धि मा प्रियत्नेन सुखं सिद्धंति शीतलाः ॥ दुःसाः कष्टतराः
काश्चित्काश्चित्सिध्यंति वा न वाः ॥ काश्चिन्नैव तु सिध्यंति यत्नतो पि चिकित्सि
ताः ॥ ४२ ॥ इति मसूरिका शीतला निदानं ॥ अथ मसूरिका शीतला चिकित्सा ॥ ४६३ ॥

मसूरिकायांकुष्ठोक्तालेपनादिक्रियाहिता॥पित्तश्लेष्मविसर्पोक्ताक्रियाचात्रप्र
शस्यते॥आर्द्रकस्यरसंदद्याद्दार्द्रकंवापिभक्षयेत्॥कफप्रकोपेघुर्घुरकेकंठरोधे
त्रसत्वरं॥खदिरंत्रिफलारिष्टपटोलामृतवासकैः॥क्वाथोष्टभागोजयतिरोमां
तिकमसूरिकां॥उभाभ्यांहृतदोषस्यविशुध्यंतिमसूरिकाः॥उभाभ्यांमार्गाभ्यांव
मनविरेकाभ्यामित्यर्थः॥निर्विकाराश्चाल्पपूयाःपच्यंतेचाल्पवेदनाः॥निंबः
पर्पटकंपाठापटोलंकटुरोहिणी॥वासादुरालभाधात्रीउशीरंचंदनद्वयं॥एषनिं
वादिकःक्वाथःपीतःशर्करयान्वितः॥मसूरींसर्वजांहंतिज्वरंवीसर्पसंभवं
उत्थितांप्रविशेद्यातुपुनस्तांयाघृतोनयेत्॥इतिनिंबादिक्वाथः॥रालाहिंगुर
सोनैश्चधूपयेत्तांमसूरिकाः॥क्षेमयोनपतंत्यत्रजाताःशाम्यंतितेलघु॥इ

तिधूपः॥श्वेतचंदनकल्काढ्यं हिलमोचीरसं॥पिबेन्मसूरिकारंभे नैवं वा केवलं र
सं॥हिलमोची शाकविशेषः हुरहुर इति लोके॥इति योगद्वयं॥चंदनं वासकोमु
स्तं गुडूची द्राक्षया सह॥एषां सीतकषायस्तु शीतलाज्वरनाशनः॥तासां मध्ये य
दा कांश्चित्स्याकं गत्वा स्तवं तिच॥तत्रावधूलनं कुर्याद्धनगोमयभस्मना॥इत्य
वधूलनं॥मसूर्यो रक्तजा नाशं यांति शोणितमोक्षणात॥शिरीषोदुंबरत्वक्
त्वां खदिरारिष्टजैर्द्दलैः॥कफोत्थास्तु मसूरिकास्तेयः पित्तोत्थितास्तु च॥धात्रीफ
लं समधुकं क्वथितं मधुसंयुतं॥मुखे कंठे व्रणो जाते गंडूषार्थं प्रशस्यते॥प्रलेपं
चक्षुषोर्द्दद्यात् दुंबरस्य वल्कलैः॥पंचवल्कलचूर्णेन तत्केदनी मवधूलयेत्॥
सुषवी पत्र निर्यासं हरिद्राचूर्णसंयुतं॥रोमंतीज्वरवीसर्पव्रणानां शां

तये पिबेत ॥ निर्यासं द्रवं ॥ निंबस्य पत्र शाखाभिर्मक्षिकामपसारयेत ॥ जलं च पश्री
तलं दद्याज्ज्वरे पिन तु तत्र चेत ॥ वहवोभिषजो नात्र भेषजं योजयंति हि ॥ केचि
त्प्रयोजयंत्यत्र तन्मतेनैतदुच्यते ॥ ये शीतलेन सलिलेन विपिष्य सम्यक् चिंचा
जवीजसहितां रजनीं पिबंति ॥ तेषां भवंति न कदाचिदपीह देहे पीडाकरा जग
ति शीतलिका विकाराः ॥ मोचारसेन सहितं शितचंदनेन वासारसेन मधुकं
मधुकेन वाथ ॥ आदौ पिबंति सुमनास्वरसेन मिश्रं ते नान्क वंति भुवि शीत
लिका विकाराः ॥ मधुकेन मधुना ॥ आदौ पूर्वदिने ज्वरागमनमात्रे ॥ वह्नी या
न्निंबपत्राणि परितो भवनांतरे ॥ कदाचिदपि नोकुर्याद्दुच्छिद्रस्य प्रवेशनं
जपहोमोपहारैश्च दानस्वस्त्ययनार्चनैः ॥ विप्रगोपांभुगौरीलांपूजनैलं

॥४६५॥

शमंनयेत् ॥ स्तोत्रंचशीतलादेव्याःपठेच्छीतलिनोंतिके ॥ ब्राह्मणःश्रद्धयायुक्तस्तेनशाम्यतिशीतला ॥ स्तोत्रंस्कंदेशसंवादात्मकंस्कंदोक्तं ॥ शीतलांमृत्तिकारयित्वाजलपात्रेसंस्थाप्यरोगिणां ॥ समीपेधार्या ॥ रुद्राक्षंसमरिचैर्युक्तंपीतंपर्पकषिनोभस्मा ॥ वासरत्रयतोहंतिसमूलांचमसूरिकां ॥ अथपथ्यमाह ॥ पूर्वंलंघनयोतिरेचनशिरावेधाःशशांकोज्यसाजीरणिःषष्टिकशालयोपिचणकामुद्गमसूरायषा ॥ कर्कोटकदलंचशिग्रुरुचकेद्राक्षाफलंदाडिमंमध्येवंहरणमन्नपानमखिलंकोलानिमांसोरसः ॥ अश्नलोःसेकविधौगवेधुमधुकोद्भूतंसशीतोदकंकाटिलंकुलकंपटोरमपिवाकर्पूररयूणानिच ॥ पक्केमुद्गरसोपिजांगलरसःकालंचशाकंघृतंधूपोगोमयंभस्मगुंठनमेपो। तोषेव्रणोक्ताक्रिया ॥ इत्यंसर्वदशाविभागविहितंपथ्यंपथ्यादोषतःसंयुक्तंसु ॥४६५॥

खमातनोतो नितरां न्द्रलुप्तमसूरीगदे ॥ अथापथ्यमाह ॥ वातेस्वेदं भ्रमं तैलं गुर्वन्नं क्रोधमा

तपं ॥ कटूम्लं वेगरोधं च मसूरीगदवांस्त्यजेत् ॥ इति मसूरीशीतलाचिकित्सा ॥ अथ क्षु

द्ररोगनिदानं ॥ तत्र पलितस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह ॥ क्रोधशोकश्रमकृ

तः शरीरोष्मा शिरोगतः ॥ पित्तं च केशान् पचति पलितं तेन जायते ॥ १ ॥ शरीरोष्मा देहा

ग्निनः ॥ पीतं च भ्राजकाख्यं ॥ तच्च शिरोगतं ॥ क्रोधात्कुपितं पित्तं च पचति ॥ शोके न श्र

मेण च कुपितो वायुः शरीरोष्माणं शिरो याप्यति ॥ एकः प्रकुपितो दोषः सर्वानेव प्रको

पयेदिति वचनात् ॥ वातपित्ताभ्यां श्लेष्मा च कुपितः ॥ सरोषकेशानां शौक्ल्यं करोति ॥

एवं त्रयोपि दोषाः पलितस्य हेतवः ॥ पलितं केशशुक्लता ॥ १ ॥ अथेंद्रलुप्तस्य निदानसं

प्राप्तिपूर्वकं लक्षणमाह ॥ रोमकूपानुगं पित्तं वातेन सह मूर्छितं ॥ प्रच्यावयति रो

॥४६६॥

मालिनततःश्लेष्मासृक्शोणितः ॥२॥ रुग्णाधिरोमकूपास्तु ततोऽन्येषामसंभवः । तदिदं तु पुं
स्त्वोलिंगं रुद्ध्येतिच विभावयेत प्राहुश्चाद्येतिचापरे ॥३॥ अथ दारुणकस्य लक्षणमाह
दारुणा कंडुरा रूक्षा केशभूमिः प्रजायते प्रपच्यते ॥ मारुतश्लेष्मकोपेन विद्याद्दारुण
कं हितत् ॥४॥ दारुणा कर्कशा ॥ मारुतश्लेष्मकोपेनेति यद्यप्यत्रोक्तं तथापि पित्तरक्ता
नुबंधोप्यत्र द्रष्टव्य इति मधुकोशाकृत ॥४॥ अथारुंषिकाया लक्षणमाह ॥ अरुंषिब
हुवक्त्राणि बहुक्लेदीनि मूर्द्धनी ॥ कफासृक्कृमिकोपेन तानि विद्यादरुंषिकां ॥५॥ अ
रुंषि व्रणानि ॥५॥ अथ पेरिवेल्लिकालक्षणमाह ॥ पिटिकामुत्तमांगस्थां वृत्तामुग्र
रुजान्वितां ॥ सर्वात्मिकां सर्वलिंगां जानीयात्पारिवेल्लिकां ॥६॥ सर्वात्मिकामित्यने
नैव सर्वलिंगत्वे सिद्धे पुनः सर्वलिंगामिति वचनं विकृतिविषमसमवायात ॥४६६॥

॥४६॥

पि नीरुजं तनुकं श्यावं मुखे व्यंगं तमादिशेत् ॥१०॥ श्यावं मुक्तानविद्रुरूक्ष्मवर्णं ॥ व्यंगं छा
ई इति लोके ॥१०॥ अथ नीलिकालक्षणमाह कृष्णमेवंगुणं वक्त्रे गात्रे वा नीलिकां विदुः
११॥ एवंगुणं नीरुजं तनुकं मंडलं ॥११॥ अथ वल्मीकस्य लक्षणमाह ॥ ग्रीवांसकक्षाक
रपाददेशे संधौ गले वा त्रिभिरेव दोषैः ग्रंथिः स वल्मीकवदक्रियाणां जातः क्रमेणै
वृगतः प्रवृद्धिं ॥१२॥ मुखैरनेकैः श्रुतितोदवद्भिर्विसर्पवत्सर्पति चोन्नताग्रैः ॥ वल्मीक
माहुर्भिषजो विकारं निःप्रत्यनीकं चिरजं विशेषात् ॥१३॥ ग्रीवा कृकाटिका ॥ अंसः
स्कंधः ॥ कक्षा बाहुमूलं ॥ गलः कंठः ॥ वल्मीकवदित्यनेन प्रचुरसिरत्वमुच्चत्वमव
गाढमूलत्वं च सूच्यते ॥ निःप्रत्यनीकं उपचारायोग्यं ॥१२॥१३॥ अथ कक्षागंधा
नाम्नोर्लक्षणमाह ॥ बाहुकक्षांसपार्श्वेषु कृष्णस्फोटां सवेदनां ॥ पित्तप्रकोपसं

॥४६॥

व्यलिंगव्यतिरेकेण प्रत्येकदोषलिंगयुक्ततां व्यापयति ॥ ६ ॥ अथ पनसिकालक्षणमा
ह ॥ कर्णस्याभ्यंतरे जातां पिटिकामुग्रवेदनां ॥ स्थिरां पनसिकां तां तु विद्याद्वातकफो।
त्थितां ॥ ७ ॥ अथ पाषाणगर्दभस्य लक्षणमाह ॥ वातश्लेष्मसमुद्भूतं श्वयथुं हनुसंधि
जः ॥ स्थिरो मंदरुजः स्निग्धो ज्ञेयः पाषाणगर्दभः ॥ ८ ॥ स्थिरः कठिनः ॥ ८ ॥ अथ मुख
दूषिकाया लक्षणमाह ॥ शाल्मलीकंटकप्रख्याः कफमारुतरक्तजाः । जायंते पिटिका।
यूनां ज्ञेया सा मुखदूषिकाः ॥ ९ ॥ प्रख्याः सदृशाः । जायंते पिटिका इत्यत्र युवानपिटि
का इति पाठांतरं ॥ तत्र यूनामाननपिटिका युवानपिटिकाः वृषोदरादित्वाल्लकारस्य
लोपः ॥ एता यूनामेव मुखे एव भवंति स्वभावात् ॥ ९ ॥ अथ व्यंगस्य लक्षणमाह ॥
क्रोधायाससंप्रकुपितो वायुः पित्तेन संयुतः ॥ मुखमागत्य सहसा मंडलं प्रसृजत्य

भूतां कक्षानाम्नीं विनिर्दिशेत् ॥१४॥ कक्षस्फोटां कक्षाः स्फोटाः यस्यामिति कक्षस्फोटां
पिटिकामिति शेषः ॥१४॥ एकामेतादृशीं दृष्ट्वा पिटिकां स्फोटसंन्निभां ॥ त्वग्गतां पित्त
कोपेन गंधनाम्नीं विनिर्दिशेत् ॥१५॥ एतादृशींवाक्यादिषु कक्षस्फोटां सवेदनां ॥ एका
मेतादृशीमिति कक्षैकस्फोटसदृशीमिति तु मधुकोशाकृत ॥१५॥ अथाग्निरोहिणी
लक्षणमाह ॥ कक्षाभागेषु ये स्फोटाजायंते मांसदारुणाः ॥ अंतर्दाहज्वरकरा दीप्त
पावकसन्निभाः ॥१६॥ सप्ताहाद्वा दशाहाद्वा पक्षाद्वा घ्नंति मानवं ॥ तामग्निरोहिणीं
विद्यादसाध्यां सन्निपातजां ॥१७॥ सप्ताहादित्यादिवातपित्तकफाधिक्यापेक्षया।
वोद्धव्यं ॥ घ्नंतीत्यनुपक्रांताः ॥ उपक्रांतास्तु साध्या एव ॥ चरकेणाग्निरोहिणी चिकि
त्साप्युक्तत्वात् ॥१६॥१७॥ अथ विदारिकाया लक्षणमाह ॥ विदारीकंदवद्वृत्तां क

॥४ ६६ ॥

क्षावेक्षणसंधिषु॥ स्त्रोंविदारिकांविद्यांत्सर्वजांसर्वलक्षणां ॥१५॥ विदारीकंदवहृत्तां
पिटिकामितिविशेष्यपदमध्याहरणीयं॥ अत्रसर्वजेत्यभिधायापिसर्वलक्षणे-
तिवचनमिरिवेल्लिकायामिवप्रकृतिसमसमवायजन्यवातादिलक्षणदर्शनार्थं
१५॥ अथचिप्पस्यलक्षणमाह॥ नखमांसमधिष्ठायवातःपित्तंचदेहिनां॥ कुर्वीते।
दाहपाकौचतंव्याधिंचिप्पमादिशेत॥१९॥ चिप्पमंगुलिवेष्टकमितिख्यातं॥१९॥ अथ
कुनखस्यलक्षणमाह॥ अभिघातात्प्रदुष्टोयोनखोरूक्षोसितःखरः॥ भवेत्तंकुनखं
विद्यात्कुलीनंखाभिधानतः॥२०॥ अथपरिवर्त्तिकालक्षणमाह॥ मर्द्दनात्पीडनाद्वा
तितथैवाप्यभिघाततः॥ मेढ्रचर्मयदावायुर्भजतेसर्वतश्चरन॥२१॥ तदावातोपसृ
ष्टंतुतच्चर्मपरिवर्त्तये॥ सवेदनंसदाहंचपाकंचव्रजतिक्वचित॥२२॥ मणेरधस्त ॥४६६॥

श्लोषसुगंधिरूपेणसंवते ॥ मारुतागंतुसंभूतां विद्यातां परिवर्त्तिकां ॥ सकंडूः कठिना चा
पि सैव श्लेष्मसमन्विता ॥२३॥ अतिशब्दो मर्द्दनपीडनाभ्यां संवध्यते ॥ परिवर्त्ततेसर्वतो
विवर्त्तते ॥ कोपः चर्मकोशः ॥ अस्यां वातजायामपि पित्तानुबंधो वोद्धव्यः ॥ दाहपाक
भावात ॥२३॥२३॥२३॥ अथावपाटिकालक्षणमाह ॥ अल्पीयः खां यदा हर्षाद्बलाद्
छेत्त्रियेनरः ॥ हस्ताभिघाताद्थवाचर्मण्युद्वृत्तितेवलात ॥२४॥ मर्द्दनात्पीडनाद्वापि
शुक्रवेगविघाततः ॥ यस्यावपाद्यतेचर्मतां विद्यादवपाटिकां ॥२५॥ वातेनकर्कशारू
क्षा सूक्ष्मा कृष्णा रुगान्विता ॥ पित्तेन पीता रक्ता वा दाहतृष्णासमन्विता ॥ श्लेष्मणाक
ठिना स्निग्धा कंडूमत्यल्पवेदना ॥२६॥ अल्पीयः खां अल्पीयः अल्पतरं खं योनि
छिद्रं यस्यास्तां ॥ अथेहत्वेतरं हस्ताभिघातादित्यादि च ॥ अवपाटते विदीर्यते

॥४६८॥

२४॥२५॥२६॥ अथ निरुद्धप्रकाशस्य च लक्षणमाह ॥ वातोपसेवेमेहेतु चर्म संश्रयते मणिं ॥ मणिश्चर्मोपनधस्तु मूत्रस्रोतो रुणद्धि च ॥२७॥ निरुद्धप्रकरो तस्मिन् मंदधारं सवेदनं ॥ मूत्रं प्रवर्त्ततेजंतोर्मणिर्विव्रियते न च ॥ निरुद्धप्रकशं विंद्यात्सरुजं वातसंभवं ॥२८॥ संश्रयते समग्रं श्रयते तत्रैव लीयत इत्यर्थः ॥ मूत्रस्रोतो रुणद्धि मूत्रं रुणद्धि ॥ सवेदनमित्यस्य स्थाने अवेदनमिति पाठांतरं केचित्पठंति ॥ न विव्रियते विवृतो न भवति ॥ निरुद्धप्रकाशमित्यस्य स्थाने निरुद्धप्रकशं पदमार्षत्वात् २७॥२८॥ अथ सन्निरुद्धगुदस्य लक्षणमाह ॥ वेगसंधारणाद्वायुर्विहतो गुदसंश्रितः ॥ निरुणद्धि महत्स्रोतः सूक्ष्मद्वारं करोति च ॥२९॥ मार्गस्य सौक्ष्म्यात्कृच्छ्रेण पुरीषं तस्य गच्छति ॥ सन्निरुद्धगुदं व्याधिमेतं विद्यात्सुदुस्तरं ॥३०॥ म

४६८॥

हतस्रोतः गुदयिवरं ॥ निरुद्धप्रकाशं दद्यात्रापि च मर्मसंकोचात्सन्निरुद्धगुदः ॥ २दी ३०

अथ वृषणकच्छूलक्षणमाह ॥ स्नानोत्सादनहीनस्य मलो वृषणसंश्रितः ॥ प्र

क्लिद्यते यदा स्वेदात्कंडुं संजनयेत्ततः ॥ ३१ ॥ ततः कंडूयनात्क्षिप्रं स्फोटः स्रावश्च जा

यते ॥ प्राहुर्वृषणकच्छूं तां श्लेष्मरक्तप्रकोपजां ॥ ३२ ॥ उत्सादनं उद्वर्तनं ॥ प्रक्लिद्यते आ

र्द्रो भवति ॥ एषा च निदानविशेषात्स्थायो वृषणाश्रायित्वात् ॥ विशिष्टचिकित्सा

योगित्वाच्च कुष्ठोक्तकच्छुतो भेदेन पठ्यते ॥ ३१ ॥ ३२ ॥ अथाहिपूतनस्य लक्षणमा

ह ॥ शकृन्मूत्रसमायुक्तो धौतेऽपाने शिशोर्भवेत् ॥ स्विन्ने वाऽस्नाप्यमाने वा कंडू रक्त

कफोद्भवा ॥ ३३ ॥ कंडूयनात्ततः क्षिप्रं स्फोटाः स्रावश्च जायते ॥ एकीभूतं व्रणं घोरं तं

विद्यादहिपूतनं ॥ ३४ ॥ अपाने गुदे स्विन्ने स्वेदवति ॥ अस्नाप्यमाने अक्रियया

॥४७०॥

मारणप्रक्षालने॥स्वेदमर्मसेकादादेवकंडूर्भवति॥अयं बालानामेव भवति॥३३॥३४॥अथ
गुदभ्रंशस्य लक्षणमाह॥प्रवाहणातिसाराभ्यां निर्गच्छति गुदं वहिः॥रूक्षदुर्बलदे
हस्य तं गुदभ्रंशमादिशेत॥३५॥प्रवाहणं प्रकर्षेणाकुंथनं॥अत्र चोत प्रकोपो रो
गः॥प्रवाहणस्यातिसारकेत धातुक्षयस्य च वातप्रकोपहेतुत्वात॥३५॥अथ पा
यूकरदंष्ट्रस्य लक्षणमाह॥सदाहो रक्तपर्यंतस्त्वक्पाकी तीव्रवेदनः॥कंडूमा
न्ज्वरकारी च स स्यात्सूकरदंष्ट्रकः॥३६॥सगुदभ्रंशः॥३६॥अथानुशयीलक्ष
णमाह॥गंभीरामल्पसंरंभां सवर्णामुपरिस्थितां॥पादस्यानुशयीं तां तु वि
द्यादंतःप्रपाकिनीं॥३७॥अत्र पिडिकामिति विशेष्यपदमध्याहरणीयं॥गंभी
रा मतः पाकेन॥३७॥अथालसस्य लक्षणमाह॥क्लिन्नांगुल्यंतरे पादौ कंडूदाह

ल ॥४७०॥

रुजान्वितौ ॥ दुष्टकर्दमसंस्पर्शादलसं तं विभावयेत् ॥ ३७ ॥ खातसंकदई इति लोके ॥ अ
त्रकंडूः कफेन दाहरुजे रक्तेनेति ज्ञेयं ॥ ३८ ॥ अथ दार्य्यालक्षणमाह ॥ परिक्रमण
शीलस्य वायुरत्यर्थं रूक्षयोः ॥ पादयोः कुरुते दारीं सरुजां तलमाश्रितां ॥ ३९ ॥ परि
क्रमणं पादविहरणं ॥ दारीं दारणमात्रं ॥ ३९ ॥ अथ कदरस्य लक्षणमाह ॥ शर्करो
न्मथिते पादे क्षते वा कंटकादिभिः ॥ ग्रंथिः कीलवदुत्सन्नो जायते कदरं तु सः ॥ ४०
शर्कराऽत्र वालुका ॥ कीलवत् तीक्ष्णद्रव्यवदुन्नत ॥ कीलवदित्यत्र कीलवदित्यपि पाठांत
रं ॥ कदरं हस्तेपि भवतीति मधुकोशव्याकृत ॥ ४० ॥ अथ तिलकालकानां लक्षणमा
ह ॥ कृष्णानि तिलमात्राणि नीरुजानि समानि च ॥ वातपित्तकफोद्रेकात् तान्वि
द्यात्तिलकालकान् ॥ ४१ ॥ समानि अनुद्भूतानि ॥ इमे तिला इति लोके प्रसिद्धाः ॥ ४२

॥४७१॥

अथ मषकस्य लक्षणमाह ॥ अवेदनं स्थिरं चैव यस्तु गात्रेषु दृश्यते ॥ माषवत्कृष्णमुत्स
न्नमनिलान्मषकं दिशेत् ॥४२॥ स्थिरं अचलं ॥ अत्र चकारेण कफमेदसी समुच्चीय
ते ॥ तथा च भोजः ॥ वातेरितेत्वचि यदा दृष्येते कफमेदसी इति ॥४२॥ अथ जतुमणेर्लक्ष
णमाह ॥ सममुत्सन्नमरुजं मंडलं कफरक्तजं ॥ सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिस्त
तः ॥४३॥ श्लक्ष्णः स्निग्धो जतुमणिर्ज्ञेयो वातोत्तरैस्त्रिभिः ॥ अरुजं शरीरेणत्वपरे र
क्तं लक्ष्मेत्याहुर्भिषग्वराः ॥४४॥ समं समवर्णं मसृणं वा उत्सन्नं किंचिदुद्धृतं ॥ सह
जं शरीरेण सहजातं ॥ तन्मतः प्रयत्नमित्यर्थः ॥ एवंविधं यन्मंडलं जतुमणिर्लक्ष्यः
लक्ष्म चैकेषामिति एकेषामाचार्याणां मते तन्मंडलं लक्ष्म संज्ञं च ॥ अथापरे पुन
र्जतुमणिलक्षणो भेदकलक्षणमाहुः श्लक्ष्ण इत्यादि ॥४३॥४४॥ अथ न्यच्छस्य ॥ ॥४७१॥

लक्षणमाह ॥ मंडलं महदल्पं वा श्यावं वा यदि वासितं ॥ सहजं नीरुजं गात्रे न्यच्छं तदभिधी-
यते ॥४५॥ असितं कृष्णं ॥ सहजं जन्मतः प्रवृत्तं ॥ अस्य पर्य्यायो लांछनमिति ॥ अत्र भो-
जवचनात्पित्तरक्तान्वितो वायुः कारणं योद्व्य इति मधुकोशाकृत ॥ अस्य श्यावत्वप-
क्षे मुखेतरदेशाल्पवसंभवेन बहुलत्वेन च व्यंगाद्भेदोऽवगंतव्यः ॥४५॥ अथ पद्मिनी-
कंटकस्य लक्षणमाह ॥ कंटकैराचितं वृत्तं कंडूमत्पांडुमंडलं ॥ पद्मिनीकंटकप्रख्यैस्तदा-
ख्यं कफवातजं ॥४६॥ पद्मिनीकंटकप्रख्यैः पद्मिनीनालकंटकसदृशैः ॥ तदाख्यं पद्मि-
नीकंटकनामकं ॥४६॥ अथाजगल्लिकाया लक्षणमाह ॥ स्निग्धा सवर्णा ग्रथिता
नीरुजा मुद्गसन्निभा ॥ कफवातोत्थिता ज्ञेया बालानामजगल्लिका ॥४७॥ ग्रथिता गुं-
फितेव ॥ मुद्गसन्निभा मुद्गाकृतिः ॥४७॥ अथ यवप्रख्याया लक्षणमाह ॥ यवाकार

॥ ४७२ ॥

सकठिना गूढ्थिता मांससंश्रिता ॥ पिडिका श्लेष्मवाताभ्यां यवप्रख्येति सोच्यते ॥ ४५ ॥ य
वाकारा मध्ये स्थूला प्रान्ते कृशा ॥ ४५ ॥ अथांधालजीलक्षणमाह ॥ घनावमुखरहितां क्रां
पिडिकामुन्नतां परिमंडलां ॥ अंधालजीमल्पपूयां तां विद्यात्कफवातजां ॥ ४६ ॥ घनां कठि
नां ॥ परिमंडलां वर्तुलां ॥ इयंत्वायुगतामोजवचनादवगंतव्येति मधुकोशकृत ॥ ४६ ॥ अ
थ विवृतालक्षणमाह ॥ विवृतास्यां महादाहां पक्कोदुंबरसन्निभां ॥ विवृतां नाम तां वि
द्यात्पित्तोत्थां परिमंडलां ॥ ५० ॥ परिमंडलां परितःशोथवती ॥ पित्तेनाधिकपाकाद्वि
वृतमुखतया विवृता संज्ञा ॥ ५० ॥ अथेंद्रवृद्धाया लक्षणमाह ॥ पद्मकर्णिकवन्मध्ये
पिडिकां पिडिकाचितां ॥ इंद्रवृद्धां तु तां विद्याद्वातपित्तोत्थितां भिषक् ॥ ५१ ॥ पद्मक
र्णिवत्पद्मफलाधारोपमां ॥ पिडिकाचितां किंजल्कवत्क्षुद्रपिडिकाचितां

॥ ४७२ ॥

५१ ॥ अथ गर्दभिकालक्षणमाह ॥ मंडलं वृत्तमुत्सन्नं सरक्तं पिटिकाचितं ॥ रुजाकरीं गर्दभिकां
तां विद्याद्वातपित्तजां ॥ ५२ ॥ अथ जालगर्दभस्य लक्षणमाह ॥ विसर्पवत् सर्पति यः शो
थस्तनुरपाकवान् ॥ दाहज्वरकरः पित्तात्स ज्ञेयो जालगर्दभः ॥ ५३ ॥ अपाकेयान् ईषत्पा
कवान् ॥ पित्तकृतत्वेन सर्वथा पाकाभावस्यायुक्तत्वात् ॥ अपनाग्नियात् इति ख्यातः
५३ ॥ अथ कछपिकालक्षणमाह ॥ गूथिता पंचवा षड्वा दारुणाः कछपोन्नताः ॥ कफा
निलाभ्यां पिटिकाज्ञेयाः कछपिका बुधैः ॥ ५४ दारुणाः कठिनाः ॥ कछपोन्नताः कछ
पवन्मध्ये प्रोन्नताः ॥ मध्योन्नतत्वेन पर्यंतनतत्वेन च कछपिका संज्ञा ॥ ५४ ॥ अथ श
र्करार्बुदस्य लक्षणमाह ॥ प्राप्य मांससिरास्नायुं मेदः श्लेष्मा तथानिलः ॥ ग्रंथिं
करोत्यसौ भिन्नो मधुसर्पिर्वसानिभं ॥ ५५ ॥ अथ त्वाख्या वृतमत्यर्थं तत्र वृद्धिं गतोऽनि

लेः॥ मांसं विशोष्य गूथितां शर्करां जनयत्यतः ॥५६॥ दुर्गंधि क्लिन्नमत्यर्थं नानावर्णं ता
तः क्लिराः॥ स्रवंति सह सा रक्तं तं विद्यात् शर्करार्बुदं॥५७॥ अत्र कफानिलो दोषौ मांसशि
रास्नायुमेदांसि दूष्याणि॥ तत्र वृद्धिंगतो निल इति पूर्वमेवतावद्वृद्धो निलो धातुक्षये
णतु वृद्धिं अतिशयेन गत इत्यर्थः॥ शर्करार्बुदं चास्तु क्कातुल्यत्वात्॥५५॥५६॥५७॥
अथ प्रसुप्तेर्लक्षणमाह॥ वायुनादीरितः श्लेष्मा त्वचं प्राप्य विशुष्यति। ततस्त्वग्जायते
पांडुः क्रमेणच विचेतना॥ अल्पकंडूरविक्लेदा सा प्रसुप्तिः प्रकीर्तिता॥५८॥ उदीरितः
प्रेरितः॥ अविक्लेदा लक्ष्णा॥ इति संक्षेपेण चतुश्चत्वारिंशत् क्षुद्रिकाराः क्षुद्ररोगनामानः
अत्र क्षुद्रशब्दो रौद्रे वर्तते यथा अपि क्षुद्रा मृगा यत्र शांतैश्चरंति समं मृगैरिति॥ ते
न क्षुद्ररोगा रौद्ररोगा इत्यर्थः॥ भोजे तु मूषिकाकर्णिमुष्ककोशफलार्शः प्रभृतयोऽधि ॥६७३॥

काः पठ्यंते ते च सुश्रुते विकारस्थानां स्यादननुमता एव ॥ ५५ ॥ अथ सहेतुकान् सलक्षणा
न् कतिचिद्विकारानाह ॥ शक्तस्य चाप्यनुत्साहः कर्मण्यालस्यमुच्यते ॥ अस्वस्थचित्तता
स्वंतमरतिः कथ्यते बुधैः ॥ ५९ ॥ उत्क्लिश्यान्नं च निर्गच्छेत् प्रत्येकष्ठीवनेरितं ॥ हृदयं पी
ड्यते चास्य तमुत्क्लेशं विनिर्दिशेत् ॥ ६० ॥ वक्त्रे मधुरता तंद्रा हृदयोद्वेष्टनं भ्रमः ॥ न चान्नं
रोचते यस्य ग्लानिं तस्य विनिर्दिशेत् ॥ ६१ ॥ ग्लानिरोजःक्षयाद्दुःखादजीर्णाच्छ्रमः मा
द्भवेत् ॥ ६२ ॥ उदानकोपादाहारसुस्थिरत्वाच्च यद्भवेत् ॥ पवनस्योर्ध्वगमनं तमुद्गारं
प्रचक्षते ॥ ६३ ॥ आटोपो गुडगुडाशब्दः प्रोक्तो जठरसंभवः ॥ तमस्यस्येव प्रज्ञानं तत्तमः
कथ्यते बुधैः ॥ ६४ ॥ इति हृद्रोगनिदानं ॥ अथ हृद्रोगचिकित्सा ॥ तत्र पलितस्य ।
चिकित्सा ॥ लोहचूर्णस्य कर्षं तु दाडिमाद्भूच्च्वूतमज्जतः ॥ धात्रीफलद्वयं पथ्ये द्वे त

॥४७४॥

पैकं विभीतकं ॥ पिष्ट्वा लोहमये भांडे स्थापयेन्निशि वासयेत् ॥ लेपोयमचिराद्द्धुंतिपलितं ने
ह संशयः ॥ दशांद्धुतु पंचकर्षीलि ॥ इति लोहादिलेपः ॥ इंद्रवारुणिकाबीजैस्तैलेनाभ्यंगमा
चरेत् ॥ प्रत्यहं तेन कालालि संन्निभाः कुंतलाः स्युरहात् ॥ लोहकिट्टजयापुष्पामलकैः स्ना
ति यो नरः ॥ पलितं तस्य वै नस्यात्सुरवेक्रस्मायते यथा ॥ यथा यथावत् ॥ अयोरजो भृंग
राज त्रिफला कृष्णमृत्तिका ॥ स्थितमिक्षुरसे मासं लेपनात्पलितं जयेत् ॥ माजूफलं प
लैकं च तद्द्वितामूजं मलं ॥ स्फटिका दशगुंजाश्च तद्द्धिनवसादरं ॥ अर्द्धांशनवसार
स्य तु स्यकं परिनिक्षिपेत् ॥ पक्वा माजूफलं तैले संक्षुद्यैकत्र योजयेत् ॥ धात्रीरसेन
संपिष्टं लेपात्कृष्णीकरं परं ॥ एभुलेपेषु कर्त्तव्यं वेष्टनं चार्द्रपत्रकैः ॥ कृत्वा रात्रौ दि
वा स्नानं युक्तिरेषा प्रशस्यते ॥ माजूफलं तिलतैलेगोरणी षंडे वेष्टयित्वा भर्जित

॥४७४॥

व्यं ॥ अत्र पेषणं लोहमर्द्दकेन लोपात्रे धात्रीरसं दत्वा कर्त्तव्यं ॥ आर्द्रपत्राण्पत्रैरंडस्यैव
ग्राह्याणि दिवा स्नानं च तिलामलककल्केनैव लिह्यात्कुर्यादिति विवेकः ॥ इति मांजूफ
लादिलेपः ॥ काश्मगंभारिर्य्यमूलमादौ सहचरकुसुमं केतकस्यापि मूलं लोहचूर्णं स
मंगं त्रिफलफलयुतं तैलमेभिः पचेयुः ॥ कृत्वा लोहस्य भांडे क्षितितलनिहितं स्था
पयेन्मासमेकं केशाः काशप्रकाशा अतिमधुपनिभा अस्य योगाद्भवंति ॥ इति काश्म
र्य्यादितैलं ॥ अथेंद्रलुप्तचिकित्सा ॥ तिक्तपटोलीपत्रस्वरसैर्घृष्टाशमं याति ॥ चिरका
लजाऽपि रूढ्या नियतं दिवसत्रये रौप्य ॥ गोक्षुरतिलपुष्पाणि तुल्ये च मधुसर्पिषी
शिरः प्रलेपयेत्तेन केशैः समुपचीयते ॥ हस्तिदंतमषीं कृत्वा छागीदुग्धं रसांजनं ॥ लो
मारण्यपनेन जायंते पादपाणितलेष्वपि ॥ पक्षीं देवरमह्रीकातैलाज्यक्षीरलेपनैः

॥४७५॥

इंद्रलुप्तं शमं याति केशाः स्युर्घना दृढाः॥ जातीकरंजयहूलाकरवीराग्निपाचितं॥ तैल
मभ्यंजनाद्धन्यादिंद्रलुप्तं न संशयः॥ स्नुही पयः पयोर्कस्य लांगली मार्कवो विषं॥ अजामू
त्रं सगोमूत्रं रक्तिका सेंद्रवारुणी॥ सिद्धार्थकस्तीक्ष्णगंधा सम्यगेभिर्विपाचितं॥ तैलंभ
वेतु नियमात्खालित्यव्याधिनाशनं॥ अथ दारुणकस्य चिकित्सा॥ कार्य्यो दारुणके
मूर्द्धि प्रलेपो मधुसंयुतः॥ प्रियालवीजमधुककुष्टमाषैः ससैंधवैः॥ आम्रवीजं तथा
पथ्या द्वयं स्यान्मात्रया समं॥ दुग्धेन पिष्टं तल्लेपो दारुणं हंति दारुणं॥ दुग्धेन खा
खसं वीजं प्रलेपाद्दारुणं जयेत्॥ गुंजाफलैः शृतं तैलं भृंगराजरसेन वा॥ कंडूदारु
णा हृत्कुष्टकफलव्याधिनाशनं॥ जैपालवीजमधुकैः कुष्टमाषैः ससैंधवैः॥ कार्य्यो
दारुणके मूर्द्धि प्रलेपो मधुसंयुतः॥ भृंगराजरसेनैव लोहकिट्टं फलत्रिकं॥ सारि

॥४७५॥

वाचपचेत्कल्कैस्तैलं दारुणनाशनं ॥ अकालपलितं कंडूं मिंद्रलुप्तं च नाशयेत् ॥ अथाहं
चिकायाश्चिकित्सा ॥ नीलोत्पलस्य किंजल्को धात्रीफलसमन्वितः ॥ यष्टीमधुकं पु
त्तश्चलेपो हन्यादहंषिकां ॥ त्रिफलायो रजो यष्टीमार्कवोत्पलसारिवा ॥ सैंधवं पक्क
मैतैस्तैलं हन्यादहंषिकां ॥ पुराणमथ पिण्याकं पुरीषं कुक्कुटस्य च ॥ मूत्रपिष्टः
प्रलेपोयं हन्याच्छीघ्रमहंषिकां ॥ हरिद्राद्वयं मंजिष्ठा त्रिफलारिष्टचंदनैः ॥ सिद्धं तै
लमहंषीरोगं मेतदभ्यंजने हितं ॥ अथ पैरिवेल्लिकाचिकित्सा ॥ पैत्तिकस्य विसर्पस्य या
चिकित्सा प्रकीर्त्तिता ॥ तथैव भिषगेतां चैकित्सेत्परिवेल्लिकां ॥ मधुलैषघसिद्धेन।
सर्पिषा चजयेद्रुजं ॥ अथ पनसिकाचिकित्सा ॥ भिषक्पनसिकां पूर्वं स्वेदयेदथ
लेपयेत् ॥ कल्कैर्मनःशिलाकुष्ठनिशातालकदारुजैः ॥ पक्कां विस्राव्य तां भित्वा व्र

चि

णवत्समुपाचरेत् ॥ अथ पाषाणगर्दभस्य चिकित्सा ॥ पाषाणगर्दभं पूर्वं स्वेदयेत्कुशलो भि
षक् ॥ ततः पनसिकाप्रोक्तैः कल्कैर्दद्रुघ्नैरुपाचरेत् ॥ वातघ्नैश्चकशोथघ्नैः कल्कैरेनं प्रलेप
येत् ॥ परिपाकगते भिन्ने व्रणवत्समुपाचरेत् ॥ जलौकाभिर्हृते रक्ते स शाम्यति विनौषधं
एतत्स्य लेखुवहुखुप्रेक्षितं त्रिखितं ततः ॥ अथ मुखदूषिकाया चिकित्सा ॥ लोध्रधान्यव
चालेपात्तारुण्यपिटिकापहः ॥ तद्वद्गोरोचनायुक्तं मरिचं मुखलेपनात् ॥ सिद्धार्थकव
चालोध्रसैंधवैश्च प्रलेपनं ॥ मुखरोगांतिहंत्याशु पिटिकां यौवनोद्भवां ॥ केचेलाः पयसा
पिष्टातीक्ष्णाः शाल्मलिकंटकाः ॥ आलिप्तं अहमेतेन भवेत्पद्मोपमं मुखं ॥ अंगुलस्य च
तुर्यांशो मुखे लेपः कनिष्ठिकः ॥ मध्यमस्त्रिभागः स्यादुत्तमोर्द्धांगुलो भवेत् ॥ स्विन्तिक्क
लो पित्तस्योक्तो पायत्कल्को न प्रुष्यति ॥ पुष्कस्तु गुरणाहीनः स्यात्पादूषयतिल्वचं ॥

अथ व्यंगस्य नीलिकायाश्च चिकित्सा ॥ शिरावेधैः प्रलेपैश्च तथाभ्यंगैरुपाचरेत् ॥ व्यंगं चा
नीलिकां चापि न्यच्छं च तिलकालकं ॥ वटांकुरा मसूराश्च प्रलेपाद्व्यंगनाशनाः ॥ व्यंगे मंजिष्ठ
यालेपः प्रशस्तो मधुकस्य वा ॥ अथवा लेपनं शस्तं शशस्य रुधिरेण च ॥ व्यंगहृद्धरणीत्वक्
स्याद्दुग्धा मूत्रेण पेषिता ॥ जातीफलस्य लेपस्तु हरेद्व्यंगं च नीलिकां ॥ अर्कक्षीरहरिद्राभ्यां
मर्दयित्वा प्रलेपनात् ॥ मुखकार्ष्ण्यं शमं याति चिरकालोद्भवं ध्रुवं ॥ मसूरैः क्षीरसंपिष्टैर्लि
प्तमास्यं घृतान्वितैः ॥ सप्तरात्राद्भवेत्सत्यं पुंडरीकदलोपमं ॥ वटस्य पांडुपत्राणि मालती
रक्तचंदनं ॥ कुष्ठं कालीयकं लोध्रं एभिर्लेपं प्रयोजयेत् ॥ युवानपिडिकानां तु व्यंगानां चा
विनाशनं ॥ स्यादेतेन मुखं चापि वर्जितं नीलिकादिभिः ॥ कुंकुमं चंदनं लोध्रं तगरं रक्त
चंदनं ॥ कालीयकमुशीरं च मंजिष्ठा मधुयष्टिका ॥ पत्रकं पद्मकं पद्मकेशरं गोरोचनं

॥ ५०७ ॥

निशा ॥ लाक्षा दारुहरिद्रा च गैरिकं नागकेसरं ॥ पलाशकुसुमं चापि प्रियंगुश्च वटांकुराः ॥
मालती च मधूच्छिष्टं सर्षपाः सुरभिर्वचा ॥ चतुर्गुणपयः पिष्टैरेतैर्लक्षमीतैः पचेत् ॥ प
चेन्मंदाग्निना वैद्यस्तैलं प्रस्थद्वयोन्मितं ॥ वदनाभ्यंजनादेतद्व्यंगं नीलिकपासहृ ॥ तिल
कं माषकं न्यच्छं नाशयेन्मुखदूषिकां ॥ पद्मिनीकंटकं चापि हरेज्जतुमणिं तथा ॥ विद
ध्याद्वदनं पूर्णचंद्रमंडलसुंदरं ॥ तैलप्रस्थद्वयोन्मितमित्यत्र तैलं प्रस्थप्रमाणमित्य
पि पाठांतरं ॥ इदमेवयुक्तमिति भाति ॥ इति कुंकुमादितैलं ॥ मुद्गाश्च खहरिद्राभ्यां रक्त
चंदनकैस्तथा ॥ पेषयित्वा जलेनैव लेपं कुर्यात्ततो मुखे ॥ मुखं कार्ष्ण्यं शमं याति नील
व्यंगादिकं जयेत् ॥ अथ वल्मीकस्य चिकित्सा ॥ पाणिपादोत्थवल्मीकं क्षाराग्नि
भ्यां प्रसाधयेत् ॥ विधाने मार्गदीक्षेन शोधयित्वा च रोपयेत् ॥ संशोध्य पडुष्टमांसा ॥ ५०७ ॥

संशुद्धिं तां तु रूक्षां परित्यजेत् ॥ निरूहलां निरूहबस्तिं ॥ अथ विदारिकाचिकित्सा ॥ वि
दारिकायां प्रथमं जलौकायोजनं हितं ॥ पाटनं च विपक्कायां ततो व्रणविधिः स्मृ
तः ॥ अथ चिप्पस्य चिकित्सा ॥ चिप्पं रुधिरमोक्षेण शोधनेनाप्युपाचरेत् ॥ श
स्त्रेणापि यथायोग्यमुच्छिद्य स्नापयेत्ततः ॥ व्रणोक्तेन विधानेन रोपयेत विचक्ष
णः ॥ स्वरसेन हरिद्रायाः पात्रे कृत्वायसे भयां ॥ घृष्टातज्जेन कल्केन लिपेच्चिप्पं
पुनः पुनः ॥ काश्मर्याः सप्तभिः पत्रैः कोमलैः परिवेष्टितैः ॥ अंगुलीवेष्टकः पुंसां ध्रु
वमेवाशु प्रशाम्यति ॥ अथ कुनखस्य चिकित्सा ॥ श्लेष्मविदग्धपित्तस्थेन कुनखं समुपा
चरेत् ॥ नखकोटिप्रविष्टेन टंकणेन न शाम्यति ॥ कुनखश्चेत्तदा शैलः सलिलेश्मव
ते पि च ॥ अथ परिवर्त्तिकाचिकित्सा ॥ परिवर्त्तां घृताभ्यक्तां स्वस्विन्नामुपनाहयेत्

॥ ५७८ ॥

निक्षारेण प्रतिसारयेत् ॥ व्रणं विष्णुदं विज्ञाय रोपयेन्मतिमान भिषक् ॥ मनःशिलाल
मद्यात सूक्ष्मैलागुरुचंदनैः ॥ जातीपल्लवयष्टीकैश्च निंबतैलं विपाचयेत् ॥ वल्मीकं नाश
येतद्धियकुछिद्रं यकुव्रणं ॥ तंदुलीय अपामार्गसमूलं च समाहरेत् ॥ दग्ध्वा क्षारं प्रकु
र्वीत पादांशं सर्जिकां क्षिपेत् ॥ शुक्तिचूर्णं च प्रक्षिप्य वस्त्रपूतं समाचरेत् ॥ क्षारेण
प्रच्छदं दत्वा लेपं कुर्यात्प्रयत्नतः ॥ मांसवृद्धिं हरत्येष चिरकालोद्भवं व्रणं ॥ पाणिपा
दोपरिष्टात्तु छिद्रैर्बहुभिरावृतं ॥ वल्मीकं पल्लवप्रोक्तं स्याद्वर्ज्यं तद्धि विजानता ॥ अथ पक
क्षांगंधनाम्न्यो श्चिकित्सा ॥ कक्षां च गंधनाम्नीं च चिकित्सेत चिकित्सकः ॥ पैत्तिकस्य
विसर्पस्य क्रियया पूर्वमुक्तया ॥ अथाग्निरोहिण्या चिकित्सा ॥ पित्तविसर्पविधिना
साधयेदग्निरोहिणीं ॥ रोहिण्यां लंघनं कुर्याद्रक्तमोक्षं निरूहणं ॥ शरीरस्य चा

त्रिरात्रं पंचरात्रं वा वातघ्नैः शाल्वणादिभिः ॥ ततोभ्यज्य शनैश्चर्म नाञ्ययेत्पीडयेन्मणि
प्रविष्टे च मणि मणौ स्वेदयेदुपनाहनैः ॥ दद्याद्वातहरान्वस्तीन् स्निग्धान्यन्नानि भो
जयेत् ॥ अथावपाटिकाचिकित्सा ॥ स्नेहस्वेदैरिमां वैद्यश्चिकित्सेदवपाटिकां ॥ अथा
निरुद्धप्रकाशस्य चिकित्सा ॥ निरुद्धप्रकशे नाडीं लौहीमुभयतोमुखीं ॥ दारवीं वा जतु
कृतां घृताक्तां संप्रवेशयेत् ॥ परिषिंचेद्वसां मज्जां शिशुमारवराहयोः ॥ चक्रतैलं तथा
योज्यं वातघ्नद्रव्यसंयुतं ॥ त्र्यहात्स्थूलतरां सम्यक् नाडीं गर्भे प्रवेशयेत् ॥ स्रोतो वव
र्द्धयेदेवं स्निग्धमन्नं च भोजयेत् ॥ भित्वा वा सेवनीं युक्त्या सद्यः क्षतवदाचरेत् ॥ अ
थ सन्निरुद्धगुदस्य चिकित्सा ॥ सन्निरुद्धगुदे तैलैः सेको वातहरैर्हितः ॥ तथा निरु
द्धप्रकशक्रियापि कथिता हिता ॥ अथ वृषणकच्छूचिकित्सा ॥ सर्जीहकुष्ठसैंध

॥४७९॥

यसितसिद्धार्थैः प्रकल्पितो योगः ॥ उद्वर्तनेन नियतं शममयति चषलास्य कंडूतिं ॥ भिष
क्कु चषलाक्छूं तु चिकित्सेत्पामरोगवत् ॥ अहिपूतननिर्दिष्टक्रियया पापिचतां हरेत्
अथाहिपूतनस्य चिकित्सा ॥ तत्र संशोधनैः पूर्वं धात्रीस्तन्यं विशोधयेत् ॥ खदिर
त्रिफलाक्वाथैर्व्रणानां क्षालनं हितं ॥ शंखसौवीरयष्ट्याह्वैर्लेपः कार्य्योहिपूतने
अथ गुदभ्रंशस्य चिकित्सा ॥ गुदभ्रंशे गुदं स्विन्नं स्नेहेनाक्तं प्रवेशयेत् ॥ प्रविष्टं रो
धयेद्यत्नाद्गव्यसच्छिद्रचर्मणा ॥ पद्मिन्याः कोमलं पत्रं यः खादेच्छर्करान्वितं ॥ ए
तन्निश्चित्य निर्दिष्टं न तस्य गुदनिर्गमः ॥ मूषकाणां वसाभिर्वा गुदभ्रंशे प्रलेपनं
सुस्विन्नमूषकामांसेनाथवा स्वेदयेद्गुदं ॥ वृक्षाम्लानलसचांगेरीविल्वपाठायवाग्र
जं ॥ तक्रेणाप्लीलयेदाशु भ्रंशार्त्तोनलदीपनं ॥ मूषकान्दशमूलानि गृह्णीयाद्

॥४७९॥

मयंसमं । तयोः क्वाथेन कल्केन पचेत्तैलं यथोदितं ॥ अभ्यंगात्तस्य तैलस्य गुदभ्रंशो विन
श्यति ॥ विनश्यति तथा नेत्रगुदस्थूलं भगंदरं ॥ अथ चक्रकदंष्ट्रस्य चिकित्सा ॥ भृंगराज
कमूलस्य रजन्या सहितस्य च ॥ चूर्णं तु सहसा लेपाद्धाराहद्विजनाशनं ॥ राजीवमूलकल्कः
पीतो गव्येन सर्पिषा प्रातः ॥ शमयति पूकेरदष्ट्रदंष्ट्रोद्भूतं ज्वरं घोरं ॥ रजनीं मार्कवं मू
लं पिष्टं शीतेन वारिणा ॥ तद्धेपाद्भुति यो सर्पं वाराहदष्ट्रानां द्वयं ॥ अथ पानुशायी चि
किल्सा ॥ हरेदनुशायीं वैद्यः क्रियया श्लेष्मविद्रधेः ॥ अथालसस्य चिकित्सा ॥ पादे
सिक्कारनालेन लेपनं त्वलसे हितं ॥ पटोलकुनटीनिंबरोचनामरिचैस्तिलैः ॥ क्ष्णस्न
स्य रससिद्धेन कटुतैलेन लेपयेत् ॥ ततः कासीसकुनटीतिलचूर्णेन धूलयेत् ॥ क
रंजं रजनी चैव कासीसं पद्मकं मधु ॥ रोचना हरितालं च लेपोयमलसे हरेत् ॥ अ

॥ ४८० ॥

पददार्य्याश्चिकित्सा ॥ पाददार्य्यां शिरां प्राज्ञो मोक्षयेत्तलशोधनीं ॥ स्नेहस्वेदोपपन्नौ च
पादावालेपयेन्मुहुः ॥ मधूच्छिष्टवसा सर्जघृतक्षारविमिश्रितैः ॥ क्षारो यवक्षारः ॥
सर्जो वृक्षसिंधूद्भवपेष्यलेपं मधुघृतप्लुतं ॥ निर्मर्द्ध्य कटुतैलाक्तं हितं पाददप्रमार्ज
नं ॥ मधुमधुसिक्थकगैरिकघृतगुडमहिषाक्षसालनिर्यासैः ॥ गैरिकसहितैर्लेपः
पादस्फुटनापहः सिद्धः ॥ अथ च गैरिकं सिलाजतुद्वितीयं तु प्रसिद्धमेव ॥ उन्मत्तकस्य
बीजेन मानकक्षारवारिणा ॥ विपक्वं कटुतैलं तु हन्याद्दारीं न संशयः ॥ अथ कदर
स्य चिकित्सा ॥ देहे कदरमुद्धृत्य तैलेन दहनेन वा ॥ अथ तिलकालकमषकजतुम
णीनां चिकित्सा ॥ तिलकालकान्मषान्न्यापदेहदग्धौपलेनाथ ॥ क्षारेणाथाग्निना
वा सच्छेनोत्कृत्य चर्मकीलांश्च ॥ सगैरिकं सनागरं प्रलेपनेन रोमकं ॥ विघ्न च

॥ ४८० ॥

र्मकीलकानतिद्रुतंविनाशयेत् ॥ श्यामजीरंचकर्षैकंद्विकर्षंनवसादरं ॥ त्रिकर्षंशुक्तिचू
र्णंचचतुःकर्षंचतुत्थकं ॥ जयंतीपुष्परसैर्भृंगराजरसैस्तथा ॥ मर्दयित्वाप्रयत्नेनशो
षयेदातपेनच ॥ ततोयस्सतरीमूत्रैर्गुटीकांकारयेद्भिषक् ॥ शोषयित्वाततःसर्वंयत्समू
त्रेणघर्षयेत् ॥ लेपनात्तस्यनश्यंतिचिरकालोद्भवानलां ॥ चर्मकीलोजतुमणिर्माष
कास्तिलकालकाः ॥ अथन्यच्छस्यचिकित्सा ॥ शिरावेधैःप्रलेपैश्चतथाभ्यंगैरुपाचरे
त् ॥ न्यच्छंलिंपेत्पयःपिष्टैःकल्कैःक्षीरितरुद्भवैः ॥ यवसर्जरोध्रमदनैःसेव्यःघृतक्षौ
द्रयुतंमूत्रे ॥ आदर्विलेपनच्छृतंनीलीव्यंगापहंतदभ्यंगात् ॥ अथपद्मिनीकंट
कस्यचिकित्सा ॥ पद्मिनीकंटकेरोगेछर्दयेन्निंबवारिणा ॥ तेनैवसिद्धंसक्षौद्रंसर्पिः
पातुंप्रदापयेत् ॥ निंबारग्वधकल्कैर्वामुहुरुद्वर्तनंहितं ॥ चतुर्गुणेननिंबोत्थपत्र

॥४८१॥

क्वाथेन गोघृतं ॥ पचेत्तत्सक्तुनिंबस्य कृतमालस्य पत्रजैः ॥ कल्कैर्भूयः पचेत्सिद्धं तत्पिबेत्
त्पलसंमितं ॥ पद्मिनीकंटकाद्रोगान्मुक्तो भवति नान्यथा ॥ हरिद्रं भर्जितं तुल्यं मत्स्यकं कर्ष
संमितं ॥ कर्षार्द्धं चैव सिंदूरं ललाचूर्णं हिंकार्षिकं ॥ गोदंतं च टंकपलं दत्वा कांस्यपात्रेप
लोहजे ॥ ताम्रदंडेन संघृष्य कज्जलाभं समाचरेत् ॥ लेपनादस्य क्षाम्यंति कंडुविस्फोट
कादयः ॥ लोहभाजनयुग्मेन सगंधं रसतुल्यकं ॥ कृत्वा तस्य वर्द्धयेद्धीमान्सर्पिः कंडु
हरं परं ॥ अथ जगद्विकाचिकित्सा ॥ तत्राजगद्विकामामां जलौकाभिरुपाचरेत् ॥ पु
क्विशौ राधिकाक्षारकल्कैर्म्मालेपयेन्मुहुः ॥ कठिनां क्षारयोगैश्च द्रावयेज्जगद्विकां
श्यामा मातुलंग लिकामूर्वाकल्कैरपि विलेपयेत् ॥ पक्वां व्रणविधानेन यथोक्तेन प्रसा
धयेत् ॥ अथ पयवृमरव्यां धालज्योश्चिकित्सा ॥ अंधालजीं घवृमरव्यां पूर्वस्विदैहृपा

॥४८१॥

चरेत् ॥ मनःशिलादेवदारुकुष्ठकल्कैः प्रलेपयेत् ॥ पक्वां व्रणविधानेन यथोक्तेन प्रसाध
येत् ॥ अथ विवृतेंद्रवृद्धागर्दभिकाजालगर्दभानां चिकित्सा ॥ विवृतामिंद्रवृद्धांच गर्द
भीं जालगर्दभं ॥ पैत्तिकस्य विसर्पस्य क्रियया साधयेद्भिषक् ॥ पाकेतु रोपयेदाज्यैः पक्वै
र्मधुरभेषजैः ॥ अथ कच्छपिकाचिकित्सा ॥ कच्छपीं स्वेदयेत्पूर्वं ततस्ताभिः प्रलेपयेत् ॥
कल्कीकृतैर्निशाकुष्ठशिलातालकदारुभिः ॥ तां पक्वां साधयेच्छीघ्रं भिषग्व्रणचिकि
त्सा ॥ अथ शर्करार्बुदचिकित्सा ॥ मेदोर्बुदविधानेन साधयेच्छर्करार्बुदं ॥ अथ पथ्यापथ्य
माह ॥ क्षुद्ररोगेषु सर्वेषु नानारोगानुकारिषु ॥ दोषान्दूष्यानवस्थाश्च निरीक्ष्य मतिमा
न्नरः ॥ तस्य तस्य च रोगस्य पथ्यापथ्यानि सर्वशः ॥ यथा दोषं यथा दूष्यं यथावस्थं च
कल्पयेत् ॥ इति क्षुद्ररोगचिकित्सा ॥ अथ शिरोरोगनिदानं ॥ तत्र तेषां संख्यामाह ॥

॥४८२॥

शिरोरोगास्तु नाप्यंते वातपित्तकफैस्त्रिभिः॥ सन्निपातेन रक्तेन क्षयेणाकृमिभिस्तथा॥ १॥ सू
र्यावर्त्तानंतवातशंखकार्द्धावभेदकैः॥ एकादशविधस्यास्य लक्षणानि प्रचक्षते॥ २॥ शिरो
रोगोत्र शिरोगतान्यूलरूपारुगभिधीयते॥ ननु वातपित्तकफैस्त्रिभिरित्यत्र वातपित्तकफै
रित्युक्तेन त्रित्वबोधात्॥ किमर्थं त्रिभिरिति पदं नैवं॥ वातपित्तकफानां पृथक्कारणत्व
बोधार्थं॥ तर्हि सर्वेषु शिरोरोगाः सन्निपातसमुद्भवा इति कथं॥ उच्यते॥ तदेवावातद
यउत्वणतया पृथक्कारणानि योद्भवानि॥ तदुक्तं॥ औत्कर्षिक्ये बलिंगैस्तत्कीर्त्तितात
द्विभाजतेति॥ क्षयेणाच सादिक्षयेण॥ १।२॥ अथ वातिकस्य शिरोरोगस्य लक्षणमाह
यस्यानिमित्तं शिरसो रुजश्च भवंति तीव्रानिशि चातिमात्रं॥ वंधोपतापैः शमश्च यत्र शि
रोभितापः स समीरणेन॥ ३॥ अनिमित्तं अतर्कितविप्रकृष्टनिमित्तं॥ निशि चातिमात्र

॥४८२॥

श्री

मिति रात्रौ प्रौत्येन वायो राधिक्यात् ॥ ३ उपतापः स्वेदनं ॥ यंधोपतापैरित्यत्राप्ययमेव हेतुत्वाद्धेतु
वचनं ॥ शिरोभितापः शिरःपीडा ॥ ३ अथ पैत्तिकस्य शिरोरोगस्य लक्षणमाह ॥ यस्योष्णमं
गारचितं यथैव भवेत् शिरो दह्यति चाक्षिनासं ॥ शीतेन रात्रौ च भवेच्छमश्च शिरोभितापः स
तु पित्तकोपात् ॥ ४ दह्यतीत्यार्षत्वात् धूप्यति चापि नासेति पाठे धूप्यति संतापवती भव
तीत्यर्थः ॥ ४ अथ श्लैष्मिकस्य शिरोरोगस्य लक्षणमाह ॥ शिरो भवेद्यस्य कफोपदिग्धं गु
रु प्रतिष्टब्धमथो हिमं च ॥ शूनाक्षिकूटं वदनं च यस्य शिरोभितापः स कफप्रकोपात् ॥ ५
कफोपदिग्धं अंतःकफलिप्तं ॥ गुरु स्तौरवयुक्तं प्रतिष्टब्धं तद्बद्ध शिरं ॥ शूनाक्षिकूटमिति ता
वदनविशेषणं ॥ ५ अथ सान्निपातिकस्य शिरोरोगस्य लक्षणमाह ॥ शिरोभितापे त्रित
यप्रवृत्ते सर्वाणि लिंगानि समुद्भवंति ॥ ६ त्रितयप्रवृत्ते दोषत्रयसंभूते ॥ ६ ॥ अथ रक्तजस्य ष

शिरोरोगस्य लक्षणमाह ॥ रक्तात्मकः पित्तसमानलिंगः स्पर्शासहत्वं शिरसो भवेच्च ॥ ६ ॥ पित्त
समानलिंगः पित्तजशिरोरोगलक्षणः पैत्तिकाद्रक्तके लिंगमाह ॥ शिरसः स्पर्शासहत्वमि
ति ॥ ६ ॥ अथ क्षयजस्य शिरोरोगस्य लक्षणमाह ॥ वसाबलासक्षतसंभवानां शिरोगताना
मतिसंक्षयेण ॥ क्षयप्रवृत्तः शिरसोऽभितापः कष्टो भवेदुग्ररुजोऽतिमात्रं ॥ ७ ॥ क्षतसंभवं रु
धिरं ॥ असृग्वसासंक्षयसमीरणानामिति पाठस्तु युक्तः ॥ यतो वायौ यच्छेदुग्ररुजा उच्य
ते तत्तु क्षीणे ॥ कष्टः कष्टसाध्यः ॥ ७ ॥ अथ कृमिजस्य शिरोरोगस्य लक्षणमाह ॥ निस्तुद्यते
यस्य शिरोऽतिमात्रं संभक्ष्यमाणं स्फुटतीव चांतः ॥ घ्राणाच्च गच्छेद्रुधिरं सपूयं शिरो
ऽभितापः कृमिभिः स घोरः ॥ ८ ॥ संभक्ष्यमाणं कृमिभिरिति शेषः ॥ घ्राणाच्चेति चकारे
ण कृमिनिर्गमोऽपि विवक्ष्यते ॥ तथा च चरकः ॥ कृमीणां दर्शनेन चेति ॥ ८ ॥ अथ सूर्या

र्त्तमाह ॥ सूर्योदयं प्रतिमंदमंदमक्षिभ्रुवौ रुक् समुपैति गाढं ॥ विवर्द्धते चांशुमता सहै
व सूर्यापवृत्तौ विनिवर्त्तते च ॥ सर्वात्मकं कष्टतमं विकारं सूर्यापवर्त्तमुदाहरंति ॥ टी ॥
सूर्योदयं प्रति लक्ष्मीकृत्य आरभ्येति पाठांत ॥ यस्य रुक् अक्षिभ्रुवौ समुपैतीति संबंधः
सूर्यविवृत्तौ सूर्यस्याधोगतौ ॥ सूर्यापवर्त्तविपर्ययस्तु विदेहे पठ्यते ॥ स यथा ॥ तत्र वा
तगतं पित्तं चित्तं शिरसि तिष्ठति ॥ मध्याह्ने तेजसा त्वस्य तद्विदग्धं शिरोरुजं ॥ करोति पै
त्तिकीं घोरां संशाम्यति दिनक्षये ॥ अस्तंगते प्रभाहीने सूर्ये वायुर्विवर्द्धते ॥ पित्तं शांति
मवाप्नोति ततः शाम्यति वेदना ॥ एतत्पित्तानिलकृतः सूर्यावर्त्तविपर्यय इति ॥ अयं
सूर्यावर्त्त एवांतर्भावि ॥ चतुर्थिके चातुर्थिकविपर्ययवत् ॥ टी अथानंतवातमाह ॥
दोषास्तु दुष्टास्त्रय एव मन्यां संपीड्य गाढं सरुजां सतीव्रां ॥ कुर्वंति सोऽक्षिभ्रुवि

॥४८४॥

शंखदेशे स्थितिं करोत्याशु विशेषतस्तु ॥१०॥ गंडस्य पार्श्वे च करोति कंपं हनुग्रहं लोचनजा
न् विकारान् ॥ अनंतवातं तमुदाहरंति दोषत्रयोत्थं शिरसो विकारं ॥११॥ एवं शब्दो त्राप्य
र्थे ॥ अन्यथा नामनेकार्थत्वात् ॥ तीव्ररुजां तीव्ररुजं व्यथा दाहगौरवादिरूपां दोषाः कुर्व
ति ॥ अप्यनंतवातः स अनंतवातः ॥ अक्ष्यादिषु स्थितिं करोति ॥ विशेषतस्तु गंडस्य
पार्श्वे स्थितिं करोति ॥ पीडया स्थितिं कृत्वा कंपादीन् करोति ॥१०॥११॥ अथ शंखकमाह
पित्तरक्तानिला दुष्टाः शंखदेशे विमूर्छिताः ॥ तीव्ररुग्दाहरागं हि शोथं कुर्वंति दारुणं
१२ ॥ स शिरो विषवद्वेगान्निरुध्याशु गलं तथा ॥ त्रिरात्राज्जीवितं हंति शंखको नाम नाम
तः ॥ त्र्यहं जीवति भैषज्यं प्रत्याख्यायास्य कारयेत् ॥१३॥ पित्तरक्तानिलादित्यत्र कफो पि यो
ज्यः ॥ कृतानुतापः कफपित्तरक्तैरिति सुश्रुतवचनात् ॥ विमूर्छिताः प्रवृद्धाः ॥ स शोथः ॥४८४॥

त्रिरात्रात् त्रिरात्रं त्रिरात्रिमध्ये इति पाठः तु ॥१२॥१३॥ अथार्द्धावभेदकमाह ॥ रूक्षाशनात्यध्य
शनावश्यप्राग्वातमैथुनैः वेगसंधारणायासव्यायामैः कुपितोऽनिलः ॥१४॥ केवलः स
कफो वार्द्धं गृहीत्वा शिरसो बली ॥ मन्याभ्रूशंखकर्णाक्षिललाटार्द्धेऽतिवेदनां ॥१५॥ शस्त्राश
निनिभां कुर्यात्तीव्रां सोऽर्द्धावभेदकः ॥ नयनं चाथवा श्रोत्रमतिवृद्धो विनाशयेत् ॥१६॥ अत्य
ध्यशनेति अत्यशनं अध्यशनं अजीर्णे भोजनं ॥ अवश्यायः अवश्यायः हिममिति पाठः
त ॥ आयासः अतिबलाद्भारोद्वहनादि ॥ व्यायामः मल्लश्रमः ॥ शस्त्राशनिनिभां शस्त्र
पातेनेव वज्रपातेनेव वेदनां करोति ॥ शस्त्रारणिनिभामिति पाठे अरणिः अग्न्युत्पा
दककाष्ठं तत्कृतमंथननिभां वेदनां करोति ॥१४॥१५॥१६॥ इति शिरोरोगनिदानं
अथ शिरोरोगचिकित्सा ॥ शिरोभितापेऽनिलजे तु नस्यं धूमादि स्निग्धमथापि धा

मांसैः स्नाये घृतउपनाहपिंडस्वेदाः प्रलेपाश्च पिमारुतघ्नाः॥ पित्तास्रजे स्नापहृतिः शिरोभिः
शीताः शिरोवस्त्रविलेपसेकाः॥ श्लेष्मोद्भवे स्निग्धरहानवाद्यैः सवामनीयः कटुकैः स्नाये
घ्राः॥ स्वेदाः प्रलेपाश्च पिनस्यमूर्द्धलेखनतीक्ष्णौषधैरत्र तथोपवासैः॥ क्रियाभिरेताभि
रशाम्यती चेद्दाहस्तत्र लेपो भवेत्तु युक्त्या कुष्ठमेरंडमूलं च नागरं तक्रपेषितं कटूष्णं
शिरसः पीडां मालेलेपनतो हरेत्॥ रसः प्रयासकृतु रोपस्तस्य नस्यं विशोषतः॥ शिरःस्य
लेहरस्येयमुकुंदवं नश्वसयः॥ त्रिकटुकपुष्कररजनीरास्नासुरदारुतुरगगंधानां॥ क्वाथः
शिरोर्त्तिजालं नासापीतो निवारयति॥ नागरकल्कविमिश्रं क्षीरं नस्येन योजितं नृणां
नानादोषोद्भूतां शिरोरुजं हंति तीव्रतरां॥ संस्कृयघृतकैराढ्यैर्दाडिमीकलिकाः शुभाः
घ्नंति स्वरसनस्येन सद्यो मूर्द्धभवां रुजं॥ कुष्ठमेरंडमूलं च तैलपाकं कांजिकपेषितं॥ शि

रोतितान्नायत्याप्नुपुष्पंयामुचकुंदजं ॥ देवदारुनतंकुष्टंनतदंविष्यमेषजं ॥ तैपःक्वांजिक
सपिष्टसैलपुक्तःशिरोर्त्तिनुत ॥ नस्येनकलिकाचूर्णनघसादरजंरजः ॥ यातप्रेष्मम
यांपीडांशिरसोहंतिसर्वथा ॥ पथ्यीविडंगप्नुंबीभृंगमधूकैःप्यतसर्पिः ॥ नस्येनमूर्द्धरो
गान्सर्वान्षड्बिंदुसंज्ञकंजयति ॥ इतिषड्बिंदुघृतं ॥ एरंडमूलंतगरंशताव्हाजीवंतिका
सैंधवरास्निकेच ॥ भृंगंविडंगमधुयष्टिकाचविश्वौषधंकृष्णतिलस्यतैलं ॥ आजंप
यस्तैलसमानमेवचतुर्गुणंभृंगरसंचदत्वा ॥ पक्वापाचिपक्वंलघुनाग्निनेततषड्बिंदु
नामप्रमेयंतुतैलं ॥ षड्बिंदवोनासिकयास्ययोज्याःशीघ्रंनिहन्युःशिरसोविकारान्
च्युतांश्चदंतान्पलितांश्चकेशान्दुर्बद्धमूलांश्चदढीकरोति ॥ सुपर्णचक्षुःप्रतिमं
चचक्षुःबाव्होर्बलंचाप्यधिकंकरोति ॥ जीवंतिकाहरीतकी ॥ इतिषड्बिंदुतैलं ॥ अ

॥ ४८ ह्री ॥

पक्वपित्तांश्च शाल्मलीनुखांध्रिमयूरमेतैस्त्रिपलैर्जलेन॥ पाद्यास्यषष्ठीमधुपंचमूलीपुगैः स
प्रयुक्तैर्विपचेद्धृतेस्मिन्॥ कल्कप्रयुक्तैर्मधुरैर्घृतस्य प्रस्थः समक्षीरयुतो विपाच्यः॥ जत्रू
र्ध्वरोगानखिलान्निहंति सर्पिस्तदभ्यंजननपाननस्यैः॥ इति मयूराद्यं घृतं॥ अथ तर्धमवि
दग्धमाषजमषीमध्ये कटुग्धं क्षिपेत् तैलं सर्षपसंभवं च मिश्रितं तेनैव लिंपेच्छिरः॥
रोगान्मूर्द्धसमुद्भवान्बहुविधांस्तद्वच्च वक्त्रोद्भवान् खालित्यं पलितानि चोपशमयत्ये
तत्प्रयुक्तं नृणां॥ इति माषमष्यादिलेपः॥ स्मरफलतिलपर्णीबीजसंयुक्तमत्तांकुशादल
घटबीजत्वग्गुंजोर्द्धिशातुल्यं॥ प्रधमनविधिना तद्धत्तमात्रं शिरोरुक्प्रतश्यनकफनिद्रा
सन्निपातं निहन्यात्॥ इति स्मरफलादिप्रधमनं॥ अथ मूर्द्धतैलं॥ अभ्यंगसेकपिचु
बस्तिस्तु मूर्द्धतैलकं दृति रौक्ष्यमलहत्प्रपमोऽत्र सेकः॥ मूर्च्छार्तिदाहपरिपाकहितोऽत्र

॥ ४८ ह्री ॥

ल्पः॥ केशशातस्फुटनपरिधूपनक्लमजित्॥ स्तव्याक्षतापहरणाभ्य पिचुः प्रसुप्तिनासास्य
शोषतिमिरोगरुषिशिरोर्त्तिहारी॥ इत्योद्दिताप्रायनयोरपि वस्तिरवस्थितान्तावद्वपुषे
विहितो द्विनांते॥ गव्यं चहंमाहिषं चर्मपट्टं मूर्द्धोन्मानं तद्वितस्मायतं च॥ आकर्णांतं
वस्त्रसंवेष्टितं चोपध्याकसोवेशिकामितलाटे॥ लिप्ताफल्कैर्माषजैः स्नेहमुष्णं तत्रा
दध्यालकेशभूम्यंगुलोच्चं॥ स्वस्थं सिंह्याद्धारयेद्यारलयच्योल्ह्के एं यावत॥ तत्र्ल समाहमेव
अस्यार्थः॥ अभ्यंगः सेकः पिचुः वस्तिश्चेति चतुर्विधं मूर्द्धतैलं॥ अत्र प्रथमोभ्यंगः कं
उतिरौक्ष्यमलहृदित्यभ्यंगविषयकथनं॥ सेकः परिषेकः मूर्द्धाक्षिदाहपरिपाकहि
तोप्रेलापस्नेत्यति सेकविषयकथनं॥ पिचुविषयमाह॥ केशौत्पादि॥ केशस्फुटत्वं के
शुटनं॥ परिधूपनं शिरोदाहः॥ क्लमातः केशपातः॥ स्तव्याक्षता नेत्रस्तंभः॥ वस्तिवि

॥४८७॥

षधमाह ॥ प्रसुप्तीत्यादि प्रसुप्तिः स्पर्शाज्ञानं ॥ नाशास्यशोषः नासाशोषो मुखशोषश्च
तिमिरं नेत्ररोगः ॥ उग्रशिरोर्तिः दारुणः शिरोरोगः ॥ अर्दितं वातव्याधिभेदः ॥ अशय
नं निद्रानाशः ॥ वस्तिविधिमाह ॥ स्विन्नाक्तेत्यादि ॥ स्विन्नाक्तस्य पुरुषस्य स्विन्नं कृतस्वे
दं आक्तं अभ्यक्तं पुरुषं वमनादिना वपुः शरीरं यस्य तस्य पुरुषस्य दिनां ग:।।ग।ग
ते सायंकाले एषः वस्तिः विहितः उचितः ॥ मूर्ध्नि मानं दैर्घ्येण शिरःसमं ॥ चितस्यायतं प
रिणाहेन द्वादशांगुलं ॥ आकर्णांतं कर्णपर्यंतं वस्त्रसंवेष्टिते ललाटे वासोवेष्टिकाभिः
वेणाकारवर्त्तिर्वध्यामाषजैः कल्कैः माषपिष्टैः सुखोष्णमर्दितैः लिप्यासंस्थं सिद्धं
यथाव्याध्यौषधैः सिद्धं केशभूम्यंगुलोच्छ्रितं केशस्थानात् अंगुलमेकमुच्चं ॥ उष्णं कोष्णं स्ने
हं तैलं ॥ आदध्यात् समर्पयेत् ॥ शिरोवस्तिधारणावधिकालमाह ॥ धारयेत्यादि ॥

॥४८७॥

मुखस्य नासिकायाश्च यावद्दाहस्ता भवेत्तावदित्यर्थः ॥ सप्ताहमेवेति नायं नियमः किंतु सप्ता-
हात्परतोपीत्यर्थः ॥ हृजितत्परतोपि चेति मंत्रांतरोक्तेः ॥ सशर्करं कुंकुममाज्यभृष्टं नस्यं विधे-
यं पवनासृगुत्थे ॥ भ्रूशंखनासाक्षिशिरोर्तिसूर्ये दिनाढ्यर्धहरे भवे च रोगे ॥ इति केशरयोगः
नागरस्य पलान्यष्टौ द्वात्रिंशच्च गुडादपि ॥ घृतं गुडसमं दत्वा क्षीरं दत्वा चतुर्गुणं ॥ पचेन्मृ-
दुग्निना सम्यक्पाकः स्यात्को भवेत्यतः ॥ भक्षितो नाशयत्याशु शिरःशूलं तथार्दितं ॥ सूर्या-
वर्तं हनुःकंपमन्यास्तंभं गलग्रहान् ॥ नाशयेद्वातरोगं च कफसंसर्गजानपि ॥ इति नागरा-
वलेहः ॥ लवंगमेकं संगृह्य मरिचं त्रितयं तथा ॥ चणकप्रमितं हिंगु संघृष्यैकत्र वारिणा
एतच्छीर्षव्यथां हन्यात् लाघवेनात्र संशयः ॥ इति लवंगादिनावनं ॥ पथ्याक्षधात्रीभूनिं-
बैर्निशानिंबामृतायुतैः ॥ कृतः क्वाथः षडंगोयं सगुडः शीर्षशूलहृत ॥ भ्रूशंखकर्णशूलं

॥४८८॥

तानितथोर्द्धशिरसोरुजं ॥ सूर्य्यावर्त्तेर्द्धभेदके च दंतपातं च तद्रुजं ॥ नक्तांध्यंपरसंशुक्रंचयस्य:
घेडोव्ययोहति ॥ इति पथ्यादिक्वाथः ॥ पित्तात्मके शिरोरोगे शीतानां चंदनानां भसा कुमुदो
त्पलपद्मानां स्पर्शाः सेव्याश्च मारुताः ॥ सर्पिषः शतधौतस्य सिरसा धारणं हितं ॥ रसः
स्यास्तु कुठारोस्य: कर्पूर: कुंकुमं जतं ॥ सिताच्छागीपय: सर्वं चंदनेनानुघर्षयेत ॥ तस्य
नस्यं भिषक दद्यात्पित्तजायां शिरोरुजि ॥ किंतु मस्तकशूलेषु सर्वेष्वेतद्धितं मतं ॥ रक्त
जे पित्तवत्सर्वं भोजनात्येपसेवनं ॥ शीतोष्णयोश्च विन्यासो विशेषाद्रक्तमोक्षणं ॥ क
फजे लंघनं स्वेदो रूक्षोष्णैः पाचकात्मकैः ॥ सन्निपातसमुत्थे तु घृततैलं चयस्तयः
धूमनस्यशिरोरेकलेपस्वेदाद्यमाचरेत ॥ क्षयजे क्षयनाशाय कर्त्तव्यो बृहणो।
विधिः ॥ पानेन स्वेच सर्पिः स्याद्वातघ्नैर्मधुरैः शृतं ॥ क्षयकासापहं चात्र सर्पिः ॥४८८॥

पथ्यतमं मतं । कृमिजे व्योषभल्लातकशिग्रुबीजैश्च नावनं । अजामूत्रेण संपिष्टैः कर्त्तव्यं
कृमिनुत्परं ॥ विडंगस्वर्जिकादंतीहिंगुगोमूत्रसंयुतं ॥ विपक्वं सार्षपं तैलं कृमिघ्नं न
स्यतःपरं ॥ सूर्यावर्ते शिरावेधो नावनं क्षीरसर्पिषा ॥ योजयेत्सगुडं सर्पिर्घृतपूरां-
श्च भक्षयेत ॥ क्षीरपिष्टैस्तिलैः स्वेदो जीवनीयैश्च शस्यते ॥ भृंगराजरसः छागक्षीर
तुल्योऽर्कतापितः ॥ सूर्यावर्त्तं निहंत्याशु नस्येनैव प्रयोगराट् ॥ अर्द्धावभेदके पूर्वं स्नेहस्वे
दौ हि भेषजं ॥ विरेकः कायशुद्ध्यर्थं धूमः स्निग्धो रसभोजनं ॥ विडंगानि तिलान्कृष्णा
न्समान्पिष्ट्वा विलेपयेत ॥ नस्यं चाप्याचरेत्तस्मादर्द्धभेदं व्यपोहति ॥ पिबेत्सशर्क
रं क्षीरं नीरं वा नारिकेरजं ॥ सुशीतं वापि पानीयं सर्पिर्वा नस्ततस्तयोः ॥ नस्ततः ना
सिकया पिबेदित्यन्वयः ॥ तयोः सूर्यावर्त्तार्द्धभेदकयोः ॥ शाखामुंडरसं पीत्वा मरि

गैरवचूर्णितं। भोजनादौ तु सप्ताहात् सूर्यावर्त्तौ हि भेदकौ॥ हंति सर्वात्मकौ शीघ्रं दुःखदौ
भृशदारुणौ॥ अनंतवाते कर्त्तव्यः सूर्यावर्त्तहरो हरो विधिः॥ शिरामोक्षश्च कर्त्तव्यो
नंतवातप्रशांतये॥ आहारश्च प्रदातव्यो वातपित्तविनाशनः॥ मधुमस्तकसंयाव
घृतपूरैर्विशेषतः॥ मधुमस्तकः मधुनोपलिप्तः संयावः पक्वान्नविशेषः॥ दार्वी
हरिद्रामंजिष्ठासनिंबोशीरपद्मकं॥ एतल्लेपनं कुर्याच्छंखकस्य प्रशांतये॥ क्षी
ततोयाभिषेकश्च शीतलक्षीरसेचनं॥ कल्कैश्च क्षीरिवृक्षाणां प्रलेपः शंखके लेपने हि
तं॥ यष्टीमधुकमाषः स्यात् यौप्यं तु विषं भवेत॥ तयोश्चूर्णं तु सूक्ष्मं स्यात्तच्चूर्णं स
र्पिषोन्वितं॥ नासिकाभ्यंतरे न्यस्तं सर्वशीर्षव्यथां हरेत॥ इत्थं प्रयोगयोगोपमनु
भाविभिराहृतः॥ इति यष्टीमधुकादिनस्यं॥ मांसीकुष्ठतिलाःकृस्नाःसारिवामूल

लमुत्पलं ॥ सक्षौद्रक्षीरपिष्टानि केशसंवर्द्धनानि च ॥ मार्कवस्वरसभावितगुंजाबीजचूर्ण
परिपाचिततैलं ॥ मिश्रितं तत्टिजटासुरकुष्ठैः केशभारजननं जनतायाः ॥ मांसीवलाव
कुलजामलकैः सकुष्ठैः पिष्टैः प्रलिप्तशिरसो न पतंति केशाः ॥ स्निग्धायतातिकुटिलाश्च
तयो भवंति ये प्रच्युताश्च पिमिलिंदकुलप्रकाशाः ॥ बिल्वस्य मज्जापिष्टेन सह दग्ध्वाह
पद्विषः ॥ स्नायात्प्रलिप्य मूर्द्धानमहर्षी विधिवत्तये ॥ दग्ध्वायोनुदिनं मर्त्यो मूर्द्धानम
नुलिंपति ॥ अहंषिकासर्वथास्य न श्पत्यस्यैसुवासरैः ॥ चतुष्पदानां त्वग्रोमनखशृंग
गास्थिभस्मभिः ॥ तैलेन सह लेपोयं रोमसंजननः परः ॥ सा पुनः स्फोटकद्वयेसिद्ध
लेटंकैकैकः चूर्णी टंकैकं ॥ रतद्वौषधत्रयं घृष्यां गुल्यां यावन्न खका पिष्टं भवति ताव
न्मर्दयेत ॥ ततो हस्ते पुरुकचे पुगाढमंगुल्या घर्षणेन पूर्वं लिंपेत ॥ घटिकाद्वयं स्थाप

पिष्ट्वा तैलामलकाभ्यां स्नापात् ॥ सप्ताहाद्दग्धकेशोपि भ्रमरसदृशकेशो भवति ॥ इति पांक
रीकृतिः ॥ निंबतैलैः पूतितैलै रिंगुदीतैलतोपि वा ॥ भल्लीतैलैः क्षारसूदा लेपो वा पूक्तनाश
नः ॥ लेपो वातशिरोर्त्ति जिन्निगदितः सुस्नेहसौवीरकैः पिष्टैर्द्दोह्रनताभयौषधगदैः
क्षीरे रसपित्तार्त्तिजित् ॥ यष्टीशीतवलानखोत्पलजलोशीरै रथोपद्मकैर्हीवेराभयपद्मा
चंदननलैर्द्दूर्वाशिवासंयुतैः ॥ कौंतीवक्रपयोदशैलजजटारास्नोह्रवूकामरैरेलाजोंग
कसंयुतैः कफशिरःशूलं सुखोष्णं जयेत् दद्रुघ्नामरलेहिबौषधगादैर्मूत्रेरापिष्टैस्त
पाद्दूर्वेंदीवरपिप्पलीतिलयरीवर्षाभुजो शोबजित् ॥ पलत्रयं मातुलुंगफलं हरीतक्याः प
लं तथा ॥ आमलक्यास्तत्समेव पलैकं खदिरस्य च ॥ तुत्थस्यापि पलैकं तु नीलीयष्याद
शैव तु ॥ नवसादरकस्यैकं लोहचूर्णस्य चैककं ॥ तुवप्पीः पलमेकं तु पलं ताम्रविषस्त

॥४८०॥

पा॥ अतिश्लक्ष्णमिदं चूर्णं भृंगराजरसैस्त्रिरं ॥ साधितं त्रिदिनं लोहे भिन्नांजनसमप्रभं ॥ रूक्षी
कृत्य कचानादौ पुनस्तेनाथ लेपयेत ॥ वातारिपत्रैरावेष्ट्य सुप्तिं कुर्याद्विचक्षणः ॥ प्रातस्तै
लामलैः स्नात्वा नरो जायेत निश्चितं ॥ भिन्नकज्जलभृंगालीनिभकुंतलसंततिः ॥ अथप
थ्यमाह ॥ स्वेदो नस्यं धूमपानं विरेको लेपः सेको लंघनं शीर्षबस्तिः ॥ रक्तोन्मुक्तिर्बस्ति
कर्मोपनाहौ जीर्णं सर्पिः शालयः षष्टिकाश्च ॥ यूषो दुग्धं धन्वमांसं पटोलं शिग्रुर्द्राक्षा
वास्तुकं कारवेल्लं ॥ आम्रं धात्री दाडिमं मातुलुंगं तैलं तक्रं कांजिकं नारिकेलं ॥ पथ्या कुष्ठं
भृंगराजः कुमारी मुस्ता शीरं चंद्रिका गंधसारः ॥ कर्पूरं च व्याप्तिमानेषवर्गः सेव्यो म
र्त्यैः शीर्षरोगे यथास्वं ॥ अथापथ्यमाह ॥ क्षुधं जृंभां मूत्रबाष्पं निद्राविड्वेगरोधनं ॥ दुष्ट
नीरं दिवास्वप्नं सरिज्जलनिमज्जनं दंतकाष्ठं दिवानिद्रां शिरोरोगी परित्यजेत ॥ इति

श्चिरोरोगचिकित्सा ॥ अथ नेत्ररोगनिदानं तत्र नेत्रस्य प्रमाणमाह ॥ विद्याद्द्व्यंगुलबाहुल्यं
स्वांगुष्ठोदरसंमितं ॥ द्व्यंगुलं सर्वतः सार्द्धं भिषङ्नयनमंडलं ॥ १ ॥ द्व्यंगुलबाहुल्यं द्व्यंगु
लप्रमाणस्थौल्यं ॥ अंगुलीनां स्थौल्यस्यैव ग्राह्यात्तु नरां ह ॥ स्वांगुष्ठोदरसंमितमिति
द्व्यंगुलसर्वतः सार्द्धमिति दैर्घ्येण ॥ १ ॥ अथ नेत्रस्यांगान्याह ॥ पक्ष्मवर्त्मश्वेतकृष्ण
दृष्टीनां मंडलानि तु ॥ अनुपूर्वं तु ते मध्याश्चत्वारोंत्या यथोत्तरं ॥ २ ॥ ते पक्ष्मादयो दृष्ट्यं
ताः अनुपूर्वं यथापूर्वं मध्याः ॥ चत्वारः कृष्णादयो यथोत्तरं अंत्याः ॥ २ ॥ तच्च नेत्रमंड
ले षट्सप्ततिर्व्याधयो भवंतीत्याह ॥ द्वादशव्याधयो दृष्टौ तथैवान्यौ गदावुभौ ॥ कृष्ण
भागे तु चत्वारो दशैकः शुक्लभागगदाः ॥ ३ ॥ वर्त्मन्येकोविंशतिश्च पक्ष्मजौ द्वौ प्रकीर्तितौ
नव संधिषु सर्वस्मिन्नेत्रे सप्तदशोदिताः ॥ एवं नेत्रे समस्ताः स्युः षट्सप्ततिरामयाः ॥ ४८१ ॥

४। अन्यौ च रक्तोक्तौ सुश्रुतोक्तषट्सप्ततिग्रंथेभ्योधिकौ॥ १।४। अथ सुश्रुतोक्तान् षट्स
प्ततिसंख्यानाह॥ वातादश तथा पित्तात्कफाच्चैव त्रयोदश॥ रक्तात्षोडश विज्ञेयाः पंच
विंशतिः॥ बाह्यौ पुनर्द्वौ नयने रोगाः षट्सप्ततिः स्मृताः॥५॥ अथ नेत्ररोगाणां सामान्यं
विप्रकर्षं च निदानमाह॥ उष्णाभितप्तस्य जलप्रवेशाद्दूरेक्षणात्स्वप्नविपर्ययाच्च॥ स्वेद
रजोधूमनिषेवणाच्च छर्देर्विघाताद्वमनातियोगात॥६॥ शुक्तारनालाम्लकुलत्थमाष
द्विण्मूत्रवातक्रमनिग्रहाच्च॥ प्रसक्तसंरोदनशोकतापाच्छिरोभिघातादतिमद्यपाना
त॥७॥ तथा ऋतूनां च विपर्ययेण क्लेशाभितापादतिमैथुनाच्च॥ बाष्पग्रहात्सूक्ष्मनि
रीक्षणाच्च नेत्रे विकारं जनयंति दोषाः॥८॥ उष्णाभितप्तस्य जलप्रवेशात् उष्णेनातपादि
नासंतप्तदेहस्य जलावगाहनात्॥ आतपादिजनितोष्मणा सह वहिर्गतस्य नयेन

सर्वजाः

॥४८२॥

तेजसो जलावगाहं तेनाभिभवात् ॥ दूरेक्षणात् दूरस्थद्रव्येक्षणात् ॥ स्वेदात् स्विद्यतेऽनेने
तेति स्वेदोऽग्निस्तस्मात् ॥ रजोधूमनिषेवणात् नेत्रे लौव ॥ छर्दिविघातात् वांतिवेगविधार
णात् ॥ वमनातियोगादिति चांते ॥ विण्मूत्रघातकर्मनिग्रहात् विण्मूत्रयातानाक्रमेण
क्षानैः क्षानैः निग्रहात् वेगविधारणात् ॥ प्रसक्तसंरोदनशोकतापात् प्रसक्तं निरंतरं य
त्संरोदनं तस्मात् शोकजनितात्संतापाच्च ॥ शिरोभिघातात् शिरसि प्रहारात् ॥ ऋतूनां च
विपर्ययेण ऋतुचर्याविपरीताचरणेन ॥ क्लिष्टाभितापात् क्लिश्यतेऽनेनेति क्लेशः का
मक्रोधादिदुःखं तेनाभितापः पीडा ततः ॥ बाष्पग्रहात् अश्रुवेगविघातात् ॥ १६।१७।१८
अस्य संप्राप्तिमाह ॥ शिरानुसारिभिर्दोषैर्विगुणैरूर्ध्वमाश्रितैः । जायंते नेत्रभागेषु रो
गाः परमदारुणाः ॥ १९ ॥ तत्र दृष्टिलक्षणमाह ॥ मसूरदलमात्रां तु पंचभूतप्रसाद

॥४८२॥

जां॥ खद्योतविस्फुलिंगाभां सिद्धां तेजोभिरव्ययैः॥१०॥ आवृतां पटलेनाक्ष्णो बाह्येन विवरा
कृतिं॥ शीतसात्म्यां नृणां दृष्टिमाहुर्नयनचिंतकाः॥११॥ मसूरदलमात्रां नेत्रगतकृष्ण
मंडलमध्यस्थां मसूरदलप्रमाणां॥ खद्योतविस्फुलिंगाभामिति ति निमेषैः कदाचित्कदा
चित् द्योतमानात् खद्योतवत् निमेषाभावे विद्योतमानत्वात् विस्फुलिंगवदित्यर्थः॥
अव्ययैः चिरस्थायिभिस्तेजोभिः सिद्धां प्रपन्नां॥ विवराकृतिं सच्छिद्रां॥ अक्ष्णो बाह्येन
पटलेन रसरक्ताधारभूतेन आवृतां॥१०॥११॥ अत्र पटलानि चत्वारि भवंति तान्याह
तेजोजलाश्रितं बाह्यं तदन्यत्पिशिताश्रितं॥ मेदस्तृतीयं पटलमाश्रितं त्वस्थि चापरं॥ पंच
माससमं दृष्टेस्तेषां बाहुल्यमिष्यते॥१२॥ अत्र तेजो रक्तं जलं रसः तेन रसरक्ताधारमि
त्यर्थः॥ पटलं त्वक्॥ अपरं चतुर्थं॥ दृष्टेः स्वांगुष्ठोदरस्थूलस्य नेत्रस्य पंचमांससमं

॥ ४९३ ॥

तेषां चतुर्णां पटलानां मिलितानां बाहुल्यं स्थौल्यं ॥ १२ ॥ तत्र प्रथमपटलगतस्य दोषस्य लिं-
गमाह ॥ प्रथमे पटले यस्य दोषो दृष्ट्यां व्यवस्थितः ॥ अव्यक्तानि स रूपाणि कदाचिदथ प-
श्यति ॥ १३ ॥ प्रथमे कालकाभ्यंतरे संश्रये पूर्वाभ्यंतरे ॥ ननु बाह्ये ॥ तदुक्तं दृष्टेरभ्यंतरे दोषाः
पटले समधिष्ठिताः ॥ एकैकमनु पद्यंते पर्यायात्पटलांतरमिति ॥ अव्यक्तानि ईषद्व्य-
क्तानि ॥ रूपाणि रूपवंति द्रव्याणि ॥ अथ कदाचित्पश्यति व्यक्तान्येवेति शेषः ॥ दोषाल्पतया
१३ ॥ अथ द्वितीयपटलगतस्य दोषस्य लिंगमाह ॥ दृष्टिर्भृशं विह्वलति द्वितीयं पटलं गते
मक्षिकामशकांश्चापि जालकानीव पश्यति ॥ १४ ॥ मंडलानि पताकाश्च मरीचीन्कुंडला-
नि च ॥ परिप्लवांश्च विविधान्वर्षमभ्रं तमांसि च ॥ १५ ॥ दूरस्थानि च रूपाणि मन्यते च
समीपतः ॥ समीपस्थानि दूरे च दृष्टेर्गोचरविभ्रमात् ॥ यत्नवानपि चात्यर्थं सूची ॥ ४९३ ॥

छिद्रं न पश्यति ॥१३॥ विकृतिरूपं सम्यक्कृत्या गृहीतुं न शक्नोति ॥ विकृतत्वमेव विवृणो-
ति ॥ मक्षिकादीन् जलकानीव कर्कटरचितजालानीव पश्यति ॥ मंडलादीन् असंत्यपि सं-
तीच पश्यति ॥ कुंडलानि कुंडलानीव विद्योतमानानि किंचित्पश्यति ॥ परिह्रस्वांश्च विविधा-
न् प्रतिछायादीनां संचारान् उर्ध्वाधिसिर्यग्गमते नानाविधान् ॥ अन्ये परिह्रस्वांश्च
विविधानिति नानावर्णान् जलस्रवानित्याचक्षते ॥ वर्षं वर्षिं ॥ अभ्रं मेघं वर्षादीन् असं-
त्यपि संतीच पश्यति ॥ गोचरविभ्रमात् गोचरो त्ररूपं तत्र विभ्रमः अयथाग्रहणं तस्मात्
१४॥१५॥१६॥ अथ तृतीयपटलगतस्य दोषस्य लिंगमाह ॥ उर्ध्वं पश्यति नाधस्तात् तृती-
यंपटलं गते ॥ सुमहांत्यपि रूपाणि छादितानीव चांबरैः ॥ ७ ॥ कर्णनासाक्षिहीनानि वि-
कृतानि च पश्यति ॥ यथा दोषं च रज्येत दृष्टिर्दोषे बलीयसि ॥१८॥ अधस्थे तु समीप

स्थं दूरस्थं चोपरिस्थिते ॥ पार्श्वस्थिते पुनर्दोषे पार्श्वस्थानि न पश्यति ॥१९॥ समंततः स्थिते
दोषे संकुलानीव पश्यति ॥ दृष्टिमध्ये स्थिते दोषे महद्ध्रस्वं च पश्यति ॥२०॥ दोषे दृष्टिस्थिते
तिर्य्यगेकं वै मन्यते द्विधा ॥ द्विधा स्थिते त्रिधा पश्येद्बहुधा चानवस्थिते ॥२१॥ ऊर्ध्वमपि
याद्दक् पश्यति तादृगाह ॥ स महान्तीत्यादि ॥ अंगैरैः पक्षैः ॥ विकृतानि चेति छिन्नकर
कपालादीनि ॥ अत्र रागप्राप्तिमाह ॥ यथा दोषमित्यादि ॥ रागप्राप्तावर्णमात्रवचनः ॥ अ
धःस्थिते दोषे समीपस्थं न पश्यतीत्यन्वयः ॥ तथा उपरिस्थिते दोषे दूरस्थं न पश्यति
समंतत उपर्य्यधः पार्श्वेषु च ॥ संकुलानीव पश्यति भिन्नान्यपि रूपाणि मिश्रीतानीव
पश्यति ॥ अनवस्थिते अनियतावस्थाने बहुधा बहूनि पश्येत् ॥१७॥१८॥१९॥२०॥२१॥
अथ चतुर्थपटलगतस्य दोषस्य लिंगमाह ॥ तिमिराख्यः स वै रोगश्चतुर्थपटलं गतः

हृल्लादि सर्वतो दृष्टिं लिंगनाश इति क्वचित् ॥ २२ ॥ अस्मिन्नपि तमोभूते नातिरूढे महागदे
चंद्रादित्यौ सनक्षत्रावंतरिक्षे च विद्युतः ॥ २३ ॥ निर्मलानि च तेजांसि भ्राजिष्णूनि च पश्य
ति स एव लिंगनाशस्तु नीलिकाकाचसंज्ञितः ॥ २४ ॥ चतुर्थपटलं गतः सतिमिराख्यः रोगः
तिमिरदर्शनेन तिमिरोस्यास्तीति तिमिरः ॥ अर्शादित्वात् ॥ अथ तस्य लक्षणमाह ॥ हृल्ला
द्वीत्यादि ॥ सर्वतः सर्वत्र ॥ लिंगनाश इति क्वचित् तत्रांतरे लिंगनाशसंज्ञः ॥ तस्य निरुक्तिम्
लिंग्यते ज्ञायते अनेनेति लिंगं दृष्टितेजः तस्य नाशोऽस्मिन्निति लिंगनाशः ॥ अस्मिन्नपि
तिमिरेऽपि तमोभूते तमस्तुल्ये ॥ अत्र भूतशब्दः तुल्यार्थः ॥ नातिरूढे अप्रौढे नवे ॥ अतः चं
द्रादित्यादीनि भास्वंति वस्तूनि पश्यति ॥ अंतरिक्षे इत्यंतरिक्षस्य प्रकाशमयत्वेन तमो
भिभवात् ॥ तेजांसि अग्न्यादेः ॥ भ्राजिष्णूनि निर्मलरूपवर्णादीनि ॥ अस्मिन्नपि प्रौढा

॥ ४८५ ॥

चिरजे च चेद्वादीन्यपि न पश्यतीत्याश्रयः निलिका काच संज्ञितः नीलिका काचेति नामांतरा
ण्यां युक्तः ॥२२॥२३॥२४॥ अथ दृष्टिरोगाणां संख्यां नामानि चाह ॥ दृष्ट्याश्रयाः षट् च षडे
व रोगाः षट् लिंगनाशाहि भवंति तत्र ॥ वातेन पित्तेन कफेन सर्वै रक्तात्परिम्लायिभिधश्च
षष्ठः ॥२५॥ दृष्ट्याश्रया रोगाः षट् षट् द्वादश इत्यर्थः ॥ तत्र लिंगनाशाः षट् ॥ तानेव रूपोति
वातेनेत्यादि ॥२५॥ तथा नरः पित्तविदग्धदृष्टिः कफेन चान्यस्तथ धूमदर्शी ॥ यो ह्रस्वजा
त्यो नकुलांध्यसंज्ञो गंभीरसंज्ञा च तथैव दृष्टिः ॥२६॥ पित्तविदग्धदृष्ट्यादयश्च षट् ॥ ए
वं दृष्ट्याश्रया द्वादश रोगाः ॥२६॥ तत्र द्वावन्यौ चाह ॥ तत्रैवान्यौ गदौ च द्वौ सनिमित्तानिमित्त
कौ ॥२६॥ तेषु वातजस्य लिंगनाशस्य लक्षणमाह ॥ वातेन खलु रूपाणि भ्रमंतीव च पश्य
ति ॥ आविलान्यरुणाभानि व्याविद्धानीव मानवः ॥२७॥ आविलानि कलुषाणि ॥ अरु

॥ ४८५ ॥

णाभानि॥ अव्यक्तलोहितप्रकृतानि। स्थापितानि वक्रकुटिलानीव॥२७॥ अथ पैत्तिकस्वप्नलिंगना
स्वप्नलक्षणमाह॥ पित्तेनादित्यखद्योतशक्रचापतडिद्गणान्॥ नत्यतृष्णापिपासितं विनः
सर्वनीलं च पश्यति॥२५॥ आदित्यादीनां गणान् स्पष्टानि॥२५॥ अथ श्लैष्मिकस्वप्नलिंगना
स्वप्नलक्षणमाह॥ कफेन पश्येद्रूपाणि स्निग्धानीव सितानि च॥ सलिलस्त्रावितानी
पञ्जालकानि च मानवः॥२६॥ अथ सान्निपातिकस्वप्नलिंगनाशस्य तक्षणमाह॥ सन्नि।
पातेन चित्राणि विस्तृतानि च पश्यति॥ यद्वा पि द्विधा वापि सर्वाण्येव समं ततः॥ हीना
धिकांगान्यपथ्याज्योतींष्यपि च पश्यति॥३०॥ चित्राणि नानावर्णानि विस्तृतानि विप
रीतानि॥ वैपरीत्यमेव चित्रणोति॥ यद्वेत्यादि॥३०॥ अथ रक्तजस्वप्नलिंगनाशस्य ल।
क्षणमाह॥ पश्येद्रक्तेन रक्तानि तमांसि विविधानि च॥ हरितान्यथ रूक्षाणि पीतान्य

पिच्यमानवः ॥ ३१ ॥ अथ परिम्लायिनो लक्षणमाह ॥ रक्तेन मूर्छितं पित्तं परिम्लायिनमाच
रेत् ॥ तेन पित्तादिभ्यः पश्येदुद्यन्तमिव भास्करं ॥ चिकीर्ष्यमाणान्खद्योतैर्दीप्तांस्तेजोभि
रेव च ॥ ३२ ॥ चिकीर्ष्यमाणान् व्याप्यमानान् ॥ तेजोभिः अग्न्यादिभिः ॥ ३२ ॥ अथ वाता
दिवर्णमाह ॥ वातात्सितानि तैर्नेत्रैव वर्णैरपि स षड्विधः ॥ लिंगनाशो निगदितो वर्णो
वातादितो यथा ॥ ३३ ॥ रागो रक्तो मारुतजः प्रदिष्टो म्लायी च नीलश्च तथैव पित्तात् ॥ कफा
त्सितः शोणितजश्च रक्तः समस्तदोषप्रभवो विचित्रः ॥ ३४ ॥ म्लायी पीतनीलवर्णः
॥ ३३ ॥ ३४ ॥ अथ वातादिना हेतुभूतेन जनिते नेत्रविषये मंडले रूपविशेषमाह ॥ अ
रुणं मंडलं वाताच्चंचलं परुषं तथा ॥ पित्तान्मंडलं नीलं कांस्याभं पीतमेव वा ॥ ३५ ॥
कांस्याभं पीतमेव वेति पाठे तं पीतं वेत्यर्थः ॥ कथमेतत् व्याधिप्रभावात् ॥ ३५ ॥

ष्मरणावहलं स्निग्धं फेनवकुंदेंदुपांडुरं॥ चलपल्लवताग्रास्पस्पृक्तो विंदुरिवांभसः॥ २१

मानेतु नयनेमंडलं तद्धिस्यदीति॥ २२॥ वहलं स्थूलं॥ २३॥ मंडलं तु भवेचित्रं लिंगनाशेत्रि

दोषजे॥ २४॥ चित्रं वातादिवर्णीः॥ २४॥ प्रवालपल्लवप्रभं मंडलं शोणितात्मकं॥ रक्तजं

मंडलं दृष्टौ स्थूलकाचारुणाप्रभं॥ २५॥ रक्तजं पित्तानुगामि रक्तजं॥ स्थूलकाचारुणप्रभं

स्थूलकाचस्येवारुणप्रभायस्य तत॥ एतेन स्थौल्यमरुणत्वंच वोध्यते॥ काचोत्रा

रुणो विवक्षितः॥ २५॥ अथपरिम्लायिनो मंडलमाह॥ परिम्लायिनि रोगे स्यान्म्ला

यिनीरुग्मघ्यापिवा॥ दोषक्षयात्स्वयंतत्र कदाचित्स्यात्तु दर्शनं॥ २६॥ दोषक्षयादित्या

दि॥ तत्रपरिम्लायिनीकालांतरेण दोषक्षयात कदाचित्स्वयमेव दर्शनं स्यात॥ मधु

कोसेतु दोषक्षयात्कर्मक्षयादित्यर्थः॥ २७॥ अथानुक्तदोषलिंगसंग्रहार्थमाह॥

यथास्वं दोषलिंगानि सर्वेष्वेव भवंति हि ॥ ४० ॥ अथ पित्तविदग्धदृष्टेर्लक्षणमाह । पि
त्तेन दुष्टेन गतेन दृष्टिं पीता भवेद्यस्य नरस्य दृष्टिः ॥ पीतानि रूपाणि च तेन पश्येत्स वै
नरः पित्तविदग्धदृष्टिः ॥ ४१ ॥ गतेन दृष्टिमिति दृष्टावयविप्रथमद्वितीयपटलगते ने
तिबोद्धव्यं ॥ तेन व्याधिना ॥ ४१ ॥ तस्मिन्नेव पित्ते दुष्टे तृतीयं पटले गते रूपविशेषमा
ह ॥ प्राप्ते तृतीये पटले तु दोषे दिवा न पश्येन्निशि वीक्षते सः ॥ रात्रौ स शीतानुगृहीत
दृष्टिः पित्ताल्पभावात्सकलानि पश्येत ॥ ४२ ॥ दोषे पित्ते ॥ पितानीति पाठांतरे तानि रूपाणि
४२ अथ श्लेष्मविदग्धदृष्टेर्लक्षणमाह । तथा नरः श्लेष्मविदग्धदृष्टिस्तानि शुक्ला
नि हि मन्यते तु ॥ ४२ ॥ तानि रूपाणि ॥ अत्रापि श्लेष्मणौ दुष्टौ प्रथमद्वितीयपटलगत
स्यैतल्लिंगं बोद्धव्यं ॥ ४२ ॥ स एव श्लेष्मा पटलत्रयं गतो नक्तांध्यं करोतीत्याह ॥ त्रिषु

॥ ४६ ॥

स्थितो यः पटलेषु दोषो नक्तांध्यमाया दधातिसद्य॥ दिवा स सूर्यानुगृहीत दृष्टिः पश्ये
तु रूपाणि ककफाल्पभावात्॥ ४३॥ दोषोत्र कफस्तस्योपक्रांतत्वात्॥ नक्तांध्यस्य श्लेष्म
विदग्धदृष्टावंतर्भूतत्वाच्चोपपद्यमानता॥ ४४॥ अथ धूमदर्शिनमाह॥ शोकज्वरायाया
सशिरोभितापैरभ्याहतायस्य नरस्य दृष्टिः॥ धूम्रांस्तु यः पश्यति सर्वभावान् स धूम
दर्शीति नरः प्रदिष्टः॥ ४४॥ शिरोभितापः शिरसि घर्मादिना संतापः॥ एतस्य पित्तदो
षो वेदुव्यः॥ अयं च रोगो वाह्यपटलस्थेन दोषेण जन्यत इति गदाधरः॥ द्वितीयप
टलाश्रितेन दोषेणेति कार्त्तिकः॥ ४४॥ अथ ह्रस्वजात्यमाह॥ यो वासरे पश्यति कृ
च्छ्रतोथ रूपं महच्चापि निरीक्ष्यते स्वं॥ रात्रौ पुनर्यः प्रकृतानि पश्येत स ह्रस्वजात्यो
मुनिभिः प्रदिष्टः॥ ४५॥ अथ नकुलांध्यमाह॥ विद्योततेयस्य नरस्य दृष्टिर्दोषा

॥४८८॥

भिपन्नानकुलस्यवदृत् चित्राणि रूपाणि दिवा सपश्येत् स वै विकारेण कुलांध्रसं-
ज्ञः ॥४६॥ विद्योतते प्रतिभासेते दोषाभिपन्ना सर्वदोषयुक्तेत्यर्थः ॥४६॥ अथ गंभीरकी
माह ॥ दृष्टिर्विरूपा श्वसनोपसृष्टा संकुच्यमाभ्यंतरतः प्रयाति ॥ रुजावगाढा च तमक्षि
रोगं गंभीरकेति प्रवदंति तज्ज्ञाः ॥४७॥ विरूपा विकृता श्वसनोपसृष्टा वातोपद्रुता ॥
रुजावगाढा गंभीरवेदनान्विता ॥४७॥ अथ निमित्तानिमित्तसंज्ञकावाह ॥ बाह्यौ पुनर्द्वौ
विहसंप्रदिष्टौ निमित्ततश्चाप्यनिमित्ततश्च ॥ निमित्ततस्तत्र शिरोभितापात् ज्ञेयस्त्व
भिष्यंदनिदर्शनैः सः ॥४८॥ बाह्यौ सम्युतोक्तद्वादशसंख्येभ्योधिकौ ॥ तत्र निमित्ततश्चा
ह ॥ शिरोभितप्यते येन विषकुसुमगंधवहपवनस्पर्शेन स शिरोभितापस्तस्मात् ॥४८८॥
अभिष्यंदनिदर्शनैः ॥ रक्ताभिष्यंदलिंगैरिति गदाधरः ॥ सन्निपाताभिष्यंदलिंग

इतिकाचिकः ॥४५॥ निमित्तसंज्ञकमभिधायानिमित्तसंज्ञकमाह ॥ सुरर्षिगंधर्वमहोरगाणां
संदर्शनेनापि च भास्वरस्य ॥ हन्येत दृष्टिर्मनुजस्य यस्य स लिंगनाशस्त्वनिमित्तसंज्ञः
४६ ॥ अत्रानुपतप्यमानानां सुरादीनां दर्शनं निमित्तमप्यनिमित्तं मन्यते ॥ संदर्शनेनस
म्यक्दर्शनेन ॥४७॥ अथ तस्य लक्षणमाह ॥ तत्राक्षि विस्पष्टमिवावभाति वैदूर्यवर्णा
विमला च दृष्टिः ॥५०॥ विस्पष्टं प्रसन्नं ॥ विदूर्यवर्णा शुभा मा प्रकृतिवर्णेति यावत् ॥५०॥
इति दृष्टिजाः ॥ अथ कृष्णमंडलरोगानाह ॥ तत्रादौ तेषां नामानि संख्यां चाह ॥ यत्सव्रणं
शुक्रमथाव्रणं च पाकात्ययश्चाप्यजकातथैव ॥ चत्वार एते नयनामयास्तु कृष्णप्र
देशे नियता भवंति ॥५१॥ तत्र सव्रणशुक्रलिंगमाह ॥ निमग्नरूपं तु भवेद्धि कृष्णे सूच्ये
व विद्धं प्रतिभाति यद्वै ॥ स्रावं स्रवेदुष्णमतीव यच्च तत्सव्रणं शुक्रमुदाहरंति ॥५२॥

॥ ४८९ ॥

निमग्नरूपमिति शुक्लविशेषणं ॥ अच्युतपदमिति शुक्लस्य वर्तुलत्वं व्यापकत्वं च बो
धयति ॥ अवेदित्वनैनैव श्रावेयोधिते आवपदं निरंतरश्रावबोधार्थं ॥ ५२ ॥ अथ सा
ध्यासाध्यतस्सत्वमाह ॥ दृष्टे समीपेन भवेत्तु पञ्च न चावगाढं न च संश्रवेद्यत ॥ अवे
दनं पल्लच पुगमशुक्लं न सिद्धिमायाति कदाचिदेव ॥ ५३ ॥ न चावगाढं एकत्वं न गतं ॥
न च संश्रवेदत्यर्थमित्यर्थः ॥ अवेदनं दृष्टिदृदनं ॥ न च पुगमशुक्लं एकमित्यर्थः ॥ ए
वंविधं सद्वृणां कदाचित्सिध्यति ॥ एतद्विपरीतं न सिध्यति ॥ ५३ ॥ अथामलं शुक्ल
माह ॥ स्पंदात्मकं कृस्मगतं तु शुक्लं प्रांते दृढं दृप्ततिमावभासं ॥ वैहायसाभूपतिम
प्रकाशमप्यामलं साध्यतमं वदंति ॥ ५४ ॥ स्पंदात्मकं अभिष्वंदहेतुकं ॥ सर्वेषाम
स्मि रोगाणाम अभिष्वंदहेतुकत्वे प्यस्य नियमबोधार्थं स्पंदात्मकमित्युक्तं ॥ प्रां

॥ ४८९ ॥

खेंदुकुंदप्रतिमावभासंशंखेंदुकुंदसदृशमवभासते तत ॥ एतेनशुक्लत्वंबोधितं ॥
विहायसाभूप्रतिमप्रकाशं आकाशस्यमेघवत्प्रकाशतेयत ॥ एतेन स्वच्छत्वंबो
धितंसाध्यतमंसुखसाध्यं ॥ ५४ ॥ अथसाध्यतमेस्यास्यवस्थाभेदेनकष्टसाध्य
तामाह ॥ गंभीरजातंबहलंचशुक्लंचिरोत्थितंचापिवदंतिकृच्छ्रं ॥ ५४ ॥ गंभीरजा
तंद्वित्रित्वग्गतं ॥ बहलंपुष्टं ॥ ५४ ॥ अथास्यासाध्यतामाह ॥ विच्छिन्नमध्यंपिशि
तावृतंचचलंसिरासृतमदृष्टिकृच्च ॥ छिन्नत्वगातंतोहितमेततश्च चिरोत्थितंचा
पिवदंत्यसाध्यं ॥ ५५ ॥ विच्छिन्नमध्यंविशीर्णमांसत्वान्निम्नमध्यं ॥ शिरासृ
तंशिरायांजातं ॥ अदृष्टिकृत दर्शनाभावकृत ॥ छिन्नत्वगातंपटलद्वयगतं ॥ एत
द्धिच्छिन्नमध्यत्वादिलिंगसहितमसाध्यं ॥ नतुकेवलं ॥ गंभीरजातत्स्वकष्टसा

धत्वाभिधानात् ॥ एवं चिरोत्थितमपि ५५ ॥ अथापरमप्यसाध्यलक्षणमाह उक्ता।
॥ ५०० ॥ अपातः पिच्छिकाचनेत्रे यस्मिन् भवेन्मुद्गनिभं च शुक्रं ॥ तदप्यसाध्यं प्रवदंति केचि
दन्यच्च यत्तित्तिरिपक्षतुल्यं ५६ ॥ मुद्गनिभं च शुक्रमाकारेण ॥ ततनेत्रं ॥ तित्तिरिप
क्षतुल्यं तित्तिरिपक्षवच्छबलं ॥ ५६ ॥ अथाक्षिपाकात्ययमाह ॥ श्वेतः समाक्रामति।
सर्वतो हि दोषेण यस्यासितमंडलं तु ॥ तमक्षिपाकात्ययमक्षिकोपं सर्वात्मकं व
र्जयितव्यमाहुः ॥ ५७ ॥ श्वेतदोषेण कृत इति शेषः ॥ तमक्षिकोपमक्षिपाकात्यय
माहुः ॥ अत्र पाकोपि स्यात् ॥ अत एव सस्मृतः ॥ शोफाश्रुपाकार्तियुते नेत्र इति ॥ ५७
अथाजकजातमाह ॥ अजापुरीषप्रतिमो रुजावान् सलोहितो लोहितपिच्छला
श्रुः ॥ विगृह्य कृष्णं प्रचयोभ्युपैति तं चाजकाजातमिति व्यवस्येत् ॥ ५८ ॥ अजा ॥ ५०० ॥

पुरीषप्रतिमः पुष्पाख्या पुरीषवत्स्यः ॥ स लोहितः ईषल्लोहितः ॥ विग्रहस्य कृत्स्नमिति

महत्वेन समस्तं कृष्णभागं आश्रित्य आस्पृश्येति आयाति ॥ प्रचयोच्छ्रायः सच मे

दसो बोद्धव्यः ॥ व्यवस्येत जातीयात ॥ ५५ ॥ इति कृष्णमंडलजा रोगाः ॥ अथ पञ्च शुक्लभा

गजा रोगाः ॥ तत्र तेषां नामानि संख्या चाह ॥ प्रस्तारिशुक्लक्षतजाधिमांसस्नाय्वर्म

संज्ञाः खलु पंच रोगाः ॥ स्याच्छुक्तिका स्यार्जुनपिष्टिकाख्या जालं सिरालां पिटि

काश्च स्नासां ॥ रोगा बलासग्रथितेन सार्द्धमेकादशोक्ताः खलु शुक्लभागे ॥ ५६ ॥ त

त्र प्रस्तारिशुक्लार्मरोगलक्षणमाह ॥ प्रस्तार्यर्म तनु स्तीर्णं श्यावं रक्तनिभं सि

तं ॥ शुक्ले तं मृदु सशुक्लार्म शुक्ले तद्वर्द्धते चिरात ॥ ५७ ॥ अर्म मांसं ॥ तनु पत्तलं ॥ स्ती

र्णं विस्तीर्णं ॥ श्यावं रक्तनिभमित्यत्र विकल्पो बोद्धव्यः ॥ शुक्ले अर्थालिपेन स्थे

॥५०१॥

तिपूरणीयं ॥ चिरेण पद्धनं कफजत्वात् ॥ ६० ॥ अथ क्षतजाधिमांसार्मरोगलक्षणा
माह ॥ पद्माभं मृदु रक्तार्म यन्मांसं चीयते सिते ॥ पृथु मृद्वधिमांसार्म बहलं च यकृ
न्निभं ॥ ६१ ॥ पद्माभं रक्तवर्णं पद्माभं चीयते उपचीयते ॥ पृथु विस्तीर्णं बहलं पृथुं च ॥
यकृन्निभं ईषल्लक्ष्मलोहितं ॥ एतच्चिदोषजं ॥ ६१ ॥ अथ स्नाय्वर्मरोगलक्षणमाह ॥
स्थिरं प्रसारि मांसाढ्यं शुष्कं स्नाय्वर्म पंचमं ॥ ६२ ॥ स्थिरं कठिनं ॥ शुष्कं स्त्राव रहितं
इदमपि सन्निपातजं ॥ ६२ ॥ अथ शुक्तिकार्जुनावाह ॥ श्यावाः स्फः पिष्टितनिभा
श्च विंदवो ये शुक्ल्याभाः सित पतिताः स शुक्ति संज्ञः ॥ एको यः शशरुधिरप्रभस्तु
विंदुः शुक्लस्थो भवति तमर्जुनं वदंति ॥ ६३ ॥ श्यावाः पांडुश्याभाः ॥ पिष्टितनिभाः
पिष्टितस्य तियमेन मादीपि येषां ते तथा ॥ शुक्लयाभाः जलशुक्तिनिभाः ॥ श्यावा

॥५०१॥

इत्यादिवर्त्मत्रयेचिकल्प्योयोद्ध्व्यः ॥ अथपित्तजः ॥ प्राप्तरुधिरप्रभः अत्यारक्ता ॥ रक्तार्मः
अथरक्तजः ॥ ९९ ॥ अथपिष्टकमाह ॥ श्लेष्ममारुतकोपेनशुक्लेमांसंसमुन्नतं ॥ पिष्ट
वत्पिष्टकंविद्धिमलाक्तादर्शसन्निभं ॥ ९४ ॥ पिष्टवत आलेपनपिष्टवत् ॥ मलाक्ता
दर्शसन्निभंध्र इत्यादिपुतदर्पणतुल्यं ॥ अथवातकफजः ॥ ९४ ॥ अथशिराजालशि
रापिटिकाआह ॥ जालाभःकठिनशिरोरक्तः शिरारक्तांसंतानोभवतिशिराधि
जालसंज्ञः ॥ शुक्लस्थाःसितपिटिकाःशिरावृतापाश्वाविद्यात्सितसमीपजाः ॥
शिराजाः ॥ ९५ ॥ संतानःविकारः ॥ शिराधिजालसंज्ञःशिराजालसंज्ञः ॥ असितस
मीपजाःकृष्णभागादन्यत्रशुक्लभागजाः ॥ ९५ ॥ अथबलासग्रथितमाह ॥ कांस्या
भोमृदुरप्यवारिबिंदुकल्पोविद्येयोनयनसितेबलाससंज्ञः ॥ ९५ ॥ कांस्याभःश्वे

नः कफजत्वादेव ॥ अमृदुः कठिनः ॥ वारिबिंदुकल्प इत्यनेन मनागम्लतत्वं बोध्यते ॥ च
लाससंज्ञः चलाससंग्रथितसंज्ञः ॥ क्वचिदेकदेशे नापि समुदायावगमात् यथा भी
मो भीमसेन इत्यादि ॥ अत एव शुश्रुतो नाम संग्रहे चलाससंग्रथितपदं निदिष्टवान् ॥
६५ ॥ इति शुक्लभागजा रोगाः ॥ अथ वर्त्मजा रोगाः ॥ तत्र वर्त्मनी ढकनयने छदवाच्ये
यत उक्तं ॥ वर्त्मनी नयनछदाविति ॥ अथ तत्रस्थानां रोगाणां नामानि संख्यां चाह
उत्संगीन्यथ कुंभीकाः पोथक्यो वर्त्मशर्करा ॥ तथार्शो वर्त्मशुष्कार्शस्तथैवांजननामि
काः ॥ ६६ ॥ बहुलं वर्त्म पश्चापितथा चैव वर्त्मबंधकः ॥ क्लिष्टवर्त्म तथा वर्त्मकर्दमः श्या
वं वर्त्म च ॥ ६७ ॥ प्रक्लिन्नवर्त्म चाक्लिन्नवर्त्म वातहतं च यत् ॥ वर्त्मार्बुदं निमेषश्च शो
णितार्शस्तथैव च ॥ ६८ ॥ लगणो विसवर्त्मापि कुंचनं नाम तत्परं ॥ एकविंशति

५० २

रित्येते विकारा वर्त्मसंश्रयाः ॥ इदानीं तेषूत्संगपिटिकामाह ॥ अभ्यंतरमुखी ताम्रा बाह्यतो
वर्त्मनस्तथा ॥ सोत्संगोत्संगपिटिका रक्तजा स्थूलकंडुरा ॥ ७० ॥ अभ्यंतरमुखी वर्त्मनो
भ्यंतरे मुखं यस्याः सा ॥ वर्त्मनो बाह्यतस्ताम्रा ॥ सोत्संगा अंतःपूया ॥ उत्संगपिटिका
उत्संगे क्रोडे वद्धः पिटिका यस्याः सा ॥ स्थूलकंडुरा स्थूला कंडुरा चेति कर्मधारयः ॥ एका
धरवर्त्मांतजा योदुष्या ॥ वर्त्मोत्संगे धरे जंतोरिति विदेहवचनात् ॥ ७० ॥ अथ कुंभीकामा
ह ॥ वर्त्मांतः पिटिका ध्माता भिद्यंते च स्रवंति च ॥ कुंभीकाबीजसदृशाः कुंभीकाः सन्नि
पातजाः ॥ ७१ ॥ ध्माता उच्छूनाः कुंभीकाबीजसदृशाः कुंभीका कच्छदेशे दाडिमाकार फला
लता तद्बीजतुल्याः ॥ ७१ ॥ अथ पोथकीराह ॥ स्राविण्यः कंडुरा गुर्व्यो रक्तसर्षपसन्नि
भाः ॥ रुजावत्यश्च पिटिकाः पोथक्य इति कीर्तिताः ॥ ७२ ॥ गुर्व्यः गौरवयुक्ताः ॥ ७२ ॥

॥५०३॥

अथ वर्त्मशर्करामाह॥ पिटिकाभिः सुसूक्ष्माभिर्घनाभिरभिसंवृता॥ पिटिकायाः खरा
स्थूला वर्त्मस्था वर्त्मशर्करा॥ ७३॥ खरा कठिना॥ ७३॥ अथार्शोवर्त्माह॥ एर्वारुबीजप्रतिमा
पिटिका मंदवेदनाः श्लक्ष्णाः खराश्च वर्त्मस्थास्तदर्शोवर्त्म कीर्त्यते॥ ७४॥ एर्वारुः कर्क
टी॥ खराः तीक्ष्णाग्राः॥ ७४॥ अथ शुष्कार्शआह॥ दीर्घांकुरः खरः स्तब्धो दारुणोऽभ्यंतरो
द्भवः॥ व्याधिरेषो भुवि ख्यातो शुष्कार्शो नामनामतः॥ ७५॥ खरः कर्कसः॥ स्तब्धः कठि
नः॥ दारुणो बहुदुःखकरः॥ अभ्यंतरोद्भवः वर्त्माभ्यंतरस्थितः। नामतः प्रसिद्धितः
सन्निपातजमिदं॥ ७५॥ अथांजननामिकामाह॥ दाहतोदवती ताम्रा पिटिका वर्त्मसंभ
वा॥ मृद्वी मंदरुजा सूक्ष्मा ज्ञेया सांजननामिका॥ ७६॥ अथ बहलवर्त्माह॥ वर्त्मो
पचीयते यस्य पिटिकाभिः समंततः॥ सवर्णाभिः स्थिराभिश्च विद्याद्बहलवर्त्म

॥५०३॥

य

ततः ॥ ७७ ॥ तत्संनिपातात् ७७ ॥ अथ वर्त्मावबंधकमाह कंडूरेणाल्पतोदेन वर्त्मशोफेन
मानवः ॥ न समं छादयेदक्षि यत्रासौ वर्त्मावबंधकः ॥ ७८ ॥ असमं छादयेदक्षीति शोथ
योगाल्पच्छादयदक्षि पिदधाति ॥ एष सन्निपातजः ॥ ७८ ॥ अथ क्लिष्टवर्त्माह मृद्वल्प
वेदनं ताम्रं यद्वर्त्म सममेव च ॥ अकस्माच्च भवेद्रक्तं क्लिष्टवर्त्मेति तद्विदुः ॥ ७९ ॥ समम
क्कालं ॥ अकस्मादनियमात् ॥ एतत्कफदुष्टरक्तजं ॥ ७९ ॥ अथ वर्त्मकर्दममाह ॥ क्लि
ष्टं पुनः पित्तयुतं शोणितं विदहेद्यदा तदा क्लिन्नत्वमापन्नमुच्यते वर्त्मकर्दमं ॥ ८० ॥
क्लिष्टं प्रागुक्तलक्षणमेव वर्त्म ॥ शोणितं कर्तृ ॥ विदहेद्दूषयति ॥ क्लिन्नत्वमार्द्रत्वं
८० ॥ अथ श्याववर्त्माह ॥ यद्वर्त्म बाह्यतोंतश्च श्यावं शूनं सवेदनं ॥ सकंडूकं परिक्ले
दि श्याववर्त्मेति तद्विदुः ॥ ८१ ॥ शूनं शोफयुक्तं ॥ ८१ ॥ अथ प्रक्लिन्नवर्त्माह ॥ अरुजं।

वाह्यतःशूनंवर्त्मयस्यनरस्यहि॥प्रक्लिन्नवर्त्मतद्विंद्यात्क्लिन्नमत्यर्थमंततः॥८२॥अ
रुजंईषद्वथ्यं॥८२॥अथाक्लिन्नवर्त्माह॥यस्यधौतान्यधौतानिसंबंधंतेपुनःपुनः
वर्त्मान्यपरिपक्कानिविंद्यादक्लिन्नवर्त्मतत्॥८३॥वर्त्मानीतिवहुवचनंनेत्रद्वयमव
नव्याप्यनार्थं॥८३॥अथवातहतवर्त्माह॥विमुक्तसंधिनिश्चेष्टंवर्त्मयस्यनमील्यते
एतद्वातहतंविद्यात्सरुजंयदिवारुजं॥८४॥विमुक्तसंधिस्थस्थानच्युतसंधि॥निश्चे
ष्टंनिमेषोन्मेषादिरहितं॥नमील्यतेनसंकुचति॥एतद्वातजमसाध्यंच॥८४॥अथ
वर्त्मार्बुदमाह॥वर्त्मांतरस्थंविषमंग्रंथिभूतमवेदनं॥आचक्षीतार्बुदमितिसरक्त
मविलंबिच॥८५॥विषमनमवर्तुलं॥ग्रंथिभूतंकठिनं॥अवेदनंईषद्वेदनं॥सरक्तंई
षल्लोहितं॥अविलंबिअस्रस्तं॥८५॥अथनिमेषमाह॥निमेषणीःशिरावायुः

प्रविष्टो वर्त्मसंश्रयः ॥ संचालयति वर्त्मानि निमेषः स न सिध्यति ॥ ८६ ॥ अथ शोणिता
र्शआह ॥ वर्त्मस्थो यो विवर्द्धेत लोहितो मृदुरंकुरः ॥ तद्रक्तजं शोणितार्शः छिन्नं चा
पि प्रवर्द्धते ॥ ८७ ॥ तद्रक्तजमसाध्यं ॥ ८७ ॥ अथ लगणमाह ॥ अपाकी कठिनः स्थूलो ग्रं
थिर्वर्त्मभवो रुजः ॥ सकंडूः पिच्छिलः कोलप्रमाणो लगणः स्मृतः ॥ ८८ ॥ अथ पंकफजः
८८ ॥ अथ विसवर्त्माह ॥ त्रयो दोषा बहिः शोथं कुर्युः छिद्राणि वर्त्मनोः ॥ प्रस्रवेदंत
रुदकं विसवद्धि सवर्त्म तत् ॥ ८९ ॥ छिद्राणि अंतः छिद्राणि च कुर्युरित्यन्वयः ॥ विस
वन्नालवत् ॥ बहुछिद्रत्वात् ॥ ८९ ॥ अथ कुंचनमाह ॥ वाताद्या वर्त्मसंकोचं जनयं
ति मलाय दा ॥ तदा द्रष्टुं न शक्नोति कुंचनं नाम तद्विदुः ॥ ९० ॥ मलाद्यभिधाने दृष्ट
त्वप्रतिपादनार्थं ॥ ९० ॥ इति वर्त्मजा रोगाः ॥ अथ पक्ष्मजरोगौ ॥ तत्र पक्ष्मशातपक्षि

॥५०५॥

लोमानि ॥ तत्रत्वयो रोगयोर्नाम्नी आह ॥ पक्ष्मकोपः पक्ष्मशातो रोगौ द्वौ पक्ष्मसंज्ञयौ
तत्र पक्ष्मकोपमाह प्रचालितानि वातेन पक्ष्माण्यक्षि विशंति हि ॥ घृष्यंत्यक्षि मुहु
स्तानि संरंभं जनयंति च ॥ ८१ ॥ असिते सितभागे च मूलकोषात्पतंत्यपि ॥ पक्ष्मको
पः स विज्ञेयो व्याधिः परमदारुणः ॥ ८२ ॥ प्रचालितानि प्रतिलोमीकृतानि ॥ संरं
भं शोथं ॥ पतंत्यपीत्यपिशब्दान्नपतंत्यपि ॥ अयं सन्निपातजो याप्यः ॥ ८१ ॥ ८२
तयोंतरे क्रममपि पक्ष्मकोपमाह ॥ यत्पक्ष्म देहलीं मुक्त्वा वर्त्मनोतः प्रजायते ॥ घृषी
त्यक्ष्यसितेऽच्येते पक्ष्मकोपः स उच्यते ॥ ८३ ॥ अथ पक्ष्मशातमाह ॥ वर्त्म पक्ष्माशय
गतं पित्तं लोमानि शातयेत् ॥ कंडूं दाहं च कुरुते पक्ष्मशातं तमादिशेत् ॥ ८४ ॥ पक्ष्माश
यः पक्ष्ममूलं ॥ शातयेत् स्रवतयेत् ॥ कंडू रत्रे पित्तप्रकोपित रक्तादिति मधुकोशस्क

॥५०५॥

त् ॥ ९४ ॥ इति पक्ष्मजौ रोगौ ॥ अथ संधिजा रोगाः । तत्र संधयः षट् । तानाह । पक्ष्मवर्त्मगतः संधिर्वर्त्मशुक्लगतोपरः ॥ शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतोपि च । ततः कनीनिकगतः षष्ठश्चापांगसंश्रितः ॥ ९५ ॥ अथ तत्रत्यानां रोगाणां नामानि संख्यां चाह ॥ पूयालसः सोपनाहः स्रावाश्चत्वार एव च ॥ पर्वणीकालजीजंतुग्रंथिः संधौ नवामयाः ॥ ९६ ॥ तेषु पूयालसोपनाहावाह ॥ पक्कः शोथः संधिजः संस्रवेद्यः सांद्रं पूयं पूतिपूयालसः सः ॥ ग्रंथिर्नाल्पो दृष्टिसंधावपाकी कंडूप्रायो नीरुजस्तूपनाहः ॥ ९७ ॥ संधिजः कनीनिकसंधिजो वा द्रव्यः ॥ पूयालसं तु तं विद्यात्संधौ कानीनके व्रणमिति वचनात् ॥ कानीनसंधिश्चात्र नासासमनुनेत्रांतः ॥ नाल्पः महान् ॥ अपाकी इति पाकी नीरुजः ईषद्वेदनः ॥ वायुः श्लेष्माणमादाय दृष्टिसंधौ व्यवस्थितः ॥ अह

॥५०ही॥

णां क्लिष्टिनं ग्रंथिं जनयत्यस्य वेदनमिति देहवचनात् ॥ ८७ ॥ अथ स्रावाणां संप्राप्तिमाह ॥ ग
त्वा संधीनश्रुमार्गेण दोषाः कुर्युः स्रावान् लक्षणैः स्वैः रूपेतान् ॥ तं वै स्रावं नेत्रनाडीति
चैके तस्या लिंगं कीर्त्तयिष्ये चतुर्द्धा ॥ ८८ ॥ संधीनिति बहुवचनेन सर्व एव संधयो गृह्यं
ते ॥ एके च दंतीतिशेषः ॥ ८८ ॥ तत्र वातिकस्रावो न भवतीति केवलेन वातेन तदसंभवात् ॥
अथ पैत्तिकं श्लैष्मिकं च स्रावमाह ॥ हरिद्राभं पीतमुष्णं जलं वा पित्तास्रावः संस्रवेत्
संधिमध्यात् ॥ श्वेतं सांद्रं पिच्छिलं यः स्रवेत्तु श्लेष्मास्रावो सौ विकारः प्रदिष्टः ॥ ८९
हरिद्राभं पीतरक्तं ॥ परतः पीतमरुणस्य योगात् ॥ जलं वेति अल्पवद्धो हरिद्राभं पीतं वे
त्यत्र संबध्यते ॥ पित्तास्रावः पित्तस्रावः एवं श्लेष्मास्रावादयः ॥ ८९ ॥ अथ सन्निपा
तस्रावं रक्तस्रावं चाह ॥ शोफः संधौ संस्रवेद्यस्त्वपक्वः पूयस्रावः सर्वजः संमतः ॥

॥५०ही॥

सः॥ रक्तास्रावः शोणितोत्थो विकारो गच्छेद्दुष्टं तत्र रक्तं प्रभूतं॥१००॥ पक्वः शोथः पा
क्रयान् शोथः॥ रक्तास्राव इत्यनेनैव रक्तजत्वे सिद्धे शोणितजो विकार इति यदुच्यते
तदत्यन्तकुपितरक्तजत्वप्रतिपादनार्थं॥१००॥ अथ पर्वणीकामलजीं चाह॥ ताम्रा
तन्वी दाहपाकोपपन्ना रक्तात्स्यात् पर्वणी चारुवक्ता जाता संधौ कृष्णशुक्लौ लजी।
स्यात् तस्मिन्नेव व्याहृता पूर्वलिंगैः॥१०१॥ ताम्रा तन्वीत्यारभ्य जाता संधौ कृष्ण
शुक्ल इत्यंतं पर्वणीकाया लक्षणं॥ तस्मिन्नेवेत्याद्यलज्या लक्षणं॥ तस्मिन्नेव कृ
ष्णशुक्लयोरेव संधौ॥ भेदार्थमाह॥ पूर्वलिंगैः प्रमेहाधिकारलिखितैः॥ रक्ता।
सिता स्फोटचिता दारुणा चालजी भवेदिति वचनात्॥ व्याहृता कथिता॥१०१॥ अथ
जंतुग्रंथिमाह॥ जंतुग्रंथिर्वर्त्मनः पक्ष्मणोऽन्तः कंडूं कुर्युर्जंतवः संधिजाताः॥ नाना

॥ ५०७ ॥

हृष्टा वर्त्मसु क्लान्तसंधौ गच्छंत्यंतर्लोचनं दूषयंतः ॥ १०२ ॥ वर्त्मनः पक्ष्मणश्च संधिजा
ता इत्यन्वयः ॥ अयं सन्निपातजः ॥ १०२ ॥ इति संधिजा रोगाः ॥ अथ समस्तनेत्ररोगाः ॥
तेषां नामानि संख्यां चाह ॥ स्यंदास्तु चत्वार इहोपदिष्टाश्चत्वार एवेह तथाधिमंथाः
पाकः सशोथः स च शोथहीनो हताधिमंथोनिलपर्ययश्च ॥ १०३ ॥ शुष्काक्षिपाक
स्त्विह कीर्तितश्च तथान्यतोवात उदीरितश्च ॥ दृष्टिस्तथाम्लाध्युषिता शिराणा
मुत्पातहर्षौ च समस्तनेत्रे ॥ १०४ ॥ एवं समस्तनेत्रे स्फरामया दश सप्त च तेषामिह
पृथग्वक्ष्ये यथावल्लक्षणान्यपि ॥ ५ ॥ तेष्वभिष्यंदाश्चत्वार इत्याह ॥ वातात्पित्ता
त्कफाद्रक्तादभिष्यंदश्चतुर्विधः ॥ प्रायेण जायते घोरः सर्वनेत्रामयाकरः ॥ ६ ॥
घोरः दुस्सहवेदनः ॥ सर्वनेत्रामयाकरः सर्वेषामेव नेत्रामयानां नेत्ररोगाणां

॥ ५०७ ॥

अधिमंथादीनां आकरं स्थानं ॥ उत्पत्तिकरत्वात् ॥ इति पूवातिकमभिष्यंदमाह ॥ निस्तोद

नस्तंभनरोमहर्षसंघर्षपारुष्यशिरोभितापाः ॥ विशुष्कभावः शिशिराश्रुता च वा

ताभिपन्ने नयने भवंति ॥७॥ निस्तोदनं सूचीव्यधनवद्व्यथा ॥ स्तंभनं जडिमा संघर्षः

करकरिका ॥ पारुष्यं रूक्षत्वं ॥ शिरोभितापः शिरोव्यथा ॥ विशुष्कभावः दूषिकारहितत्वं

नत्वावरहितत्वं ॥ शिशिराश्रुता चेत्युक्तेः ॥ वाताभिपन्ने वातेन विद्रुते ॥७॥ अथ पै

त्तिकमभिष्यंदमाह ॥ दाहप्रपाकौ शिशिराभिनंदा धूमायनं बाष्पसमुद्भवश्च ॥ उ

ष्णाश्रुता पीतकनेत्रता च पित्ताभिपन्ने नयने भवंति ॥९॥ प्रपाकः प्रकृष्टः पाकः ॥ शि

शिराभिनंदा शीतलेच्छा ॥ धूमायनं नेत्राद्धूमोद्गम इव ॥ बाष्पसमुद्भवः अश्रुस्रावः

८ अथ श्लैष्मिकमभिष्यंदमाह ॥ उष्णाभिनंदा गुरुताक्षिशोफः कंडूपदेहावतिशी

॥ ५०८ ॥

ततश्च स्रावो मंदः पिच्छिलश्च चापि कफाभिपन्ने नयने भवंति ॥ ८ ॥ उपदेहः दूषिकया शि-
शिता ॥ ९ ॥ अथ रक्तजमभिष्यंदमाह ॥ ताम्राश्रुता लोहितनेत्रता च राज्यः समंता दति लो-
हिताश्च ॥ पित्तस्य लिंगानि च यानि तानि रक्ताभिपन्ने नयने भवंति ॥ १० ॥ पित्तस्य लिं-
गानि पित्ताभिष्यंदलिंगानि ॥ १० ॥ अथाधिमंथानामभिष्यंदजन्यत्वमाह ॥ वृद्धै-
रेतैरभिष्यंदैर्नराणामक्रियावतां ॥ तावंतस्त्वधिमंथाः स्युर्नयने तीव्रवेदनाः ॥
११ ॥ अथाधिमंथानां लक्षणमाह ॥ उत्पाट्यत इवात्यर्थं तथा निर्मथ्यते पि च ॥ सि-
रसोर्द्धं तु तं विद्यादधिमंथं स्वलक्षणैः ॥ १२ ॥ स्वलक्षणैः यथोक्तवातादिकृताभिष्यं-
दलक्षणैः अधिमंथं विद्यात ॥ अभिष्यंदेभ्यो धिमंथानां भेदार्थमाह ॥ सिरसो-
र्द्धं उत्पाट्यत इव ॥ तथा निर्मथ्यते पि चेति चतुर्ष्वधिमंथेषु बोद्धव्यं ॥ शिरसोर्द्ध-

॥ ५०८ ॥

वेदनाव्याधिप्रभावात् ॥१३॥ सचाधिमंथो यावता कालेन मिथ्याचारात् दृष्टिं हंति तदा
हा ॥ हन्याद्दृष्टिं श्लैष्मिकः सप्तरात्राद्यो धीमंथो रक्तजः पंचरात्रात् षड्रात्रोर्ध्वं वाति
को वै निहन्यान्मिथ्याचारात्पैत्तिकः सद्य एव ॥१३॥ अत्र सद्यःशब्देन त्रिरात्रमुच्यते
तत्रांतरे त्रिरात्रवचनात् ॥१३॥ अथ सशोथं पाकमाह ॥ कंडूपदेहाश्रुयुतः पक्वोदुंब
रसन्निभः ॥ संरंभी पच्यते यस्तु नेत्रपाकः सशोथजः ॥१४॥ पक्वोदुंबरसन्निभः लो
हित्वेन ॥ संरंभी शोथवान् ॥ अयं त्रिदोषजः ॥१४॥ अथाशोथपाकमाह ॥ शोथहीना
नि लिंगानि नेत्रपाकेत्वशोथके ॥१४॥ लिंगानि कंड्वादीनि लौहित्यांतानि ॥१४॥ अथ
हताधिमंथमाह ॥ उपेक्षणाद्दक्षि यदाधिमंथो वातात्मकः शोषयति प्रसह्य ॥ रु
जाभिरुग्राभिरसाध्य एष हताधिमंथः खलु नाम रोगः ॥१५॥ शोषयति शोषयि

॥ ५०८ ॥

त्यानाशयति ॥ अतएवविदेहः ॥ तत्पन्नमिवसंप्रवृद्धमवसीदतिलोचनमिति ॥ रुजाभि
स्रोदादिभिरुपलक्षितः ॥ १५ ॥ अथवातविपर्ययमाह ॥ वारंवारंचपर्य्येतिभ्रूवौने
त्रेचमारुतः ॥ रुजाभिःसहतीव्राभिःसज्ञेयोवातपर्य्ययः ॥ १६ ॥ पर्य्येतिपर्य्यायेणया
तिकदाचिद्भ्रुवौकदाचिन्नेत्रे ॥ १६ ॥ अथशुष्काक्षिपाकमाह ॥ यत्कूणितेदारुणरूक्ष
वर्त्मसंदृश्यतेचाविलदर्शनंच ॥ सुदारुणंयत्प्रतिबोधनेचशुष्काक्षिपाकोपहतंत
दक्षि ॥ १७ ॥ कूणितंसंकोचितंमुद्रितमितियावत् ॥ दारुणरूक्षवर्त्मदारुणंचिक्कतं
रूक्षंचवर्त्मयस्यतत् ॥ रूदमक्ष्णोविशेषणं ॥ संदृश्यतेसदाहंभवंति ॥ आविलदर्श
नंआविलस्याऽनच्छस्यदर्शनंयेनतत् ॥ यत्प्रतिबोधनेउद्घाटनेसुदारुणंअतिशू
येनविकृतंरूक्षोन्मीलनमित्यर्थः ॥ अयंरोगःसरक्तवातजन्यः ॥ १७ ॥ अथा ॥ ५०८ ॥

न्यतोवातमाह ॥ यस्यावटूकर्णशिरोहनुस्थो मन्यागतो वाप्यनिलोऽन्यतो वा ॥ कुर्याद्रु
जं वै भ्रुवि लोचने च तमन्यतोवातमुदाहरंति ॥ १५ ॥ अवटूः घाटा ॥ अन्यतो पक्ष्मादिदे
शं गतो वा ॥ अन्यतो वातः अन्यत्र स्थितोऽन्यत्र रुजं करोतीति अन्यतोवातः विदेहे
नाप्युक्तं ॥ मन्यानामंतरे वापुरुस्थितः पवनोऽपि वा ॥ करोति भेदं निस्तोदं शूलं खेचाक्ष्णो
र्भ्रुवो सत्यपा ॥ तमाहुरन्यतोवातं रोगं दृष्टिविदो जना इति ॥ १५ ॥ अथाम्लाध्युषितमा
ह ॥ श्यावं लोहितपर्यंतं सर्वमक्षि प्रपच्यते ॥ सदाहशोफं सास्रावममलाध्युषित
मम्लतः ॥ १८ ॥ श्यावः ईषन्नीलं ॥ अम्लतः अम्लभोजनतः ॥ तथा च सुश्रुतः ॥ अम्ले
न भुक्तेनेत्यादि ॥ १८ ॥ अथ शिरोत्पातमाह ॥ अवेदना वापि सवेदना वा यस्याक्षिरा
ज्यो हि भवंति ताम्राः ॥ मुहुर्विरज्यंति च याः समंतात्व्याधिः शिरोत्पात इति प्रदिष्टः

॥५३०॥

२० ॥ अक्षिराज्यः अक्षिशिराः ॥ विरज्यंति विकृतवर्णा भवंति ॥ रक्तजोयं ॥ २० ॥ अथ
शिराहर्षमाह ॥ मोहाच्छिरोत्पातउपेक्षितस्तु जायेत रोगः स शिराप्रहर्षः ॥ तत्राक्षिवा
स्रास्रवति प्रगाढं तथा न शक्नोत्यभिवीक्षितुं च ॥ २१ ॥ सः प्रसिद्धः ॥ २१ ॥ अथ नेत्रस्या
मतालक्षणमाह ॥ उदीर्णवेदनं नेत्रं रागशोथसमन्वितं ॥ घर्षनिस्तोदशूलाश्रु
युक्तमामान्वितं विदुः ॥ २२ ॥ उदीर्णवेदनं उद्भूतवेदनं ॥ घर्षः करकरिका ॥ एतल्लं
घनादिविधानार्थमंजनादिनिषेधार्थं चोक्तं ॥ तथा च तंत्रांतरे ॥ स्वेदो दिनानि चत्वा
रि लंघनं भोजनेन रः ॥ स्वादुः तिक्ताम्ललेपाश्च बाष्पस्यंदनमेव च ॥ एतानि नेत्र
रोगाणां सामानां पाचनानि हि ॥ अंजने सर्पिषः पानं कषायं गुरुभोजनं ॥ नेत्र
रोगेषु सामेषु स्नानं च परिवर्जयेतदिति ॥ २२ ॥ अथ नेत्रस्य निरामतालक्ष ॥५३०॥

णमाह॥ मंदवेदनताकंडूः संरंभाश्रुप्रशांतता॥ प्रसन्नवर्णता चाक्ष्णो निरामेक्ष
णलक्षणं॥२७॥ संरंभः शोफः॥२७॥ इति समस्तनेत्रजा रोगाः॥ इति नेत्ररोगनिदा
नं॥ अथ नेत्ररोगचिकित्सा॥ पटोलादिनात्रैफलेनापि पूर्वं परिस्निग्धमुद्धृत
मिस्रादिजुष्टं॥ हिताचारमाश्च्योतनैः पिंडिकाभिर्विडालांजनाद्यैर्विधिवच्चि
कित्सेत॥ विडालांजनाद्यैरित्यत्रादिशब्देन सेकतर्पणपुटपाकानां ग्रहणं॥
तदुक्तं॥ सेक आश्च्योतनं पिंडी विडालस्तर्पणं तथा॥ पुटपाकोंऽजनं चैभिः कल्पै
र्नेत्रमुपाचरेदिति॥ कल्पो विधिः। तत्राश्च्योतनविधिमाह॥ अथाश्च्योतन
कं कार्यं निशायां न कथंचन॥ उन्मीलितेऽक्ष्णि द्व्यंगुलमध्ये विंदुभिर्द्व्यंगुलाद्धि
तं॥ विंदवोष्टौ लेखने तु रोपणे दश विंदवः॥ स्नेहने द्वादश प्रोक्तास्ते शीतास्

॥५३१॥

कोष्णहृपिरणः ॥ उष्णे च शीतरूपाः स्फः सर्वत्रैवैष निश्चयः ॥ वाते तिक्तं तथा स्निग्धं।
पित्ते मधुरशीतलं ॥ तिक्तोष्णरूक्षं च कफे क्रमादाश्च्योतनं हितं ॥ आश्च्योतनानां स
र्वेषां मात्रास्याद्द्वादशोन्मिता ॥ ततः परं लोचनाभ्यां भेषजापनयो मतः ॥ वाङ्मा
त्रालक्षणं यथा ॥ निमेषोन्मेषणं पुंसामंगुल्योच्छोटिकाथवा ॥ गुर्वक्षरोच्चार
णं वा वाङ्मात्रेयं स्मृता बुधैः ॥ छोटिका अंगुलीभ्यां शब्दनिस्सारणं चुटकी ति
लोके ॥ तद्यथा ॥ बिल्वादिपंचमूलेन बृहत्येरंडशिग्रुभिः ॥ काथ आश्च्योतने कोष्णो
वाताभिष्यंदनाशनः ॥ अंबुपिष्टैर्निंबपत्रैस्त्वचं रोध्रस्य लेपयेत् ॥ प्रताप्य वह्नि
नापिष्टात्तद्रसान्नेत्रपूरणं ॥ वातोत्थं रक्तपित्तोत्थमभिष्यंदं विनाशयेत् ॥ त्रिफ
लाश्च्योतनं नेत्रे सर्वाभिष्यंदनाशनं ॥ स्त्रीस्तन्याश्च्योतनं नेत्रे रक्तपित्तानिला

॥५३१॥

र्निर्जितः॥ क्षीरं सर्पिर्घृतं वापि पानात् रक्तरुजं जयेत्॥ अथ पिंडीविधिमाह॥ पिंडी कव
लिका प्रोक्ता वध्यते वस्त्रपट्टकैः॥ नेत्राभिष्यंदयोग्या सा व्रणेष्वपि निवध्यते
स्निग्धोष्णा पिंडिका वाते पित्ते सा शीतला मता॥ रूक्षोष्णा श्लेष्मणि प्रोक्ता विधिरु
क्तो बुधैरयं॥ सा यथा॥ एरंडपत्रमूलत्वक्‌निर्मिता वातनाशिनी॥ धात्रीविरचि
ता पित्ते शिग्रुपत्रकृता कफे॥ निंबपत्रकृता पिंडी पित्तश्लेष्महरी भवेत्॥ शुंठीनिं
बदलैः पिंडी सुखोष्णा स्वल्पसैंधवा॥ धार्या नेत्रे निलश्लेष्मशोफकंडूव्यथां
हरेत्॥ त्रिफला पिंडिका नेत्रे वातपित्तकफापहा॥ पिष्टा कांजिकतोयेन घृतभ्र
ष्टा च पिंडिका॥ लोध्रस्य हरते क्षिप्रमभिष्यंदमसृग्भवं॥ पथ्याक्षामलत्वक्स
फलवल्कुतकल्को हि फेनजलयुक्तः॥ तेन विरचिता पिंडी शमयति सकला

नभिष्यंदान् ॥ अथ बिडालकविधिमाह ॥ बिडालको बहिर्लेपो नेत्रे पक्ष्मविवर्जिते ॥
तस्य मात्रा परिज्ञेया मुखलेपविधानवत् ॥ स यथा ॥ यष्टीगैरिकसिंधूत्थदार्वी
तार्क्ष्यैः समांशकैः ॥ जलपिष्टैर्बहिर्लेपः सर्वनेत्रामयापहः ॥ तार्क्ष्यं रसांजनं ॥ रसांज
नेन वा लेपो पथ्या बिल्वदलैरपि ॥ वचा हरिद्रा विश्वैर्वा तथा नागरगैरिकैः ॥ तथा
सर्वनेत्रामयापहरत्वपर्थः ॥ कुमारिकाग्निपत्रैर्वा दाडिमीपल्लवैरपि ॥ अत्रापि स
र्वनेत्रामयापहो लेपस्त्वाकर्षः ॥ दग्धास सैंधवं लोध्रं मधूच्छिष्ट घृते घृते ॥
पिष्टमंजनलेपाभ्यां सद्यो नेत्ररुजापहं ॥ लोहस्य पात्रे संघृष्टो रसो निंबुफलोद्भ
वः ॥ किंचिदुष्णो बहिर्लेपान्नेत्रबाधां व्यपोहति ॥ संचूर्ण्य मरिचं केशराजस्य
रसमर्दनात् लेपनाद्दर्मरागो नाशं करोत्येषः प्रयोगराट् केशराजः भृंगराजः ॥ ५१२ ॥

से

अथ सेके विधिमाह। सेकस्तु सूक्ष्मधाराभिः सर्वस्मिन्नयने हितः॥ मीलिताक्षस्य
मर्त्यस्य प्रदेयश्चतुरंगुलात्॥ स चापि स्नेहनो वाते पित्ते रक्ते च रोपणः। ले खनस्तु
कफे कार्य्यः सेको नेत्रप्रसादने॥ षड्भिर्वाचां सतैः स्नेहे चतुर्भिश्च रोपणे। वाक्छ
तैस्त्रिभिः कार्य्यः सेको लेखनकर्मणि। वाचांयाञ्जात्रारणां॥ सेकस्तु दिवसे को
र्यो रात्रौ चात्यंतिके गदे। सयथा॥ एरंडदलमूलत्वक्छृतमाजं पयो हितं। स खो
ष्णं नेत्रयोः सिक्तं वाताभिष्यंदनाशनं॥ परिषेके हितं नेत्रे पयः क्षो ष्णं ससैंधवं
रजनीदारुसिद्धं वा सैंधवेन समन्वितं॥ वाताभिष्यंदशमनं हितं मारुतपर्य्यये
शुष्काक्षिपाके च हितमिदं सेचनकं तथा। शावरं मधुकं तुल्यं घृतभृष्टं सुचू
र्णितं॥ छागक्षीरे स्थितं सेकात् पित्तरक्ताभिघातजित्। शावरं लोध्रं॥ त्रिफ

॥५१३॥

तालोध्रपद्मीभिः शर्करामद्रमुस्तकैः ॥ पीतैः शीतैंबुना सेको रक्ताभिष्यंदनाशनः

श्वेतलोध्रं घृतभृष्टं चूर्णितं पटविस्तृतं ॥ उष्णांबुनाविमर्दितं शेकात्छूलतम मंच

के ॥ पटविस्तृतं वस्त्रपूतं ॥ अंजके नेत्रे ॥ अथ तर्पणविधिमाह ॥ वातातपरजोहीनै

वेश्मन्युत्तानशायिनः ॥ आधारौ माषचूर्णेन क्लिन्नेन परिमंडितौ ॥ समौ दृढा

वसंबाधौ कर्तव्यौ नेत्रकोशयोः ॥ पूरयेत् घृतमंडेन विलीनेन सुखोदकैः ॥ सर्पि

षाधृतधौतेन क्षीरेणापि घृतेन वा ॥ निमग्नान्यक्षिपक्ष्माणि यावत्स्युस्ताव

देव हि ॥ पूरयेन्मीलिते नेत्रे ततउन्मीलयेच्छनैः ॥ भिषग्भिरेकं कथितः पुराणै

स्तर्पणो विधिः ॥ रूक्षं परिशुष्कं च नेत्रं कुटिलमाविलं ॥ शीर्णपक्ष्मशिरोत्पा

तकृच्छ्रोन्मीलनसंयुतं ॥ तिमिरार्जुनशुक्रार्तैरभिष्यंदाधिमंथकैः ॥ शुष्काक्षिपा ॥५१३॥

कृष्णोष्णाभ्यां युक्तं पयन पर्य्यपैः ॥ तन्नेत्रं तर्पयेत्सम्यक् नेत्ररोगविशारदः ॥ तर्पणं धा
रयेद्वर्त्मरोगे वाचां शतं बुधः ॥ स्वस्थे कफे संधिरोगे वाचां पंचशतानि च ॥ षट्
शतानि कफे कृत्स्नरोगे सप्तशतानि च ॥ दृष्टिरोगे शतान्यष्टावधिमंथे सहस्रकं
सहस्रं वातरोगेषु धार्य्यमेवं हि तर्पणं ॥ तर्पणेऽपांगतः स्नेहं स्रावयित्वाक्षि शो
धयेत् ॥ स्विन्नेन यवपिष्टेन स्नेहवीर्य्येरितं ततः ॥ यथास्वं धूमपानेन कफमस्य
विरेचयेत् ॥ एकाहं वा त्र्यहं वापि पंचाहं तर्पणं चरेत् ॥ तर्पणे तृप्तिलिंगानि नेत्रस्यै
तानि लक्षयेत् ॥ सुखस्वप्नावबोधत्वं वैशद्यं दृष्टिपाटवं ॥ निर्वृतिर्व्याधिशांति
श्च क्रियालाघवमेव च ॥ क्रियालाघवं नेत्रस्य क्रियायां निमेषोन्मेषादौ लघुता
गुर्वाविलमतिस्निग्धमश्रुकंडूपदेहवत् ॥ वर्षतोदयुतं नेत्रमतितर्पितमादिशेत्

॥५१४॥

आध्मानवशोफरागाढ्यमुपदेहसमाकुलं ॥ रूक्षमस्राविलं रूक्षं नेत्रं स्याद्धीनतर्पि-
तं ॥ अनयोर्दोषबाहुल्यात्प्रयतेत चिकित्सकः ॥ रूक्षस्निग्धोपचाराभ्यामेतयोः स्या-
त्प्रतिक्रिया ॥ अनयोः अतितर्पितहीनतर्पितयोः ॥ दुर्दिनात्युष्णशीतेषु चिंतायां
संभ्रमेषु च ॥ अशांतोपद्रवे चाक्ष्णि तर्पणं न प्रशस्यते संभ्रमो भयं ॥ अथ पुटपा-
कविधिमाह ॥ द्वे बिल्वे स्निग्धमांसस्य परं द्रव्यं पलं मतं ॥ द्रवस्य कुडवोन्मानं तं स-
र्वमेकत्र कारयेत् ॥ तदेकत्र समालोड्य पत्रैः सुपरिवेष्टितं ॥ पुटपाकविधानेन
तत्पक्वात्तद्रसं बुधः ॥ तर्पणोक्तेन विधिना यथावद्विनियोजयेत् ॥ दृष्टिमध्ये
निषेच्यः स नित्यमुत्तानशायिनः ॥ स्नेहनो लेखनश्चैव रोपणश्चेति स त्रिधा
हितः स्निग्धोऽतिरूक्षस्य स्निग्धस्यापि च लेखनः ॥ दृष्टेर्बलार्थमितरः पित्ता

॥५१४॥

सकृद्बलायातनुत ॥ इतरो रोपणः ॥ सर्पिर्मांसवसामज्जामेदः स्वाद्वौषधैः कृतः ॥
स्नेहनः पुटपाकस्तु धार्य्यः स्याद्वाक्शते तु द्वे ॥ जांगलानां यकृन्मांसैर्लेखनद्रव्य
संयुतैः ॥ कृष्णलोहरजस्ताम्रशंखविद्रुमसिंधुजैः ॥ समुद्रफेनकासीससस्रोतोज
दधिमस्तुभिः ॥ लेखनो वाक्शतं धार्य्यस्तस्यैतावद्विधारणं ॥ स्तन्यजांगलमध्वा
ज्यतिक्तद्रव्यविपाचितः ॥ लेखनात्त्रिगुणो धार्य्यः पुटपाकस्तु रोपणः ॥ वितरेत्तर्प
णोक्तां तु क्रियां व्यापत्तिदर्शने ॥ तिक्तद्रव्याणि निंबादीति ॥ अथांजनविधिमा
ह ॥ अथ संपक्वदोषस्य प्राप्तमंजनमाचरेत् ॥ अंजनं क्रियते येन तद्द्रव्यं चांजनं
मतं ॥ तद्यथा ॥ वटिकारसचूर्णानि त्रिविधान्यंजनानि हि ॥ कुर्याच्छलाकयांगु
ल्या हीनानि स्युर्यथोत्तरं ॥ स्नेहनं रोपणं चापि लेखनं तत्त्रिधा पृथक् ॥ तत्त्रि

॥५१५॥

ले

धावपागिति तद्धिकारसचूर्णरूपं पपक प्रत्येकं त्रिधा स्नेहनं रोपणं लेखनं चेति॥
मधुरस्नेहसंपन्नमंजनं स्नेहनं मतं॥ कषायतिक्तरसयुक्सस्नेहं रोपणं मतं॥ अं
जनं क्षीरतिक्ताम्लरसैर्लेखनमुच्यते॥ हरेणुमात्रां कुर्वीत वर्तीं तीक्ष्णांजने भिषक्॥
प्रमाणं मध्यमे सार्द्धं द्विगुणं तु मृदौ भवेत्॥ सार्द्धसार्द्धहरेणुप्रमाणं॥ रसक्रियानुत्तमा
स्यात्रिविडंगमिता हिता॥ मध्यमा द्विविडंगा सा हीना त्वेकविडंगिका॥ शलाकाः स्नेह
ने चूर्णे च तस्रः प्रोक्ता रंजने॥ रोपणे तास्तु तिस्रः स्फोरे च भेते लेखने स्मृते॥ मुखे यो कुं
चिता स्यूक्ष्मा शलाका व्यंगुलोन्मिता॥ अश्मजा धातुजा वा स्यात्कलाय परिमंडला
कलाप परिमंडला अग्रेकलाय वद्दृत्ता॥ सुवर्णरजतोद्भूता शलाका स्नेहने मता॥
ताम्रलोहाश्मसंजाता शलाका लेखने स्मृता॥ अंगुली तु मृदुत्वेन रोपणे कथिता॥

॥५१५॥

वुधैः॥ कृष्णभागादधःकुर्यादपांगंयावदंजनं॥ हेमंतेशिशिरेचापिमध्याह्नेजनमि
ष्यते॥ पूर्वाह्नेवापराह्नेवाग्रीष्मेशरदिचेष्यते॥ वर्षाष्वनभ्रेनात्युष्णेवसंतेतुसदै
वहि॥ प्रातःसायंचतत्कुर्यान्नचकुर्यात्सदैवहि॥ श्रांतेप्ररुदितेभीतेपीतमद्येनवे
ज्वरे॥ अजीर्णेवेगघातेचनांजनंसंप्रशस्यते॥ तत्रवर्ती सास्नेहनीयथा॥ धात्र्यक्ष
पथ्याबीजानिएकद्वित्रिगुणानिच॥ पिष्ट्वांबुनावर्तींकुर्याद्दंजनंद्विहरेणुकं॥ नेत्र
स्रावंहरत्याशुवातरक्तरुजंतथा॥ अपरोपप्रणीमाह॥ रसांजनंहरिद्रेद्वेमालतीनिं
बपल्लवाः॥ गोशकृद्रससंयुक्तावर्तीनक्तांध्यनाशिनी॥ एतस्याश्चांजनेमात्राप्रो
क्तासार्द्धहरेणुका॥ अशीतितिलजच्छदानुगतषष्टिकृष्णाणुतंडुलाद्रुमिहमालती
कुसुमतःकलासंमितं॥ तथोषणामिदंजलैर्विमर्दितंतमोमर्पहात्यार्जुनकं

॥ ५१ ॥

श्रुक्रहृतकुसुमिकाख्यवर्तिस्तुसा ॥ तिलजक्षुद्रष्याने तिलजकुसुमान्यपि कैञ्जिरुक्तानि ॥ तिलपुष्पाल्पष्टीतिः स्फुरिस्फक्तेः ॥ अपलेखनी माह ॥ शंखनाभिविभीतस्य मज्जा पथ्या मनः शिला ॥ पिप्पलीमरिचं कुष्ठवचा चेति शमांशकैः ॥ छागक्षीरेण संपिष्य वटीं कुर्य्याद्यवोन्मितां ॥ हरेल्लुमात्रां संघृष्य जलेनांजनमाचरेत ॥ तिमिरं मांसवृद्धिं च काचं पटलमर्वुदं ॥ रात्र्यंधं कार्षिकं पुष्पं वटीचंद्रोदयाहरेत ॥ इति चंद्रोदयावटी ॥ पलाश पुष्पजरसै विभावितानेक शः करंजस्य ॥ बीजोत्पवर्तिरेका दृषैः पुष्पं विनाशयति ॥ इति करंजबीजवर्तिः ॥ इभास्य कोलाजखरोष्ट्रगोजैः सशंखमुक्ताब्धिमलैः सुदंतैः ॥ पादांशतीक्ष्णौः क्षतश्रुक्रमेषा वर्तिर्जयेद्यत्नस्तंसमेतात् कोलः वराहः ॥ अब्धिमलः समुद्रफेन ॥ इति दंतवर्तिः ॥ नीलोत्पलं शिगुबीजं नागकेशरकं तथा ॥ रातल्कल्कैः

॥ ५१ ॥

कृतावर्त्तिरत्तिनिद्रां निवारयेत् ॥ इति नीलोत्पलादिवर्तिः ॥ अथ रसक्रिया ॥ सास्नेहनी
यथा ॥ कतकस्य फलं घृष्ट्वा मधुना नेत्रमंजयेत् ॥ ईषत्कर्पूरसहितं तत्स्यागैंन्नेत्रप्रसा
दनं ॥ अथ रोपणी ॥ जातीपुष्पं तार्क्ष्यशैलं शिलाब्धिफेनः सर्जः सोषणां मारिमंथं
क्षौद्रोद्भूवं गैरिकेणापि युक्तं कंडूक्लेदं पक्ष्मपातं च हंति ॥ तार्क्ष्यशैलं रसांजनं ॥ दुग्धेन कं
डु क्षौद्रेण नेत्रस्रावं च सर्पिषा ॥ पुष्पं तैलेन तिमिरं कांजिकेन निशांधतां ॥ पुनर्नवा हर
त्याशु भास्करस्तिमिरं यथा ॥ ववूलदलनिःक्काथो लेहीभूतः सदंजनात ॥ नेत्रस्रावो प्र
त्कोषं मधुयुक्तान्नसंशयः ॥ दार्वीपटोलमधुकं सनिंबं पद्मकोत्पलं प्रपौंडरीकं चैता
नि पचेत्तोये चतुर्गुणे ॥ विपाच्य पादशेषं तु पूतं नीत्वा पुनः पचेत् ॥ शीते तस्मिन्
मधु सितं दद्यात्पादांशकं नरः ॥ रसक्रियैषा दाहाश्रुरक्तरागरुजापहा ॥ गुडूचीस्वर

॥५१७॥

सः कर्षः क्षौद्रस्यान्माषकोन्मितं ॥ सैंधवं क्षौद्रतुल्यं स्यात्सर्वमेकत्र मर्दयेत् ॥ अंजयेन्न
यनेतेन पिष्टामतिमिरं जयेत् ॥ काचं कंडूं लिंगनाशं शुक्लं कृष्णगतान् गदान् ॥ अथ
तैलवनी ॥ हन्याद्दंजनयोगाद्यं ताक्ष्णैर्यैः कणाः पिष्टः ॥ पिप्पिवद्धृतस्य पयसा पुष्यं
द्वैमासिकं नियतं ॥ जातीपुष्पं प्रवालं च मरिचं कटुकीवचा ॥ सैंधवं समं मूत्रेण पिष्टं
तं द्राग्धमंजनं ॥ अथ चूर्णं ॥ तत्स्नेहनं यथा ॥ अग्नितप्तं हि सौवीरं निषिंचेत्रिफला
रसैः ॥ सप्तवारं तथा स्तन्यैः स्त्रीणां सिक्तं विचूर्णितं ॥ अंजयेत्तेन नयने प्रत्यहं च
क्षुषो हितं ॥ सर्वान् नक्षि विकारांस्तु हन्यादेतन्न संशयः ॥ अथ रोपणमाह ॥ क्षिता
यां रसकं पिष्ट्वा सम्यग्गाः स्राव्य वारिणा ॥ गृह्णीयात्तज्जलं सर्वं त्यजेच्चूर्णमधो
गतं ॥ शुष्कं च तज्जलं सर्वं पर्पटीसन्निभं भवेत् ॥ विचूर्ण्य भावयेत्सम्यक् त्रिचे ॥५१७॥

तं त्रिफलारसैः कर्पूरस्य रजस्तत्र दशमांशेन निक्षिपेत् ॥ अंजयेल्लपनैतेन नेत्राखि
लगदच्छिदा ॥ अथ लेखनमाह ॥ दक्षांडत्वक्स्फटिका काचशंखचंदनसैंधवैः ॥ चूर्णि
तैरंजनं प्रोक्तं पुष्पार्मादिनिकृंतनं ॥ दक्षः कुक्कुटः ॥ दन्त्या विघृष्टं मरिचं निशांध्यं
नूनं जयेदंजनतोथकृष्णाः ॥ पथ्येक्षकृत्तध्यगता विडंगाः क्षौद्रेणादोषांध्यहराः प्र
दिष्टाः ॥ शाणार्द्धं मरिचं द्वौ च पिप्पल्यार्णवफेनयोः ॥ शाणार्द्धं सैंधवं शाणा नव सौ
वीरकांजनात् ॥ पिष्टा सुसूक्ष्मं चित्रायां चूर्णांजनमिदं शुभं ॥ कंडूकाचकफार्तानां
मलानां च विशोधनं ॥ चित्रायां चित्रानक्षत्रे ॥ अथ सामान्यान्यसामान्यान्यंज
नादीनि ॥ मुक्ताकर्पूरकाचागुरुमरिचकणासैंधवं शैलवालं शुंठीकंकोलकांस्य
त्रपुरजनिखिलं सांशं खनाभ्यमृतस्यं ॥ दक्षांडत्वक्च साक्षात्स्ततमपुतस्थियाल्ली

५१८

तर्कं राजवर्त्तं जातीपुष्पं तु तस्याः कुसुममभिनवं बीजमस्यास्तथैव ॥ पूतिकनिंबा
र्जुनमद्रमुस्तं सतामूसारं रसगर्भसंयुतं ॥ प्रत्येकमेषां खलु माषकैकं पलेन पिष्या
न्मधुनातिसूक्ष्मं ॥ भवेति रोगानपनाशितायेति तांतमात्रोपचितं त्वसेषां ॥
विधीयते प्शांतिरवश्यमेव मुक्तादिनानेन महांजनेन ॥ एलवालं एतन्नाम्नैव प्रा
सिद्धं कंकालाभावे जातीपुष्पं ग्राह्यं कांस्यमत्र मारितं ग्राह्यं ॥ त्रपुरंगं तच्च मारि
तं ॥ अभ्रं अभ्रकं भस्म छत्रजं कुंकुमं ॥ क्रीतकं यष्टीमधु ॥ तामं ताम्रभस्म ॥ रसग
र्भं रसांजनं ॥ इति मुक्तादिमहांजनं ॥ करंजसलवणं खोबरं जासहरसांजनासांज
नासरित्यतिकफः फिकासितपुनर्नवासंभवा ॥ रजन्यरुणचंदनं मधुकतुत्थ
पथ्येफिलाअरिष्टदलाभ्यावरस्फटिकशंखनाभींद्रवः ॥ इमानितु विचूर्णी ॥ ५१८ ॥

पेल्लिचिउवासससाक्षोधयेत्ततोपसिविमर्द्दयेत्समधुनामूत्रखंडेनतत ॥ इदंमुनिभि
रीरितंनयनव्रणानामांजनंकरोतितिमिरक्षयंपटलपुष्पंनाशंयेलात ॥ अंजनं
सुरमाइतिलोके ॥ स्फटिकाफटकरी ॥ इंदुःकर्पूरः ॥ इतिनयनव्रणांजनं ॥ हरिद्रा
निंवपत्राणिपिप्पल्योमरिच्यानिच ॥ भद्रमुस्ताविडंगानिसप्तमंविश्वभेषजं ॥ सैंध
वंचित्रकंचैवकुष्ठंपथ्यावचान्वितं ॥ एतानिसमभागानिअजामूत्रेणपेषयेत् ॥
कोलास्थिकागुटीछायाशुष्कानागार्जुनीतिसा ॥ वारिणातिमिरंहंतिमधुनापट
लंतथा ॥ राज्यंधंभृंगराजेननारीदुग्धेनपुष्पकं ॥ गवांमूत्रेणचिपटंकांजिकेन
तुकामलां ॥ उशीररससंयुक्ताविषंवृश्चिकसंभवं ॥ इतिनागार्जुनीगुटिका ॥ नदी
जसिंधुत्रिकटुत्वथाजनंमनशिलातेद्विनिशेगवांशकृत ॥ सचंदनेयंगुटिका

॥ ५१८ ॥

प्रकाशिकाप्रशस्यतेरात्रिदिनेष्वयपश्यतां ॥ इतिप्रकाशिकागुटिका ॥ नीलोत्पलस्य
किंजल्कंगोशकृद्रससंयुतं ॥ गुटिकांजनमेतद्धिदिनरात्र्यंधयोर्हितं ॥ इतिगुटिकां
जनं ॥ समुद्रफेनदक्षांडत्वक्सिंधूत्थैः ससंख्यकैः ॥ शिग्रुबीजयुतैर्वर्त्तिःशुक्रा
दीन्नाशयच्चिरवेत ॥ इतिशस्त्रवर्त्तिः ॥ लाक्षागैरिकचंदनसुमनोमुकुलैः ॥
सहांमसापिष्टैः ॥ क्षतेष्णुक्रामघीवर्त्तिःप्रसादिनीचैवरक्तस्य ॥ इतिचतुर्भद्र
कावर्त्तिः ॥ पटस्थितागव्यशकृद्रसेतुस्विन्नाःकुलत्थावनजातस्येन ॥ पीतत्व
चःसूक्ष्मतरंविचूर्ण्यनिश्यपक्षिक्षेपापहराःप्रयुक्ताः ॥ इतिकुलत्थपिंडी
अनेकदोषसंभवामशेषलोचनव्यथां ॥ रससस्तुशिग्रुपत्रजःसमाक्षिको
निवारयेत ॥ इतिसौभांजनरसक्रिया ॥ न्यस्येत्क्षीरघृतेमताहिमसितंसार्द्र ॥ ५१९ ॥

चतुर्वर्षिकैस्त्रिसप्ताहमथो विमथ्य विधिना तन्नामूत्रं भिषक् ॥ पृथ्वीयान्नव
नीतकैरथ विषस्तस्यांजनादीक्षते यः स्यादंधतमो यि किं नु तिमिरेणापूर्णि
ताक्षः पुनः ॥ मृताहिः मृतसर्पः ॥ विश्राः स्रावतः ॥ इति मृतसर्पांजनं ॥ मरिचामल
कत्वगक्षतुल्यैर्मधुपिप्पलीसहितैर्जलेन पिष्टैः ॥ सुचिरोत्थमनातपे विशुष्कं ॥
तिमिरं हंति गुटीयमंजनेन ॥ इति मरिचादिगुटी ॥ जैयपालभवां मज्जां भावये
न्निंबुकद्रवैः ॥ एकविंशति वेलं तु ततो वर्तिं प्रकल्पयेत् ॥ मनुष्यलालया घृष्ट्वा ॥
तयानेत्रे तु तां जयेत् ॥ सर्पदष्टविषं जित्वा संजीवयति मानवं ॥ इति विषहरीव
र्तिः ॥ अथ प्रत्यंजनविधिमाह ॥ गतदोषमपेताश्रुं प्रपश्यत्सम्यगंभसि ॥ प्रक्षा
ल्याक्षि यथादोषं कार्यं प्रत्यंजनेन ततः ॥ तद्यथा ॥ शुंठ्या नागेकुते शुंठ्या तु स्वं स्व

५२०

तं विनिक्षिपेत् ॥ एतत्तु ॥ कृष्णांजनं स्तयोस्तुल्यं सर्वमेकत्र चूर्णयेत् ॥ एणमांसेन कृ
पूरं तस्मिन् चूर्णं विनिक्षिपेत् ॥ एतत्कृष्णांजनं नेत्रगदजिन्नयनामृतं ॥ नयना
मृतमंजनं ॥ अथांजनकेवलमपि शलाकाविशेषमाह वरंजते भृंगरसे विषा
ज्येपयस्यजायामधुयष्टितोये ॥ सीसेपयके कल्पमथो निषिक्तं यत्सप्तधा तद्धि
हिता शलाका ॥ युक्तांजनेनाथ निरंजनेपंजयेत्तयुक्तानयने मृगेतु ॥ स्नावार्मतै।
मिर्थ्यस्तु पिच्छितल्प पिद्धा साज राजी रतिजाऽपकंडूः ॥ अन्यच्च ॥ त्रिफलाभृंगशुंठी
नां रसैस्तद्वच्च सर्पिषा ॥ गोमूत्रमध्वजाक्षीरैः सिक्तो नागः प्रतापितः तच्छलाका
हरत्येव सकतान्नयनामयान् ॥ इति शलाकाकरणविधिः ॥ सूतकं गंधकं फेनं
चांगेरीरसमूर्छितं ॥ अंजनं दृष्टिदं नृणां नेत्रामयविनाशनं ॥ इति सूताद्यमं

५२०

जनं॥ कांजिके प्रक्षिपेत्तस्मा मिश्रिकां तद्द्रवेन च वाष्पेण स्वेदयेच्चक्षुर्महापीडा निव

र्तते॥ वाष्पविधिः॥ श्वेतवृंतकं कुक्कुटांगं वा दग्ध्वा सूक्ष्मं विचूर्णयेत्॥ अंजनं नवनी

तेन हंति पुष्पं चिरातनं॥ इति पुष्पनाशकमंजनं॥ यातारिपत्रैः पुटपाचितानां द्र

वं दत्वा नां वरमल्लिकायाः॥ संमर्द्दयेत्सिंधुफतेन कांस्ये तेनांजनेनां जितलोचन

स्य॥ सद्योक्षिनिष्यंदमकांडकंडूस्तथाधिमंथानपहंति सत्यं॥ रत्यामल्लिकांजनं

हिंगुनाद्रोणपुष्पावारसेनांजितलोचनः॥ अचिरात्कामलोत्पन्नां पीततां हंति

नेत्रयोः॥ रतिकामलाघ्नमंजनं॥ पिप्पली त्रिफला लाक्षा लोध्रं सैंधवसंयुतं॥

भृंगराजरसे घृष्टं गुटिकांजनमिष्यते॥ अमिसतिमिरं कांचं कंडूं शुक्रं तथार्जु

नं॥ अंजनं नेत्रजान् रोगान्निहंत्येतन्न संशयः॥ रतिगुटिकांजनं॥ निवाययेप

त्रैफलेकेकषायेनागंचिधिन्नः श्वेतधातुतांश्रो । संताप्यसंताप्य ततः शलाकांकृत्वास्व
श्रुंढेनरसेनलिप्येत । तयांजिताक्षोमनुजः क्रमेणसुपर्णदृष्टिर्भवतिप्रसह्य ॥ जपे
दभिष्यंदमथाधिमंथंअर्मार्जुनौवैतिमिरांशिपिहन्यान् ॥ इतिनागार्जुनीशला
का ॥ रसभस्यखर्परंदग्धातचूर्णंनेत्रपूरितं ॥ पुष्पहन्मत्स्यपित्तंचलोचनस्यंनि
शांध्यहृत ॥ इतिजोगद्वयं ॥ त्रिफलाजीरसौराष्ट्रीकोदोषारुलाचंदनं ॥ चिंचि
नीफलतोयेनपिष्टामंदोष्णमेवचे । स्वरसोवहिरालेपात्सर्वामक्षिरुजंजये
त ॥ इतित्रिफलादिबिडालः ॥ बिल्वपत्ररसः पूतः साज्यः सलवणान्वितः ॥
श्रुल्वेवराटिकाघृष्टोधूपितोगोमयाग्निना ॥ पयसालोडितश्चाक्ष्णोः पू
रणात्शोथशूलनुत ॥ अभिष्यंदेधिमंथेच रक्तश्रावेचशस्यते ॥ इति

॥५२१॥

विल्वपत्रस्वरसरससक्रिया ॥ कटुतैलं सतवरां कांस्यपात्रे सकांजिकं ॥ अपघृष्य
कपर्द्देन धूपितं गोमयाग्निना ॥ अजादुग्धावसिक्तं तत्वातश्लेष्मोत्थितां रुजं ॥ ने
त्रयोः शूलाश्रुशोथौ च रक्तत्वं हंत्यसंशयं ॥ इति कटुतैलादिअंजनं ॥ सर्पिः पुराण
माहन्यात्सर्वनेत्रामयं नृणां ॥ वृक्षाम्लं विल्वामलकरसाः सर्वाक्षिरुग्घराः ॥ इति
योगद्वयं ॥ तुलस्याविल्वपत्रस्य रसौ ग्राह्यौ समांसकौ ॥ ताभ्यां तुल्यं पयो नार्य्या
स्त्रितयं कांस्यभाजने ॥ गजवेस्याद्दृढं मर्द्यं तात्रेण प्रहरं पुनः कज्जलं लत्वं समुत्था
पितेनांजितविलोचनः ॥ सद्यो नेत्ररुजं हंति सप्लुतां पाकाजामपि ॥ इति नावरां
जनं ॥ शुंठी हरीतकी वन्यकुलत्थाः सर्परं तथा ॥ स्फटिकाश्चेत खदिरं पृथक् माजू
फलं समं ॥ कर्पूरं मृगनाभिश्च मौक्तिकं स्यात्तदर्द्धकं ॥ प्रत्येकं निंबुकद्रावैः खल्वे

॥५२२॥

मर्द्दं दिनत्रयं ॥ पश्चात्तु वटिकाः कुर्य्याज्जलेन तिमिरं हरेत् ॥ स्तन्येन पुष्पं पटलं मधुना
कांजिकान्मलं ॥ नेत्रश्रावं रसोनेन नक्तांध्यं भृंगयोगतः ॥ गोमूत्राच्छिपिटं मांसवृद्धिं
रंभाजलेन तु ॥ इति नयनामृतवटी ॥ अपामार्गस्य पत्राणि मूत्रायां मर्जयेद्बुधः ॥
मृतपत्राणि निष्कास्य सूक्ष्मचूर्णानि कारयेत् ॥ तदर्द्धं खर्परं दत्वा सम्यक्कृच्चूर्णं
समाचरेत् ॥ सूक्ष्माणि जसदपत्राणि धारयेत्तां तरांतरे ॥ मुद्रां कृत्वा ततो धीमान्
शोषयेदातपेन च ॥ स्वच्छांगारे ततः क्षिप्त्वा ध्मापयेच्च प्रयत्नतः ॥ अग्निवर्णानि भं
सात्वा ततस्तस्मात्समुद्धरेत् ॥ अंजनं कारयेत्तेन पक्ष्मसंजननं परं ॥ इति जसदांजनं ॥
गैरिकं कांस्यदंडेन कांस्यपात्रे विघर्षयेत् ॥ जलेन कज्जलाभं तत स्यात्त्वांजनमा
चरेत् ॥ नेत्रश्रावं च रोगं च पीडां जयति दुस्तरां ॥ इति गैरिकादिश्चांजनं ॥ वंबूलद

५२२

लजक्वाथः षोडशांशं पक्वे षितः ॥ वस्त्रपूतं पुनः पक्त्वा गुटिकां संप्रकल्पयेत् ॥ तिमि
रं पटलं काचं कंडूं जयति चांजनात् ॥ इति बब्बूलस्य रसांजनं ॥ रासभीपातुपादं क्षात
पाञ्जनमाचरेत् ॥ शीतलाजनितं पुष्पं नाशयेन्नात्र संशयः ॥ इति शीतलादोषे
ऽञ्जनं ॥ कासीसं स्फटिका जाजी त्रिफला च रसांजनं ॥ चंद्रकपूराहिफेनौ च तो धृष्ट्वे
ति समांशकैः ॥ एतैश्च पोटली कार्या सर्वनेत्रामयापहा ॥ इति पोटली ॥ रसांजनं व्यो
षयुतं संपिष्य वटकीकृतं ॥ कंडूपाकान्वितां हंति सेयादंजननामिका ॥ इति रसांजना
दिगुटी ॥ स्वर्णी तारं च मुक्तानि चोब्धिफेन वराम्रतो ॥ शंखव्योषतिशातुत्थं प्रया
लं मधुयष्टिका ॥ सर्वं क्षीतनकांभोभिः संपिष्य वटकीकृतं ॥ अश्रोषान्नयनोतं कू
न्नाशयेतद्रुपद्रान् ॥ इति स्वर्णादिगुटिका ॥ श्वेतस्य कांचनारस्य मूलं दुग्धेन पे

षितं ॥ घृष्टं ताम्रेंजनाद्धंति सद्यो नेत्ररुजे पटुं ॥ इति कांचनारमूलांजनं ॥ खर्परं त्रारस्त
यो तं स्रुद्धं तुल्यं शंखनाभिश्चेति समांसं निंबुकद्रवे णसंमर्घ सर्षपसमा वटीका
प्यी ॥ ताम्रपानीयेनांजयेत् तिमिरकाचपटलकंडूरोगान्नश्यंति नात्र संदेहः ॥ इति ख
र्परादिगुटिका ॥ वीजं वक्षकरंजस्य निस्तुषं द्विदलीकृतं ॥ चूर्णितं भावयेत्सम्यक्मुस्त्यां
जनद्रवांशकं ॥ जातीरसै स्त्रिसप्ताहं पिष्टा तैनैव कल्पिता ॥ वर्तिर्भानुमती नाम छाया
यां परिशोषिता ॥ तोयपिष्टांजनाद्धंति तिमिरं भास्करो यथा ॥ सुखस्य भावयेवोर्थं
चकुरुते शीलिता ध्रुवं ॥ इति भानुमतीवर्तिः ॥ गोमूत्रे छगलरसे ऽम्लकांजिके च स्त्री।
स्तन्ये हविषि विषे च माक्षिके च ॥ पतुत्यं ज्वलितमनेकधा निषिक्तं तन्कुर्याद्गरुडद्वस
मं नरस्य चक्षुः ॥ इति तुत्थांजनं ॥ द्विपादमध्ये पटुसन्निविष्टे क्षीरे गते तेवहुधाहि

॥५२३॥

नेत्रे ताः प्रोक्षोणोत्सादनलेपनादीन् पादप्रयुक्तान् नयनेनयंति ॥ प्रोक्षणं सेचनं ॥ उ
त्सादनमुद्वर्तनं ॥ मलोष्मसंघट्टनपीडनाद्यैस्ताद्दूषयंते नयनानि दुष्टाः ॥ अंजनं महा
दृष्टिहितानि तस्मात्तदुपानदं अभ्यंजनधावनानि ॥ मलेध्मस्यादि ॥ मलादिभिर्दुष्टाः ताः
शिराः नयनानि दूषयंत इत्यन्वयः ॥ त्रिफलायाः कषायेण प्रातर्नयनधावनात् ॥ जा
ता रोगा विनश्यंति न भवंति कदाचन ॥ इति नेत्रधावनं ॥ मुक्तापाणितलं घृष्ट्वा चक्षुषि प्र
यद्दीयते ॥ अचिरेणैव तद्धारि तिमिराणि व्यपोहति ॥ पटोलवासकारिष्टगुडूची
त्रिफलाघनं ॥ पंचमूलीसयष्ट्याह्वाचंदनं भिषग्भेषजं ॥ पटोलादिगणः प्रोक्तः स
र्वनेत्रामयापहाः ॥ वातिकं पैत्तिकं चैव श्लेष्मिकं सान्निपातिकं ॥ स्रावं रक्तप्रकोपं च
पटोलादिर्व्यपोहति ॥ इति पटोलादिगणक्वाथः ॥ वासाघनं निंव पटोलपत्रं ति

५२४॥

ऋामतावत्सकं चंदनं च ॥ कतींगदार्वीदहनश्च शुंठी भूनिंबधात्री विजयाविभीतं ॥ पथ्यां
श्च निशाक्वथितमष्टशेषं पूर्वेन्हि संस्थापितमग्निमेन्हि ॥ प्रातः पिबेद्दर्वीदष्टकं कंडूतैमि
र्यदाहश्च लापिहृत्ररोगान् ॥ पीडोपरागौ पटलानि नेत्ररोगानशेषान परांश्च हन्यात् ॥
इति महावासादिक्काथः ॥ पथ्यैकतं चूर्णमपथ्यवर्जी सायं समश्नाति समाक्षिकाज्यं
समुच्यते नेत्रगतैर्विकारैर्भल्यैर्यथा क्षीरगधनोमनुष्यः ॥ तत्रापि विशेषमाह ॥ घृते
न त्रिफला पित्ते सितया तैलेन वातजे ॥ तिमिरे तु कफोद्भूते नित्यं क्षौद्रयुतां बुधः ॥ इति त्रि
फलायोजना ॥ कुडवार्द्धं हरीतक्यस्तदर्द्धेन विभीतकं ॥ धात्रीफलानां कुडवं शतावर्याः प
लद्वयं ॥ लोहचूर्णपलैकं च मधुयष्ट्याः पलद्वयं ॥ तुगासैंधवककुभानां पलार्द्धं च पिप्प
लीपथ्यकं ॥ चूर्णितं सितया तुल्यं मोदितं मधुसर्पिषा ॥ पथ्याग्निं भक्षयेन्नित्यं सायं

॥५२४॥

पलमेकं हरीतक्या द्विपलं तु विभीतकं ॥ चतुःपलं त्वामलकं प्रातर्व्यायत्तद्व्यमित्यपि धागंतरं

हितमिताशनः ॥ तिमिरं पटलं काचं पिल्लं नक्तांध्यमर्जुनं ॥ हंति नेत्रगदं शोथं दाहरोगप

रिप्लुतं ॥ दूषिकां सव्रणं शुक्रं वर्त्मरोगांश्च नाशयेत् ॥ पूतिनस्यं तथा कंडूं कर्णास्रावं च दा

रुणं ॥ कंठास्यमुखरोगांश्च तथा दंतगतानपि ॥ हंति चार्द्धांगभेदं च नाडीव्रणभगंदरा

न् ॥ उपदंशोपसमनं पलीपलीतनाशनं ॥ द्वादशामृतसंज्ञेयमभयात्रेयपूजिता ॥ इति

द्वादशामृता हरीतकी ॥ त्रिफलाक्काथकल्काभ्यां सपयस्कं घृतं शृतं ॥ तिमिराण्यचि

राद्धन्यात्पीतमेव न संसयः ॥ इति लघुत्रिफलाघृतं ॥ त्रिफलाव्यूषणं द्राक्षा मधुकं

कटुरोहिणी ॥ प्रपौंडरीकं सूक्ष्मैला विडंगं नागकेसरं ॥ नीलोत्पलं सारिवे द्वे चंदनं र

जनीद्वयं ॥ कार्षिकैः पयसा तुल्यं द्विगुणं त्रिफलारसं ॥ घृतप्रस्थं पचेदेतत्सर्वनेत्र

॥५२५॥

द्वौ भागौ च हरीतक्यास्त्रयस्त्वास्तु विभीतकाः अष्टौ चामलकानां च सिता यामलकैः समा ॥ यष्टी
सैंधवरूकं ह्यमाल्यं क्षीरपर्णी ऽ केकनागिकाः ॥ भागौ द्वौ मधुसर्पिर्भ्यां तत्रौ स्वादे प्रयत्नतः
रक्षा च चक्षुः प्रवक्ष्यामि विशेषेणोर्ध्वरोगिणां ॥ तिमिरस्य विशेषं तथा काचं पटलं नेत्रकांध्यमे
व च शिते रोगेषु सर्वेषु दद्रुदेषु तथैव च कासश्वासे तथोन्मादे हिक्कायां विषमज्वरे ॥
छर्दितीसारं स्मृतं घृतं दशामृतहरीतकी

रुजापहं ॥ तिमिरं च जलस्रावं कामलां काचमर्बुदं ॥ विसर्पपटलं कंडूं तोदं च श्वयथुं प
ष्पुं ॥ अन्यानपि बहून् रोगान् नेत्रजान् वर्त्मजानपि ॥ निहंति सर्पिरेतत्तु भास्करस्तिमि
रं यथा ॥ न चैवास्मात्परं किंचिद्दृष्टजं काश्यपादिभिः ॥ दृष्टिप्रसादनं दृष्टं तदेतत् त्रैफलं घृ
तं ॥ इति मध्यमत्रैफलघृतं ॥ प्रत्येकं त्रिफलामृता वृषवरीभृंगामलक्यंबुनां तुल्ये नाज
पयः समं च हविषः पात्रं पचेत्कल्कितैः ॥ क्षुद्राक्षीरघरावरोत्पलकणायष्टीमधु ॥ ५२५ ॥

कैः सिताद्राक्षाभ्यां च समस्तनेत्रगदजित्सर्पिर्महात्रैफलं ॥ क्षीरं धात्री क्षीरकाकोली दला त
मेश्शृंग्य गंधामूलं देयं ॥ इति महात्रैफलं घृतं ॥ शतमेकं हरीतक्या द्विगुणं च विभीतकं ॥
चतुर्गुणं त्वामलकं वृषमार्कवयो रसं ॥ चतुर्गुणोदकं दत्वा शनैर्मृद्वग्निना पचेत् ॥ भागं
चतुर्थं संरक्ष्य क्वाथं तमवतारयेत ॥ शर्करा मधुकं द्राक्षा मधुपर्णी निदिग्धिका ॥ काको
ली क्षीरकाकोली त्रिफला नागकेसरं ॥ पिप्पली चंदनं मुस्तं त्रायमाणा तथोत्पलं ॥ घृत
प्रस्थं समं क्षीरं कल्कैरेतैः शनैः पचेत ॥ हन्यात्सतिमिरं काचं नक्तांध्यं शुक्रमेव च ॥ ने
त्रस्रावं तथा कंडूं पूयपुंच कषायतां ॥ कडुपत्वं च नेत्रस्य विंदुमर्म परस्ताति च ॥ घृतमात्र
क्रिमुक्तेन सर्वान्नेत्रामयान्हरेत ॥ यस्य चोपहता दृष्टिः सूर्याग्निभ्यां प्रपश्यतः ॥ तस्यै
तद्भेषजं प्रोक्तं मुनिभिः परमं हितं ॥ मार्जितं दर्पणं यद्वत्यरं निर्मलतां व्रजेत ॥ तद्वदेते

नपीतेननेत्रंनिर्मलतामियात् ॥ वारिद्रोणाद्रपंचात्रयवषमार्कवयोस्तुले ॥ काकोलीपुगला
मावेअश्वगंधामूलंदेयं ॥ इतिद्वितीयमहात्रैफलंघृतं ॥ वासाविम्बामृतादार्वीरक्तचंद
नचित्रकैः ॥ भूनिंबनिंबकटुकापटोलत्रिफलांबुदैः ॥ निष्काकलिंगकुटजैःक्वाथःसर्वा
क्षिरोगहा ॥ वैस्वर्यपीनसस्रावसंकासंनाशयतिध्रुवं ॥ इतिवासादिक्वाथः ॥ अयस्थां
त्रिफलाचूर्णंसर्पिषासहयोजितं ॥ भुक्तोपरिपिबेत्सायंमासेनांधोपिपश्यति ॥ अपो
भस्मयोजनं ॥ यष्टीगुडूचीत्रिफलासदार्वीक्वाथ्यतत्क्वाथमथप्रभाते ॥ निपीयतेनैत्रनि
षिच्यतेनसद्योक्षिकोपंविजहातिजंतुः ॥ इतियष्ट्यादिक्वाथः ॥ आटरूषाभयानिंबधा
त्रीमुस्ताक्षकूलकाः ॥ रक्तास्रावंकफंहंतिचक्षुष्यंवासकादिकं ॥ इतितद्वासकादिक्वा
थः ॥ पथ्याक्षतिसौविभीतकाःषट्धात्र्योद्वादशेतिच ॥ प्रस्थार्द्धसलिलेक्वाथ्यमथमा

॥५२६॥

गावकोषितं ॥ पित्ताभिष्यंदमाश्वायं रागं च तिमिरं जयेत् ॥ संरंभरागाश्रुतोदनाशनं द
कप्रसादनं ॥ इति त्रिफलाक्काथः ॥ सर्वनेत्ररोगाणामभिष्यंदजत्वात् विशेषेणाभिष्यंद
चिकित्सामाह ॥ तं घृतालेपनस्वेदशिराव्यधनरेचनैः उपाचरेदभिष्यंदानंजनातर्प
णादिभिः ॥ तिक्तस्य सर्पिषः पानं बस्तिं चापि विरेचनं ॥ अक्ष्णोरपि समंताच्च पातनं
च जलौकसां ॥ पित्ताभिष्यंदशमनो विधिश्चाप्यं निदर्शितः ॥ बिभीतकशिवाधात्रीपटो
लारिष्टवासकैः ॥ क्काथो गुग्गुलुना पेयः शोथाक्षिपाकशूलहा ॥ पिच्छं च सर्वरोगांश्च कं
रोगानन्यांश्च नाशयेत् ॥ एतैरेव घृतं पक्वं रोगांस्तांस्तान् जयेद्ध्रुवं ॥ इति षडंगगुग्गुलु
क्काथः घृतं च ॥ पटोलनिंबामयपाकसवासवरा रजोदारुनिशाः सतिक्ताः ॥ सत्रायमा
णाः पृथगापलभागाः प्रस्थं च धात्र्या विपचेद्घटे यां ॥ पादावशेषे द्विपलैर्जलेस्मिन्

॥ ५२७ ॥

ष्ठनिंबपत्रीमधुकाक्तपूतैः ॥ सवारिवारिप्रदपिप्पलीकैः प्रस्थं घृतात्तज्जयति प्रसह्य
नासाक्षिकर्णार्त्तिविसर्पदुष्टव्रणज्वरत्वग्गदरक्तदोषान् ॥ विशेषतोऽपक्वतमोनिशां-
ध्यमुक्तामलदाहादिषु सेव्यमानं ॥ इति पटोलादि घृतं ॥ अथ पथ्यमाह ॥ आश्च्योतनं लंघ-
नं मंजनं च स्वेदो विरेकः प्रतिसारणं च ॥ प्रस्थापनं नस्यमसृग्विमोक्षः शास्त्रक्रियाले-
पनमाज्यपानं ॥ सिक्तोऽमनोनिर्वृतिरंघ्रिपूजा मुद्गा यवा गोधूमतंदुलाश्च ॥ तोयोमयूरो
वनकुक्कुटश्च कूर्मः कुलिंगो पिकपिंजलश्च ॥ गव्यं घृतं वन्यकुलत्थयूषो गोदुग्धं खंड-
लघुनं पटोलं ॥ वार्त्ताकुककर्कोटककारवेल्लं नवीनमोचं नवमूलकं च ॥ पुनर्नवा मार्क-
व काकमाची पत्तूरशाकानि कुमारिका च कस्तूरवस्त्रीरक्तशालिमंपतोद्भवं राक्षौ-
द्रमुपानहश्च ॥ तारीपयश्चंदनचंद्रकांतीतिक्तानि सर्वाणि तवनि चापि ॥ चिंता

॥ ५२७ ॥

नतापथ्यमिदं प्रोक्तं पथ्यामलं नेत्रगदं निहंति ॥ अथापथ्यमाह ॥ क्रोधं शुचं मैथुनमश्रु
वायुविण्मूत्रनिद्रावमिवेगरोधं ॥ सूक्ष्मेक्षणं दंतविघर्षणं च स्नानं निशाभोजनमा
तपं च ॥ प्रजस्वनं छर्दनमंबुपानं मधूकपुष्पं दधि पत्रशाकं ॥ कालिंगपिण्याकविरूढ
कानि मत्स्यं सुरां मांसमजांगलं च ॥ तांबूलमम्लं लवणं विदाहि तीक्ष्णं कटूष्णं गुरुच्या
न्नपानं ॥ नरो न सेवेत हिताभिलाषी सर्वेषु रोगेषु दृगाश्रयेषु ॥ इति नेत्ररोगचिकि
त्सा ॥ अथ कर्णरोगनिदानं ॥ तत्र कर्णरोगाणां नामानि संख्यां चाह ॥ कर्णशूलं प्रणा
दश्च बाधिर्यं क्ष्वेड एव च ॥ कर्णस्रावः कर्णकंडूः कर्णगूथस्तथैव च ॥ १ ॥ प्रतिना
ह्ये जंतुकर्णौ च विद्रधिर्द्विविधस्तथा ॥ कर्णपाकः पूतिकर्णस्तथैवार्शश्चतुर्विधं ॥
२ ॥ तथार्बुदं सप्तविधं शोफश्चापि चतुर्विधः ॥ एते कर्णगता रोगा अष्टाविंश

तिरीरितः ॥३॥ तेषु कर्णशूलस्य संप्राप्तिपूर्वकं लक्षणमाह ॥ समीरणः श्रोत्रगतोन्यथाच
रन् समंततः शूलमतीव कर्णयोः ॥ करोति दोषैश्च यथास्वमावृतः स कर्णशूलः कथि
तो दुराचरः ॥४॥ अन्यथाचरन् प्रतिलोमं चरन् दोषैः पित्तकफरक्तैः ॥ रक्तस्यापि दूष्या
दिकर्तृत्वेन दोषसाम्याद्दोषत्वं ॥ यथास्वं यथात्मीयनिदानकुपितैः ॥ आवृतः यथा
स्वमिति शूलविशेषणं ॥ यथात्मीयमित्यर्थः दुराचरः दुरुपचरः ॥४॥ अथ मूर्छाद्यु
पद्रवयोगात्कर्णकर्णशूलस्यासाध्यतां चाह ॥ मूर्छा दाहो ज्वरः कासः क्लमो वम
थुस्तथा ॥ उपद्रवाः कर्णशूले भवंत्येते मरिष्यतः ॥५॥ अथ कर्णनादस्य लक्षणमाह
कर्णस्रोतः स्थिते वाते शृणोति विविधान् स्वरान् ॥ भेरीमृदंगशंखानां कर्णनादः
स उच्यते ॥६॥ भेरीमृदंगशंखानामित्युपलक्षणं ॥ तेन भृंगादिशब्दग्रहणं च भ

॥ ५२८ ॥

रति ॥ ६ ॥ अथ वाधिर्य्यमाह ॥ यदा शव्दवहं वायुः स्रोत आवृत्य तिष्ठति शुद्धः श्लेष्मा
न्वितो वापि वाधिर्य्यं तेन जायते ॥ ७ ॥ अथासाध्यवाधिर्य्यमाह ॥ वाधिर्य्यं वातवृद्धो
त्थं चिरोत्थं च विवर्जयेत् ॥ ७ ॥ अथ क्ष्वेडमाह ॥ वायुः पित्तादिभिर्युक्तो वेणुघोषसम
स्वनं ॥ करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते ॥ ९ ॥ क्ष्वेडशव्दार्थं व्यनक्ति ॥ वेणुघो
षसमं स्वनमिति ॥ तदुक्तं ॥ क्ष्वेडनं वेणुघोषवदिति ॥ ननु कर्णनादकर्णक्ष्वेडयोः ।
को भेदः ॥ उच्यते कर्णनादः केवलेन वातेन जन्यते ॥ तत्र नानाशव्दांश्रृणोति ॥
कर्णक्ष्वेडस्तु पित्तादियुक्तेन वातेन जन्यते ॥ तत्र नियमेन वेणुघोषमेव श्रृणोतीति
भेदः ॥ ९ ॥ अथ कर्णस्रावस्य लक्षणमाह ॥ शिरोभिघातादथवा निमज्जतो जले प्र
पाकादथवापि विद्रधेः ॥ स्रवेद्धि पूयं श्रवणोनिलार्दितः स कर्णसंस्राव इति प्र

कीर्तितः ॥ ९ ॥ पूयमिश्रकफलक्षणं ॥ जलेच स्कंचस्रवेत् ॥ प्रवरणाशाव्दः पुंल्लिंगोप्यस्ति ॥ ९

अथ कंडूकर्णगूथं चाह ॥ मारुतः कफसंयुक्तः कर्णे कंडूं करोति हि ॥ पित्तोष्मशोषितः श्ले-
ष्मा कुरुते कर्णगूथकं ॥ १० ॥ कर्णगूथं यस्मात्सः कर्णगूथको व्याधिः ॥ १० ॥ अथ प्रति-
नाहमाह ॥ स कर्णगूथो द्रवतां यदा गतो विलापितो घ्राणमुखं प्रपद्यते ॥ तदा स क-
र्णप्रतिनाहसंज्ञको भवेद्विकारः शिरसोऽर्द्धभेदकृत् ॥ ११ ॥ विलापितः स्नेहस्वेदाभ्यां
विलीनीकृतः ॥ घ्राणमुखं घ्राणं च मुखं च घ्राणमुखे ॥ एकत्वं द्वंद्वे ॥ शिरसोऽर्द्धभेदकृ-
त् ॥ अर्द्धावभेदाख्यशिरोरोगकृत् ॥ अयं कफजो विकारः ॥ अथवा कर्णगूथेमारुत-
पित्तव्यापतेरप्यत्रसंबंधोस्ति ॥ तेन सन्निपातजोयमिति मधुकोशकृत् ॥ १५ ॥ अ-
थ कृमिकर्णलक्षणमाह ॥ यदा तु मूर्छंत्यथवापि जंतवः सृजंत्यपत्यान्यथवापि

मक्षिकाः ॥ तदंजनत्वाच्छ्रवणो निरुच्यते भिषग्भिराद्यैः कृमिकर्णकोगदः ॥ १२ ॥ मूर्छि
तिउच्छ्रिता भवति ॥ जंतवः कृमयः ॥ कृमिमूर्छनं च मांसशोणितकोथे सति तत्रैवं
तमंतरेण कृमीणामसंभवात् ॥ अपत्यानि डिंभकान् ॥ तदंजनत्वात् कृमितक्ष
णत्वात् ॥ श्रवणः कृमिकर्णकोगदइति निरुच्यते ॥ श्रवणशब्दः पुलिंगोप्य
स्तीति अमुष्मादेव निर्देशात्प्रतीयते ॥ अपंचिकारस्त्रिदोषजो मंतव्य इति मधु
कोशकृत ॥ १२ ॥ अथ पतंगादिषु कर्णप्रविष्टेषु लक्षणमाह ॥ पतंगाः शतपद्य
श्च कर्णस्रोतः प्रविश्य हि अरतिं व्याकुलत्वं च भृशं कुर्वीति वेदनां ॥ १३ ॥ कर्णो
निस्तुद्यते तस्य तथा फरफरायते ॥ कीटे चरति रुक्तीव्रा निस्पंदे मंदवेदना ॥
१४ शतपद्यः कारंडिकाः ॥ निस्पंदे निश्चले ॥ १३ ॥ १४ ॥ अथ द्विविधं कर्ण

॥५३०॥

विद्रधिमाह॥ क्षताभिघातप्रभवस्तु विद्रधिर्भवेत्तथा दोषकृतो परः पुनः॥ सरक्तपी
ताहरुणामस्रमाश्रवेत्ततो दधूमापनदाहचोषवान्॥१५ क्षतप्रभवोभिघातप्रभ
वश्च॥ तयोर्द्वयो रागंतुजत्वादैक्यं॥ एवंवाताद्विजस्यापि दोषजत्वादेकत्वं॥ अस्रं आ
स्रावमित्यर्थः॥ रक्तपीतारुणावर्णत्वं चाभ्यास्य वातरक्तपित्तसंभवात्॥१५ अथ
कर्णपाकस्य लक्षणमाह॥ कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत्॥१६ कोथः
पूतिभावः॥ विक्लेद आर्द्रता॥१६ अथ पूतिकर्णस्य लक्षणमाह॥ कर्णविद्रधि
पाकेन कर्णोवावारिपूरणात्॥ पूयं स्रवेति पूतिसज्ञेयः पूतिकर्णकः॥१७ कर्ण
स्रावाद्भेदार्थमाह पूतीति॥ इदं क्रियाविशेषणं॥ नियमेन पूतियथास्यादेवं स्रव
ति॥ अत्रावेदनत्वे सवेदनत्वं घनत्वाविलत्वं च ज्ञेयमिति मधुकोशाकृत॥ पूतिक ॥५३०॥

र्णिकः पूतिमान् कर्णः ॥ १३ ॥ अथ कर्णगतानां शोथार्बुदार्शसां लक्षणान्याह ॥ कर्णशो
थार्बुदार्शांसि जानीयादुक्तलक्षणैः ॥ १४ ॥ तत्र कर्णशोथाश्चत्वारो वातपित्तकफर
क्तजा भवंति ॥ एवमर्शोपि चतुर्विधं ॥ अन्येषां शोथानामर्शसां चात्रासंभवः ॥ आ
धारप्रभावात् ॥ अर्बुदं सप्तविधं वातपित्तकफरक्तमांसमेदःशिराजं ॥ एते कर्णरो
गा अष्टाविंशतिः सुश्रुतोक्ता उक्ताः ॥ १५ ॥ अथेदानीं चरकोक्तं कर्णरोगचतुष्टयं वा
तपित्तकफसन्निपातकृतमाह ॥ तत्र वातिकपैत्तिकयोर्लक्षणमाह ॥ नादोतिरुक्क
र्णमले तु शोषः स्रावस्तनुश्चाश्रवणं तु वातात् ॥ शोथः सरागो दरणं विदाहः
सपूतिपीतश्रवणं च पित्तात् ॥ १६ ॥ अथ श्लैष्मिकसान्निपातिकयोर्लक्षणमा
ह ॥ वैश्रुत्यकंडूस्थिरशोथशुक्लस्निग्धश्रुतिः स्वल्परुजो कफाच्च ॥ सर्वाणि रूपा

५३०॥

विद्रधिमाह॥ क्षताभिघातप्रभवस्तु विद्रधिर्भवेत्तथा दोषकृतोऽपरः पुनः॥ स रक्तपी
तारुणमस्रमास्रवेत्प्रतोदधूमायनदाहचोषवान्॥१५॥ क्षतप्रभवोऽभिघातप्रभ
वश्च॥ तयोर्द्वयो रागंतुजत्वादैक्यं॥ एवं वातादिजस्यापि दोषजत्वादेकत्वं॥ अस्रं अ
स्राच मित्यर्थः॥ रक्तपीतारुणवर्णत्वं चास्याऽऽगंस्य वातरक्तपित्तसंभवात्॥१५॥ अथ
कर्णपाकस्य लक्षणमाह॥ कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत्॥१६॥ कोथः
पूतिभावः॥ विक्लेद आर्द्रता॥१६॥ अथ पूतिकर्णस्य लक्षणमाह॥ कर्णविद्रधि
पाकेन कर्णयावा परिपूरणात्॥ पूयं स्रवेति: पूति स ज्ञेयः पूतिकर्णकः॥१७॥ कर्ण
स्रावाद्भेदार्थमाह पूतीति॥ इदं क्रियाविशेषणं॥ नियमेन पूति यथा स्यादेवं स्रव
ति॥ अत्राऽवेदनत्वे सवेदनत्वं घनस्रावित्वं च ज्ञेयमिति मधुकोशकृत्॥ पूतिक

॥५३०॥

र्णकः पूतिमान् कर्णः ॥ १३ ॥ अथ कर्णगतानां शोथार्बुदार्शसां लक्षणान्याह ॥ कर्णशो
थार्बुदार्शांसि जानीयादुक्तलक्षणैः ॥ १४ ॥ तत्र कर्णशोथाश्चत्वारो वातपित्तकफर
क्तजा भवंति ॥ एवमर्शोपि चतुर्विधं ॥ अन्येषां शोथानामर्शसां चात्रासंभवः ॥ आ
धारप्रभावात् ॥ अर्बुदं सप्तविधं वातपित्तकफरक्तमांसमेदःशिराजं ॥ एते कर्णरो
गा अष्टाविंशतिः सुश्रुतोक्ता उक्ताः ॥ १५ ॥ अथेदानीं चरकोक्तं कर्णरोगचतुष्टयं वा
तपित्तकफसन्निपातकृतमाह ॥ तत्र वातिकपैत्तिकयोर्लक्षणमाह ॥ नादोतिरुक्क
र्णतले तु शोषः स्रावस्तनुश्चाश्रवणं तु वातात् ॥ शोथः सरागो दरणं विदाहः ॥
सपूतिपीतस्रवणं च पित्तात् ॥ १६ ॥ अथ श्लैष्मिकसान्निपातिकयोर्लक्षणमा
ह ॥ वैश्रुत्यकंडूस्थिरशोथशुक्लस्निग्धश्रुतिः स्वल्परुजो कफाच्च ॥ सर्वाणि रूपा

॥५३१॥

रोगश्चसन्निपाताच्चव्यस्ततश्चाधिकदोषवर्णः॥२०॥ येश्रुत्वंअन्यथाश्रवणं॥२०॥ अथ
कर्णपाल्याःकर्णावयवत्वात्तद्विकारमप्यत्रैवाह॥ तत्रसन्निदानंपरिपोटकलक्षण
माह॥ सौकुमार्याच्चिरोत्सृष्टेसहसैवातिवर्द्धिते॥ कर्णशोफोभवेत्पाल्यांसरुजः॥
परिपोटवान्॥ कृष्णारुणनिभस्तब्धःसवातात्परिपोटकः॥२१॥ चिरोत्सृष्टःचिरं
वर्द्धनेनत्यक्तो॥ परिपोटवाननेकस्फोटविदारणयातिस्पर्शः॥२१॥ अथोत्पातस्य
लक्षणमाह॥ गुर्वाभरणसंयोगात्ताडनोद्घर्षणादपि॥ शोफःपाल्यांभवेच्छ्यावोदा
हपाकरुजान्वितः॥ रक्तोवारक्तपित्ताभ्यामुत्पातःसगदःस्मृतः॥२२॥ श्यावत्वंचा
त्रव्याधिप्रभावात्॥२२॥ अथोन्मन्थकस्यलक्षणमाह॥ कर्णंबलाद्वर्द्धयतः
पाल्यांवायुःप्रकुप्यति॥ कफंसंगृह्यकुरुतेशोफंस्तब्धंसवेदनं॥ उन्मन्थकः ॥५३१॥

सकंडूको विकारः कफवातजः ॥२३॥ अवेदनं ईषद्वेदनं ॥२३॥ अथ दुःखवर्द्धनस्य ल
क्षणमाह ॥ संवर्द्धमाने दुर्विद्धे कंडूदाहरुजान्वितः ॥ शोथो भवति पाकश्च त्रिदो
षा दुःखवर्द्धनः ॥२४ संवर्द्धमाने दुर्विद्धे कर्णे इति शेषः ॥२४ अथ परिलेहिनो
लक्षणमाह ॥ कफासृक्कृमयः क्रुद्धाः सर्षपाभा विसारिणः ॥ कुर्वंति पिटिकाः
पाल्यां कंडूदाहसमन्विताः ॥२५ कफासृक्कृमिसंभूतः सविसर्पान्वितस्ततः
लिह्यात्सशष्कुलीं पालीं परिलेही च स स्मृतः ॥२६ स पिटिकात्मकः परिलेही सं
ज्ञको गदः ॥ लिह्यान्निर्मांसीकुर्यात ॥२६ इति कर्णरोगनिदानं ॥ अथ कर्णरोग
चिकित्सा ॥ कर्णशूले कर्णनादे बाधिर्ये क्ष्वेड एव च चतुर्ष्वपि च रोगेषु सामा
न्यं भेषजं स्मृतं ॥ शृंगवेरं च मधु च सैंधवं तैलमेव च ॥ कदुष्णं कर्णयोर्धार्यं

॥५३२॥

मेतस्माद्वेदनापहं ॥ अर्क्कांकुरानम्लपिष्टान्सतैलान्लवणान्वितान् ॥ सन्निदध्यात्सुधा
कांडेकोरितेमत्रयावृते ॥ पुटपाकक्रमस्विन्नान्पीडयेद्रसमागमान् ॥ सुखोष्णं
तद्रसंकर्णेप्रक्षिपेच्छूलशांतये ॥ अश्वमूत्रालशांत्यैमतंवस्तमूत्रंकटुष्णंससिंधूत्थ
मेकंनिषिक्तं ॥ सुपीतंतैलपात्रमार्कघृतेनप्रलिप्तंप्रतापस्कंतैःस्त्रीयतोयैः ॥ श्री
वेरीक्षारस्यचरालकृतकल्केनसाधितंतैलं ॥ अपहरतिकर्णनादंवाधिर्य्यंचापि
पूरणात् ॥ गवांमूत्रेबिल्वानिपिष्ट्वातैलंविपाचयेत् ॥ सजलंचसदुग्धंचतद्वा
धिर्य्यहरंपरं ॥ कुष्ठहिंगुवचादारुशताव्हाविश्वसैंधवं ॥ पूतिकर्णापहंतैलंव
स्तमूत्रेणसाधितं ॥ मूलकस्यरसेतैलंकटुक्षौद्रंवरंसमं ॥ कर्णेनिक्षिप्तमेवेत्थि
लंवाधिर्य्येपरमौषधं ॥ नागरमागधिसैंधवकुष्ठंहिंगुवचालशुनंतिलतै

॥५३२॥

तं ॥ अर्कस्य पत्ररसेन सुपक्वं कर्णरुजं शतधा विनिहंति ॥ सैंधवकटुतैलं अर्कप-
त्रे संस्तिप्य तप्तलोहशलाकया संवेध्य तैलं पातयेत् तत्तैलं प्रक्षेपेण कर्णरुक्
नश्यति ॥ शंबूकस्य तु मांसेन कटुतैलं विपाचयेत् ॥ तस्य पूरणमात्रेण कर्णना-
डी प्रणश्यते ॥ शंबूकमांसं पक्वाक्षं हिंगुतुंबरुसैंधवं ॥ सकुष्ठं चैव कर्षांशं का-
ल्कार्थे पेषयेद्बुधः ॥ पलानां सप्तकं कुर्यात् कटुतैलं प्रयत्नतः ॥ सूर्यावर्त्तस्य चर-
सैः पचेत्तैलं समं बुधः ॥ कर्णव्रणं कर्णनादं कर्णाभ्यंतरगं जयेत् ॥ पूतिगंधं
तथा पाकं हन्यात् शीघ्रं न संशयः ॥ चूर्णेन गंधकशिलारजनीभवेन मूपल-
शकेन कटुतैल पलाष्टकं तु ॥ धत्तूरपत्ररसतुल्यमिदं विपक्वं नाडीं जयेच्चि-
रभवामपि कर्णजातां ॥ स्वर्जिकामूलकं शुष्कं हिंगुकृष्णामहौषधं ॥ शत

पुष्पा चैतैस्तैलं पक्वं श्रुक्तचतुर्गुणं ॥ प्रलेपा दद्रूलवाधिर्य्यश्चावांश्चाप्युव्यपो हति ॥
प्रत्येकं पलमितैः सूर्य्यभक्ता शेफाली रसो नस्वरसैः कर्षमितैश्च शातपुष्पा व
चाकुष्ठव्योषलवंगकल्कैश्चतुपलैन छागीक्षीरेण चतुःपलं ॥ मदृग्निपक्वं
कटुतैलं नाधिर्य्यकर्णनादघ्नं भवति ॥ कुतमुंजं परितप्तं किंचिदाज्येन लिप्तात्
करतलपरिपिष्टात्वद्रुसहंडपत्रात् ॥ गलितममलमंभः श्रोत्रयोर्न्यस्तमेवं
शमयति पृथुपीडां शूलमप्यंजसैव ॥ समुद्रफेनं चुर्णं तु न्यस्तं श्रावसि सश्रवे
पूपाश्चावप्रणां सांद्रं हंति ध्वांतमिवांशुमान् ॥ सूर्य्यावर्तस्य स्वरसो रसोयासिं
धुवारजः ॥ लांगलीमूलतोयं वा श्रूवणं वातिचूर्णितं ॥ एते योगाश्च चत्वारः पू
रणात्कर्णकीटके ॥ कुमीलिर्मूलं यं त्वा श्रुसनमेतन्नसंशयः ॥ हलिरविभ

एकीकृत्य बुधो गालयेद्दृढं क्षुरे ॥ वसनेन तद्रसेन श्रवणौ परिपूरयेद्बुधे युक्त्या ॥ क
र्णजलौका निपतंत्कृमयश्च पिपीलिका सत्वान्येपि ॥ नियतं ति निरवशेषाः हरवश्चा
पि मुंडस्याः ॥ गोमूत्रेण विविधं घृष्ट्वा सम्यक् लेपं च सिंचिपेत् ॥ सघरणपश्चाद्वः शूलं।
कंडूः पीडा च शाम्यति ॥ स्निग्धमूलरसे तैलं पाचितं मधुनान्वितं ॥ भृतं कर्णे निवेगे
न शूलं शाम्यति देहिनः ॥ जातीपत्ररसे पक्वं तैलं वै पूतिकर्णजित् ॥ घृष्टं रसांजनं
नार्याः क्षीरेण क्षौद्रसंयुतं ॥ कर्णस्रावं हरत्याशु पूतिकर्णं चिरोत्थितं ॥ कृमिक
र्णविनाशाय कृमिघ्नीकारयेत्क्रियां ॥ वार्त्ताकुधूमश्चहितः सर्षपस्नेहपूरणं च ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ॥ धूपने कर्णदौर्गंध्ये गुग्गुलुः श्रेष्ठ उच्यते
पटुत्रयक्षारयुगोग्रगंधामिसीगहांमो धरदारुविश्वं ॥ सरामठं मूलकभस्म

शिग्रुभूर्जार्द्रिदंतास्वर्जप्रयुक्तमेतैः तैलं विपक्वं मधुसुक्तरं भाबीजापूरतोयैर्जयति प्रस
ह्य ॥ स्थूलास्यतिस्रावकृमीन् सुतीव्रान् क्षाराख्यपंचक्षेरदामपाख्य ॥ बीजापूरतोयं ।
मातुलुंगरसः ॥ इति क्षारतैलं ॥ मधुसुक्तं यथा ॥ जंबीरजः प्रस्थमितो रसोथ क्षौद्रं
शरावार्द्धमितं कणामूं ॥ सुधान्यराशौ मधुभांडसंस्थं मासं तदेतन्मधुसुक्तमुक्तं
तैलं सिद्धार्थजन्मत्रिकटुगदवचाकटुफलैस्तीक्ष्णगंधावेश्यालक्तं द्रव्यक्षैस सुर
सकुसुमैः श्वेतवर्षाभुयुक्तैः ॥ हिंगूपेतैः समूत्रं मृदुतरदहने पक्वमेतन्नदिष्टक
रोत्थानां गदानामपहरणमपथं शिरस्थूलजिह्वं ॥ चिकित्सां कर्णशोथानां
तथा कर्णार्शसामपि ॥ कर्णार्बुदानां कुर्वीत शोथार्शोर्बुदवद्भिषक् ॥ शतावरीवा
जिगंधापयस्यैरंडबीजकैः ॥ तैलं विपक्वं सक्षीरं पालीं संवर्द्धयेत्स्वं ॥ यव

॥५३४॥

स्यात्क्षीरकाकोली ॥ जीवनीयस्यकल्केन हतात्सं परिपोटकं ॥ तैलं सदुग्धं संसाध्य
चिकित्सेद्गदंकरः ॥ शीतैस्तैलैः पैर्जलौकाभिर्हृत्यातं समुपाचरेत् ॥ हस्तिनीसुरसा
भ्यां च गोधाकंकवसान्वितं ॥ तैलं विपक्कमभ्यंगाद्दुन्मंथं नाशयेद्ध्रुवं ॥ दुःखवर्द्धन
के सिक्ता जात्यामूलाश्वत्थपत्रजैः ॥ क्काथैस्तैलेन सुस्निग्धं तच्चूर्णैश्चावधूलयेत् ॥
वृहत्योगो मयैस्तत्सैः स्वेदितं परिलेहितं ॥ घनसारैः समालिंपेदजामूत्रेण का
लिकैः ॥ मुस्तालीकंदो भव्यो माहिषनवनीतमिश्रितोभ्यंगात् ॥ वर्द्धयति कर्णपा
लीं सप्ताहं धान्यराशिस्थतः ॥ गुंजाफलैर्विदलितैः क्वथितान्माहिष्याः क्षीरात्
मेराजनितं घृतमभ्यतस्तत् ॥ अभ्यंजनादनुदिनं कुरुते महत्वं विस्तीर्णतां च प
मामिहकर्णपाल्योः ॥ कुष्ठाश्वगंधागजपिप्पलीनां चूर्णं महिष्या नवनी

तथैव पक्वं करणं प्रवृद्धिं स्तनं तु गतां च काठिन्यमुच्चैर्विदधीत तेपात् ॥ अथ पथ्यमाह ॥
स्वेदो विरेकोऽवमनं नस्यधूमः शिराव्यधः ॥ गोधूमाः शालयो मुद्गा यवाश्च प्रततेह
विषः ॥ पटोलं शिग्रु वार्त्ताकं सुनिषण्णं कटिल्लकं ॥ रसायनानि सर्वाणि ब्रह्मचर्यमभाष
णं ॥ उपयुक्तं यथादोषमिदं कर्णामये हितं ॥ अथापथ्यमाह ॥ दंतकाष्ठं शिरःस्नानं
व्यवायं श्लेष्मलं गुरु ॥ कंडूयनं तु पारं च कर्णरोगी परित्यजेत ॥ इति कर्णरोगचिकित्सा
अथ नासारोगनिदानं ॥ तत्र नासारोगाणां नामानि संख्यां चाह ॥ आदौ चपीनसः
प्रोक्तः पूतिनस्यस्ततः परं ॥ नासापाकोऽत्र गणितः पूयशोणितमेव च ॥ १ ॥ क्षवथुर्भ्रं
शथुर्दीप्तिः प्रतिनाहपरिस्रवः ॥ नासाशोषः प्रतिश्यायाः पंच सप्तार्बुदानि च ॥ २ ॥
चत्वार्यर्शांसि चत्वारः शोफाश्चत्वारि तानि च ॥ रक्तपित्तानि नासायां चतुस्त्रिंश

द्रेदः स्मृताः ॥ श्लो३ ॥ तेषु पीनसस्य लक्षणमाह ॥ आनह्यते शुष्यति यस्य नासा प्रक्ले-
दमायाति च धूप्यते च ॥ न वेत्ति यो गंधरसांश्च जंतुर्जुष्टं व्यवस्येत्तु पीनसेनेति ।
पाठांतरे पीनसेन ॥४॥ आनह्यते व्याप्तसशोषितकफेन आवध्यते ॥ अवरुध्यत इ-
ति यावत् ॥ प्रक्लेदमार्द्रतां ॥ धूप्यते संतप्यते ॥ गंधरसान् गंधान् सुरभीन् सुरभीं-
श्च न वेत्ति ॥ नासाया आनद्धत्वं तत्र हेतुः ॥ रसान् मधुरादींश्च न वेत्ति ॥ नासारोगारंभ-
कदोषेण रसनाया अपि दुष्टेः ॥ व्यवस्येत् जानीयात् ॥ अपीनसं पीनसं सोद्वावपि शब्दौ
स्तः ॥ अपाप्योस्तु संनद्धादिशब्दे येति सूत्रेण विकल्पेनाकारलोपात् ॥४॥ अप्यनुक्त-
संग्रहार्थमाह ॥ तं चानिलश्लेष्मभवं विकारं ब्रूयात्प्रतिश्यायसमानलिंगं ॥४॥ तं
विकारं पीनसं ॥ प्रतिश्यायसमानलिंगं वातिकश्लैष्मिकप्रतिश्यायसदृशचि-

॥५३ ही॥

नं॥४॥अथपूतिनस्यमाह॥दोषैर्विदग्धैर्गलतालुमूलेसंदूषितोयस्यसमीरणस्तु
निरेतिपूतिर्मुखनासिकाभ्यांतंपूतिनस्यंप्रवदंतिरोगं॥५॥दोषैःपित्तकफरक्तैः
अत्ररक्तस्यापिदोषत्वंदोषसाहचर्यात्॥विदग्धैःदुष्टैः॥संदूषितःपूतिभावंनी
तः॥पूतिनस्यंनासायांभवोनस्यः वायुःपूतिर्नस्योयत्रसःपूतिनस्यस्तंपूतिन
स्यंरोगं॥५॥अथनासापाकस्यलक्षणमाह॥घ्राणाश्रितंपित्तमरूंषिविकुर्य्याद्य
स्मिन्विकारेबलवांश्चपाकः॥तंनासिकापाकमितिव्यवस्येद्विक्लेदकोथावपिचा
पियत्र॥अरूंषिव्रणान्॥विक्लेदआर्द्रताकोथःपूतिभावः॥६॥अथपूयरक्त-
माह॥दोषैर्विदग्धैरथवापिजंतोर्ललाटदेशेभिहतस्यतैस्तैः॥नासास्रवेत्पूयम
स्रमिश्रंतंपूयरक्तंप्रवदंतिरोगं॥७॥तैस्तैःपीडनप्रहारादिभिः॥७॥क्षवथु

॥५३ ही॥

दोषागंतुजभेदेन द्विविधो भवति ॥ तत्र दोषजमाह ॥ घ्राणाश्रिते मर्मणि संप्रदुष्टे य
स्यातिसो नासिकया निरेति ॥ कफानुयातो बहुशः स शब्दं तं रोगमाहुः क्षवथुं गदज्ञाः
॥ घ्राणाश्रिते मर्मणि शृंगाटके ॥ अथागंतुजमाह ॥ तीक्ष्णोपयोगादतिजिघ्रतो
वा भावान्कटून्नर्कनिरीक्षणाद्वा ॥ सूत्रादिभिर्वा तरुणास्थिमर्मण्युद्घट्टितेन्यः
क्षवथुर्निरेति ॥ टी ॥ तीक्ष्णोपयोगात् राजिकादिभक्षणात् ॥ भावान् कटून् कटुद्र
व्याणि ॥ अर्कनिरीक्षणात् ॥ सूर्यावलोकनात् ॥ तेन कफविलयनात् ॥ तरुणास्थि
नासावंशास्थि ॥ मर्म शृंगाटकं ॥ द्वंद्वैकत्वं ॥ अन्यः आगंतुजः ॥ टी ॥ अथ भ्रंशथो
र्लक्षणमाह ॥ प्रभ्रश्यते नासिकयातु यस्य सांद्रो विदग्धो लवणः कफस्तु ॥ प्रा
क्संचितो मूर्द्ध्नि पित्ततप्तैस्तं भ्रंशथुं व्याधिमुदाहरंति ॥ १० ॥ प्रभ्रश्यते गल

॥५३७॥

ति ॥ १० ॥ अथ दीप्तिरोगस्य लक्षणमाह ॥ घ्राणे भृशं दाहसमन्विते तु विनिःसरेद्धूम
इवेह वायुः ॥ नासा प्रदीप्तेव च यस्य जंतोर्व्याधिं तु तं दीप्तिमुदाहरंति ॥ ११ ॥ प्रदीप्तेव
प्रज्वलितेच ॥ ११ ॥ अथ प्रतीनाहपरिस्रवयोर्लक्षणमाह ॥ उच्छ्वासमार्गं तु कफः स
वातो रुंध्यात्प्रतीनाहमुदाहरेत्तं ॥ घ्राणाद्द्रुतः पीतसितस्तनुर्वा दोषः स्रवेत्स्राव
मुदाहरेत्तं ॥ १२ ॥ दोषः कफः ॥ १२ ॥ अथ नासाशोषस्य लक्षणमाह ॥ घ्राणाश्रिते श्ले
ष्मणि मारुतेन पित्तेन गाढं परिशोषिते च ॥ कृच्छ्रात्श्वसित्यूर्ध्वमधश्च जंतुर्यस्मि
न् स नासापरिशोष उक्तः ॥ १३ ॥ कृच्छ्रादुच्छ्वसित्यूर्ध्वमधश्च यस्मिन्निति कथनेनोच्छ्वा
सनिश्वासौ करोतीति पर्यायार्थः ॥ १३ ॥ अथ प्रतिश्यायस्य लक्षणमाह ॥ तस्य निदा
नं द्विविधं ॥ एकं सद्योजनकं तद्बलवत्वेन चयं नापेक्षते ॥ तदुक्तं ॥ न केवलं चयं प्राप्य दो

वाः कुर्वंति देहिनां ॥ अन्यदापि हि कुर्वंति हेतुबाहुल्यतोत्वरादिति ॥ हेतुबाहुल्यतोत्वरा
त् हेतूनां बाहुल्येन त्वराकरणात् ॥ अपरं च यादिक्रमेणाजनकं ॥ चयादिक्रमो यथा ॥
निदानात्संचयः संचयात् प्रकोपः ॥ प्रकोपात् प्रसरः प्रसरात् स्थानसंश्रयः ॥ ततो व्य
क्तिः ॥ ततो भेद इति ॥ तत्र प्रतिश्यायस्य संयोजनकं निदानपूर्विकां संप्राप्तिमाह ॥ संधार
णाजीर्णरजोतिभाष्यक्रोधर्तुवैषम्यशिरोभितापैः ॥ संजागरातिस्वप्नांबुशीताव
श्यायकैर्मैथुनाबाष्पसेकैः ॥ संस्त्यानदोषे शिरसि प्रवृद्धो वायुः प्रतिश्यायमुदीरयेत्
१४ ॥ संधारणं मूत्रपुरीषधारणं ॥ रजो धूलिः ॥ तच्च नासाप्रवेशो हेतुः ॥ ऋतुवैषम्यं ऋ
तुचर्याविपरीताचरणं ॥ शिरोभितापः शिरसोभितापो येन धूमादिना सः ॥ अतिस्व
प्नं दिवास्वप्नमित्यर्थः ॥ अवश्यायस्तुषारः ॥ बाष्पसेकः रोदनं ॥ संस्त्यानदोषे शिरसि

५३८ ॥

संहतकफे शिरसि ॥१४॥ अथ यथादिक्रमेण जनककनिदानपूर्विकां मयि संप्राप्तिमाह ॥ च

यं गता मूर्द्धनि मारुतादयः पृथक्समस्ताश्च तैश्च शोणितं ॥ प्रकोप्यमाना विविधैः वि

विधैः प्रकोपनैस्ततः प्रतिश्यायकरा भवंति ॥१५॥ चयं गताः स्वे स्वे स्थाने वृद्धिं गताः ॥

स्वस्थानवृद्धिर्दोषाणां चय इत्यभिधीयत इति वचनात ॥१५॥ अथ तस्य पूर्वरूपमाह

ता

क्षवप्रवृद्धिः शिरसोभिपूर्णता स्तंभोंगमर्दः परिहृष्टरोमता ॥ उपद्रवाश्चाप्यपरे पृथ

ग्विधा नृणां प्रातिश्यायपुरःसराः स्मृता ॥१६॥ शिरसोभिपूर्णता शिरसो भारेण

व्याप्तिः ॥ अपरे पृथग्विधा उपद्रवाः घ्राणाधूमायनतालुविदरणानासामुखस्रा

वादयो विदेहोक्ता ये द्रष्टव्याः ॥१६॥ अथ वातिकस्य प्रतिश्यायस्य लक्षणमाह ॥ आ

नद्धा पिहिता नासा तनुस्रावप्रसेकिनी ॥ गलताल्वोष्ठशोषश्च निदः शंखयोस्त ॥५३८॥

ष्या ॥ भवेत्स्वरोपघातश्च प्रतिश्यायेनिलात्मके ॥१७॥ आनद्धा स्तथाऽपिहितानपि
हिता ॥ अत एव तनुश्रावप्रसेकिनी ॥१७॥ अथ पैत्तिकस्य प्रतिश्यायस्य लक्षणमा
ह ॥ उष्णः सपीतकः श्रावो घ्राणात्स्रवति पैत्तिके ॥ कृशोति पांडुः संतप्तो भवेत्तृष्णाभि
पीडितः ॥ नासया तु सधूमाग्निं वमतीव समानवः ॥१८ सपीतकः ईषत्पीतकः ॥१८
अथ श्लैष्मिकस्य प्रतिश्यायस्य लक्षणमाह ॥ घ्राणात्कफकृते श्वेतः कफः शीतः
श्रवेद्बहु ॥ शुक्लावभासः शूनाक्षो भवेद्गुरुशिरा नरः ॥ गलताल्वोष्ठशिरसां कंडूभिरति
पीडितः ॥१९ कफकृते प्रतिश्याय इति शेषः ॥ शूनाक्षः शोथयुक्तनेत्रः ॥१९॥ अथ
सान्निपातकस्य प्रतिश्यायस्य लक्षणमाह ॥ भूत्वा भूत्वा प्रतिश्यायो यस्याकस्मा
न्निवर्त्तते ॥ संपक्वो वाप्यपक्वो वा स सर्वप्रभवः स्मृतः ॥२० भूत्वा भूत्वेति वीप्स

॥५३८॥

यापुनः संभवं दर्शयति ॥ अत्र यद्यपि दोषत्रयलिंगानि नोक्तानि तथापि तानि ज्ञेयानि
त्रिदोषजत्वादयं असाध्यः ॥ अत एवाह ॥ नृणां दुष्टः प्रतिश्यायः सर्वजश्च न सिध्यति
२० दुष्टप्रतिश्यायस्य लक्षणमाह ॥ प्रक्लिद्यते मुहुर्नासा पुनश्च परिशुष्यति ॥ पुनश्च
नह्यते चापि पुनर्विव्रियते तथा २१ निश्वासो वाति दुर्गंधो नरो गंधान्न वेत्ति च ॥ एवं
दुष्टप्रतिश्यायं जानीयात्कृच्छ्रसाधनं २२ आनह्यते पिवद्धा भवति ॥ विव्रियते अ
विवद्धा स्यात् ॥ क्लेदशोषविवंधाविवंधानैककालं संभवंति किंतु यदा यदा यस्य दो
षाधिक्यं भवति तदा तदा तत्तद्दोषकृतः स स बोद्धव्य इति न विरोधः ॥ कृच्छ्रसाधनं अ
साध्यं कृच्छ्रसाध्यं च ॥ २१॥२२ अथ रक्तजप्रतिश्यायस्य लक्षणमाह ॥ रक्ते हेतु प्र
तिश्याये रक्तस्रावः प्रवर्तते ॥ पित्तप्रतिश्यायकृतैर्लिंगैश्चापि समन्वितः २३ ॥ ५३८ ॥

ताम्रा रूक्षश्च भवेज्जंतुरुरोघातप्रपीडितः । दुर्गंधोच्छ्वासवक्त्रश्च गंधनपि नवेत्ति सः ॥
२४ ॥ उरोघातप्रपीडितः उरोघातेनैव पीडितः ॥ २४॥२४ ॥ अप्रतीकारेणकालांतरे
ण सर्व एव प्रतिश्यायाः असाध्या भवंतीत्याह ॥ सर्व एव प्रतिश्यायाः नरस्याप्रतिका
रिणः ॥ दुष्टतां यांति कालेन तदासाध्या भवंति च ॥ २५ ॥ प्रतिश्यायेषु कृमयोपि भवं
तीत्याह ॥ मूर्छंति कृमयः श्वेताः स्निग्धास्तथाणवः ॥ कृमिजो यः शिरोरोग
स्तुल्यं तेनात्र लक्षणं ॥ २६ ॥ अत्र येषु प्रतिश्यायेषु ॥ श्वेताः स्निग्धा इति प्रतिश्याये
षु कफस्य प्राधान्यात्सर्वेषु प्रतिश्यायेषु कफजा अणवः कृमयो भवंतीति श्वेताः स्निग्धा
इत्युक्तं ॥ तस्य लक्षणमाह ॥ कृमिज इत्यादि ॥ तंः ध्वनिः श्रूयते यस्य शिरोतिमात्र
मित्यादि ॥ २६ ॥ अथ यवह्वाः प्रतिश्यायाः अपरानविचिकारान्कुर्वंतीत्याह ॥

याधिर्य्यमांध्यमथत्वं घोरांश्चनयनामयान् ॥ शोथाग्निमांद्यकासांश्च वृद्धाः कुर्वंति
पीनसाः ॥ २४ ॥ घोरांश्चनयनामयानिति वचनेनैवांध्येतद्ध्येचिशेषेण तत्कृत्य प्रति
पादनार्थमांध्यग्रहणं ॥ अघ्रत्वं न जिघ्रतीत्यघ्रस्तस्य भावोघ्रत्वं ॥ २० ॥ अथ चतुस्त्रिं
शत्संख्यापूरणायाह ॥ अर्बुदं सप्तधा शोथाश्चत्वारोर्शश्चतुर्विधं ॥ चतुर्विधं रक्तपि
त्तमुक्तं घ्राणेपि तद्विदुः ॥ २५ ॥ अस्यार्थः ॥ अर्बुदानि सप्तवातपित्तश्लेष्मसन्निपा
तरक्तमांसमेदोजानि ॥ शोथाश्चत्वारो वातपित्तश्लेष्मसन्निपातजाः ॥ अर्शांसि च
त्वारि वातपित्तश्लेसन्निपातजानि ॥ रक्तपित्तानि चत्वारि वातपित्तश्लेष्मसन्निपा
तजानि ॥ एतानि यथोक्तलिंगानि घ्राणेपि भवंति ॥ २५ ॥ अथ चिकित्साभेदार्थं पीन
सस्यामस्य तल्लक्षणमाह ॥ शिरोगुरुत्वमरुचिर्नासास्रावस्तनुस्वरः ॥ क्षामः ष्ठी

वतिचाभिक्ष्णमामयीनसतक्षणं ॥ रथे ॥ तनुस्वरः सूक्ष्मवचनः क्षामः अथविस्पष्ट
वचनः ॥ क्षीवतिचाभीक्ष्णमितिमुहुर्मुहुः श्लेष्मा लीनासयानिरस्यतीत्यर्थः ॥ रथे ॥
अथपक्वस्यपीनसस्यलक्षणमाह ॥ आमलिंगान्वितः श्लेष्माघनः खेषुनिमज्ज
ति ॥ स्वरवर्णविशुद्धिश्च पक्वपीनस्यलक्षणं ॥ ३० ॥ आमलिंगान्वितः आमलिंगैः
शिरोगुरुत्वादिभिरन्वितः युक्तः श्लेष्मातघनः निविडः ॥ अथच खेषुनासारंध्रेषु
निमज्जतिः सक्तोभवति ॥ स्वरविशुद्धिः स्वरभेदाभावः ॥ वर्णः विशुद्धिः श्लेष्माणः
प्रकृतिवर्णता ॥ खेष्विति व्यत्ययेनैकवचनं ॥ ३० ॥ इतिनासारोगनिदानं
अथनासारोगचिकित्सा ॥ सर्वेषुसर्वकालंपीनसरोगेषुजातमात्रेषुमरिचं
गुडेनदध्नाभुंजीतनरः सुखंलभते ॥ अथांगावलेहिकाध्यंततच्छ्रे लंवापीन

सरोगे आर्द्रकस्य रसेन देयं ॥ कलिंगहिंगुमरिचलाक्षास्वरसकट्फलैः ॥ कुष्ठोग्राशिग्रु
जंतुघ्नैरवपीडः प्रशस्यते ॥ चित्रकोषणतालीसतिंतडीकाम्लवेतसं ॥ सचव्यजाति
तुल्यांशमेलात्वक्पत्रपादिकं ॥ एषां चूर्णोऽद्रकरसैर्युक्तः पीनसनाशनः ॥ व्योषा
म्लवेतसं चव्यं तालीसं चित्रकं तथा ॥ जीरकं तिंतडीकं च प्रत्येकं कर्षभागिकं ॥ त्रिसुगं
धं त्रिशाणं स्यात् गुडः स्यात् कर्षविंशतिः ॥ व्योषादिगुटिकासेयं पीनसश्वासा
कासजित् ॥ रुचिस्वरकरी ख्याता प्रतिश्यायप्रणाशिनी ॥ व्याघ्रीदंतीवचाशिग्रु
सुरसाव्योषसिंधुजैः ॥ सिद्धं तैलमिदं क्षिप्रं पूतिनासागदापहं ॥ सिग्रूसिंहीनि
कुंभातां बीजैः सव्योषसैंधवैः ॥ बिल्वपत्ररसे सिद्धं तैलं स्यात्पूतिनस्यनुत् ॥ नस्ये
नेति शोषः ॥ घृतगुग्गुलुमिश्रस्य सिक्थकस्य प्रयत्नतः ॥ धूमं क्षवथुरोगघ्नं

मूंशगुणं च निर्दिशेत् ॥ शुंठीकुष्ठकणाबिल्वद्राक्षाकल्ककषायवत् ॥ तैलं पक्वमथा
ज्यं वा नस्यात्क्षवथुनाशनं ॥ नस्यं हितं निंबरसांजनाभ्यां दिप्तौ हितं स्वेदनमस्य
शस्तु ॥ नस्ये कृते क्षीरजलावसेकान् दिशंति भुंजीत च मुद्गयूषैः ॥ नासास्रावे घ्रा
णपोष्णं चूर्णमुक्तं नाड्या देयं यद्यपीडाभ्यपथ्याः ॥ तीक्ष्णानधूमान्देवदार्वग्नि
काभ्यां मांसं त्याज्यं पथ्यमत्रादिशंति ॥ प्रतिश्यायेषु सर्वेषु गुरु हेयात चिवर्जितं ॥
वस्त्रेणागुरुणालोद्देन शिरसो वेष्टनं हितं ॥ विडंगं सैंधवं हिंगुगुग्गुलुः समनः
शिला ॥ वचैतच्चूर्णमाघ्रातं प्रतिश्यायं विनाशयेत् ॥ घृतं तैलसमायुक्तं सक्तु
धूमं पिबेन्नरः ॥ स धूमः स्यात्प्रतिश्यायकासहिक्काहरः परः ॥ प्रतिश्याये पिबे
द्धूमं सर्वगंधसमायुतं ॥ चातुर्जातकचूर्णं वा घ्रेयं वा कृष्णजीरकं ॥ पुटपक्वं

॥५४२॥

जयापत्रं तैलसैंधवसंयुतं ॥ प्रतिश्यायेषु सर्वेषु शीलितं परमौषधं ॥ जया भांग इति लो
के प्रसिद्धा ॥ पिप्पल्यः शिग्रुबीजानि विडंगं मरिचानि च ॥ अवपीडः प्रशस्तोयं प्र
तिश्यायं विनाशयेत् ॥ शिरसोभ्यंजनैः स्वेदैर्नस्यैर्मदोष्णभोजनैः ॥ वमनैर्घृतपा
नैश्च तान् यथास्वमुपाचरेत् ॥ तान् प्रतिश्यायान् ॥ कृमिप्रायेक्रमाः प्रोक्तास्ता
न्वै कृमिषु योजयेत् ॥ धावनानि कृमिघ्नानि भेषजानि च बुद्धिमान् ॥ रक्तपित्ता
नि शोष्याश्च तथार्शांस्यर्बुदानि च ॥ नासिकायां स्फुरे तेषां स्वं स्वं कुर्याच्चिकित्सि
तं ॥ गृहधूमकणादारुक्षारनक्ताह्वसैंधवैः ॥ सिद्धं शिखरिबीजैश्च तैलं ना
सागदापहं ॥ यः पिबति शयनकाले कवोष्णमर्धप्रसृतं पुरुषः ॥ सलिलं पीनसयु
क्तः स मुच्यते तेन रोगेण ॥ व्याघ्रारूढोजलं शीतं निद्राकाले पिबेत्तु यः ॥ तस्यापी ॥५४२॥

नसजं दुःखं शमं याति दिनत्रयम् ॥ अजाजी घृतखंडाभ्यां नस्याद्दुष्टं नियच्छति ॥ के
टफलं श्रृंगवेरं च पिप्पलीमरिचानि च ॥ शठीपुष्करमूलं च भार्गीमधुसरावरा
अभयाकुष्ठतवराक्षीरं गोकर्कटकस्य च ॥ एतच्चूर्णवरं प्रोक्तं क्वाथो वा मूत्रमूर्छि
तः ॥ पीनसे स्वरभेदे च तमके सहलीमके ॥ सन्निपाते त्वतिकफे कासे श्वासे च शस्य
ते ॥ नासापाके पित्तकृत्स्नं विधानं कार्यं सर्वं यावद्बाह्याभ्यंतरं च ॥ हरेद्रक्तं क्षीरवृक्ष
त्वचश्च साज्याः सेके योजनीयाश्च लेपे ॥ पूर्वोक्तं सिद्धार्थजन्मादि तैलं कर्णरोगो
क्तमतीवात्र हितं ॥ नासायनाहे कर्तव्यं पानं गव्यस्य सर्पिषः ॥ नासाश्रावे तु नस्या
नि तीक्ष्णद्रव्यस्य कल्पयेत् ॥ नासाशोषे क्षीरपानं ससितं च प्रशस्यते ॥ प्रतिश्या
येषु सन्निरः पीडेषु नवसादरं ॥ समानकलिका चूर्णं सूक्ष्मं से चूर्णये दृढं ॥

॥५४३॥

गुंजामात्रं नुतच्चूर्णं नस्यं प्रधमनं चरेत् ॥ नस्यं त्वनेन नस्येन प्रतिश्यायशिरोरुजः
पाठाद्विरजनीमूर्वापिप्पलीजातिपल्लवैः ॥ दंत्या च तैलं संसिद्धं नस्यात्तत्पीनसापहं
हरीतकीदाडिमपुष्पदूर्वालाक्षारसेन नस्यविधानयोगात् ॥ निवारयेत्स्वेवं चिरप्रवृ
त्तं हंत्याशु नासांतरगं शोणितौघं ॥ वारिपिष्टं त्रयं दूर्वाकुसुंभीदाडिमीफलं ॥ नस्यतो
नासिकारक्तसंभवे लघु हद्धु ॥ जंबूपत्ररसो दूर्वारसो दाडिमपुष्पयुक् ॥ नाशयां
नस्यतो रक्तं पतद्धारयते निशं ॥ अथ पथ्यमाह ॥ स्थितिर्निर्वातनिलये प्रगाढोष्णी
षधारणं ॥ गंडूषो लंघनं नस्यं धूमः छर्दिः शिरोव्यधः ॥ स्वेदः स्नेहः शिरोभ्यंगः
पुराणा यव शाल्यः ॥ कुलत्थमुद्गयोर्यूषो ग्राम्यजांगलजा रसाः ॥ वार्त्ताकं कुलकं
शिग्रुः कर्कोटं बालमूलकं ॥ लशुनं दधि तप्तांबु वारुणी च कटुत्रयं ॥ कटम्लतेल

॥५४३॥

ल्लं स्निग्धमुष्णं च लघु भोजनं ॥ नासारोगे पीनसादौ सेव्यमेतत्सुखावहं ॥ अथापथ्य-
माह ॥ स्नानं क्रोधं शकृन्मूत्रवातवेगान्शुचं द्रवं ॥ शीतसप्यां च यत्नेन नासारोगी
परित्यजेत् ॥ इति नासारोगचिकित्सा ॥ अथ मुखरोगनिदानं ॥ तत्र मुखस्य रूपमाह
ओष्ठौ च दंतमूलानि दंता जिव्हा च तालु च ॥ गलो गलादि सकलं सप्तांगं मुखमुच्य-
ते १ ॥ अथ मुखरोगाणां संख्यामाह ॥ स्फुरष्ठावोष्ठयोर्दंतमूलेषु दश षट् तथा ॥
दंतेष्वष्टौ रसज्ञायां पंच स्फुर्नव तालुनि ॥ २ कंठेष्वष्टादश प्रोक्तास्त्रयः सर्वसरा
स्मृताः ॥ एवं मुखामयाः सर्वे सप्तषष्टिर्मता बुधैः ॥ ३ ॥ अथ मुखरोगाणां निदान-
माह ॥ आनूपपिशितक्षीरदधिमाषादिसेवनात् ॥ मुखमध्ये गदान्कुर्युः क्रुद्धा
दोषाः कफोत्तराः ॥ ४ ॥ तत्रोष्ठरोगाः ॥ तेषां निदानपूर्विकां संख्यामाह ॥ पृथग्दो-

ष्वे समस्तैश्च रक्तजो मांसजस्तथा ॥ मेदोजश्चाभिघातोत्थ एवमष्टौ व्रजागदाः ॥ ५ ॥
तत्र वातिकलक्षणमाह ॥ कर्कशौ परुषौ स्तब्धौ संप्राप्तानिलवेदनौ ॥ दाल्येते परि
पाच्येते ओष्ठौ मारुतकोपतः ॥ ६ ॥ परुषौ रूक्षौ ॥ दाल्येते विदार्येते ॥ परिपाच्येते
किंचिद्विदीर्णत्वचौ क्रियेते ॥ ६ ॥ अथ पित्तजलक्षणमाह ॥ चीयेते पिटिकाभि
स्तु सरुजाभिः समंततः ॥ सदाहपाकपिटिकौ पीताभासौ च पित्ततः ॥ ७ ॥ सरुजाभिः
पैत्तिकरुगान्विताभिः ॥ पद्येवं तर्हि सदाहपाकपिटिकाचितिकिमर्थमुच्यते पूर्वेणै
व गतार्थत्वात् ॥ नैवं ॥ पक्षांतरप्रतीत्यर्थं पुनरुच्यते ॥ अयमर्थः ॥ कदाचित्पित्तरु
जान्वितबहुपिटिकाचितौ ओष्ठौ कदाचिद्दाहपाकान्वितैकपिटिकान्वितौ वा भव
तः ॥ ७ ॥ अथ श्लेष्मजलक्षणमाह ॥ सवर्णाभिस्तु चीयेते पिटिकाभिरवेदनौ

कंडूमंतौ कफाच्छूतौ पिच्छलौ शीतलौ गुरू ॥ ५ ॥ स्ववर्णाभिरोषसमानवर्णाभिः ॥ आवे
दनौ ईषद्वेदनौ ॥ ५ ॥ अथ सन्निपातजलक्षणमाह ॥ सकृत्स्रौ सकृत्पीतौ सकृच्छूतौ
तथैव च ॥ सन्निपातेन विज्ञेया वनेकपिटिकाचितौ ॥ ६ ॥ सकृत्कदाचित् ॥ अनेक
पिटिकाचितौ वातादिवेदनान्वितबहुपिटकौ ॥ ६ ॥ अथ रक्तजलक्षणमाह ॥ खर्जू
रफलवर्णाभिः पिटिकाभिर्निपीडितौ ॥ रक्तोपसृष्टौ रुधिरं स्रवतः शोणितप्रभौ
१० ॥ खर्जूरफलवर्णाभिरित्यनेन वर्णमात्रेणैव साधर्म्यं प्रतिपाद्यते ॥ यदि तु सर्वा
त्मना साधर्म्यमभीष्टं स्यात्तदा खर्जूरफलतुल्याभिरित्येवोच्यते ॥ रक्तोपसृष्टौ र
क्तदूषितौ ॥ १० ॥ अथ मांसजलक्षणमाह ॥ मांसदुष्टौ गुरू स्थूलौ मांसपिंडवदुद्गतौ
जंतवश्चात्र मूर्छंति नरस्योभयतो मुखात् ॥ ११ ॥ जंतवः कृमयः ॥ मूर्छंति वर्द्धंते ॥ मु

ख्यातुउभयतः सक्किण्योः ॥ ११ ॥ अथ मेदोजलक्षणमाह ॥ सर्पिर्मण्डप्रतीकाशौ मेदसा
कण्डुरौ गुरू ॥ स्वच्छस्फटिकसंकाशमास्यं चाप्यवतो भृशं ॥ तयोर्व्रणो न संरोहेन्मृदुत्वं
च न गच्छति ॥ १२ ॥ सर्पिर्मण्डो घृतस्योपरितनः स्वच्छभागः तत्प्रतीकाशौ तत्सदृशौ
तयोरिति तादृशयोः ॥ १२ ॥ अथाभिघातजलक्षणमाह ॥ क्षतजाभौ विदीर्येते पी
ड्येते चाभिघाततः ॥ ग्रथितौ च समाख्यातावोष्ठौ कण्डूसमन्वितौ ॥ १३ ॥ ग्रथितौ ग्र
द्रिताविव ॥ अत एव क्षतजाभौ रुधिराभाविति संगतं ॥ अत्र कफरक्तयोरनुवंधो वे
द्व्यः ॥ पुरुक्तं भोजे ॥ कफरक्तप्रदूषिताविति १३ इत्योष्ठरोगनिदानं ॥ अथ दंतवेष्ट
रोगानाह ॥ तत्र दंतवेष्टरोगाणां नामानि संख्यां चाह ॥ शीतादो गदितः पूर्वं दंतपु
प्पुटकस्तथा ॥ दंतवेष्टः सौषिरश्च महासौषिर एव च ॥ १४ ॥ ततः परिदरः प्रोक्त

॥ ५४५ ॥

साततस्तु पकुशः स्मृतः ॥ वैदर्भश्च ततः प्रोक्तः खलिवर्द्धनएव च १५ ॥ अधिमांसक
नामा च दंतनाड्यश्च पंच च ॥ दंतविद्रधिरप्यत्र दंतवेष्टेषु षोडश ॥ १६ ॥ तत्र शीताद
स्य लक्षणमाह ॥ शोणितं दंतवेष्टेभ्यो यस्याकस्मात्प्रवर्त्तते ॥ दुर्गंधीनि सकृष्णानि प्र
क्लेदीनि मृदूनि च ॥ १७ ॥ दंतमांसानि शीर्य्यंते पचंति च परस्परं ॥ शीतादो नाम स व्या
धिः कफशोणितसंभवः ॥ १८ ॥ दंतवेष्टेभ्यः दंतवेष्टनमांसेभ्यः ॥ अकस्मादभिघा
तं विना ॥ शीर्य्यंते पतंति ॥ पचंति च परस्परमिति पाकोष्मणा मांसानि शोणितं पचं
ति शोणितं मांसानि च पचति ॥ १७ ॥ १८ ॥ अथ दंतपुप्पुटकमाह ॥ दंतयोस्त्रिषु वा यस्य
श्वयथुर्जायते महान् ॥ दंतपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ १९ ॥ अथ पंच दंतयो
स्त्रिषु छित्यभिघानात्तद्धि त्रि दंतनिपतः ॥ १९ ॥ अथ दंतवेष्टस्य लक्षणमाह ॥ स्रवंति

अध्मायंते दंतवेष्टा इति शेषः आध्मायंते उत्फुल्ला भवंति ॥

॥५४ ही॥

पूयं रुधिरं च्यवंते दंता भवंति च ॥ दंतवेष्टः स विज्ञेयो दुष्टशोणितसंभवः ॥ २० ॥ अत्र दंत
मूलानीति क्रियापदमध्याहरणीयं २० ॥ अथ शौषिरस्य लक्षणमाह ॥ श्वयथुर्दंतमू
लेषु रुजावान्कफरक्तजः ॥ लालास्रावी कंडुरश्च स ज्ञेयः शौषिरो गदः ॥ २१ ॥ अथ म
हाशौषिरस्य लक्षणमाह ॥ दंताश्चलंति वेष्टेभ्यस्तालु चाप्यवदीर्यते ॥ यस्मिन्स स
र्वजो व्याधिर्महाशौषिरसंज्ञकः ॥ २२ ॥ चकाराद्दंतवेष्टौ चाप्यवदीर्यते ॥ सप्तरात्रान्मा
रकश्चायं ॥ यदाह भोजः ॥ महाशौषिर इत्येष सप्तरात्रान्निहंत्यसूनीति ॥ २२ ॥ अथ परि
दरस्य लक्षणमाह ॥ दंतमांसानि शीर्यंते यस्मिन्ष्ठीवति चाप्यसृक् ॥ पित्तासृक्
कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥ २३ ॥ दंतमांसस्य परिदारणात्परिदरसंज्ञो ॥ ५४ ही ॥

२३॥ अथोपकुशस्य लक्षणमाह॥ येषु दाहः पाकश्च ताभ्यां दंताश्चलंतिच॥ आघा
ट्टिताः स्रवंति शोणितं मंदवेदनाः॥२४॥ आध्मायंते स्रुते रक्ते मुखं पूतिच जायते
यस्मिन्नुपकुशः स्यात्पित्तरक्तसमुद्भवः॥२५॥ ताभ्यां दाहपाकाभ्यां॥ आघट्टिता घृष्टाः
२४॥२५॥ अथवैदर्भस्य लक्षणमाह॥ घृष्टेषु दंतमूलेषु संरंभो जायते महान्॥ चलं
तिच रदा यस्मिन्स वैदर्भोभिघातजः॥२६॥ संरंभः शोथः॥ चलंतिचेतिचकारोद्धे दंता
दाहपाकादयः॥२६॥ अथखलिवर्द्धनस्य लक्षणमाह॥ मारुतेनाधिको दंतो जायते
तीव्रवेदनः॥ खलिवर्द्धनसंज्ञोसौ सौ संजाते रुक्प्रशाम्यति॥२७॥ संजातै दंते॥२७॥ अथा
धिमांसकस्य लक्षणमाह॥ हनव्ये पश्चिमे दंते महान् शोथो महारुजः॥ लालास्रावी
कफकृतो विज्ञेयः सोधिमांसकः॥२८॥ हनव्ये हनुभवे॥ पश्चिमे अंतजे॥२८॥ अथ

पंचनाडीराह॥ दंतमूलगतानाड्यः पंचज्ञेया यथेरितः॥ २९॥ नाड्यः पंचज्ञेया यथेरिता॥
इति यथा नाडीनिदाने वातपित्तकफसन्निपातागंतुनिमित्ताः पंचनाड्यः कथिता स्तथा
त्रापीत्यर्थः॥ २९॥ अथ दंतविद्रधिलक्षणमाह॥ दंतमांसमलैः सास्रैर्बाह्यतः श्वय
थुर्महान्॥ सदाहरुक् स्रवेद्भिन्नः पूयास्रं दंतविद्रधिः॥ ३०॥ दंतमांसमलैः दंतवेष्टग
तदोषैः॥ सास्रैः सरक्तैर्हेतुभिः॥ ३०॥ इति दंतवेष्टरोगनिदानं॥ अथ दंतरोगानाह
तत्र दंतरोगाणां नामानि संख्यां चाह॥ दालनः कथितः पूर्वं कृमिदंतकरश्च॥ प्रोक्तौ
भंजनकौ दंतहर्षो वै दंतशर्करा॥ ३१॥ कपालिकात्र कथिता श्यावदंतकरश्च॥ करालसं
सरस्त्वष्टौ दंतरोगाः प्रकीर्तिताः॥ ३२॥ तत्र दालनस्य लक्षणमाह॥ दाल्यमानेष्विव
रुजा यत्र दंतेषु जायते॥ दालनो नाम स व्याधिः सदागतिनिमित्तजः॥ ३३॥ सदाग

त्तिः वायुः ॥ २३ ॥ अथ कृमिदंतस्य लक्षणमाह ॥ कृष्णच्छिद्रश्चलः स्रावी ससंरंभो महा-
रुजः ॥ अनिमित्तरुजो वातात्स ज्ञेयः कृमिदंतकः ॥ २४ ॥ कृष्णच्छिद्रः दुष्टरक्तजः कृमिकृत
श्वोथपाकद्वारेण कृष्णच्छिद्रत्वपर्यः ॥ अन्ये कृष्णः छिद्र इति पठंति ॥ छिद्र इति छिद्र-
वान् ॥ ससंरंभः दंतमूलश्वोथयुक्तः ॥ तत्र स्रावी बोद्धव्यः ॥ दंतमांसनीरसत्वेन स्रावा-
भावात् ॥ अनिमित्तरुजः ॥ अवघटनादिनिमित्तं विनैव महारुजावान् ॥ २४ ॥ अथ भं-
जनकस्य लक्षणमाह ॥ वक्रं वक्रं भवेद्यत्र दंतभंगश्च जायते ॥ कफवातकृतो व्या-
धिः स भंजनकसंज्ञकः ॥ २५ ॥ वक्रं वक्रमिति दंतभंगकारिणा दोषेण वक्त्रस्यापि
वक्रत्वं ॥ २५ ॥ अथ दंतहर्षणस्य लक्षणमाह ॥ शीतरूक्षप्रवातान्लस्पर्शानामस-
हा द्विजाः ॥ यत्र स्युर्वातपित्ताभ्यां दंतहर्षः स कीर्तितः ॥ २६ ॥ अथ दंतशर्करायाल-

लक्षणमाह। मलो दंतगतो यस्तु कफमारुतशोषितः॥ शर्करेव खरस्पर्शा सा ज्ञेया दंतश

॥५४८॥ र्करा॥ ३४॥ शर्करा सिकता॥ ३४॥ अथ दंतकपालिकायालक्षणमाह। कपालेष्विव दीर्य्य

त्सु दंतेषु समलेषु च। कपालिकेति विज्ञेया दंतच्छिद् दंतशर्करा॥ ३५॥ कपालानि मृण्म

यघटादिखंडानि। तेष्विव समलेषु दंतेषु मलसहितदंतावयवेषु दीर्य्यत्सु या च

दंतशर्करा सा कपालिकेति विज्ञेया। सा कपालिका दंतच्छित् दंतनाशिनी॥ ३५॥ अ

थ श्यावदंतकस्य तल्लक्षणमाह॥ योऽसृङ्मिश्रेण पित्तेन दग्धो दंतस्त्वशेषतः॥ श्याव

तां नीलतां चापि गतः स श्यावदंतकः॥ ३६॥ दग्धः दग्ध इव॥ ३६॥ अथ करालदंतस्य त

ल्लक्षणमाह॥ शनैः शनैः प्रकुरुते यत्र दंता च्छितो निलः। करालान्विकटान्व्यापि स क

रालो न सिध्यति॥ ४०॥ करालान् भयानकान्॥ अथ सुश्रुतेनोक्तः संगूहकारेणसं ॥५४८॥

गृहीतः ॥ ५० इति दंतरोगनिदानं ॥ अथ जिह्वारोगानाह ॥ तत्र जिह्वारोगाणां निदानं
नामानि संख्यां चाह ॥ वातजः पित्तजश्चापि कफजो लाससंज्ञकः । उपजिह्विका च गदा
जिह्वायां पंच कीर्तिताः ॥ ५१ ॥ तत्र वातिकपैत्तिकश्लैष्मिकाणां लक्षणान्याह ॥ जिह्वा
निलेन स्फुटिता प्रसुप्ता भवेच्च शाकच्छदनप्रकाशा ॥ पित्तात्सदाहैरुपचीयते च दीर्घैः
सरक्तैरपि कंटकैश्च ॥ कफेन गुर्वी बहलान्विता च मांसोद्भवैः शाल्मलिकंटकाभैः ॥ ५२ ॥
स्फुटिता मनाक्विदीर्णा ॥ प्रसुप्ता रसानामनभिज्ञतया सुप्तेव ॥ शाकच्छदनप्रकाशा
शाकोमरद्रुमसंज्ञो द्रुमस्तस्य पत्रवत्कंटकचिता ॥ सरक्तैः रक्तवर्णयुक्तैः बहला स्थूला
मांसोद्भवैः मांसजकंटकैः ॥ ५२ ॥ अथालासस्य लक्षणमाह ॥ जिह्वातले यः श्वयथुः
प्रगाढः सोऽलाससंज्ञः कफरक्तमूर्तिः ॥ जिह्वां सहस्तंभयति प्रवृद्धो मूले च जिह्वा

॥५४८॥

मध्यमेति पाकं ॥४३॥ प्रगाढः प्रकर्षेण गाढो दाहरागः ॥ कफरक्तमूर्तिः कफरक्ताभ्यां मूर्ति
र्यस्य सः कफरक्तज इत्यर्थः जिह्वास्तंभनेन वायुरप्यत्र बोद्धव्यः ॥ मध्यपाकेन पित्तं चा
त्र बोद्धव्यं ॥ त्रिदोषजोयं ॥ अशाध्यत्वं चास्य बोद्धव्यं ॥४३॥ अथोपजिह्विकाया लक्ष
णमाह ॥ जिह्वाग्ररूपः श्वयथुर्हि जिह्वामुन्नाम्य जातः कफरक्तयोनिः ॥ प्रसेककं
डूपरिदाहयुक्तः प्रकथ्यते सा उपजिह्विकेति ॥४४॥ जिह्वाग्ररूपः जिह्वाकृतिः ४४
इति जिह्वारोगनिदानं ॥ अथ तालुरोगानाह ॥ तत्र तालुरोगाणां नामानि संख्यां चा
ह ॥ गलशुंडी तुंडिकेर्यध्रुषः कच्छप एव च ॥ ताल्वर्बुदं मांसकपितो मांससंघात एव च
४५ ॥ तालुपुप्पुटनामा च तालुशोषस्तथैव च ॥ तालुपाकश्च कथितो तालुरोगा अमी
नव ॥४६॥ तत्र गलशुंडीलक्षणमाह ॥ श्लेष्मासृग्भ्यां तालुमूलात्प्रवृद्धो दीर्घः शो

॥५४८॥

थोध्मातवस्तिप्रकाशः ॥ तृस्नाकासस्वासकृतंवदंतिव्याधिंवैद्याः कंठशुंडीतिनाम्ना

४७ ॥ ध्मातवस्तिप्रकाशः वातपूरितचर्मपुटतुल्यः ॥ ४७ ॥ अथतुंडिकेरीतस्यलक्षणमा

ह ॥ शोथः स्थूलस्तोददाहप्रपाकीप्रागुक्ताभ्यांतुंडिकेरीमतातु ॥ ४७ ॥ प्रागुक्ताभ्यांश्लेष्मा

सृग्भ्यां ॥ तुंडिकेरीवनकर्पासीफलंतत्तुल्यशोथतयातुंडिकेरी ॥ तोददाहाभ्यामत्रया

तपित्तान्वयोस्ति ॥ ४७ ॥ अथध्रूषकच्छपयोर्लक्षणमाह ॥ मृदुःशोथोलोहितःशोणि

तोत्थोज्ञेयोध्रूषः सज्वरस्तीव्ररुक्च ॥ कूर्मोत्सन्नोवेदनोऽशीघ्रजन्मारोगोज्ञेयःक

च्छपःश्लेष्मणातु ॥ ४८ ॥ लोहितोध्रूषः रक्तसमुत्थः ॥ कूर्मोत्सन्नः मध्येप्रोच्चः प्रांतेनतः

अशीघ्रजन्माचिरजः ॥ ४८ ॥ अथतालुन्यर्बुदमांससंघातयोर्लक्षणमाह ॥ पद्माकारं

तालुमध्येतुशोथंविद्याद्रक्तादर्बुदंपित्तलिंगं ॥ दुष्टंमांसंश्लेष्मणानीरुजंचता

त्वं यस्यं मांससंघातमाहुः ॥ ४९ ॥ पद्मकर्णिकाकेसरैरिव पार्श्वतो दीर्घमांसांकुरैर्वेष्टि-
तं ॥ तालव्यं तस्यं तालुमध्यवर्त्ति ॥ ४९ ॥ अथ तालुपुप्पुटतालुशोषयोर्लक्षणमाह ॥ नीरु-
क्स्थायी कोलमात्रः कफात्स्यान्मेदोयुक्तात्तालुपुप्पुटस्तालुदेशे ॥ शोषोत्यर्थं दीर्यते चापि
तालुश्वासो वातात्तालुशोष उक्तः ॥ ५० ॥ अथ तालुपाकस्य लक्षणमाह ॥ पित्तं कुर्या-
त्पाकमत्यर्थघोरं तालुन्येनं तालुपाकं वदंति ॥ ५१ ॥ इति तालुरोगनिदानं ॥ अथ गलरो-
गानाह ॥ तत्र गलरोगाणां नामानि संख्यां चाह ॥ रोहिणी पंचधा प्रोक्ता कंठशालूक-
एव च ॥ अधिजिह्वश्च वलयो बलासश्चैकवृंदकः ॥ ५२ ॥ तालो वृंदः शतघ्नी च गिला-
युः कंठविद्रधिः ॥ गलौघस्स्वरघ्नश्च मांसतानस्तथैव च ॥ विदारी कंठदेशे तु रो-
गा अष्टादश स्मृताः ॥ ५३ ॥ तत्र पंचानामपि रोहिणीनां सामान्यं संप्राप्तिमाह ॥

॥ ५५० ॥

गतेनिलः पित्तकफौ च मूर्छितौ प्रदुष्य मांसं च तथैव शोणितं॥ गलोपसंरोधकरै
स्तथांकुरैर्निहंत्यसून्व्याधिरयं हि रोहिणी॥५४॥ अनिलः मूर्छितः प्रवृद्धः॥ पि
त्तकफौ च मूर्छितौ पितेन वा मूर्छितं कफो वा मूर्छितः॥ न तु त्रयोपि मूर्छितः॥ वध्य गदो
षजायाश्चापि च दुष्य मारणत्वात्॥५४॥ अथ वातजायास्तस्याः लक्षणमाह॥ जिव्हास
मंतात् भृशवेदनास्तु मांसांकुराः कंठनिरोधनाः स्युः॥ सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढयुक्ता॥५५॥ जिव्हासमंतात् जिव्हायाः सर्वतः॥ वातात्मकोपद्र
वगाढयुक्ता स्तंभादिभिरतिशयेन युक्ता॥५५॥ अथ पित्तजकफजयोस्तयोर्लक्षण
माह॥ क्षिप्रोद्गमा क्षिप्रविदाहपाका तीव्रज्वरा पित्तनिमित्तजाता॥ स्रोतोनिरोधिन्य
पि मंदपाका गुर्वी स्थिरा या कफसंभवा सा॥५६॥ स्रोतः कंठस्रोतः॥५६॥ अथ सा

न्निपातिकस्तज्जयोस्तयोर्लक्षणमाह ॥ गंभीरपाकिन्यनिवार्य्यवीर्य्या त्रिदोषलिंगा
त्रिभवा भवेत्सा ॥ स्फोटैश्चिता पित्तसमानलिंगा साध्या प्रदिष्टा रुधिरात्मिका तु ॥ ५४
अनिवार्य्यवीर्य्या अनिवार्य्यवीर्य्यं यस्याः ॥ सद्योमारकत्वादित्यर्थः ॥ पित्तसमानलिं
गा पित्तजरोहिणीलक्षणा ॥ ५५ ॥ अथ रक्तजेतरासां मारकत्वावधिमाह ॥ सद्यस्त्रि
दोषजा हंति त्र्यहात्कफसमुद्भवा ॥ पंचाहात्पित्तसंभूता सप्ताहात्पवनोत्थिता ॥ ५६
अथ कंठशालूकस्य लक्षणमाह ॥ कोलास्थिमात्रः कफसंभवो यो ग्रंथिर्गले कंटक
शूकभूतः ॥ खरः स्थिरः शस्त्रनिपातसाध्यस्तं कंठशालूकमिति ब्रुवंति ॥ ५७ ॥ कंटक
शूकभूतः कंटकवत् शूकवच्च वेदनाजनकः ॥ कठिनगुरुकतया शालूकसमत्वेन कं
ठशालूकः ॥ शालूकमौत्पलः कंदः ॥ ५८ ॥ अथाधिजिह्वकस्य लक्षणमाह ॥ जिह्वा

गुरुत्वाः श्वयथुः कफात्तु जिह्वोपरिष्टाद्दसजेयमभिष्यात ॥ ते योधिजिह्वकः खलु रोगरा
षवि वर्जयेदागतपाकमेनं ॥ ६० ॥ असजामभिष्याद्देवेत्वन्वेयः ॥ आगतपाके त्वेन पित्त
मप्यत्र दुष्टव्यं ॥ ६० ॥ अथ वलयस्य लक्षणमाह ॥ वलासरावायतमुन्नतं च शोथं क
रोत्यन्नगतिं निवार्य ॥ तं सर्वथैवाप्रतिवार्यवीर्यं विवर्जनीयं वलयं वदंति ॥ ६१ ॥
वलासः कफः ॥ अन्नगतिं अन्नवहमार्गं ॥ कफजोप्ययं प्रभावादसाध्यः ॥ ६१ ॥ अ
थ वलासस्य लक्षणमाह ॥ गले तु शोथं कुरुते प्रवृद्धौ श्लेष्मानिलौ श्वासरुजोप
पन्नं ॥ मर्मच्छिदं दुस्तरमेनमाहुर्वलाससंज्ञं भिषजो विकारं ॥ ६२ ॥ मर्मच्छिदं हृद
य मर्मशिरोछेदनैव वेदनाजनकं ॥ ६२ ॥ अथ एकवृंदस्य लक्षणमाह ॥ वृत्तोन्नतं
तः श्वयथुः सदाहः सकंडुरोऽपाक्यमृदुर्गुरुश्च ॥ नाम्नैकवृंदः परिकीर्त्यते सौ

व्याधिर्बलासक्षतजप्रसूतः ॥ई३॥ अंतः गलमध्ये ॥ सदाहः मंददाहः ॥ सकंडुः ईषत्कंडुः
अपाकी ईषत्पाकी ॥ अमृदुः ईषन्मृदुः ॥ बलासक्षतजप्रसूतः कफरक्तभवः ॥ई३॥ अ
थ वृंदस्य लक्षणमाह ॥ समुन्नतं वृत्तममंददाहं तीव्रज्वरं वृंदमुदाहरंति ॥ तंचापि
पित्तक्षतजप्रकोपाद्विद्यात्सतोदं पवनात्मकं तु ॥ई४॥ एकवृंदस्यैवावस्थाविशे
षो वृंदं तु स्वस्थानाकृतित्वात् ॥ई४॥ अथ शतघ्नीलक्षणमाह ॥ वर्तिर्घनाकंठनि
रोधिनी या चितातिमात्रं पिशितप्ररोहैः ॥ अनेकरुक्प्राणहरी त्रिदोषात् ज्ञेया श
तघ्नी सदृशी शतघ्न्या ॥ई५॥ घना कठिना ॥ अनेकरुक् वातपित्तकफतोददाहकंडू
दिभुक्ता शतघ्नीसदृशा लोहकंटकसंछन्ना शतघ्नी महती शिला तत्तुल्या ॥ यतः प्रा
णहरी ॥ई५॥ अथ गिलायोर्लक्षणमाह ॥ ग्रंथिर्गलेत्वामलकास्थिमात्रः स्थिरो

स्यद्रक्तस्यात्कफरक्तमूर्तिः॥ संतप्यते सक्तमिवाशनं च स मासत्वे साध्यस्तु गिलायुसं

ज्ञः॥ ६६॥ कफरक्तमूर्तिः कफरक्तजः॥ अथान्तर्भक्तं॥ ६६॥ अथ गलविद्रधिलक्षणमा

ह॥ सर्वं गलं व्याप्य समुत्थितो यः शोथो रुजः संति च यत्र सर्वाः॥ स सर्वदोषो गल

विद्रधिस्तु तस्यैव तुल्यः खलु सर्वजस्य॥ ६७॥ तस्यैव सर्वजस्य तुल्य इति प्रागुक्त

सन्निपातविद्रधेस्तुल्य इत्यर्थः॥ ६७॥ अथ गलौघस्य लक्षणमाह॥ शोथो महा

नन्नजलावरोधी तीव्रज्वरो वायुगतेर्निहंता॥ कफेन जातो रुधिरान्वितेन गलेन

लौघः परिकीर्त्यते सौ॥ ६८॥ वायुगतेर्निहंता उदानवायुगतिरोधकः॥ ६८॥ अथ स्व

रघ्नस्य लक्षणमाह॥ यस्ताम्यमानः श्वसिति प्रसक्तं भिन्नस्वरः शुष्कविमुक्तकंठः

कफोपदिग्धेष्वनिलायनेषु ज्ञेयः स रोगः श्वसनात्स्वरघ्नः॥ ६९॥ ताम्यमानः

॥ ५५३ ॥

तमःप्रवेशनं अथवा मूर्छां गच्छेत् ॥ प्रसक्तं निरंतरं ॥ शुष्कविमुक्तकंठः शुष्को नीरसः
विमुक्तो स्वाधीनः कंठो यस्य सः अस्वाधीनता भुक्तं गिलितुमशक्यत्वात् ॥ अनि
तायनेषु वायुवर्त्मसु ॥ वायुवहस्रोतसो द्वित्वे पि बहुवचनं प्रतानबहुत्वात् ॥ अस
नात् वा तानात् ॥ इति ॥ अथ मांसतानस्य लक्षणमाह ॥ प्रतानवान् यश्च यथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण ॥ स मांसतानः कथितो भिषग्भिः प्राणप्रणुत् सर्वकृतो
विकारः ॥ ७० ॥ प्रतानवान् विस्तारवान् ॥ सुकष्टः महादुःखदायी ॥ ७० ॥ अथ विदारी
लक्षणमाह ॥ सदाहतोदं श्वयथुं सुताम्रमंतर्गले पूतिविशीर्णमांसं ॥ पित्तेन विं
द्याद्वदने विदारीं पार्श्वे विशेषात्सचयेन शेते ॥ ७१ ॥ सपुरुषः येन पार्श्वेन विशेषा
द्बहुत्वेन शेते तस्मिन् पार्श्वे विदारी भवतीत्यर्थः ॥ ७१ ॥ इति गलरोगनिदानं ॥ अ

५५३ ॥

थ समस्तमुखरोगनिदानं । तत्र तेषां निदानं संख्यां चाह ॥ पृथग्दोषैस्त्रयो रोगाः सम
स्तमुखजाः स्मृताः ॥ अथ वातिकपैत्तिकश्लैष्मिकसमस्तमुखरोगाणां क्रमेण लक्ष
णान्याह ॥ स्फोटैः सतोदैर्वदनं समंताद्यस्याचितं सर्वसरः स वातात ॥ रक्तैः सदाहै
पिटकैः सपीतैः यस्याचितं चापि स पित्तकोपात ॥ अवेदनैः कंडुयुतैः सवर्णैर्यस्या
चितं चापि स वै कफेन ॥ ७२ ॥ आचितं व्याप्तं ॥ अवेदनैः ईषद्वेदनैः ॥ पठ्यते सुश्रुते ॥ अ
ल्परुजैरिति ॥ केचिद्विदेहोक्तरक्तजसर्वसरं तल्लक्षणं पठंति ॥ तद्यथा ॥ रक्तेन पित्तोदि
त एव चापि केचिन्न दिष्टो मुखपाकसंज्ञः इति ॥ अयं च पैत्तिकसर्वसरप्रविष्ट ए
वेति नेह दर्शितः ॥ ७३ ॥ अथ मुखरोगेष्वसाध्यानाह ॥ ओष्ठप्रकोपे वर्ज्याः स्यु
र्मांसरक्तत्रिदोषजाः ॥ दंतवेष्टेषु वर्ज्यौ तु त्रिलिंगगतिसौषिरौ ॥ ७४ ॥ त्रिलिंगग

॥५५४॥

तिः त्रिदोषजा नाडी ॥ शौषिरो महाशौषिरः ७३ दंतेषु च न सिध्यंति श्यावदालनभं
जनाः ॥ जिव्हारोगेष्वलासस्तु तालव्येष्वर्बुदं तथा ॥ ७४ स्वरघ्नो वलयो वृंदो वला
सः सविदारणः ॥ गलौघो मांसतानश्च शतघ्नी रोहिणी गते ॥ ७५ सविदारणः चि
दार्प्यास्तेहेत्यर्धः ॥ रोहिणी त्रिदोषजा स्तेया ७५ असाध्याः कीर्तिता ह्येते रोगा द
शनवोत्तराः ॥ तेषु वा चिकित्सां वैद्यः प्रत्याख्याय समाचरेत् ७६ ॥ इति मुखरोगनि
दानं ॥ अथ मुखरोगचिकित्सा ॥ दंतमूलगलवक्त्रजा गदा दुष्टशोणितकफाधिको
द्भवाः ॥ प्रायशो स्वकृदतो स्त्रमेव तु स्रावयेत्प्रथमं ततो विधिः ॥ अथौष्ठरोगाणां
चिकित्सा ॥ चतुर्विधेन स्नेहेन मधूच्छिष्टयुतेन च ॥ वातजे भ्यंजनं कुर्यान्नाडीस्वेदं
च बुद्धिमान् ॥ चतुर्विधेन स्नेहेन तैलघृतवसामज्जारूपेण ॥ वेधं सिराणां वमे

॥५५४॥

नेविरेकं तिक्तस्यपानं रसभोजनं च ॥ शीतानां प्रदेहानां परिषेचनं च पित्तोपसृष्टेष्व
धरेषु कुर्यात ॥ शिरोविरेचनं धूमः स्वेदः कवलग्रहश्च ॥ हृते रक्ते प्रयोक्तव्यमोष्ठको
पे कफात्मके ॥ रक्तपित्तोपघातोत्थानजलौकाभिरुपाचरेत ॥ ओष्ठामयानत्र हितापि
त्तविद्रधिवत्क्रिया ॥ त्रिदोषजे वा व्यथदुष्टमांससमुद्भवेष्वोष्ठगदे प्रशस्ता ॥ रक्तस्रु
तिष्वाग्रहितः प्रलेपस्त्वकपंचकस्यातिमदद्रुतस्य ॥ ओष्ठरोगेष्वशेषेषु दुष्ट
दोषमुपाचरेत ॥ तेषु व्रणत्वयातेषु व्रणवत्समुपाचरेत ॥ मेदोजे स्वेदिते भिन्ने शो
धिते कफवतो हितः ॥ प्रियंगुत्रिफलालोध्रसक्षौद्रैः प्रतिसारणं ॥ प्रतिसारणं पथ्या
दंतजिव्हामुखोनां पच्चूर्णकल्कावलेहकैः ॥ शनैर्घर्षणमंगुल्यातदुक्तं प्रतिसार
णं ॥ तैलं घृतं सर्जरसं ससिक्थं गाल्लागरूसैंधवगैरिकं च ॥ पक्त्वा सर्मा संदशन

॥५५५॥

छदनानां त्वग्भेदहं तद्व्रणारोपणं च ॥ एतां मधूच्छिष्टगुडेन पक्वं तैलं घृतं वापि निहंति ।
तेषात् ॥ त्वग्भेदपारुष्यहरं धरस्य पूयास्रसंस्रावमपि प्रसह्य ॥ अथ दंतवेष्टरोगचिकि जो
त्सा ॥ शीतादे हृतरक्ते तु तोयं नागरसर्षपान् ॥ निःक्वाथ्य त्रिफलां चापि कुर्याद्गंडूषधा
रणं ॥ कासीसलोध्रकृष्णा मनःशिलाः सप्रियंगु तेजोव्हा ॥ एषां चूर्णं मधुयुक्तं शी
तादे पूतिमांसहरं ॥ तैलं घृतं वा काकातलं शीतादे च प्रशस्यते ॥ दंतपुप्पुटके कार्यं तरु
णे रक्तमोक्षणं ॥ सपंचलवणः क्षारः सक्षौद्रः प्रतिसारणं ॥ शिरोविरेकश्च हितो न
स्यं स्निग्धं च भोजनं ॥ विस्राविते दंतवेष्टे व्रणांस्तु प्रतिसारयेत् ॥ लोध्रपतंगमधुकला
क्षाचूर्णैर्घृतस्तुतैः ॥ गंडूषे क्षीरिणो योज्याः सक्षौद्रघृतशर्करैः ॥ चलदंतस्थिरकरं
कार्यं बकुलचर्वणं ॥ मदने सामयाव्योषविडंगारिष्टपल्लवैः ॥ गोमूत्रपिष्टैर्गुटि ५५५

कांच्छायाशुष्कांप्रलक्षयेत् ॥ तांनिधायमुखेतस्याच्चलदंतातुरोनरः ॥ नातःपरतरंकिं
चिच्चलदंतस्यभेषजं ॥ इतिभद्रमुस्तादिवटी ॥ त्रिसप्ततैरौप्यमेकंतुजंबीररसमर्दितं ॥
जंबीरफलमध्यस्थंवस्त्रेबध्वाथ्यहंपचेत् ॥ क्षीरमध्येततोहृत्यगुटिकांतांततःपुनः
भावितंभानुदुग्धेनतालकंसूक्ष्मपेषितं ॥ तन्मध्येगुटिकांक्षिप्यवस्त्रेबध्वाथ्यहंपुनः ॥
मधुभांडगतांपक्वांततस्तस्यविधारिता ॥ घर्षितांघ्रसितान्दंतान्सप्ताहात्कुरुते
दृढं ॥ इतिसूतरजतगुटी ॥ शौषिरेहृतरक्तेतुलोध्रमुस्तारसांजनैः ॥ सक्षौद्रैःशस्यतेले
पोगंडूषेक्षीरिणोहिताः ॥ क्रियांपरिदरेकुर्याच्छीतादोक्तांविचक्षणः ॥ संशोध्योभय
तःकायंशिरश्चोपकुशेततः ॥ काकोदुंबरिकापत्रैर्घर्षांविस्रावयेद्भिषक ॥ तद्वल्लोणैःसौ
द्रुष्टकैश्चसव्योषैःप्रतिसारयेत् ॥ शस्त्रेणोत्कृत्यवैदर्भेदंतमूलानिशोधयेत् ॥

ततः क्षारं प्रयुंजीत क्रियाः सर्वाश्च शीतलाः ॥ उद्धृत्याधिकदंतं तु ततोग्निमवचारयेत
कृमिदंतकवच्चात्र विधिः कार्यो विजानता ॥ छित्वाधिमांसं सक्षौद्रैरेतैश्चूर्णैरुपाचं
रेत वचातेजोवतीपाठास्वर्जिकायावशूकजैः ॥ क्षौद्रद्वितीयाः पिप्पल्यः कवलश्चात्र
कीर्तिताः ॥ पटोलनिंबत्रिफलाकषायश्चात्रधावने ॥ नाडीव्रणहरं कर्म दंतनाडीषु शश्
स्यते ॥ यद्दंतमध्येजायेतनाडी दंतं तमुद्धरेत ॥ छित्वा मांसानि शस्त्रेण यदि नो परिजो
भवेत ॥ उद्धृत्य मन्दहेद्वापि क्षारेणज्वलनेनवा ॥ उद्धृते तूत्तरे दंते शोणितं प्रक्षयेद्दति
कारणाः संजायते जंतुरर्द्दितं तस्यजायते चलमप्युत्तरं दंतमतोनैवोद्धरेद्भिषक ॥ क
षायेजातिमदनकंटकीस्वादुकंटकैः ॥ मंजिष्ठालोध्रखदिरयष्ट्याह्वैश्चापियत्कृतं
तैलं संशोधनं तद्धि हन्याद्दंतगतां गतिं ॥ मदनो धत्तूरः कंटकी वृहती ॥ स्वादुकंट

सुपेदकथा १ सीततचीनी १ वंसलोचन १ इलाईची १ शंखजीरा १ मुलतानीमटी १ फटकरी १ इति दंतमंजने

कौगोक्षुरः। मंजिष्ठादिकषायेइ दंतैलं साध्यमित्यर्थः॥ इतिजात्यादितैलं॥ विद्रधौ प्रोक्तं विधिं युक्तं चिरध्याद्दंतविद्रधौ॥ शस्त्रकर्मनरस्तत्र कुशलेनैव कारयेत॥ अथ दंतरोगचिकित्सा॥ तैलं लाक्षारसंक्षीरं पृथक्प्रस्थमितं पचेत॥ चतुर्गुणे ऽरिमेदकाथे द्रव्यैश्च पलसंमितैः॥ लोध्रकट्फलमंजिष्ठापद्मकेसरपद्मकैः॥ चंदनोत्पलयष्ट्याह्वैस्तैतैलंवदने धृतं॥ चालनं दंतचालं च दंतमोक्षं कपालिकां॥ शीतादं पूतिवक्त्रं च विरुचिं विरसास्यतां॥ हन्यादाशुगदानेतान्कुर्याद्दंतानपि स्थिरान॥ लाक्षादिकमिदं तैलं दंतरोगेषु पूजितं॥ इति लाक्षादितैलं॥ जयेद्विस्रावणैः स्विन्नमचलं कृमिदंतकं॥ तथावपीडैर्वातघ्नैः स्नेहगंडूषधारणैः॥ कृमिदंतापहं को ष्णं हिंगु दंता

॥५५७॥

तैरेखिवतं ॥ नीलीवायसजंघाकटुतुंबीनांच मूलमेकैकं ॥ संचूर्ण्य दशनघर्षं दशनक्रु
मिपातनं प्राहुः ॥ गुंजामूलं तु कर्णस्थं रुद्धं दंतक्रमिप्रणुत ॥ विशालायाः फलं च चूर्ण्य
तप्तलोहे परिक्षिपेत ॥ तद्धूमस्पर्शदंतानां कीटपातो भवत्यरं ॥ ताम्रपात्रे क्षरणं पाच्यम
मयाचूर्णकं मधु ॥ कटिना गुटिका कार्या दंते धार्या कृमीन्जयेत ॥ धारयेत स्नुहीमूलं
दंतकृमिहरं परं ॥ स्नेहानां कवलाः क्वोष्णाः सर्पिषस्त्रैवृतस्य च ॥ निर्यूहाश्चानिला
घ्रानां दंतहर्षप्रमर्दनाः ॥ स्नेहश्चात्र हितो धूमो नस्यं स्नैहिकमेव च ॥ शिरोवस्तिर्हि
तश्चापि क्रमो यश्चानिलापहः ॥ अछिद्रं दंतमूलानि शर्करां समुद्धरेद्भिषक ॥ ताक्षा
चूर्णैर्मधुयुतैस्ततस्तान्प्रतिसारयेत ॥ दंतहर्षक्रियाकार्या सर्वा निरवशेषिता ॥
कापालिकां कृच्छ्रतमां तत्राप्येषा क्रिया हिता ॥ करंजसिंधुत्थजरणचूर्णं तु लौध्र

॥५५७॥

यो हंति घर्षणाद्दंतचांचल्यं च व्यथां शोथास्रसंस्रवान् ॥ जरणात्वग्लापथ्याभ्यां लतीकं
टकानां मनुदिनमपघर्षं दंतमूले सुचूर्णं ॥ व्रणदरणाद्गस्त्रक्षावचांचस्य शोथा
नयनपतिचिवस्थानं धकारानिवाप्नु ॥ स्फटिकातुत्थं खदिरः पिप्पलीतेजवल्कतं
ताक्ष्णाचे शतोचनं मरिचं आमलकं मंजिष्ठा कृमिमस्तकीयकुलत्वक् सैंधवं माजूफ
लं दाडिमत्वचूर्णं ॥ एतेषां चूर्णं वस्त्रपूतं कृत्वा निर्गुंडीरसैर्वर्हुशो भावयित्वा मालती
रसैर्भाव्या तथैव परिशोष्य पुनश्चूर्णी पित्वा दंतघर्षणं विधेयं दंतचांचल्यादीन्वि
कारान्नाशयत्येतत् ॥ तुत्थलोध्रकणाः ... पतंगयुक् घर्षणात् ॥ अपि संचलिता
दंताजायंते वज्रवद्दृढाः ॥ अथ जिह्वारोगचिकित्सा ॥ जिह्वागतविकाराणां शस्तं
शोणितमोक्षणं ॥ गुडूचीपिप्पलीनिंबैः कवलः कटुभिः सुखः ॥ कुष्ठपचोभ

षेनितजेयद्रक्तं प्राक् चिकित्सितं ॥ कंठ्केष्वपि सोप्येषु तत्कार्यं भिषजा खलु ॥ पित्तजेषु
विघृष्टेषु निस्रुतेषु प्रशोणिते ॥ प्रतिसारणगंडूषनस्यं च मधुरं हितं ॥ कंटकेषु कफो
त्थेषु लिखितेष्वसृजः क्षये ॥ पिप्पल्यादिमधुप्रेतं कार्यं तु प्रतिसारणं ॥ उपजिव्हां तु
संलिख्य क्षारेण प्रतिसारयेत ॥ शिरोविरेकगंडूषधूमैश्चैनामुपाचरेत ॥ व्योषक्षा
राभयावन्हिचूर्णमेतत्प्रघर्षणं ॥ उपजिव्हाप्रशांत्यर्थमेभिस्तैलं विपाचयेत ॥
काचनारत्वचः क्वाथः प्रातरास्येधृतः सुखः कुर्यात्सखदिरो जिव्हादरणोन्नूस
तं मुहुः ॥ अथ तालुरोगचिकित्सा ॥ कुष्ठोषणावचसिंधुकणापाठाप्लवैः सह ॥ सक्षौ
द्रैर्भिषजा कार्यं गलशुंडीप्रघर्षणं ॥ प्लवः कैवर्तीमोथा इति लोके ॥ अंगुष्ठांगुलि
संदंशैराकृष्य गलशुंडिकां ॥ छेदयेन्मंडलाग्रेण जिव्होपरि तु संस्थितां ॥ मंड

ताग्रे लाश्मश्रु विशेषेण ॥ अतिछेदात्स्रवेद्रक्तं ततो हेतोम्रियेत च ॥ हीनछेदाद्भवे
छोषो लालाध्मायोऽध्मस्तथा ॥ तस्माद्वैद्यः प्रयत्नेन दृष्टकर्मा विशारदः ॥ गलशुं
डीतु संछिद्य कुर्यात्प्राप्तामिमांक्रियां ॥ पिप्पल्यतिविषाकुष्ठवचा मरिचनागरैः
क्षौद्रयुक्तैः सलवणैस्ततस्तां प्रतिसारयेत ॥ वचां चातिविषां पाठां रास्नां कटुक
रोहिणीं ॥ पिचुमंदं च निष्क्वाथ्य कवलं तत्र कारयेत ॥ तुंडिकेर्य्यां भूषकूर्मे संघाते
तालुपुप्पुटे ॥ एष एव विधिः कार्य्यो विशेषः शस्त्रकर्मणि ॥ तालुपाकेतु कर्त्तव्यं
विधानं पित्तनाशनं ॥ स्नेहस्वेदौ तालुशोषे विधिश्चानिलनाशनः ॥ अथ
गलरोगचिकित्सा ॥ रोहिणीनां तु साध्यानां हितं शोणितमोक्षणं ॥ वमनं
धूमपानं च गंडूषो नस्यकर्म च ॥ वातजां तु हृते रक्ते लवणैः प्रतिसारयेत ॥ सु

॥ ५५८ ॥

त्वोऽस्मान्स्नेहगंडूषान्धारयेच्चाप्यभीक्ष्णशः ॥ विस्राव्य पित्तसंभूतां सिताक्षौद्रप्रियंगुभिः
घर्षयेत्कवलो द्राक्षापरूषैः क्वथितैर्हितः ॥ आगारधूमकटुकैः कफजां प्रतिसारये
त् ॥ कटुकानिशुंठी पिप्पली मरिचानि च ॥ पित्तवत्साधयेद्द्वे यो रोहिणीं रक्तसंभवां
विस्राव्य कंठशालूकं साधयेत्तुंडिकेरिवत् ॥ एककालं यवान्नं च भुंजीयात्स्निग्ध
मल्पशः ॥ उपजिह्विकवच्चापि साधयेदधिजिह्वकं ॥ एकवृंदं तु विस्राव्य विधिं
शोधनमाचरेत् ॥ एकवृंदमिव प्रायो वृंदं च समुपाचरेत् ॥ गिलायुं चापि यो व्या
धिस्तं च शस्त्रेण साधयेत् ॥ अमर्मस्थं सुसंपक्वं छेदयेद्गलविद्रधिं ॥ अथ सामा
न्यचिकित्सा ॥ कंठरोगेष्वसृङ्मोक्षस्तीक्ष्णैर्नस्यादिकर्मभिः ॥ चिकित्सकश्चिकि
त्सां तु कुशलोऽत्र समाचरेत् ॥ क्वाथं दद्यात्तु दार्वीत्वङ्निंबतार्क्ष्यकलिंगजं ॥ ह

॥ ५५८ ॥

रीतकीकषायो वा हितो माक्षिकसंयुतः ॥ कटुकातिविषादारुपाठामुस्तकलिंगकाः
गोमूत्रक्वथिताः पीताः कंठरोगविनाशनाः ॥ यवाग्रजं तेजवतीं सपाठां रसांजनं
दारुनिशांसकृष्णां ॥ क्षौद्रेण कुर्याद्गुटिकां मुखेन तां धारयेत्सर्वगलामयेषु ॥ य
वाग्रजादिकल्कमात मौषधं विचूर्ण्य गुटी क्षौद्रेण कार्ये स्वयं ॥ इति यवक्षारादि
गुटी ॥ खदिरस्य तुलां द्रोणे तोये पक्त्वाष्टशेषके ॥ जातीकोशं दुपूगास्तचातुजी
तमगंडजैः ॥ पृथक्कर्षमितैः पिष्टैर्मेलयित्वाचरेणोयमा ॥ गुटीं कृत्वा मुखे धृत्वा
विनिहंत्याखिलान्गदान् ॥ जिह्वौष्ठदंतवदनगलतालुसमुद्भवान् ॥ इति खा
दिरगुटी ॥ तुलां खदिरसारस्य जले द्रोणे विपाचयेत् ॥ अष्टभागावशेषे तु तत्र चू
र्णानि निक्षिपेत् ॥ जातीकंकोलकर्पूरक्रमुकानां विचक्षणः ॥ गुटिकास्तु प्र

॥५६०॥

कर्तव्याः सूक्ष्मा मुखे स्थाप्याः सदैव हि ॥ इति द्वितीयखादिरवटी ॥ ताक्ष्यं व्योषनिशांतधू
मदहनैपाठोत्तमातेजनीलोध्रक्षारयुतैस्तु कालक इति क्षौद्रेणाचूर्णो युतः ॥ धार्यो
दंतगलास्यरुक्षु सच तक्षौद्रः शिलातालकक्षारैः सिंधुजपीतदारुसहितैरेषोप
रः पीतकः ॥ निशांतधूमो गृहधूमः ॥ पीतदारु दारुहरिद्रा ॥ इति कालकपीतकचूर्णौ
सैंधवं खदिरं कुष्ठं धान्यं मरिचनागरं ॥ जीरकं भर्जितं तुल्यं दंतास्यचलताहरं ॥ इति
सैंधवादि प्रतिसारणं दंतेषु ॥ अथ समस्तमुखरोगचिकित्सा ॥ वातात्सर्वसरं चू
र्णैर्लवणैः प्रतिसारयेत ॥ तैलं वातहरं सिद्धं हितं कवलनस्ययोः ॥ पित्तात्मके सर्व
सरे शुद्धकायस्य देहिनः ॥ सर्वः पित्तहरः कार्यो विधिर्मधुरशीतलः ॥ प्रतिसार
णगंडूषधूमसंशोधनानि च ॥ कफात्मके सर्वसरे क्रमं कुर्यात्कफापहं ॥ मुखपा ॥५६०॥

केशिरावेधःशिरसश्चविरेचनं ॥ मधुमूत्रघृतक्षीरैःशीतश्चकवलोहितः ॥ जाती
पत्रामृताद्राक्षायासदार्वीफलत्रिकैः ॥ क्वाथःक्षौद्रयुतःशीतोगंडूषोमुखपाकनु
त् ॥ इतिजातीपत्रादिगंडूषः ॥ कार्य्यंचपंचकृत्वानित्यंजातीपत्रस्यचर्वणं ॥ कृष्णजीर
ककुष्ठेंद्रयवचर्वणात्तथा ॥ मुखपाकव्रणक्लेददौर्गंध्यमुपशाम्यति ॥ इतिकृ
ष्णजीरकादिचर्वणं ॥ पटोलजंबुनिंबाम्रमालतीनवपल्लवाः ॥ पंचपल्लवजःश्रेष्ठः
कषायोमुखधावने ॥ पंचवल्कलजःक्वाथस्त्रिफलासंभवोथवा ॥ मुखपाकेप्रयोक्त
व्यःसक्षौद्रोमुखधावने ॥ स्वरसःकथितोदार्व्याघनीभूतोरसक्रिया ॥ सक्षौद्रोमु
खरोगास्रदोषनाडीव्रणापहः ॥ सप्तच्छदोशीरपटोलमुस्ताहरीतकीतिक्तकरोहि
णीभिः ॥ यष्ट्याह्वराजद्रुमचंदनैश्चक्वाथंपिबेत्पाकहरंमुखस्य ॥ इतिसप्तच्छदा

५६१

दिक्काथः ॥ तिलाम्लीलोत्पलं सर्पिः शर्करा क्षीरमेव च ॥ सौद्राक्तदिग्धवक्त्रस्य गंडूषो
मुखपाकनुत् ॥ आस्यादिताश्च सक्तुदधि मुखगंधं सकलमपनयति ॥ त्वग्बीजपूरफ
लजा पवनमवाच्यं च नाशयति ॥ हरिद्रानिंबपत्राणि मधुकं नीलमुत्पलं ॥ तैलमेभि
र्विपक्कव्यं मुखपाकहरं परं ॥ इति हरिद्रादितैलं यष्टीमधुपलमेकं त्रिफलानीलोत्प
लस्य तैलस्य ॥ प्रस्थं तद्विगुणं पयो विधिना पक्कं तु नस्येन ॥ निष्ठीवदनस्य पूयं वे
क्षयपति गात्रस्य दोषसंघातं ॥ कचखवलिमवस्यं क्रमशोभ्यंगेन जंतूनां ॥ इतिय
ष्टीमधुतैलं ॥ खदिरस्य त्वचं क्षुण्णं पचेत्षत्पलोन्मितां ॥ जलद्रोणेन तत्क्वाथं ग्र
हीयात्पादशेषितं ॥ तैलस्याढकं दत्वा कल्कैः कर्षमितैः पचेत ॥ इति मेदलवंगा
म्बांगैरिकागरुपद्मकैः ॥ मंजिष्ठालोध्रमधुकैर्लाक्षान्यग्रोधमुस्तकैः ॥ त्वक्जा

५६१

तीफलकर्पूरकंकोलखदिरैस्तथा ॥ पतंगधातकीपुष्पसूक्ष्मैलानागकेसरैः ॥ कटु-
फलेनचसंसिद्धं तैलंमुखरुजंजयेत् ॥ प्रदुष्टमांसंचलितंशीर्णंदंतंसशोषिरं
शीतादंदंतहर्षंचविद्रधिंकृमिदंतकं ॥ दंतस्फुटमदौर्गंध्यजिह्वाताल्वोष्ठजां रु-
जां ॥ इतिखदिरादितैलं ॥ अथपथ्यमाह ॥ स्वेदोविरेकोवमनंगंडूषः प्रतिसारणं
कवलोसृक्स्रुतिर्नस्यंधूमः शस्त्राग्निकर्मच ॥ तृणधान्यंयवामुद्गाः कुलत्थाजांग-
लोरसः ॥ बहुपुत्रीकारवेल्लंपटोलंबालमूलकं ॥ कर्पूरनीरंतांबूलंतप्तांबुखदिरौ
घृतं ॥ कटुतिक्तंचवर्गोयंमित्रंस्यान्मुखरोगिणां ॥ अथापथ्यमाह ॥ दंतकाष्ठंस्ना-
नमम्लंमत्स्यमानूपमामिषं ॥ दधिक्षीरंगुडंमाषंरूक्षान्नंकठिनाशनं ॥ अधोमु-
खेनशयनंगुर्वभिष्यंदिकारिच ॥ मुखरोगेषुसर्वेषुदिवानिद्रांचवर्जयेत् ॥ इति

मुखरोगचिकित्सा ॥ अथ विषनिदानं तत्र विषस्य द्वैविध्यमाह ॥ स्थावरं जंगमं चैव
द्विविधं विषमुच्यते । दशाधिष्ठानमाद्यं तु द्वितीयं षोडशाश्रयं १ तत्र स्थावरविषस्य
दशाश्रयानाह ॥ मूलं पत्रं फलं पुष्पं त्वक्क्षीरं सार एव च । निर्यासो धातवः कंदः स्था
वरस्याश्रया दश २ अस्यायमर्थः ॥ मूलविषं करवीरादि ॥ पत्रविषं विषपत्रिका
दि ॥ फलविषं कर्कोटकादि ॥ पुष्पविषं वेत्रादि पुष्पं त्वक्सारनिर्यासविषाणि क
रंभकादीनि ॥ क्षीरविषं स्नुह्यादि ॥ धातुविषं हरितालादि ॥ कंदविषं वत्सनागस
क्तुकादि ॥ २ ॥ अथ जंगमविषस्य षोडशाश्रयानाह ॥ दृष्टिनिश्वासदंष्ट्राश्च नख
मूत्रमलानि च ॥ शुक्रं लालामुखं स्पर्शः संदंशावसहितं ॥ गुदास्थिपित्तशूका
नि दश षट् जंगमाश्रयाः ३ ॥ यथा दृष्टिनिश्वासमुखा दिव्याः सर्पाः ॥ दंष्ट्राविषा

५६२

भौमाः सर्पाः ॥ दंष्ट्रानखविषा व्याघ्रादयः ॥ मूत्रपुरीषविषा गृहगोधिकादयः ॥ शु
क्रविषा मूषिकादयः ॥ लालाविषा उच्चिटिंगादयः ॥ लालास्पर्शमूत्रपुरीषार्तव
शुक्रमुखसंदंशदंष्ट्रास्पर्शावशर्द्धितगुदपुरीषविषाश्चित्रशीर्षादयः ॥ अस्थि
विषाः सर्पादयः ॥ पित्तविषा नकुलमत्स्यादयः ॥ शूकविषा भ्रमरादयः ॥ ३ ॥ अ
थ स्थावरविषाणां सामान्यानि कार्याण्याह ॥ स्थावरं तु ज्वरं हिक्कां दंतहर्षं गलग्रहं
फेनच्छर्द्यरतिश्वासमूर्छाश्च कुरुते विषं ॥ ४ ॥ अथाश्रयभेदेन विशिष्टानि स्थाव
रविषाणां कार्याण्याह ॥ उद्वेष्टनं मूलविषैर्मोहः प्रलपनं भवेत् ॥ जृंभणं वेपनं
श्वासो तथा पत्रविषैर्भवेत् ॥ ५ ॥ मुष्कशोफः फलविषैर्दाहोन्नद्वेष एव च ॥ भवेत्पु
ष्पविषैश्छर्दिराध्मानं मूर्छनं तथा ॥ त्वक्सारनिर्यासविषैरुपयुक्तैर्भवंति

५६३

हि ॥ आस्यदौर्गंध्यपारुष्यशिरोरुक्कफसंस्रवाः ॥ ७ ॥ फेनागमः क्षीरविषैर्विड्भेदो गु
रुजिह्वता ॥ हृत्पीडनं धातुविषैर्मूर्छा दाहश्च तालुनि ॥ प्रायेण कालघातीनि विषाण्ये
तानि निर्दिशेत् ॥ ८ ॥ एतानि मृतानि हीनवीर्याणि ॥ कालघातीनि कालांतरेण मा
रकाणि ॥ ८ ॥ अथ कंदविषस्य कार्य्यमाह ॥ कंदजान्युग्रवीर्य्याणि यान्युक्तानि त्र
योदश ॥ सर्वाण्येतानि कुशलैर्ज्ञेयानि दशभिर्गुणैः ॥ ९ ॥ स्थावरं जंगमं चापि कृ
त्रिमं चापि यद्विषं ॥ सद्यो निहंति तत्सर्वं गुणैर्युक्तं दशभिर्युतं ॥ १० ॥ अथ तान् दश
गुणानाह ॥ रूक्षमुष्णं तथा तीक्ष्णं सूक्ष्ममाशुव्यवायि च ॥ विकाशि विशदं चै
व लघ्वपाकि च ते दश ॥ ११ ॥ अथ तैर्गुणैर्विषस्य कार्य्यमाह ॥ तद्रौक्ष्यात्कोपये
द्वायुमौष्ण्यात्पित्तं च शोणितं ॥ तैक्ष्ण्यान्मतिं मोहयति मर्मबंधान्छिनत्यपि

५६३

१२॥शरीरावयवान्सौक्ष्म्यात्प्रविश्यो द्विकरोति च॥आशुत्वादाशु तद्धन्ति व्यवायात्प्र
कृतिं हरेत्॥१३॥विकाशित्वात्स्रंसयति दोषान्धातून्मलानपि॥वैशद्यादतिरि
च्येत दुश्चिकित्स्यं तु लाघवात्॥दुर्जरं चाविपाकित्वात् तस्मात्क्लेशयते चिरं॥१४॥आ
मविषत्वित्तशस्त्रहतस्य लक्षणमाह॥सद्यः पाकं याति यस्य क्षतं तद्धुवेद्रक्तं प
च्यते चाप्यभीक्ष्णं॥कृष्णीभूतं क्लिन्नमत्यर्थपूति क्षतान्मांसं शीर्यते यस्य चापि
१५॥तृष्णा तापो दाहमूर्च्छे च यस्य दिग्धाविद्धं तं मनुष्यं व्यवस्येत्॥लिंगान्येता
न्येव कुर्याद् अमित्रैर्दत्तैः स्वेडैर्वा व्रणो यस्य चापि॥१६॥पच्यते चाप्यभीक्ष्णं पुनः
पुनः पाकमेति॥तापः वह्निसंमता॥दाहोऽभ्यंतरे कुर्यादित्यत्र क्षतं कर्तव्यं देयो
कुर्व्यं॥१५॥१६॥प्रायेण राजादीनामन्नादौ शत्रवो विषं ददति तेषां ज्ञानार्थं

॥ ५६४ ॥

तल्लक्षणमाह ॥ इंगितज्ञो मनुष्याणां वाक्चेष्टामुखवैकृतैः ॥ जानीयाद्विषदातारमेभिर्लिं-
गैश्च बुद्धिमान ॥ १७ ॥ न ददात्युत्तरं पृष्टो विवक्षुर्मोहमेति च ॥ अपार्थं च बहु संकीर्णं भाष-
ते चापि मूढवत् ॥ १८ ॥ अंगुलीः स्फोटयेत्कुर्वीं विलिखेन्नहसेद्दति ॥ वेपथुश्चास्य भव-
ति त्रस्तश्चैकैकमीक्षते ॥ १९ ॥ विवर्णवक्त्रो ध्यामश्च नखैः किंचिच्छिनत्ति च ॥ आलभे-
तासकृद्दीनः करेण च शिरोरुहान ॥ २० ॥ निर्यियासुरपद्वारैर्वीक्षते च पुनः पुनः
वर्त्तते विपरीतं च विषदाता विचेतनः ॥ २१ ॥ इंगितमभिप्रायसूचक आकारः ॥ मुख-
वैकृतं मुखवैवर्ण्यादि ॥ एभिर्लिंगैश्च वक्ष्यमाणैरिति गैश्च ॥ न ददात्युत्तरं पृष्टः स्वी-
यासत्कर्मजनितत्वान्मोहात ॥ अपार्थं निरर्थकं ॥ संकीर्णमस्फुटं ॥ भयजवाग्भुज-
नितपर्यायव्यथाववेदनाय अंगुलीः स्फोटयेत ॥ न हसेद्देहतापयि ॥ ध्यामः दग्धस ॥ ५६४ ॥

५१ मानवर्णाः ॥ आलभेत स्वरूपेण ॥ विपरीतं च यैस्या देयं वर्त्तते ॥१७॥१८॥१९॥२०॥२१॥
अथ जंगमविषाणां सामान्यानि कार्याण्याह ॥ निद्रां तंद्रां क्लमं दाहं सपाकं लोम
हर्षणं ॥ शोथं चैवातिसारं च कुरुते जंगमं विषं ॥२४॥ अथ जंगमेषु तीक्ष्णतरत्वेन
सर्पानाह ॥ वातपित्तकफात्मानो भोगिमंडलिराजिलाः ॥ यथाक्रमं समाख्याता व्यंत
रा द्वंद्वरूपिणः ॥२३॥ भोगिनः फणिनः ॥ ते च विंशतिः ॥ मंडलैर्विविधैश्चित्राः पृथ
वो मंदगामिनः ॥ षड्ते मंडलिनो ज्ञेयाः ज्वलनार्कसमार्चिषः इति ॥ मंडलं रूपं गादिरू
पं ॥ स्निग्धा विविधवर्णाभिस्तिर्यगूर्ध्वं च राजिभिः ॥ विचित्रा इव ते भांति राजिला
स्ते हि नो हि षट् इति ॥ एते यथाक्रमं वातपित्तकफात्मानः व्यंतरा द्वंद्वं अंतरे मे दोषयो
ते द्वंद्वं तराः यथा भोगिनां मंडलिन्यां जाता इत्यादि ॥ द्वंद्वरूपिणः द्वयोर्दोषयोः स्वतंत्र

त्वर्थः ॥ २३ ॥ अथ भोगिप्रभृतिभिः कृतदंशानां लक्षणभेदमाह ॥ दंशो भोगिकृतः कृष्णः सर्व
वातविकारकृत ॥ पीतो मंडलिनो दंशो मृदुः पित्तविकारकृत ॥ २४ ॥ राजिलोत्थो भवेद्दं
शः स्थिरः शोफश्च पिच्छिलः ॥ पांडुः स्निग्धोतिसांद्रासृक् सर्वश्लेष्मविकारवान् ॥ २५ ॥ अ
थ देशविशेषे काल विशेषे च दष्टस्यासाध्यत्वमाह ॥ अश्वत्थदेवायतनश्मशानव
ल्मीकसंध्यासु चतुःपथेषु ॥ याम्ये च पित्र्ये परिवर्जनीया ऋक्षे नरा मर्मसु ये च दष्टाः
२६ ॥ याम्ये भरण्यां ॥ पित्र्ये मघायां ॥ मर्मसु आघातेषु ॥ २६ ॥ अथ दर्वीकरविष
लक्षणमाह ॥ दर्वीकराणां विषमाशु हंति सर्वाणि चोष्णे द्विगुणी भवंति ॥ २७ ॥ उष्णे
उष्णसंयोगे ॥ २७ ॥ अथ दर्वीकरस्वरूपमाह ॥ रथांगलांगलच्छत्रस्वस्तिकांकुशधारि
णः ॥ ज्ञेया दर्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥ २८ ॥ अथापरेषु येषु विष

मांसलं मारकं भवतीत्याह ॥ अजीर्णपित्तातपपीडितेषु बालेषु वृद्धेषु च मुष्कितेषु ॥ स्त्री
णाश्चते मेहिनि कुब्जखंजे ह्रस्वे खलेगा भवतीव चापि ॥ २९ ॥ शाखाश्चते यस्य न रक्तमस्ति
स्ति राज्योत्ततामिस्त्रनसंभवंति ॥ स्त्रीतामिरक्ष्णनरोमहर्षो विषाभिभूतं परिव
र्जयेत् ॥ ३० ॥ जिव्हांमुखे यस्य च कृष्णता नाशश्च नासादश्च सकंठभंगः ॥ कृष्णः स
रक्तः श्यावपुष्पदंतो हन्वोः स्थिरत्वं स विवर्जनीयः ॥ ३१ ॥ वातस्य कोपे रसं पूर्णक्षी
णधातुत्वे विषवेगास्सह त्वादिदूषस्याशु घातित्वं ॥ क्षीणाश्चते क्षतक्षीणे ॥ राज्योते
त्वोः ततामिस्त्राउनाल्प भवंति ॥ जिव्हे च कृष्णं ॥ कृष्णात: आघर्षणात ॥ नासावसा
द: नासापातनत्वं ॥ कंठभंगः ग्रीवाधारणाशक्तिः ॥ हन्वो स्थिरत्वं हनुस्तंभः ॥
२९॥३०॥३१ ॥ अपरं च ॥ वर्त्तिर्घनायस्य निरेति वक्त्राद्रक्तांप्रवेद्धूर्ध्वमधश्च

यस्य ॥ दंष्ट्राभिघातात्तोऽन्यत्र दष्टप्रदेशस्यापि वैद्यः परिवर्जयेत् ॥ ३२ ॥ वर्त्तिः रुधि
रस्या ॥ लालास्रावर्त्तिरिति मधुकोशाकृत् ॥ रक्तं अन्ये वद्ध्यमप्यन्यत्र दष्टप्रदेशस्येति यस्य च
नासामुखलिंगगुदादिभ्यो रक्तं अन्ये वेत् ॥ ३२ ॥ अपरं च ॥ उन्मत्तमत्यर्थमुपद्रुतं वा हीनस्व
रं यापथ्यापत्यापि विवर्णं ॥ सारिष्टमत्यर्थमवेगिनं च जह्यान्नरं तत्र न कर्म कुर्यात् ॥ ३३ ॥
उन्मत्तं उन्मादयुक्तं ॥ अत्यर्थमुपद्रुतं वाच्छरातिसारादिभिरतिशयेनोपद्रुतं ॥ हीने
स्वरं वक्तुमक्षमं ॥ विवर्णं कृष्णवर्णं ॥ सारिष्टं नासाभंगादियुक्तं ॥ अवेगिनं वेगो
विषवेगः तद्रहित इति लोके तद्रहितं ॥ ३३ ॥ स्थावरजंगमविषमेव जीर्णत्वादिभिः
कारणैर्दूषीविषसंज्ञां लभते ॥ तेनाह ॥ जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवा
तातपशोषितं वा ॥ स्वभावतो वा गुणविप्रहीनं विषं हि दूषीविषतामुपैति ॥ ३४ ॥

जीर्णमतिपुराणं ॥ विषघ्नौषधिदूषितं विषघ्नाभिरोषधीभिर्वीर्यहीनीकृतं ॥ स्व
भावतो वा गुणविप्रहीनं स्वभावाद्देवदग्धानां गुणानां मध्ये एकद्वित्र्यादिगुणहीनं
नं ॥ ३४ ॥ अथ दूषीविषस्य कार्य्यमाह ॥ वीर्याल्पभावान्न निपातयेत्तत्कफान्वितं वर्ष
गणानुबंधि ॥ तेनार्दितो भिन्नपुरीषवर्णो विगंधवैरस्ययुतः पिपासी मूर्छां भ्रमं
गद्गदवाग्वमिंच विचेष्टमानोरतिमान्कफाद्यां ॥ ३५ ॥ न निपातयेत न मारयति ॥ कफा
न्वितं कफेन मंदीकृतौष्ण्यादिगुणं वर्षगणानुबंधि कफेनावृतत्वाद्दोषस्याका
ल्चिरस्थायि ॥ भिन्नपुरीषवर्णः भिन्नपुरीषोद्धृतमलः भिन्नवर्णः विवर्णः ॥ विगं
धवैरस्ययुतः विरुद्धगंधमुखवैरस्ययुक्तः ॥ विचेष्टमानः विरुद्धां चेष्टां कुर्वन् ॥
मूर्छादीनव्याधीन् लभते ॥ अरतिं असुखं ॥ ३५ ॥ आमपक्वस्थानविशेषेण स्थिते दू

॥५६७॥

दूषीविषोलिंगविशेषमाह ॥ आमाशयस्थेकफवातरोगीपक्वाशयस्थेनिलपित्तरोगी
भवेत्समुध्वस्तशिरोरुहांगोविलूनपक्षस्त्वथयथाविहंगः ॥ ३६ ॥ समुध्वस्तशिरोरुहां
गः त्यक्तांगशब्दात्परंरुहशब्दोद्रष्टव्यः ॥ तेनायमर्थः ॥ समुध्वस्ताःशिरोरुहाःकेशाः
अंगरुहालोमानिचयस्यसः ॥ एतदपिलिंगंपक्वाशयस्थेयोद्धव्यं ॥ ३६ ॥ किंच ॥ स्थितं
रसादीष्वथतद्यथोक्तान्करोतिधातुप्रभवान्विकारान् ॥ ३७ ॥ ततद्दूषीविषं ॥ यथो
क्तान्रसस्थितेव्याधिसमुद्देशीयोक्तानश्रद्धादीन् ॥ ३७ ॥ अथदूषीविषस्यप्रकोपस
मयंप्रकुपितस्यपूर्वरूपंचाह ॥ कोपंतुशीतानिलदुर्दिनेषुयात्याशुपूर्वंशृणुतस्य
रूपं ॥ शिरोगुरुत्वंचविजृंभणंचविश्लेषहर्षावयवांगमर्दः ॥ ३८ ॥ निद्रेतिशेषः गात्र
शैथिल्यं ॥ हर्षोरोमांचः ॥ ३८ ॥ अथदूषीविषस्यलक्षणमाह ॥ ततःकरोत्यन्नम

॥५६७॥

द्यविपाकारोचकं मंडलकोठजन्म ॥ मांसक्षयं पाणिपादाक्षिशोथं मूर्छां तथा छर्दि
मथातिसारं ॥ दूषीविषं श्वासतृषाज्वरांश्च कुर्यात्प्रवृद्धिं जठरस्य चापि ॥ ३९ ॥ आ
मदः अन्नेभुक्ते पूगफलेनेव मदः ॥ अविपाकः अन्नस्य ॥ ३९ ॥ अथ दूषीविषस्य
भेदेन विकारभेदमाह ॥ उन्मादमन्यज्जनयेत्तथान्यदानाहमन्यत्क्षपयेच्च शुक्रं ॥ गाद्ग
द्यमन्यज्जनयेच्च कुष्ठं सांस्तांश्च विकारांश्च बहुप्रकारान् ॥ ४० ॥ अन्यत् दूषीविषं क्ष
पयेच्च शुक्रं षांड्यं करोति ॥ तांस्तान् विकारान् विसर्पविस्फोटादीन् ॥ ४० ॥ अथ दूषी
विषस्य निरुक्तिमाह ॥ दूषितं देशकालान्नदिवास्वप्नैरभीक्ष्णशः ॥ यस्मात्संदूषयै
द्धातून् तस्माद्दूषीविषं स्मृतं ॥ ४१ ॥ देशः आनूपादिः ॥ कालः शीतानिलदुर्दिनादिः
अन्नं कुलत्थतिलमस्त्वादि ॥ धातुदूषकत्वाद्दूषीविषसंज्ञा ॥ ४१ ॥ अथ दूषीवि

॥ ५६८ ॥

षस्य साध्यत्वादिकमाह ॥ साध्यमात्मवतः सद्यो याप्यं संवत्सरोषितं ॥ दूषीविषमसा
ध्यं स्यात् क्षीणस्याहितसेविनः ॥ ४२ ॥ कृत्रिमं विषं द्विविधं एकं सविषं दूषीविष
संज्ञं अपरमविषं तद्गरसंज्ञं ॥ तथाच काश्यपसंहितायां ॥ संयोगजं तु द्विविधं
द्वितीयं विषमुच्यते ॥ दूषीविषं तु सविषमविषं गर उच्यते ॥ संजोगजं कृत्रिमं विषं ॥
द्वितीयं स्वभाविकात् ॥ तच्च द्विविधं ॥ तत्र दूषीविषमभिधाय गरं दर्शयितुमाह ॥ सौ
भाग्यार्थं स्त्रियः स्वेदरजो नानांगजान्मलान् ॥ शत्रुःप्रयुक्तांश्च गरानन्नप्रयच्छंत्यन्न
मिश्रितान् ॥ ४३ ॥ स्वेदरजो नानांगजान्मलान् सविषजं तु नामितिशेषः ॥ यद्वा स्व
स्या एव स्वेदादीन् अन्नमिश्रितान् प्रयच्छंति तत्र रजः आर्तवं ॥ गरान् गरकारण
कान् ॥ ४३ ॥ अथ गरकार्यमाह ॥ तैः स्यात्पांडुः कृशोल्पाग्निः ज्वरः सर्व्वप्रोस्यापजा

॥ ५६९ ॥

यते ॥ मर्मप्रधमनाध्मानं हस्तयोः श्वोपसंभवः ॥ ४४ ॥ जठरं गूहरोमी रोमोपक्ष्माग्रस्मः

क्षयोज्वरः ॥ एवंविधस्य नान्यस्य व्याधेर्लिंगं प्रजायते ॥ ४५ ॥ तैः गौरैः ॥ मर्मप्रधम

नं मर्मव्यथा ॥ क्षयोधातुक्षयः ॥ ४४ ॥ ४५ ॥ अथ जंतुविशेषाणां लूतानामुत्पत्तिं

निरुक्तिं संख्यां चाह ॥ यस्माल्लूनं तृणं प्राप्ता मुनेः प्रस्वेदबिंदवः ॥ तेभ्यो जातास्ततो

लूता ॥ इति ख्यातास्तु षोडश ॥ ४६ ॥ तृणच्छिन्नं मुनेः वसिष्ठस्य ॥ तथा च श्रुतः

विश्वामित्रो नृपवरः कदाचिदृषिसत्तमं ॥ वसिष्ठं कोपयामास गत्वाश्रमपदं कि

ल ॥ कुपितस्य मुनेस्तस्य ललाटात्स्वेदबिंदवः ॥ अपतन्दर्शनादेव यवस्तात्सूर्य्य

वर्चसः ॥ लूने तृणे महर्षेस्तु धेन्वर्थे संभृते पिच ततो जातास्त्विमा घोरा नानारू

पा महाविषाः ॥ तासामष्टौ कष्टसाध्या वर्ज्यास्तावत्य एव हि ॥ ति ॥ तत्र त्रिमंडला

॥ ५६दि ॥

प्रमत्तयोष्टैकष्टसाध्याः सावर्णिकाप्रमत्तयोष्टावसाध्याः ॥ तासां नामान्याह सु
श्रुत एव ॥ त्रिमंडला तथा श्वेता कपिला पीतिका तथा ॥ आलामूत्रविषा रक्ता कसना
चाष्टमी स्मृता ॥ सावर्णिका लाजवर्णा तासिन्यो एणीयदी तथा ॥ कृष्णा स्निग्धमुखी
काकांडा मालागुणाप्यष्टमी तथेति ॥ ४६ तासां सामान्यतो दंशस्य लक्षणमाह ॥ तामिद्
छेदंशकोथः प्रवृत्तिः क्षतजस्य च ॥ ज्वरो दाहोतिसारश्च गदाः स्युश्च त्रिदोषजाः ॥ ४७
पिटिका विविधाकारा मंडलानि महांति च ॥ शोथा महांतो मृदवो रक्ताः श्यावाश्चला
स्तथा ॥ सामान्यं सर्वलूतानामेतद्दंशस्य लक्षणं ॥ ४८ दंशकोथः दंशमध्ये पूतीभावः
४७॥४८ ॥ त्रिमंडलादयोष्टौ दूषीविषास्तासां लक्षणमाह ॥ दंशमध्ये तु यत्कृष्णं
श्यावं वा जालकान्वितं ॥ ऊर्ध्वाकृति भृशं पाकक्लेदकोथज्वरान्वितं ॥ दूषीविषाभि

५६दि ॥

ल्लूताभिस्संदष्टमिति निर्द्दिशेत् ॥ ४९ ॥ पतयस्य ॥ दूषीविषाभिः कालांतरप्रकोपिविषा
भिः ॥ ४९ ॥ सायर्णिकादयो याप्यसाध्याः प्राणहरास्तासां लक्षणमाह ॥ शोफः श्वेता
सिता रक्ता पीता वा पिडिका ज्वरः ॥ प्राणांतिकार्त्तिर्हृन्मूर्च्छाश्वासहिक्काशिरोग्रहाः ॥
५० ॥ प्राणांतिकार्त्तिः प्राणहरार्त्तिः ॥ ५० ॥ अथाखुविषस्य लक्षणमाह ॥ आदंशाच्छो
णितं पांडुमंडलानि ज्वरोऽरुचिः ॥ लोमहर्षश्च दाहश्चाप्याखुदूषीविषार्द्दिते ॥ ५१ ॥ आ
दंशाच्छोणितं गच्छतीति शेषः ॥ ५१ ॥ अथासाध्यमूषकविषस्य लक्षणमाह ॥ मूर्छां
गशोफो वैवर्ण्यं क्लेदशब्दाश्रुतिज्वराः ॥ शिरोगुरुत्वं लालासृक्छर्दिश्चासाध्यमूष
कात् ॥ ५२ ॥ अंगशोफोऽत्र मूषकाकारो येषु दृश्यः ॥ चीयते गूपिभिश्चोगमारखुशाव
कसन्निभिरिति तंत्रांतरोक्तेः ॥ ५२ ॥ अथ कृकलासदष्टस्य लक्षणमाह ॥ कोपस्य

॥ ५७० ॥

कार्श्यं भयं चानानावर्णत्वमेव च ॥ मोहोप्यवर्चसो भेदो दष्टस्य कृकलासकैः ॥ ५३ ॥ अथ
वृश्चिकविषस्य लक्षणमाह ॥ दहत्यग्निरिवादौ तु भिनत्त्यूर्ध्वमाशु च ॥ वृश्चिक
स्य विषं याति पश्चाद्दंशेऽवतिष्ठति ॥ ५४ ॥ अथासाध्यवृश्चिकदष्टस्य लक्षणमा
ह ॥ दष्टोऽसाध्यस्तु हृद्घ्राणरसनोपहतो नरः ॥ मांसैः पतद्भिरत्यर्थं वेदनार्त्तो जहा
त्यसून् ॥ ५५ ॥ दष्टः असाध्यैः वृश्चिकैः ॥ तेषामेवानुवृत्तेः ॥ हृद्घ्राणादिषूपहतः हृ
दादिकार्यरहितो भवति अत्यर्थं वेदनार्त्त इत्यन्वयः ॥ ५५ ॥ अथ कणभदष्टस्य ल
क्षणमाह ॥ विसर्पः श्वयथुः शूलं ज्वरश्छर्दिरथापि च ॥ लक्षणं कणभैर्दष्टे दंश
श्चैव विशीर्यते ॥ ५६ ॥ कणभः कीटविशेषः ॥ ५६ ॥ अथोच्चिटिङ्गदष्टस्य लक्षण
माह ॥ हृष्टरोमोच्चिटिङ्गेन स्तब्धलिङ्गो भृशार्त्तिमान् ॥ दष्टः शीतोदकेनेव सिक्ता

॥ ५७० ॥

न्यंगानि मन्यते ॥५७॥ अथ सविषमंडूकविषस्य तल्लक्षणमाह ॥ एकदंष्ट्रार्दितः शूनः
सरुजः पीतकः सतृट् ॥ सनिद्रः छर्दिमान् दष्टो मंडूकैः सविषैर्भवेत् ॥५८॥ एकदंष्ट्रा
र्दितः स्वभावादेकयैव दंष्ट्रया दष्टो भवति ॥५८॥ अथ मत्स्यजलौकाविषयोर्लक्ष
णमाह ॥ मत्स्याः सविषाः कुर्वंति दाहं शोफं रुजं तथा ॥ कंडूं शोफं ज्वरं मूर्छां सविषा
स्तु जलौकसः ॥५९॥ अथ गृहगोधिकाशतपदीविषयोर्लक्षणमाह ॥ विदाहं श्व
यथुं तोदं प्रस्वेदं गृहगोधिका ॥ दंशे स्वेदं रुजं दाहं कुर्यात् शतपदीविषं ॥६०॥ शत
पदी गोजर इति लोके प्रसिद्धा ॥६०॥ अथ मशकविषस्यासाध्यमशकक्षतस्य च
लक्षणमाह ॥ कंडूमान्मशकैरीषच्छोथः स्यान्मंदवेदनः ॥ असाध्यकीटसदृश
मसाध्यमशकक्षतं ॥६१॥ असाध्यकीटसदृशं असाध्यैः कीटैर्लूतादिभिः

॥ ५७१ ॥

अन्येनान्येपिवोढव्याव्यालादंष्ट्राप्रहारिणः ॥ अगाधतलपक्षिद्विपिव्याघ्रवृकादयः ॥ अथासाध्यलक्षणमाह ॥ दष्टोयेनतुतच्चेष्टारुतंकुर्वन्विनश्यति ॥ पश्यन्सोमेवचोकस्मादादर्शसलिलादिषु

रूपंतत्क्षतंतस्यदृष्टावेदनं ॥ इ० ॥ अथमक्षिकादंशस्यलक्षणमाह ॥ सद्यःसंस्राविणीश्यावादाहमूर्छाज्वरान्विता ॥ पिटिकामक्षिकादंशेतासांतुस्थगिकासुहृत ॥ इ० ॥ तासांसुश्रुतोक्तानांषण्णांमक्षिकाणांमध्येस्थगिकानाम्नीमक्षिकाअसुहृत्प्राणहृदित्यर्थः ॥ इ० ॥ अथव्याघ्रादिविषाणांकार्यमाह ॥ चतुष्पाद्भिर्द्विपाद्भिर्वानखैर्दंतैश्चयत्क्षतं ॥ शूयतेपच्यतेतत्तुस्रवतिज्वरयत्यपि ॥ इ० ॥ चतुष्पाद्भिर्व्याघ्रादिभिः ॥ द्विपाद्भिर्वनमनुष्यादिभिः ॥ शूयतेशूनंभवति ॥ इ० ॥ अथविषोपहितस्यलक्षणमाह ॥ प्रसन्नदोषंप्रकृतिस्थधातुमन्नाभिकांक्षंसममूत्रविट्कं ॥ प्रसन्नवर्णेंद्रियचित्तचे ॥ ५७१ ॥

ष्टंवैद्योवगच्छेदविषंमनुष्यं॥१६॥प्रसन्नदोषंप्रकृतदोषं॥समसूत्रविट्कंअक्षीणान
तिरिक्तमूत्रपुरीषं॥१६॥इतिविषनिदानंसमाप्तं॥अथविषचिकित्सा॥स्थावरेण
विषेणार्त्तंनरंयत्नेनवामयेत्॥वमनेनसमंनास्तियतस्तस्यचिकित्सितं॥विषमत्यर्थ
चि
मुष्णंचतीक्ष्णंचकथितंयतः॥अतःसर्वविषेषूक्तःपरिषेकस्तुशीतलः॥औष्ण्यात्तै
क्ष्ण्याद्धिशेषेणविषंपित्तंप्रकोपयेत्॥वमितंसेचयेत्तस्माःशीतलेनजलेनच॥पा
पयेन्मधुसर्पिर्भ्यांविषघ्नंभेषजंद्रुतं॥भोक्तुमन्नरसंदद्याच्चर्वयेन्मरिचानिच॥यस्य
यस्यचदोषस्ययस्येलिंगानिभूरिशः॥तस्यतस्यौषधैःकुर्याद्विपरीतगुणैःक्रि
यां॥मूलत्वक्पत्रपुष्पाणिवीजंचेतिशिरीषतः॥गवांमूत्रेणसंपिष्टंस्याद्विषहरं
परं॥इतिस्थावरविषेशोषलेपः॥दूषीविषार्त्तंसुस्निग्धमूर्ध्वंचाधश्चशोधितं॥पाय

॥५७२॥

पेयो गदं मुख्यमिदं दूषीविषापहं ॥ पिप्पल्यो ध्यामकं मांसी लोध्रमेला सुवर्चिका ॥ मरिचं
वालकं चैला तथा कनकगैरिकं ॥ क्षौद्रयुक्तो गदो ह्येष दूषीविषमपोहति ॥ इति दूषीविषे
धत्तूरस्य शिफा पेया क्षीरेणापरिपेषिता ॥ अंकोटस्य शिफा चापि विविषघ्नी च प्रयत्नतः
इति जंगमविषे योगद्वयं ॥ रजनीयुग्मपत्तंगमंजिष्ठानागकेसरैः ॥ शीतांबुपिष्टैः ले
पः ॥ स द्यो लूताविनाशयेत् ॥ इति लूताविषे ॥ जीरकस्य कृतः कल्को घृतसैंधवसंयुतः
सुखोष्णो मधुना लेप्यो वृश्चिकस्य विषं हरेत् ॥ इति वृश्चिकविषे ॥ गंधमाघ्राय मर्दित
सूर्यावर्त्तदलस्य तु ॥ वृश्चिकेन नरो विद्धः क्षणाद्भवति निर्विषः ॥ आरक्तं वेतायामा
र्गपत्रं भुक्तं तदैव हि ॥ वृश्चिकेन नरं विद्धं कुरुते सुखिनं भृशं ॥ पानीयपिष्टजैपालक
ल्कलेपेन सर्वथा ॥ विषं वृश्चिकविद्धस्य भस्मी भवति तत्क्षणात् ॥ नवसादरहरिता

॥५७२॥

तं पिष्टं तोयेन तेपनाद्दंशे ॥ तस्करत्समेव हि जयते वृश्चिकविद्रुस्य दुर्धरं ष्यडं ॥ अजाक्षीरे
णसंपिष्टा शिरीषफलमिश्रिता ॥ उपकुल्याविषं हंति वृश्चिकस्य न संसयः ॥ मनःशि
लाकुष्टकरंजबीजशिरीषकाश्मीरमंचैः ॥ समांशैः ॥ गुटीकृतास्य विध्वताचलिमासंहा
रिणी वृश्चिकवैकृतस्य ॥ इति वृश्चिकविषे योगाः ॥ तंदुलीयकमूलं हि पिष्टं तंदुलवारिणा
सोषलं पीतमात्रेतु निर्विषं कुरुते नरं ॥ मूलता मरिचं चांबुपिष्टं दष्टेन भोगिना ॥ पीतमा
त्रे हरेच्छूलं विषमं विषमंजसा ॥ घृतमधुनवनीतं पिप्पलीशृंगबेरं मरिचमपि च द
द्यात्सप्तमं सैंधवं च ॥ यदि भवति सरोषं तक्षकेनापि दष्टो ॥ गदमिह खलु पीत्वा नि
र्विषस्तत्क्षणेन ॥ काष्टोदुंबरिकामूलं धत्तूरफलसंयुतं ॥ पिबेत्तंदुलतोयेन सारमे
यविषापहं ॥ चक्रमर्द्दरसो दुग्धं पते च गुडसर्पिषी ॥ कुक्कुरस्य विषं हेति पानान्मत

स्पदुः सहं कनकस्य फलैर्लेपः सबीजैस्तंदुलांभसा ॥ धुनकस्य विषं हंति गोजिह्वा मधु
नाप्यथा ॥ अपामार्गस्य मूलं वाकर्षैकं मधुना लिहेत ॥ ध्यानदष्ट्र विषं हंति लेपा कुर्कट
विष्टया ॥ उन्मत्त ध्यानदष्टानां कुमारी दल सैंधवं ॥ सखो ह्रां कुर्यपेत्पिंडं त्रिदिनांते सुखाव य
हं ॥ आज्येन तंदुलीमूलं तुलसीमृत्तिकाथवा ॥ तंदुलोदकपानेन क्रौष्ठ्यानविषं हरेत ॥ द
ति ध्यानं विषे ॥ केशरं तगरं शुंठी मरिचं हंति लेपतः ॥ मक्षिकाया विषं पथ्या घृत सैंधव ले
पतः ॥ वृकव्याघ्रश्रृगालानां तरक्षुद्वियवाजिनां ॥ रुधिरं स्रावयेद्दंशे देहहेहोहशलाक
या ॥ वटनिंव शमीवल्कककषायो हंति लेपतः ॥ निःशेषजीवजातीनां नखदंतविषं कृतं
एकैव हंति गोजिह्वा निःशेषप्राणिसंभवं ॥ विषं मधुसमायुक्ता विष्ठा तंदुलवारिणा
नागरंगत्वक्पोतपुरीषं बीजपूरकरसो हरितालं ॥ सैंधवं च विनिहंति चित्रे पादमु ॥ ५७३ ॥

ढंगजनितं विषमेतत् ॥ आगारधूममंजिष्ठारजनीलवणोत्तमैः ॥ लेपो जयेत्प्राखुविषं को
शातक्यथवा सिता ॥ शिरीषबीजैः कुलिशद्रुमस्य क्षीरेण पीष्टैः कृतलेपनानां ॥ विषं
विनाशं व्रजति क्षणेन मंडूकदंशप्रभवं नराणां ॥ एकनिंबुफलेन्यस्तं त्वग्वर्जं जयपाल
कं ॥ सप्तमेन्हि समुद्धृत्य तत्पेष्टुं ष्वीकृतं तथा ॥ पुनर्निंबुफलेन्यस्मिन्नप्रकारेण वमुस्थि
येत् ॥ सप्तधा रोनतः सिद्धं पुंसो तालाभिरंजितं ॥ करोति सर्पदंष्ट्रार्त्तं मूर्च्छितं पुंसि बोधनं
मचेत्सप्तमिदं प्रोक्तं योगिनोतव्यमौषधं ॥ इति जैपालांजनं ॥ कारस्करफलं सेव्यं त्र्यंक्रम
वृद्धं दिने दिने ॥ सारमेयविषं हंति मासेन न हि संशयः ॥ छिदोषा गैरिकैस्तैलैः पीनखदंतवि
षं जयेत् ॥ यः पिवति पुष्ये दिवसे जलपिष्टं सितपुनर्नवामूलं ॥ तस्य न हि धीनवर्षे वृश्चि
कभुजंगमाः प्रसर्पंति ॥ शीलेषपुष्पस्वरसे सप्ताहं मरिचं सितं ॥ भावितं सर्पदष्टानां

॥५२८॥

पानं नस्यांजने हितं ॥ कार्पासपत्रैः संपिष्टै राजैर्लेपो विषापहः ॥ वृश्चिकस्यापवायत्सना

गलेपः प्रशस्यते ॥ अपामार्गस्य धौनीतमूर्ध्वमारोपितं नु वर्द्धयति ॥ वृश्चिकगरलं विधि

वत्सापकपुंखामयं मूलं ॥ हरिद्रपुरीषसमुत्थछत्रकवहुल्यारफतकृता गुटिका ॥ वृश्चि

कविषस्य कुहते संक्रमणमाशु कैरविघ्नता ॥ मूकतागतामूंतित्विपिष्टतामूंजहद्विषं

यापकलामनन्मालिंवा ॥ प्रक्षाल्य तद्वारि निपीय मर्त्यो विषं जयेत्स्थावरजंगमाख्यं ॥ पाय

येद्विषमोक्तारं तत्क्षणाद्रक्तशोणितं ॥ किंवाछागपयः पश्चाद्धामयेदाविषक्षयं ॥

शार्करा चूर्णसंयुक्तं चूर्णिताप्यसवर्णयोः ॥ तेहः प्रशमयति क्षिगं नानायोगकृतं वि

षं ॥ कुष्ठमंवेत्रस्यनिक्वाथः कल्को घृतविमिश्रितः ॥ ध्वंसीमत्स्यविषं हेति वर्हिपक्षेण

धूपयेत ॥ पिपीलिकाभिर्दष्टानां मक्षिकामशकैस्तथा ॥ गोमूत्रेणावरालेपः कुष्ठ ॥५२८॥

वल्मीकमल्लकतः ॥ लेपः प्रदीपतैलस्य त्वक्खर्जूरविषनाशनः ॥ हरिद्राद्वयकेतैपोवासौरिकम
नः ञ्जितः ॥ खर्जूरविषं शतपदीविषं ॥ मरिचं नागरोपेतं सिंधुसौवर्चलान्वितं ॥ नागव
ल्लीरसो हन्याल्लेपनाद्वृश्चिकविषं ॥ पुराण्यगं धागस्य धूमसाक्षाः समे घनादाहतिमूत्रपि
ष्टाः ॥ विषाण्यपि स्थावरजंगमानि कृतं प्रयुक्तस्त्वगदो निहंति ॥ निंबछदो गृध्रपक्षा हिं
गुसैन्धवं सुशीतजलपिष्टं सर्वविषाणि निहन्यादगदोयं सर्वयोगेन ॥ फलपूरवारि
पिष्टं हिंगुसगोदंतमस्यतिक्षिप्रं ॥ तेषां जनप्रयुक्तं च श्रिकदंशोद्भवविषं ॥ आभ
पालेचनकुष्ठमर्कपुष्पं तथोत्पलं ॥ नलवेतसमूलानि गरलसुरसां तथा ॥ सकालिंगां
समंजिष्ठा मनंतां च शतावरीं ॥ त्र्यगोरकं समंगां च पद्मकेसरमित्यपि ॥ कल्कीकृत्य प
चेत्सर्पिः पयोदध्याद्यचतुर्गुणं ॥ सम्यक्पक्वावतीर्णं च शीते तस्मिन् विनिक्षिपेत् ॥ सर्पि

॥५२५॥

सुस्थे भिषक् स्वेदं कृतरक्षं निधापयेत् ॥ विषाणि हंति दुर्गाणि गरदोषकृतानि च । नस्या
ञ्जनं तिविषं तिक्तं गरैरुपहतानां च ॥ संयोगजं तु तमर्कमांससारं विसर्जनं तां ॥ नाशयत्यंजना
भ्यंगपानवस्तिप्रयोजितं ॥ सर्पकीटाखुलूतादिदष्टानां विषहृत्परं ॥ इति मृत्युपाशच्छे
दिघृतं ॥ पारदं टंकणं तुल्यं गंधकं रजनीसमं ॥ देवदाल्या रसैर्मर्द्यं त्रिगुणे कंतु भक्षये
त् ॥ कालवज्ररसो नाम शीघ्रं सर्वविषापहः ॥ नरमूत्रं पिबेच्चानु कालदष्टोपि जीवति ॥
इति कालवज्रनामा रसः ॥ अथ पथ्यमाह ॥ अरिष्टवंधनं मंत्रप्रयुक्तिः छर्दि विरेचनं ॥
जागरं शोणितास्रुतिः परिषेको वगाहनं ॥ हृदयावरणं नस्यमंजनं प्रतिसारणं ॥
उद्वर्त्तनं प्रधमनं प्रलेपो वह्निकर्म च ॥ शालयः षष्टिका मुद्गा यवाः कोरदूषाः प्रियंगुकाः
मुद्गाहरेणवस्तैलं सर्पिर्जीरणं नवं कचित् ॥ त्रिविधि तित्तिरिलावैर्गोधा खुश्वश्वगा

रा
॥५२५॥

मिषं ॥ वार्त्ताकं कुलकं धात्री निष्पावस्तंदुलीयकं ॥ कालशाकं चतत्पुनं दाडिमं सुनिषण्ण
कं ॥ गोछागनरमूत्राणि तिक्तशातं गुशर्करा ॥ अविदाहीनि चान्नानि सैंधवं मधुकुं
कुमं ॥ यष्टिमोत्तरवातास्त्रहरिद्रासितचंदनं ॥ मुस्तोशीरकंकस्तूरीतिक्तानि मधुराणि
च ॥ वर्गोयं विषरोगेषु प्रयोक्तव्यो विजानता ॥ अथापथ्यमाह ॥ क्रोधं विरुद्धाध्यशनं
व्यवायं तांबूलमायासमपि प्रवातं ॥ निद्राभयेधूमविधिंस्तुधां च विषातुरो नैव भ
जेत्कदापि ॥ इति विषचिकित्सा ॥ अथ पुंस्त्रीसाधारणान् ज्वरादिरोगानभिधाय
स्त्रीनियतरोगाभिधानं ॥ तत्र प्रदररोगनिदानं ॥ तत्र प्रदरस्यैव विप्रकृष्टं सन्निकृष्टं
निदानं संख्यां चाह ॥ विरुद्धमद्याध्यशनादजीर्णाद्गर्भप्रपाताद्दतिमैथुनाच्च ॥ याना
च्च शोकादतिकर्षणाच्च भाराभिघाताच्छयनाद्दिवा च ॥ तं श्लेष्मपित्तानिलसन्निपा

तैरित्यत्रवातपित्तयोरदौश्लेष्मणोभिधानंश्लैष्मिकेतिप्रव्यक्तिबोधनार्थं॥१॥अथप्रदर
स्यसामान्यंलक्षणमाह॥असृग्दरंभवेत्सर्वंसांगमर्दंसवेदनं॥२॥सवेदनंसशूलं॥२
अथश्लेष्मजपित्तजप्रदररोगलक्षणमाह॥आमंसपिच्छाप्रतिमंसपांडुपुलाकतो
यप्रतिमंकफात्तुसपीतनीलासितरक्तमुष्णंपित्तार्तियुक्तंभृशवेगिपित्तात्॥३॥आमं
अपक्वरसयुक्तं॥सपिच्छाप्रतिमंसपिच्छाशाल्मल्यानिर्यासस्तत्तुल्यंपिछिलमित्य
र्थः॥सपांडुसशब्दोत्रेषदर्थेतेनषत्पांडुपुलाकतोयप्रतिमंपुलाकस्तुच्छधान्यंतद्धा
वनतोयतुल्यमित्यर्थः॥गवेधुकान्नवारिवद्धूसरमितिमधुकोशकृत॥रुधिरंप्र
चेदितिशेषः॥सपीतनीलासितरक्तंपीतादिवर्णयुक्तं॥पित्तार्तियुक्तंदाहादियुक्तं
भृशवेगियारंयारंप्रवृत्तियुक्तं॥३॥अथवातजत्रिदोषजप्रदरलक्षणमाह॥रुक्षा

५८ ही

दृश्यं फेनिलमस्वमस्वं वा तास्सतो दं पिच्छितोदकाभं ॥ सक्षौद्रसर्पिर्हरितालयुक्तं ॥
मज्जप्रकाशं कुलत्थयंत्रिदोषात् ॥ तच्चाप्यसाध्यं प्रवदंति तज्ज्ञा न तत्र कुर्वीत भिषक्
चिकित्सितं ॥४॥ पिच्छितोदकाभं मांसधावनतायाभं ॥ सक्षौद्रत्यादि क्षौद्रादियुक्तं
सहितं ॥ कुलत्थयंत्रावगंधि ॥४॥ अथ रक्तस्यातिप्रवृत्तावुपद्रवानाह ॥ तस्याभिवृद्धौ
दौर्बल्यं भ्रमो मूर्छा मदस्तृषा ॥ दाहः प्रलापः पांडुत्वं तंद्रा रोगाश्च वातजाः ॥५॥ वातजा
रोगा आक्षेपकादयः ॥५॥ अथ साध्यां प्रदरव्याधिमतीमाह ॥ सत्वच्छूयंती माश्चा
यं तस्मा दाहज्वरान्वितां ॥ दुर्बलां क्षीणरक्तां च तामसाध्यां विवर्जयेत् ॥६॥ चिकित्सा
नि चात्वर्थं शुद्धार्तवलक्षणमाह ॥ मासान्निःपिच्छदाहार्तिं पंचरात्रानुबंधि यत् ॥
नैवातिबहुनात्यल्पमार्तवं शुद्धमादिशेत् ॥७॥ निःपिच्छदाहार्ति अपिच्छलमदा

॥ ५२७ ॥

हमक्षूलं च ॥ पंचरात्रानुबंधि प्रभूतज्वरस्य त्रिरात्रानुबंधि ततो मध्यमज्वरस्य पंचरात्रानु
बंधि तपःपरंकस्याज्झितु चेच्छूयति तदाल्पस्य ज्वरस्य षोडशदिनानि यावत् ॥ तद
पि शूद्धमेव ॥ ७ ॥ किंच ॥ क्षयश्वासकप्रतिमं स्कंधपच्चैतास्रारसोपमं ॥ तदा तेषं प्रक्षोसंति
पच्चाप्सुनेनिमज्जति विरज्यतेति ॥ यं ॥ इति प्रदररोगनिदानं ॥ अथ प्रदरचिकित्सा ॥
दध्नासौवर्चलाजाजीमधुकं नीलमुत्पलं ॥ पिबेत्क्षौद्रयुतं नारी याता सृग्दरशांतये
सौवर्चलादीनां प्रत्येकं माषद्वयं सर्वमेकीकृत्य दध्ना कर्षचतुष्टयेन पिबेत् तत्र मा
षाष्टकं मधुप्रक्षिप्यपेयं ॥ मधुकं कर्षमेकं तु चतुःकर्षां सितां तथा ॥ तंडुलोदकसं
पिष्टं लोहिते प्रदरे पिबेत् ॥ यत्नाकंकतिलाख्या यातस्याम्लं सुचूर्णितं ॥ लोहिते
प्रदरे खादेत्पक्वकेलं मधुसंयुतं ॥ रसांजनं तंडुलकस्य मूलं क्षौद्रान्वितं तंडुलतोयप ॥ ५२७ ॥

पीतं ॥ असृग्दरं सर्वभवं निहंति भ्यासं च मार्गी सह नागरेण ॥ तंदुलकस्य तंदुलीयक
स्य ॥ अशोकवल्कलक्वाथशृतं दुग्धं सुशीतलं ॥ यथाबलं पिबेत्प्रातस्तीव्रासृग्दर
नाशनं ॥ अशोकवल्कलपलं द्वात्रिंसत्प्रसृतसंमिते जले निक्वाथ्य पादशेषे लापताष्टक
क्वाथेन समं क्षीरं पताष्टकमितं विपचेत् ॥ तदुग्धावशेषं कर्तव्यं तन्मध्ये पल
चतुष्टयमितं दुग्धं पेयं वन्हिबलापेक्षया ॥ कुशमूलं समुद्धृत्य पेषयेत्तंडुलांभसा
ततः पीत्वा त्र्यहं नारी प्रदरात्परिमुच्यते ॥ क्षौद्रयुक्तं फलरसं काकोदुंबरिजं पिबेत्
असृग्दरविनाशाय सशर्करपयोन्नभुक् ॥ अन्नमोदनं ॥ मलपूफलचूर्णस्य श
र्करासहितस्य च ॥ मधुना मोदकान्कृत्वा खादेत्प्रदरशांतये ॥ दार्वीरसांजनकि
रातवृषाब्दबिल्वसद्भक्तचंदनदिनेशनवप्रसूनैः ॥ क्वाथः कृतो मधुयुतो वि

॥५७८॥

धिनानिपीतोरक्तंसितेचसह्नंप्रदरंनिहंति॥ रक्तपित्ताधिकारोक्तंकूष्मांडखंडं
चप्रदरेदेयं॥ आखोःपुरीषंपयसानिपीयचन्नैर्वलादेकमहःस्त्रिहेया॥ स्त्रियस्त्व
हेयाप्रदरासनयाःप्रसह्यपार्श्वरक्तमान्कथयंति॥ अशोकवल्कलंपिष्ट्वासताक्षी-
तंदुलांभसा॥ सक्षौद्रंतंद्रसंपीत्वाप्रदरान्मुच्यतेगना॥ भूम्यामलकमूलंतुपीतं
तंदुलवारिणा॥ द्वित्रिरेवदिनैर्नार्य्याःप्रदरंदुर्जयंजयेत॥ धात्रीरसंसितायुक्तंयो
निदाहापहंपिबेत॥ सौरभेयंपयोवापिससितंस्त्रीयथावलं॥ कुष्ठीतिरीटयो
श्चूर्णंभुक्तंसघृतशर्करं॥ प्रवलंप्रदरंहंतिनार्य्यायाकुट्जाष्टकं॥ तंदुलीयकमूलं
चताक्षारसमप्योजनं॥ सेपिष्ट्वाजेनपयसामधुनाक्तेनवापिवेत॥ असृग्दरं
निहंत्याशुअवश्यंसप्तवासरात॥ धातकीकुसुमंबोलंमूषकस्यमलंसमं

॥५७८॥

चूर्णं टंकप्रमाणेन देयं प्रदरनाशनं ॥ लाक्षाशुक्तिमितापितागोदुग्धेपलपंचके ॥
कल्कीकृता सप्रदरं रक्तपित्तं च नाशयेत् ॥ कुरंटकस्य मूलानि मधुकंश्वेतचंदनं
पुन्नागापिष्टानक्षमात्रान्पाययेत्तंडुलांभसा ॥ सकृत्पीत्वात्विमंयोगं प्रदरात्परिमु-
च्यते ॥ ततस्तांमाषयूषेण घृतभक्षेण भोजयेत् ॥ पाठांजंघामूयोमध्यंशिलाभेदं
रसांजनं ॥ अंबष्टकीमोचरसंसमंगापद्मकेसरं ॥ वालहीलजावेतिकातिविषामु-
स्तं बिल्वलोध्रं सगैरिकं ॥ कट्फलं मरिचं शुंठीमृद्वीका रक्तचंदनं ॥ कट्वंगावत्सका-
नंता धातकी मधुकार्जुनं ॥ पुष्येणोद्धृत्यतुल्यानि सूक्ष्मचूर्णानि कारयेत् ॥ तत्क्षौ-
द्रंमाक्षिकोपेतं पीतं तंडुलवारिणा ॥ जयेदर्शांस्यतीसारं तथा रक्तप्रवाहिकां ॥
बालानांकृमिरोगांश्च योनिदोषांश्च योषितां ॥ रजोदोषं योनिकंदं प्रदरानदु-

॥५८८॥

सारेणनपि॥ पीतासिता हरत्यच्छेतान्सर्वान्नेत्रविनाशयेत्॥ चूर्णं पुष्यानुगं नाम पूर्वमा
त्रेयभाषितं॥ इति पुष्यानुगं चूर्णं॥ जीरकं प्रस्थमेकं तु क्षीरं द्व्याढकमेव च॥ प्रस्थार्द्धं लो
ध्रघृतयोः पचेन्मंदेन वह्निना लेहीभूते पश्चात् तत्र सितां प्रस्थं विनिक्षिपेत्॥ चातु
र्जातकणाविश्वमजाजीमुस्तवालकं॥ दाडिमं रसजं धान्यं रजनीयष्ट्यावासकं॥ वंशजं
च तवक्षीरं प्रत्येकं शुक्तिसंमितं॥ जीरकस्यावलेहोयं प्रदरापहरः परः॥ ज्वरारत्या
रुचिश्वासतृष्णादाहक्षयापहः॥ इति जीरकावलेहः॥ पिवेद्दैलोध्रकल्कं शर्करामधुसंयुतं॥ वासकस्य रसं चापि गुडूच्याः रसमेव च॥ शर्कराघृतसंयुक्तं तो ध्रंवा प्र
दरापहं॥ वालकगुडूच्योः स्वरसस्यापि शर्करामधुभ्यां समन्वयो ज्ञेयः॥ इति
योगाचतुष्टयं॥ धात्रीत्रिकंटकवदरीजंवूत्वचिदिरैः समुस्तलीकैः॥ कायोजपि

॥५८८॥

त्रमेहप्रदरघ्नः सप्तरात्रेण ॥ तंदुलतुषजुतजीरस्य चेतं पीतं नीवारयत्याशु ॥ पर्यूषिते
नहि वारणानानाकारं रक्तश्वेतसितप्रदरम् ॥ कर्कंधुचूर्णमाज्यं गुडइतितुल्यं जयेत्प्र
दरं ॥ लोहितशालिजपिष्टं क्षीरस्यं शीतमेन्वितं मधुना ॥ असृक्प्रदरजिद्देवं निष्के
ष्पिताज्येन संयुता लाक्षा ॥ भूनिंबताक्षर्यदार्वीबिल्वव्रषावैः समध्वातैः ॥ समधुः
कषायएकोनानाकारं जयेत्प्रदरं ॥ इतियोगषट्कं ॥ रसंगंधं सीसंमृतमितिसमं
तैलकुरसजं समानं सर्वैः स्यात्तुलितमपि लोध्रं च वरसैः ॥ दिनैपिष्टं नाम्ना प्रदर
रिपुरेषोपहरति द्विवल्लः सौद्रेण प्रदरमतिदुःसाध्यमपि च ॥ इति प्रदररिपु
रसः ॥ जीरकं प्रस्थमेकं तु क्षीरं द्व्याढकमेव च ॥ घृतप्रस्थार्द्धसंयुक्तं शनैर्मंदाग्नि
ना पचेत् ॥ सुशीते शर्करा प्रस्थद्वयमत्र विनिक्षिपेत् ॥ चातुर्जातं करणविप्पम

॥ ५८०

जाजीयुगलं जलं ॥ दाडिमं रसजं धान्यं जनीपडवासकं ॥ वंशजातं तवक्षीरं प्रत्येकं
चपलार्द्धकं ॥ जिरकस्यावलेहोयं प्रदरापहरः परः ॥ रक्तपित्तं मुखरोगं प्रमेहं मूत्रकृ
च्छ्रकं ॥ जीर्णज्वरं तथा दाहं पीनसार्शांसि नाशयेत ॥ अंगवृद्धिवसारोगप्रजने कौवी
र्यवर्द्धनः ॥ इति जीरकावलेहः द्वितीयः ॥ अथ पथ्यापथ्यमाह ॥ पथ्यं यदपथ्यं
च रक्तपित्ते प्रकीर्त्तितं ॥ प्रदरेपि यथादोषं तत्तु नारी भजेत्त्यजेत ॥ इति प्रदरचिकि
त्सा ॥ अथ सोमरोगनिदानं ॥ तत्र सोमरोगस्य निदानपूर्विकां संप्राप्तिमाह ॥ स्त्री
णामतिप्रसंगेन शोकाच्चापि श्रमादपि ॥ अभिचारकयोगाद्वा गरयोगात्तथैव च
१ ॥ आपः सर्वशरीरस्थाः क्षुभ्यंति प्रस्रवंति च ॥ तस्यास्ताः प्रच्युताः स्थानान्मूत्र
मार्गं व्रजंति हि ॥ २ ॥ अथ तस्य लक्षणमाह ॥ प्रसन्ना विमलाः शीता निर्गंधाः ॥ ५८० ॥

नीरुजाः सिताः स्रवंति चातिमात्रं ताः सा न शक्नोति दुर्वला ॥ ३ ॥ वेगं धारयितुं तासां न
विंदति सुखं क्वचित् ॥ शिरः शिथिलतां तस्या मुखं तालु च शुष्यति ॥ ४ ॥ मूर्छा जृंभा
प्रलापश्च त्वग्रूक्षा चातिमात्रतः ॥ भक्ष्यैर्भोज्यैश्च पेयैश्च न तृप्तिं लभते सदा ॥ ५ ॥ सं
धारणाच्छरीरस्य ता आपः सोमसंज्ञिताः ॥ ततः सोमक्षयात्स्त्रीणां सोमरोग इ
ति स्मृतः ॥ ६ ॥ इति सोमरोगनिदानं ॥ अथ सोमरोगचिकित्सा ॥ कदलीनां फलं पक्वं धा
त्रीफलरसं मधु ॥ शर्करासहितं खादेत्सोमधारणमुत्तमं ॥ माषचूर्णं समधुकं
विदारी शर्करा मधु ॥ पयसा पाययेत्प्रातः सोमधारणमुत्तमं ॥ स एव सर्वजः सोमः
स्रवेन्मूत्रे रगाचेन्मुहुः ॥ तत्रैलापत्रचूर्णेन पाययेत्तु हुलीं सुरां ॥ जले नामलकीबीज
कल्कं समधुशर्करं ॥ पिबेद्दिनत्रयेणैव सोमप्रदरनाशनं ॥ तक्रौदनाहाररतासं

॥५८१॥

पिबेन्नागकेसरं ॥ अर्हतक्रेणसंपिष्टं सोमप्रदरनाशनं ॥ अथ गंधाचमुसलीवि
दारीकेदलवच ॥ कहेलीमातकासोध्रोधातकीपुष्पमेवच ॥ पथ्याब्धिफेनोबमंजि
ष्ठानिर्यासः शाल्मलीभवः ॥ हीहवेरस्तथामाजूफलं पूंगीफलंतथा ॥ टंकषढ्क मि
तान्येतान्याहरेत्समभागतः ॥ निर्यासः पंचपलकोवेवूलतरूसंभवः ॥ तदर्द्धंच ट
निर्यासः सम्यग्गोघृतभर्जितः ॥ पलपंचमिताग्राह्यास्तेणमर्कटतंडुलाः ॥ गोधूम
सत्वंतत्तुल्यंसर्वेभ्योद्विगुणसिता ॥ पक्त्वागुटीविधातव्यासोमप्रदरनाशिनी ॥ प
लार्द्धमानानारीणांयोनिशैथिल्यकरीमता ॥ इत्यश्वरंगंधाद्योमोदकः ॥ इतिसोमरो
गचिकित्सा ॥ अथमूत्रातिसारनिदानं तस्यलक्षणमाह ॥ सोमरोगेचिरंजातेतदा
मूत्रमतिस्रवेत ॥ मूत्रातिसारंतंप्राहुर्बलविध्वंसनंपरं ॥१॥ अथमूत्रातिसारचि

५८१॥

क्रित्सा ॥ तालकं दंच खर्जूरं मधुकं च विदारिकां ॥ सितामधुयुतां खादेन्मूत्रातीसार
नाशनं ॥ चक्रमर्दकमूलं तु संपिष्टं तंदुलांबुना ॥ प्रभातसमये पीतं जलप्रदरनाशनं
इति मूत्रातिसारचिकित्सा ॥ अथ योनिरोगनिदानं ॥ तत्र योनिरोगाणां निदानान्या
ह ॥ मिथ्याहारविहाराभ्यां दुष्टैर्दोषैः प्रदूषिताः ॥ आर्तवाद्वीर्य्यतश्चापि दैवाद्वा ।
स्फ भगे गदाः ॥ १ ॥ अथ योनिरोगाणां नामान्याह ॥ उदावर्त्ता तथा वंध्या विप्लुता
च परिप्लुता ॥ वातला योनयः प्रोक्ता वातदोषेण पंचधा ॥ २ ॥ पंचधा पित्तदोषेण
तत्रादौ लोहितक्षरा ॥ प्रस्रंसिनी वामनी च पुत्रघ्नी पित्तला तथा ॥ ३ ॥ अत्यानंदा क
र्णिनी च चरणा नयपूर्विका ॥ अतिपूर्वा पि सा ज्ञेया श्लेष्मला च कफादिमाः ॥ ४ ॥ ष
ण्ढिनी च महती सूचीवक्त्रा त्रिदोषिणी ॥ पंचैता योनयः प्रोक्ताः सर्वदोषप्रकोपतः

५ ॥ अथ तासां लक्षणान्याह ॥ सफेनिलमुदावर्ता रजः कृच्छ्रेण मुंचति ॥ वंध्यां नष्टार्त्तवां विद्या
त् विप्लुतां नित्यवेदनां ॥ परिप्लुतायां भवति ग्राम्यधर्मे रुजा भृशं ॥ ६ ॥ वातला क
र्कशा स्तब्धा शूलनिस्तोदपीडिता चतसृष्वपि चाद्यासु भवंत्यनिलवेदनाः ॥ ७ ॥ अ
नित्यवेदनास्तोदयः ॥ वातलायां भवति शं पिता वातवेदना योदुष्या ॥ वातले त्वन्यर्थ
त्वात ॥ एषैपित्तलादिष्वपि व्याख्येयं ॥ ७ सदाहं क्षरते रक्तं यस्याः सा लोहितक्षरा
प्रस्रंसिनी स्रंसते च क्षोभिता दुःप्रजायिनी ॥ ५ ॥ स्रंसते स्थानाद्भ्रश्यते ॥ दुःप्रजायिनी
दुःप्रजननशीला ॥ ५ ॥ सवातमुद्गिरेद्बीजं वामिनी रजसा युतं ॥ स्थिते स्थिते हंति ग
र्भं पुत्रघ्नी रक्तसंक्षयात ॥ पुत्रशब्दोऽत्रापत्योपलक्षणार्थकः ॥ ९ ॥ अत्यर्थं पित्तला
योनिर्दाहपाकज्वरान्विता ॥ चतसृष्वपि चाद्यासु पित्तलिंगोच्छ्रयो भवेत ॥ १० ॥ अ

स्यातेदानसंतोषंग्राम्यधर्मेणयिंदति । कर्णिन्यांकर्णिकायोनौश्लेष्मासृग्भ्यांप्रजा
यते ॥११॥ कर्णिकामांसस्यकर्णिकाकारोरोगंथिः ॥११॥ मैथुनेचरणापूर्वंपुरुषादति
रिच्यते ॥ बहुशश्चातिचरणातयोर्बीजंनतिष्ठति ॥१२॥ अतिरिच्यतेरजोमंचतीत्य
र्थः ॥ बहुशःवारंवारंअतिरिच्यतेतयोःअचरणातिचरणयोः ॥१२॥ श्लेष्मलापि
च्छलायोनिःकंडूयुक्तातिशीतला । चतसृष्वपिचाद्यासुश्लेष्मलिंगोत्थयोभवेत ॥
१३ ॥ शीतलेत्फपक्षणं । तेनशब्देनापिचोद्धव्या ॥ कंडूग्रस्तांसवेदनामितितत्रांतरे
क्तेः ॥१३॥ अनार्तवाऽस्तनीषंडीखरस्पर्शाचमैथुने ॥ महामेढ्रेणसंक्षीर्णायावालाया
अंडिनीभवेत ॥१४॥ अस्तनीईषित्स्तनौयस्यांसाअत्रसक्ष्याषंडी ॥ वालायाःसूक्ष्मयो
निछिद्रायाः ॥ अंडिनीअंडवत्संवमानायोनिर्भवति ॥१४॥ विवृतानिमहायोनिः

॥५८३॥

सूचीवक्त्रातिसंवृता ॥ सर्वलिंगसमुत्थाना सर्वदोषप्रकोपजा ॥ चतसृष्वपिचाद्यासु सर्वलिंगप्रदर्शनं ॥१५॥ विवृतातिमहायोनिः अतिविवृतमुखी विवृतायोनिः ॥ अतिसंवृता अतिशयं सूचीवत् संकुचितमुखी ॥ सर्वलिंगसमुत्थाना सर्वलिंगानां समुत्थानं यत्र सा तथा ॥१५॥ असाध्या योनीराह ॥ पंचासाध्य भवंतीह योनयः सर्वदोषजाः ॥१६॥ पंचषंडीप्रभृतयः ॥१६॥ अथयोनिकंदस्य निदानमाह ॥ दिवास्वप्ना दतिक्रोधाद्व्यायामादतिमैथुनात ॥ क्षताच्चनखदंताद्यैर्वाताद्याः कुपितायदा ॥१७॥ वातद्याः कुपिताः यथोक्तनिदानं प्रत्येकं कुपितावातादयः ॥१७॥ तस्यरूपमाह ॥ पूयशोणितसंकाशं लकुचाकृतिसन्निभं जनयंति तदायोनौ नाम्ना कंदः सयोनिजः ॥१८॥ लकुचाकृतिसन्निभं ॥ लकुचाकाराकारं ॥ गुडकमत्रविशेषं योद्धव्यं ॥१८॥ अथवातजंपि ॥५८३॥

त्तजयोनिकंदयो रूपमाह ॥ रूक्षं विवर्णं स्फटितं वातिकं तं विनिर्दिशेत । दाहरागज्वरयु
तं विद्यात्पित्तात्मकं तु तं ॥ १९ ॥ अथ कफजसान्निपातिकयोर्योनिकंदयो रूपमाह ॥ नील
पुष्पप्रतीकाशं कंडूमंतं कफात्मकं ॥ सर्वलिंगसमायुक्तं सन्निपातात्मकं वदेत ॥ २० ॥ नी
लपुष्पप्रतीकाशं अतसीकुसुमादिवर्णं ॥ २० ॥ इति योनिरोगनिदानं ॥ अथ योनिरो
गचिकित्सा ॥ तासु योनिषु चाद्यासु स्नेहादिक्रम इष्यते ॥ वस्त्यभ्यंगपरिषेकप्रलेप
पिचुधारणं ॥ क्रमश्चिकित्सा ॥ वर्त्तिरश्चोतरवस्तिः ॥ नतवार्त्ताकिनीकुष्ठसैंधवामर
दारुभिः ॥ तिलतैलं पचेन्नारी पिचुं तस्य विधारयेत ॥ विप्लुतायां सदा योनौ व्यथा ते
न प्रशाम्यति ॥ वातलां कर्कशां स्तब्धामल्पस्पर्शां तथैव च ॥ कुंभस्वेदैरुपचरेदंतर्वे
श्मनि संवृते ॥ धारयेद्वा पिचुं योनौ तिलतैलस्य सर्वदा ॥ पित्तलानां च योनीनां सेको

॥५८४॥

ष्वंगपिचुक्रियाः ॥ शीताः पित्तहराः कार्य्याः स्नेहनार्थं घृतानि च ॥ प्रस्रंसिनीं घृताभ्यक्तां
पिचुं स्विन्नां प्रयोजयेत् ॥ पिधाय वेसवारेण ततो बंधं समाचरेत् ॥ वेसवारो यथा ॥ शुंठी
मरिचकृष्णाभिर्धान्यकाजाजिदाडिमैः ॥ पिप्पलीमूलसंयुक्तैर्वेसवारः स्मृतो बुधैः
धात्रीरसं सितायुक्तं योनिदाहे पिबेत्सदा ॥ सूर्यकांतामयं मूलं पिबेद्वा तंडुलांबुना
योन्यां तु पूयस्राविण्यां शोधनद्रव्यनिर्मितैः ॥ सगोमूत्रैः सलवणैः पिंडैः संशोध
नं हितं ॥ शोधनद्रव्याणि निंबपत्रादीनि ॥ दुर्गंधां पिच्छिलां वापि चूर्णैः पंचकषाय
जैः ॥ पूरयेत्क्षालयेद्राजवृक्षादिक्वथितांबुना ॥ पंचकषायाः पचावासापटोलप्रियं
गुनिंबाः ॥ योन्यां बलासदुष्टायां सर्वं रूक्षोष्णमौषधं पिप्पल्या मरिचैर्माषैः शता
ह्वाकुष्ठसैंधवैः ॥ वर्त्तिस्तुल्या प्रदेशिन्या योनौ श्लेष्मविशोधिनी ॥ तुल्या प्रदेशि

॥५८४॥

न्यादैर्घ्यैर्लेपपरिलेपाद्हेन च ॥ कर्णिन्यां वर्त्तियो देया शोधनद्रव्यनिर्मिताः ॥ गुडूची त्रिफ
लादंतीक्वथितोदकधारया ॥ योनिं प्रक्षालयेत्तेन तत्र कंडूः प्रशाम्यति ॥ मुद्गपुष्पं स
लवदिरं पथ्यां जातीफलं तथा ॥ पिंपी पूगं च संचूर्ण्य वस्त्रपूतं क्षिपेद्भगे ॥ योनिर्भव
ति संकीर्णा न स्रवेच्च जलं तथा ॥ कपिकच्छुभवं मूलं क्वाथयेद्विधिना भवेत् ॥ योनेः सं
कीर्णता शांतिः क्वाथेनानेन धावनात् ॥ जीरकद्वितयं कृष्णा सुषवी सुरभी वचा ॥
वासकः सैंधवं पथ्या पिपयवक्षारो यवानिका ॥ एषां चूर्णं घृते किंचिद्भृष्टं खंडेन मोद
कान् ॥ कृत्वा खादेद्यथावह्नि योनिरोगाद्विमुच्यते ॥ इति जीरकाद्यो मोदकः ॥ मूषका
क्वाथसंसिद्धतिलतैलकृतः पिचुः ॥ नाशयेद्योनिरोगांस्तान् धृतो योनौ न संशयः
त्रिफलां द्वौ सहचरौ गुडूचीं सपुनर्नवां ॥ शुकनासां हरिद्रे द्वे रास्नां मेदां शतावरीं

॥५८५॥

कल्कीकृत्यघृतप्रस्थंपचेत्क्षीरेंचतुर्गुणे ॥ तत्सिद्धंपाययेन्नारींयोनिरोगप्रशांतये
इतित्रिफलाद्यंघृतं ॥ मंजिष्ठामधुकंकुष्ठंत्रिफलाशर्करावला ॥ मेदापयस्याकाको
लीमूलंचैवाश्वगंधजं ॥ अजमोदाहरिद्रेद्वेहिंगुःकटुरोहिणी ॥ उत्पलंकुमुदंद्रा
क्षाकाकोल्यौचंदनद्वयं ॥ एतेषांकार्षिकैर्भागैर्घृतप्रस्थंविपाचयेत् ॥ शतावरीरसं
क्षीरंघृताद्देयंचतुर्गुणं ॥ सर्पिरेतन्नरःपीत्वास्त्रीषुनित्यंवृषायते ॥ पुत्रान्जनयेत
वीरान्मेधाव्यान्प्रियदर्शनात ॥ याचैवास्थिरगर्भास्यात्सुतंयाजनयेन्मृतं ॥ अल्पा
युषंयाजनयेद्याचकन्यांप्रसूयते ॥ योनिरोगेरजोदोषेपरिस्रावेचशस्यते ॥ प्रजा
वर्द्धनमायुष्यंसर्वग्रहनिवारणं ॥ नाम्नाफलघृतंह्येतदश्विभ्यांपरिकीर्तितं ॥ अ
नुक्तंलक्ष्मणामूलंक्षिपंत्यत्रचिकित्सकाः ॥ जीवद्वत्सैकवर्णायाघृतंचात्रप्र

पुष्पते ॥ अरण्यगोमयेनैव वह्निज्वालां च दीयते ॥ मेदे मेदा महामेदा ॥ तयोरभावे श-
तावरी द्विगुणां देया ॥ पयस्या च क्षीरकाकोली ॥ काकोली युगलाभावे अश्वगंधा द्विगु-
णां देया ॥ प्रियंगुस्थाने केचिद्धिंगुं पठंति ॥ अत्र पयस्या काकोलीत्यस्याः पुनः ॥
काकोल्या चित्युक्तं तत्काकोली क्षीरकाकोल्योर्द्वयोरुपप्रतिपादनार्थं ॥ एतस्य फल-
घृतस्य पाठो नानातंत्रे श्रुतो नानाविधः तत्र हिंगुवचा तगर जीवकर्षभका एवाधिकाः
तत्र जीवकर्षभकयोरभावे विदारिकंदो देयः ॥ इति फलघृतं ॥ वचा पंचकुंचिका जाजीकु-
ष्ठा वृषक सैंधवं ॥ अजमोदा यवक्षारो चित्रकं शर्करान्वितं ॥ पिष्ट्वा प्रसन्नया तो-
यस्त्वादेतद्घृतमर्जितं ॥ योनिपार्श्वार्तिहृद्रोगगुल्मार्शांसि विनिवारयेत् ॥ इति वचाद्यं
चूर्णं ॥ वृषकत्रिकंटरास्नासिंहीद्वयोन्यर्तिजित परं क्षीरं ॥ इति आटरूषादिदुग्धं

॥५८ ह्री॥

पालाशधातकीजंबूसमंगामोचसर्जकं । दुर्गंधपिछिलक्लेदस्तंभनं चूर्णमिष्यते ॥ इ
तिपलाशमज्जादिचूर्णं ॥ जंघामूसारयष्टीकटुफलकासीसतिंदुकांभोजैः ॥ स्रोतो
तेरोध्रकांसीसदाडिमजत्वगमदासहितैः ॥ सौदुंबरैः सधात्रीपत्रैः कर्षोन्मितैरामूत्रे
तैलप्रस्थं विपचेद्द्विगुणितदुग्धं प्रयुक्तं तत् ॥ अभ्यंगसेकपिचुभिः स्थूलोत्तानोन्नत
स्तब्धाः ॥ पिच्छिलसंसृतिस्थूलस्फोटयुता योनिजा रुजो जयति ॥ इति जंघाम्रास्यादि
तैलं ॥ अथ वंध्याचिकित्सा ॥ आर्त्तवादर्शने नारी मत्स्यान् सेवेत नित्यशः ॥ कांजिकं
च तिलान् माषान् उदश्विच्चं तथा दधि ॥ इक्ष्वाकुबीजदंती च पलागुडमदनकिण्वकं
दुतुंविपयसूकैः ॥ सस्नुकक्षीरैर्वर्त्तिर्योनिगता कुसुमसंजननी ॥ मदनः मदनफलं
किण्वं सुराबीजं ॥ इति कटुतुंबीबीजादिवर्त्तिः ॥ पीतं ज्योतिष्मतीबीजं राजिकोग्रा

॥५८ ह्री॥

सनं ग्रहं ॥ शीतेन पयसा पिबेत् कुसुमं जनयेद् ध्रुवं ॥ ज्योतिष्मती मालकंगनी ॥ असनः
पियेसार इति प्रसिद्धः ॥ पयसा दुग्धेन ॥ इति ज्योतिष्मती बीजादि पानं ॥ मृतं गर्भ्यावस्था
स्मरमंदिरस्थं पुष्पावरोधस्य वधं करोति ॥ अमृतिका लांक्षित सेंदरीलां योगो यमे
वद्भुत गर्भपाते ॥ गंजन बीजं टंक त्रितयं तावत् दाडिमी बीजं तु परी टंक द्वितयं सिंदूरं
टंक युगलं च ॥ संमर्द्य तिल समध्येतो येन तन्नियी पगर्भपती ॥ रंडा येषि द्भुतं पिष्पावा
पातये दाप्तु ॥ इति गंजन बीजादियोगः ॥ देवा तये तु पच्छू लांक्षै कंतोपये षितं ॥ पियेद्भु
भपतीनारीगर्भः स्रवति तत्क्षणात् ॥ फलंकदं बस्य च मांक्षिकं च तु षोडकेन त्रिदि
नं सकृद्धा ॥ स्नानावसानेति पमेनयीत्वा वंध्यामवश्यां कुरुते हठेन ॥ तैहायनं या
गुडमति नित्यं पलप्रमाणं वनिता हि मासं ॥ जीर्णा ततो निश्चितमेव तस्या वंध्यत्व

॥५८७॥

मुक्तं कविपुंगवेन ॥ नालीसगौरिकं पीतविडालपदमात्रकं ॥ शीतांबुना चतुर्थेह्नि वंध्याः
स्त्रीः कुरुते भ्रशं ॥ तैलाविलं सैंधवखंडमादौ निधाय रंडा निजयोनिमध्ये ॥ नरेण सार्द्धं
रतमातनोति या सा न गर्भं लभते कदाचित ॥ गंजनस्य तु बीजानि तिलकारविकेऽपि
गुडेन मुक्तमेतत्तु गर्भं पातयति ध्रुवं ॥ अतो घृतक्षीरपलाशबीजैर्युतं प्रलेपमस्रला।
प्रतिष्ठेः ॥ करोति या स्त्रीभगरंध्रमध्ये नासौ भवेद्गर्भवती कदाचित ॥ हरीतक्या मली
चेवः चूर्णं ये चक्षरसांजनं ॥ पीत्वा तोयेन चेनारी गर्भं धत्ते न कर्हिचित ॥ तिलक्षीरगुडव्यो
षघृतं भार्गीयुतं पिबेत ॥ पानं रक्तमवेगुल्मे नवेपुष्पे च योषितां ॥ त्रिकटुअग्निदंडीनां
तिलक्काथेन चूर्णकं ॥ रक्तगुल्मं हरेत्पानात्पुष्पलेधं च योषितां ॥ तंदुलीयकमूलानि
पिष्ट्वा तंडुलवारिणा ॥ अलक्तेन तु अहं पित्वा वंध्यां कुर्वंति योषितं ॥ धत्तूरमृत्तिकायु ॥५८७॥

छेयगृहीताकीटिसंस्थिता ॥ गर्भंनिवारयत्येव रंडावेश्यादिपोषिता ॥ धूपिते योनिरंध्रे च
निंबकाष्ठेन युक्तितः ॥ अलंते रमते याःस्त्री न सा गर्भमवाप्नुयात् ॥ पिप्पलिविडंग
टंकणसमचूर्णं या पिबेत्पयसा ॥ ऋतुसमये न हि तस्याः गर्भः संजायते क्वापि ॥ आ
रनालपरिपेषितं अहंयाजपाकुसमजातिपुष्पिरणी ॥ संपुरणगुडमुष्टिसेविनिसा
धाति न हि गर्भमंगना ॥ इति गर्भप्रदभेषजकथनायसेरे गर्भजनकानि रजःप्रतिह
तिनिवारकाणि चौषधान्युक्ताथ गर्भजनकान्यौषधान्याह ॥ यत्नासितासातिबला
मधूकं वटस्य शुंगं गजकेसरं च ॥ एतन्मधुक्षीरघृतैर्निपीय वंध्या सुपुत्रं निपतं
प्रसूते ॥ अश्वगंधाकषायेण सिद्धं दुग्धं घृतान्वितं ॥ ऋतुस्नानांगना प्रातः पी
त्वा गर्भं दधाति हि ॥ पुष्योद्धृतं लक्ष्मणाया मूलं दुग्धेन कन्यया ॥ पिष्टं पित्वा ऋतु

स्नाता गर्भं धत्ते न संशयः ॥ कुरंटमूलं धातक्याः कुसुमानि वटांकुराः ॥ नीलोत्पलं पयो
युक्तमेतद्गर्भप्रदं ध्रुवं ॥ पाटला पिबति या स्त्री पिप्पलं जीरकेण सहितं हिताशना
ऋतौ तया विशिखवपुंखया युतं सा सुतं जनयती हतान्यथा ॥ पत्रमेकं पलाशस्य पि
ष्ट्वा दुग्धेन गर्भिणी ॥ पीत्वा पुत्रमवाप्नोति वीर्यवंतं न संशयः ॥ सूकरसिंधीमू
लमध्यं चा दधिफलस्य सपयस्कं ॥ पीत्वा यो भयलिंग्या बीजे कन्यां न सूते स्त्री ॥ उ
भयलिंगी शिवलिंगी ॥ पुत्रमजारीमूलं विष्णुक्रांते शालिंगिनी सहितं ॥ एतद्गर्भे
ऋदिने पीत्वा कन्यां न सर्वथा सूते ॥ पुत्रमजारी पुत्रजीवः ॥ एरंडस्यैव बीजानि मा
तुलुंगस्यैव हि ॥ सर्पिषा पारिपिष्टानि पिबेद्गर्भप्रदानि तु ॥ गोघृतेन सह नाग
केसरं श्लक्ष्ण चूर्णितमृतौ नितंबिनी ॥ गव्यदुग्ध निरता पिबेद्यदा सा सुतं दानि

पतमेव विरसः ॥ पयसमूत्रंचसघृतंनवनीतंचमाहिषं ॥ एतत्त्रयंपिबेन्नारीवंध्या
सूते सुतोत्तमं ॥ शंखपुष्पी रजोनाय पुत्रंजीवकंमूलकं ॥ आलोड्य पयसा पीत
मतौ पुत्रप्रदंभवेत् ॥ बीजानि मातुलुंगस्य दुग्धसिद्धानि सर्पिषा ॥ सगर्भामेव
कुर्वीति पानाद्वंध्यामपि स्त्रियं ॥ वहती मूलकल्कांबु दक्षिणे नासिकापुटे ॥ पुत्रा
र्थं सेचनं कुर्याद्वामे दुहित्रयां छपा ॥ ऋतौ कृष्णो बलां ख्य द्राक्षा गंधा नागकेसरं
घृतेन सह पातव्यं वंध्यागर्भप्रदंभवेत् ॥ श्वेतावरीगोक्षुरकस्य मूलैः सिद्धं पयः
पीतमथोजसंवा ॥ घृतंचतैर्वीक्ष्यतमेव वंध्यापिलब्धात्मभेत्पुत्रमंजातपुत्रा ॥ कन्याप्र
जावती पिप्पलीकौचबीजानिवारिणा ॥ पिबेन्नारी सुतान्सूते रजःस्नाता दिनत्रयं
कशौमकेशरसुप्रागयेयंसमरिचेनच ॥ घृतेनापि प्रपातव्यं वंध्यापितमतेसुतं

॥५८८॥

क्षीरेणजीवद्रव्यापाः साव्द्रकृतंदुलीयकं॥ पिबेदृतुमतीनारीगर्भकामादिनत्रयं॥ मूलं
मुर्जगारिशिखासमुत्थं दुग्धेनयुक्तंच ऋतौ निपीतं॥ गर्भस्यहेतुःप्रमदाजनस्य
स्याद्वश्वगंधामूलमपीत्यमेव॥ गैरिकाम्रास्थिजंतुभ्रजेन्यंजनकट्फलाः॥ पूर
येद्योनिमेतेषांचूर्णैः क्षौद्रसमन्वितैः॥ त्रिफलायाःकषायेण सक्षौद्रेणचसेच
येत्॥ प्रमदायोनिकंदेनव्याधिनापरिमुच्यते॥ वाष्योपकुंचिकाजाजीकृष्णोपसीचि
त्रकंतथा॥ सैंधवंक्षारसंयुक्तं दीप्यकंचप्रदापयेत्॥ घृतमब्वंपिबेनारीयोनिशू
लनिपीडिता॥ हृद्गुल्मशूलवातार्त्ति पक्वाशयरुजापहं॥ एरंडतैलसंमिश्रैर्दीर्
मुस्ताकयोजितैः उशीरैःसाधितंक्षीरं पाकेनपरिमिश्रितं॥ मधुमात्रासमायु
क्तं योनिशूलनिषूदनं॥ कार्पासपिंडी एरंडतैलेनचपरिप्लुता॥ योतिमध्येनि ॥५८८॥

धातक्यायोनिशूलहरास्मृता ॥ मोचरससूक्ष्मचूर्णंक्षिप्तंयोनौस्थितंप्रहरं ॥ प्रात
यारसूतायाअपियोनिःसूक्ष्मरंध्रास्यात ॥ वंबूलकुसुमंलोध्रंदाडिमीमूलव
ल्कलं ॥ चूर्णीकृत्यक्षिपेद्योनौयोनिसंकोचनंपरं ॥ माजूफलंचत्रिफलारेव
द्रिरोन्मत्तनीतथा ॥ पउवासंचसौराष्ट्रीपूगंचैवसमंसमं ॥ जलेनगुटिकांकृत्वायो
नौस्थाप्याघटीद्वयं ॥ योनिसंकोचनकरीगुटिकैषाप्रकीर्त्तिता ॥ माजूफलदाडि
मफलवल्कलचूर्णंभगांतरेक्षिप्तं ॥ अपिनवप्रसूतातरुणीलभतेयोनींसुसं
कीर्णां ॥ कासीसंचूर्णमावध्यावस्त्रेणांतर्भगेक्षिपेत ॥ तत्संकीर्णंभवेत्कृत्वाना
रीशतमुदमावहेत ॥ वोरीधातकिसौराष्ट्रीफामायीफटकिचूर्णकंक्षिपेत ॥ योनौ
वस्त्रेणातनुनाबद्ध्वासंकीर्णतांनयेत ॥ इतियोनिसंकीर्णतायां ॥ चूर्णंमुद्रके

सरकुष्ठकानां प्रातर्दिनांते परिलेढि यास्त्री ॥ अथार्द्धमासेन मुखस्य वासः कर्पूरतु
ल्यो भवति प्रकामं ॥ इति मुखवासे ॥ तिलप्रसूनं सह गोक्षुरेण समारघं गव्यघृ
तेन पिष्टं ॥ सप्ताहरात्रेण शिरः प्रलेपात् भवंति दीर्घाः प्रचुराश्च केशाः ॥ इति केश
वर्द्धने ॥ माजूफलकल्कनीली सैंधवैः सारनालकैः ॥ पिष्टैः शिरोरुहा लिप्ताः श्या
मवर्णा भवेत्परं ॥ इति केशकृष्णतायां ॥ द्विगुणा लोहरजः केभृंगतालमर्द्दितः स्युजिंफ्ला
प्यर्द्धभागा शिलाततः ॥ सुपिष्टं जलेनैतदुत्साद्याक्केशान प्रलिप्तं परे तो भसेश्शातना
य ॥ षड्भागिकं संखरजोर्द्धशाणां तांतं पलाशस्य पभस्म मर्थे ॥ रंभारसैरर्कदलां ।
द्रसैर्वा लोमापहं समभिरेवलेपैः ॥ हरितालभाग एको एलाचूर्णकमा द्विगुणो
पलक्ष्मणं चूर्णं कृत्वा जलेन तेपालकचोनस्फः ॥ चुनाफटकडि हरतालानां चूर्णं

॥५८०॥

कृत्वाकदलीजलेनतैयातनस्यंतिलैमात्रि ॥ इति निर्लोमीकरणं ॥ अथ पथ्यापथ्य
माह ॥ यातव्याधियुतां पथ्यमपथ्यं पुरुदीरितं ॥ योनिव्यापत्सुपित्तवातद्वियाद्व
यथामलं ॥ इति योनिरोगचिकित्सा ॥ अथ गर्भस्रावपातयोर्निदानमाह ॥ ग्रा
म्यधर्माध्वगमनयानस्खलनपीडनैः ॥ ज्वरोपवासोमतनप्रहाराजीर्णधावनैः
१ वमनाच्चविरेकात्क्षुत्कपानाद्गर्भपातनात ॥ तीक्ष्णोष्णक्षाररोसमकटुकतिक्तरूक्षनि
षेवणात ॥ वेगाभिघाताद्विषमादासनाच्छयनाद्भुपात ॥ गर्भौ पतंति रक्तस्य स
स्रुलंदर्शनंभवेत ॥ २ ॥ गर्भपातनंनियमेनगर्भपातनद्रव्यं ॥ गर्भस्यस्रावपातयोः
पूर्वरूपमाह ॥ गर्भोपततीत्यादि ॥ पतंतिस्रावेणपातेनवापतिष्यति ॥ १ ॥ २ ॥ ३ ॥
अथ स्रावपातयोरषधिमाह ॥ आचतुर्थात्ततोमासात्प्रस्रवेद्गर्भविद्रवः ॥

॥५९१॥

ततः स्थिरशरीरस्य पातः पंचमषष्ठयोः ॥ ४ ॥ आचतुर्थान्मासात् चतुर्थमासपर्यंतं ॥
गर्भविद्रवः ॥ गर्भस्य विद्रवः शोणितरूपः ॥ गर्भस्रवति शोणितमिति भोजवचना
त् ॥ स्थिरशरीरस्य कठिनशरीरस्य गर्भस्य ॥ ४ ॥ अथ गर्भपातस्य दृष्टांतं दर्शयति ॥
गर्भोभिघातविषमासनपीडनाद्यैः पक्वं द्रुमादिव फलं पतति क्षणेन ॥ ५ ॥ यथा वृं
तलग्नं पक्वं फलं अभिघातेनाकालेपि पतति तथा गर्भोप्यभिघातादिनाऽकालेपि पत
तीत्यर्थः ॥ ५ ॥ अथ गर्भपातस्योपद्रवलक्षणमाह ॥ प्रस्रंसमाने गर्भे स्याद्दाहः शूलं च
पार्श्वयोः ॥ पृष्ठरुक्प्रदरानाहो मूत्रसंगोऽपि जायते ॥ ६ ॥ प्रस्रंसमाने पतति सति ॥ ६ ॥
अथ गर्भस्य स्थानांतरगमने चोपद्रवानाह ॥ स्थानात्स्थानांतरं तस्मिन् प्रयात्या
मिच जायते ॥ आमपक्वाशयोर्द्वौ तु क्षोभः पूर्वेष्पउपद्रवाः ॥ ७ ॥ पूर्वे पूर्वउपद्रवाः पा

॥५९१॥

च्छिपूलादयः ७ ॥ अथप्रसवमासानाह ॥ नवमे दशमे मासि नारी गर्भं प्रसूयते ॥ एका
वा ततोन्यत्र विकारतः ॥ ८ अथगर्भस्य पुत्रादि लिंगज्ञानमाह ॥ उन्नते दक्षिणे
कुक्षौ गर्भे च परिमंडले ॥ पुत्रं प्रसूयते वामे कन्यां क्लीवं समे गता ॥ ९ ॥ परिमंडलेथ
तुले ॥ इति गर्भस्य स्राव पातयोर्निदानं ॥ अथ स्रागर्भपाचिकित्सा ॥ ह्रीवेरारलुरक्तं
चंदनबलाधान्याकवत्सादनीमुस्तोशीरयवासपर्पटविषाक्वाथं पिबेद्गर्भिणी ॥
नानावर्णरुजातीसारगदके त्वस्रप्रुतौ याच्युते योगोयं मुनिभिः पुरा निगदितः
सूत्यामयेमयेप्युत्तमः ॥ इति ह्रीवेरादिक्वाथः ॥ समधुः छागदुग्धेन कुलालकरम
र्दिता ॥ मृत्स्नासंस्थापयेद्गर्भं चलितं नात्रसंशयः ॥ इति कुलालमृत्स्नायोगः ॥ यष्टीः
पारावतस्याश्च पिष्ट्वा तंडुलवारिणा ॥ पाययेद्गर्भिणीं गर्भस्रावे शोणिते तच्छांतये

॥ ५८२ ॥

धान्याकामृतवल्लीभ्यां शृतं ज्वरमुदस्यति ॥ गर्भिण्या इति शेषः ॥ इति धान्याकादिक्वा
थः ॥ कुशैरंडककाशानां मूलैर्गोक्षुरकस्य च ॥ शृतं दुग्धं सितायुक्तं तत् गर्भिण्याः शू
लहृज्ज्वरं ॥ इति कुशादिमूलदुग्धं ॥ ह्रीवेरातिविषामुस्तमोचरसशृतं जलं ॥ दद्याद्ग
र्भे प्रचलिते प्रदरे कुक्षिरुक्ष्वपि ॥ कुक्षिरुक् उदरव्यथा ॥ इति द्वितीयह्रीवेरादिक्वाथः
मधुकचंदनोशीरसारिवापद्मपद्मकैः ॥ शर्करामधुसंयुक्तः कषायो गर्भिणीज्व
रे ॥ इति मधुकादिक्वाथः ॥ चंदनं सारिवा लोध्रं मृद्वीका शर्करान्वितं ॥ क्वाथं कृत्वा
प्रदातव्यं गर्भिणीज्वरशांतये ॥ इति चंदनादिक्वाथः ॥ पीते विश्वमजाक्षीरैर्नाश
येद्विषमज्वरं ॥ गर्भिण्या इति शेषः ॥ इति शुंठीचूर्णं ॥ आमूलं वल्कलं चः क्वाथैर्वृह
यह्राजसत्कुक्षं ॥ अनेन स्त्रीडिमालेरा गर्भिणी गुहणी जयेत् ॥ इति साजावेले ॥ ५८२ ॥

हः ॥ गुर्विण्या गर्भतो रक्तं स्रवेद्यदि मुहुर्मुहुः ॥ तन्निरोधाय सा दुग्धमुत्पलादिशृतं
पिबेत् ॥ उत्पलादिगणो यथा ॥ उत्पलं नीलमारक्तं कह्लारं कुमुदं तथा ॥ पद्मेतां भो
जं च मधुकमुत्पलादिरयं गणः ॥ संप्रीणितो हरत्येव दाहं तृष्णां हृद्भ्रमयानं ॥ रक्त
पित्तं च मूर्छां च छर्दिं चातिमरोचकं ॥ इति मुत्पलादिगणः ॥ मत्कोष्ठागारिका गे
ह संभवा नवमक्षिका ॥ समंगा धातकीपुष्पं गैरिकं च रसांजनं ॥ तथा सर्ज्जरस
श्चैतान्यथालाभं विचूर्णयेत् ॥ तच्चूर्णं मधुना लिह्यान्नारी प्रदरशांतये ॥ कोष्ठागा
रिकावटी ॥ इति चूर्णं ॥ कसेरूत्पलशृंगाटकल्कं वा पयसा पिबेत् ॥ गर्भस्रुतं हर
त्येव यथा वै मातुमांसतमः ॥ इति कसेरुकादिकल्कः ॥ पक्वं च चारसोनाभ्यां हिंगुसौ
वर्च्चलान्वितं ॥ आनाहे तु पिबेद्दुग्धं गुर्विणी सुखिनी भवेत् ॥ इति वचादिदु

॥५८३॥

ध्ये॥ तृणपंचकं यथा॥ शालीक्षुकुशकाशैः स्वाच्छरेण तृणपंचकं॥ एषां मूलं तृषा दाह
पित्तासृङ्मूत्रसंग्रहृत्॥ इति तृणपंचकयोगः॥ अर्धदंष्ट्रामधुकमूलद्राक्षाम्लानैः सिद्धं प
यः पिबेत्॥ शर्करामधुसंयुक्तं गर्भिणी वेदनापहं॥ अम्लानः गौडादौवालपुष्प इति
प्रसिद्धः पुष्पजातिः॥ इति अर्धदंष्ट्रादिसिद्धं तं दुग्धं वेदनादौ॥ अतः परं मासानुमासि
कमुच्यते॥ मधुकं शाकबीजं च पयस्या सुरदारु च॥ अश्मंतकस्तिलाः कृष्णास्ताम्र
वल्ली शतावरी॥ वृक्षादनी पयस्या च लता वोत्पलसारिवा॥ अनंता सारिवा रास्ना
पद्मा मधुकमेव च॥ बृहत्यौ काश्मरीयापि क्षीरिशुंगत्वचो घृतं पृश्निपर्णी बला
शिग्रु अर्धदंष्ट्रा मधुपर्णिका॥ शृंगाटकं बिसं द्राक्षा कसेरु मधुकं सिता॥ वत्सैते
सप्तयोगाः स्युरर्द्धश्लोकसमापनाः॥ यथाक्रमं प्रयोक्तव्या गर्भस्रावे पयोयुताः

॥५८३॥

रायंगमोंनवनतिगर्भश्रुतं चक्राम्यति ॥ श्लाकः कर्कशापत्रस्तु स्याद्बीजं ॥ पयस्याक्षीरका
कोलीतदन्नामे ऽभ्यंगं धान्याग्राह्या ॥ अश्मंतकः आपदा इतिप्रसिद्धः ॥ तामूवक्षीमं
जिष्ठा ॥ तमामिर्यग्जः ॥ अनंताउत्पलसारिवा ॥ पद्माभाङ्गीस्त्रिस्विह्रिष्णुंगाः क्षीरिरलां
पटादीनांपुंगाः अपिकसिताः प्रवालाः ॥ मधुपर्णिकाभांटी ॥ पयोपुताः प्रतिमा गं
समद्धुस्लोकोत्कोषधपयोमिलिताः कपिमिताः कृतिततोयेन संपिष्टाः पक्वमितेन दु
ग्धेनालोडिताः पातव्याः इत्यर्थः ॥ कपित्थवद्धतीपित्थपटोलेष्ठुनिदिग्धिका ॥ मूलानि
क्षीरसिद्धानिहापयेद्विषमाज्वरे ॥ अत्रकपित्थेत्यादिमूलानीत्यंतमेकं पदं तेन कपि
त्थादीनांमूलानिक्षीरसिद्धानिहापयेद्विषमाज्वरे ॥ अत्रकपित्थेत्यादिमूलानी
त्यंतमेकं पदं तेन कपित्थादीनांमूलानिसमुदितानिपक्वानितानिपक्वाष्ठकमिति

५८४ ॥

क्षीरे द्वात्रिंशत्पलजलयुक्ते क्वाथयित्वा क्षीरमात्रमवशिष्टं पातुं दद्यादित्यर्थः ॥ नवमे
मधुकानंतापयस्यासारिवाः पिबेत् ॥ अत्रापि मधुकादीन् मिलितान् कर्षमितान्
शीततोयेन संपिष्टान् पलपरिमितेन दुग्धेनालोडितान् पिबेदित्यर्थः ॥ क्षीरं शुंठी
पयस्याभ्यां सिद्धं स्याद्दशमे हितं ॥ सक्षीरा वा हिताच्छुंठी मधुकं सुरदारु च ॥ दशमे
शुंठीपयस्याभ्यां पूर्ववत्क्वथिते क्षीरं पिबेत् ॥ अथवा शुंठी मधुक सुरदारूणि शी
तलजलपिष्टानि दुग्धेनालोडितानि पिबेदित्यर्थः ॥ क्षीरिकामुत्पलं दुग्धं समंगा
मूलकं शिग्रा ॥ पिबेदेकादशे मासि गर्भिणी शूलशांतये ॥ सिता विदारी काकोली
क्षीरिचैव समलंतिका ॥ गर्भिणी द्वादशे मासि पिबेच्छूलघ्नमौषधं ॥ एवमाप्याय
ते गर्भस्तीव्रारुक् चोपशाम्यति ॥ अथ वातप्रकुपितगर्भचिकित्सा ॥ गर्भवातेन सं

५८४ ॥

गुल्मो नोदरं पूरयेद्यदि । तद्वृंहणीयैः संसिद्धं दुग्धं मांसरसं पिबेत् ॥ धान्यकुंदनमुख्या
च चिकित्सा च प्रकीर्त्तिता ॥ अथ प्रसवमासातिक्रमे चिकित्सा ॥ कुंदयेन्मुसलेनैव
कृत्वा धान्यमुलूखले ॥ विषमं चासनं यानं सेवेत प्रसवार्थिनी ॥ अथ प्रसवकाले
विलंबे चिकित्सा ॥ प्रसवस्य विलंबे तु धूपयेद्भितो भगं ॥ कृष्णसर्षपनिर्मोकैस्तथा
पिंडीतकेन वा ॥ निर्मोकः सर्पकंचुकः ॥ पिंडीतकः मदनः ॥ करंकी मृतगो मूर्द्धा सूति
कामयनोपरि स्थापितस्तत्क्षणान्नाप्यीः सुखप्रसवकारकः ॥ करंकी मृतः अस्थि
मात्रेणास्थितः ॥ पोतकीमूलकल्केन तिलतैलयुतेन च ॥ योनेरभ्यंतरं लिप्ता सुखं नारी
प्रसूयते ॥ पोतकी पोई इति लोके ॥ कृष्णावचा वापि जलेन पिष्टा सैरंडतैला सुखेना
भिलेपात् ॥ सुखप्रसूतिं कुरुते गतानां निपीडितानां बहुभिः प्रमादैः ॥ आगारधू

॥ ५९६ ॥

मं सहचारिण्या वा पीत्वा वलाशी घृतं प्रसूते ॥ मातुलुंगस्य मूलं तु मधुकं मधुसंयुतं ॥
घृतेन सहितं पीत्वा सुखं नारी प्रसूयते ॥ पुटस्थ धमूलं गकंचुककज्जलं मधुपूरिते
क्षुल्लदृद्दा ॥ सद्यो भवति विशल्या विमूढगर्भापि गर्भिणी ॥ पाठासुरसासिंहास्य
मयूरकजटाः पृथक् ॥ नाभिवस्तिभगे लिप्तास्सुखं नारी प्रसूयते ॥ कलायक्षारकिंक
तु दिक्कमन्यथा बद्धं गर्भोद्धरणं बुधीन ॥ विलिखेल्लवणो पश्चेत् त्रिंशत्स्वं पंचकमुत्तमं ॥ अथ
प्रसूताया योनेः क्षतादेश्चिकित्सा ॥ तुंबीपत्रं तथा लोध्रं समभागं सुपेषयेत् ॥ तेन ले
पो भगे कार्यः शीघ्रं स्याद्योनिरक्षता ॥ पलाशोदुंबरफलं तिलतैलसमन्वितं ॥ यो
नौ विलिप्तं मधुना गाढीकरणमुत्तमं ॥ प्रसूता वनिता चर्द्धकुक्षिहासाय संपिबेत् ॥
प्रातर्मथितसंमिश्रां त्रिसप्ताहं करंजत्वचं ॥ अथ मूढगर्भस्य निदानसंप्राप्ति पू ५९५ ॥

१६	२	१२
६	१०	१४
८	१८	४

अस्यैवयंत्र वर्द्धनमिति मान

ईकं समान्यं लक्षणमाह ॥ मूढः करोति पवनः खलु मूढगर्भं शूलं च योनिजठरादिषु मू-
त्रसंगं ॥ भुग्नोनिलेन विगुणेन ततः स गर्भः संख्यामतीत्य बहुधा समुपैति योनिं
१ अस्यायमर्थः पवनः स्वहेतुभिर्दुष्टः ततो मूढः स्कुगतिः मूढगर्भं हि कुगति गर्भं
योन्यादिषु शूलं मूत्रसंगं च करोति ॥ ततस्तेनानिलेन विगुणेन स्कुगतिना स
गर्भः भुग्नः कुटलीकृतः चतुर्भिः प्रकारैर्योनिं समुपैतीत्येके ॥ अष्टभिरपरे ॥ तत्सं
ख्यानिरासार्थमाह ॥ संख्यामतीत्येति ॥ उक्तसंख्यामतिक्रम्य बहुधा बहुभिः प्रकारै
र्योनिं समुपैति ॥ १ तत्र प्रथमतश्चतुरः प्रकारानाह ॥ संकीलकः प्रतिखुरः परि
घोथ बीजकस्तेषूर्ध्वबाहुचरणैः शिरसा च योनौ ॥ संगी च यो भवति कीलकवत्सकी
लो दृस्यैः खुरैः प्रतिखुरः स हि कायसंगी ॥ गच्छेद्भुजद्वयशिराः स च बीजकाख्यो

॥ ५८हि ॥

यो नौस्थितः सपरिघः परिघेणानुस्यूतः ॥ २ संशब्दोत्र छंदोनुरोधात ॥ कमन्यथापि स्वार्थे
तेन कीलक इति नाम ॥ अथ तस्य लक्षणमाह ॥ ऊर्ध्वबाहुचरणैरिति ॥ उच्छ्रितैः बाहुचर
णाक्षिप्तेभिः यो नौ यः संगी भवति स कीलकाख्यो मूढगर्भः ॥ द्वैधैर्विहिगतैः खुरैः
खुरसाधर्म्यात् खुरशब्देनात्र हस्तौ पादौ च गृह्यते ॥ तेन हस्तद्वयपादद्वयैर्विहिग
तैः प्रतिखुरः ॥ स हि क्रायसंगी हस्तपादान्तरकायेन सक्तो भवति ॥ योगर्भः भुज
द्वयक्षिप्तः भुजद्वयमध्ये क्षिप्तो यस्य स तादृक् गच्छेत निःसरेत ॥ तच्छेषेण शरीरेण
सक्तो भवति स हि बीजकाख्यः ॥ परिघमाह ॥ यो नाभिस्थाद्वि ॥ २ अथाप्यौ प्रक्रालाना
ह ॥ द्वारं निरुध्य शिरसा जठरेण कश्चित्कश्चिच्छरीरपरिवर्त्तनकुब्जकायः ॥ एकेन क
श्चिदपरस्तु भुजद्वयेन तिर्यग्गतो भवति कश्चिद्व्याङ्गुलोन्यः ॥ पार्श्वापवृत्तो ॥ ५८हि ॥

गतिरेतितत्थैवकश्चिद्दिव्यद्धा भवतिगर्भगतिः प्रसूतौ ॥३॥ अथ मर्त्यः ॥ कश्चित्छि
रसायानिद्वारं स्वं निरुध्य सक्तो भवति ॥ कश्चिज्जठरेण सन्निरुध्य सक्तो भवति ॥ क
श्चित्शरीरस्य परिवर्त्तनेन विपरीतवर्त्तनेन कुब्जकायः सकुब्जेन पृष्ठेन सक्तो भवति
कश्चिद्देकेन भुजेन योनिद्वारान्निःसृतेन सक्तो भवति ॥ कश्चिद्भुजद्वयेन सक्तो भवति
कश्चित्तिर्य्यग्भूत्वा सक्तो भवति ॥ अन्यः ग्रीवाभंगादधोभूतेन मुखेन सक्तो भवति
कश्चित्पार्श्वेनापवृत्तानिरुद्धागतिर्यस्य एवंविधः योनिद्वारं एतियाति ॥ अथ सु
श्रुतस्य षोडप्रकारांतराण्याह ॥ कश्चिद्द्वाभ्यां सक्थिभ्यां योनिमुखं प्रपद्यते ॥ कश्चि
दाभुग्नैकसक्थिरितरेण सक्तः ॥ कश्चिदाभुग्नसक्थिशरीरः स्फि[illegible]णेन तिर्य्य
ग्गतः ॥ कश्चिदुदरपार्श्वपृष्ठानामन्यतमेन योनिद्वारं पिधायावतिष्ठते ॥ अं

॥ ५८१ ॥

तः पार्श्वोपपन्नशिराः कश्चिदेकेन बाहुना ॥ कश्चिद्दामुग्नशिरा वा कुब्जदेहेन कश्चिद्दाभु
ग्नमध्यो हस्तपादशिरोभिः । कश्चिदेकेन सक्थ्ना यो निद्वारं प्रपद्यते परेणापायुमि
ति ॥ ३ ॥ अथासाध्यमूढगर्भगर्भिण्योर्लक्षणमाह ॥ अपविद्धशिरा या तु शीतांगी
निरपत्रपा ॥ नीलोद्भूतशिरा हंति सा गर्भं स च तां तथा ॥ ४ ॥ अपविद्धशिराः शिरोवि
धारयितुमशक्ता ॥ निरपत्रपा लज्जाशून्या ॥ नीलोद्भूतशिरा नीला उद्भूता उद्भूताः
शिराः कुक्षौ यस्याः सा ॥ स गर्भः ॥ ४ ॥ अथ मृतस्य गर्भस्य क्रमेण कर्षणार्थं तल्ल
क्षणमाह ॥ गर्भस्पंदनमाधीनां प्रणाशः श्यावपांडुता ॥ भवेदुच्छ्वासपूतित्वं शूलं
चांतर्मृते शिशौ ॥ ५ ॥ गर्भस्पंदनं गर्भचलत्वं ॥ आधीनां प्रणाशः प्रसववेदना
नामभावः ॥ शूलं तः अंतर्मृतस्य शिशोः शूनतया ॥ ५ ॥ अथ गर्भनिर्हरणहेतुमाह ॥

॥ ५८१ ॥

मानसागंतुभिर्मातुरुपतापैः प्रपीडितः ॥ गर्भो व्यापद्यते कुक्षौ व्याधिभिश्च प्रपीडितः
॥ २ ॥ उपतापो दुःखं ॥ मानस उपतापो यं धुजनक्षयादिना ॥ आगंतुरुपतापः प्रहारादि
ना ॥ २ ॥ अथापरमसाध्यगर्भिणीलक्षणमाह ॥ योनिसंवरणं संगः कुक्षौ मक्कल्ल
रणेन च ॥ हन्युः स्त्रियं मूढगर्भो यथोक्ताश्चाप्युपद्रवाः ॥ ७ ॥ योनिसंवरणं व्याधिवि
शेषः ॥ तथा चोक्तं तंत्रांतरे ॥ यातलान्यन्नपानानि ग्राम्यधर्मप्रजागरं ॥ अत्यर्थं सेवमा
नाया गर्भिण्या योनिमार्गगः ॥ मातरिश्वा प्रकुपितो योनिद्वारस्य संवृतिं ॥ कुरुते रु
द्धमार्गत्वात्पुनरंतर्गतोनिलः ॥ निरुणद्ध्याशयद्वारं पीडयन् गर्भसंस्थितिं निरुद्ध
ये दतोच्छ्वासो गर्भस्त्वाशु विपद्यते ॥ उच्छ्वासरुद्धहृदयो नाश्यपेत्यथ गर्भिणी ॥ यो
निसंवरणं नाम व्याधिमेनं प्रचक्षत इति ॥ संगः कुक्षौ गर्भस्य लग्नता ॥ अप्रव

॥५८८॥

तिरिति पाठः तत् ॥ कुक्षौ मक्कल्लः रक्तमारुतजशूलविशेषः ॥ यद्यपि प्रसूतायां मक्कल्ल
शूलमुक्तं तथापि सुश्रुतेन प्रजातायामित्युक्तं तेन प्रजातायामपि मक्कल्लशूलं
भवतीति बोध्यते ॥ उपद्रवाः श्वासकासपक्वकासम्यासादयः ७ ॥ अथ प्रसूताया उद
रस्थापरोपद्रवमाह ॥ प्रसूताया न पतिता जठरादपरा यदि ॥ तदा सा कुरुते शूलमा
ध्मानं वह्निमन्दतां ८ ॥ अथ मक्कल्लस्य निदानसंप्राप्तिपूर्वकं लक्षणमाह ॥ वनि
तायाः प्रसूताया वा तीक्ष्णैरनवृद्धितः ॥ तीक्ष्णौ रक्तोधितं रक्तं रुध्वा ग्रन्थिं करोति हि
दि नाभ्यधः पार्श्वयोर्बस्तौ बस्तिमूर्ध्नि वापि च ॥ ततश्च नाभौ बस्तौ च भवेच्छूलं तथो
दरे १० ॥ भवेत्पक्वाशयाध्मानं मूत्रसंगश्च जायते ॥ एतद्भिषग्भिरुदितं मक्कल्लाम
य लक्षणं ॥ ११ ॥ अथ मूढगर्भचिकित्सा ॥ यामिः संकटकालो यत्क्रो नार्य्यः प्रसा

॥५८८॥

यितःसम्यक् ॥ लब्धंयशःसमंतात्तानेवात्रक्रियांकुर्युः ॥ गर्भेजीवतिमूढेतुगर्भेयत्ने
ननिर्हरेत् ॥ हस्तेनसर्पिषाक्तेनयोनेरंतर्गतेनसा ॥ मृतेतुगर्भेगर्भिण्यायोनौशस्त्रं
प्रयोजयेत् ॥ शस्त्रंशस्त्रार्थविद्धीतपुहस्ताभयोस्सिता ॥ सचेतनंतुशस्त्रेणनक
थंचनदारयेत् ॥ सदार्प्यमाणोजननींमात्मानंचापिमारयेत् ॥ नोपेक्षेतमृतंगर्भं
मुहूर्त्तमपिपंडितः ॥ सह्याशुजननींहंतिप्रभूतान्लेपथापशुं ॥ प्रभूतान्नमतिमात्र
मल्ले ॥ यद्यदंगंहिगर्भस्यतस्यसज्जतितच्छिवक ॥ सम्यक्विनिर्हरेच्छित्वारक्षेन्नारीं
प्रयत्नतः ॥ मंडलाग्रेणकर्तव्यःछेदस्त्रंतर्व्यजानता ॥ एवंसंहृतशल्यांतुसिंचेदुष्णे
नवारिणा ॥ ततोभ्यक्तशरीरायायोनौस्नेहंनिधापयेत् एवंमृदुर्भवेद्योनिस्तच्छूलं
चोपशाम्यति ॥ कस्मातन्मृतमुद्वैताहिगुभार्गीःसदीप्यकाः ॥ पचासमतिविषो

५८६

तास्तांश्चव्यंसंचूर्ण्यपाययेत् ॥ स्नेहेनदोषशांत्यर्थंवैद्यनोपशमायच ॥ क्वाथश्चैषां
तथाकल्कंचूर्णंवाघृतमर्जितं ॥ शाकल्यकहिंग्वतिविषापाठाकटुकरोहिणीः ॥ तथा
तेजोवतींचापिपायमेत्स्रुवविद्धिषक ॥ त्रिरात्रमेवंसप्ताहंततःस्नेहंपुनःपिबेत् ॥ षड्
षक्रक्षिफालेपःस्थिरामृतकृतोयया ॥ नाभिवस्तिवरांगेषुमूढगर्भापकर्षिणीः ॥
अपामार्गस्यमूलंतुपानानारीदुःप्रसूतिनी ॥ धारयेद्योनिमध्येतुसासुखेनप्रसूय
ते ॥ मधूकंचंदनंचैवसर्पिर्मिहिषमेवच ॥ मूढगर्भापिबेन्नारीक्षिप्रमेवप्रसूयते
गर्भेविपन्नमपिपातयतेक्षणेनस्त्रीणांजरायुपटलंचपृथक्करोति ॥ पादेस्थि
तंवतत्परूपतयातरुण्यामूलंव्यथातिशमयविक्लवमानसायाः ॥ अथप्रसूताया
उदरस्यापराचिकित्सा ॥ केशवेष्टितयांगुल्यास्तस्याःकंठंप्रघर्षयेत् ॥ निर्मोकक

५८६

टुकालाबुकृतवेधनसर्षपैः ॥ चूर्णितैः कटुतैलाक्तै धूपयेदभितो भगं ॥ निर्मोकैः सर्पकं
चुकः ॥ कृतवेधनः कोशातकी ॥ तां गलीमूलकल्केन पाणिपादतलानि हि ॥ प्रलिपेत्सूति
कायो विदध्यपरापातनाय हि ॥ हस्तं छिन्ननखं स्निग्धं सूतायोनौ शनैः क्षिपेत ॥ अप
रां तेन हस्तेन जननपिंडीं निर्हरेत ॥ एवं निर्हृतशल्यां तां सिंचेदुष्णेन वारिणा ॥ ततोभ्य
क्तशरीरायायोनौ स्नेहं निधापयेत ॥ अथ मकल्लस्य चिकित्सा ॥ संचूर्णितं यवक्षा
रं पिबेत्कोष्णेन वारिणा ॥ सर्पिषा वा पिबेन्नारी मकल्लस्य निवृत्तये ॥ त्रिकटुकचा
तुर्जातककस्तुंबरुहच्चूर्णसंयुक्तं ॥ खादेद्गुडं पुराणं नियतं नारी मकल्लदरणाय ॥ पिप्प
ली पिप्पलीमूलं चामरिचं गजपिप्पली ॥ नागरं चित्रकं चव्यं रेणुकैलाजमोदिका
सर्षपो हिंगु भार्गी च पाठेंद्रयवजीरकाः ॥ महानिंबश्च मूर्वा च विषातिक्तां विडं

॥ ६०० ॥

गकं ॥ पिप्पल्यादिगणो ह्येष कफमारुतनाशनः ॥ गुल्मशूलज्वरहरो दीपनश्चामपाचनः
क्वाथमेषां पिबेन्नारी लवणेन समन्वितं ॥ मक्कल्लशूलगुल्मघ्नं कफानिलहरं परं ॥ इति
पिप्पल्यादिगणः ॥ पिप्पली पिप्पलीमूलं च चव्यं शुंठी यवानिका ॥ जीरके द्वे हरिद्रे द्वे वि
डं सौवर्च्चलं तथा ॥ एतैरेवौषधैः पिष्टैः कल्कनालेन पाचयेत् ॥ आमवातहरं वृष्यं कफ
घ्नं वह्निदीपनं ॥ मक्कल्लशूलशमनं परं क्षीरविवर्द्धनं ॥ इति वंजूकाजिकं ॥ अथ सूति
कारोगनिदानमाह ॥ मिथ्योपचारात् संक्लेशाद्विषमाजीर्णभोजनात् ॥ सूतिकायाः
च ये रोगा जायंते दारुणास्तु ते ॥ १ ॥ मिथ्योपचारात् अनुचिताचरणात् वातादिसे
वनादित्यर्थः ॥ संक्लेशात् संक्लेशयंते उत्क्लेशयंते दोषा अनेनेति संक्लेशो दोषजनन
कमन्नं तस्मात् ॥ विषमाजीर्णभोजनात् विषमभोजनात् अजीर्णभोजनाच्च ॥ दारु ॥ ६०० ॥

नि

रुगणाः कृछ्रसाध्याः ॥१॥ केते व्याधय इत्याकांक्षायामाह ॥ अंगमर्दो ज्वरः कंपः पिपासा गु
रुगात्रता ॥ शोथः शूलातिसारौ च सूतिकारोगलक्षणं ॥२॥ सूतिकारोगलक्षणमिति
एतेंगमर्दादयः सूतिकायामभवंतः ॥ सूतिकारोगत्वेन लक्ष्यंत इत्यर्थः ॥२॥ अथ ज्वरादी
नां रोगविशेषाणां दोषानाविशेषमाह ॥ ज्वरातिसारशोथाश्च शूलानाहबलक्षयाः
तंद्रारुचिप्रसेकाद्या वातकफसमुद्भवाः ॥३॥ कृछ्रसाध्या हि ते रोगाः क्षीणमांसबला
ग्नितः ॥ ते सर्वे सूतिकानाम्ना रोगास्ते चाप्युपद्रवाः ॥४॥ ते सर्वे सूतिकानाम्ना इ
ति सूतिकाभवत्वेन सूतिकानाम्ना ते रोगाः अप्रधानीभूतयोरभेदोपचारात ॥ ते चा
प्युपद्रवा इति तरञ्ज्वरादयउक्तानां रोगाणामन्यतमं प्रधानीकृत्योपद्रवाः ज्ञेया ॥४॥
अथ सूतिकारोगचिकित्सा ॥ सूतिकारोगशांत्यर्थं कुर्यात्तद्धातहरीं क्रियां ॥ दशमूल

॥ ६०१ ॥

कृतं क्वाथं कोष्णं दद्याद्घृतान्वितं ॥ सो हन्ति वर्धितं मद्यं गौडं छागं पयोऽथवा ॥ हेमन्तिवीपि
तं सूतिकामपेक्षीपतेद्बुधैः ॥ इति योगद्वयं ॥ दशमूलीशृतं तोयं कणचूर्णं पिप्पलीयुतं ॥
पीतं तत्सूतिकारोगमुग्रमपि क्षंतति ॥ इति दशमूलक्वाथः ॥ संयोजितो दलितयाक
लयाकयोष्णो निर्गुंडिकाल्पमुत्पलागरजः कषायः ॥ पीतो निहंति कफमारुतकोप
जातं सूत्यामयं सकलमेव सदुस्तरं च ॥ इति निर्गुंडीादिक्वाथः ॥ देवदारुवचाकुष्ठं।
पिप्पली विश्वभेषजं ॥ कट्फलं मुस्तं भूनिंबतिक्ताधान्यहरीतकी ॥ गजकृष्णा च
दुस्पर्शो गोक्षुरो धन्वयासकः ॥ बृहत्यतिविषा छिन्ना पर्पटं कुहमगीरकं ॥ समभा
गान्वितैरेतैः सिंधुरामठसंयुतैः ॥ क्वाथमष्टावशेषं तु प्रसूतां पाययेत्स्त्रियं ॥
शूलकासज्वरश्वासमूर्च्छाकंपशिरोर्तिभिः ॥ युक्तं प्रलापतृड्दाहतंद्रातीसा ॥ ६०१ ॥

रिणां तथा ॥ निहंति सूतिकातंकं वातपित्तकफान्वितं ॥ इति देवदार्वादिक्वाथः ॥ लवंग
श्टङ्गदशमूलभार्गीमहौषधं पुष्करमूलतथाह्नी ॥ भूनिंबमुस्तं गजपिप्पलीचव्यंगो
सठीचित्रकत्रायमाणं ॥ रास्नाचापिप्पलिदेवदारुकलशिकावत्सकवासकंच
एषां लवंगादिकनामधेयः क्वाथः सकृत्शीतविनाशनश्च वातभूमंशूलवात
भूमंशूलमरोचकंचज्वरं तथाशूलमपस्मरंच ॥ प्रसूतिकारोगमथाखिलंचनि
हंति योगः कथितो हितोयं ॥ इति लवंगादिक्वाथः ॥ मरिचंपिप्पलीशुंठीपवक्षारो
तिपूतिका ॥ कूष्मांडीयाहिजः क्षारो भार्गीचशतपुष्पिका ॥ अषांयशेषितः क्वाथः
रातचूर्णसमन्वितः ॥ प्रसूतसमयेजातं रोगंहंति निषेवितः ॥ इति मरिचादिक्वा
थः ॥ अमृतानागरसहचरभद्रोत्कटपंचमूलजलदजलं ॥ शृतशीतमधुस

॥ ६०२ ॥

हितं निवारयति सूतिकारोगं इति अमृतादिक्वाथः ॥ पिप्पली पिप्पलीमूलं चित्रको
हस्तिपिप्पली ॥ यवाजयान्यौ हैमद्रुमुस्ता च मधुना सह ॥ लिह्यात्सत्य दिनं सूतीश्च
रक्तासससमन्वितान् ॥ नाशयेत्सर्वरोगाश्च प्रीतपित्तसमुद्भवान् ॥ इति पिप्पल्यादि
चूर्णं ॥ सहचरकुलत्थपुष्करदारुनिशादारुवेतसक्वाथः पीतः सहिंगुलवणोऽपम
पतिश्शूलश्चरौ सूत्याः ॥ इति सहचरादिक्वाथः ॥ जीरकं हपुषाधान्यं शताह्वा वदा
लीच ॥ यवानीमेथिका हिंगुपत्रिका काशमर्दकं ॥ पिप्पली पिप्पलीमूलं अज
मोदा सयाधिका ॥ चित्रकं चपलं धान्यं नितथा चैव च चतुःपलं ॥ कसेरु तगरं कुष्ठं
तथा नागरमेव च ॥ गुडस्याद्विशतं दद्यात् घृतप्रस्थं तथैव च क्षीरद्विप्रस्थसंयु
क्तं शनैर्मृद्वग्निना पचेत् ॥ पंचजीरक इत्येषः सूतिकानां प्रशस्यते ॥ गर्भार्थिनी

॥ ६०२ ॥

नोनारीणां गर्भदोषस्तनाशकः ॥ विंशतिर्व्याधयो योनेः प्रदरासंकासंक्षयं तथा ॥ हती
मकं पांडुरोगं दौर्गंध्यं मूत्रकृछ्रतां ॥ हंति पीतोन्नतकुचाः पद्मपत्रायतेक्षणाः ॥
उपयोगात् स्त्रियो नित्यमतक्षीमतवर्जितः ॥ इति चंचाजीरकावलेहः ॥ नागरस्य
पलान्यष्टौ घृतस्य पलविंशतिं ॥ क्षीराढकेन संयुक्तां खंडस्यार्द्धतुलां पचेत् ॥ प्रस्थाल्प
जीरकव्योषत्रिसुगंधियवानिका ॥ ग्रंथिकं कृष्णजीरं च मधुकं च विडंगकं ॥ त्वचं गं
धान्यकं चासातालीसं नागकेसरं ॥ काश्चीमिशिश्च व्याघ्रि मुस्तानां च पलं पलं ॥
द्राक्षामक्षोडयादामं नारिकेरगरं तथा ॥ चारबीजानि प्रत्येकं निक्षिपेत्पलपंचकं
कर्पूरमभ्रकं लोहं वंगं च ताम्रं शिलाजतु ॥ स्वर्णमाक्षिकमिश्रेतत्प्रत्येकं कर्षसंमि
तं ॥ चूर्णीकृत्य क्षिपेत्तत्र पाणिभ्यां मर्दयेदृढं ॥ ते हि भूतमिदं सिद्धं घृतभांडेति

६०३

धाययेत् ॥ तद्यथाग्निबलं रक्षेत्सूतिकानुविशेषतः ॥ वस्त्वं वरं पंतथा पुष्पवती पतित
नाशनं ॥ वयसः स्थापनं हृद्यं मंदाग्नेर्दीपनं परं ॥ आमवातप्रशमनं सौभाग्यकरमुत्त
मं ॥ मकरध्वजसूतप्रशमनं सूतिकारोगनाशनं ॥ इति सौभाग्यशुंठ्यवलेहः ॥ एकेंदुचंद्रा
नलवार्द्धिकुंभिकलैकभागैः क्रमशो विदध्यं ॥ सूताभ्रगंधोपलतालहरं खवचन्यो पला
भस्म विषं सविषं ॥ प्रसूतिकातेनिलदंतवेधेप्यार्द्रभसा वह्न मनुष्यति ह्यात् ॥ स
र्वांगवेरद्रवरणवहंति सु सन्निपातज्वरमुग्ररूपं ॥ निजानुपानैर्निजपथ्ययोगैः
सर्षोति सारगूहणी गदेषु ॥ प्रतापलंकेश्वरनामधेयो रसः प्रयुक्तो गिरिराजपु
आ ॥ इति प्रतापलंकेश्वरो रसः ॥ आर्द्रहिमफलं पिष्ट्वा कटुतैलं चतुर्गुणं ॥ विपचे
त्घटिकायुग्मं तत्तैलं हेमसुंदरं ॥ दुष्टप्रसवे दशमनं सूतिकादोषनाशनं ॥ इति हे ॥ ६०३ ॥

मसुंदरं तैलं ॥ रसे कनकसंभवे कल्कैस्तैः समापाच्य पेद्याकनकदुग्धिका रजनिनाग

रैः कल्कितैः ॥ इदं कनकसुंदरं भवति दुष्टसंस्वेदजित् ॥ समस्तपवनामयप्रणुद

ने स्वकांतिप्रदं ॥ इति कनकसुंदरं तैलं ॥ अथ गर्भिणीसूतिकानां पथ्यापथ्यमाह

शालयः षष्टिका मुद्गा गोधूमा लाजसक्तवः ॥ नवनीतं घृतं क्षीरं कदली मधुशर्क

रा ॥ कर्पूरं चंदनं द्राक्षा मृदुशय्या हिमोऽनिलः ॥ संतर्पणं प्रियावाचो विहारश्च म

नोहरः ॥ प्रियंकरं चान्नपानं गर्भिणीनां हितं सदा ॥ स्वेदनं वमनं क्षारं कलहं वि

षमाशनं ॥ असात्म्यं नक्तसंचारं शौर्यं च प्रियदर्शनं ॥ अतिव्यवायमायासं भारं

प्रावरणं गुरु ॥ अकालजागरं स्वप्नं कठिनोत्कटकासनं ॥ शोकक्रोधभयोद्वेगं श्र

द्धावेगविधारणं ॥ उपवासाध्वतीक्ष्णोष्णं गुरुविष्टंभिभोजनं ॥ रक्तं विवसनं श्व

६०४

मज्जूपेक्षां मयमामिषं ॥ उत्तानशयनं यच्च स्त्रियो नेच्छंति तत्यजेत ॥ तथा रक्तं श्रुतिं शुद्धिं
यस्मिं मासा सततो यमात ॥ अपथ्यमिदमुद्दिष्टं गर्भिणीनां महर्षिभिः ॥ सूतिका स्त्रिषु
रोगेषु वा तथ्येष्वोद्भवेषु च ॥ तत्र रोगानुकूल्येन पथ्यापथ्यं विनिर्दिशेत ॥ इति सूति
का रोगचिकित्सा ॥ अथ स्तनरोगस्य संप्राप्तिमाह ॥ सक्षीरौ वाप्यदुग्धौ यौ दोषः
प्राप्य स्तनौ स्त्रियः ॥ रक्तं मांसे च संदूष्य स्तनरोगाय कल्पते ॥ १ ॥ अत्रादुग्धावपि स्त
नौ मसूतायां गर्भिण्यां अपि यौ दूष्यौ ॥ यत आह सुश्रुतः ॥ धमन्यः संवृतद्वाराः कं
न्यानां स्तनसंश्रिताः ॥ दोषाविसरणास्तासां न भवंति स्तनामयादूति ॥ दोषावि
सरणाः दोषाणां मविसरणमसंचारो यासु ताः ॥ तासामेव प्रसूतानां गर्भिणी
नां च ताः पुनः ॥ स्वभावादेव विवृता जायंते संभवंत्यत इति ॥ १ ॥ अथ स्तनरोगा ॥ ६०४ ॥

णमतिदेशेन लक्षणान्याह ॥ पंचानामपि तेषां तु हित्वा शोणितविद्रधिं ॥ लक्षणा
नि समानानि बाह्यविद्रधिलक्षणैः ॥ २ पंचानां वातपित्तकफसन्निपातागंतुजानां
आगंतुजस्तु नखैर्गोभिघातेन शस्त्रेण च यो दुष्यः ॥ रक्तजस्यासंभवः स्वभावात्
२ अथ पक्वान्नस्य स्वरूपमाह ॥ रसप्रसादो मधुरः पक्वाहारनिमित्तजः ॥ कृत्स्नदे
हात्तनौ प्राप्तस्तन्यमित्यभिधीयते ॥ ३ ॥ रसप्रसादः रसस्य सारः ॥ ३ अथ पक्वान्न
स्य दुष्टिहेतुमाह ॥ धात्र्याग्नु लघिमिराहारैर्विषमैर्दौर्बलैस्तथा ॥ देहदोषाः प्रकुप्यंति
ततस्तन्यं प्रदुष्यति ॥ ४ अथ दुष्टस्तन्यस्य लक्षणमाह ॥ कषायं सलिलप्लावि
स्तन्यं मारुतदूषितं ॥ कट्वम्ललवणं पीतराजिमत् पित्तसंज्ञितं ॥ ५ कटु तिक्तं ॥ पी
तराजिमत् पीतैरेखायुक्तं ॥ पित्तसंज्ञितं पित्तदुष्टमिति संज्ञितं ॥ ५ कफदुष्टं

॥ ६०५ ॥

घनं तोयेनिमज्जतिसुपिच्छलं दृढजंतुद्विलिंगंस्यात्त्रिलिंगंसान्निपातिकं ॥ ६ ॥ अथपाण्डुस्यलक्षणमाह ॥ नीरेस्तन्यंपदैकीस्यादविवर्णमतेतुवृत ॥ पांडुरंतनुशीतंच तद्दुग्धंपाण्डुमादिशेत ॥ ७ ॥ अथचिकित्सा ॥ शोधयस्तनोत्थितमेवेक्ष्य भिषग्विदध्याद्विदृधावभिहितंवहुधाविधानं ॥ आमेविदाहिनितथैवचपाककालेयस्यास्तनौसततमेवचनिर्गहीतौ ॥ पित्तघ्नानितुशीतानिद्रव्याण्यत्रप्रयोजयेत जलौकाभिहरेदृक्तंनस्तनाउपनाहयेत ॥ नउपनाहयेतनस्वेदयेत ॥ तेपोविशालामूलेनहंतिपीडांस्तनोत्थितां ॥ निशाकेनककल्कोभ्यातेयः प्रोक्तस्तनार्तिहा ॥ कनककाथ्येनाथधतूरपत्रंग्राह्यं ॥ तेपान्निहंतिमूलंस्तनरोगंवंध्यकर्कोट्याः ॥ निर्वाप्यतप्तलोहंसलिलेतद्दापिवेत्तथा ॥ गोपीचकीदाहक्रिरातम् ॥ ६०५ ॥

शीतिकाम्रतां विष्णुघनेंद्रजानां ॥ क्वाथोपयुक्तो मृगलोचनानां दुष्टस्य दुग्धस्य विशोध
नाय ॥ चक्रीपाठा ॥ इति सारिवादिक्वाथः ॥ आमलकामृतानिंबपटोलीत्रिफलान्वि
तं ॥ गुडूचीरपि पिबेत्क्वाथमाशु स्तन्यविशुद्धये ॥ इति आमलक्यादिक्वाथः ॥ शालिचू
र्णीसुसंपीतः क्षीरेणादिवसत्रयं ॥ क्षीरान्नाभिरतानां च नारीणां क्षीरदः स्मृतः ॥
विदारीभक्ष्यपिल्वाचसजीर्लैंप्रमदास्त्वहं ॥ क्षीरेणान्नं समश्नीयात्सम्यक् क्षीर
विशुद्धये ॥ अपत्यनाशप्रभवो निहंति स्तन्यव्यथामाशु कृते प्रलेपे ॥ स्त्रीणां हरिद्रा
सहितं कुमारीमूलं विशल्याप्रभवं च दत्तं ॥ इति स्तनरोगचिकित्सा ॥ इति स्त्रीरोगचि
कित्सा ॥ अथ बालरोगनिदानं ॥ बालग्रहा अनाचारात् पीडयंति शिशुं यतः ॥ त
स्मात्तदुपसर्गेभ्यो रक्षेद्बालं प्रयत्नतः ॥ १ अथ बालग्रहाणां नामान्याह ॥ स्कंद

६० ही ॥

गृहस्क प्रथमः स्कंदापस्मार एव च ॥ शकुनी रेवती चैव पूतना गंधपूतना ॥ २ पूतना
शीतपूर्वा च तथैव मुखमंडिका ॥ नवमो नैगमेषश्च प्रोक्ता बालगृहा अमी ॥ ३ ॥ अ
थ गृहजुष्टानां बालानां सामान्यं लक्षणमाह ॥ क्षणादुद्विजते बालः क्षणात्त्रस्या
ति रोदिति ॥ नखैर्दंतैर्दारयति धात्रीमात्मानमेव च ॥ ४ ॥ ऊर्ध्वं निरीक्षते दंतान्खा
दन्कूजति जृंभते ॥ भ्रुवौ क्षिपति दष्टौष्ठः फेनं वमति चासकृत् ॥ ५ ॥ क्षामो ति नि
क्षि जागर्ति शूनांगो भिन्नविट्स्वरः ॥ मांसशोणितगंधश्च नयोश्नाति यथापु
रा ॥ ६ ॥ दुर्बलो मलिनांगश्च नघसेत्तो विजायते ॥ सामान्यं गृहजुष्टानां लक्षणं स
मुदाहृतं ॥ ७ ॥ उद्विजते विक्लवो भवति ॥ कूजति आर्तनादं करोति ॥ भिन्नवट्स्वरः
भिन्नविट् भिन्नमलः भिन्नस्वरः स्वरभेदवांश्च ॥ मांसशोणितगंधिः विस्रगं ॥ ६० ही ॥

धिः ॥ पथ्यं पूर्ववत् ॥ ४॥५॥ ६॥७ ॥ अथ ग्रहजुष्टानां बालानां विशिष्टानि लक्ष
णान्याह ॥ एकनेत्रस्य गात्रस्य स्रावः स्पंदनकंपनं ॥ अर्द्धदृष्ट्या निरीक्षेत वक्त्रा
स्यो रक्तगंधिकः ॥ ५ ॥ दंतान् खादति वित्रस्तः स्तन्यं नैवाभिनंदति ॥ स्कंदग्रहगृ
हीतानां रोदनं चाल्पमेव च ॥ ६ ॥ एकनेत्रस्य वामस्य ॥ स्रावः स्फूर्तिः ॥ गात्रस्या
स्रावः घर्मयुक्तगात्रता ॥ स्पंदनकंपनमिति स्पंदनं मनाक् चलनं ॥ कंपनं महता
वेगेन चलनं वा ॥ वित्रस्तः उद्विग्नः ॥ ५॥६ ॥ नष्टसंज्ञो वमेत् फेनं संज्ञावान् अतिरो
दिति ॥ पूयशोणितगंधित्वं स्कंदापस्मारलक्षणं ॥ १० ॥ नष्टसंज्ञः मूर्छितः ॥ १०
त्रस्तांगो भयचकितो विहंगगंधिः सास्रावव्रणपरिपीडितः समंतात् ॥ स्फो
टैश्च प्रचिततनुः सदाहपाकैर्विज्ञेयो भवति शिशुः क्षतः शकुन्या ॥ ११ ॥ स्र

॥ ६७ ॥

स्तां गः अंगस्तसनवद्यथायान् ॥ भयचकितः भयहेतुर्भयं भयानकमुच्यते तत्स्त्र
कितः ॥ असतिभयहेतौ त्रस्यतीत्यर्थः विहंगगंधिः विहंगस्येव गंधो यस्य सः तथा
अत्र विहंगशब्देन जलचरमांसं गृह्यते ॥ विस्रगंधित्वात ॥ तत्रोतरेप्यक्तं ॥ त्र स्तां
गो विस्रगंधः स्यात् शकुन्यापीडितः शिशुरिति ॥ साक्षाद्वज्रेणपरिपीडितः स्फोटै
रेव विहितैः ईर्ष्यालहपता मापन्नैः परिपीडितः ॥ स्फोटैश्च प्रचित तनुः नवनवैः स्फो
टैर्व्याप्ततनुः ॥ स्रुतः अभिभूतः ॥ ११ ॥ ग्रन्थौः स्फोटैश्चितं गात्रं पंकगंधश्चाप्येद स्रक
भिल्लवच्चैव रोदाहीरिवृतीगृहलक्षणं ॥ १२ ॥ ग्रन्थौः पुराणैः स्फोटैर्नवैः ॥ चितं
व्याप्तं गात्रं कर्तृ पंकगंधं कर्दमगंधं असृक् रुधिरं स्रावेत ॥ भिल्लवच्चैव भिल्लविट्
१२ ॥ अतीसारोज्वरस्तृष्णा तिर्यक्प्रेक्षणरोदनं ॥ नवनिद्रस्तपोद्विग्नो गृहस्तः ॥ ६ ॥

॥ ६७ ॥

तनयाशिशुः ॥१२॥ गृह्णातः गृहीतः ॥१३॥ छर्दिः कासो ज्वरस्तृष्णा च सामगंधो तिरोदनं ॥ स्त
न्यद्वेषोतिसारः स्यात् गंधपूतनया भवेत् ॥१४॥ वेपते कासते क्षीणः क्षीरोगो नेत्ररोगो वि
गंधिता ॥ छर्द्यतीसारयुक्तश्च शीतपूतनया शिशुः ॥१५॥ प्रसन्नवर्णवदनः शिरा
भिरावृतसंवृतः ॥ मूत्रगंधी सुबह्वाशी मुखमंडितिका गृहे ॥१६॥ छर्दिः स्वेदनकंठा
स्यशोषमूर्छाविगंधिताः ऊर्ध्वविस्पंदशोर्द्धंतान् नैगमेयं गृहं वदेत् ॥१७॥ अथवा
तरोगाणां निदानानि लक्षणानि चाह ॥ मिथ्याहारविहाराभ्यां दोषा वातादयस्त्रि
यः ॥ दूषयंति पयस्तेन जायंते व्याधयः शिशोः ॥१८॥ वातदुष्टं शिशुस्तन्यं पिबन्
वातगदातुरः ॥ क्षामस्वरः कृशांगः स्याद्बद्धविण्मूत्रमारुतः ॥१९॥ वातगदातुरः च
क्ष्यमाणलक्षणैः क्षामस्वरादियुक्तः ॥१९॥ स्विन्नो भिन्नमलो वातः कामलापित्तरोगवान्

॥६०८॥

ने॥ तस्मात्तु रक्तसर्वांगः पित्तदुष्टं पयः पिबन्॥२०॥ तस्मात्तु स्तन्यमायाति॥२०॥ प्रदोष

दुष्टं पिबन्क्षीरं तालात्तु प्रदोषात्रोगवान्॥ निद्रार्द्दितो जडः प्लुनो वक्त्रात्स्रवः छर्दनः

शिशुः॥२१॥ तालात्तुः तालावान् छर्दनः स्तन्यशांतिकरः॥२१॥ अथ शिशोर्वक्तुम

क्षमस्यांतर्गतवेदनाज्ञानोपायमाह॥ शिशोस्तीव्रामतीव्रां च रोदनाद्वक्ष्यद्रुजं

प्रोतांस्वंगानि संधीश्च पश्येद्दतान्मुहुर्मुहुः॥२२॥ तीव्रां रुजं च मुहुरोदनात॥ अतीव्राम

ल्परोदनांत॥२२॥ ज्वराद्याव्याधयः सर्वे महतां ये प्रकीरिताः॥ बालानामपि ते तद्वद्बो

द्धव्याभिषग्वत्तमैः॥२३॥ बालानामेव ये रोगा जायंते महतां न च॥ तालुकंटकमुख्यांस्ता

न्वधारयपल्लतः॥२४॥ तत्रादौ तालुकंटकस्य तल्लक्षणमाह॥ तालुमांसे कफः क्रुद्धः

कुरुते तालुकंटकं॥ तेन तालुप्रदेशस्य निम्नता मूर्द्धि जायते॥२५॥ तालुपातः स्तनद्वे

६०८॥

षः कण्ठास्यान्तेप्यश्नुद्भवं ॥ तडुक्षिकंठस्य लक्षणमाह ग्रीवादुर्धरता च मिः ॥ २६ ॥ तालुपातः तालुनः
पातः संक्षयः पानेस्तनपानां पत्यक्षद्भवं मिल्लगुरीषता ॥ ग्रीवादुर्धरता मूर्धा यापादुःखे
नधारणं ॥ चमिः स्तन्यस्य पातिः ॥ २६ ॥ अथ महापद्मस्य लक्षणमाह ॥ विसर्पस्तु शि
शोः प्राणनाशनः शीर्षवस्तिजः ॥ पद्मवर्णो महापद्मो दोषजे [illegible] त्रयोद्भवः ॥ शं
खाभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत ॥ २७ ॥ शीर्षविस्तारः ॥ पद्मवर्णः लोहितपद्मवर्णः
तत्र शीर्षजो विसर्पः शंखाभ्यां हृदयं याति हृदयाच्च गुदं व्रजेत ॥ एवं वस्तिजो गुदं याति
गुदात् हृदयं हृदयात् शिरो याति इति बोद्धव्यं ॥ २७ ॥ अथ कुकूणकस्य लक्षणमाह ॥
कुकूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि ॥ जायते नेत्रे कंडूरं मुजा चैन्मुहुः ॥ २८
शिशुः कुर्याल्ललाटाक्षिकूटनासावघर्षणं ॥ शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मील

॥ ६०८ ॥

नक्षमः॥२७ कुकूणकं कोथुआर इति लोके॥ अवेन्मुकुरिति विद्धूटञ्जतिवुक्तं भवतीत्यर्थः
२८॥२९॥ अथ तुंडिगुदपाकयोर्लक्षणमाह॥ वातेनाध्मायिता नाभिः सरुजा तुंडिरुच्य
ते॥ यास्य गुदपाकाख्यो व्याधिः पित्तेन जायते॥ ३०॥ अथाहिपूतनमाह॥ शकृन्मू
त्रसमायुक्ते धौते पायौ शिशोर्भवेत्॥ स्विन्ने वास्नाप्यमाने वा कंडूरक्तकफोद्भवा॥ ३१
कंडूयनात्ततः क्षिप्रं स्फोटः स्रावश्च जायते॥ एकीभूतं व्रणैर्घोरं तं विद्यादहिपूतनं
३२ स्विन्ने स्वेदयति॥ ३१॥३२॥ अथाजगल्लिकालक्षणमाह॥ स्निग्धा सवर्णा ग्र
थिता नीरुजा मुद्गसन्निभा॥ कफवातोत्थिता ज्ञेया बालानामजगल्लिका॥ ३३ ग्रथि
ता ग्रंथिकेतेव॥ मुद्गसन्निभा मुद्गाकृतिः॥ ३३॥ अथ पारिगर्भिकस्य लक्षणमाह॥
मातुः कुमारो गर्भिण्याः स्तनं प्रायः पिबन्नपि॥ कासाग्निसाद वमथुतंद्राकार्श्य ६०८॥

रुचिभूमैः ॥ २४ ॥ उच्यते कोष्ठव्युत्पायतमाहुः पारिगर्भिकं ॥ रोगं परिभवाख्यं च तत्र
युंजीत दीपनं ॥ २५ ॥ पिप्पल्यादीन्यपि पाठाद्दपिप्पल्यपि ॥ परिभवाख्यमिति अस्यै
व नामांतरं ॥ उपशायेनापितस्य स्नानमाह तत्र युंजीत दीपनमिति ॥ २५ ॥ अथ दं
तोद्भेदजान्रोगानाह ॥ दंतोद्भेदः शिशोः सर्वरोगाणां कारणं स्मृतं ॥ विशेषाज्ज्वर
विड्भेदकासच्छर्दिशिरोरुजां ॥ अभिष्यंदस्य पोथक्या विसर्पस्य च जायते ॥ २६ ॥
जायते कारणमित्यन्वयः ॥ पोथक्या वर्त्मरोगविशेषस्य ॥ २६ ॥ इति बालरोगनि
दानं ॥ अथ बालरोगचिकित्सा ॥ अथ ग्रहजुष्टानां बालानां सामान्यं चिकित्सामाह
महामुंडि इति कोशिव्यष्टाप्य स्नानं ग्रहापहं ॥ महामाषपर्णी ॥ इति स्नानं ॥ सप्तच्छ
दामयनिशाश्चंदनैश्च विलेपनं ॥ इति विलेपनं सर्पत्वक्लशुनं मूर्वा सर्षपारि

६१०

रपहन्यैरथः॥ विडंगचित्रकालोमममेषप्यंगोवचामधु॥ धूपः शिरीषोर्क्यरहणोवमकौषगु
हनीगनः॥ इतिधूपः॥ वचाकुष्ठंतथाचासौ सिद्धार्थकमथापिच॥ सारिवासैंध
वंचैवपिप्पलीघृतमष्टमं॥ सिद्धंघृतमिदंमेध्यंपिबेल्पातदिनेदिने॥ ६८ स्मृति
क्षिप्रमेधाकुमारोबुद्धिमानभवेत्॥ नपिशाचानरक्षांसिनभूतानचमातरः॥
प्रभवंतिकुमारस्यपिबतामष्टमंगलं॥ इत्यष्टमंगलंघृतं॥ सप्तोकिरातसिद्धार्थ
मूर्वामुस्तोपकुंचिका श्वेताक्षिरिवद्वत्वेषांश्वागोक्षीरेणतैलपक्वं॥ ज्वरदाहयमी
रोकरक्षः तस्माज्जानं शिशोः॥ इत्यष्टमंगलमुंद्धर्तनं॥ ताक्षारससमंसिद्धंतैलं।
मस्तुचतुर्गुणं॥ रास्नाचंदनकुष्ठाब्दवाजिगंधानिशायुतैः॥ श्रताक्काथरूषष्टा
क्वामूर्वीतिक्ताहरेणभिः॥ रास्नांजनंज्वररक्षोघ्नमभ्यंगायतथैवलीकृते॥ इतिला

६१०

क्षादितैलं ॥ कार्पासास्थिमयूरपिच्छबृहतीनिर्माल्यपिंडीतकत्वक्मांसीवृषदंशवि
ष्पतुषवचकेशाहिनिर्मोककैः ॥ नागेंद्रद्विजहिंगुश्रृंगमरिचैस्तुल्यैः कृतं धूपनं ॥
कृत्वोन्मादपिशाचराक्षससुरावेशग्रहघ्नः परः ॥ निर्माल्यं शिवनिर्माल्यं ॥ पिंडीतकः
मदनफलं ॥ वृषदंशो मार्जारः केशा मार्जारस्यैव ॥ नागेंद्रद्विजो हस्तिदंतः ॥ इति माहे
श्वरो धूपः ॥ यत्रिफलं तिलकमौलिकायां लिंगद्वयांतये ॥ चिकित्स्य ग्रहचिकित्सा
तु भावप्रकाशादिग्रंथेभ्योऽवगंतव्या ॥ अथ बालानां ज्वरादिचिकित्सा ॥ भेषजं पू
र्वमुद्दिष्टं महतां यज्ज्वरादिषु ॥ तदेव कार्यं बालानां किंतु दाहादिकं विना ॥ दाहादिकं
विनेत्यग्न्यादिशब्देन क्षारवमनविरेचनादिरुध्यधादिकं ग्राह्य ॥ महाकष्टे चाल्पैने
तु वमनविरेकादि दद्यात् तदुक्तं सुश्रुते ॥ विरेकवस्तिवमनान्युद्धृते कुर्याच्च नात्य

॥ ६॥

यादिति ॥ अम्लयादिनाशकरकषायात् ॥ तरुणदोषाद्व्याज्जलज्वरे यान्यायाधयुज्यते ॥ अतस्त्व
देवमैषज्यं मात्रात्यल्पकनीयसी ॥ अल्पवान्नकस्य कनीयसी मात्रा माह ॥ विडंगफल
मात्रं तु मात मात्र स्वभेषजं ॥ मासे मासे प्रयोक्तव्यं विडंगानां विवर्द्धनं ॥ अस्याहद्वंद्वं किमा
त्तरागं दद्यात्कोत्ता स्थिमात्रकं ॥ क्षीरान्नादेविष्णौ कोतमन्नादेतुउदंचरं ॥ क्षीरादसौष
धं धात्र्याः क्षीरान्नादस्य चोभयोः ॥ यथायोग्यं स्तनौ सिद्धा भैषज्यं पाययेच्छिशुं ॥
मात्रया लेपयेद्धात्र्यां श्लिष्टस्तनौ त्रिविशेषणं ॥ सर्वं निवार्यते यासे स्तन्यं नैव निवार्य
ते ॥ स्तन्याभावे पयः छागं गव्यं यातद्गुणं भवेत् ॥ भद्रमुस्ताभयानिंबयवटोलमधुकै
कृतः ॥ क्वाथः कोष्णः शिशोर्दोष निःशेषज्वरनाशनः ॥ इति भद्रमुस्तादिक्वाथः ॥ प
नं कल्हारहरणाग्नं गीचूर्णयित्वौद्रेणावलेपितं ॥ शिशोर्ज्वरातिसारघ्नं कासश्वासवमी ॥ ६॥

हरेत ॥ ग्रहण्यांग्रतिविषा ॥ इतिचातुर्भद्रिका ॥ बिल्वंचपुष्पाणिचधातकीनांजलं

सलोध्रंगजपिप्पलींच ॥ क्वाथावलेहौमधुनाविमिश्रौबालेषुयोज्यावतिसारिते

षु ॥ इतिबिल्वादिक्वाथावलेहौ ॥ विडंगान्यजमोदाचपिप्पलीतंदुलानिच ॥ एषामा

लोड्यचूर्णानिसुखतप्तेनवारिणा ॥ सामेप्रवर्ततेनीसारेकुमारंपाययेद्भिषक् ॥ इ

तिवीडंगादिचूर्णं ॥ लाजाःसयष्टीमधुकंशर्कराक्षौद्रमेवच ॥ तंडुलोदकयोगेन

क्षिप्रंहंतिप्रवाहिकां ॥ इतिलाजादिचूर्णं ॥ रजनीसरलोहैंःदारुबृहतीगजपिप्प

ली ॥ पृश्निपर्णीशताह्वाचलीढंमाक्षिकसर्पिषा ॥ दीपनंग्रहणींहंतिमारुतार्ति

सकामलां ॥ ज्वरातीसारपांड्वर्तीबालानांसर्वरोगनुत ॥ इतिरजन्यादिचूर्णं ॥ शृं

गीकणावोप्पविषाययासचूर्णैःशिशूनामतिकासहारी ॥ क्षौद्रेणधृंगोचा

यो

॥ ६१२ ॥

पत्रायुता वा विषातुकासज्वरं यांति हंत्री ॥ इति त्रैगोत्रयं ॥ व्याघ्रीकुसुमसंजातकेसरै
रवलेहिता ॥ मधुना चिरसंजातानपि हिक्काश्वासकासान्व्यपोहति ॥ इति कंटकारीकुसुम
केसरावलेहिका ॥ धान्यं शुंठ्यर्करसायुक्तं तंदुलोदकसंयुतं ॥ पानमेतत्प्रदातव्यं का
सश्वासापहं हिक्काश्वासः ॥ इति धान्यादिपानं ॥ द्राक्षावासाभयाकृष्णाचूर्णं क्षौद्रेण
सर्पिषा ॥ लीढं श्वासं निहंत्याशु कासं च तमकं हिक्काश्वासः ॥ इति द्राक्षादिचूर्णं ॥ तुगा
चक्षौद्रसंलीढा कासश्वासौ हिक्काश्वासं जयेत ॥ इति तुगाचूर्णं ॥ चूर्णं कटुकरोहिण्या
मधुना सहयोजयेत ॥ हिक्कां प्रशमयेच्छीघ्रं छर्दिं चापि चिरोत्थितं ॥ इति कटु
कीचूर्णं ॥ आम्रास्थिलाजासिंधूत्थं सक्षौद्रं छर्दिनुद्भवेत ॥ इति आम्रास्थ्यादि ॥ ६१२ ॥
चूर्णं ॥ अथवा त्रिफलाचूर्णमेकं छर्दिं जयेच्छिश्वासः ॥ इति त्रिफलाचूर्णं

पीतंपीतंवमेद्यस्तुस्तन्यंतंमधुसर्पिषा ॥ द्विवार्ताकीफलरसंपंचकोलंचसैहयेत्

इतिवृहतीद्वयफलस्वरसपानं ॥ हिवेशर्कराक्षौद्रं स्त्रीठंतेस्माहरंपरं ॥ इतिहिवे ।

रायवस्तेहः ॥ घृतेनसिंधुविश्वैसाहिंगुभार्गीरजोलिहन् ॥ श्वासानाहंयातिकंप्लुतं

हन्यातोयेनवाशिग्रुः ॥ इतिसैंधवाद्यंचूर्णं कलोचरणांसिताक्षौद्रस्सूक्ष्मैला

सैंधवैः कृतः ॥ मूत्रग्रहेप्रयोतव्यः शिरोप्तवांतेहत्तमः ॥ इतिकरणादिचूर्णं ॥ य

यातुदुर्वलोयातोखादन्नोपिचयन्हिमान् ॥ विदारीकंदगोधूमयवचूर्णंघृतहु

तं ॥ खादयेत्तदनुक्षीरंघृतंसमधुशर्करं ॥ इतिकार्श्ये ॥ मुस्तंकूष्मांडबीजानिम

द्रदारूकलिंगकान् ॥ पिष्ट्वातोयेनसंतिपेच्छ्वेषोपंक्षोपहृच्छिशोः ॥ इतिशोथे

पटोलत्रिफलारिष्टहरिद्राक्वथितंपिवेत् ॥ क्षतवीसर्पविस्फोटज्वरलूतांशां

॥ ६१३ ॥

तपेच्छिशुः ॥ इति पटोलादिघृतं स्तनादिषु ॥ गृहधूमनिशाकुष्टराजिकेंद्रयवैः शिशोः
लेपस्तक्रेण हंत्याशु सिध्मपामाविचर्चिकाः ॥ इति गृहधूमादिलेपः सिध्मादिषु
सारिवातितरोध्राणां कषायो मधुकस्य च ॥ संस्राविति मुखे शस्तो धावनार्थं शि
शोः सदा ॥ इति मुखपाके ॥ पिप्पली त्रिफलाचूर्णं घृतक्षौद्रपरिप्लुतं ॥ वालो रो
दिति यस्तस्मै लेहं दद्यात्सुखावहं ॥ इति रोदने ॥ हरीतकी वचाकुष्टकल्कं माक्षि।
कसंयुतं ॥ पीत्वा कुमारस्तन्येन मुच्यते तालुकंटकात् ॥ इति तालुकंटके ॥ फलत्रिकं
लोध्रपुनर्नवे च सशृंगवेरं वृहतीद्वयं च ॥ आलेपनं शोफहरं सुखोष्णं कुक्कू
णके कार्यमुदाहरंति ॥ इति कुक्कूणके ॥ मृत्पिंडेनाग्नितप्तेन क्षीरसिक्तेन सोष्म
णा ॥ स्वेदयेदुत्थितां नाभिं शोफस्तेनोपशाम्यति ॥ इति नाभिशोथे ॥ नाभिपा ॥ ६१३ ॥

एकमहिन्याचा मूलहोइतोंपर्यंत एकएकवावडिंगाचे चूर्ण मध्यांत यावें आणि दूधपाजा
वे दुसरे महिन्यात २ वावडिंगाचे चूर्ण यावे षाप्रमाणें दरमहिन्यास एकएकवावडि
ग वाढवीत जावे ह्न० कधींच रोग व्हायचा चा नाही

केनिशालोध्रप्रियंगुमधुकैःश्रृतं ॥ तैलमभ्यंजने शस्तमेभिर्वी प्रवमूलनं ॥ दग्धेनच्छा
गशकृता नाभिपाके च चूर्णनं ॥ त्वक्चूर्णैः क्षीरिणां वापि कुर्याच्चंदनरेणुना ॥ इति
नाभिपाके ॥ गुदपाके तु बालानां पित्तघ्नीं कारयेत्क्रियां ॥ रसांजनं विशेषेण पानाले
पनयोर्हितं ॥ शंखयष्ट्यंजनैश्चूर्णं प्रिषिक्तं गुदपाकनुत ॥ अंजनं रसांजनं ॥ इति गुद
पाके ॥ शंखसौवीरयष्ट्याह्वैर्लेपो देयो हि घृतने ॥ रत्न हि घृतने ॥ पारिगर्भिक रोगे तु
युज्यते वह्निदीपनं ॥ इति परिगर्भिके ॥ दंतपालीं तु मधुना चूर्णेन प्रतिसारयेत्
धातकीपुष्पपिप्पल्यो धात्रीफलरसेन च ॥ दंतोत्थानभवा रोगा पीडयंति नेबा

॥६१४॥

तकं ॥ पथ्वी मधुकं दंतस्थाने घर्षयेत् सुखेन दंतोद्गमो भवति ॥ सूक्ष्मैलाबीजवंशलो
चनत्रिखुरीसंगजलहितज्येत खदिरानसंयुक्तैर्बांचूर्णं मुखे क्षिप्तं यालामो
मुखपाकहरं भवति ॥ इति दंतोद्भेदे मुखपाके च ॥ सौवर्णं सुकृतं चूर्णं कुष्ठं मधु
घृतं वचा ॥ एतच्चूर्णं प्राश्नोर्मेधावलपुष्टिकरं स्मृतं ॥ सौवर्णं चूर्णं मारितसुव
र्णभस्म ॥ इति सुवर्णभस्मयोगः पुष्टौ ॥ पादकल्केश्वगंधायाः क्षीरे चतुर्गुणे ते
पचेत ॥ घृतं देयं कुमाराणां पुष्टिकृद्धलवर्द्धनं ॥ इत्यश्वगंधाघृतं ॥ चक्री विडंगो
भयरात्रिभार्गीपुनर्नवश्चघरा विल्वमज्जैः ॥ सवचित्रकालीजलदैर्विपक्वं ॥
सर्पिस्तु मद्रोगहरं प्रदिष्टं ॥ इति चक्र्यादिघृतं ॥ प्रिलाधांखनाभिः केशगतार्क्ष्य
प्रैलं प्राश्नो मीक्षिके रोक्षिरोगे प्रवर्तिः ॥ कुकूलोक्षितपांजने ल्यगच्छ हत्या। ॥६१४॥

स्ततोर्द्धंफलकेनमंजनेनातिशस्ता ॥ इतियोगद्वयं ॥ भृंगराजरसेनाक्तेवस्त्रेसुकृतवर्त्ति
के ॥ तिलतैलांक्तितेकृत्वाकज्जलंतनेचांजयेत ॥ क्रियतेक्ष्णुगेवातस्याक्षिरोगीतेन
जायतां ॥ विमलेस्निग्धकेसूक्ष्मदर्शनेघनपक्ष्मणी ॥ इत्यंजनं ॥ आजादुग्धेनसंपि
बैर्मुस्तादार्वीसुगैरिकैः ॥ वन्हिरातेपनंहंतिक्लिष्टोर्नेत्रामयान्बहून ॥ इतिविडा
लकः ॥ नेत्ररोगे ॥ नागवल्लीदलंगृह्यंगायत्रीचूर्णसंयुतं ॥ पक्कंपिष्ठ्वातद्रसंचष्णु
भृंगपुकनिपीडितं ॥ समादायततस्तस्मिन्यवक्षाररस्यचूर्णकं ॥ क्षिपेद्दल्यंपानतो
स्यकासश्वासादिनाशनं ॥ इतियवक्षारयोजनं ॥ रसंगंधसमंशुद्धंतयोःकृत्वा
चकज्जलीं ॥ लोहदर्व्यांघृताक्तायांकोलांगारेणपाचयेत ॥ गोमयस्यातवालेच
स्थापितेकदलीदले ॥ ढालयेत्पाकविच्छीतासामुग्धा रसपर्पटी ॥ पर्पट्यांहिगु

६१५

णोजीरस्तुर्यांशो रामठः स्मृतः ॥ दीयते मधुना चैषा ग्धिशोर्गुंजाचतुष्टयी ॥ क्षेत्रपि
त्तानिलश्वासकासपीनसपांडुताः ॥ हंत्री हाग्निसादस्य शूलानि हन्यादस्य च रंजया
त् ॥ इति रसपर्पटी ॥ अथ पथ्यापथ्यमाह ॥ यत्पथ्यं यदपथ्यं च नृणां मुक्तं ज्वरादि
षु ॥ तत्तद्विधेयमौचित्याद्बालानां तेषु जानता ॥ पूर्वं पथ्यं च मंदाग्नौ यत्प्रकीर्तितं
औचित्याद्योजयेत्तच्च बालानां पारिगर्भिके ॥ आगंतुव्याधितानां पथ्यमपथ्यं च
यदीरितं ॥ औचित्याद्योजयेत्तच्च बालेषु ग्रहरोगिषु ॥ इति बालरोगचिकित्सा ॥ अ
थ क्लैब्यनिदानं ॥ तत्र क्लैब्यस्य लक्षणं संख्यां चाह ॥ क्लीवः स्यात्सुरताशक्तस्तद्भा
वः क्लैब्यमुच्यते ॥ तच्च सप्तविधं प्रोक्तं भिषग्वर्यैर्विचक्षणैः ॥ १ ॥ अथ तस्य निदा
नमाह ॥ तैस्तैर्भावैरहृद्यैस्तु रिरंसोर्मनसि क्षते ॥ ध्वजः पतत्यतो नृणां क्लैब्यं ॥ ६१५ ॥

समुपजायते ॥ २ ॥ तैस्तैर्भावैः भयशोकक्रोधादिभिः ॥ अहृद्यैः हृदयाहितैः ॥ दुःखदत्वात्
क्षते पीडिते अस्य स्त्रीकृतरतिपावृत ॥ ध्वजः शिश्नः ॥ तस्या च यिश्च प्रकाशः ॥ ध्वजः
शिश्ने यत्ताकायामेहने शौंडिकेपि चेति ॥ पतति न तूल्नमति ॥ २ ॥ आयोक्तां समविधां
संख्यां दर्शयति ॥ द्वेष्यस्त्रीसंप्रयोगाच्च क्लैव्यं तन्मानसं स्मृतं ॥ कटुकाम्ललोस्नलवणै
रतिमात्रोपसेवितैः ॥ पित्ताच्छुक्रक्षयो दृष्टः क्लैव्यं तस्मात्प्रजायते ॥ ३ ॥ संप्रयोगो मै
थुनं ॥ द्वेष्यस्त्रीमैथुनजं मानसमेतत्प्रथमं ॥ कटुकादिनातिमात्रेण प्रवृद्धेन पित्तेन
शुक्रस्य दग्धत्वात् ॥ क्लैव्यं भवति पित्तजमेतद्द्वितीयं ॥ ३ ॥ अतिव्यवायशीलो यो
न च याजी क्रियारतः ॥ ध्वजभंगमवाप्नोति स शुक्रक्षयहेतुकं ॥ ४ ॥ शुक्रक्षयजमेत
त्तृतीयं ॥ ४ ॥ महता मेढ्ररोगेण चतुर्थी क्लीवता भवेत् ॥ वीर्यवाहिशिराछेदान्मेहना

॥९१॥

मेन्नातिर्भवेत् ॥५॥ वीर्य्यवाहीशिराछेदजमेतत्पंचमं ॥५॥ बलिनः क्षुब्धमनसो निरोधा
द्ब्रह्मचर्य्यतः ॥ षष्ठं क्लैव्यं स्मृतं तत्तु शुक्रस्तंभनिमित्तकं ॥६॥ बलिनः पुष्टकायस्य ॥
क्षुब्धमनसः कामात्संचालितमनसः । ब्रह्मचर्य्यतः निरोधात् शुक्रस्येति शेषः ॥६॥
जन्मप्रभृति यत्क्लैव्यं सहजं तद्धि सप्तमं ॥७॥ असाध्यक्लैव्यस्य लक्षणमाह ॥ अ
साध्यं सहजं क्लैव्यं मर्मछेदाच्च यद्भवेत् ॥८॥ मर्मछिदा वीर्य्यवाहिशिराछेदात् ॥८॥ अ
थ नपुंसकविशेषानाह ॥ आसेक्यश्च सुगंधी च कुंभीकश्चेर्षकस्तथा ॥ अमी सशु
क्रा बोद्धव्या अशुक्रः षंडसंज्ञकः ॥९॥ तेषां लक्षणान्याह ॥ पित्रोरत्यल्पबीजत्वा
दासेक्यः पुरुषो भवेत् ॥ स शुक्रं प्राश्य लभते ध्वजोन्नतिमसंशयः ॥१०॥ पित्रोः स्व
ल्पबीजत्वात् स्वल्पशुक्रार्त्तवत्वात् ॥ आसेक्यः आसेक्यनामा मुखयोनिरिति ॥९१॥

नामांतरः ॥ स्वशुक्रं प्राश्येति सः पुरुषोन्यपुरुषेण स्वमुखे मैथुनं कारयित्वा तस्य शुक्रं प्रा
श्य मेहनोत्थानं लभत इत्यर्थः ॥ १० ॥ यः पूतियोनौ जायेत स हि सौगंधिको भवेत् ॥ स योनि
शेफसोर्गंधमाघ्राय लभते बलं ॥ ११ ॥ सौगंधिकः सौगंधिकनामा ॥ नासायोनीति नामां
तरः ॥ बलं मैथुने शक्तिं ॥ ११ ॥ स्वगुदे ब्रह्मचर्याद्यः स्त्रीषु पुंवत्प्रवर्त्तते ॥ स कुंभीक इति
ज्ञेयो गुदयोनिः प्रकीर्त्तितः ॥ १२ ॥ अब्रह्मचर्यान्मैथुनात् ॥ १२ ॥ दृष्ट्वा व्यवायमन्येषां व्य
वाये यः प्रवर्त्तते ॥ ईर्ष्यकः स तु विज्ञेयो दृष्टियोनिः प्रकीर्त्तितः ॥ १३ ॥ यो भार्यायामृतौ
मोहादंगनेव प्रवर्त्तते ॥ ततः स्त्रीचेष्टिताकारो जायते षंडसंज्ञकः ॥ १४ ॥ स्त्रीचेष्टिता
कारः स्त्र्याकारः श्मश्रुरहितः स्त्रीचेष्टितः समेहनोपि पुरुषशक्तिरहितः ॥ किंतु स्त्री
अथ षंडस्त्रीया निरूपणं ॥ ऋतौ पुरुषवद्यापि प्रवर्त्तेतांगना यदि ॥ तत्र कन्या यदि भवेत्सा भवेन्नरचेष्टिता

॥ ६१७ ॥

यदधोमूत्रःस्वेग्देपुरुषांतरेणमैथुनंकारयतीत्यर्थः ॥ १४ ॥ इतिक्लैब्यनिदानं ॥ अथक्लै
ब्यचिकित्सा ॥ नरोवाजीकरणान्योगान्सम्यक्छुद्धोनिरामयः ॥ ससत्वंतंप्रकुर्वीतवर्षा
दूर्ध्वंतुषोडशात् ॥ नचवैषोडशादर्वाक्सप्तत्याःपरतोनच ॥ आयुःकामोनरःस्त्रीभिः
संयोगंकर्तुमर्हति ॥ क्षयवृद्ध्युपदंशाद्यारोगाःस्युरतीवदुर्जयाः ॥ अकालमरणंचस्या
दन्यथागच्छतःस्त्रियं ॥ सम्यक्छुद्धः पंचकर्मविशुद्धः ॥ पंचकर्माण्यत्रपाचनस्नेहन
स्वेदवमनविरेचनानि ॥ तदुक्तं ॥ पाचनंस्नेहनंस्वेदोवमनंरेचनंतथा ॥ एतानिपंच
कर्माणिज्ञातव्यानिभिषग्वरैरिति ॥ पंचकर्मासहनेकेवलविरेचनेनैवशुद्धोभवे
त् ॥ तदुक्तं ॥ पंचकर्मभयत्रस्तैःसुकुमारैर्नरैरिह ॥ रेचनांतेइदंसेव्यंषंडत्वविनि
वृत्तयेइति ॥ अन्यथागच्छतःस्त्रियमितित्रिभिस्त्रिभिरहोभिस्तुसमेयादल्पमदं ॥ ६१७ ॥

नरः ॥ सर्वेष्वृतुषु घर्मे तु पक्षात्पक्षाद्व्रजेद्बुधः इत्यादि विधिमतिक्रम्य स्त्रियं भजतः ॥ चिंता
सितामर्थयतां रूपयौवनशालिनीं ॥ नराणां बहुभार्याणां विधिर्वाजीकरो हितः ॥ स्थवि
राणां रिरंसूनां स्त्रीणां वाल्लभ्यमिच्छतां ॥ योषित्प्रसंगक्षीणानां क्लीबानामल्परेतसां
हिता वाजीकरा योगाः प्रीत्यपत्यबलप्रदाः ॥ एतेपि पुष्टदेहानां सेव्याः कालाद्यपेक्ष
या ॥ अथ वाजीकरणस्य लक्षणमाह ॥ यथा वाजी महोन्मत्तो धावेत्तेवउद्यासनं ॥ तथा
नारीर्नरस्तेन वाजीकरणमुच्यते ॥ अथ धारोष्णदुग्धविधि ॥ शर्कराचूर्णसंसृष्टे दो
हनस्थे घृते तु गां ॥ दुग्ध्वा क्षीरं पिबेदुष्णं सपयः स्नेहनमुच्यते ॥ अथ वाजीकरणमाह ॥
भोजनानि विचित्राणि पानानि विविधानि च ॥ वाचः श्रोत्राभिरामाश्च त्वचः स्पर्श
सुखावहाः ॥ यामिनी सेंदुतिलका कामिनी नवयौवना ॥ गीतं श्रोत्रमनोहारि तांबू

॥ है १८ ॥

रं मदिरा स्रजः ॥ गंधा मनोज्ञा रूपाणि चित्राण्युपवनानि च मनसश्चाप्रतीघातो वाजी
कुर्वंति मानवं ॥ माक्षीक धातु मधु पारदलोहचूर्णपथ्याशिलाजतु विडंगघृतानि ।
लिह्यात् ॥ एकाग्रविंशति दिनानि गदार्दितोपि सोशीतिकोपि रमते प्रमदां युवेव ॥ इति
माक्षिकादियोगः ॥ गर्व्यां विरूढवत्सायां सिद्धं पयसि पायसं ॥ गोधूमचूर्णं च तथा ।
सितामधुघृतान्वितं ॥ भुक्त्वा हृष्यति जीर्णोपि दशवारान् व्रजत्यपि ॥ इति पायसयो
गः ॥ गोक्षुरेक्षुरबीजानि वाजिगंधा शतावरी ॥ मुसली वानरीबीजं पष्टीनागबला
बला ॥ एषां चूर्णं दुग्धसिद्धं गव्येनाज्येन भर्जितं ॥ सितया मोदकं कृत्वा भक्ष्यं वाजी
करं परं ॥ चूर्णं दशगुणं क्षीरं घृतचूर्णसमं स्मृतं ॥ सर्वतो द्विगुणं खंडं त्वा देद
ज्ञिय तं यथा ॥ वाजीकरणि भूरीणि संग्रह्य रचितो मतः ॥ तस्माद्गुणप्रयोगेषु यो ॥ है १८ ॥

गोयंप्रवरोमतः॥ इतिरत्निवर्द्धनोमोदकः॥ पिप्पलीतण्डुलोपेतौवस्तांडौक्षीरसर्पिषा
साधितौभक्षयेद्यस्तुसगच्छेत्प्रमदाशतं॥ इतिवस्तांडयोगः॥ पूगंदक्षिणदेशजंदश
पलोन्मानंभग्नंकर्त्तयेतछिलंजलयोगतोमृदुतरंसंकुर्याच्चूर्णीकृतं॥ तच्चूर्णंपटशो
धितंवसुगुणेगोदुग्धदुग्धेपचेद्गव्याज्यांजलिसंयुतेतिनिविडेदद्यात्तुखण्डंसितां॥
पक्वंतज्ज्वलनात्क्षितिंप्रतिनयेत्तस्मिन्पुनःप्रक्षिपेद्यद्यत्तत्तुदाहरामिवहुवादक्षु
दरांसंहिताः॥ एलानागवलावलासचंपलाजातीफलातिंगिता॥ जातीपत्रकमत्रप
त्रकयुतंतच्चात्वचासंयुतं॥ वीष्माधीरणवारियारिदवरावांशीवरीयानरीद्राक्षासे
क्षुरगोक्षुराथमहतीखर्जूरिकाक्षीरिका॥ धान्याकंसकसेरुकंसमधुकंशृंगाटकं
जीरकंपिप्पलीकाथपद्मानिकायरटिकामांसीमिसिमेथिका॥ केदब्धत्रविदारिकाप्पा

६१

मुस्तीगंधर्वगंधातथाकर्पूरंकरिकेसरंसमरिचंचारस्पवीजंनवं॥ वीजंशाल्मलिसंभ
वंकरिकणावीजंचराजाचजंभ्येतेचेस्तंमत्रस्कमपिचश्रीसंसपुष्पैःसमं॥ सर्वंचेति
पपकपपकपलमितंसंचूर्णंतत्रक्षिपेतसूतंवंगभुजंगतोहगगनंसन्मारितंस्वेछया
कस्तूरीघनसारचूर्णमपिचप्रातंपयाप्रक्षिपेत्‌श्रादस्यतुमोदकानविरचयेद्धि
ल्वप्रमाणानप॥ तान्‌भोक्तातिसदयथानतवलंभुंजीतमाम्लंरसंपूर्वस्मिन्‌क्षिते
गतेपरिणतिंप्रागभोजनाद्भक्षयेत्‌॥ नित्यंश्रीरतिवद्धमाल्पकमिमंयःपूगपाकं
भजेत्तस्याद्दीर्घ्यविवृद्धिवद्धमदनोवाजीयथाक्कोरतौ॥ दीसाग्निर्वलयानवसीवि
रहितोहृष्टःसुपुष्टःसदाबद्धोपोपिबुधेवसोपिसुचिरःपूर्णोदयास्तुंदरः॥ वस्तुगलो
अष्टांगलो॥ अंजलिरष्टौपलाणयः॥ तुलार्द्धपंचाशत्पलमितो॥ संहितासमुत्ताध्याः॥ ६१॥

जीरणं एतस्य मूलमुशीरं ॥ वारिसुगंधवालकं ॥ क्षीरिका खिरिनी ॥ पष्टिका कारवी ॥ चर
टिका कुसुंभबीजं ॥ मिसी सोफा गंधवर्गो धात्र्यश्वगंधा ॥ श्रीसंसंलवंगं ॥ घनसारः क
र्पूरः ॥ बिल्वप्रमाणानां पलप्रमाणानां ॥ इति रतिवल्लभाख्यपूगपाकः ॥ एतस्मिन् रति
वल्लभे पदि पुनः सम्यक् त्वेलाग्राणि लोकाधत्तूरस्य तु बीज मर्कफरभोपाव्योधिग्रोषस्त
या ॥ सन्नाजूफतकं तथा खेसति तलकचापिनि क्षिप्यते चूर्णीकृ विजयातदा सहि
भवेत्कामेश्वरः संज्ञया ॥ इति कामेश्वरः पूगपाकः ॥ पक्वाम्रस्य रसे द्रोणे सिता माढ
कसंमिता ॥ घृतप्रस्थमितं दद्यान्नागरस्य पलाष्टकं ॥ मरिचं कुडवोन्मानं पिप्पली द्वि
पलोन्मिता ॥ सलिलस्याढकं दत्वा सर्वमेकत्र कारयेत् ॥ पचेत्तन्मृण्मये पात्रे दाहद
र्व्या विचालयेत् ॥ चूर्णान्येषां क्षिपेत्तत्र घनीभूते वतारयेत् ॥ धान्यकं जीरकं चित्रं

॥६२०॥

त्रां

पत्रकं मुस्तकं त्वचं ॥ बृहज्जीरकमप्यत्र शुंठिकं नागकेसरं ॥ एलाबीजं लवंगं च पथ्यकं जा-
तीफलं पलं ॥ सिद्धुल्यीनेन दद्याच मधुनः कुडवद्वयं ॥ भक्षयेद्भोजनादर्वाक् पलमात्रं मि-
तं नरः ॥ अपथ्यानियमो नात्र सौख्यादेवयथानलं ॥ मानवः सेवनादस्य काजीवसुरते
भवेत् ॥ समर्थोपि तत्यानवुषो हृष्टो नित्यं निरामयः ॥ गृहणीनाश्रये देवक्षयंक्ष्यासाध्य-
मरोचकं ॥ अम्लपित्तं च रक्तपित्तं च पांडुतां ॥ इत्यामृपाकः ॥ अथ मयति गोक्षुरचूर्णं छा-
गीक्षीरेण साधितं समधु ॥ भुक्तं क्षपयति षंडत्वं पञ्जानितं कुप्रयोगेण ॥ इति गोक्षुर-
चूर्णयोगः ॥ बीजानि कौंचाकच्छ्वाः कुडवप्रमितानि स्वेदयेच्छनकैः ॥ प्रस्थे गोमहद्दु-
ग्धे दुग्धं यावद्घनं वेज्जातं ॥ त्वग्रहितानि च कृत्वा सूक्ष्मं संपेषयेत्तानि ॥ पिष्टिकया लघु-
वटिकाः कृत्वा गव्ये पचेदाज्ये ॥ द्विगुणितशर्करयाताश्च वटिकाः संपक्वया लेप्याः ॥ व ॥ ॥६२०॥

टिकामाक्षिकमध्येमज्जनयोग्येरक्षिताःस्थाप्याः॥ पंचटंकमितास्ताःप्रातःसायंचभ
क्षयेत्॥ अनेनक्षीणद्रावीयोपभ्रस्यापतितध्वजः॥ सोपिप्राप्नोतिसुरतेसामर्थ्य
मतियाजिवत्॥ नानेनसदृशंकिंचिद्द्रव्यंवाजीकरंपरं॥ इतिवानरीगुटिका॥ आकारक
रभःशुंठीत्वचंगंकुंकुमंकणा॥ जातीफलंजातिपुष्पंचंदनंकार्षिकंपृथक्॥ चूर्णयेद
हिफेनंचतत्रदस्यात्पलोन्मितं॥ सर्वमेकीकृतंमाषमात्रंक्षौद्रेणभक्षयेत्॥ शुक्रस्तंभ
करंपुंसामिदमानंददायकं॥ नारीणांप्रीतिजननंसेवेतनिशिकामुकः॥ इत्याकरकर

६ भादिचूर्णं॥ दध्नोद्धिठकमितोषैस्त्वमधुरंखंडस्यचंद्रस्तुतेःप्रस्थंक्षौद्रपलंपलंचहवि
षःशुंठ्याश्चतुर्माषकान्॥ एलामाषचतुष्टयामरिचतःकर्षंतिवंगंतथाकृत्वाशुक्ल
पटेशनैःकरतलेनोन्मथ्यविस्त्रावयेत्॥ मृद्भांडेमृगनाभिचंदनरसस्यक्तेगुरुधू

॥ हरि १॥

पितेकर्पूरेणासुगंधितं तद्रविलं संलोड्य संस्थापयेत् ॥ सात्स्यार्धं मधुरेष्वेरेण रचि
ता ह्येषा रसाला स्वयं भाक्तुमन्मथदीपिनी सुखकरी कौतेयनित्यं प्रिया ॥ इति मन्म
थपानं ॥ अश्वगंधादशपलात न्मात्रोथ द्रुतस्कः ॥ कर्षैकं पयसा पीत्वा नारीभिर्नै
व तृप्यति ॥ इत्यश्वगंधाद्यं चूर्णं ॥ गोक्षुरेक्षुरकौ भीरुत्या नध्यंति वलायताः ॥ एतच्चू
र्णीकृतं पेयं पयसा पुष्टिकारकं ॥ इति गोक्षुराद्यं चूर्णं ॥ कर्षं मधुकचूर्णस्य घृतक्षौ
द्रसमन्वितं ॥ पायेत्र पानं यो नित्यं तस्य वेगः सना भवेत् ॥ इति यष्टिमधुचूर्णं ॥
पलं गोक्षुरबीजस्य द्विपलं कपिकच्छुला ॥ पलं नागबलाबीजं पलमेकं शतावरी ॥ वि
दारीकंदचूर्णस्य पलद्वयमथापरं ॥ एर्वारुबीजं द्विपलं वाजिगंधापलत्रयं ॥ या
साचतालमूली च गुडूची रक्तचंदनं ॥ त्रिसुगंधं करणधात्री लवंगं नागकेसरं ॥

॥ हरि १॥

एतानि कर्षमात्राणि सूक्ष्मचूर्णानि कारयेत् ॥ यस्ताप्राश्नाति मूलं च भयेदेकैकविंश
ति: ॥ कुष्ठकाशासिफासप्रमेहारासमयो जितं ॥ दुष्टशुक्रं वीर्य्यहानिं मूत्रकृच्छ्राणि पा
नि च ॥ मूत्रघातं मूत्रदोषं जयेच्छुक्रविवर्द्धनं ॥ प्रातं गच्छति च स्त्रीणां हयतुल्यपराक्र
मः ॥ कामदेवाभिधं चूर्णं धन्वंतरिनिरूपितं ॥ रतिकामदेवचूर्णं ॥ चत्वारो व्योमभा
गास्तदनु च गदितं भागयुग्मं च वंगं भागैकं बीजं त्रितयं मपि मृतं तत्समा सिद्धमू
ली ॥ चातुर्जातं सजातीफलमरिचकणा नागरं देवपुष्पं जातीपत्रं च भागद्वितयम
पि पृथक् सर्वमेकत्र चूर्णं ॥ सर्वस्यांशा सिता स्याद्धृतमधुसहितं मोदकं कल्पयेच्चै
तत् खादेदग्निं समीक्ष्य प्रसभमभिनवानंदसंवर्द्धनाय ॥ योगो वाजीकराख्यो य
मिह हि निगदितो भैरवानंदनाम्ना नि:शेषव्याधिहंता दलितयहुयघ्द्दामकं द

र्पदर्पः ॥ इति मदनमंजरीवटिका ॥ श्वदंष्ट्रा वानरीबीज गुडूचीसत्वशर्करा ॥ शाल्मलीमुस
लीकंदामलकानि विचूर्णयेत् ॥ घृतेनालोड्य तच्चूर्णं पिबेत्क्षीरसमन्वितं ॥ षंढो नारी
शतं गच्छेत्तत्प्रभावान्नात्र संशयः ॥ इति श्वदंष्ट्रादिचूर्णं ॥ खाखसफलपत्रमेकं शुंठी
कर्षः सिताफलद्वंद्वं ॥ एतच्चूर्णः पयसा पीतो रेतोरंध्रं ध्रुवं धत्ते ॥ इति खाखसफलादि
चूर्णं ॥ जातीफलं च सौराष्ट्री कृष्णधत्तूरबीजकं ॥ जातीपुष्पमफेनं च नागं हिंगुलमे
व च ॥ एतानि समभागानि विलक्षाप्येन भावयेत् ॥ गुंजामात्रां च वटिकां सितया सह भ
क्षयेत् ॥ नाम्ना कामेश्वरी प्रोक्ता रमते कामिनीशतं ॥ सौराष्ट्री अकलकरा इति लोके
इति कामेश्वरीवटिका ॥ आर्द्रकस्वरसं सम्यग्वपलांडुस्वरसस्तथा ॥ मेथिकास्वरस
मैव गोघृतं क्षौद्रसंयुतं ॥ एकमाकुकुटमज्जा चा-लवेकं कर्षसंमितं ॥ प्रत्यहं भक्षये

६२२

त्सर्वं सम्माहं च तत् पुष्टिकृत ॥ इत्यर्द्धकल्पस्य रसादि पानं ॥ वृद्धदारस्य मूलानि सूक्ष्मचू
र्णीकृतानि च ॥ ज्ञात मूसी रसेनैव सप्तवारं विभावयेत ॥ तच्चूर्णं सर्पिषा लिह्यात्क
र्षमात्रं प्रमाणतः ॥ त्रिंशद्दिनप्रयोगेण जायते धातुवर्द्धनं ॥ इति च वृद्धदारकचू
र्णं ॥ शुद्धं सूतं द्विधा गंधं लोहपात्रेग्निसंस्थिता ॥ आदित्यगोधनं दंडेन चालयेद्
स्मृतां नयेत ॥ रक्तिकाद्वितयं भुक्तिरेताः पुष्टिकरं परं ॥ इति रसभस्मः ॥ शुद्धं सूतं मि
पुप्रतोलक मितं गंधं तथा शुद्धिमत् पंचाक्षं परिगृह्य संपतमुत्वा शुक्तिं समुत्पाद्य
तां ॥ तत्किट्टं परिहृत्य शुक्तिजठरं दत्तः क्षिपेद्गंधकं प्रोक्तस्यार्द्धमथांतरे पिनिहि

म

तं सूतं सैन्धं ततः ॥ सूतस्योपरि शेषगंधकरजः संक्षिप्य तन्मध्यगं सूतं शुक्तिक
या न्ययोपरितया संमुद्य मृद्वस्त्रकैः ॥ तां शुक्तिं परिशोष्य सूर्यकिरणैः संदीपते

निस्तुषैर्धान्यकैर्गजसंज्ञकैर्वरपुटे तत्स्यांग संपीतसं ॥ संचूर्ण्य मधुकगालितं किल भवेदंजोन्मितं पुष्टिकृद्रेतस्तंभनकृत्पयोनुच पिवेत्सायं सितासंयुतं ॥ इति रेतस्तंभकपारदः ॥ जातीफलं लवंगं च जातीपत्रं सकुंकुमं ॥ सूक्ष्मैलाचाहिफेनं च आकारकरभस्तथा ॥ प्रत्येकं कर्षमात्रा लीकर्पूरं शाणमात्रकं ॥ नागवल्लीदलरसैर्वटीं च शणकसन्निभा ॥ वीर्यसंस्तंभनी चैषा बलवर्णाग्निदीपिनी ॥ इति जातीफलादिगुटी ॥ जातीफलार्ककरहाटलवंगशुंठीकंकोलकुंकुमकणाहरिचंदनानि ॥ एतैः समानमहिफेनमनेन तुल्यां चैतां निधाय मधुना वटकं विदध्यात् ॥ माषद्वयोन्मितमिमं निशि भक्षयित्वा मत्स्यं पयस्तदनु माहिषमाशु पित्वा ॥ कुर्वंति कामुकजना नतु चिंदुपातं चेतां सिचापिकलयंतिकलावतीनां ॥ इति द्वितीयजातीफलादि ॥

॥ ६२३ ॥

वटी ॥ उन्मत्तसोमविजयाजातीपत्रं च रवाखसं ॥ उन्मत्तपंचकं चैतत्पत्राणी पंचभिः

समा ॥ दुग्धनिर्यापिताद्‍स्माद्‍ग्राह्योयथोक्तितः ॥ खोदेप्तिश्चाचयन्मत्तोरमेच्च

रमणीशतं ॥ रत्कन्मत्तपंचकाकैः ॥ त्वकपिप्पलीलवंगैलाचंदनेचत्रिवाघनः

सर्वसार्द्धपलंभंगासार्द्धद्विपलसंमिता ॥ कर्पूरोमगनाभिश्चदशमाषमितःपृ

थक् ॥ सर्वतुल्यासिताचूर्णमानसोह्यासससंज्ञकं ॥ वृष्यंवन्हिप्रदंचैतद्‍द्राजारम

प्रकासितं ॥ इतित्वगादिचूर्णं ॥ कर्पूरमहिफेनंचकस्तूरीजातिपत्रिका ॥ नागव

ल्ली रसैरेषा गुटिकामेहनाग्निनी ॥ पुंक्सेभकरीनित्यंबलमांसविवर्द्धिनी ॥

इतिकर्पूरादिवटी ॥ द्राक्षातुलामुपादायजलद्रोणाचतुष्टये ॥ पक्काचतुर्थशेषं

तु तं कषायमुपाहरेत ॥ दत्वागुडतुलांतत्रधातकीप्रस्थमेवच ॥ तिलोयस्या

॥ हर४ ॥

पचेद्भूमौ यावत्पाको भवेत्ततः ॥ ततस्तत्सारमादाय ह्यार्द्रसीयंत्रे ततः शनैः ॥ पुनस्तं वारु-
णीयंत्रे समारोप्य ततो हरेत् ॥ एवं तु दशधा सारं पौनःपुन्येन संहरेत् ॥ ततस्तस्मिं-
श्च तु जीतजातीकोशलवंगकं ॥ कर्पूरं कुंकुमं चापि यथालाभं नियोजयेत् ॥ तं पयो-
ग्निवत्तं मर्त्यः पिबेत्सर्वक्षयापहं ॥ मांसेन सह चाम्लेन स्निग्धेन मधुरेण च ॥ न-
रो नवतिवर्षीयोप्यनेन दश कामिनीः ॥ प्रत्यहं रमयत्येव पवेवन च हीयते ॥ इति
पंचसायकः ॥ आमिषं तु कुलीरस्य तिलतैलेन संपाचयेत् ॥ ध्वजस्तेनोपलिप्तस्तु
कौथिल्यं परिमुंचति ॥ इति कुलीरामिषतैलं ॥ रक्तं गन्धं समं विमर्द्य सुचिरं कृष्णा-
न्यसेनाल्पैः टेलिप्यापांस्वरसं मिते तस्तलचित्तेयंत्रे पचेच्छार्करे ॥ यामान् द्वादशमं-
द मध्यमखरज्वालाभिरूर्ध्वस्थितं सिंदूराऽरुणमाददीत भसितं सौतं सुशीतं ॥ हर४ ॥

भिषक् । तद्यक्ष्मकासश्वासनाग्निमांद्यप्रमेहजीर्णज्वररक्तदुष्टीः ॥ निहंत्यवुष्टिं
तनुते प्रयुक्तं युक्तौषधैर्धातुपरंपरायाः ॥ इति रससिंदूराख्यं रसभस्म ॥ हेम्नो द
लानि सुतनूनि पलोन्मितानि तेष्वोमतो वर्णगुणितो हरजो विशुद्धः ॥ गंधस्ततो द्वि
रखिलं परिमर्द्य पश्चात् काचापीसपुष्पजरसैरथ कन्यकाद्भिः ॥ काचोद्भवमल्पटवि
लिप्तसुगाढभांडनिक्षिप्तमग्निदिवसं सिकताख्ययंत्रे ॥ पक्वं प्रगृह्य निखिलं
पलएतदीयेजातीफलेंदुसुरसूनसमुद्रशोषात् ॥ चत्वारि दर्पधरणानि पृथग् हृद्य
मेतच्चंद्रोदयाख्यमहिवल्लिदलेन वह्नं ॥ आस्योपसेव्य तरुणीशतसंगद
क्षः क्षीरेणोपिजायत उदग्ररतैरतप्तः ॥ पक्वं क्रमाग्निनेति शेषः ॥ चत्वारि पलो
निदेयानीति शेषः ॥ दर्पधरणानि पलानि दर्पस्य मृगमदस्य धरणः शाणस्तु स्या

॥ हि२५ ॥

र्धलं निक्षेपो यस्मिन्निति दर्पधरलार्धलाभिति चंद्रोदयाख्य पदस्य विशेषणं ॥ य
स्तीपलितनाशनस्तनुभृतां वयस्तंभनः समस्तगदखंडनः प्रचुररोगपंचाननः
गृहेन रसराडयं भवतीति यस्य चंद्रोदयः स पंचशरदर्पितो मृगदृशां कथं वश्यभः
इति चंद्रोदयरसः ॥ कर्पासबीजमज्जाहिफेनं जातीफलं विषं ॥ तथाकर्कोटभं सर्वं
पलार्धं सुसूक्ष्मचूर्णितं ॥ पलपंचमिता ग्राह्या वसाप्युक्करसंभवा ॥ संमर्द्य यत्नेन तैल
यित्वा द्वात्रिंशन्महरावधि ॥ लिंगलेपं विधायाथ पनागवल्लीदलेन च ॥ वध्नीया
ल्लभ्यति क्षिप्रं ध्वजपातः कियद्दिनैः ॥ इति कर्पासबीजादिलेपः ॥ जात्याः पुष्पं
फलं त्वक् च लवंगैः पंचभैर्युतं ॥ शाकाशनं त्रिभिस्तुल्यं पथ्यो सात्म्यं विनिक्षिपे
त् ॥ दोलायंत्रविधानेन दुग्धे पक्वा शनैः शनैः ॥ तद्दुग्धस्य पयः पेयं सशितं ॥ हि२५

चार्द्धंप्रोषितं ॥ शुक्रस्तंभकरं वृष्यं भेषजेनास्य तत्परं ॥ इतिजातीपत्राद्यो वधसि
द्धंदुग्धंकूष्मांडस्यतुलांविधायविधिवत्स्विन्नांप्रयिष्टांपुनर्युक्तांक्षौमितैःसु
चूर्णितंमेव्योषाद्धजीरकाग्निभिः ॥ चातुर्जातवराचलात्रयपवरीतालीसमेथीव
व्हद्देतीवारलापिप्पलीक्षुरतितद्राक्षात्रिकंठांबुदैः ॥ चव्याष्काभयचार्वानरि
सटीपथीतुगापिप्पलीमूलाढ्यैःसतवंगधान्यालिजयाकंकोलजातीफलैः ॥ जा
तीकोशविदारिसिंधुमुशलीश्रृंगाटकैःसर्पिषप्रस्थेनाभूपलेनवापिसितया
सार्द्धंतुलामानया ॥ युक्त्यासाधुविपाच्यभाजनगतंकृत्वाथवाग्निप्रगेकूष्मांड ॥
स्वरसायनंसततितंशुद्धोनरःशीतयेत् ॥ वृष्यंवृंहणमग्निदीपनकंरंयक्ष्मा
स्रपित्तापहंपांडुश्वाससजित्स्रपित्तश्रमनंमेहादिरोगप्रणुत् ॥ एतेनातिव

॥ हरि हरि ॥

सीवलीविरहितः स्त्रीणांपुंचेवव्रजेद्ध्रुवं द्रुततरोन रोतिललितं प्रस्ताप्रभापूजितः ॥ इति
महाकूष्मांडपाकः ॥ पुराणंपीनमारायकूष्मांडस्यफलंदृढं ॥ तद्वीजाधारवीजत्वक्
त्रिराध्रून्यंसमाचरेत् ततोतिसूक्ष्मखंडानिकृत्वातस्यतुलांपचेत् ॥ गोदुग्धस्य
तुलायुग्मेमंदाग्नौचालयेच्छनैः ॥ शर्करायास्तुसामर्द्धंगोघृतंप्रस्थमात्रकं ॥ प्रस्था
र्द्धंमाक्षिकंचापिकुडवंनारिकेततः ॥ प्रियालफलमज्जानंद्विपलंत्रिखरीपलं ॥
क्षिपेदेकत्रविपचेत्स्नेहवत्साधयेत् ॥ भिषक्पक्केसमालोक्यज्वलनादवता
रयेत् ॥ कोष्णेतत्रक्षिपेदेषांचूर्णंतन्त्रवदाम्यहं ॥ एकोक्षःशतपुष्पायाअजाजी
रंयवानिका ॥ गोक्षुरःक्षुरकःपथ्याकपिकच्छूफलानिच ॥ सप्तमीत्वक्च
सर्वेषामेषामक्षयुगंपृथक् ॥ धान्याकपिप्पलीमुस्तामज्जगंधाशतावरी ॥ हरि ॥

तालमूलीनागबलावालकंपत्रकं सटी ॥ जातीफलं जातिपत्री एलाचवृहदे
लिका ॥ श्रृगाटकं पर्पटकं सर्वयेत्समितं पृथक् ॥ चंदनं नागरं धात्रीफलं चैव
कसेरुकं ॥ प्रत्येकं कर्षमात्राणि चत्वार्येतानि निक्षिपेत् ॥ पलद्वयमुशीरस्य
मरवारणस्यो बरणस्य च ॥ पश्चात्स्थाप्यं सुपत्लेन भाजनेमृण्मयेन वै ॥ कूष्मां
डस्यावलेहोयं भक्षितः पलमात्रया ॥ यथाचाग्निबलं चापि भुक्तो रोगान्विनाशये
त् ॥ रक्तपित्तं शीतपित्तमम्लपित्तमरोचकं ॥ अग्निमांद्यं तथा दाहं तृष्णां प्रदरमेव
च ॥ रक्तार्शः पित्तजां छर्द्दिं पांडुरोगं च कामलां ॥ उपदंशं विसर्पं च जीर्णं च विषम
ज्वरं ॥ लेहोयं परमो वृष्यो देहरम्यो वलकृन्मतः ॥ क्लीवत्वनाशनेश्चायं महावाजीक
रणस्मृतः ॥ इति वृहत्कूष्मांडावलेहः ॥ गोदुग्धविजयाकल्कं संसिद्धं गोघृतं न

६२७

वं ॥ इति चर्द्धनकूष्मांडखंडादौ तद्विनिक्षिपेत् ॥ मात्रया तत्परं यच्छ्रुक्रस्तंभकरं भवे
त् ॥ इति विजयाघृतनिक्षेपः ॥ जले प्रक्षालिता शुद्धा विजया ससिता पला ॥ गिरिम
द्रं जिता दर्पककर्पूराभ्यां सुवासिता ॥ मर्द्दयित्वा दृढं खल्वे स्निग्धं चूर्णं प्रकल्पयेत्
रसायनो भूसंसारो यं योगराट् संप्रकीर्त्तितः ॥ चूर्णवटे हगुटिका विधानैर्विविधै
रपि ॥ अयं मदंकरो वश्यो वस्यः शुक्रकरस्तथा ॥ नापरो विद्यते योगस्तस्माद्दत्र
प्रकाशितः ॥ इत्थं भूकरसायनं ॥ जयासर्पिर्विधानं यत् तथा भूकरसायनं बुध्वा
तेन यथा योगाः कल्पनीया विजानता ॥ योगानां कल्पनाशक्तौ दिग्गेषा संप्रकी
र्त्तिता ॥ अथ पक्वपिकशुपाकः ॥ निस्तुषं यानरीबीजं कृत्वा त्रिंसत्पलानि च ॥ त्रिंशत्प
लं सितां दत्वा घृतं दत्वा पलाष्टकं ॥ दुग्धाढकसमायुक्तं मृदुना वह्निना पचेत् ॥ ६२७ ॥

पावद्दर्वीप्रलेपः स्यात्तन्मध्ये चूर्णितं क्षिपेत॥ जातीफलं त्रिकटुकं त्रिगंधदेवपुष्प
कं॥ आकल्लकं जातिपत्री कोकिलाबीजकेसरं॥ पुनर्नवा येतेदेच मुशली साहिफे
नकं॥ पारदं लोहचूर्णं च अभ्रकं च पलार्द्धकं॥ चंदनागरुकस्तूरीकर्पूरं श्रृंगमा
त्रकं॥ पलार्द्धं भक्षयेद्येतत् कामाद्दीर्यवतप्रदं इति कपिकच्छूपाकः॥ अहिफेनं च
दरदं लवंगं च समांशकं॥ नागवल्लीदलरसैर्वटीं कुर्यात्त्रिगुंजिकां॥ वीर्य्यस्तंभक
रीं भुक्त्वा निशि दुग्धं पिबेत्ततु॥ इत्यहिफेनाद्या गुटी॥ समुद्रशोषबीजानि भागै
कं धत्तूरबीजकं॥ भागद्वयं जातिपत्री भागमेकं च तत्फलं॥ यवानी म्लेच्छदेशस्था
भागत्रयसमन्विता॥ भागार्द्धमहिफेनं च महिषीक्षीरशोधितं॥ विजयातत्फला
क्काथैर्दशवारं विभावयेत॥ धत्तूरबीजतैलेन मर्द्दयेत्तदनंतरं॥ बदरास्थिप्रमा

॥ हरि २८ ॥

लोनवटिकां संभक्षयेत् ॥ मदनामंदजननी वीर्यस्तंभकरी परं ॥ उन्मत्तनर्तकीना
ममतिगर्वहराकलौ ॥ इति स्तंभनगुटी ॥ भागैकोमृगनाभिश्चमन्येकुंकुमंतथा ॥
जातीपत्रीजातिफलं लवंगं भागयुग्मकं ॥ चतुर्भागाहिफेनं च विजयाभागयुग्मकं
भक्षयेन्मधुनासार्द्धं रमतेकामिनीशतं ॥ चणकाभावटीकार्या वीर्यस्तंभकरीम
ता ॥ इति मृगनाभ्यादिगुटी ॥ हिंगुलं च चतुर्जातं लवंगो घणाचंदनं ॥ जातीकेसरकं
कृष्णात्याकरत्वमहिफेनकं ॥ कस्तूरीं दसमं सर्वं तत्समे विजयासिते ॥ क्षुद्रकोलमि
ताकार्य्यागुटी भोगपुरंदरी ॥ शुक्रस्तंभकरी ह्येषा वत्समांसविवर्द्धिनी ॥ नरस्म्रस्फेव
द्रष्ठे शतवारं स्त्रियैरिंद्रियः ॥ इति भोगपुरंदरी ॥ कज्जलीकृतसुगंधकशंभ्योस्तुल्य
भागिकनकस्यबीजं ॥ मर्द्दितं कनकतैलयुतं स्यात्कामिनी ॥ मदविधूननदक्षः

हरि २८ ॥

अस्य वस्त्रयुगलं ससितं चेद्रक्षितं हरति मेहगालोघं ॥ लिंगदीर्घकरणं कमनीयं
द्रावणं निधुवने वनितानां ॥ इति कामिनीमदविध्वननो रसः ॥ जातीफलानां द
शकं द्विगुणं छेदयेत्तु तः ॥ दुग्धाढके क्षिप्य दधिमथित्वा घृतमाहरेत् ॥ जातीफलं
घृते तस्मिन् भर्जयेच्च विचक्षणः ॥ एषकधूर्त्तफले क्षिप्त्वा सुपचेत्तु टपाकवत् ॥
ऽणकैकं भक्षयेत्सायं वीर्यस्तंभकरं महत् ॥ पुंसामानंदजननं नारीणां प्रीतिवर्द्धि
नं ॥ नपुंसकोपि पुरुषो गच्छेन्नारीसहस्रकं ॥ इति जातीफलयोगः ॥ पत्ताग्रतैलसंमि
श्रमश्रुकुं पारदं नराणां ॥ नागवल्लीदलैर्द्दत्तं पौष्टिकं परमं मतं ॥ इति पलाशतैलपार
दयोगः ॥ श्रुकुंगंधं तदर्द्धं तु श्रुकुरसूतं तदर्द्धकं ॥ श्रुकुलाहिफेनं त्रितयं तोलद्वयं दु
तं मर्द्दु ॥ पर्पटीरसवत्सिद्धं मात्रा वस्त्रमितां भजेत् ॥ तांबूलमध्यगां तस्य पयः

॥ हरिः ॥

पानमनुस्मृतं ॥ प्रदोषसमये कामी पण्नांगंधपर्पटी ॥ सेवते सौषिनाम्लेन वीर्यपा
तं न मुंचति ॥ आगत्या प्रमदां भुक्त्वा द्रवी पतितवर्जितः ॥ इति गंधकादियोगः ॥ अर्कभृं
ग निर्गुंडी कनककुलसी विजया तकारीरसै रन्यै वीरसैर्वस्त्रं विलिप्य शोषयित्वा त
त्र नवनीतपिष्टं गंधकपारदकज्जलीं तेपयित्वा तद्वर्तिं कृत्वा प्रज्वाल्य दंशेन धृत्वा
अधोमुखीकृत्वा काचभांडे तैलं पातयेत् तत्स्याविंदुत्रयं पुटु पारदस्यवद्धं नागव
ल्लीदले मर्दयित्वा भक्षयेत् ॥ मनुसेव्या दिनं दुग्धोदनं पथ्यं चरेत् इयं राजवीडीति
लोके वातव्याधिप्रमेहाष्टादशविधकुष्टगृहण्यीग्नमंदतातग्निमांद्यादिश्च प्र
शस्तावृष्यतराच ॥ इति राजवीडीरसः ॥ अर्कक्षीरैः स्नुहीक्षीरैर्वस्त्रेते प्यं पुनः पुनः
गंधकं नवनीतेन पिष्ट्वा वस्त्रं तिपेच्चतत् ॥ तद्वर्तीर्ज्वलिता दंशेन धृता धार्या अधो ॥ हरिः ॥

मुखी ॥ तैलं पतत्यधो भांडे ग्राह्यं योगेषु योजयेत् ॥ वस्त्रमत्र दैर्घ्यपरिणाहाभ्यां हस्तमा
त्रं ग्राह्यं ॥ पलमितो गंधो ग्राह्यः ॥ चतुःपलमितं नवनीतं च ग्राह्यं ॥ इदं तैलं लिंगलेपे
भक्षणे च नपुंसकानामतीव हितमिति प्राचः ॥ इति गंधकतैलं ॥ अहिफेनं पलमितं
वरं दुग्धाढके पचेत् ॥ जातीफलं चतुर्जातं जातीकोशं लवंगकं ॥ व्योषमाकारकरभम
जमोदापतंगकं ॥ कंकोलं चंदनं चापि कुंकुमैणमदं टकं ॥ जातीफलाद्यं भैषज्यं प्रत्ये
कं कर्षसंमितं ॥ मृगनाभिश्च कर्पूरं प्रत्येकं माषयुग्मकं ॥ मीनांड्यष्टपलं पक्वायुक्तया
गुरुमुखोत्थया ॥ संमेल्य गुटिका कार्या पश्चाद्देया यथाबलं ॥ महाबलकरी वृष्या
इति रागविवर्द्धिनी ॥ शुक्रस्तंभकरी पुंसां वनितानां समागमे ॥ पांडुकासक्षयश्वास
शूलमेहप्रणामूमान् ॥ निहंति जनयत्यग्निं सर्वदेवप्रपूजिता ॥ उक्तप्रमाणादर्द्धं

॥ ६३०

तुमीनां डींशुवनेपरे । अनंगमेखलो नाम सिद्धेन समुदीरितः ॥ गुटिकावल्लमिताच्चक
र्तव्या ॥ इत्यनंगमेखलो मोदकः ॥ पारदं गंधकं चंपककेसरं लवंगकुसुमकरहाटः ॥ अज
मोदं त्रुटि श्लोषो जातीपत्रं च जातिफलं ॥ प्रत्येकं भागैकं भागद्वितयं च गुडूचमहिफेनं
चनवदरसदृशा वटिका कार्या मधुना च भक्षयेदेकां ॥ पामेतीते रसनासविधे स्थित्वा
जघ्नाति का कर्षं ॥ तैलाढ्यं भुंजीयात्तनुपानं चैतदेतस्य ॥ लिंगं कठिनतरं स्याद्वीर्यं संस्त
भं चेद्यामं ॥ एषा सौगतगुटिका सत्वं सत्वं च शुक्ररोधकरी ॥ इति सौगतवटिका ॥ जा
तीफलं टंकमितमहिफेनं च टंककं ॥ अजमोदा च टंकैका चंद्रसंचैक टंककं ॥ सितोप
ला त्रिटंकास्यात् पंचटंको गुडो मतः ॥ उत्तमासं मेल्य वटिकाः कार्य्या द्वादश तुल्यकाः
तन्नैकां भक्षयेद्रात्रिमात्रशुक्रं स्तंभयति ध्रुवं ॥ इति जातीफलादिगुटी ॥ अश्वगंधा ॥ ६३० ॥

प्रस्थमेकं पचेत्क्षीरे चतुर्गुणे ॥ घृतस्य प्रस्थमादाय खंडप्रस्थत्रयं तथा ॥ प्रस्थार्द्धं क्ष
ति तान्मात्राषान्माचयेन्मृदुवह्निना ॥ च्योषत्रिजातहपुषाधातावृक्षातमुस्तिका ॥ दी
प्यपौष्करकाजाजीसटीगोक्षुरकैस्तथा ॥ यशानीगूग्पिकं लोहं नागं भ्रुस्वं पलं पलं ॥
दत्वा सिद्धे त्रविधिवत्स्मात: खादेच्चपावतं ॥ सर्वधातामयान्हंति कटिपृष्ठग्रदस्थि
तान् ॥ अस्थिभंगं तथा शोथं संधिवातं सदाहत्कं ॥ वर्ध्मं हृद्रोगगुल्माशी:क्ष्यासकां
सप्रमेहनुत ॥ अश्विभ्यां विहितो योगो वाजीकरणमुत्तमं ॥ इत्यश्वगंधापाकः ॥
घृतसिप्तमाषविदलं दुग्धे सिद्धं सिताज्यसंयुक्तं ॥ भुक्तं तदैव कुरुते तरुणीभिर
तीव तुल्लोषं ॥ इति माषविदलयोगः ॥ सदहिफेनविमर्द्दितपरदेकनकबीजरसे
न विमर्द्दिते ॥ सममसिता विजयेयदि भक्षितेन रजनी न दिया न दिवाकरः ॥ इत्यहि

॥ ६३१ ॥

फेनपारदयोगः ॥ चटकांडेतु संगृह्य नवनीतेन पेषयेत् ॥ तेन प्रलिप्तपादस्य पुंसस्तंभः
प्रजायते ॥ यावन्नस्पृशते भूमिं तावत्स्यान्नात्र संशयः ॥ इति पादलेपनं ॥ कर्पूरं टंक
णं सूतं तुल्यं तु निरसं मधु ॥ संमर्द्यते पयेह्लिंगं लिप्त्वा यामं तथैव च ॥ ततः प्रक्षाल्य
रमयेद्वनितानां शतं सुखं ॥ वीर्यस्तंभकरं पुंसां सम्यक् नागार्जुनोदितं ॥ इति लिंग
लेपः ॥ श्वेतार्कमारमूलत्वक् करहाटाजमोदकाः ॥ कृष्णधत्तूरबीजानि सम्यक् जाती
फलं तथा ॥ एतेषां वारिपिष्टानां गुटिका मरिचोन्मिता ॥ एकया मणिलेपो हि नर
मूत्रनिघर्षया ॥ वीर्यस्तंभो भवत्येव सत्यमेतन्न संशयः ॥ इति लेपवटी ॥ अहिफेनं
दुग्धपुष्टं रक्तिकात्रितयोन्मितं ॥ विंदुवेगं ध्रुवं धत्ते सितया निशि भक्षितं ॥ इत्यहि
फेनयोगः ॥ मुस्तास्याज्यपलान्यष्टौ तुलाक्षीरे विपाचयेत् ॥ सर्पिर्हीडकुडवं देयं त्वे ॥ ६३१ ॥

डंकर्षमातं तथा ॥ गुडं पलचतुष्कं च त्रिमज्जं च पलत्रयं ॥ जातीफलं लवंगं च कुंकुमं चव्य ।
चित्रकं ॥ मांसी मर्कटबीजानि चातुर्जातं कटुत्रयं ॥ जातीपत्रं चकरभंग त्वक्कं विचुमात्र
कं ॥ द्विकर्षमोदकं कुर्यादेकैकं भक्षयेन्नरः ॥ एकमासप्रयोगेण वृद्धः संजायते युवा
षंडोपि रमते नारीशतैकं नात्र संशयः ॥ सर्वरोगहरं चैतत्पुंसां कामाग्निवर्द्धनं ॥ इति मु
शल्यादिमोदकः ॥ अथ ध्वजवृद्धिकरणमाह ॥ मत्स्यातकास्थिजलपूकमथाब्जप
त्रमंतर्विदग्धमतिमान् सह सैंधवेन ॥ एतद्विलुठ्य हतीफलतोयपिष्टमालेपयेन्म
हिषविद्विमतीकृतेंगे ॥ स्थूलं महद्दृढतुरंगमतुल्यमाशु से फः करोत्यभिमतं नहि संश
योस्ति ॥ इत्येको योगः ॥ कासीसतुरगगंधासावरगजपिप्पलीविपक्केन ॥ तैलेन याति
वृद्धिं स्तनकरणवरांगलिंगानि ॥ इति द्वितीयो योगः ॥ श्वेतवात सैंधवसरोहहिली

॥ ६३२ ॥

दलानि भल्लातकानि च फलानि च कंटकार्य्याः हैयंगवीनमपि माहिषमथ्य गंधाकेदेसु

धीः प्रलिप्य दधीत दिनानि सप्त ॥ तेन द्रुतं ते सदनु यन्महिषीमतेन योद्धर्त्य लिंगमुपलेपि

तमादरेण ॥ तस्मात्सूतः स्वरतु रंगमतंगजानां तिंगानिताघवपदं परमं प्रयाति

इति तृतीयो योगः ॥ उन्मत्तकस्वरसपेषितवाजिगंधाकेदोपगूढमहिषीनवनी

तमादौ ॥ धार्य्यं फलेघबभवाहनबद्धमस्तनिःशेषबीजरहिते कतिचिद्दिनानि

उद्धर्त्तितं तदनु यन्महिषीपुरीषैर्धत्तूरकांघुनवनीतविलेपिते च ॥ तस्याधनं निधु।

वनप्रणयोद्धतानां नारीवरांगदलनक्षमतां दधाति ॥ इति चतुर्थो योगः ॥ क्षौद्रं हरि।

द्रातगरमरिचैः पिप्पली सैंधवाभ्यां प्रत्यक्पुष्पीयवतितगुडश्वेतसिद्धार्थमाषैः

श्लक्ष्णीभूतैर्भवति मिलितं वाजिगंधासमायैः म्रौरंगीम्रौ चैस्त नभुजः श्रीरः ॥ ६३२ ॥

शेफसां वृद्धिकारि ॥ इति पंचमो योगः ॥ अथ योनिसंकोचीकरणं ॥ भंगापोटलिका द
त्ता प्रहरं कामममंदिरे ॥ नितंबिन्याः करोत्येव वृकुंमारीभगवद्भगं ॥ अन्याच्च ॥ जातीफल
महिफेनं दार्वी चैते त्रिभिः समा भंगा ॥ वरटीछत्रपुतासौ गुटिका संकोचनी योनेः
अथान्यत ॥ वंवूलत्रिंवीस्वरसभावितं घर्मशोषितं ॥ दाडिमीत्वग्गजस्तत्तु पुन्नत्याग्रं
जाचतुष्टयं ॥ योनौ विनिहितं स्यात्पुंकामिन्याप्रहरं ध्रिया ॥ साप्रसूतापि दग्धा
पुनर्भवति कंन्यका ॥ अन्यच्च ॥ वरटीछत्रपातीयधावनादपि तेगुणाः ॥ किंच ॥ मोच
चूर्णं विनिक्षिप्तं योनौ संकोचनं परं ॥ इति योनिसंकोचनं ॥ अथ योनिद्रावणं ॥ सं
वृकं मांस स्वरस पिष्टं दुग्धेदिरोद्भवां ॥ चणकाभां वटीं दत्वा योनौ द्रवति कामिनी
अन्यच्च ॥ सिंधुक्षौद्रमहाराष्ट्रीति प्रलिंगोपभोगतः ॥ सद्यो द्रवति कामार्त्ता योषि

न्नाद्यविचारणा ॥ इति योनिद्रावणं ॥ अथ चंदनादितैलं ॥ द्रव्याणि चंदनादेरक्तचंद
नं रक्तचंदनं ॥ पतंगमथ कालीयागरुकृष्णागरूणि च ॥ देवद्रुमः ससरलः पद्मके
तुणिकोपि च ॥ कर्पूरो मृगनाभिश्च तथा कस्तूरिकापि च ॥ सिल्हकः कुंकुमं भव्यं
जातीफलपत्रकं ॥ जातीपत्रं लवंगं च सूक्ष्मैला महती च सा ॥ कंकोलकफलं त्वक्
च नागकेसरकं तथा ॥ वालकं च तथोशीरं मांसी हालसितापि च ॥ मुराकर्चूरके
श्चापि शैलेयं भद्रमुस्तकं ॥ रेणुका च प्रियंगुश्च श्रीवासो गुग्गुलुस्तथा ॥ लाक्षा
नखेश्वरालश्च धातकीकुसुमं तथा ॥ ग्रंथिपर्णं च मंजिष्ठां तगरं सिक्थकं तथा
एतानि शाणमात्राणि कल्कीकृत्य शनैः पचेत् ॥ तैलं प्रस्थमितं सम्यग्गे तत्पा
त्रे शुभे क्षिपेत् ॥ अनेनाभ्यक्तगात्रस्तु वृद्धोपि तिसमोपि यः ॥ शुभ्रो भवति ॥ ६३ ॥

पुत्रकाम्यः स्त्री लग्नमस्य तदुर्त्तमः ॥ यं ध्मायितमते गर्भ बिंदो पितमूत्रणायते ॥ अपुत्रः पु
त्रमाप्नोति जीवेच्छ शरदां शतं ॥ चंदनादि महातैलं स्कंधयितं क्षयं ज्वरं ॥ दाहं प्रस्वे
दं दौर्गंध्यं कुष्ठं कंडू विनाशयेत ॥ कालीयकं पीतचंदनं ॥ लताकस्तूरिका मुसंकेदा
ना इति लोके प्रसिद्धा ॥ कंकोलफलस्याला भेलवंग मध्ययाजातीपुष्पं ग्राह्यं ॥ दारु
सिता दारचीनी ॥ शैलेयं छडीला इति लोके प्रसिद्धं ॥ ध्यामा सो गुगुरी इति लोके ॥
ग्रंथिपर्णं गाटिवन इति लोके ॥ अशीतिवार्षिकः अशीतिसमः ॥ इति चंदनादि
तैलं ॥ इति वाजीकरणं समाप्तं ॥ अथ रसायनाधिकारमाह ॥ तत्र रसायनस्य ल
क्षणमाह ॥ यज्जराव्याधिविध्वंसि वयःस्तंभकं तथा ॥ चक्षुष्यं बृंहणं वृष्यं
भेषजं तद्रसायनं ॥ अथ रसायनस्य फलमाह ॥ दीर्घमायुः स्मृतिर्मेधामा

॥६३४॥

रोग्यंतरुणंवयः॥देहेंद्रियबलंकांतिंनरोविंदेद्रसायनात्॥तद्विधिमाह॥पूर्वेवयसि
मध्येवामनुष्यस्यरसायनं॥प्रयुंजीतभिषक्प्राज्ञःस्निग्धशुद्धतनोःसदा॥ना
विशुद्धशरीरस्ययुक्तोरासायनोविधिः॥नभातिवाससिक्लिष्टेरंगयोगइवा
हितः॥क्लिष्टेमलिने॥अथतदुदाहरणानि॥शीतोदकंपयःक्षौद्रंघृतमेकैक
शोद्विशः॥त्रिशःसमस्तमथवाप्राक्पीतंस्थापयेद्वयः॥मंडूकपर्ण्याःस्वरसः
प्रभातेप्रयोज्ययष्टीमधुकस्यचूर्णं॥रसोगुडूच्यास्तुसमूलपुष्प्याःकल्कःप्रयो
ज्यःखलुशंखपुष्प्याः॥आयुःप्रदान्यामयनाशनानिबलाग्निवर्णस्वरव
र्द्धनानि॥मेध्यानिचैतानिरसायनानिमेध्याविशेषेणचशंखपुष्पी॥मंडू
कपर्णीब्राह्मी॥माक्षिकेणतुगाक्षीर्यापिप्पल्यालवणेनच॥त्रिफलासि ॥६३४॥

तथा चापि युक्तं सिद्धं रसायनं ॥ सिंधूत्थशर्कराशुंठीकणामधुगुडैः क्रमात् ॥ वर्षा
दिष्वभयाप्राश्या रसायनगुणैषिणा ॥ पुनर्नवा स्यार्द्धपलं नवस्य पिष्टं पिबेद्यः
पयसार्द्धमासं ॥ मासत्रयं तत्त्विगुणं समा वा जीर्णोपि भूयः स पुनर्नवः स्यात् ॥
ये मासमेकं स्वरसं पिबंति दिने दिने भृंगरजः समुत्थं ॥ क्षीराशिनस्ते बलवीर्य
युक्ताः समाः शतं जीवनमाप्नुवंति ॥ पीताश्वगंधा पयसार्द्धमासं घृतेन तैलेन
सुखांबुना वा ॥ वीर्यस्य पुष्टिं वपुषो विधत्ते बालस्य सस्यस्य यथांबुवृष्टिः ॥ अ
यः पलं गुग्गुलुरत्र योज्यः पलत्रयं व्योषपलानि पंच ॥ पलानि चाष्टौ त्रिफला
रजस्त्वकर्षं त्विह नयात्यमरत्वमेव ॥ असिततिलविमिश्रान् पथ्यवान् भक्षयेद्यः
सततमथ पयोभी भृंगराजस्य मासं ॥ भवति स चिरजीवी व्याधिभिर्मुक्तदे

॥ ६३५ ॥

होमं मरसं दशाब्दशतः कामचारी मनुष्यः ॥ मुशली मूलमुद्धृत्य छायाशुष्कं विचूर्णि
तं ॥ मधुसर्पिर्युतं भुक्तं देहशुद्धौ शुभे दिने ॥ जीर्णे क्षीरेण भोक्तव्यं वातुलान्नं विव
र्जयेत् ॥ पलितैर्वलिभिर्मुक्तो मासयोगेन जायते ॥ लेपयेत्रिफलाकल्कै र्नवमाय
सभाजनं ॥ अहोरात्रोषितं तोयं पिबेत्क्षौद्रसमन्वितं ॥ प्रभूतस्नेहमशनं जीर्णे
तस्मिन्प्रयोजयेत् ॥ जरारोगविनिर्मुक्तो जीवेद्वर्षशतं ततः ॥ चरणपत्रा भपत्रा
ख्या रुदंती च महौषधी ॥ आर्त्तीन दृष्टा रुदंतीच सूक्ष्मांभो विंदुवर्षिणी ॥ पीता
रक्ता सिता कृष्णा ज्ञेया सैवं चतुर्विधा ॥ तां नीत्वा मूलपत्राद्यं पुष्यर्क्षपक्षे शुभे
दिने ॥ छायाशुष्कां तु तां कृत्वा सूक्ष्मचूर्णं तु कारयेत् ॥ विरेकवमनं कृत्वा विडाल
पदमात्रकं ॥ भक्षयेत्प्रत्यहं चूर्णं घृतक्षौद्रसमन्वितं ॥ जीर्णे तस्मिन्पयो भुंजीत ॥ ६३५ ॥

क्षीणत्वं संयमी नरः ॥ एकमासप्रयोगेण सर्वरोगविवर्जितः ॥ दृढकायोऽतितेजस्वी
वलीपलितवर्जितः ॥ चिरमायुरवाप्नोति यत्नवीर्यसमन्वितः ॥ समूत्रपत्रामादा
पघ्रास्नी प्रक्षाल्य वारिणा ॥ उलूखले क्षोदयित्वा रसं वस्त्रेण गालयेत् ॥ रसे चतु
र्गुणे तस्मिन् घृतप्रस्थं विपाचयेत् ॥ औषधानि च पुण्यानि तत्रेमानि प्रदापयेत्
हरिद्रा मालती कुष्ठं त्रिवृता सहरीतकी ॥ एतेषां पलिका भागाः शेषस्तु कार्षिकाः स्मृ
ताः ॥ पिप्पल्योपपविडंगानि सैंधवं शर्करा वचा ॥ सर्वमेतत्समालोड्य शनैर्मृद्वग्निना
पचेत् ॥ अस्य प्राशनमात्रेण वाग्विशुद्धिः प्रजायते ॥ सप्तरात्रप्रयोगेण किन्नरैः
सह गीयते ॥ अर्द्धमासप्रयोगेण द्विजराजवपुर्भवेत् ॥ मासमात्रप्रयोगेण श्रुतमा
त्रं तु धारयेत् ॥ हंत्यष्टादश कुष्टानि अर्शांसि षड्विधान्यपि ॥ पंचगुल्मप्रमेहांश्च

॥ हे ३ ही ॥

कासं पंचविधं जयेत् ॥ वंध्यानां चैव नारीणां नराणामल्परेतसां ॥ घृतं सारस्वतं नाम
वर्णपुष्टिबलवर्द्धनं ॥ आयुष्यं भोजनं तंजीर्णे विगानानामवधारणं ॥ ब्रह्मचर्यमहिंसा च
साहसं च विवर्जयेत् ॥ विगतघननिशीथे प्रातरुत्थाय यो हि पिबति खलु नरो यो
घ्राणरंध्रेण नित्यं ॥ स भवति मतिपूर्णश्चक्षुषा तार्क्ष्यतुल्यो वलिपलितविही
नः सर्वरोगैर्विमुक्तः ॥ उषःकाले पिबेन्नीरमष्टप्रसृतिमात्र पानात पित्तगदाने
हंति जीवेद्वर्षशतं नरः ॥ यस्त्रिरेको घृतमसृग्नियुक्तः पलीतवलीभ्रंशः प्रातर्भुक्तिः
तद्वन्मारितमभ्रं भुक्तं किमपरमस्ति रसायनतत्वं ॥ इति रसायनाधिकारः ॥
अथ सर्वरोगनिवर्त्तकत्वेन रसायनतुल्यत्वात्क्षारं हेमगर्भमाह ॥ शुद्धसूतं प
लैकं च पालं कं शुद्धहेमकं ॥ शुद्धगंधस्य धरणं तथा चात्र प्रयोजयेत् ॥ त्रयमे ॥ हे ३ ही ॥

कत्रकुर्वीत सूक्ष्मं खल्वे विमर्दयेत ॥ सुदृढे वंधयेद्वस्त्रे स्थाप्यं तो हजसंपुटे ॥ मर्दि
तं गंधकपत्रं तस्योपरि प्रदापयेत ॥ संपुटं मुद्रितं कृत्वा भूधराख्यपुटे पचेत ॥ स्वांग
शीतल मुद्धृत्य दग्धगंधं परित्यजेत ॥ वेष्टयित्वा पुनर्वस्त्रे सूत्रे वध्वा च गोरके ॥
तत्तुल्यं च पुनर्गंधं संपुटे निक्षिपेद्भिषक् ॥ मुद्रितं संपुटं कृत्वा पुनर्यंत्रेण पाचये
त ॥ हेमगर्भो रसो नाम्ना सर्वव्याधिनिवारणः ॥ रोगराजादिकं हंति इतरेषुं च का
कथा ॥ सुदृढे वस्त्रे पट्टकूलतमध्ये ॥ तत्तुल्यं पूर्वोक्त गंधकतुल्यं ॥ इति हेमगर्भर
सः ॥ अथ प्रकारांतरेणोच्यते ॥ एकभागं सुवर्णं च त्रिभागं पारदस्य च ॥ विशुद्धवे

शुद्ध सूतं पश्चैकं च पादांशं शुद्ध हेमगं ॥ शुद्धगंधस्य माषैकं प्रतिकर्षाणि योजयेत ॥ अय
मेकत्रकुर्वीत सूक्ष्मं खल्वे विमर्दयेत ॥ सुदृढे वंधयेद्वस्त्रे स्थाप्यं तो हजसंपुटे ॥ मर्दितं गं
धकपत्रं तस्योपरि प्रदापयेत ॥ संपुटं मुद्रितं कृत्वा भूधराख्ये पुटे पचेत ॥ स्वांग

॥ ६३७ ॥

श्रीतलमुद्धत्य ग्राह्यं गंधं परित्यजेत ॥ येष्टपित्वा पुनर्घर्षं सूत्रेवध्वाय गोलकं ॥ ततुसंचपुन
गंधं संपुटे निक्षिपेत् भिषक् ॥ मुद्रितं संपुटं कृत्वा पुनर्यंत्रे लेपाचयेत ॥ हेमगर्भरसो नाम्ना सर्वव्याधिनिवारणः

लासं मर्द्य गोलकं कारयेत ततः ॥ यष्ठे किंचिद्दलिंन्यस्य तत्र गोलं निधाय च ॥ वध्नीयात्पोटलीं
गाढामेवं च त्रिपुटं चरेत ॥ लोहपात्र पुटे तुल्यं गंधं दत्वाधरोत्तरं ॥ तन्मध्ये पोटलीं न्यस्य
सप्तमृत्कर्पटावृते ॥ विस्तस्तिप्रमितागर्त्तो तस्यां संस्थाप्य मुद्रयेत ॥ अंगुलीमृत्तिकाभिश्च
ज्वालयेद्दिंधनानिच ॥ यामैकं सिद्धतां याति हेमगर्भाख्य पोटली ॥ अनुपानानुसारेण
सर्वरोगेषु योजयेत ॥ इति प्रकारांतरेण हेमगर्भः ॥ अपरश्च हेमगर्भमाह ॥ हिंगुलं कर्ष
मात्रं तु मर्द्दयेत्खल्लमध्यगं ॥ लवणं माषमेकं च तत्समं पारदं क्षिपेत ॥ मर्द्दयित्वा क्षि
पेत्तत्र गंधकं मर्द्दमाषकं ॥ मर्द्दयेदर्कजैः क्षीरैर्वेधयेत्पद्ममध्यके ॥ मंधरे पाचये ॥ ६३७ ॥

यंत्रे कुक्कुटस्य पुटेन च ॥ पुनर्वह्निबलसंवेष्ट्य पाचयेत्पूर्ववद्भिषक् ॥ हेमगर्भरसो नाम
अरुणारुणसन्निभः ॥ सर्वरोगेषु दातव्यो मध्वाद्रकसमन्वितः ॥ इति रक्तहेमगर्भः
अथ पीतहेमगर्भमाह ॥ पीतामतः शिलातालं शुद्धं कर्षमितं पृथक् ॥ कार्षिकं हेम
संयोज्य तत्पादांशं महाविषं ॥ मर्दयेत् घुसृणद्रावैः शुद्धं कुपीतवराटये ॥ पूर्ववत्
पोटलीं च ध्मात्क्रियां पूर्ववदाचरेत् ॥ हेमगर्भो भवेत्पीतः सर्वरोगनिवर्हणः ॥ अनु
पानैः सदा त्वोदेहाजीकरणमुत्तमं ॥ पीतापेचडी इति लोके ॥ महाविषं मत्स्यभस्म ॥ पू
र्ववद्विहितितोहसंपुटे अधोर्ध्वं गंधकं दत्वा तन्मध्ये पोटलीं न्यस्य कुक्कुटपुटेन मूध
र यंत्रे द्विवारं पाचयेदित्यर्थः ॥ एवं प्रक्रिया स्तोहेमगर्भेपि ज्ञेया ॥ इति पीतहेमगर्भः
अथ दरदरसायनमाह ॥ दरदं च समादाय घृतकंचक्षं शुभं छदं ॥ पाटयित्वा च संस्थाप्य

॥ ६२५ ॥

पक्वं तस्तत्र तत्सुधीः ॥ पिधानं कारयित्वा तु तद्धूम्रस्यैव योगवित् ॥ षण्मासानर्कयक्षे
तु दरदं परिरक्षयेत् ॥ तद्दूर्ध्वे दरदं तस्मान्निष्काश्य तु शुभे दिने ॥ निष्काशयित्वा मक्षा
स्वच्छं ताके भुच निक्षिपेत् ॥ गोधूमपिष्टैरावेष्ट्य वं तांकं च विचक्षणः ॥ मृदावेष्ट्य
पुनस्तच्च संपचेन्मृद्वग्निना ॥ पुनस्तापैर्यसंस्थाप्तं प्यं पुनः पाच्यं तथैव च ॥ एवं ष
ट्पुटैर्मत्यं दरदं याति नान्यथा ॥ भक्षयेद्रक्तिकामात्रं तत्तद्रोगानुपानतः ॥ सर्वान्ना
शयते रोगान् वातपित्तकफादिकान् ॥ अग्निं च कुरुते दीप्तं जरापलितनाशनं ॥ का
न्तिं तनोति देहे च वैवर्ण्यं च नियच्छति ॥ इति दरदरसायनं ॥ अथ सर्वरोगचिकि
त्सा ॥ कैरातां च उदयपर्पटं ज्वरगदे तक्रं ग्रहण्यामतथातीसारे कुटजं ॥ कृमौ कृमिरिपुं दु
र्नामके सूरणं ॥ पांडौ किट्टमथ क्षये गिरिजतु ऋष्यास तु भार्गीं बद्धं मेहे त्वामलकं ॥ ६२५ ॥

क्षयेत पिंजरं सेतत्सहेमां चितं ॥ प्रयुक्ते हिंगुकरंजमामपवने तैलं ह्रवो मूत्रवृके ॥ प्रोष्ठा
ष्ठीलिकगुल्मादिषु शुक्तं तक्रः का सेतुकेदारिका ॥ वातव्याधिषु गुग्गुलुर्लशुनं स्या
द्रक्तपित्ते वृषो पस्मारे तु वचा सवा गर्भरोगे हेमो दरे रेचनं ॥ वातासे तु गुडूचिका
द्दिंत गदे माषेंडरीमेदसि क्षौद्रांभः प्रदरे तिरीटमरुचौ तुंगो व्रणे लोगन्यापुरं ॥ प्लीके
मद्यमपथ्याम्लपित्ते हि जितु द्राक्षा प्रकुष्ठे वरी कूष्मांडं वृद्धरोगमपेतु त्रिफलोन्मादे
पुराणं घृतं ॥ कुष्ठे खादिरसारवार्थ्यपपयो निद्राक्षये माहिषं श्वित्रे वाकुचि वा
पर्ज्जी लीह जि सुराष्वा भयोयोबलं ॥ छर्दौ साजमधु धर्मजंतु विकृतौ नस्यं सती
क्ष्णौषधं प्रयुक्तं पार्श्वे भवेत् पुष्करजं मूर्च्छासु शीतो विधिः ॥ कार्श्ये मांसरसो श्मरी
षु गिरिभिद्रुसो वृसे तु त्वचा मोक्षौ सास्य तु चिद्रयो जंतुर सैहि धमासु नस्यं हि

हरिः

ते ॥ दाहे शीतविधिर्भगंदरगदे तुर्वीलताभ्यास्थिनाघ्राणसमलोहितैः स्वरगदे मध्य
न्वितं पौष्करं ॥ वैद्यावस्तिमुशंति वातिकगदे पैत्ते तु रक्तं कफप्राणस्येवमनंच तैल
हविषी क्षौद्रं क्रमेण त्रिषु ॥ प्रतिरोगमगम्यमुदितं तत्तु पदेतान्स्वधिया समीक्ष्य च ।
तु कालविकारान् ॥ प्रविकल्प्य योजयति यः स परेषामपनीय दुःखचौरिणं मुखी
स्यात् ॥ इति सर्वरोगचिकित्सा ॥ अथ मानपरिभाषा ॥ न मानेन विना युक्तिर्द्रव्या
णां जायते क्वचित ॥ अतः प्रयोगकार्यार्थं मानमत्रोच्यते मया ॥ चरकस्य मत
वैद्यैर्नागैर्यस्मात्मतं ततः ॥ विहाय सर्वमानानि मागधं मानमुच्यते ॥ त्रसरेणु
स्तु पर्यायनाम्ना वंशी निगद्यते ॥ जालांतरगतैः सूर्यकरैर्वंशी विलोक्यते ॥ ष
ड्वंशीभिर्मरीचिः स्यात्ताभिः षड्भिश्च राजिका ॥ तिसृभी राजिकाभिश्च सर्षपः ॥ हरिः

प्रोच्यते बुधैः ॥ यवो वा सर्षपैः प्रोक्तो गुंजा स्यात्तच्चतुष्टयं ॥ षड्भिस्तु रक्तिकाभिः स्या
न्माषको हेमधान्यकौ ॥ माषैश्चतुर्भिः शाणः स्याद्धरणः स निगद्यते ॥ टंकः स ए
व कथितस्तद्द्वयं कोल उच्यते ॥ क्षुद्रमो वटकश्चैव द्रंक्षणः स निगद्यते ॥ कोलद्वयं
च कर्षः स्यात्स प्रोक्तः पाणिमानिकः ॥ अक्षः पिचुः पाणितलं किंचित्पाणिश्च
तिंदुकं ॥ बिडालपदकं चैव तथा षोडशिका मता ॥ करमध्यो हंसपदं सुवर्णं कवलग्र
हः ॥ उदुंबरं च पर्यायैः कर्ष एव निगद्यते ॥ स्यात्कर्षाभ्यामर्द्धपलं शुक्तिरष्ट
मिका तथा ॥ शुक्तिभ्यां च पलं ज्ञेयं मुष्टिराम्रं चतुर्थिका ॥ प्रकुंचः षोडशी बिल्वं
पलमेवात्र कीर्त्यते ॥ पलाभ्यां प्रसृतिर्ज्ञेया प्रसृतं च निगद्यते ॥ प्रसृतिभ्यामंज
लिः स्यात्कुडवोऽर्द्धशरावकः ॥ अष्टमानं च स ज्ञेयः कुडवाभ्यां च मानिका ॥ शरावो

ष्टपलं तद्वज्ज्ञेयमत्र विचक्षणैः ॥ शरावाभ्यां भवेत्प्रस्थश्चतुःप्रस्थैस्तथाढकः ॥ भाजनं
॥ ई ६० ॥ कंसपात्रं च चतुःषष्टिपलश्च सः ॥ चतुर्भिराढकैर्द्रोणः कलशो नल्वणोऽर्मणः ॥
उन्मानश्च घटो राशिर्द्रोणपर्यायसंज्ञिताः ॥ द्रोणाभ्यां शूर्पकुंभौ च चतुःषष्टिश
रावकः ॥ शूर्पाभ्यां च भवेद्द्रोणी वाहो गोणी च सा स्मृता ॥ द्रोणी चतुष्टयं खा
री कथिता सूक्ष्मबुद्धिभिः ॥ चतुःसहस्रपलिका षण्णवत्यधिका च सा ॥ पलानां
द्विसहस्रं च भार एकः प्रकीर्तितः ॥ तुला पलशतं ज्ञेयं सर्वत्रैवैष निश्चयः ॥ माषटं ल
काक्षबिल्वानि कुडवः प्रस्थमाढकं ॥ राशिर्गोणी खारिकेति यथोत्तरचतुर्गुणं ॥
गुंजादिमानमारभ्य यावत्स्यात्कुडवस्थितिः ॥ द्रवार्द्रशुष्कद्रव्याणां तावन्मानं सम
मतं ॥ प्रस्थादिमानमारभ्य द्विगुणं च द्रवार्द्रयोः ॥ मानं तथा तुलायास्तु द्विगुणं ॥ ई ६० ॥

नक्कचित्स्मृतं॥ मद्वृक्षवेणलोहादेर्भांडेयच्चतुरंगुलं॥ विस्तीर्णं च तथोच्चं च तन्मानं कुडवं वदेत॥ इति मागधमानं॥ अथ कालिंगमानं॥ यतो मंदाग्नयो ह्रस्वा हीनसत्वा नराः कलौ॥ अनश्च मात्रा तद्योग्या प्रोच्यते सुसंमता॥ यवो द्वादशभिर्गौरसर्षपैः प्रोच्यते बुधैः॥ यवद्वयेन गुंजा स्यात्त्रिगुंजो वल्ल उच्यते॥ माषो गुंजाभिरष्टाभिः सप्तभिर्वा भवेत्क्वचित॥ चतुर्भिर्माषकैः शाणः स निष्कः टंक एव च॥ गद्याणो माषकैः षड्भिः कर्षः स्याद्दशमाषकः॥ चतुःकर्षैः पलं प्रोक्तं दशशाणमितं बुधैः॥ चतुःपलैश्च कुडवः प्रस्थाद्याः पूर्ववन्मताः॥ स्थितिर्नास्त्येव मात्रायाः कालमग्निं वयो बलं॥ प्रकृतिं दोषदेशौ च दृष्ट्वा मात्रां प्रकल्पयेत॥ नाल्पं हंत्यौषधं व्याधिं यथांभोल्पं महानलं॥ अतिमात्रं च दोषाय यथा सस्येषु दूदकं॥ इति कालिंगपरिभाषा

॥ ६५१ ॥

अथ भेषजलक्षणं ॥ वैद्यो व्याधिं हरेद्येन तद्द्रव्यं प्रोक्तमौषधं ॥ तद्याद्दशमवश्यं स्याद्द्रो
गघ्नं तादृशं ब्रुवे ॥ तत्रौषधिगृहणे परिभाषा ॥ प्रशस्तदेशे संजातं प्रशस्तेहनि चो
द्धृतं ॥ अल्पमात्रं बहुगुणं गंधवर्णरसान्वितं ॥ दोषघ्नमम्लानिकरमधिकं न विकारि
यत् ॥ समीक्ष्य काले दत्तं च भेषजं स्याद्गुणावहं ॥ आग्नेया विंध्यशैलाद्याः सौम्यो
हिमगिरिः स्मृतः ॥ अतस्तदौषधानि स्युरनुरूपाणि हेतुभिः ॥ आग्नेया अधिका
ग्न्येंशाः ॥ सौम्याः अधिकसोमांशाः ॥ ओषधय एव औषधानि ॥ अनुरूपाणि सदृ
शानि ॥ अन्येष्वपि प्ररोहंति वने उपवनेषु च ॥ गृह्णीयात्तानि सुमनाः शुचिः प्रा
तः सुवासरे ॥ आदित्यसंमुखो मौनी नमस्कृत्य शिवं हृदि ॥ साधारणधराद्द्रव्यं
गृह्णीयादुत्तराश्रितं ॥ साधारणधराद्द्रव्यं सर्वभूमिभवं द्रव्यं ॥ उत्तराश्रितं स्व

॥ ६५१ ॥

स्मादुत्तरदिग्भवं ॥ वल्मीककुत्सितानूपश्मशानोषरमार्गजाः ॥ जंतुवन्हिहिमव्याप्ता
नौषध्यः कार्य्यसाधकाः ॥ सर्व्वाण्यखिलकार्य्यार्थं ग्राह्यं सरसमौषधं ॥ विरेकवमना
र्थंतु वसंतांते समाहरेत ॥ वसंतांते वसंतमध्ये ॥ अतिस्थूलजटायाः स्युस्तासां ग्राह्या
स्त्वचो ध्रुवं ॥ गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान ॥ न्यग्रोधादेस्त्वचो
ग्राह्याः सारः स्याद्बीजकादितः ॥ तालीसादेस्तु पत्राणि फलं स्यात्त्रिफलादितः ॥
क्वचिन्मूलं क्वचित्कंदः क्वचित्पत्रं क्वचित्फलं ॥ क्वचित्पुष्पं क्वचित्सर्वं क्वचित
सारः क्वचित्त्वचः ॥ चित्रकं सूरणं नियोवासावत्रिफलाक्रमात ॥ धातकीकंटको
रीचखदिरः क्षीरिपादपाः ॥ क्वचिन्निंबस्य गृह्णीयात्पत्राभावे त्वचामपि ॥ वा
तं फलं तु विल्वस्य पक्कमारग्वधस्य च ॥ अंगेनुक्ते जटा ग्राह्या भागेनुक्ते वि

॥ ६४२ ॥

तं समं पात्रे न्युक्ते मद्यः पात्रं क्वाले न्युक्ते त्यहं मुखं ॥ नवान्येव हि योज्यानी द्रव्याण्यखि
लकर्मसु ॥ विनाविडंगकृष्णाभ्यां गुडधान्याज्यमाक्षिकैः ॥ धान्यमन्नं ॥ गुडाणां तु प्र
शस्तं स्यात्तांबूलं कांजिकं तथा ॥ शुष्कं नवीनं द्रव्यं तु योज्यं सकलकर्मसु ॥ आर्द्रं तु द्वि
गुणं युंज्यादेव सर्वत्र निश्चयः ॥ गुडूचीकुटजो वासा कूष्मांडं च शतावरी ॥ अश्व
गंधा सहचरी शतपुष्पा प्रसारिणी ॥ प्रयोक्तव्याः सदैवार्द्रा द्विगुणा नैव कारयेत
क्कचिं च ॥ वासानिंबपटोलकैतकबलाकूष्मांडकेंद्रीवरीवर्षाभूकुटजाश्वकंदसहिताः
स्पूतिगंधामृता ॥ मांसीनागबलाकुरंटकपुरैः हिंग्वार्द्रकं चेक्षवं ग्रप्खीयास्ते
रसान्यमूनि न पुनः कुर्याद्विभागानि च ॥ ऐंद्री रंद्रवारुणी ॥ पूतिगंधा गंधप्रसा
रिणी ॥ घृतं तैलं च पानीयं कषायं व्यंजनादिकं ॥ पक्वा श्रीतिकृतं तप्तं तत्सर्वस्य ६४२ ॥

द्विषोपमं ॥ अथ संयोगविरुद्धानि ॥ मत्स्यमानूपं मांसं च दुग्धयुक्तं विवर्जयेत् ॥ क
पोतं सार्षपस्नेहभर्जितं परिवर्जयेत् ॥ मत्स्यानिक्षुविकारेण तथा क्षौद्रेण वर्ज
येत् ॥ सक्तून्मांसपयोयुक्तान्मूलकैर्दधि विवर्जयेत् ॥ उष्णेन भोजनात्क्षौद्रं पायसं कृश
रान्वितं ॥ रंभाफलं त्यजेत्तक्रदधिबिल्वफलान्वितं ॥ दशाहमुषितं सर्पिः कांस्ये मधु घृ
तं समं ॥ कृतान्नं च कषायं च पुनरुष्णीकृतं त्यजेत् ॥ एकत्र बहुमांसानि विरुद्धं ते पर
स्परं ॥ मधुसर्पिर्वसातैलपानीयानि यथा तथा ॥ अथ भेषजग्रहणे संकेतः ॥ लवणं
सैंधवं प्रोक्तं चंदनं रक्तचंदनं ॥ चूर्णलेहासवस्नेहाः साध्या धवलचंदनैः ॥ कषाय
लेपयोः प्रायो युज्यते रक्तचंदनं ॥ अंतःसंमार्जने देया ह्यजमोदाजवानिका ॥ बहिः
संमार्जने सैव विस्तात् त्याज्य अजमोदिका ॥ कुसुमजीरकयोगे न कर्तव्ये भक्ष्यभेषजे

६४३

तस्यस्थानेविधातव्योजीरकःकुष्ठसैः सदा ॥ अंतःसंमार्जनेयोज्यंयच्चास्थानेकुलिं
जनं ॥ बहिःसंमार्जनेसैवप्रयोक्तव्यामनीषिभिः ॥ पयःसर्पिःप्रयोगेतुमध्यमेवहि
गृह्यते ॥ शकृद्रसोगोमयजोमूत्रंगोमूत्रमुच्यते ॥ गुणहीनंभवेद्वर्षादूर्ध्वंतद्रूपमौ
षधं ॥ मासद्वयात्तथाचूर्णंहीनवीर्यत्वमाप्नुयात् ॥ तद्रूपंद्रव्यरूपं ॥ वर्षात्संवत्स
रात्तुहीनत्वंगुटिकालेहौलभेतेवत्सरात्परं ॥ हीनाःस्युर्घृततैलाद्याश्चतुर्मासाधिका
त्तथा ॥ घृततैलाद्यइतिप्रयोगविशेषणं ॥ चतुर्मासाधिकाइतिवत्सरादुपरिचत्वारो
मासाअधिकायेषुतेतथा ॥ ओषध्योलघुपाकाःस्युर्निर्वीर्यावत्सरात्परं ॥ पुरा
णाःस्युर्गुणैर्युक्ताआसवाधातवोरसाः ॥ एकमप्यौषधंयोगेयस्मिन्यत्पुनरु
च्यते ॥ मानतोद्विगुणंप्रोक्तंतद्द्रव्यंतत्त्वदर्शिभिः ॥ अथप्रतिनिधिः ॥ चित्रकाभा

६४३

वृतो दंती क्षारः शिखरिजोप्यथवा ॥ अभावे धन्वयासस्य प्रक्षेप्या तु दुरालभा ॥ शिखरी
अपामार्गः ॥ तगरस्याप्यभावे तु कुष्ठं दद्याद्भिषग्वरः ॥ मूर्वाभावे त्वचो ग्राह्या जिंगि
नि प्रभवा बुधैः ॥ अहिंस्राया अभावे तु मानकंदः प्रयुज्यते ॥ लक्ष्मणाया अभावे तु नी
लकंठशिखा मता ॥ वकुलाभावतो देयं कल्हारोत्पलपंकजं ॥ नीलोत्पलस्याभावे तु
कुमुदं देयमिष्यते ॥ जातीपुष्पं न यत्रास्ति लवंगं तत्र दीयते ॥ अर्कपर्णादिपयसो
ह्यभावे तद्रसो मतः ॥ पौष्कराभावतः कुष्ठं तथा सांगस्वभावतः ॥ स्वौरोयकस्याभा
वे तु भिषग्भिर्दीयते गदः ॥ चविका गजपिप्पल्यौ पिप्पलीमूलवत्स्मृते ॥ अभावे सो
मराज्यास्तु प्रपुन्नाटफलं मतं ॥ यदि न स्याद्दारुहरिद्रा तदा देया निशा बुधैः ॥ रसां
जनस्याभावे तु सम्यक् दार्वी प्रयुज्यते ॥ सौराष्ट्याभावतो देया स्फुकातद्गुणा जनैः

॥६४४॥

जातीसपत्रकाभावेस्वर्णजातीप्रशस्यते ॥ मातुलुंगाभावेतुजातीसंकेयकारीजटातथा ॥
रुचकाभावतोदद्यात्सौवर्चलंपांशुपूर्वकं ॥ अभावेमधुपर्ण्यास्तुधातकींचप्रयोजयेत्
अम्लवेतसकाभावेचुक्रंदातव्यमिष्यते ॥ द्राक्षाप्रदिनलभ्येतप्रदेयंकाश्मरीफलं ॥ त
योरभावेकुसुमंमधुकस्यमतंबुधैः ॥ तवंगकुसुमंदेयंनखस्याभावतःपुनः ॥ कस्तू
र्य्याभावेकंकोलंक्षेपणीयंविदुर्बुधाः ॥ कंकोलस्याप्यभावेतुजातीपुष्पंविदुर्बुधाः
सुगंधमुस्तकंदेयंकर्पूराभावतोबुधैः ॥ कर्पूराभावतोदेयंग्रंथिपर्णीविशेषतः ॥ कुं
कुमाभावतोदद्यात्कुसुमंनवं ॥ श्रीखंडंचंदनाभावेकर्पूरंदेयमिष्यते ॥ अभावेत्वे
तयोर्वैद्यःप्रक्षिपेद्रक्तचंदनं ॥ रक्तचंदनकाभावेनवोशीरंविदुर्बुधाः ॥ मुस्ताचाति
विषाभावेशिग्राभावेशिग्रामता ॥ अभावेनागपुष्पस्यपद्मकेसरमिष्यते ॥ मेदा

॥६४४॥

जीवककाकोलीऋद्धिद्वंद्वेपिचासति॥ वरीविदार्यश्वगंधावाराहीश्चक्रमात्क्षिपे
त्॥ वाराह्यास्तथाभावेचर्मकारालुकामता॥ वाराहीकंदसंज्ञस्तुपश्चिमेगृष्टिसंज्ञ
कः॥ वाराहीकंदरूपवान्यैश्चर्मकारालुकोमतः॥ आनूपेसभवेद्देशेवाराहश्वलोम
वान्॥ भल्लातकासहत्वेतुरक्तचंदनमिष्यते॥ भल्लाताभावतश्चित्रंनलंश्रेक्षोरभा
वतः॥ सुवर्णाभावतोवैद्योमाक्षिकंप्रक्षिपेद्बुधः॥ रूप्येतुमाक्षिकंसेयंशुधैरजत
यद्भुवं॥ माक्षिकस्याप्यभावेतुप्रदद्यात्स्वर्णगैरिकं॥ सुवर्णमथवारौप्यंमृतंयत्र
नलभ्यते॥ तत्रलोहेनकर्माणिभिषक्कुर्वीद्विचक्षणः॥ कांताभावेतीक्ष्णलोहंप्रयो
जयेद्वैद्यसत्तमः॥ अभावेमौक्तिकस्यापिमुक्ताशुक्तिंप्रयोजयेत्॥ मधुपत्रंनलभ्ये
ततत्रजीर्णगुडोमतः॥ मत्स्यंडभावतोदद्युर्भिषजःसितशर्करां॥ असंभवेसिताया

६६५

याम्लवुधैः स्वेडं प्रयुज्यते ॥ क्षीराभावे रसो मौद्गो मासूरो वा प्रदीयते ॥ अत्र प्रोक्तानि वस्तूनि
यानि तेषु च ते षु च ॥ योज्यमेकतराभावे परं वैद्येन जानता ॥ किंच वृक्षाम्लं न भवे यत्र
दाडिमाम्लं प्रयोजयेत् ॥ वेतसाम्लस्य चाभावे कृतं तु रांभांब्रं हरिनं पाम्लमादिशेत् ॥
अभावे सति पित्तानां रसादेर्भावना विधौ ॥ विषमुष्टिकषायेण वकुलस्य भावना भ
वेत् ॥ रसवीर्यविपाकाद्यैः समं द्रव्यं विचिंत्य च ॥ युंज्यात्तद्विधमन्यच्च द्रव्याभावे तु
रसादिवित् ॥ योगे यदप्रधानं स्यात्तस्य प्रतिनिधिर्मतः ॥ यत्तु प्रधानं तस्यापि स
दृशं नैव गृह्यते ॥ व्याधेरयुक्तं यद्द्रव्यं गणोक्तमपि तत्त्यजेत् ॥ अनुक्तमपि युक्तं
यद्योजयेत्तद्रसादिवित् ॥ अपमेषजभक्षणसमया न्नेहमैषज्यमभ्यवहरेत्स्व
माते प्रायश्चो बुधः ॥ कषायां स्तु विशेषेण तत्र मे दस्तु दर्शितः ॥ सेयः पंचविधाः का

६४५

ह्नो भैषज्यमाहरेदन्नगं ॥ किंचित्सूर्योदये जाते तथा दिवसभोजने ॥ सायंतने भोजने च
मुहुश्चापि तथा निशि ॥ तत्र प्रथमकालः ॥ प्रायः पित्तकफोद्रेके विरेकवमनार्थयोः
लेखनार्थे च भैषज्यं प्रभातेऽनन्नमाहरेत् ॥ अथ द्वितीयः कालः ॥ भैषज्यं विगुणेऽपाने
भोजनाग्रे प्रशस्यते ॥ अरुचौ चित्रभोज्यैश्च मिश्रं रुच्यमाहरेत् ॥ समानवाते विगुणे
मंदेऽग्नावग्निदीपनं ॥ दद्याद्भोजनमध्ये च भैषज्यं कुशलो भिषक् ॥ व्यानकोपे तु भैष
ज्यं भोजनांते समाचरेत् ॥ हिक्काक्षेपककंपेषु पूर्वमंते च भोजनात् ॥ अथ तृतीयका
लः ॥ उदाने कुपिते वाते स्वरभंगादिकारिणि ॥ ग्रासे ग्रासादिके देयं भैषज्यं सांध्य
भोजने ॥ प्राणे प्रदुष्टे सांध्यस्य भुक्तस्यांते प्रदीयते ॥ औषधं प्रायशो धीरैः कालोयं
स्यात्तृतीयकः ॥ अथ चतुर्थकालः ॥ मुहुर्मुहुश्च तृट्छर्दिहिक्काश्वासगरेषु च

॥ हृ० ८ हृ० ॥

सान्नं च भेषजं दद्यादिति कालस्तु चतुर्थकः ॥ अथ पंचमकालः ऊर्ध्वजत्रुविकारेषु लेख
नेबृंहणे तथा ॥ पाचनं शमने देयमनन्नं भेषजं निशि ॥ इति पंचमकालः ॥ अथायु
र्वेदस्य लक्षणमाह ॥ आयुर्हिताहितं व्याधिर्निदानं शमनं तथा ॥ विद्यते यत्र वि
द्वद्भिः स आयुर्वेदः स उच्यते ॥ आयुर्वेदस्य निरुक्तिमाह ॥ अनेन पुरुषो यस्मादायुर्वि
दति वेत्ति च ॥ तस्मान्मुनिवरैरेष आयुर्वेद इति स्मृतः ॥ आयुर्नाम शरीरजीवयो
गावच्छिन्नः कालः ॥ अथ व्याधेर्लक्षणमाह ॥ रोगस्तु दोषवैषम्यं दोषसाम्यम
रोगता ॥ रोगाः दुःखस्य दातारो ज्वरप्रभृतयो हि ते ॥ ते च स्वाभाविकाः केचित्के
चिदागंतवः स्मृताः ॥ मानसाः केचिदाख्याताः कथिताः कायिकाः ॥ स्वाभा
विकाः सहजाः जन्मांधत्वादयः ॥ आगंतवोऽभिघातादिजनिताः ॥ मानसाः ॥ हृ० ८ हृ० ॥

उन्मादापस्मारमूर्छाभ्रमतमःसंन्यासप्रभृतयः ॥ कायिकापांडुरोगप्रभृतयः कर्म

जाः कथिताः केचिद्दोषजाः संति चापरे ॥ कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः

स्मृताः ॥ कर्मजा यत्प्राक्तनं प्रवलं दुष्कर्म केवलभोजनाश्रयं प्रायश्चित्तनाश्यं यात ततो

जाताः ॥ न तु दुष्टवातादिदोषजनिताः ॥ दोषजा मिथ्याहारविहारप्रकुपितवातपि

त्तकफजाः ॥ कर्मदोषोद्भवाः स्वल्पदोषाज्जातीयांसस्ते ते पाः कर्मदोषजादुक्तल

क्षणाः ॥ कर्मक्षयात्कर्मकृताद्दोषजाः स्वस्वभेषजैः ॥ कर्मदोषोद्भवायांति कर्मदो

षक्षयात्क्षयं ॥ किंच ॥ साध्यायाप्याश्चासाध्याश्च व्याधयस्त्रिविधाः स्मृताः ॥ सुख

साध्यः कृच्छ्रसाध्यो द्विविधः साध्य उच्यते ॥ याप्यलक्षणमाह ॥ यापनीयं तु तं वि

द्यात्क्रिया धारयते हि यं ॥ क्रियायां तु निवृत्तायां सद्य एव विनश्यति ॥ प्राप्ता

॥ हृ ६७ ॥

साध्ययाप्यासाध्यलक्षणानितीसंदोक्तानियथा ॥ एकैकदोषांजनितानिरूपद्रवा
अदीप्तानलस्यचसद्यात्मयतेऽग्रजंतोः ॥ चितान्वितस्यचरुजःसुदुपक्रमेण साध्या
भवतिभिषजामपि रोहृयाथा ॥ ९ ॥ येयावदेवभिषजामगदप्रयोगास्तावत्प्रशांतिमु
पयांतिगदैर्विनाये ॥ प्रादुर्भवंतिचपुनःसहसाहि

क्रियाधारयतिसुखितंयाप्यमातुरं ॥ प्रपतिष्यदिवागारं स्तंभोयत्नेनयोजितः सा
ध्याययाप्यत्वमायांतियाप्याःसाध्यतांतथा ॥ घ्नंतिप्राणानसाध्यास्तुनराणामक्रिया
वतां ॥ अक्रियावतांचिकित्सारहितानां ॥ अथोपद्रवस्यलक्षणमाह ॥ रोगारंभकदो
षस्यप्रकोपादुपजायते ॥ योन्योविकारःसतुधैःरुपद्रवइहोदितः ॥ अथरिष्टस्यल
क्षणमाह ॥ रोगिणोमरणंयस्मादवश्यंभाविलक्ष्यते ॥ तल्लक्षणमरिष्टंस्याद्रिष्टं
चापितदुच्यते ॥ अथचिकित्सायालक्षणमाह ॥ याक्रियाव्याधिहरिणीसाचि ॥ हृ ६७ ॥

दोषास्तावद्द्विधाःस्युरितिप्राप्यतमागन्तास्ते ।२। येकर्मजाःसहभवंतिशरीरिणांहियेचत्रि
दोषजनितास्त्रिरकालजास्त्र ॥ सोपद्रवास्तुतधनस्यचतेगतागन्तेऽस्त्रागदागदेवतामगदैरगम्याः ३

कित्सानिगद्यते ॥ दोषधातुमलानांयासाम्यकृत्सैवरोगहृत ॥ क्रियाकर्म । अपचिकित्सा
विधिर्द्देशः ॥ जातमात्रश्चिकित्स्यःस्यान्नोपेक्ष्योस्पतयागदः ॥ वन्हिशत्रुविषैस्तुल्यःस्व
ल्पोपिविकारोत्वसौ ॥ रोगमादौपरीक्षेततततोनंतरमौषधं ॥ ततःकर्मभिषक्पश्चात ॥
ज्ञानपूर्वंसमाचरेत । ततःपश्चात्रोगौषधीविचारणानंतरं ॥ ज्ञानपूर्वंसावधानःन
त्वयस्तया ॥ कर्मऔषधदानादिरूपांचिकित्सां ॥ रोगज्ञानेचिकित्साकरणेदोषमा
ह । यस्तुरोगमविज्ञायकर्माण्यारभतेभिषक ॥ अप्यौषधविधानज्ञस्तस्यसिद्धिर्यदृ
च्छया ॥ यदृच्छयासिद्धिर्भवतिनापिभवतीत्यर्थः ॥ अन्यच्च ॥ औषधंकेवलंकर्तुंयोजा

॥ ६४८ ॥

नातिनश्यामयं ॥ वैद्यकर्म स चेत्कुर्याद्वधमर्हति राजतः ॥ रोगज्ञाने भेषजाज्ञाने दोषमाह
ये स्तु केवलरोगज्ञो भेषजेष्वविचक्षणाः ॥ तं वैद्यं प्राप्य रोगी स्याद्यथा नौर्नाविकं विना
अन्यच्च ॥ यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भिषक् ॥ स मुह्यत्यातुरं प्राप्य प्राप्या
भीरुरिवाहवं ॥ रोगौषधयोर्ज्ञाने गुणमाह ॥ यस्तु रोगविशेषज्ञः सर्वभैषज्यकोविदः
देशकालविभागज्ञस्तस्य सिद्धिर्न संशयः ॥ आदावतो रुजां ज्ञाने प्रयतेत चिकित्सकः ॥
भेषजानां विधानेष्य ततः कुर्याच्चिकित्सितं ॥ येन कुर्वंत्यसाध्यानां चिकित्सां ते भिषग्ग
राः ॥ आतो वैद्यैः श्रमः कार्यः साध्यासाध्यपरीक्षणे ॥ अथ चिकित्सायाः फलमाह
क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्वचिद्यशः ॥ कर्माभ्यासः क्वचिच्चेति चिकित्सा ना
स्ति निष्फलाः ॥ आयुर्वेदोदितां युक्तिं कुर्वाणा यह हिताश्रये ॥ युक्त्यायुर्वृद्धिसंयुक्तानी ॥ ६४८ ॥

रोगास्य भवंति ते ॥ नैव कुर्वीत लोभेन चिकित्सां पुण्यविक्रियां ॥ ईश्वराणां वसुमतां लिप्से
तार्थं तु वृत्तये ॥ चिकित्सितं शरीरं यो न निष्क्रीणाति दुर्मतिः ॥ स यत्करोति सुकृतं सर्वं
तद्भिषगश्नुते ॥ न देशो मनुजैर्हीनो न मनुष्या निरामयाः ॥ ततः सर्वत्र वैद्यानां सा सिद्धा एव
वृत्तयः ॥ अथ चिकित्सायाश्चतुरंगान्याह ॥ रोगी दूतो भिषग्दीर्घः मातुर्द्रव्यं स सेवकः ॥ स
दौषधं चिकित्सायाश्चत्वंगानि बुधा जगुः ॥ तत्र रोगिलक्षणमाह ॥ रोगो यस्यास्ति रो
गी स स चिकित्स्यस्तु यादृशः ॥ यादृशश्चाचिकित्स्योपि वक्ष्यमाणो निसम्यतां ॥ तत्र
चिकित्स्यः ॥ आयुष्मान् सत्ववान् साध्यो द्रव्यवान् मित्रवानपि ॥ चिकित्स्यो भिषजा
रोगी वैद्यवाक्यकृदास्तिकः ॥ अथाचिकित्स्यः ॥ चंडः साहसिको भीरुः कृतघ्नो व्यग्र ए
व च ॥ शोकाकुलो मुमूर्षुश्च विहीनः करणैस्तथा ॥ वैरी वैद्यविदग्धश्च श्रद्धाहीन

९४८

शंसंकितः ॥ भिषजामविधेयास्फनोपक्रम्याभिषग्विधः ॥ एतानुपाचरन्वैद्योवहून्
दोषानवाप्नुयात् ॥ चंडोऽत्यंतक्रोधशीलः ॥ साहसिकः अविचार्य्यकारी ॥ कृतघ्नः वै
द्यकृतोपकारहृतोपकः ॥ व्यग्रः व्याकुलचितः ॥ करः सौम्यविहीनः नेत्राद्यैंद्रियशक्तिरहि
तः ॥ वैद्यविद्विष्टैः वैद्यद्वेष्टृभिः ॥ शंकितो वैद्यविश्वासरहितः ॥ भिषजामविधेयावैद्यवच
नाविधायिनः ॥ भिषग्विधावैद्यतुल्याः ॥ एतेनोपक्रम्यानचिकित्स्याः ॥ अथदूतः ॥ य
श्चिकित्सकमानेतुंयाति दूतः सकथ्यते ॥ सचयादृक्समुचितस्तादृगनिगद्यते ॥ दूताः
सुजातयोव्यंगाः परियोनिर्मलांवराः ॥ सुखिनोऽश्ववृषारूढाः सुकुपुष्पफलैर्युताः ॥
सजातयः सुचेष्टाश्चसजीवदिंक्षिसंगताः ॥ भिषजंसमयेप्राप्तारोगिणाः सुखहेत
वः ॥ सजातयः रोगिसमानजातयः ॥ यस्यांप्राणामरुद्याति सानाडीजीवसंज्ञिता ॥ अ ॥ ९४८ ॥

यदूतस्य यात्रायां शकुन विचारः ॥ वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते ॥ नष्टशुभं
सौम्यशकुनं प्रदीप्तं तु सुखावहं ॥ प्रदीप्तं अग्निः ॥ दूतो रोगी च रिक्तहस्तो वैद्यं न पश्ये
त् ॥ अपाच ॥ रिक्तहस्तो न पश्येत राजानं भिषजं गुरुम् इति ॥ अथ वैद्यस्य लक्षणं ॥ चि
कित्सां कुरुते यस्तु स चिकित्सक उच्यते ॥ स च पादश्च समीचीनः स्याद्दक्षो पि निगद्यते ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयंकृती ॥ लघुहस्तः शुचिः शूरः सज्जोपस्करभेष
जः ॥ प्रत्युत्पन्नमतिर्धीमान् व्यवसायी प्रियंवदः ॥ सत्यधर्मपरो यश्च वैद्य ईदृक् प्रश
स्यते ॥ दृष्टकर्मा दृष्टं परेणाकृतं कर्म चिकित्सा येन सः ॥ स्वयं कृती स्वयं चिकित्सा कु
शलः ॥ लघुहस्तः सिद्धिमद्धस्तः ॥ अथ निषिद्धवैद्यलक्षणं ॥ कुचैलः कर्कशः स्तब्धो ग्रा
मीणः स्वयमागतः ॥ पंच वैद्या न पूज्यंते धन्वंतरिसमा अपि ॥ कर्कशः अप्रियवा

॥६५०॥

दी॥स्तब्धः साभिमानः॥ग्रामीणः व्यवहारचतुरः॥अथ वैद्यस्य कर्माह॥व्याधेस्तत्वप
रिज्ञानं वेदनायाश्च निग्रहः॥एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः॥व्याधेस्तत्वपरिज्ञा
ने सम्यक्परिचयः॥वेदनायाश्च निग्रहः व्यथाशांतिकरणं॥अथायुर्विचारः॥भिषगादौ
परीक्षेत रुग्णस्यायुः प्रयत्नतः॥यतश्चायुषि विस्तीर्णे चिकित्सा सफला भवेत्॥तत्र दी
र्घायुयो लक्षणानि॥सौम्या दृष्टिर्भवेद्यस्य श्रोत्रं वक्रं तथैव च॥स्याद्दुर्गंधं विजानाति स
साध्यो नात्र संशयः॥पाणिपादौ च यस्योष्मौ दाहत्वस्य तरो भवेत्॥जिह्वा सुकोमला य
स्य स रोगी न विनश्यति॥स्वे देहीनोच्छ्वरो यस्य श्वासो नासिकया सरेत्॥कंठश्च कफही
नः स्यात् स रोगी जीवति ध्रुवं॥अथ स्वस्यायुषो लक्षणानि॥शरीरश्चीतयोर्यस्य प्रकृ
ते विकृतिर्भवेत्॥तदनिष्टं समासेन व्यासतश्च निबोध मे॥यो न पश्यति ऋक्षाणि॥६५०॥

पश्च देवी महेंधतीं ॥ ध्रुवमाकाशगंगां च तं च दंतिगतायुषं ॥ नाहरत्यन्नमास्यस्थं नधा
रयति यः शिरः ॥ एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान् समुंचति ॥ निद्रां निरंतरं यस्य यो
वा जागर्त्ति सर्वदा ॥ मुह्येद्वाक्तु कामश्च प्रत्याख्येयः स जानता ॥ सम्यक् चिकित्स्यमान
स्य विकारो यो भिवर्द्धते ॥ प्रक्षीणबलमांसस्य लक्षणं तद्गतायुषः ॥ नन्वायुषि सति चि
कित्साया साफल्यमुक्तं ॥ आयुश्चेदस्ति तदा तदेव जीवनहेतुः ॥ किं चिकित्साविधानेन
तत्रोच्यते ॥ आयुषि सति चिकित्साया फलं वैद्यानिग्रहः ॥ उक्तं च आयुष्मान् पुरुषो
जीवेत्सव्यथो भेषजं विना ॥ भेषजेन पुनर्जीवेत्स एव हि निरामयः ॥ किंच ॥ आयुषि स
त्यपि रोगी चिकित्सां विना स्वास्थ्यं न प्राप्नोति ॥ यत आह चरकः ॥ सति चायुषि नोपायं
विना स्वास्थ्यं क्षमा हरजी ॥ दृष्टिं तस्मात्र दृष्टां तः पंकलग्नो महागजः ॥ किं च चिकित्सां

६५१ ॥

विना पुष्पान्व्यवसीदति ॥ यत आह सत्यव ॥ सति चायुषि नष्टः स्याद समवैष्ण्याचिकित्सि
तः ॥ यथा सत्यपि तैलादौ दीपो निर्वातीति व्याख्या ॥ अत एवोक्तं साध्यायाप्यल्पमायांतीत्याह
चिकित्सात्यनिष्फलताप्रयोपि कर्तव्या ॥ यत आह तायत्प्रतिक्रियाकार्य्या यावदुच्छ्वसिति
मानवः ॥ कदाचिद्दैवयोगेन दृष्टारिष्टोपि जीवतीति ॥ एतद्दुपस्यासाध्यत्वे संदिग्धं तं
प्रत्युक्तं ॥ येषांत्वसाध्यता शास्त्रेणानुभवेन च विनिश्चिता ते पुनर्न चिकित्स्याः ॥ यत उ
क्तं ॥ संदेह्यास्तेन येऽसाध्यानारभंते चिकित्सितुमिति ॥ अथ द्रव्यं ॥ सर्वे द्रव्यमपेक्षंते रो
गिप्रमुतयो यतः ॥ विना वित्तं न भैषज्यं चिकित्सां गततो धनं ॥ अथ परिचारकस्य ल
क्षणं ॥ स्निग्धोजुगुप्सुर्बलवान्युक्तो व्याधितरक्षणे ॥ वैद्यवाक्यकृदश्रांतो युज्यते प
रिचारकः ॥ स्निग्धः प्रीतः ॥ अजुगुप्सुः अनिंदकः ॥ स तैः बधं तु वैद्यो व्याधिं हरेच्च ॥ ६५१ ॥

नेत्यादिना पूर्वैउक्तं नेच ॥ अथ चिकित्सार्थं रोगिणः परीक्षा ॥ नेत्र नेत्रपरीक्षा ॥ नेत्रं
स्यात्स्वयं नादुःखं धूम्रवर्णं तथारुणं ॥ कोटरांतःप्रविष्टं च तथास्तब्धविलोकनं ॥ हरि
द्राखं वर्णं वा रक्तं वा हरितं तथा ॥ दीपद्वेषि सदाहं च नेत्रं स्यात्पित्तकोपतः ॥ चक्षुर्व
ला सवाहुस्यात् स्निग्धं स्यात्स सलिलप्लुतं ॥ तथा धवलवर्णं च ज्योतिर्हीनं वलान्वितं
नेत्रं हि दोषबाहुस्यात्स्यात्श्लेषदूषलक्षणं त्रिदोषलिंगसंघेन तन्मारयति रोगिणं
त्रिदोषदूषितं नेत्रमंतर्मग्नं भृशं भवेत् ॥ त्रिलिंगं सलिलविप्रांते नेत्रं मूलयत्यपि ॥ अ
थ नाडीपरीक्षा ॥ पुंसो दक्षिणहस्तस्य स्त्रियो वामकरस्य च अंगुष्ठमूलगां नाडीं परी
क्षेत भिषग्वरः ॥ अंगुलीभिस्तु तिसृभिर्नाडीमवहितः स्पृशेत ॥ तच्चेष्टया सुखं दुः
खं जानीयात्कुशलो भिषक् ॥ सद्यः स्नातस्य सुप्तस्य क्षुत्तृष्णातपसीतिनः ॥ व्या

६५२

यामध्यां तदेहस्य सम्यक् नाडी न बुध्यते ॥ वाते धिके भवेन्नाडी प्रव्यक्ता तर्जनीतले ॥ पित्ते व्यक्ता
मध्यमायां तृतीयांगुलिगा कफे ॥ तर्जनीमध्यमामध्ये वातपित्ते धिके स्फुटा ॥ अनामिका
यां तर्जन्यां व्यक्ता वातकफे भवेत् ॥ मध्यमानामिकामध्ये स्फुटा पित्तकफे धिके ॥ अंगु
लित्रितये पि स्याद्व्यक्ता सन्निपातिनः ॥ वाताद्वक्रगतिर्नाडी पित्तादुत्प्लुत्यगामिनी
कफान्मंदगतिर्ज्ञेया सन्निपातादतिद्रुता ॥ वक्रमुत्प्लुत्य चलति धमनी वातपित्ततः ॥
वहेद्वक्रं च मंदं च वातश्लेष्माधिकत्वतः ॥ उत्प्लुत्य मंदं वहति नाडी पित्तकफे धिके ॥
कामात्क्रोधाद्वेगवहा क्षीणा चिंताभयप्लुता ॥ स्थित्वा स्थित्वा चलेद्या सा हंति स्थानच्यु
ता तथा ॥ अतिक्षीणा च शीता च प्राणान्हंति न संशयः ॥ ज्वरकोपेन धमनी सोष्मा वे
गवती भवेत् ॥ मंदाग्नेः क्षीणधातोश्चा सैव मंदतरा भवेत् ॥ चपला क्षुधितस्य स्या ॥ ६५२ ॥

तत्वस्य भवति स्थिरा ॥ सुखिनो पि स्थिरास्ते या तथा च लघुती भवेत् ॥ अथ मूत्रपरीक्षा
धारामाद्यां विहायोर्ध सिविमलतमे भाजने रोगिजंतोर्धृत्वा तिस्यै र्प्यउक्तं विषगति
निपुणः संपरीक्षेत मूत्रं ॥ विंदुं तैलस्य दत्वा तदुपरि विततेतत्र साध्यो प्य कृच्छ्रात्स्या
ध्यः पिंडाय मानेतदनु तलगते स्यान्न सिद्धो प्यसिधः ॥ वातेन पांडुरं मूत्रं रक्तं नीलं च
पित्ततः ॥ रक्तमेव भवेद्रक्तात् द्रवतं फेनिलं कफात् ॥ वातज्वरसमुद्भूतं मूत्रं कुंकुमपिंज
रं ॥ पीतवर्णं च जायेत मूत्रं पित्तज्वरे सति ॥ कफे पल्वलनीरस्य तुल्यं मूत्रं प्रजायते ॥
अजीर्णं प्रभवे रोगे मूत्रं तंदुलतोयवत् ॥ संघने च कृते मूत्रं पीतवर्णं प्रजायते ॥ क्षय
रोगे च यन्मूत्रं पीतं पांडौ च पांडुरं ॥ क्षयरोगे यदा स्वेतं तमसाध्यं विनिर्दिशेत् ॥ तै
लविंदुर्यदा मूत्रे याति नीसदृशो भवेत् ॥ कुलदोषो ध्रुवं तस्य पंश्नेत दोषसमुद्भवैः

॥ ६५३ ॥

नराकारं प्रजायेत किंवा स्यान्मस्तके द्वयं ॥ मृतदोषं विजानीयाद्भूतविद्यां समाचरेत् ॥ आ
ध्यासाध्यव्याधिलक्षणं ॥ निद्रानाशो निशायां प्रभवति च तथा कंठकूपे बलासो देहे
दाहोऽतिसूक्ष्मात्तपुरप्पधमनी प्रपछ्वलंती च जिव्हा ॥ हीयंते यस्य शीघ्रं बलदहनमनः
शक्तयः सेंद्रियाणां सहैव ज्वंवदंति स्मरणमिह बुधाः केवलं रामनाम्नां ॥ अथ दीप
नादयो गुणाः सलक्षणानि ख्यंते ॥ पचेन्नामं वह्निकृच्च दीपनं तद्यथा मिशिः ॥ वह्नि
कृत् वह्निदीप्तिकृत् ॥ ननु पदहृन्हिं प्रदीपयति तदामं कथं नु पचेदित्याकांक्षायामुच्य
ते ॥ दीपनं द्रव्यं तावत्तु वह्निं प्रदीपयति यो भोक्तुमिच्छामुत्पादयति ॥ नत्वामं पक्तुं स
क्षमः ॥ यथा सूक्ष्मदीपाग्निरुद्योतं करोति न तु च हस्थालीस्थां स्तंडुलानोदनं कर्तुं क्ष
मस्तद्वत् ॥ पचत्यामं न वह्निं च कुर्याद्यत्तद्धि पाचनं ॥ नागकेसरवद्विद्याच्चित्रो दी

॥ ६५३ ॥

पनपाचनः ॥ ननुयद्वह्निंनदीपयतितदामंकथंपचतीत्याकांक्षायामाह ॥ पाचनंवह्नि
दीप्तिमकुर्वाणमप्यामंपाचयतियथाग्न्याधानीस्थोंगाररसमूहोन्नंपचतिनतुदीप
यत्सर्वतश्चमदीपयतितद्वत् ॥ नशोधयतियद्दोषान्समान्नोदीरयत्यपि ॥ समीकरो
तिसंवृद्धान्शमनंतद्यथामृता ॥ यद्द्रव्यंदोषान्नशोधयतिनोर्ध्वाधोमार्गाभ्यामान
पतिसमान्दोषान्नोदीरयतिनवर्द्धयतितच्छमनं ॥ कृत्वापाकंमलानांयद्भित्वाबंध
मधोनयेत् ॥ तच्चानुलोमनंज्ञेयंयथाप्रोक्ताहरीतकी ॥ मलानांअपक्वानांवातपि
त्तश्लेष्मणां ॥ बंधंवाप्यबंधंभित्वाअधोनयेत्मलान्अधःपातयति ॥ पक्तव्यं
यदपक्वयश्लिष्टंकोष्ठेमलादिकं ॥ नयत्यधःस्रंसनंतद्यथास्यात्कृतमालकः ॥ मला
दिकमित्यत्रआदिशब्दात्कफपित्ते ॥ मलादिकमबद्धंयद्बद्धंवापिंडितंमलैः ॥ भित्वा

६५४

धःपातयति तद्भेदनं कुटकी यथा ॥ अवद्धं शिथिलं ॥ वद्धं गाढं ॥ मलैर्दोषैः ॥ तत्रपियातैः ॥
वहुत्वमाधिक्ययोधनार्थं ॥ पिंडितं गुटकीकृतं ॥ विपक्वं यदपक्वं वा मलादि द्रवतां नये
त् ॥ रेचयत्यपि तज्ज्ञेयं रेचनं त्रिवृता यथा ॥ रेचयत्यपि अधःपातयति च ॥ अपक्वपि
त्तश्लेष्माणौ बलादूर्ध्वं नयेत्तु यत् ॥ वमनं तद्धि विज्ञेयं मदनस्य फलं यथा ॥ ऊर्ध्वं नयेत्
मुखमार्गेण बहिः कुर्यात् ॥ स्थानाद्बहिर्नयेदूर्ध्वमधो वा मलसंचयं ॥ देहसंशोधनं ।
तत्स्याद्देवदालीफलं यथा ॥ दीपनं पाचनं यत्स्यादुष्णत्वाद्द्रवशोषकं ॥ ग्राहि तच्च यथा
शुंठी जीरकं गजपिप्पली ॥ रौक्ष्यात् शैत्यात्कषायत्वाल्लघुपाकाच्च यद्भवेत् ॥ वातकृ
त्स्तंभनं तत्स्याद्यथा वत्सकटुंटुकौ ॥ वातकृत् प्रतिलोमवातकृत् ॥ स्तंभनं अधोगा
मिमलादीनां ॥ श्लिष्टान्कफादिकान्दोषानुन्मूलयति यद्बलात् ॥ छेदनं तद्यथा ॥ ६५४ ॥

क्षारा मरिचानि शिलाजतु ॥ धातून्मलान्वादेहस्य विशोष्योल्लेखयेच्च यत् ॥ लेखनं तद्य
था क्षौद्रं नीरमुष्णं वचयवाः ॥ उल्लेखयेत्तत्कर्शीकुर्यात् लेखनं कर्शीकारकं ॥ यवाः इं
द्रयवाः ॥ यस्माद्द्रव्याद्भवेत्स्त्रीषु हर्षो वाजीकरं हि तत् ॥ यथाश्वगंधा मुशली शर्करा च
शतावरी ॥ हर्षो रेतमुत्साहः यस्माच्छुक्रस्य वृद्धिः स्यात् शुक्रलं हि तदुच्यते ॥ यथा नाग
बलाद्याः स्युर्बीजं च कपिकच्छुजं ॥ दुग्धं माषाश्च भल्लातफलमज्जामलानि च ॥ एता
नि जनकानि स्फुरेचकानि च रेतसः ॥ जनकानि प्रभावाद्धीघ्रमेव रसाशुस्यात्स्तनपूर्व
कं शुक्रं जनयेत्ति ॥ रेचकानि आधिक्यात्प्रवर्त्तयेति च ॥ प्रवर्तिनी स्त्री शुक्रस्य रेचने
वृहतीफलं ॥ जातीफलं स्तंभकं स्यात्क्रालिंगं छत्रपकारि च ॥ स्त्रीस्मरणं कीर्त्तनदर्श
नसेभावबलात्स्पर्शनचुंबनालिंगननिधुवनैः समसैर्वर्त्तैश्च शुक्रस्य प्रवर्त्तिनी

प्रवृत्तिकारिणी ॥ रेचनं बृहतीफलमिति बृहत्कंटकारीफलमपि शुक्रस्य रेचनं प्रवर्त्तकं ॥
रसायनं तु तज्ज्ञेयं यज्जराव्याधिनाशनं ॥ यथामृता रुदंती च गुग्गुलुश्च हरीतकी ॥ पूर्वं
व्याप्याखिलं कायं ततः पाकं च गच्छति ॥ व्यवायि तद्यथा भंगा फेनं चाहिसमुद्भवं ॥ अ
न्यद्रव्यं पक्वं सत्स्वगुणं करोति व्यवायि तु अपक्वमेव स्वगुणैः सकलशरीरं व्याप्य
पाकं याति ॥ संधिबंधांस्तु शिथिलान् यत्करोति विकाषि तत् ॥ विश्लेष्यौजश्च धातु
भ्यो यथा क्रमुककोद्रवाः ॥ धातुभ्यः सकलशरीरस्थेभ्यो वीर्येभ्यः ॥ ओजश्च धातु
विशेषं ॥ बुद्धिं लुंपति यद्द्रव्यं मदकारि तदुच्यते ॥ तमोगुणप्रधानं च यथा मद्यं सुरा
दिकं ॥ मदकारि मादकं ॥ व्यवायि च विकाषि स्यात् सूक्ष्मं छेदि मदावहं ॥ आग्नेयं जी
वितहरं योगवाहि स्मृतं विषं ॥ व्यवायि सकलकायगुणव्यापनपूर्वकपाकगा

मतं शीतं ॥ विकाषिओजः शोषणपूर्वकसंधिबंधशिथिलीकरणशीलं ॥ मदावहं त
मोगुणाधिक्येनवुद्धिविध्वंसकं ॥ आग्नेयं अधिकाग्न्यंशं ॥ योगवाहि संयोगिगुणग्रा
हकं ॥ विषंलक्ष्यं ॥ दृष्टांतो वत्सनाभादिः ॥ निजवीर्येणयद्द्रव्यं स्रोतोभ्यो दोषसंचयं ॥ नि
रस्यति प्रमाथि स्यात्तद्यथा मरिचं वचा ॥ दोषावातद्रवः ॥ पैछिल्याद्गौरवाद्द्रव्यं रुद्ध्वा
रसवहाः शिराः ॥ धत्ते यद्गौरवं तत्स्यादभिष्यंदि यथा दधि ॥ गौरवं शरीरे ॥ विदाहि
द्रव्यमुद्गारमम्लं कुर्यात्तथातृषां ॥ हृदि दाहं च जनयेत्पाकं गच्छति तच्चिरात ॥ गृह्णा।
ति योगवाहि द्रव्यं संसर्गिवस्तुगुणान् ॥ पवमानवद्यथैतन्मधुजलतैलाज्यसूत
लोहादि ॥ अथ द्रव्यगतपदार्थपंचकमाह ॥ द्रव्ये रसो गुणो वीर्यं विपाकः शक्ति।
रेव च ॥ पदार्थाः पंच तिष्ठंति स्वं स्वं कुर्वंति कर्म च ॥ तत्र रसाः ॥ रसाः स्वाद्वम्लल

६६

तत्राद्यातेषु रसेषु मध्ये आद्यास्त्रयो रसाः स्वाद्वम्ललवणा मरुतं घ्नंति ॥ तिक्तादयस्तिक्तोषण
कषायाः कफं घ्नंति ॥ कषायतिक्तमधुराः पित्तं घ्नंति ॥ अन्ये तु कुर्वत इति त्रिष्वपि योज्यं ॥ ते
न तिक्तोषणकषायाः वायुं कुर्वंति स्वाद्वम्ललवणाः कफं ॥ अम्ललवणकटुकाः पित्तं ॥ अ
तएव ते ते रसास्तत्र तत्र संतीत्यनुमेयं

णाः तिक्तोषणकषायकाः ॥ षड्द्रव्यमाश्रितास्ते च यथापूर्वं बलावहाः ॥ उषणाः कटुः
मारुतं घ्नंति त्रयस्तिक्तादयः कफं ॥ कषायतिक्तमधुराः पित्तमन्ये तु कुर्वते ॥ ये रसा वात
शमना भवंति यदि तेषु वै ॥ रौक्ष्यलाघवशैत्यानि न ते हन्युः समीरणं ॥ ये रसाः पित्त
शमना भवंति यदि तेषु वै ॥ तैक्ष्ण्यौष्ण्यलघुताश्चैव न ते तत्कर्मकारिणः ॥ ये रसाः श्ले
ष्मशमना भवंति यदि तेषु वै ॥ स्नेहगौरवशैत्यानि न ते हन्युः कफं तदा ॥ तत्र मधुरर ॥ ६५६ ॥

उक्तं च कपिलेन ॥ पित्तं कट्वम्ललवणं स्वाद्वम्ललवणः कफः ॥ कषायतिक्तकटुको वायुर्दृष्टो नु
मानत इति ॥ इति हेमाद्रिकृतटीकायां
सस्य गुणाः ॥ मधुरो हि रसः शीतो धातुस्तन्यबलप्रदः चक्षुष्यो वातपित्तघ्नः कुर्यात्स्थौ
ल्यमलक्रमीन् ॥ बालवृद्धक्षतक्षीणवर्णकेशेंद्रियौजसां ॥ प्रशस्तो बृंहणः कंठ्यो ग
रुः संधानकृन्नतः ॥ विषघ्नः पिच्छिलश्चापि स्निग्धः प्रीत्यायुषो हितः ॥ अथाम्लस्य
गुणाः ॥ रसोम्लः पाचनो रुच्यः पित्तश्लेष्मास्रदो लघुः ॥ लेखितोष्णो बहिः शीतः क्ले
दनः पवनापहः ॥ स्निग्धः तीक्ष्णः सरः ॥ शुक्रविबंधानाहदृष्टिहा ॥ हर्षणो रोमदंता
नामक्षिभ्रूविनिकोचनः ॥ लेखितो लेखनः ॥ बहिः शीतः स्पर्शे शीतः ॥ विनिकोचनः
अथ लवणस्य गुणाः ॥ लवणः शोधनो रुच्यः पाचनः कफपित्तदः ॥ पुंस्त्ववातहरः
कायशैथिल्यमृदुताकरः ॥ वक्त्रघ्नश्चास्यमलदः कपोलगलदाहकृत ॥ अथ कटुस्य

गुणाः ॥ कटुरुष्णस्तथा तीक्ष्णो रूक्षोऽथ विशदो वातपित्तकृत् ॥ श्लेष्महृद्दीपनो रोगनेत्रः कृमिकंडू
विषापहः ॥ रूक्षस्तन्यहः स्थूलापि मेदः स्थौल्यापकर्षकृत् ॥ अम्लदो नासिकास्याक्षि
जिह्वाग्रे छेदको मतः ॥ दीपनः पाचनो रुच्यो नासिकाशोषणो भृशं ॥ क्लेदमेदोव
सामज्जशकृन्मूत्रोपशोषणः ॥ स्रोतःप्रकाशको रूक्षो मेध्यो वर्द्धौ विविंधकृत् ॥ १
अथ तिक्तस्य गुणाः ॥ तिक्तः शीतस्तृषामूर्छाज्वरपित्तकफान्जयेत् ॥ कृमिकुष्ठ
विषोत्क्लेशदाहरक्तगदापहः ॥ रुच्यः स्वयमरोचिष्णुः कंठस्तन्यास्यशोधनः ॥ वात
लोऽग्निकरो नासाशोषणो रूक्षणो लघुः ॥ रुच्यः अन्येषु वस्तुषु रुच्युत्पादकः ॥
स्वयमरोचिष्णुः यथा निंबः स्वयं न रोचकः अन्येषु वस्तुषु रुच्युत्पादकः ॥ अथ
कषायगुणाः ॥ कषायो रोपणो ग्राही स्तंभनः शोधनस्तथा ॥ लेखनः पीडनः सौ

स्यः श्लेष्मलो वातकोपनः ॥ कफशोणितपित्तघ्नो रूक्षः शीतो लघुर्मतः ॥ त्वक्साध
नस्यामस्य स्तंभनो विशदो मतः ॥ जिह्वायां जाड्यकृत्कंठस्रोतसां च विबंधकृत् ॥ लेप
णः; व्रणस्य स्तंभनो गात्राणां ॥ शोधनो व्रणस्य ॥ हितवनो व्रणाद्युत्सन्नमांसानां ॥
श्लेषणो व्रणमेहादीनां ॥ पीडनो हृदयस्य वातकारित्वात् ॥ सौम्यः सोमदुत्पन्नः ॥
मधुरादीनामपरेऽपि विशेषाः ॥ मधुरं श्लेष्मलं सर्वमृते शालेः पुरातनात् ॥ मुद्गात्
गोधूमतः क्षौद्रात् सितायाजांगलामिषात् ॥ अम्लं पित्तकरं प्रायो विना धात्रीं च दा
डिमं ॥ लवणं प्रायशो दृष्टिनेत्रयोः सैंधवं विना ॥ प्रायः कटु तथा तिक्तमवृष्यं वात
कोपनं ॥ शुंठीकृष्णारसोनानि पटोलममृतां विना ॥ प्रायश्च स्तंभनं प्रोक्तं कषाय
मभयां विना ॥ सामान्येनात्र निर्दिष्टा गुणाः षड्रससंभवाः ॥ रसानां योगतस्तुस्या

॥६५८॥

द्रव्य एव गुणोदयः ॥ संयोगाद्विषतां याति सममाज्येन माक्षिकं ॥ अमृतत्वं विषं याति
सर्वद्रव्यस्य वै यथा ॥ अथ गुणाः ॥ लघुर्गुरुस्तथा स्निग्धो रूक्षस्तीक्ष्ण इति क्रमात्
नभोभूवारिवातानां वन्हेरेते गुणाः स्मृताः ॥ अथ लघ्वादिगुणवतां गुणाः ॥ लघुप
थ्यं परं प्रोक्तं कफघ्नं शीघ्रपाकि च ॥ लघुद्रव्ये एवं गुर्वादिगुरु वातहरं पुष्टिश्लेष्मकृ
च्चिरपाकि च ॥ स्निग्धं वातहरं श्लेष्मकारि वृष्यं बलावहं ॥ रूक्षं समीरणकरं परं कफ
हरं मतं ॥ तीक्ष्णं पित्तकरं प्रायो लेखनं कफवातहृत् ॥ अथ वीर्यं ॥ उष्णशीतगुणोत्क
र्षात्तत्र वीर्यं द्विधा स्मृतं ॥ यत्सर्वमग्निषोमीयं दृश्यते भुवनत्रयं ॥ अथ तद्गुणाः ॥ उ
ष्णं वातकफौ हन्यात्पित्तं तु तनुते तरां ॥ शीतं वातकफातंकान्कुरुते पित्तहृत्परं ॥ अन्यच्चे
तत्रोष्णं भ्रममतृड्ग्लानिस्वेददाहाशुपाकिताः ॥ शमं च वातकफयोः करोति शि ॥६५८॥

शिरः पुनः ॥ ह्लादनं जीवनं स्तंभं प्रसादं रक्तपित्तयोः ॥ अथ विपाकः ॥ जाठरेणाग्निना यो
गाद्यदुदेति रसांतरं ॥ रसानां परिणामांते स विपाक इति स्मृतः ॥ मिष्टः पटुश्च मधुरम
म्लोम्लं पच्यते रसः ॥ कटुतिक्तकषायाणां पाकः स्यात्प्रायशः कटुः ॥ तदुक्तं ॥ त्रिधा रसा
नां पाकः स्यात्स्वाद्वम्लकटु तदात्मकः ॥ प्रायः पदेन ब्रीहिः स्वादुरम्लविपाकः ॥ शिवा क
षाया मधुरपाका ॥ शुंठी कटुका मधुरपाकेत्यादि ॥ अथ विपाकानां गुणाः ॥ श्लेष्मकृ
न्मधुरः पाको वातपित्तहरो मतः ॥ अम्लस्तु कुरुते पित्तं वातश्लेष्मगदापहः ॥ कटुकरो
ति पवनं कफं पित्तं च नाशयेत ॥ विशेष एष रसतो विपाकानां निदर्शितः ॥ अथ प्रभा
वः ॥ रसादिसाम्ये यत्कर्म विशिष्टं तत्प्रभावजं ॥ दंती रसाद्यैस्तुल्यापि चित्रकस्य विरेच
नी ॥ मधुकस्य च मृद्वीका घृतं क्षीरस्य दीपनं ॥ अन्यच्च ॥ प्रभावस्तु यथा धात्री ते

॥ ८६ ॥

कुचस्वरसादिभिः॥ समाधिकुरुते दोषत्रितयस्य विनाशनं॥ क्वचित् केवलं द्रव्यं कर्म कु
र्यात् प्रभावतः॥ ज्वरं हंति शिरोबद्धा सहदेवी जटा यथा॥ तथा नानौषधियोगेषु फलं प्र
तिस्वभावतः ॥ वाच्यमवलीयो न तु तत्र रसादिरूपहेतुविचारः कर्त्तव्यः॥ यत आह सुश्रुतः
अमीमांस्यान्यचिंत्यानि प्रसिद्धानि स्वभावतः॥ आगमेनोपयोज्यानि भेषजानि विच
क्षणैः॥ प्रत्यक्षलक्षणफलाः प्रसिद्धाश्च स्वभावतः॥ नौषधीर्हेतुभिर्विद्वान् परीक्षे
त कदाचन॥ निरद्ध्रगणसंयोगे भूयसा स्वं हि जीयते॥ रसं विपाकस्तौ वीर्यं प्रभावस्ता
न्व्यपोहति॥ अपक्वस्तु चयी॥ चयकोपशमा यस्मिन् दोषाणां संभवंति हि॥ स तु
षड्ढं तदा ख्यातं रवेराशिषु संक्रमात्॥ ग्रीष्मो मेषवृषौ प्रोक्तः प्रावृण्मिथुनकर्कटौ॥ ८५
सिंहकन्ये स्मृता वर्षास्तुला वृश्चिक कौ शरत्॥ धनुर्ग्राहौ च हेमंतो वसंतः कुंभमीनौ

नकौ ॥ मेषवृषौ रविराग संक्रातौ एवं मिथुनकर्कटावित्यादि ॥ अन्येतु ॥ शिशिरः पुष्प
समयो ग्रीष्मो वर्षा शरद्धिमः ॥ माघादिमासयुग्मैः स्युरृतवः षडक्रमादमी ॥ उत्तराय
णमाघैस्तैः परैः स्याद्दक्षिणायनं ॥ आयमुत्संचयत्यहरं ततोन्यद्दत्तदं हिमं ॥ हेमंतः शी
तलः स्निग्धः स्याद्दुर्जठरवन्हिकृत ॥ स्वादुः प्रायेण द्रव्येषु स्वादुरसजनकः ॥ एवमन्य
त्रापि योद्धव्यं ॥ वसंतो मधुरः ॥ स्निग्धः श्लेष्मवृद्धिकरश्च सः ॥ ग्रीष्मो रूक्षोतिकटुकः
पित्तकृत्कफनाशनः ॥ वर्षा शीता विदाहिन्यो वन्हिमांद्यानिलप्रदाः ॥ शरद्रूक्षा पित्त
कर्त्री नरुणां मध्यबलावहाः ॥ चयप्रकोपोपशमा वायोर्ग्रीष्मादिषु त्रिषु ॥ वर्षादिषु च
पित्तस्य श्लेष्मणः शिशिरादिषु ॥ चयकोपशमान् दोषा विहाराहारसेवनैः ॥ समा
नैर्यान्त्यकालेपि विपरीतैर्विपर्ययं ॥ समानैस्तुल्यैः चयादिर्योषैरितियावत ॥ वि

॥ ६६० ॥

पर्यंकात्तेपिवैपरीत्यं ॥ चयलक्षणमाह ॥ स्वस्थानस्थस्य दोषस्य वृद्धिः स्यात्तच्छ्रको
ष्णता ॥ पीतावभासता वन्हिमंदता चांगगौरवं ॥ आलस्यं च चयहेतौ तु द्वेषश्च चयलक्षणं
चयहेतौ रूक्षाम्लमधुरादौ ॥ वर्षासु प्रचलो वायुस्तस्मान्मिष्टादयस्त्रयः ॥ रसाः सेव्या वि
शेषेण पवनस्योपशांतये ॥ मिष्टादयः मधुराम्ललवणाः ॥ भवेद्वर्षासु वपुषः स्नि
ग्धत्वं च विशेषतः ॥ तत्क्लेशशांतये सेव्या अपि कट्वादयस्त्रयः ॥ कट्वादयः कटुतिक्तक
षायाः ॥ स्वेदनं मर्दनं सेव्यं दध्यम्लं जांगलामिषं ॥ गोधूमाः शालयो माषा जलं कौपं
जलं च्युतं ॥ न भजेत्पूर्वपवनं वर्षे घर्मं हिमं श्रमं ॥ नदीनीरं दिवास्वप्नं रूक्षं नित्यं च
मैथुनं ॥ सर्पिः स्वादुकषायतिक्तकरसाः पच्छीतलं पयस्वगुडक्षीरं स्वच्छसितेक्षवः पटु
रसः स्वल्पः पलं जांगलं ॥ गोधूमा यव मुद्गाः शालि सहिताः ना ॥ दिवमं सेवकं च दुग्धं

॥ ६६० ॥

द्नमिंदुरादिरजनौमात्स्यंपयोनिर्मलं ॥ विश्रामः सुहृदांगलेषु मधुरालापाचः सरः क्री
डनं पित्तानां च विरेचनं यत्नवतो युक्तं शिरामोक्षणं ॥ एतान्यत्र घनावसाने समये
पथ्यानि मुंचेद्दधि व्यायामाम्लकटूष्णतीक्ष्णादिवसस्वप्नं हिमं चातपं ॥ अंशूदकं दि
वा रविकरैर्युक्तं निशि शीतकरांशुभिः ॥ सेवनं त्वंशूदकं नाम स्निग्धं दोषत्रयापहमितं
क्तलक्षणं ॥ चंद्रकर्पूरः ॥ रक्षवः शालयो मुद्गाः सितेभः क्षायितं पयः ॥ शरद्येतानि पथ्या
नि मंदोषे चेंदुरश्मयः ॥ प्रातर्भोजनमम्लपिष्टतवरणान्नाद्यं गायमभ्रमानगोधूमेक्षु
यश्शालिमाषपिष्टितं पिष्टं नवान्नं तिलान् ॥ कस्तूरी च वरं कुंकुमागुरुसुतामुष्णांबुशौ
चेनतं स्निग्धवस्त्रीपुरस्त्वं गुरुसवसनं सेवेत हेमंतके ॥ शिशिरे शीतमधिकं रौक्ष्यं
चादानकालजं ॥ विशेषतस्ततस्तत्र हेमंतस्य ततो विधिः ॥ वांतिनस्यमपाभयां चम

६६१

पुन्नाग्याम्यामममुहूर्त्तं नसंसेवेत मधौ कफप्रकवलं भूत्वं पत्तं जांगलं ॥ गोधूमान्नबहुमेदस्मा
स्त्रिसहितान्मुद्गान्यवान्षष्टिकान् तेयचंदनकुंकुमागुरुलक्षते रूक्षं कटु रसं लघु ॥ मिथ्या
मम्लं दधि स्निग्धं दिवास्वप्नं च दुर्जरं ॥ ग्रीष्मे व्यायाममपि प्रायो वसंते परिवर्जयेत् ॥ स्वादु
स्निग्धं हिमं लघु द्रव्यं मयं द्रव्यं रसालां सितां सक्तुक्षीरं दधिकांजितानि सितयाक्तानी रसं
मांसजं ॥ शीतांबुशयनं दिवा मलयजं श्रीतं पयः पानकं सेवेत ग्रीष्मदिने त्यजेत् कटुकषा
राम्लघर्मश्रमान् ॥ ऋतुष्वेषु यएतैस्तु विधिभिर्वर्त्तते नरः ॥ दोषान्नतु कृतान्नैव तमते
सकदाचन ॥ अथ देशाः ॥ भूमिर्देशास्त्रिधा नूपो जांगलो मिश्रलक्षणः ॥ तत्रानूपल
क्षणं ॥ नदीपल्वलशैलाढ्याः कुरुवान्वलकुलैर्युतः ॥ हंससारसकारंडचक्रवाकादि
सेवितः ॥ शरोवराहमहिषरुरुरोहितकुलाकुलैः ॥ प्रभूतद्रुममुख्याढ्यो नानासस्य ॥ ६६१ ॥

फलान्वितः ॥ अनेकशालिकेदारकदलीक्षुविभूषितः ॥ आनूपदेशो ज्ञातव्यो वातश्ले
ष्मामयार्त्तिमान् ॥ अथ जांगललक्षणं ॥ आकाशशुभ्र उच्चश्च स्वल्पपानीयपादपः ॥
शमीकरीरविल्वार्कपीलुकर्कंधुसंकुलः ॥ हरिणैणर्क्ष्यपृषतगोकर्णखरसंकुलः ॥ सु
स्वादुफलवान्देशो वातलो जांगलः स्मृतः ॥ तयोरंतरेतु ॥ वक्रदफनगोनूपः कफमारु
तरोगवान् जांगलोल्पांबुशाखीच पित्तासृग्बहुलोत्तरः ॥ अथ साधारणलक्षणं ॥ सं
सृष्टलक्षणो यो वा देशः साधारणो मतः ॥ समाः साधारणे यस्माच्छीतवर्षोष्ममारुताः ॥
समता तेन दोषाणां तस्मात्साधारणो वरः ॥ उचिते वर्त्तमानस्य नास्ति देशकृतं भयं
आहारस्वप्नचेष्टादौ तद्देशस्य कृते सति ॥ यस्मिन्देशस्य यो जंतुः तज्जं तस्यौषधं हितं ॥
देशादन्यत्र वसतस्तत्तुल्यगुणमौषधं ॥ अथ संक्षिप्तक्रममाह ॥ जगत्योनेरनिलश्चा

॥ ६६२ ॥

स्पचिद्घनैकरूपिणः ॥ पुंसोस्ति प्रकृतिर्नित्या प्रतिछायेव भास्वतः ॥ १ ॥ जगद्योनेः जगत्का
रणस्य ॥ प्रकृतिः प्रधानं ॥ नित्या तत्पपूर्त्वा ॥ भास्वतः सूर्यस्य प्रतिछायेव प्रभेव ॥ १ ॥ अचे
तनापि चैतन्ययोगेन परमात्मनः ॥ अकरोद्विश्वमखिलमनित्यं नाटकाकृतिः ॥ २ ॥ अचे
तना जडा ॥ नाटकाकृतिरिंद्रजालसदृशं मिथ्येति यावत् ॥ अत एवानित्यमध्रुवं ॥ २ ॥ प्रकृति
र्विश्वजननी पूर्वं बुद्धिमजीजनत् ॥ इच्छामयी महद्रूपा महंकारस्ततो भवत् ॥ ३ ॥ विश्वजन
नी जगतः प्रसवित्री महद्रूपां महत्तत्वापरपर्यायां ॥ ततः महद्रूपायाः बुद्धेः ॥ ३ ॥ त्रिविधः सो
पि संजातो रजः सत्वतमोगुणैः ॥ तस्मात्सत्वरजोयुक्तादिंद्रियाणि दशाभवत् ॥ ४ ॥ मन
श्च जातं तान्याहुः श्रोत्रं त्वक्नयनं तथा ॥ जिह्वाघ्राणं वचो हस्तपादोपस्थगुदानि च ॥ ५ ॥
पंच बुद्धींद्रियाण्याहुः प्राक्तनानीतराणि तु ॥ कर्मेंद्रियाणि पंचैव एकश्चांतः सूक्ष्म

॥ ६६२ ॥

बुद्धिभिः ॥ ६ ॥ प्रोक्तानि पूर्वोक्तानि श्रोत्रत्वक्चक्षू·रसनजिह्वाघ्राणानि ॥ बुद्धींद्रियाणि ज्ञानें-
द्रियाणि ॥ इतराणि तु वचोहस्तपादोपस्थगुदानि तु कर्मेंद्रियाणि क्रियाकरणानि ॥ मन
स्तूभयात्मकं ज्ञेयं ॥ तदुक्तं ॥ मनो बुद्धींद्रियं विज्ञैः कर्मेंद्रियमपि स्मृतमिति ॥ ६ ॥ तमःसत्व
गुणोत्कटादहंकारात्तथाभवत् ॥ तन्मात्रपंचकं तस्य नामान्युक्तानि सूरिभिः ॥ ७ ॥ तन्मा
त्रपंचकं अनुद्भूतस्वभावानि बाह्येंद्रियाग्राह्याणि शब्दादीन्येव तन्मात्राणि तेषां पंच
कं ॥ एतत्तु योगिनामेव ग्राह्यं भवतीति ज्ञेयं ॥ ७ ॥ शब्दतन्मात्रकं स्पर्शतन्मात्रं रूपमात्रकं
रसतन्मात्रकं गंधतन्मात्रं चैतितद्विदुः ॥ तत्तन्मात्रपंचकं ॥ ८ ॥ तन्मात्रपंचकात्तस्मात्संजा
तं भूतपंचकं ॥ व्योमानिलानलजलक्षोणीरूपं च तन्मतं ॥ ८ ॥ तद्भूतपंचकं ॥ ८ ॥ शब्दः स्प
र्शश्च रूपं च रसगंधावनुक्रमात् ॥ तन्मात्राणां विशेषाः स्युः स्थूलभावत्वमागताः

॥ ६६३ ॥

१० अनुक्रमात् शब्दतन्मात्रादिक्रमात् ॥ विशेषा अनुभवयोग्यैः सुखदुःखमोहधैर्य
मैर्विशेष्यंत इति विशेषाः ॥ तन्मात्राणि त्वविशेषाणि यतस्तान्यनुभवयोग्यैः सुखादि
भिर्विशेष्टुं नैव शक्यते सूक्ष्मत्वात् ॥ १० ॥ बुद्धींद्रियाणि पंचैव शब्दाद्या विषया मताः ॥
कर्मेंद्रियाणां विषया भाषादान विहारताः ॥ आनंदोत्सर्गकौ चैव कथितास्तत्वदर्शिभिः
११ विहारता गमनं ॥ उत्सर्गः मलत्यागः ॥ ११ ॥ प्रधानं प्रकृतिः शक्तिर्नित्या चाविकृतिस्तथा
एतानि तस्या नामानि शिवमाश्रित्य या स्थिता ॥ १२ ॥ शिवं पुमांसं ॥ १२ ॥ महानहंकृतिः पं
च तन्मात्राणि सप्तकप्रकृ ॥ प्रकृतेर्विकृतीश्चैव संमतानि बुधा जगुः ॥ १३ ॥ विकृतीः
कार्याणि ॥ १३ ॥ दशेंद्रियाणि चित्तं च महाभूतानि पंच च ॥ विकाराः षोडश ज्ञेयाः सर्वं
व्याप्य जनस्थिताः ॥ १४ ॥ एवं चतुर्विंशतिभिस्तत्वैः सिद्धं वपुर्गृहे ॥ जीवात्मा नियतो ॥ ६६३ ॥

निर्भ्रमोपसति स्वांतद्भूतज्ञान् ॥ १५ ॥ चतुर्विंशतिभिस्तत्वैः प्रकृतिविकृतिविकारैः ॥ नियते
निग्रहः शुभाशुभकर्मरज्ज्वायतः ॥ स्वांतद्भूतज्ञानमनोद्भूतयुक्तः ॥ १५ ॥ स देही कथ्यते पा
पपुण्यदुःखसुखादिभिः ॥ व्याप्तो बहुश्च मनसा साकृत्रिमैः कर्मबंधनैः ॥ १६ ॥ स जीवा
त्मा सूत्रिमैः निर्मितैः ॥ १६ ॥ कामक्रोधौ तौ भमोहावहंकारश्च पंचमः ॥ दशेंद्रियाणि शु
द्धिश्च तस्य बंधाय देहिनः ॥ १७ ॥ प्राप्नोति बंधमस्तोनादात्मस्तानाच्च मुच्यते ॥ तद्दुःखयो
गकृद्व्याधिरारोग्यं तत्सुखावहं ॥ १८ ॥ अथ कलायं शरीरमाह ॥ कलाः सप्ताशयाः सप्तधा
तवः सप्त तन्मलाः ॥ सप्तोपधातवः सप्त प्रकीर्तिताः ॥ १ ॥ त्रयो दोषा नवशतं स्नायूनां संध
यस्तथा ॥ दशाधिकं च द्विशतमस्थ्नां च त्रिशतं मतं ॥ २ ॥ सप्तोत्तरं मर्मशतं शिराः सप्तश
तं तथा ॥ चतुर्विंशति राख्याताधमन्यो रसवाहिकाः ॥ ३ ॥ मांसपेश्यः समाख्याताः

॥ ६६४ ॥

णां पंचशतं बुधैः ॥ स्त्रीणां च विंशत्यधिकाः कंडराः षोडश ॥ ४ ॥ न देहे दश रंध्राणि
नारीदेहे त्रयोदश ॥ एतत्समासतः प्रोक्तं विस्तरेणाधुनोच्यते ॥ समासतः संक्षेपतः ॥
५ ॥ मांसासृङ्मेदसां तिस्रो यकृत्प्लीह्नोश्चतुर्थिका ॥ पंचमी च तथांत्राणां षष्ठी चाग्निध
रा मता ॥ रेतोधरा सप्तमी स्यादिति सप्तकलाः स्मृताः ॥ ६ ॥ यकृतश्शोणितरंजकपित्तस्य
स्थानं ॥ प्लीहा रक्तवाहिशिरामूलं ॥ कलास्वरूपं यथा ॥ धात्वाशयांतरे धातोर्यः क्लेद
स्त्वधितिष्ठति ॥ देहोष्मणा विपक्वश्च सा कलेत्यभिधीयत इति ॥ ६ ॥ वसिष्ठसंहितायां
तु स्त्रीणां दशकलाः स्त्रिया गर्भस्य स्तनयोरधिकेति विशेषः ॥ इति कलाः ॥ अथाशयः ॥ श्ले
ष्माशयः स्यादुरसि तस्मादामाशयस्त्वधः ॥ ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थि
तः ॥ ७ ॥ तस्योपरि तिलं ज्ञेयं तदधः पवनाशयः ॥ मलाशयस्त्वधस्तस्य वस्तिर्मूत्रा ॥ ६६४ ॥

शयः स्मृतः ॥ जीवरक्ताशयो उरो ज्ञेयाः सप्ताशया अमी ॥ ५ ॥ श्लेष्माशयः स्यादुरसीति र
क्ताशयस्योरसोऽधः श्लेष्माशयः स्यादित्यर्थः ॥ तदुक्तं ॥ उरो रक्ताशयस्तस्मादधः श्लेष्मा
शयः स्मृत इति ॥ तिलं पाचकपित्तं ॥ पाचकं तिलमानं स्यादिति वाग्भटोक्तेः ॥ ७ ॥ ५ ॥ पुरुषे
भ्योधिकाश्चान्ये नारीणामाशयास्त्रयः ॥ धरा गर्भाशयः प्रोक्तः स्तनौ स्तन्याशयौ मतौ
टी ॥ धरा त्र्यावर्त्तचिपिटिका ॥ स्तन्यं दुग्धं तदाशयौ ॥ ६ ॥ इत्याशयाः ॥ अथ धातवः ॥ रसासृङ्मां
समेदोस्थिमज्जशुक्राणि धातवः ॥ जायंते न्योन्यतः सर्वे पाचिताः पित्ततेजसा ॥ १० ॥ अ
न्योन्यतः जायंत इति रसाद्रक्तं रक्तान्मांसं मांसान्मेदो मेदसोऽस्थि अस्थ्नो मज्जा मज्ज्ञः शुक्रं ।
जायत इत्यर्थः ॥ १० ॥ इति धातवः ॥ अथ धातुमलाः ॥ जिह्वानेत्रकपोलानां जलं पित्तं च रं
जकं ॥ कर्णविट् रसनादंतकक्षामेढ्रादिजं मलं ॥ ११ ॥ नखं नेत्रमलं वक्त्रे स्निग्धत्वं पि

॥ ६६५ ॥

रिकास्तथा। जायंते सप्तधातूनां मलान्येवमनुक्रमात्॥ १२ सप्तधातूनांजिह्वानेत्रकपो
लानांजलादीनि मलानि एवमनुक्रमाज्जायंते इति द्वयोरन्वयः॥ अनयोरयमर्थः॥
जिह्वादीनांजलंरसमलं॥ रंजकं पित्तंरक्तमलं कफोविट्मांसमलं॥ रसानासिजेमलंमे
दोमलं॥ नखनेत्रमलमस्थिमलं॥ वक्त्रेस्निग्धत्वंमज्जमलं॥ पिटिकाःशुक्रमलमिति
११॥१२॥ इतिधातुमलाः॥ अथोपधातवः॥ स्तन्यंरजोवसास्वेदोदंताःकेशास्तथैवच
ओजश्चसप्तधातूनांक्रमात्सप्तोपधातवः॥ १३ उपधातवोगौणधातवः॥ १३ स्तन्यं
रजश्चनारीणांकालेभवतिगच्छति॥ शुक्रमांसभवःस्नेहोयःस्यात्साकीर्त्यतेवसा॥
१४ ओजःसर्वशरीरस्थंस्निग्धंशीतंस्थिरंसितं॥ सोमात्मकंशरीरस्यबलपुष्टि
करंमतं॥ १५ ओजःशुक्रधातोःस्नेहःक्षीरस्यघृतमिव॥ यतंचेष्टापाटवं॥ १५॥ ६६५॥

इत्याषधातवः ॥ अथ कलात्वचः ॥ ज्ञेयावभासिनी पूर्वा सिध्मस्थानं च सा मता ॥ द्वितीया लोहि-
ता ज्ञेया तिलकालकजन्मभूः ॥ १६ ॥ तिलकालको लोके तिल इति प्रसिद्धः ॥ १६ ॥ श्वेता तृतीया
संख्याता स्थानं चर्मदलस्य सा ॥ ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका ॥ १७ ॥ पंचमी
वेदिनी ख्याता सर्वकुष्ठोद्भवस्ततः ॥ विख्याता लोहिता षष्ठी ग्रंथिगंडापचीस्थितिः ॥ १८ ॥
स्थितिः स्थानं ॥ १८ स्थूलात्वक् सप्तमी ख्याता विद्रध्यादेः स्थितिश्च सा ॥ इति सप्तत्वचः
प्रोक्ताः स्थूला व्रीहिद्विमात्रया ॥ १९ स्थूला सप्तमी त्वक् व्रीहिमात्रया व्रीहिद्वयप्रमाणेन
स्यादिति शेषः ॥ १९ ॥ इति त्वचः ॥ अथ दोषाः ॥ वातपित्तकफा दोषा धातवश्च मलास्त-
था ॥ तत्रापि पंचधा ख्याताः प्रत्येकं प्राणधारणात् ॥ २० ॥ वायुः पित्तं कफश्चेति दोषाः
दोषशब्दवाच्याः ॥ धातवश्च धातुशब्दवाच्याश्च ॥ मलास्तथा मलशब्दवाच्या अ

वातजन्यान्रोगानाह ॥ शिरःसंखढक्कर्णीहद्भुशिरोर्दुहनुस्कंधमन्यासुचाकस्मिकोरुक् सु
तीक्ष्णा निशि सव्यजंघाभुजत्वं त्रिकहस्री हृकुक्ष्यस्थिसंध्यादि ॥ आदिपदेन अंडे ॥ शूले ॥ १ स्थिर
सास्यतावपुषि कार्श्यमं निद्राय रूक्षबल्वगंग्नि विषमत्वमितीह ॥ कुपितस्यातिगमेभि सस्या
धिकारानमितानपि प्रतिषितन्वतरातत ॥ २ ॥

पि ॥ तदुक्तं ॥ शरीरदूषणाद्दोषा धातवो देहधारणात् ॥ वातपित्तकफा ज्ञेया मलिनीकरणान्मला
इति ॥ तत्रापि त्रित्वे पित्तत्वेकं पंच धा देहधारणात् ख्याता कपिताः २० ॥ पित्तं पंगु कफः पं
गुः पंगवो मलधातवः ॥ वायुना यत्र नीयंते तत्र गच्छंति मेघवत् २१ ॥ पवनस्तेषु चत्वान् वि
भागकरणान्मतः ॥ रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्चलेः ॥ २२ विभागकरणात्तद्दे
षधातुमलादीनां स्थानांतरेनयनात् २२ वायोः पंचधात्वं विवृणोति ॥ मलाशये चरे कोष्ठे
छेवन्हिस्थाने तथा हृदि ॥ कंठे सर्वांग देहेषु वायुः पंचप्रकारतः ॥ २३ कोष्ठे वन्हिस्था ॥

पित्तजन्यान्रोगान्याह ॥ भ्रमस्तापः स्वेदो वमिर्मदविमोहामुखलवणत्वगात्रस्निस्यात्पीतंशकृद

पिचमूत्रंसरुधिरं ॥ प्रतापस्तृट्दाहः शिशिरस्पृहरियांछातिसारः स्यात्प्रदिष्टा दोषजैरितिकु

पितपित्ताकृतिरियं ॥१॥ विमोहो मूर्छा ५

नेत्रकोष्ठे यद्वह्निस्थानं तस्मिन्कोष्ठवह्नेरधस्तादित्यर्थः ॥ तदुक्तं कंठे हृदि तथाधस्तात्कोष्ठ

वह्नेर्मलाशये ॥ सकले पिशरीरे सौकमेणापवनो वसेदिति ॥२३॥ अपानः स्यात्समानश्च

प्राणोदानौ तथैव च ॥ व्यानश्चेति समीरस्य नामान्युक्तान्यनुक्रमात ॥२४॥ अनुक्रमात

मताश्चपादिस्थानेषु संचारक्रमादित्यर्थः ॥२४॥ अथ पित्तस्य पंचधात्वं विवृणोति ॥

पित्तमुष्णं द्रवं पीतं नीलं सत्वगुणोत्तरं ॥ कटु तिक्तं सरं ज्ञेयं विदग्धं चाम्लतां व्रजेत ॥२४

पीतं नीरामं नीलं सामं ॥ विदग्धं संजातकुपाकं सत ॥२४॥ अग्न्याशये भवेत्पित्तमग्नि

रूपं तिलोन्मितं ॥ त्वचि कांतिकरं ज्ञेयं तेपाभ्यंगादिपाचकं ॥२६॥ दर्शं पक्ति प

कफजन्यान् रोगान् आह ॥ ६६ ॥

अंगे गौरवमग्नेरपाटवं हृद्ग्रहः प्रसेकश्च ॥ मधुरास्यता तथा श्लेष्मरोगा पांडुत्वं श्वकोंडकेंडुतिः ॥ प्रसेको द्युतिरलसत्वं च मधु प्रसेकाश्च यं कासतंद्राश्च से श्वाकृतिर्यथा स्वं निश्वासः सेक्सगसन्निपाता स्यु अलसत्वं सतिवलेकायाक्षमत्वं ॥ प्रस्वापः दिवापि निद्रा ॥ श्लोकांडकेंडुतिः अकस्मात्कंडुः २ ॥

स्थितं तद्रूसंश्लेषणतां नयेत ॥ पचित्तं नेत्रयुगले रूपदर्शनकारितत् ॥ यम्पित्तं हृदये तिष्ठन्मेधाप्रसा करं हितत् २४ ॥ हृत्स्थं रमणीयं रंजकत्वात् ॥ मेधा धारणावनी धीः २४ ॥ पाचकं भ्राजकं चैव रं कालोचकं तथा ॥ साधकं चेति पंचैव पित्तनामान्यनुक्रमात् २५ ॥ अनुक्रमात् अग्न्याशयादि स्थाने षु व्यवस्थितिक्रमात् २५ ॥ अथ कफस्य पंच धात्वं विवरणोति ॥ कफः स्निग्धो गुरुः श्वेतः पिच्छलः शीतलस्तथा ॥ तमोगुणाधिकः स्वादुर्विदग्धो लवणो भवेत् २६ ॥ पिच्छलः आम वत् २६ ॥ कफ आमाशये मूर्ध्नि कंठे हृदि च संधिषु ॥ तिष्ठन्करोति देहस्य स्थैर्यं सर्वांग पाटवं ३० ॥ सर्वांगपाटवं सर्वांगानां पाटवं नैरुज्यं तेन तत् ॥ सर्वांगपाटवमिति स्थैर्यं ॥ ६६ ॥

प्रसेकः मुखतो लालास्रावः

विशेषणं ॥ ३० ॥ क्लेदनः स्नेहनश्चैव रसनश्चावलंबनः ॥ श्लेषकश्चेति नामानि कफस्योक्ता
न्यनुक्रमात् ॥ ३१ ॥ अनुक्रमादुरःमूर्धपादिस्थानेष्ववस्थितिक्रमात् ॥ ३१ ॥ इति दोषाः ॥ अथ
स्नायुसंधिकथनं ॥ स्नायवो बंधनं प्रोक्ता देहमांसास्थिमेदसां ॥ संधयश्चांगसंधाना देहे
प्रोक्ताः कफान्विताः ॥ ३२ ॥ स्नायवः मेदःस्नेहविशिष्टाः शिराः ॥ एतदुक्तं गूढार्थान्तरे स्नायोः
स्वरूपं ॥ मेदसः स्नेहमादाय शिरा स्नायुत्वमाप्नुयादिति ॥ अंगसंधानाः अवयवसंधा
नकराः ॥ ३२ ॥ अथ धास्वादिकथनं ॥ आधारश्चात्तथा सारः कायेऽस्थीति बुधा जगुः ॥ ममीशि
जीवाधाराशिराः प्रायेण मुनयो जगुः ॥ ३३ ॥ अस्थीनि काये आधारः आश्रयः सारः स्थिरां
शश्च इति बुधा विदुरिति योज्यं ॥ अस्थिस्वरूपमुक्तं गूढार्थान्तरे ॥ मेदो यत्स्वाग्निना पक्वं वायु
नाथाति शोषितं ॥ तदस्थिसंज्ञां लभते स सारः सर्वविग्रह इति ॥ प्रायेण जीवाधाराशि

॥६६८

विशेषतो जीवनिवासस्थानानि मर्मस्वरूपमुक्तं ग्रंथांतरे ॥ सन्निपातः शिरास्नायुसंधिमांसास्थिसंभवः ॥ मर्माणि तेषु तिष्ठंति प्राणाः खलु विशेषत इति ॥ २३ संधिबंधनकारिण्यो दोषधातुवहाः शिराः ॥ धमन्यो रसवाहिन्यो धमंति पवनं तनौ ॥ २४ शिराः कुमद्वतस्यारे खा इव ॥ तथा चोक्तं ॥ यथा कुमद्वते साक्षाद्दृश्यंते प्रततः शिरा ॥ तथैव देहिनो देहे वर्तंते सकलेषु शिरा इति ॥ धमन्यः अंतः छिद्रविशिष्टाः ॥ तदुक्तं ॥ यथा स्वभावतः खानि कमलानां विशेषु वै ॥ धमनीनां तथा खानि रसो यैरभितश्चरेदिति ॥ २४ मांसपेश्यो बलायस्युरवष्टंभाय देहिनां ॥ प्रसारणाकुंचनयोरंगानां कंडरा मताः ॥ २५ मांसपेश्यः मांसपिंडाः अवष्टंभाय आवलंबनाय शिरास्नायुस्थिपर्वसंधीनामिति शेषः ॥ कंडराः महत्यः स्नायवः ॥ प्रसारणाकुंचनयोरिति चतुर्थ्यर्थे षष्ठ्यौ ॥ २५ अपरं प्राणिनां नासानयनक ॥ ६६८ ॥

णानां द्वे द्वे रंध्रे प्रकीर्त्तिते॥ मेहनापानवक्त्राणामेकैकं रंध्रमुच्यते॥ दशमं मस्तके चोक्तं
रंध्राणीति नृणां विदुः॥ ३६॥ मेहनं शिश्नः अपानः पायुः॥ ३६॥ स्त्रीणांत्रीण्यधिका
नि स्युः स्तनयोर्गर्भवर्त्मनि॥ सूक्ष्मछिद्राणि चान्यानि मतानि त्वचि जन्मिनां॥ ३७॥ तथा
मे फुफुसं प्लीहा दक्षिणांगे यकृत्तिलं॥ उदानवायोराधारः फुफुसं प्रोच्यते बुधैः॥ ३८
रक्तवाहिशिरामूलं प्लीहा ख्यातो महर्षिभिः॥ यकृद्रंजकपित्तस्य स्थानं पित्तस्य संश्र
यः॥ ३९॥ जलवाहिशिरामूलं तृस्नाछादनकं तिलं॥ वृक्कौ पुष्टिकरौ प्रोक्तौ जठरस्थस्य
मेदसः॥ बीजवाहिशिराधारौ वृषणौ पौरुषावहौ॥ ४०॥ तिलं क्लोम॥ एतत्तु वातरक्तं जं
तृस्नाछादनकं तृस्नानिर्वर्त्तकं॥ वृक्कौ मेदः शोणितसारभूतौ अग्रमांसविशेषौ॥ बी
जं शुक्रं॥ पौरुषं सुरतसामर्थ्यं॥ ४०॥ गर्भाधानकरं लिंगमयनं बीजमूत्रयोः॥ ४१

॥ ६६ ॥

यंचेतनास्थानमोजसश्चाश्रयंमतं ॥ ४१ ॥ अयनंयर्म्म चेतनाबुधिः ॥ ४२ ॥ शिराधमन्योना
भिस्थः सर्वाव्याप्यस्थितास्ततुं ॥ पुष्णंतियानिशंवायोः संयोगातसर्वधातुभिः ॥ ४३ ॥
धर्मार्थकाममोक्षाणांशरीरंसाधनंयतः ॥ रोगास्तस्यापहर्त्तारः श्रेयसोजीवितस्य
च ॥ अतोरम्यतनुंरक्षेन्नरः कर्मविपाकवित ॥ ४४ ॥ नजंतुः क्वेष्मिदमरः पृथिव्यांजा
यतेक्वचित ॥ अतोमत्करवार्यःस्यात्किंतुरोगान्निवारयेत ॥ ४५ ॥ धातवस्तन्मला
दोषानाशयंत्यसमास्तनुं ॥ समाः सुखायविज्ञेयावलायोपचयायवं ॥ ४६ ॥ धातवः
रसाद्याः ॥ तन्मलाः जिव्हादिजलाद्याः दोषाः वातादयः ॥ उपचयापपक्कृष्टौ ॥ ४६ ॥ इति
कलाद्यंशरीरं ॥ अथाहारस्यगतिंपरिणामंचाह ॥ पात्वामाशयमाहारः पूर्वंप्राणा
निलेरतः ॥ माधुर्यंफेनभावंचषड्सोपितमेतसः ॥ १ ॥ आहारः आहियतइत्याहा ॥ ६६ ॥

रः भोज्यं ॥ आमाशयं नाभिस्तनांतरं ॥ प्राणानिलेरितः हृदयाधिष्ठेन प्राणनाम्नावायु

ना मुखगतेनांतः प्रवेशितः षड्रसोपि माधुर्य्यं लभते ॥ आमाशयस्थस्य मधुरस्य कफ

स्य योगात ॥ फेनभावं च लभते ॥ जठरानलतेजसा ॥ १ ॥ अथ पाचकपित्तेन विदग्धश्चा

म्लतां व्रजेत ॥ ततः समानमरुता ग्रहणीमभिनीयते ॥ २ ॥ पाचकपित्तेन पाचकपित्तस्यो

ष्मणा ॥ विदग्धः ईषत्पक्वः ॥ समानमरुता नाभिमंडलाधिष्ठानेन समाननाम्नावायु

ना ॥ ३ ॥ ग्रहण्यां पाचते कोष्ठवन्हिना जायते कटुः ॥ रसो भवति संपक्वदपक्वाद्रसमसं

भवः ॥ ४ ॥ अस्यायमर्थः ॥ आहारो ग्रहण्यां कोष्ठवन्हिना ग्रहणीस्थितपाचकपित्त

स्थेन च वन्हिना पच्यते पच्यमानः सः ग्रहणीस्थितस्य कटुरसस्य पित्तस्य योगात

कटुर्भवति एवं महोरात्रेण पक्व आहारो मिश्रः पडूस मधुरो भवति अम्लस्व स्रो

॥६७०॥

भवतिकटुस्तिक्तः कषायश्चकटुर्भवतीति ॥ तदुक्तंपूर्वमेवमिष्टः पदुक्तेत्यादिना ॥ रसः त
स्सारभूतः ॥ आमसंभवः आहारापक्वरसोत्पत्तिः ॥३॥ वन्हेर्बलेनमाधुर्यस्निग्धतांया
तितद्रसः ॥ पुष्णातिधातूनविज्ञानसम्यक्पक्वोमतोयमः ॥४॥ ततततः वन्हेर्बलेनसम्य
क्पक्वः सन् ॥४॥ मंदवन्हिविदग्धश्चकट्वम्लोभवेद्रसः ॥ विषभावंव्रजेद्वापिकुर्या
द्रोगसंकरं ॥५॥ रोगसंकरंनानारोगसमूहं ॥५॥ आहारस्यरसः सरोसारहीनोमल
द्रवः ॥ शिराभिस्तज्जलंनीतंवस्तौमूत्रत्वमाप्नुयात् ॥६॥ तज्जलंमलद्रवरूपंजलं ॥६॥ तत्कि
ट्टंचमलंज्ञेयंतिष्ठेत्पक्वाशयेचतत् ॥ वलित्रितयमार्गेणयात्यपानेननोदितं ॥७॥ पक्वा
शयेमलाशये ॥ अपानेनमलाशयालयेनापानवायुना ॥७॥ रसस्तुहृदयंयातिसमा ॥६७०॥
नमरुतेरितः ॥ रंजितः पाचितस्तत्रपित्तेनायातिरक्ततां ॥८॥ हृदयंयातिप्रथममितिशेषः

पश्चात्तत्रशरीरारंभकस्यरक्तस्ययकृत्प्लीहरूपेस्थानेगतःसन्निति शेषः ॥ ५ ॥ रक्तंसर्व
शरीरस्थंजीवस्याधारमुत्तमं ॥ स्निग्धंगुरुचलंस्वादुविदग्धंपित्तवद्भवेत् ॥ ९ ॥ पाचितः
पित्ततापेनरसाद्याधातवःक्रमात् ॥ शुक्रत्वंयांतिमासेनतथास्त्रीणांरजोभवेत् ॥ १०
क्रमात्रसासृङ्मांसेत्यादिश्लोकोक्तेक्रमात् ॥ मासेनशुक्रत्वंयांतीत्यत्रविकल्पोज्ञेयः
तेषांतेरपक्षत्रयस्याभिधानात् ॥ तदुक्तं केचिदाहुरहोरात्रात्षडहादपरेपरे ॥ मासे
नयातिशुक्रत्वमन्नपाकरसःक्रमादिति ॥ रजोभवेत्रसादिधातुरितिशेषः ॥ १० ॥ का
मान्मिथुनसंयोगेशुद्धेशोणितशुक्रजःगर्भःसंजायतेतेनाप्ययंसजातोबालउच्यते
॥ ११ ॥ कामात्मकरध्वजवेगतः ॥ मिथुनसंयोगेस्त्रीपुंसोःसमागमे ॥ गर्भलक्षणं
यथा ॥ गर्भाशययेगतंशुक्रमार्तवंजीवसंस्तकः ॥ प्रकृतिःसविकाराचतत्सर्वंगर्भ

दी० १

संज्ञकमिति ॥ ११ ॥ अथ पुत्रगर्भमाह ॥ दंपत्योः शुक्रबाहुल्याद्द्रव्यशोणितशुक्रयोः ॥ पदद्वयांत
योजितं श्लेयं तदपि कुक्षितं ॥ १२ ॥ कुक्षिसंज्ञातमस्वतः कुक्षितं ॥ १२ ॥ आधिक्ये रजसः कन्या
पुत्रः शुक्राधिके भवेत् ॥ नपुंसकं समत्वेन यथेच्छा पारमेश्वरी ॥ १३ ॥ अत्र रजःशुक्राधि
क्यमेव कन्यापुत्रोत्पत्तौ कारणमुक्तं तथापि युग्मायुग्मरात्र्यौ अपि कारणं संति ॥ तदुक्तं

७

युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु ॥ अतश्चतुर्थी षष्ठी स्याद् अष्टमी दशमी तथा ॥ द्वा
दशी चापि या रात्रिस्तस्यां तां विधिना भजेत् ॥ अत्रोत्तरोत्तरं विद्यादायुरारोग्यमेव च

यद्यपि रजोबाहुल्यादिकं स्त्रीत्वादौ हेतुस्तयोक्तं तथापि अयुग्मायां रजोबाहुल्ये युग्मायां शु
क्रबाहुल्ये च ताभ्यां द्विविधलवपदादौ युग्मायां शुक्रबाहुल्ये सति तदा तु पुमानेव भवति किं तु स्त्र्या
कृतिः एवं युग्मायां रजोबाहुल्येऽपि स्त्रीवपुः स्याकृति भवतीति बोध्यं कालरूप

दी० १

ति ॥ १२ ॥ जीवेंतर्वापुनाभिन्नेद्वौजीवौकुक्षिमागतौ ॥ यमावित्यभिधीयेतेधर्मेतरपुरस्सरौ ॥
१३ ॥ धर्मेतरपुरस्सरौधर्मस्तादितरोधर्मश्चतौपुरस्सरौययोस्तौ ॥ तेनयमौधर्माधर्माद्भ
मवतइत्यर्थः ॥ १३ ॥ अथवयोविचारः ॥ वाल्यमाषोडशाद्वर्षात्तत्रधातिंद्रियौजसां ॥ वृद्धिरा
सप्ततेरमध्यंतत्रावृद्धिःपरंक्षयः ॥ परंतदनंतरं ॥ उक्तंच ॥ वाल्यंवृद्धिःछविर्मेधात्वग्दृष्टिः
शुक्रविक्रमौ ॥ वुद्धिःकर्मेंद्रियंचेतोजीवितंदशतोह्रसेत् ॥ दशतःदशाद्दशावर्षैरित्यर्थः
अथदेहस्यप्रमाणमाह ॥ स्वैःस्वैर्हस्तत्रयंसार्द्धंवपुःपात्रंसुखायुषोः ॥ अथकवलादी
नांप्रयोगार्थंकालनियममाह ॥ कवलःपंचमाद्वर्षाद्दशमान्नस्यकर्मच ॥ विरेकःषोड
शाद्वर्षाद्विंशतेश्चैवमैथुनं ॥ कवलादीनिपंचमवर्षादिभ्यःकर्तव्यानीत्यर्थः ॥ इत्याहार
निमितकारणावस्थाउपादानकारणीभूतरजःशुक्रयोःप्राबल्यादितिविस्तारेणचरम्भतयः

हि० २

गन्धादिकथनं ॥ अथ प्रकृतिलक्षणानि ॥ सप्त प्रकृतयो नृणां वातात्पित्तात्कफात्तथा ॥ संस
र्गात्सन्निपाताच्च भवंतीति भिषजां मते ॥ शुक्रशोणितसंयोगे यो दोषस्तूत्कटो भवेत् ॥ प्रकृ
तिर्जायते तेन तस्याः लक्षणमुच्यते ॥ वाग्भटेप्यात्रेपाद्यः ॥ शुक्रास्रगर्भिणीभोज्यचेष्टा
गर्भाशयर्त्तुषु ॥ यः स्याद्दोषोधिकस्तेन प्रकृतिः सप्तधोदिता ॥ सोपि दोषः स्वभावाव
स्थितो न तु दुःखदः ॥ दुष्टेन तु शुक्रशोणितयोर्दुष्ट्या शुद्धगर्भासंभवात् ॥ जागरूकोल्पकेश
श्च स्फुटितांघ्रिकरः कृशः ॥ शीघ्रगो बहुवाग्रूक्षः स्वप्नेपि वियति गच्छति ॥ एवंविधो यः
स ज्ञेयो वातप्रकृतिको नरः ॥ पित्तप्रकृतिको यादृक् तादृशोपि निगद्यते ॥ अकालप
लितो गौरः क्रोधी स्वेदी च बुद्धिमान् ॥ बहुभुक्ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति ॥
श्यामकेशः क्षमः स्थूलो बहुवीर्यो महाबलः ॥ स्वप्ने जलाशयालोकी श्लेष्मप्रकृति ॥ हि० २ ॥

को भवेत् ॥ दृश्यते प्रकृतौ यत्र रूपं दोषद्वयस्य तु ॥ तां संसर्गेण जानीयात् सर्वलिंगैस्त्रिदो
षजां ॥ ननु प्रकृतिहेतूनां मध्ये यो दोषोऽधिकः स स्वव्याधीन् कथं न करोतीत्याशंकाया
माह ॥ विषजातो यथा कीटो न विषेण प्रबाध्यते ॥ तद्वत्प्रकृतयो मर्त्यं शक्नुवंति न बाधि
तुं ॥ अत्र दृष्टांतभावपोषदर्थे ॥ तेन विषेण विषजः हालाहलादिना ॥ ईषत्प्रबाध्यते न तु भृशं ॥
तथा प्रकृतयः प्रकृतिहेतवो दोषाः बाधितुं न शक्नुवंति कश्चरणस्फटितत्वस्वेद
निद्राधिक्यादिना ईषद्बाधितुं शक्नुवंत्येव न तु ज्वरादिभिः ॥ प्रकोपो वान्यभावो वा
क्षयो वा नोपजायते ॥ प्रकृतीनां स्वभावेन जायते तु गतायुषः ॥ इति प्रकृतिलक्षणा
नि ॥ अथ भेषजानां विधानानि ॥ स्वरसश्च तथा कल्कः क्वाथश्च हिमफांटकौ ॥ ज्ञेयाः
कषायाः पंचैते लघवः स्युर्यथोत्तरं ॥ तत्रादौ स्वरसविधिः ॥ अहतात्तत्क्षणाकृष्टा

॥ हि२ ॥

द्रव्यात्क्षुण्णात्समुद्भवेत् ॥ वस्त्रनिष्पीडितो यः स्यात्स्वरसो रस उच्यते ॥ आहतात्तत्कीटा
ग्निशीतादिभिरनुपहतात् ॥ क्षुण्णात् संपिष्टात् ॥ कुडवं चूर्णितं द्रव्यं क्षिप्तं च द्विगुणे
जले ॥ अहोरात्रं स्थितं तस्माद्भवेद्वा रस उत्तमः ॥ चूर्णितं चूर्णीकृतं ॥ आदाय शुष्कद्रव्य
वा स्वरसानामसंभवे ॥ जलेष्टगुणिते साध्यं पादशिष्टं च गृह्यते ॥ स्वरसस्य गुरुत्वाच्च
पलमर्द्धं प्रयोजयेत् ॥ निशोषितं चाग्निसिद्धं पलमात्रं रसं पिबेत् ॥ सितामधुगुडक्षारान्
जीरकं लवणं तथा ॥ घृतं तैलं च चूर्णादीन् कोलमात्रान् रसे क्षिपेत् ॥ कोलं टंकद्वयं
अथ तंदुलजलविधिः ॥ कंडितं तंदुलपलं जलेष्टगुणिते क्षिपेत् ॥ भावयित्वा जलं ग्रा
ह्यं देयं सर्वत्र कर्मसु ॥ भावयित्वा कोमलीकृत्य ॥ अथ पुटपाकविधिः ॥ पाच्यौषधा
नि पुटपाकविधौ विचूर्ण्य जंबूवटादिदलवेष्टनवेष्टितानि ॥ अंगुष्ठमात्रमुपलिप्य ॥ हि३ ॥

पचेद्यदा स्यात्स्वेप्स्वसात तनिभं ए नमध्ये द्रवेत्तु ॥ ग्राह्यो रसः पलमितस्तत एकदेशो द्वं
क्षिपेदिहपरं स्वरसेन तु स्वं ॥ दद्यान्नसम्मयपक्वता दि विकल्पनीया मात्रापथ्यापथ्यमपि
स्वरसादिकेषु ॥ परं कल्कादिकं स्वरसेन तु स्वं स्वरस इत्यात्रापि देयमित्यर्थः ॥ अथ कल्क
कल्कविधिः ॥ सुपिष्टमार्द्रमं भसा थवा विशुष्कमेव पत ॥ तत्तत्कल्कसंज्ञितं च देयमक्ष
संमितं ॥ इह स्वतं द्वि माजिके ह विः सतैलमाक्षिकं ॥ सिता गुडौ समौ मता वतच्चतुर्गुणा
द्रवाः ॥ अथ क्वाथविधिः ॥ पानीयं षोडशगुणं क्षुण्णे द्रव्यपले पचेत ॥ मत्पात्रे क्वाथ
पेद्ग्राह्यमष्टमांसायसेवितं ॥ कर्षादौ तु पलं यावद्दद्यात्षोडशिकं जलं ॥ षोडशिकं षोडश
गुणं ॥ तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितं ॥ शृतं क्वाथः कषायश्च निर्यूहः
स निगद्यते ॥ क्वाथपानमात्रामाह ॥ मात्रोत्तमा पलेन स्यात्त्रिभिरक्षैश्च मध्यमा ॥

॥ ६७४ ॥

जघन्याच पलार्द्धेन स्नेहक्वाथौ यथेच्छया ॥ तत्रांतरे तु क्वाथद्रव्यपले वारि द्विरष्टगुणमिष्यते ॥ चतुर्भागावशिष्टं तु पेयं पलचतुष्टयं ॥ दीप्तामलं महाक्वाथं पाययेत्स्वं जलितं ॥ अन्ये त्वर्द्धं परित्यज्य प्रस्तं तु चिकित्सकाः ॥ क्वाथत्यागमनिछंतस्त्वष्टमांशावशेषितं ॥ पारंपर्योपदेशेन स्थद्वैद्याः पलद्वयं ॥ अष्टभागावशेषितस्य चतुर्भागावशिष्टं पेयस्य गुरुत्वाद्दीप्याग्नं संमहाक्वाथं पलद्वयं ॥ पाययेत् मध्यमाग्निं मस्वक्वाथं पलमात्रं पाययेत् ॥ मात्रोत्तमा पलेनस्याद्वित्यादिवचनात् ॥ क्वाथे क्षिपेत्सितामंशैश्चतुर्थाष्टमषोडशैः ॥ वातपित्तकफातंके विपरीतं मधुस्मृतं ॥ जीरकं गुग्गुलुं क्षारं लवणं च शिलाजतु हिंगुत्रिकटुकं चैव क्वाथे शाणोन्मितं क्षिपेत् ॥ क्षीरं घृतं गुडं तैलं मूत्रं चान्यं द्रवं तथा कल्कं चूर्णादिकं क्वाथे निक्षिपेत्कर्षसंमितं ॥ अथ हिमविधिः ॥ विचूर्णं भेषजा ॥ ६७४ ॥

त्वत्तं निधाय षड्गुणे जले ॥ निशोषितं निपीडयेद्धिमः स फांटमात्रकः ॥ फांटमात्रकः
फांटयत्तस्य मात्रेत्यर्थः ॥ अथ फांटविधिमाह ॥ क्षुण्णे द्रव्यपले सम्यक् जलमुष्णं
प्रयोजयेत् ॥ मृत्पात्रे कुडवोन्मानं ततः संस्रावयेत् पटात् ॥ स स्याच्चूर्णद्रवः फांटस्त
न्मानं द्विपलोन्मितं ॥ क्षौद्रं सितां गुडादींस्तु कर्षमात्रान्विनिक्षिपेत् ॥ स चूर्णद्रवः
फांटः स्यादित्यन्वयः ॥ अथ मंथविधिः ॥ चतुःपले शीतजले निधाय द्रव्यामू चूर्णं
मृद्भमत्र एतत् ॥ निमर्थ्य सम्यक् प्रपिबेद्धि बिल्वमित्येष मंथो विधफांटभेदः ॥ अथ
चूर्णविधिः ॥ विशुष्कं सुपिष्टं च फतं वाससो पद्धिषभिः स्मृतं भेषजं तत्तु चूर्णं
प्रदेयं तदक्षप्रमाणं सितास्मिन् द्विभागा गुडस्तु स्य एवोपदिष्टः ॥ तथा रामठं भर्जि
तं देयमेवं न चोत्क्लेदकृद्धि धृतादेश्च तु लिप्तात् ॥ पिबेदं वु प्रस्वैस्तु भागिकैस्तु

॥ ६७५ ॥

स्नुतेपावतासर्वमेवंविभाव्यं ॥ उल्क्लेहोपस्थितवमनमिव ॥ चूर्णावलेहगुटिकाकल्काना
मनुपानकं ॥ पित्तवातकफांतकेत्रिद्व्येकपलमाहरेत ॥ यथातैलंजलेक्षिप्तंक्षणेनैववि
सर्पति ॥ अनुपानबलादंगेतथासर्पतिभेषजं ॥ अथगुटिकाविधिः वटकाअथक
थ्यंतेतन्नामगुटिकावटी ॥ मोदकोगुटिकावटी ॥ मोदकोगुटिकापिंडीगुडोवर्तिस्तथो
च्यते ॥ लेहवत्साध्यतेवन्हौगुडोवाशर्करापवा ॥ गुग्गुलुर्वाक्षिपेत्तत्रचूर्णंतन्निर्मि
तावटी ॥ कुर्यादवन्हिसिद्धेनक्वचिद्गुग्गुलुनावटीं ॥ द्रवेणमधुनावापिगुटिकांकार
येद्बुधः ॥ सिताचतुर्गुणादेयावटीषुद्विगुणोगुडः ॥ चूर्णेचूर्णसमःकार्योगुग्गुलु
र्मधुतत्समं ॥ तत्समंचूर्णसमं ॥ द्रवंतुद्विगुणंदेयंमोदकेषुभिषग्वरैः ॥ द्रवंद्रवहृपं
द्रव्यं ॥ कर्षप्रमाणातन्मात्राबलंदृष्ट्वाप्रयोजयेत ॥ अथावलेहविधि ॥ चतुर्द्दिंभा ॥ ६७५ ॥

गिक्कौ सिता गुडौ द्रवद्रुतौ पचेत् ॥ निधाय चूर्णमेषजान्यदः सुतं तु तावधि ॥ विघट्टयन्
खजेन तत्समुद्धरेल्लक्ष्मा नुतः सुशीतते मधु क्षिपेत्स्वतं चलेहतो भजेत् ॥ द्रवमत्र चतु
र्गुणं देयं ॥ खजेन दर्व्या ॥ अथ घृततैलविधिः ॥ पुराणोर्वीमहद्विगुणितमिह कीला
लमुदितं कल्कात्क्वाथ्यद्रव्ये मृदुनि दृढमध्ये तिकठिने ॥ पचेद्यावद्द्रव्यप्रमितमिद
मेतेन तु घृतं तथा तैलं पादप्रमितमपक्कल्कांघ्रिसहितं ॥ पुराणाद्येन चत्वारः ॥ उर्वीम
तो राजानः षोडश ॥ कीलालं जलं ॥ मृदुनि द्रव्ये गुडूच्यादौ ॥ दृढमध्ये कठिने शुंठ्यादौ
अतिकठिने विस्फुर्जदेवदार्व्यादौ ॥ पादद्रव्यप्रमितमिति यावद्द्रव्यप्रमितं क्वाथ्यौ
षधपरिमितं शिष्टं भवति तावति तावदित्यर्थः एतेन क्वाथेन ॥ पादप्रमितं क्वाथ
चतुर्थांशमित्यर्थः इदं घृततैलविशेषणं ॥ कल्कांघ्रिसहितमिति स्नेहचतुर्थां

त्कल्कमुदितमित्यर्थः ॥ शुद्धांतु निःक्वाथरसैः क्रमेण स्नेहेतु संसिद्धेति कल्कभागं
चतुर्थकं षष्ठमथाष्टमं च भिषक् प्रदद्यादिति शौनकोक्तिः ॥ रसः स्वरसः ॥ इदं शौन
कमतं ॥ रसे दध्नि तक्रे पयसि खलु कल्को ष्टमतयः प्रदेयः पाकार्थं जलमिह चतुर्भा
गमुदितं ॥ द्रवं स्नेहे पंचप्रभृति तु समं पूर्वमुदितं चतुर्भागं पाकाद्विविधरहमथो
मृदुखरौ ॥ रसे स्वरसे ॥ दध्यः दधि ॥ दध्नीत्यत्र सप्तम्यर्थे षष्ठी चिंत्या ॥ दध्नि रसेम
स्तु निरुक्तिर्व्याख्याने स्वरसत्वाजग्धिस्तयः ॥ तक्रेकालसेये ॥ अष्टमतयः स्नेहाद्ष्ट
मांशिकः ॥ इह कल्के ॥ पंचप्रभृतीति ॥ पंचषडादिके यत्र द्रव द्रव्यं तत्र यत् पंकं स्नेह
समानं ॥ पूर्वं चतुर्भागमुदितमिति योजना ॥ पूर्वं पंचसंख्यातः पूर्वं पासंख्याता ॥
यापरिच्छिन्नं चतुर्भ्रिद्विद्रव्यं चतुर्भागमिति ॥ पयकपरस्यरं साम्येन सम

मात्रयामितितंस्नेहश्चतुर्गुणमित्यर्थः ॥ चतुर्भिर्द्वाभ्यांत्रिभिरपिद्रवैश्चातुर्गुण्यमि
तिपरमार्थः ॥ अन्यच्चोक्तंपंचप्रभृतिपत्रस्युर्द्रव्याणिस्नेहसंविधौ ॥ तत्रस्नेहसमान्या
हुरर्वाक्स्याच्चचतुर्गुणमिति ॥ कल्केकिट्टसमेमृद्वग्निर्निगदितोनस्येहितोनीरसेम
ध्योस्मिन्मदनोपमेखिलविधावस्मिन्दृढेस्यात्खरः ॥ अभ्यंगेनतसादृढ
यदिभवेद्दोषोनसंसाधयेत्तैलाद्येकदिनेयतोगुणायचयंकुर्यात्तदेयोचितं ॥ मृदुपा
कलक्षणमाह ॥ कल्केकिट्टसमइत्यादि ॥ नस्येहितइतिमृदुपाकविषयकथनं ॥
मध्यपाकलक्षणमाह ॥ निरसइत्यादि ॥ अस्मिन्कल्केमदनोपमेमधूच्छिष्टतु
ल्ये ॥ एतच्चाखिलविधौसर्वकर्मस्वित्यर्थः ॥ दृढेईषत्कठिनेअस्मिन्खरःस्या
दितिखरपाककथनं ॥ सखरपाकःअभ्यंगेहितः ॥ आमपाकदोषमाह ॥ अ

॥ ६७ ॥

मेलसादकृदित्यादि ॥ अनलसादोग्निमांद्यं ॥ घृततैलगुडादीन्नचैकदिनेतावचनी
रयेत्पर्युषितांनांतेषांगुणबाहुल्यदर्शनादित्याह ॥ नसंसाधयेदित्यादि ॥ तदुक्तं
पक्षेणसिद्धतेतैलं प्रक्षाहात्सिद्धते घृतं ॥ कषायः प्रहरेणापि यत्नेन परिसा
धयेदिति ॥ कल्कोनेतुतिलैर्यैकृयदितथायन्हावशब्दोयदिस्नेहोगंधसवर्णी
संपदपिचेत्तैलेतुफेनोद्गमः ॥ तस्यैयोपशमोघृतेयदितद्रायवन्हेः संमुत्तारयेच्छी
तेतत्रसुगंधिभेषजवर्यंदद्यात्सयुक्त्याभिषक् ॥ वन्हौ अग्नौ ॥ अशब्दः शब्दर
हितः ॥ इदंसर्वंस्नेहपाकेलक्षणंज्ञानार्थमुक्तं ॥ इतिघृततैलविधि ॥ अथसंधा
नविधिः ॥ द्रवेषुचिरकालस्थंद्रव्यंयत्संधितंभवेत् ॥ आसवारिष्टभेदैस्त ॥ ६७ ॥
त्प्रोच्यतेभेषजोचितं ॥ तत्रासवारिष्टयोर्लक्षणमाह ॥ यदपक्कौषधांबुभ्यां

सिध्यं मद्यं सत्वासवः ॥ अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलोन्मितं ॥ अनुमानो
रिष्टेषु द्रव्याद्द्रोणं गुडात्तुलां ॥ क्षौद्रं क्षिपेद्गुडादर्धं प्रक्षेपं दशमांशिकं ॥ दशमांशि
कं गुडस्यैव दशमांशं ॥ ज्ञेयः सीतरसः सीधुरपक्वमधुरद्रवैः ॥ मधुरद्रव्योत्र र
क्षुरसादिः ॥ सिद्धः पक्वरसः सीधुः संपक्वमधुरद्रवैः ॥ परिपक्वान्नसंधानस
मुत्पन्नां सुरां जगुः ॥ सुरामंडः प्रसन्ना स्यात्ततः कादंबरी घना ॥ तदधो जगलो ज्ञे
यो मेदको जगलाद्घनः ॥ बक्कसो हृतसारः स्यात्सुराबीजं च किण्वकं ॥ सुराबीजं प
व्रगोधूमतंदुलादियत्तालखर्जूररसैः संधितं सा हि वारुणी ॥ कंदमूलफलादी
वृ॰ नि सस्नेहलवणानि च ॥ यत्र द्रवेभिषूयंते तच्छुक्तमभिधीयते ॥ अभिषूयं
ते द्रवेणाह्याव्य संधीयते ॥ विनष्टमम्लतां यातं मद्यं वा मधुरद्रवः ॥ विन

द्रवः संधितो यस्तु तच्छुक्तमभिधीयते ॥ गुडांबुना सतैलेन कंदशाकफलैस्तथा ॥ संधितं चाम्लतां यातं गुडशुक्तं तदुच्यते ॥ एवमेवेक्षुशुक्तं स्यान्मृद्वीकासंभवं तथा ॥ तुषांबु संधितं ज्ञेयमामैर्विदलितैर्यवैः ॥ यवैस्तु निस्तुषैः पक्वैः सौवीरं संधितं भवेत् ॥ आरनालं तु गोधूमैरामैः स्यान्निस्तुषीकृतैः ॥ पक्वैर्वा संधितैस्तत्तु सौवीरसदृशं गुणैः ॥ कुल्माषधान्यमंडादिसंधितं कांजिकं विदुः ॥ खंडाकी संधिता ज्ञेया मूलकैः सर्षपादिभिः ॥ इति संधानविधिः ॥ अथ स्नेहपानविधिः ॥ स्नेहाद्या अथ कथ्यंते योगा रोगोपघातकाः ॥ स्नेहश्चतुर्विधः प्रोक्तो घृतं तैलं वसा तथा मांसस्नेहः ॥ मज्जा अस्थिस्नेहः तथा ॥ मज्जा च तं पिबेन्मर्त्यः किंचिदभ्युदिते रवौ ॥ स्थावरो जंगमश्चैव द्वियोनिः स्नेह उच्यते ॥ तिलतैलं स्थावरेषु जंगमेषु घृतं वरं ॥ द्वाभ्यां त्रिभिश्चतुर्भिस्तैर्यमक

स्त्रिव्रतो महान् ॥ पिबेत्त्र्यहं चतुरहं पंचाहं षडहं तथा ॥ सप्तरात्रात्परं स्नेहः सात्मीभ
वति सेवितः ॥ दोषकालाग्निवयसां बलं दृष्ट्वा प्रयोजयेत् ॥ हीनां च मध्यमां ज्येष्ठां मा
त्रां स्नेहस्य बुद्धिमान् ॥ अमात्रया तथाकाले मिथ्याहारविहारतः ॥ स्नेहः करोति शो
फार्शस्तंद्रानिद्राविसंज्ञताः ॥ स्नेयाक्षीत्यागमेयमात्रा स्नेहस्य पलसंमिता ॥ मध्य
मा पत्रिकर्षा स्याज्जघन्या पद्धिकार्षिकी ॥ केवलं पैतिके सर्पिर्वातिके लवणान्वि
तं ॥ पेयं बहुकफे चापि व्योषक्षारसमन्वितं ॥ रूक्षक्षतविषार्तानां वातपित्तविका
रिणां ॥ हीनमेधास्मृतीनां च सर्पिःपानं प्रशस्यते ॥ क्रिमिकोष्ठानिलाविष्टाः प्रवृ
द्धकफमेदसः ॥ पिबेयुस्तैलसात्म्याये तैलं दार्ढ्यार्थिनश्च ये ॥ व्यायामकर्षिताः शु
ष्करेतोरक्तमहारुजः ॥ महाग्निमारुतप्राणा वसायोग्या नराः स्मृताः ॥ क्रूराश

६८०

तव्यं च स्निग्धा पि हि देहिनां ॥ क्षोधनीयाश्च ये केचित्पूर्वं स्वेद्याश्च ते मताः ॥ स्वेद्या ऊर्ध्वं त्र-
यो यीह भगंदर्य्यर्शसस्तथा ॥ अश्मर्य्या चातुरे जंतुः समयेश स्त्वकर्मणः ॥ शास्त्रकर्मणः
पूर्वं पश्चाच्चेति संप्रोक्तेः ॥ पश्चात्स्वेद्या हृते शल्ये मूढगर्भगदे तथा ॥ काले प्रजाता का-
ले वा पश्चात्स्वेद्या नितंबिनी ॥ सर्वान्स्वेदान्नियातेयनी र्गीन्लेचायचारयेत ॥ स्वेदधातु म-
स्थिता दोषाः स्नेहक्लिन्नस्य देहिनः ॥ द्रवत्वं प्राप्य कोष्ठांतर्गत्वा यांति विरेचिताः ॥ स्नेहा-
भक्तशरीरस्य शीतैरसाध्यचक्षुषी ॥ स्वेद्यमानस्य च मुहुर्हृदयं शीतलैः स्पृशेत ॥ शी-
तैराद्रवस्त्रादिभिः ॥ अजीर्णी दुर्बलो मेही क्षततक्षीणः पिपासितः ॥ अतीसारी रक्तपि-
त्ती पांडुरोगी तथोदरी ॥ मेदस्वी गर्भिणी चैव न हि स्वेद्या विजानता ॥ स्वेदादेषां यांति
देहा विनाशं नो साध्यत्वं यांति चैषां विकाराः ॥ एतानपि मृदुस्वेदसाध्यानुपाचरेत ६८०

मृदुस्वेदं प्रयुंजीत तथा हृन्मुष्कदृष्टिषु ॥ अतिस्वेदात्संधिपीडा दाहस्तृष्णा क्लमो भ्रमः
पित्तास्रक्पिटिकाकोपस्तत्र शीतैरुपाचरेत ॥ तत्र तापस्वेदमाह ॥ तेषु तापाभिधः स्वे-
दो वालुकावस्त्रपाणिभिः ॥ प्रतप्तैरम्लसिक्तैश्च कार्ये रथ्यक्रवेष्टिते ॥ ऊष्मस्वेदमाह
अयःपाषाणतिनीशिद्रव्यकाष्ठरसादिभिः ॥ उष्मैर्घटं पूरयित्वा पार्श्वेछिद्रं विधा-
य च ॥ विमुद्रास्यं त्रि खेडां च धातुजां काष्ठजां मृत ॥ षडंगुलास्यां गोपुच्छां नाडीं युंज्या-
द्विहस्तिकां ॥ स्वल्पोपविष्टं स्वभ्यक्तं गुरुप्रावरणावृतं ॥ हस्तिशुंडिकया नाड्या स्वेद-
येद्वातरोगिणं ॥ हस्तिशुंडिकयेति हस्तिशुंडवक्रमवक्रशाल्यानाड्या इयं संज्ञाः ॥ पु-
रुषायाममात्रां वा भूमिमुत्कीर्य्य खादिरैः ॥ काष्ठैर्दग्ध्वा तथाभ्युक्ष्य क्षीरधान्याम्लवा-
रिभिः ॥ वातघ्नपत्रैराच्छाद्य शयानं स्वेदयेन्नरं ॥ एवं माषादिभिः स्विन्नैः शयानं

॥ हृ८१ ॥

स्वेदमाचरेत् ॥ उपनाहस्वेदमाह ॥ तथोपनाहस्वेदं च कुर्याद्वातहरैरौषधैः ॥ प्रदिह्य देहं वाता
र्त्तं क्षीरमांसरसान्वितैः ॥ अम्लपिष्टैः सलवणैः सुखोष्णैः स्नेहसंयुतैः ॥ उतग्राम्यानूप
मांसैर्जीवनीयगणेन च ॥ दधिसौवीरकक्षीरैर्वीरतर्वादिना तथा ॥ कुलत्थमाषगोधू
मैरतसीतिलसर्षपैः ॥ शतपुष्पादेवदारुशेफालीस्थूलजीरकैः ॥ एरंडमूलजीरैश्च रास्ना
मूलकशिग्रुभिः ॥ मिशिकृष्णाकुठेरैश्च लवणैरम्लसंयुतैः ॥ प्रसारण्यश्वगंधाभ्यां
बलाभिर्दशमूलकैः ॥ गुडूच्या वानरीबीजैर्यथालाभं समाहृतैः ॥ क्षुण्णैः स्विन्नैश्च वस्त्रे
णावबद्धैः सं स्वेदयेन्नरं ॥ महाशाल्वणसंज्ञोयं योगः सर्वानिलार्तिजित् ॥ अथवाम्ले
न संपिष्टैः कोष्णैः सूक्ष्मपुटस्थितैः ॥ भेषजैः स्वेदयेल्लिंकिं वा स्विन्नैः कोष्णैः घटस्थितैः
द्रवस्वेदमाह ॥ द्रवस्वेदस्तु वातघ्नद्रव्यक्वाथेन पूरिते ॥ कटाहे कोष्ठके वापि सूपवि ॥ हृ८१ ॥

ष्ठोवगाहयेत् ॥ सौवर्णं राजतं वापि ताम्रं लोहं च दारुजं ॥ कोष्ठकं तत्र कुर्वीत तोष्ठायेषड्ढिं
ष्ठादंगुलं ॥ आयामे वात देयस्याच्चतुष्कोणं तु चिक्कणं ॥ पक्षांतरमाह ॥ नाभेः षडंगुलं या
वन्मग्नः क्वाथस्यं धारया ॥ कोष्ठयास्कंधयोः सिक्तस्तिष्ठेत्स्निग्धतनुर्नरः ॥ अथम
र्थः ॥ प्रथमतो वातघ्न द्रव्यक्वाथेनाकंठं पूरिते कोष्ठके कटाहे वा सूपविष्टस्तिष्ठेत ॥ अ
थवा नाभेः ॥ षडंगुलमूर्ध्वं यावत् तावत्क्वाथे मग्न उपविष्टः पश्चात्क्वाथस्य धारया
स्कंधयोः सिच्यमानस्तिष्ठेत् यावत्कोष्ठकं परिपूर्णं भवतीत्यर्थः ॥ क्वाथपक्षे प्रथ
मतः स्नेहाभक्ततनुरुपविष्टोत ॥ मुहूर्तैकं समारभ्य यावत्स्यात्तच्चतुष्टयं ॥ तावत्तद
वगाहेतव्याधवत्तरोमयनिश्चयः ॥ एवं तैलेन दुग्धेन सर्पिषा स्वेदयेन्नरं ॥ एकांतरे
ष्वंतरे वा प्रयुक्तः स्नेहोवगाहने ॥ एतावता क्वाथो दुग्धं नित्यमेव प्रयुज्यते स्नेहस्तु

९८२

दिनमेकंद्व्याहीनेगमयित्वाप्रयुक्तः॥ अग्निमांद्यशंकयेतिभावः॥ क्षिरामुचैस्तैलमकुर्वैद्र
मतीमिश्रतर्पयेत्॥ अतिरेषत्वमाधतेप्रयुक्तःस्नेहोचगाहने॥ जलसिक्तस्यवर्द्धंतेयथा
मूलेंकुरादयः॥ तथैवधातुवृद्धिर्हिस्नेहसिक्तस्यजायते॥ नातःपरतरःकश्चिदुपायो
यातनाशनः॥ प्रीतश्छूलच्छुपरमेसंतंभगौरवनिग्रहे॥ दीप्तेग्नौमार्द्दवेजातेस्नेहनाद्वि
रतिर्मता॥ इतिस्नेहविधिः॥ अथपंचकर्माणि॥ वमनंरेचनंनस्यंनिरूहश्चानुवास
नं॥ एतानिपंचकर्माणिकथितानिमुनीश्वरैः॥ तत्रप्रथमंवमनविधिः॥ शरत्काले
वसंतेचप्रावृड्कालेचदेहिनां॥ वमनंरेचनंचैवकारयेत्कुशलोभिषक्॥ बलवंतंक
फव्याप्तंहृल्लासादिनिपीडितं॥ तथावमनसात्म्यंचधीरचित्तंचवामयेत्॥ विषदो
षेस्तन्यरोगेमंदेग्नौप्लीपदेर्बुदे॥ हृद्रोगेकुष्ठवीसर्पमेहाजीर्णभ्रमेषुच॥ विदा

९८२

रिक्तापथ्यौकसात्म्यासपीनसयद्विधु ॥ अपस्मारेष्वरोन्मादे तथा रक्तातिसारिषु ॥ नासा
ताल्वोष्ठपाके चक्षूरोगिण्याये धिजिह्वके ॥ गलशुंड्यामतीसारे पित्तश्लेष्मगदे तथा ॥ मेदो
गदे हृच्चौ चैव वमनं कारयेद्भिषक् ॥ स्तन्यरोगे दुष्टदुग्धजनितेयातस्य रोगे ॥ न वाम
नीयस्तिमिरी न गुल्मी नोदरी कृशः ॥ नातिवृद्धो गर्भिणी च न स्थूलो न क्षतातुरः ॥ मदा
त्तौ यातको रूक्षः क्षुधितश्च निरूहितः ॥ उदावर्त्यूर्ध्वरक्ती च दुश्छर्द्यः केवलानिली ॥
पांडुरोगी कृमिव्याप्तः पठनात्स्वरघातवान् ॥ एतेप्यजीर्णव्यथिता वाम्या ये तिषपी
डिताः ॥ कफव्याप्ताश्च ते वाम्या मधूकक्वाथपानतः ॥ दुश्छर्द्यः मुक्तरूक्षकर्कशध्व्यः
मधूकस्थाने मधुकेतिवा पाठः ॥ सुकुमारं कृतं बालं वृद्धं भीरुं न वामयेत् ॥ पाययि
त्वा यवागूं वाक्षीरतक्रदधीनि वा ॥ असात्म्यैः श्लेष्मलैर्भोज्यैर्दोषानुत्क्लेश्य देहि

॥ ई८३ ॥

ने ॥ स्निग्धस्विन्नाय वमनं दत्तं सम्यक्प्रवर्त्तते ॥ वमनेषु च सर्वेषु सैंधवं मधु चाहितं ॥ बीभत्सं वमनं दद्याद्विपरीते विरेचनं ॥ बीभत्समहृद्यं विपरीतं हृद्यं ॥ क्वाथ्यद्रव्यस्य कुडवं श्रपयित्वा जलाढके ॥ अर्द्धभागावशिष्टं च वमनेष्ववचारयेत् ॥ क्वाथपाने नव प्रस्था ज्येष्ठा मात्रा प्रकीर्त्तिता ॥ मध्यमा षट्प्रस्ता प्रोक्ता त्रिप्रस्था च कनीयसी ॥ वमने च विरेके च तथा शोणितमोक्षणे ॥ अर्द्धत्रयोदशपलं प्रस्थमाहुर्मनीषिणः ॥ अर्द्धत्रयोदशपलैः सार्द्धं षड्कं ॥ कल्कचूर्णावलेहानां त्रिपलं मात्रयोत्तमं ॥ मध्यमं द्विपलं विद्यात्कनीयस्तु पलं भवेत् ॥ वमने चाष्टवेगाः स्युः पित्तांता उत्तमा स्मृते ॥ षड्वेगा मध्यमा वेगाश्चत्वारस्त्ववरे मताः ॥ कफं कटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् ॥ स्वाद्वम्ललवणस्निग्धैः संसृष्टं वायुना कफं ॥ कृष्णाराठफलं सिंधुं कफे कोष्णजलैः पिबेत् ॥ पटोलवासानिं

॥ ई८३ ॥

वांश्च पित्ते शीतजलैः पिबेत् ॥ राठफलं मदनफलं सश्लेष्मवाततपीडायां सक्षीरं मदनं
पिबेत् ॥ अजीर्णो कोष्णपानीयं सिंधु पीत्वा च मेत्सुधीः ॥ वमनं पाययित्वा च जानुमा
त्रासने स्थितं ॥ कंठमेरंडनालेन स्पृशंतं वामयेत् भिषक् ॥ प्रसेको हृद्ग्रहः कोठः कंडू
दुःछर्दितैर्भवेत् ॥ अतियांते भवेत्तृष्णा हिक्कोद्गारौ विसंज्ञता ॥ जिव्हानिःसरणं चाक्ष्णो
र्व्यावृत्तिर्हन्वसंहतिः ॥ रक्तछर्दिः ष्ठीवनं च कंठपीडा च जायते ॥ अक्ष्णोर्व्यावृत्तिः स्थि
रता ॥ हन्वसंहतिहन्वोरभितर्नं ॥ वमनस्यातियोगे तु मृदु कुर्याद्विरेचनं ॥ वमने डतः प्र
विष्टायां जिव्हायां कवलग्रहः ॥ स्निग्धाम्ललवणैर्हृद्यैर्घृतक्षीररसैर्हितः ॥ रसैर्मांस
सरसैः ॥ फलान्यम्लानि खादेयुस्तस्य चान्ये पुरतो नरः ॥ निःसृतां तु तिलद्राक्षाकल्क
लिप्तां प्रवेशयेत् ॥ निःसृतां जिव्हां ॥ व्यावृत्तेक्षिणि घृताभ्यक्ते पीडनं यथोचितैः शनैः ॥

हनुमोक्षेस्मृतः स्वेदोन स्वेचम्लेष्मवातहृत् ॥ रक्तपित्तविधानेन रक्तछर्दिमुपाचरेत् ॥ धा
त्रीरसांजनोशीरलाजाचंदनवारिभिः ॥ मंथं कृत्वा पाययेच्च सघृतक्षौद्रशर्करं ॥ वैमस्य
स्वनेनतस्माद्यारोगाश्छर्दिसमुद्भवाः ॥ वारिवातकं ॥ हृत्कंठशिरसां शुद्धिर्दीप्ताग्नित्वं च
लाघवं ॥ कफपित्तविनाशश्च सम्यग्वांतस्य लक्षणं ॥ ततो परान्हे दीप्ताग्निमुद्गषष्ठि
कशालिभिः ॥ हृद्यैश्च जांगलरसैः कृत्वा यूषं भोजयेत् ॥ तंद्रा निद्रा स्यदैर्गंध्यं कंडूश्च
गृहणीविषं ॥ सुवांतस्य न पीडा यै भयं त्वेतेक दाचन ॥ अजीर्णं शीतपानीयं व्यायो
मं मैथुनं तथा ॥ स्नेहाभ्यंगं च रोषं च दिनमेकं सुधीस्त्यजेत् ॥ इति वमनविधिः ॥ अथ
विरेचनविधिः ॥ स्निग्धस्विन्नाय वांताय दद्यात्सम्यग्विरेचनं ॥ अवांतस्य त्वधःस्र
स्तो गृहणी छादयेत्कफः ॥ मंदाग्निं गौरवं कुर्याज्जनयेद्वा प्रवाहिकां ॥ अथ पाचो

यैनैरमंचतासंचविपाचयेत् ॥ अन्यदात्ययिके कार्य्ये शोधनं शीलयेद्बुधः ॥ आत्ययि
के प्राणसंकटे ॥ पित्ते विरेचनं युंज्यादामोद्भूते गदे तथा ॥ उदरे च तथाध्माने कोष्ठशुद्धौ
विशेषतः ॥ दोषाः कदाचित्कुप्यंति जिता लंघनपाचनैः ॥ शोधनैः ॥ शोधनैः शोधिता ये तु
न तेषां पुनरुद्भवः ॥ बालो वृद्धोतिस्निग्धः क्षतक्षीणो भयान्वितः ॥ श्रांतस्तृषार्त्तः स्थू
लश्च गर्भिणी च नवज्वरी ॥ नवप्रसूता नारी च मंदाग्निश्च मदात्ययी ॥ शल्यार्दितश्च रू
क्षश्च न विरेच्या विजानता ॥ जीर्णज्वरी गरव्याप्तो वातरक्ती भगंदरी ॥ अर्शः पांडूदरग्रं
थिहृद्रोगारुचिपीडितः ॥ योनिरोगप्रमेहार्त्तो गुल्मप्लीहव्रणार्दिताः ॥ विद्रधिच्छर्द्दिवि
स्फोटविषूचिकुष्ठसंयुताः ॥ कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः ॥ प्लीहशोथा म
क्षिरोगार्त्ताः कृमिक्षारानलार्दिताः ॥ शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः ॥ बहु

९५

पित्तो मृदुः प्रोक्तो बहुश्लेष्माच मध्यमः ॥ बहुवातः क्रूरकोष्ठो दुर्विरेच्यः स कथ्यते ॥ मृद्वीमा
चा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा ॥ क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः ॥ मृदु
द्राक्षापयश्चंचुतैलैरपि विरिच्यते ॥ मध्यमस्त्रिवृता तिक्ता राजवृक्षैर्विरिच्यते ॥ क्रूरः
स्नुक्पयसा हेमक्षीरी दंती फलादिभिः ॥ मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफांतका
वेगैर्विंशतिभिर्मध्या हीनोक्ता दशवेगिका ॥ द्विपलं श्रेष्ठमाख्यातं मध्यमं च पलं भवे
त् ॥ पलार्द्धं च कषायाणां कनीयस्तु विरेचनं ॥ कल्कमोदकचूर्णानां कर्षं मध्वाज्यले
हतः ॥ कर्षद्वयं पलं चापि वयोरोगाद्यपेक्षया ॥ पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादि
भिः पिबेत् ॥ त्रिफलाक्वाथगोमूत्रैः पिबेद्व्योषं कफार्दितः ॥ त्रिवृत्सैंधवशुंठीनां चू
र्णमम्लैः पिबेन्नरः ॥ वातार्दितो विरेकाय जांगलानां रसेन वा ॥ एरंडतैलं त्रिफला ॥ ९५ ॥

काथेनद्विगुणेनच ॥ युक्तंपित्तंपयोभिर्वातचिरेणविरिच्यते ॥ त्रिवृताकौटजंबीजंपि
प्पलीविश्वभेषजं ॥ समद्वीकारसक्षौद्रंवर्षाकालेविरेचनं ॥ त्रिवृद्दुरालभामुस्ताशर्क
रोदीच्यचंदनं ॥ द्राक्षांबुनासयष्ट्याह्वंशीतलंचविरेचनं ॥ श्यामाकृस्नसारिवा
त्रिवृताशर्करातुल्याग्रीष्मकालेविरेचनं ॥ प्रसंगात्सामान्येद्यपाचनेन्याह शुंठी
धान्यकाथपटोलपरुस्ताधात्रीपथ्याचित्रकाणांकषाय ॥ २४ः पाचनायेतिशेषः
आमानान्यानिरेचानति ॥ त्रिवृत्कषायकल्कजोवलेहकःसिताघृतः ॥ हिमोमधुत्रि
जातयुक्तस्तुहृद्यरेचनंमतं ॥ विडंगतंदुलोन्मत्तमाषयावाग्जौषरेणाश्चिवृत ॥ अशेषतोर्द्ध
युग्मडायंतीठमिन्वदःपरं ॥ अपायवर्जितंहृचिव्यपायकासगुल्मजित ॥ कफाति
लाहितानपिप्रमार्ष्टिरोगसंचयान ॥ विडंगतंदुलाःनिस्तुषविडंगा ॥ उषेणाविप्प

हृ० दी

ती ॥ अश्लेषतोऽहुडगुडावलीढं सर्वाद्विभागगुडेनावलीढं ॥ अपयोव्यापत् ॥ रुचिव्यपायो
ऽरोचकः ॥ कफानिलाहितान् कफवायुकृतान् ॥ त्रिकटुत्रिजातकृमिजिन्मुस्तयाहामल
लकैः समासमसिता त्रिवृद्देया ॥ मधुनागुटिकासनश्लेषसुजीर्णज्वरमूत्रकृच्छ्रय
मिजिन्निरपाया ॥ त्रिकटुत्रिफलाभिः समा त्रिवृत्सर्वसमां शः शर्करेत्यर्थः ॥ निरपाया
दाहादिक्लेशरहिता ॥ प्रयोज्यस्तु सम्यक्कमज्ञो यथावत्प्रयोगहारकृत्तरसादिप्रयु
क्तः ॥ क्षतक्षीणत्वं हरति दाहज्वरोर्ध्वानिलातांदिषु स्वादुशीतो न पायः ॥ ऊर्ध्वानि
लउदावर्तः ॥ अनपायो निर्दोषः ॥ धात्रीयारिरसजेतु जित्रिकटुकगंधित्रिजातानपा
चयेत्सत्रिवृदवलेहं इति सिकताकुंभांशकं चूर्णितं ॥ तुल्यभक्ष्यौ द्रागुटीकृतं तदुद्दिष्टं सं
स्तंभनोपस्मोदकंपांडुर्शः कासतज्वरातमजठरादीनि पक्षयोः स्यादग्निजित् ॥ सत्रि

हृ० दी

बउबदंतिसिकताकुंभांशकमितित्रिगुरणादंतीबकुलाशर्करात्रवगुरणात्रिवृत ॥
सेस्त्तमनोस्मोदकसेस्त्तमनंप्रवृतिनियतंक्रेउस्मोदकंपस्पतदिति ॥ त्रिवृद्रजोद्वि
कार्षिकंसिताक्षसंयुतंपिबेत ॥ अशीतवारिराणाकृतंविरिच्यतेमुखेननु ॥ द्ररदंट
करांशुंठीपिप्पलीचैककार्षिकाः ॥ हेमाह्वापलमात्रास्याद्दंतीबीजंचतत्समं ॥ वि
चूर्णयेत्कत्रसर्पालिगोदुग्धेनैवपचयेत ॥ त्रिगुंजंरेचनंदद्याद्विषंमाधमानरो
गिषु ॥ तत्समंहेमाव्हासमं ॥ शुंठीतीक्ष्णरसेंद्रटंकणायतिप्रोक्तंसमंतत्रिधाकुं
भीबीजयुतंविमर्द्यसमयेदिच्छाविभेदीरसः ॥ यस्त्वःशर्करयायुतोनुतुलकंपुंसः
सुखंरेचयेन्नित्यःशोषंमतदोषमेवविनिहंत्यफसैयंप्येमंहरिः ॥ इतिइच्छाविभेदी
रसः ॥ पीत्वाविरेचनंशीतजलैःसंसिच्यचक्षुषी ॥ सुगंधिकिंचिदाघ्रायतो

॥ हि९७ ॥

घृतं शीतयेद्ध्रुवं ॥ निवातस्थानवेगांश्च धारयेन्नरापीतच ॥ शीतांबु न स्पृशेत्क्वापि
कोष्णं नीरं पिबेन्मुहुः ॥ वत्तासौषधपित्तानि यावद्यांति यथाव्रजेत ॥ रेकात्तथा
मलं पित्तं भेषजं च कफो व्रजेत ॥ दुर्विरिक्तस्य नाभेस्तब्धता कुक्षिशूल रुक्
पुरीषवातसंगश्च कंडुमंडलगौरवं ॥ विदाहो रुचिराध्मानं भ्रमः छर्दिश्च जाय
ते ॥ तं पुनः पाचनैः स्नेहैः पक्का संस्निह्य रेचयेत ॥ तेनस्योपद्रवा यांति दीप्तो।
ग्निर्लघुता भवेत ॥ विरेकस्यातियोगेन मूर्छा भ्रंशो गुदस्य च ॥ शूलं कफाति
योगः स्यान्मांसधावनसन्निभं ॥ मेदोनिभं जलाभासं रक्तं चापि विरिच्य
ते ॥ तस्य शीतांबुभिः सिक्त्वा शरीरं तंडुलांबुभिः ॥ मधुमिश्रैस्तथाशीतैः कारये
द्वमनं मृदु ॥ सहकारत्वचः कल्को दध्ना सौवीरकेण वा ॥ पिष्टो नाभिप्रलेपेन हंत्यती

॥ हि९७ ॥

सारमुल्वणं ॥ आजंक्षीरं रसं वापि वैष्किरं हारिणं तथा ॥ शालिभिः षष्ठिकैः स्वल्पं म
सूरैर्वापि भोजयेत् ॥ प्रीतैः संग्राहिभिर्द्रव्यैः कुर्यात्संग्रहणं भिषक् ॥ लाघवे मनस स
स्तुष्टावनुलोमं गतेनिले ॥ सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ॥ इंद्रियाणां व
लं बुद्धेः प्रसादो वन्हिदीप्तिता ॥ धातुस्थैर्यं वयःस्थैर्यं भवेद्रेचनसेवनात् ॥ प्रवात
सेवां शीतांबु स्नेहाभ्यंगमजीर्णतां । व्यायामं मैथुनं चैव न सेवेत विरेचितः ॥ शालि
षष्ठिकमुद्गाद्यैर्यवागूं भोजयेत्कृतां ॥ जंघालविष्किराणां वा रसैः शाल्योदनं हितं ॥ इ
ति विरेचकविधिः ॥ अथ वस्तिविधिः ॥ तत्र स्नेहवस्तिमाह ॥ वस्तिर्द्विधानुवासाख्यो नि
रूहश्च ततः परं ॥ यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥ कषायक्षीरतैलैर्यो निरू
हः स निगद्यते । वस्तिभिर्दीयते यस्मात्तस्माद्वस्तिरिति स्मृतः ॥ वस्तिभिः मृगादी

९८८

नोम्नाप्रोक्तापैः॥ तत्रानुवासनाख्योहिवस्तिर्यःसोत्रकथ्यते॥ अनुवासनभेदश्चमात्रा
वस्तिरुदीरितः॥ पलद्वयंतस्यमात्रातस्मादर्धापिवाभवेत्॥ अनुवास्यस्तुरूक्षःस्यात्ती
क्ष्णाग्निःकेवलानिली॥ नानुवास्यस्तुकुष्ठीस्यान्मेहीस्थूलस्तथोदरी॥ नास्थाप्याना
नुवास्याःस्युरजीर्णोन्मादतृष्णार्ताःशोथमूर्छारुचिभयश्वासकासक्षयातुराः॥
नेत्रंकार्यंसुवर्णादिधातुभिर्वृक्षवेणुभिः॥ नलैर्दन्तैर्विषाणाग्रैर्मणिभिर्वाविधी
यते॥ आतुरांगुष्ठमानेनमूलेस्थूलंविधीयते॥ कनिष्ठिकापरिणाहमग्रेचगुटिका
मुखं॥ मुद्गच्छिद्रयुतंचक्रेगोपुच्छसदृशंदृढं॥ षडंगुलमितंतत्स्याच्चकिंवास्याद्द्वादशांगुलं
तन्मूलेकर्णिकेद्वेचकार्येभागाच्चतुर्थकात्॥ कर्णिकेगवादिकर्णीवत्॥ योजयेत्तत्र
वस्तिंचवंधद्वयविधानतः॥ तत्रानुवासनेमात्राह॥ उत्तमास्यात्पलैःषड्भिर्मध्यमा ९८८

स्यात्पलैस्त्रिभिः ॥ पलेनार्द्धेन हीना स्यान्मुक्ता मात्रानुवासने ॥ पलेन त्वर्द्धपलेन च सा
र्द्धपलेनेत्यर्थः ॥ तस्य क्रियामाह ॥ भोजयित्वा यथाशास्त्रं कृतचंक्रमणं ततः ॥ उत्सृष्टा
निलविण्मूत्रं योजयेत्स्नेहबस्तिना ॥ सुप्तस्य वामपार्श्वेन वामजंघाप्रसारिणः ॥ प्रकुं
चितान्यजंघस्य नेत्रं स्निग्धं गुदे न्यसेत् ॥ वामेन पाणिना बस्तिकंठमालंब्य धीरधीः
बस्तिं संपीडयेत्पश्चादन्यहस्तेन पाणिना ॥ जृंभाकासक्षवादींश्च बस्तिकाले न कार
येत् ॥ त्रिंशन्मात्रामितः कालः प्रोक्तो बस्तेस्तु पीडने ॥ ततः प्रणिहिते स्नेहे उत्तानो वाक्
शते भवेत् ॥ प्रसारितैः सर्वगात्रैर्यथा वीर्यं प्रसर्पति ॥ ताडयेत्तलयोरेनं त्रींस्त्रीन्वारा
न्शनैः शनैः ॥ स्फिजोश्चैव ततस्तद्वच्छय्यां चैवोत्क्षिपेत्ततः ॥ जाते विधाने तु ततो
कुर्यान्निद्रां यथासुखं ॥ सतैलः सपुरीषश्च स्नेहः प्रत्येति यस्य तु ॥ उपद्रवं विना चै

॥ ह ८८ ॥

यः सम्यगनुवासितः ॥ अनेन विधिना देयाः सप्त चाष्टौ च यस्तयः ॥ अनायाते त्वहोरा-
त्रे स्नेहं सक्षोधनैर्हरेत् ॥ क्षुण्णयष्टीविल्वामयमिश्चिशाठीपौष्करवचाहता ॥ ग्रैः पिंडी
तामरतरुत्तैः क्षीरसहितं ॥ पचेत्तैस्तं हन्यादिविविहितमन्यासनमिदं सगुल्माग्नेः
कोष्ठगुरुहल्लिमदध्मातादिजस्तजः ॥ पानाहारविहारांश्च परिहारांश्च कृत्स्नशः ॥ स्नेहपा-
न समाः कार्या नात्र कार्या विचारणा ॥ इति संक्षेपतः प्रोक्तो यस्तिरेषोऽनुवासनः ॥
अपनीय हरत्यस्तिर्यत्तु धामियते कारणांतरैः ॥ तैरेव तस्य नामानि रूढानि मुनिपुंग-
वैः ॥ कारणांतरैः समवायिकारणभेदैः ॥ निरूहस्यापरं नाम प्रोक्तं मास्थापनं बुधैः
स्वस्थानस्थापनाद्दोषधातूनां स्थापनं मतं ॥ तस्य मात्राप्रमाणमाह ॥ निरूहस्य प्र-
माणं च प्रस्थं पादोत्तरं परं ॥ मध्यमं प्रस्थमुद्दिष्टं हीनं च कुडवास्त्रयः ॥ अतिस्निग्धो

॥ ह ८८ ॥

उत्क्लिष्टदोषःक्षतोरस्कःकृशास्तथा ॥ आध्मानछर्दिहिक्कार्शःकासश्वासप्रपीडितः
गुदशोफातिसारार्त्तोविषूचीकुष्ठसंयुतः ॥ गर्भिणीमधुमेहीचनास्थाप्यश्चजलोदरी
अक्लिष्टदोषःअदतोत्क्लेशनः ॥ वातव्याधावुदावर्त्तेवातास्रक्विषमज्वरे ॥ मूर्छातृष्णो
दरानाहमूत्रकृच्छ्राश्मरीषुच । वृद्ध्यसृग्दरमंदाग्निप्रमेहेषुनिरूहणं ॥ शूलेम्लपित्तेहृ
द्रोगेयोजयेद्विधिवद्बुधः ॥ स्नेहवस्तिवदत्रापिविधिःप्रोक्तोनिरूहणे ॥ रास्नापुष्कपंचमूल
त्रिफलफलसुधावत्रिवृयाघातमांसीक्वाथःसक्षौद्रतैलालवणगुडहविःसंयुतःक
ल्कैतैश्च ॥ विल्वोग्राकुष्ठकांताभिश्चिकणाजलदैर्मूत्रदुग्धारनालैर्युक्तोयातामपिभ्यः
सुविधिविनिहितोवस्तिरुक्तोतिशस्तः ॥ पुष्कंचमूलंदशमूलं ॥ फलंमदनफलं ॥ स्ना
नमुष्णोदकैःकुर्याद्दिवास्वप्नमजीर्णितां ॥ वर्जयेद्परंसर्वमाचरेत्स्नेहवस्तिवत ॥

॥ ६९० ॥

इति दिङ्मात्रेण निरूहबस्तिविधिः ॥ अथोत्तरबस्तिविधिः ॥ अतः परं प्रवक्ष्यामि बस्तिमु
त्तरसंज्ञितं ॥ द्वादशांगुलमानेन नेत्रं कुर्यात्सकर्णिकं ॥ मालतीपुष्पवृंताभं छिद्रं सर्षप
निर्गमं ॥ पंचविंशतिवर्षाणामधो मात्रा द्विकार्षिकी ॥ तदूर्ध्वं पलमात्रा हि स्नेहस्योक्ता भि
षग्वरैः ॥ स्थितस्य जानुमात्रे च पीठे त्विष्टशताकया ॥ स्निग्धया मेढ्रमार्गे च ततो नेत्रं नि
योजयेत् ॥ शनैः शनैर्घृताभ्यक्तं मेढ्ररंध्रे ऽङ्गुलानि षट् ॥ अनुवासक्रमः सर्वोप्यत्रापि वि
निवेदितः ॥ स्त्रीणां दशांगुलं नेत्रं स्थूलं प्रोक्तं कनिष्ठया ॥ मुद्गच्छिद्राननं योज्यं योन्यंतश्च
तुरंगुलं ॥ द्व्यंगुलं मूत्रमार्गे तु सूक्ष्मं नेत्रं नियोजयेत् ॥ मूत्रकृच्छ्रविकारेषु बालानामेकमंगु
लं ॥ शनैर्निःकंपमाधेयं सूक्ष्मं नेत्रं विचक्षणैः ॥ योनिमार्गे च नारीणां स्नेहमात्रा द्वि
पालिकी ॥ द्विकार्षिकी च बालानां मूत्रमार्गे निरूपिता ॥ बस्तिः शुक्ररजःपुंसो स्त्रीणा

॥ ६९० ॥

मार्त्तश्च जातरुजः ॥ हन्यादुत्तरवस्तिस्तु नोचितो मेहिनां क्वचित ॥ इत्युत्तरवस्तिविधिः ॥ अथ
नस्यविधिः ॥ नस्यं तत्कथ्यते धीरैर्नासाग्राह्यं यदौषधं ॥ नावनं नस्यकर्मेति तस्य नाम
द्वयं मतं ॥ तस्य भेदद्वयं प्रोक्तं रेचनं स्नेहनं तथा ॥ रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतं ॥
कफपित्तानिलध्वंसे पूर्वमध्यापराह्णके ॥ दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे ॥ तस्य
निषेधमाह ॥ नस्यं त्यजेद्भुक्तभोजनाद्दुर्द्दिने चापतर्पितः ॥ तथा नवप्रतिश्यायी गर्भिणी गर
दूषितः ॥ अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः ॥ क्रुद्धः शोकाभिभूतश्च तृषार्त्तो वृद्ध
बालकौ ॥ वेगावरोधी स्नातश्च स्नातुकामश्च वर्जयेत ॥ अष्टवर्षस्य बालस्य नस्यकर्म
समाचरेत ॥ अशीतिवर्षादूर्ध्वं च नावनं नैव दीयते ॥ अथ वैरेचनं नस्यं ग्राह्यं तैलैः सु
तीक्ष्णकैः ॥ तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथै रसैस्तथा ॥ नासिकारंध्रयोरेकैकशः च

॥ हृटि ३ ॥

ला रुजाविंदवः ॥ प्रत्येकं रेचनं योज्यं मुख्यमध्यांत्यमात्रया ॥ नस्यकर्मणि दातव्यं ष्णलौकं
तीक्ष्णमौषधं ॥ हिंगुस्याद्यवमात्रं तु माषैकं सैंधवं मतं ॥ क्षीरं चैवाष्टशाणं स्यात्पानीयं
च त्रिकार्षिकं ॥ कार्षिकं मधुरद्रव्यं नस्यकर्मणि योजयेत् ॥ अवपीडः प्रधमनं द्वौ भेदा
वपरौ स्मृतौ ॥ शिरोविरेचनस्यार्थे तौ तु देयौ यथायथं ॥ कल्कीकृतादौषधाद्यः पीडि
तो निस्रुतो रसः ॥ सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥ षडंगुला द्विमुखा या नाडी
चूर्णं तया धमेत् ॥ तीक्ष्णं कोलमितं वक्त्रवातैः प्रधमनं हितं ॥ वैरेचनेन नस्यं यथा ॥ नस्यं स्या
गुडशुंठीभ्यां पिप्पल्या सैंधवेन वा ॥ जलपिष्टेन तेनाक्षिकंठनासाशिरोगदाः ॥ मन्या
हनुगलोद्भूता नश्यंति भुजपृष्ठजाः ॥ मधूकसारकृष्णाभ्यां वचामरिचसैंधवैः ॥ नस्यं
कोष्णजलैः पिष्टं दद्यात्संज्ञाप्रबोधनं ॥ अपस्मारे तथोन्मादे सन्निपाते पतंत्रके ॥ ॥ हृटि ३ ॥

रोहीतमत्स्यपित्तेन भावितं मरिचं च या ॥ कट्फलं चेति चूर्णी हि देयं प्रधमनं बुधैः ॥ अथ
चं हलानस्य स्वकस्वना कथ्यते धुना ॥ मर्शस्फुरति मर्शस्फुरद्द्वौ भेदौ स्नेहनेमतौ ॥ मर्शस्य
तर्पिलीमात्रा मुख्याश्चालैः स्मृता बुभिः ॥ मध्यमा च चतुश्चालैर्हीनाश्चालामिता मता
एकैकस्मिंस्तु मात्रेयं देया नासापुटे बुधैः ॥ मर्शस्य द्वित्रिये तं च दश्मु दोषबलाबलं ॥ ए
कांतरं द्व्यंतरं या नस्यं दद्याद्विचक्षणः ॥ अहं वं चाहमथवा सप्ताहं वा स्वयं त्रितः ॥ ए
कांतरं एकदिनमंतरं नस्यपूर्वं यत्र तदेकांतरं ॥ अथवा अहं त्रीणि पहानि यावत्पति
दिनं ॥ एवं पंचाहं सप्ताहं च ॥ स्वयं त्रितः सावधानः यथा उच्छिकं तेन भवति तथा ॥ मर्श
श्चिश्चिरोऽपि रिक्ते च व्याप्तदौ विविधाः स्मृताः ॥ दोषोत्क्लेशात्क्षयाच्चापि विविसेयात्साप
थाक्रमं ॥ दोषोत्क्लेशनिमित्तास्तु कुर्याद्वमनशोधनं ॥ अथ क्षयनिमित्तास्तु यथास्वं

॥९८२॥

वृंहणं हितं ॥ शिरोनासाक्षिरोगेषु सूर्यावर्तार्द्धभेदके ॥ दंतरोगे बले हीने मन्यावाहंस्कजे
गदे ॥ मुखशोषे कर्णनादे वातपित्तगदे तथा ॥ अकालपलिते चैव केशश्मश्रुपयातने ॥
पूज्यते वृंहणं नस्यं स्नेहैर्वा मधुरद्रवैः ॥ वृंहणं नस्यं यथा ॥ सशर्करं पयः पिष्ट्वा मधुमा
ज्येन कुंकुमं ॥ नस्यप्रयोगतो हन्याद्वातरक्तभवां रुजं ॥ मुखं खांक्षिशिरःशूलं सूर्याव
र्त्तार्द्धभेदकान् ॥ नस्यं स्यादणुतैलेन तथा नारायणेन वा ॥ माषादिना वा सर्पिर्भिस्तत्त
द्भेषजसाधितैः ॥ अणुतैलमुक्तं सुश्रुतेन तद्यथा ॥ तिलपरिपीडनोपकरणकाष्ठा
न्याहृत्य वैरनस्य कालं तिलाः परिपीडितास्तान्यणूनि खंडशः कृत्वा पिल्वाउ तु खले सं
क्षुद्य कटाहे पानीयेनाध्माप्य क्वाथयेत् ततस्तैलं निस्सरति तत्पैतं शीतं तं हस्तेन जलालिंः
सार्प्यायात तैरौषधकल्केन पचेत् अणुतैलमिति ॥ तदा तरोगहरं ॥ तत्रांतरे स्वन्यथो ॥९८२॥

क्तं तद्यथा ॥ गोपीश्रीतांतुधारिमदनत्वदवरीजीरकनीदारुसिंहिपर्णीपुष्णीमैत्येतेतास्
द्द्रूमिश्राननत्यक्रमपौंडर्यविस्वं ॥ एतान्किंजल्कदार्वी स्वयमेषुकथद्धापुत्रेकौंतीति
पाच्यंतैलाद्याचद्रव्यादिस्थितिमातगुलितैद्रवुनातेनतैतं ॥ पाच्यंवारान्द्रव्यंजंपय
द्दहद्रव्यमेतुल्यमाधापयाकेसिद्धंतच्चाग्नैतैलंचद्रद्गुग्गमुद्दितैनायनेसंप्रयुक्तं ॥ गोपी
सारिवानलदंःत्रटामांसी ॥ जीवनीजीवंती ॥ प्रपौंडयंगहृतेतिप्रसिद्धं ॥ स्वयोयन्वमु
स्तकं ॥ एतान्यौषधानिमातगुलितैद्रवुनामोप्पाद्यपेक्षयैवसतगुलितमाहेद्रज
लेन ॥ तैलाद्याचद्रव्यादिस्थितीति द्रव्यानांअंब्रूणांअधिस्थितिरथवाघृतुपायेसि
नूकर्मलिपथास्यात्तथा ॥ तेनद्रव्यग्गुलितेनक्काथेनतैलंद्रव्यवारान्पाच्यं ॥ अर्थात्ते
त्तावेत्पाच्यंपायतैलंतुत्यभागेनक्काथेनद्रव्यवारान्पाकःस्यात ॥ द्रव्यमेपाकेतु

॥ ६९३ ॥

स्यंश्राजंषयःदेयं॥ यकृग्गुल्मांत्रिदोषघ्नादिगुणविशिष्टं॥ तदुक्तंचरके॥ अणुतैलंत्रिदो
षघ्नमिंद्रियाणांबलप्रदमिति॥ इतिद्विविधमणुतैलं॥ तैलंकफेसवातेचकेवलेप
वनेवसा॥ दग्धानलस्यंसंदापितेसर्पिर्मज्ञानमेवच॥ प्रतिमर्शस्यमात्रातुद्वित्रिविंदु
षितामता॥ प्रत्येकयोर्नासिकयोःस्नेहेनेतिविनिश्चितं॥ स्नेहेगूर्ष्यिद्रुपंयावन्लिम
ग्नंचोद्धृतेततः॥ तर्जन्याग्रभवेतस्यायःसविंदुरुदाहृतः॥ एवंविधैरष्टसंख्यैर्विं
दुभिःश्राणउच्यते॥ सेद्देयोमर्शनस्येषुप्रतिमर्शोद्विविंदुकः॥ समयाःप्रतिमर्शस्य
वुधैःप्रोक्तास्तुद्दश॥ प्रभातेदंतकाष्ठांतेगृहान्निर्गमनेतथा॥ व्यायामाध्वव्यवा
यांतेविण्मूत्रांतेजनेकृते॥ कवलांतेभोजनांतेदिवास्वप्नोत्थितेतथा॥ वमनांतेत
थासायंप्रतिमर्शःप्रयुज्यते॥ प्रतिमर्शेनशाम्यंतिरोगाश्चैवोर्द्ध्वजत्रुजाः॥ वली

॥ ६९३ ॥

पलितनाशश्च वत्तमिंद्रियजं भवेत् ॥ प्रसन्नदृष्टिर्दृढदंतकेशः कृशांकपंक्तः पलितै
र्विहीनः ॥ पिकभिन्नकंठः क्रमतास्यगंधो नस्योपसेवी भवतीह मर्त्यः ॥ इति पंचक
र्माणि ॥ अथ धूमपानविधिः ॥ धूमस्तु षड्विधः प्रोक्तः शमनो बृंहणस्तथा ॥ रेचनो
कासहा चैव वामनो व्रणशोधनः ॥ शमनं स्यात्तु पर्यायौ मध्यः प्रायोगिकस्तथा ॥
बृंहणस्य च पर्यायौ स्नेहनो मृदुरेव च ॥ रेचनस्य च पर्यायौ शोधनस्तीक्ष्ण एव च
अधूमार्हाश्च त्वेते शीतो भीतश्च दुःखितः ॥ रक्तपित्ती विरिक्तश्च रात्रौ जागरित
स्तथा ॥ पिपासितश्च दाहार्त्तस्तालुशोषी तथोदरी ॥ शिरोभितापी तिमिरी छर्द्याध्मा
नप्रपीडितः ॥ क्षतोरस्कः प्रमेहार्त्तः पांडुरोगी च गर्भिणी ॥ रूक्षः क्षीणोभ्यवहृतक्षी
रक्षौद्रघृतासवः ॥ भुक्तान्नदधिमांस्यश्च बालो वृद्धः कृशस्तथा ॥ अकाले चाति

॥ ६८४ ॥

पीतश्च धूमः कुर्याद्धि उपद्रवं ॥ तत्रेष्टं सर्पिषः पानं नावनांजनतर्पणं ॥ धूमस्तु द्वादशा
द्वर्षाद्ग्राह्यतेशीतितो न च ॥ कासश्वासप्रतिश्याया मन्याहनुशिरोरुजः ॥ वातश्लेष्म
विकारांश्च हन्याद्धूमः सुयोजितः ॥ धूमप्रयोगात्पुरुषः प्रसन्नेंद्रियवाङ्मनाः ॥ दृढ
केशद्विजश्मश्रुः सुगंधिवदनो भवेत् ॥ वदनेन पिबेद्धूमं वदनेनैव संत्यजेत् ॥ नासि
काभ्यां ततः पीत्वा मुखेनैव वमेत्सुधीः ॥ धूमनाडी भवेत्तत्र त्रिखंडा च त्रिपर्विका
कनिष्ठिकापरीणाहा राजमाषागमांतरे ॥ राजमाषागमा समस्तनाडी ॥ धूमनाडी भ
वेद्दीर्घा शमने रोगिणोंगुलैः ॥ चत्वारिंशन्मिते स्निग्धे द्वात्रिंशद्भिर्मता मता ॥ मदो वं
हणे ॥ तीक्ष्णे चतुर्विंशतिभिः कासघ्ने षोडशोन्मितैः ॥ दशांगुलैर्वामनीयेतथास्या
द्व्रणनाडिका ॥ तथा दशांगुलमिता ॥ कलायमंडलस्थूलकुलत्थागमरंध्रिका ॥ अ

॥ ६८४ ॥

षैषीकां प्रतीं पेच्च स्वस्थश्लक्ष्णां द्वादशांगुलां ॥ धूमद्रव्यस्य कल्केन ते पञ्चाष्टांगुलः स्मृ
तः ॥ कल्कं कर्षमितं तिस्राश्छायाशुष्कां च कारयेत् ॥ इषीकामपनीयाथ स्नेहाक्तां वर्ति
मादरात् ॥ अंगारैर्दीपितां कृत्वा धृत्वा नेत्रस्य रंध्रके ॥ वदनेन पिबेद्धूमं वदनेनैव सं
त्यजेत् ॥ नासिकाभ्यां ततः पीत्वा मुखेनैव वमेत्सुधीः ॥ शरावसंपुटे क्षिप्त्वा कल्कमं
गारदीपितं ॥ छिद्रे नेत्रं निवेश्याथ घ्राणेनैव धूपयेत् ॥ एलादिकल्कं शमने स्निग्धं
सर्जरसं मृदौ ॥ रेचने तीक्ष्णकल्कं च प्रयोज्यास मृषेष्टु द्विकोषणं ॥ यामनेस्मात्वचं च मायां ।
दद्याद्धूमस्य पानकं ॥ व्रणे निंबवचाद्यैश्च धूपनं संप्रशस्यते ॥ अन्येपि धूमा गेहेषु
कर्त्तव्या रोगशांतये ॥ नेत्राणि धातुजान्याहुर्नलवंशभवान्यपि ॥ इति धूमपानविधिः
अथ गंडूषकवलप्रतिसारणविधिः ॥ तत्र गंडूषकवलप्रतिसारणानां भेदकानि

॥ ई८६ ॥

लक्षणं न्याह तत्र गंडूषः॥ स्नेहक्षीरकषायादिद्रवैः संपूर्णमाननं॥ आपूर्य स्थीयते तां
वद्धिधिर्गंडूषधारणे॥ कफपूर्णास्यता यावत्क्षेदो दोषस्य वा भवेत्॥ नेत्रघ्राणस्रुति
र्वापि तावद्गंडूषधारणं॥ गंडूषान् सुस्थितः कुर्यात्सिल्लमातंगनादिकः॥ मनुष्यस्त्रीं
तथा पंचसप्त वा दोषनाशनान्॥ चतुर्विधः स्याद्गंडूषः स्नैहिकश्च प्रसादनः॥ शोध
नो रोपणश्चैव कवलश्चापि तादृशः॥ स्निग्धोष्णैः स्नैहिको वाते स्वादुशीतैः प्रसादनः॥
पित्ते कट्वम्ललवणरूक्षोष्णैः सशोधनः कफे॥ कषायतिक्तमधुरैः कटूष्णो रोपणो व्रणे॥
स्याद्द्रवेषु चूर्णं च गंडूषे कोलमात्रकं॥ कर्षप्रमाणः कल्कश्च कवले दीयते बुधैः॥
धार्यते पंचमाद्वर्षाद्गंडूषकवलादयः॥ व्याधेरपचयस्तुष्टिर्वैशद्यं वक्त्रलाघवं
इंद्रियाणां प्रसादश्च गंडूषे विधृते भवेत्॥ हरेदास्यस्य वैरस्यं शोषं पाकं घ्रणं ॥ ई८६ ॥

तषां || दंतचालंचगंडूषोवैशद्यंचकरोतिहि || अथकवलः || वातपित्तकफघ्नस्यद्रव्यस्य
कवलंमुखे || आर्द्रंनिक्षिप्यसंचर्व्यनिष्ठीवेत्कवलेविधिः || कवलःकुरुतेकांक्षांभक्ष्ये
मुहरतेकफं || तस्माच्छोषंचवैरस्यंदंतचालंचनाशयेत् || अथप्रतिसारणं || दंतजिव्हा
मुखानांपतच्चूर्णकल्कावलेहकैः || शनैर्घर्षणमंगुल्यातदुक्तंप्रतिसारणं || वैरस्यंमु
खदुर्गंधंमुखशोषंतथातषां || अरुचिंदंतपीडांचनिहन्यात्प्रतिसारणं || हीनेजाड्य
कपोत्क्लेशावरसस्तानमेवच || अतियोगान्मुखेपाकःशोषस्तृष्णारुचिःक्लमः || इति
गंडूषकवलप्रतिसारणविधिः || अथालेपविधिः || अथालेपस्यनामानितेपतेप
नतिमयः || दोषघ्नोविषहावर्ण्योसचालेपस्त्रिधामतः || त्रिप्रमाणश्चतुर्भागात्रि
भागार्द्धांगुलोन्नतः || आर्द्रोव्याधिहरःसस्याच्छुष्कोदूषयतिच्छविं || छविमित्यत्रत्व

॥ ६६ ॥

चमित्तियापाटः॥ अथ पालेपविधिश्चान्यः प्रोच्यते मुनिसंमतः॥ प्रलेपश्च प्रदेहश्च द्वौ
भेदौ तस्य भाषितौ॥ चर्मार्द्रमाहिषं यद्वल्लोम्नातं सामितिस्तयोः॥ शीतस्तनुर्विशोषी
च प्रलेपः पित्तहृन्मतः॥ अर्द्रो घनस्तथोष्णः स्यात्प्रदेहः श्लेष्मवातहा॥ न रात्रौ लेपनं
कुर्यात्क्षुण्णमालेपनं धारयेत्॥ तमसापिहितोन्मूष्मा रोमकूपमुखे स्थितः॥ विनाले
पेन निर्यातिरात्रौ नालेपयेत्ततः॥ रात्रावपि प्रलेपादिविधिः॥ स्वेदपेल्ककर्णदेशं तु किं
चिन्नुः पार्श्वशायिनः॥ मूत्रैः स्नेहैः रसैः कोष्णैः ततः श्रोत्रं प्रपूरयेत्॥ कर्णं च पूरितं
रक्षेच्छतं पंचशतानि वा॥ सहस्रं वापि मात्राणां श्रोत्रकंठशिरोगदे॥ रसाद्यैः पू
रणं कर्णे भोजनात्प्राक्प्रशस्यते॥ तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते॥ इति
कर्णपूरणविधिः॥ अथ शोणितस्रावणविधिः॥ शोणितं स्रावयेज्जंतो रा ॥ ६६ ॥

मयं प्रसमीक्ष्य च ॥ प्रसंप्रस्याधिमथ्यमस्याछ्रुद्धि मथापि वा ॥ शरत्काले स्वभावेन प्रो
लितं स्रावयेद्बुधः ॥ त्वग्दोषग्रन्थिशोफाद्या न स्युः रुधिरपातनात् ॥ व्यभ्रे वर्षासु विद्धेत्
शीते ग्रीष्मे पारच्यपि ॥ मध्याह्ने शीतकाले च रुधिरं स्रावयेद्बुधः ॥ मधुरं लवणीतो स्तकम
शीतोष्णं तथा गुरु ॥ शोणितं स्निग्धविस्रं च विदग्धं पित्तवद्भवेत् ॥ विस्रता द्रवता राग
स्यन्दनं विलयस्तथा ॥ भूम्यादिपंचभूतानामेते रक्ते गुणाः स्मृताः ॥ रक्ते दुष्टे भवेच्छोफो
रक्तमण्डलमेव च ॥ व्यथा दाहश्च कण्डूश्च पिटिको दद्रुमः ॥ रुद्धे रक्ते गनेत्रात्वं शिरालं परी
तांतथा ॥ गात्राणां गौरवं निद्रा मदो दाहश्च जायते ॥ क्षीणे स्त्रे मधुराकांक्षा मूर्छा पवस्य
चिरूक्षता ॥ शैथिल्यं च शिराणां स्याद्धातार्द्रुमार्गगामिता ॥ यातात रक्तक्षै लपजमि
तात् ॥ अत्र तत्रांफेनितं रुक्षं परुषं तनु शीघ्रगं ॥ आस्कंदि सूचीनिस्तोदि स्कंदं स्याद्वात

६६

दूषितं ॥ पित्तेन पीतं हरितं नीलं संघ्यावं च विस्तकं ॥ अस्कंभुक्तं मक्षिकाणां पिपीलीनाम।
निष्टकं ॥ शीतलं बहलं स्निग्धं मेरिक्लोदकसन्निभं ॥ मांसपेशीप्रभं स्कंदि मंदगांकफदूषि
तं ॥ द्विदोषदुष्टं संस्पष्टं त्रिदुष्टं पूतिगंधकं ॥ सर्वलक्षणसंयुक्तं कोंजिकाभं च जायते ॥ षि
षदुष्टं भवेछ्यावं नासिक्तोन्मार्गते तथा ॥ विस्तकं कांजिकसंकाशं सर्वकुष्ठकरं तथा ॥ इंद्रगो
पप्रभं स्तेयं प्रकूतिस्पमसहतं ॥ शोथे दाहे गपाके च रक्तवर्णेस्तजंभ्रूतौ ॥ वातरक्ते तथा
कुष्ठे सपीडे दुर्जये निसे ॥ पालि लेगोष्ठोपदंचे विषदुष्टे च शोणितं ॥ गंध्वर्वुदापचीक्षुद्र
रोगरक्ताधिमंथके ॥ विदारीस्तनरोगेषु गात्राणां सादगौरवे ॥ रक्ताभिष्यंदतंद्रायां प
तिघ्राणास्यदेहके ॥ यकृत्प्लीहविसर्पेषु विद्रधौ पिटिकोद्गमे ॥ कर्णौष्ठघ्राणवक्त्राणां
पाके दाहे शिरो हृजि ॥ उपदंशे रक्तपित्ते रक्तस्रावः प्रशस्यते ॥ रुग्रोगेषु च गैवी ॥ ६६ ॥

जलौकालाबुकैरपि ॥ अथ व्याधिविशिरामोक्षैः कारयेद्रक्तपातनं ॥ न कुर्वीत शिरामोक्षं
कृशस्यापि व्यवायिनः ॥ क्लीबस्य भीरोर्गर्भिण्याः सूतायाः पांडुरोगिणः ॥ पंचकर्म
विशुद्धस्य पीतस्नेहस्य चार्शसां ॥ सर्वांगशोथयुक्तानामुदरिश्वाससकासिनां ॥ छर्द्यतीसा
रयुक्तानामतिस्विन्नतनोरपि ॥ ऊनषोडशवर्षस्य गतसप्ततिकस्य च ॥ आघातस्रुतर
क्तस्य शिरामोक्षो न शस्यते ॥ एषां चात्ययिके रोगे जलौकाभिर्विनिर्हरेत ॥ तथा च विषजु
ष्टानां शिरामोक्षोपि शस्यते ॥ गोशृंगेन तु जलौकाभिरलाबूभिरपि त्रिधा ॥ वातपित्तक
फैर्दुष्टं शोणितं स्रावयेद्बुधः ॥ द्विदोषाभ्यां तु संदुष्टं त्रिदोषैरपि दूषिता ॥ शोणितं स्राव
येद्युक्त्या शिरामोक्षैः पदैस्तथा ॥ गृह्णाति शोणितं शृंगं दशांगुलमितं बलात ॥ जलौका
हस्तमात्रं तु तुंबी तु द्वादशांगुलं ॥ पदमंगुलमात्रं तु शिरा सर्वांगशोधिनी ॥ शोणितं निर

३९

॥ हर्टि ॥

ल्लेमूर्छार्तिनिद्राभीतिमदभ्रमैः ॥ पुक्तानांनष्टवेद्यक्तं तथाविण्मूत्रसंगिनां ॥ शोणिते
चाप्रवृत्ते तु कुष्ठत्रिकटुसैंधवैः ॥ मर्दयेद्गलवक्त्रांचतेन रक्तं प्रवर्तते ॥ तस्माल्लक्षणीतेनास्र
स्त्रेनास्थिन्नेनातितोषिते ॥ पीत्वाथवागंतप्रस्थप्रायपेच्छोणितंबुधः ॥ अथेदानींतत्त
द्रोगेषुव्यध्याःशिराःप्राह ॥ शिरोक्षिरोगेषुललाटसंस्थाशिराप्रयायांगगतोपनास्या
कर्णस्थिताकर्णगदेषुनासागदेषुनासाग्रगताविमोच्या ॥ १ ॥ शिरोनेत्ररोगेषुललाट
गताशिरा ॥ अपथ्यानेत्रप्रांतगताशिराऽथवाउपनास्यांव्येधेत्यर्थः ॥ १ ॥ ललाटनासो
पगातेयवेध्यासापीनसेवक्त्रगदेतुपास्यात ॥ तालोष्ठजिव्हाहनुगार्थकर्णग्रीवाशि
रःस्कंधगताशिरातु ॥ २ ॥ तस्कूर्ध्वगांगुंष्ठिषुतामपांगवक्षोललाटोपगातांतुविध्येत ॥
उन्मादरुक्षहनुसंस्थितावस्रतौशिराभ्रूयुगमाव्यशोषे ॥ ३ ॥ ललाटनासोपगातेव ॥ हर्टि ॥

साक्षिरोगपीनसरोगे विमोक्ष्येति योजना ॥ याशिरा तल्लौष्ठजिव्हाहनुगामिनी स्यात्सा
पक्वागदे विमोक्ष्येति ॥ कर्णलीग्रीवाशिरःसंस्थमता याशिरा ततां तु जत्रूर्ध्वगगण्डिषु वि
ध्येत ॥ अपांगपक्ष्मललाटोपगतां तु शिरां उन्मादरोगे विध्येत ॥ अपस्मारे हनुसंस्थि
तां शिरां ह्यावेधितुमिति शेषः ॥ मूत्रगमा त्वक्षोषइति अशेषे प्रागुक्तशिरोरोगादौ
मूत्रगमासासृ मध्यगामिनी शिरा वेध्या ॥ ३ ॥ मध्ये संतु तृतीयके च उदिता स्कंधस्य
चातुर्थिके विद्ध्यात्मपि पार्श्वद्वयस्थं च गतां उतः पार्श्वकक्षास्तनं ॥ रेतोमेढ्रगदे च मेढ्र
उदितां गंडे शिरोहस्थितां गृध्रस्यां च तुरंगुले निगदिता या जानुनोधः शिरा ॥ ४ ॥ ततो
पकेश्वरे मध्ये संस्थ योर्मध्ये शिरावेधनीया ॥ चातुर्थिके ज्वरे स्कंधस्याधः स्थि
ता शिरा वेधनीया उदिता ॥ विद्ध्यांच पुनः पार्श्वपीडास्वपि अतः पार्श्वकक्षास्त

ई८टि

नं पार्श्वकक्षास्तनस्य मध्ये शिरां वेधनीया ॥ रेतोमेढ्रादेवृष्णकरोगेलिंगरोगेशुचलिंग

मध्ये शिरां वेधनीया ॥ गंडेगलगंडेऽहस्थितां शिरां वेधनीया ॥ पाजानुनो धस्त्रतुरंगुले

शिरां सा गृध्रसीरोगे वेधनीया ॥ ४ ॥ अधो द्व्यंगुले शुक्रवस्तेरपच्यां शिरां सक्थिप्र

तेपि च क्रोष्टुकशीर्षे ॥ स्थितां गुल्फत ऊर्ध्वमष्टांगुलादूर्ध्वं विपादिका खुडेकंटके हर्षे चिप्पे ॥ ५ ॥

तथा पाददाहे विपाद्यंगुलोर्ध्वं स्थितां क्षिप्रतः सा शिरां वेधनीया ॥ शक्रवस्तेः जंघामध्य

स्थितमर्मणोऽधो द्व्यंगुले स्थितां शितां शिरां अपच्यां वेधनीया ॥ गुल्फतऊर्ध्वं त्र्यष्टांगुला

दूर्ध्वं चतुरंगुले स्थितां शिरां सक्थिप्रले क्रोष्टुकशीर्षप्लूले चापि वेधनीया ॥ सक्थिः उरोः मध्य

भागः ॥ क्रोष्टुकशीर्षं जानुः ॥ विपाच्यां पादगतकुष्ठरोगविशेषे खुडे वातकंटके वातकंट

के हर्षे पादहर्षे चिप्पे नखगतक्षुद्ररोगविशेषे पाददाहे वा तथाधिविशेषे पाशितां क्षि ॥ ई८टि ॥

२८

मतः यंगुलोर्ध्वं स्थिता सा वेधनीया ॥ क्षिप्रं अंगुष्ठांगुल्योर्मध्यगं वर्म ॥ तच्च हस्तद्वयोः पाद

द्वयोरपि ॥ एवं चतुर्विधं ॥ ५ ॥ रसनीं पूर्वोक्तानां शिराणामदर्शने मर्महीने तन्निकटे देशे अन्याः

शिरा वेध्या इत्याह ॥ यथोक्ता न चेद्दृश्यते मर्महीने तदा सन्नदेशे परा व्यक्तरूपा ॥ ६ ॥ व्यक्तरू

पां लक्ष्यमाणा ॥ ६ ॥ अतिस्विन्नस्योष्मकाले तथैवापि शिराव्यधात् ॥ अतिप्रवर्तते रक्तं त

त्र कुर्यात्प्रतिक्रियां ॥ अतिप्रवर्तते रक्ते तु लोध्रसर्जरसांजनैः ॥ यवगोधूमचूर्णैश्च धवधन्व

नगैरिकैः ॥ सर्पनिर्मोकचूर्णैर्वा भस्मना क्षौमवस्त्रयोः ॥ मुखं व्रणस्य बध्नीयात् शीतैश्चो

पाचरेद्बुधः ॥ विधे दग्ध्वं शिरां तां वा दहेत्क्षारेण वह्निना ॥ व्रणं कषायः संधत्ते रक्तं स्कंदयते

हिमः ॥ व्रणं स्वं पाचयेत्क्षारो दाहः संकोचयेच्छिरां ॥ रक्ते दुष्टे व निःशेषेपि व्याधिर्नैशमकुप्य

ति ॥ अतो रक्षं सावशेषं रक्तं नातिस्रुतिर्हिता ॥ आंध्यमाक्षेपकं तृष्णां तिमिरं शिरसो

रक्तं ॥ पश्चाद्यातं श्वासकासौ हिक्का दाहौ च पांडुतां ॥ कुरुते तिस्रुतं रक्तं मरणं वा करोति च ॥ देहस्यो
पतिरस्ततो देहस्तेनैव धार्यते ॥ रक्तं जीवस्य चाधारस्तस्माद्रक्षेदसृग्बुधः ॥ शीतोपचारैः कु
पिते स्रुत रक्तस्य मारुते ॥ कोष्णेन सर्पिषा शोथं सव्यथं परिषेचयेत ॥ क्षीरेण सैणलावशशोरभ्र
हरिणच्छागमांसजः ॥ रसः समुचितः पाने क्षीरं षष्टिकया हितं ॥ पीडाशांतिर्लघुत्वं च व्याधे
रुद्रेकसंक्षयः ॥ मनःस्वास्थ्यं भवेच्चिन्हं सम्यक्‌निःसारिते सृजि ॥ व्यायाममैथुनक्रोधशीत
स्नानप्रवातकान् ॥ एकाशनं दिवानिद्रां क्षाराम्लकटुभोजनं ॥ शोकं वादमजीर्णं च त्यजेदा
बलदर्शनात ॥ द्वितीये दिवसे पुनरपि रक्तस्रावः कार्य इत्याह ॥ स्वस्थानाच्चलितं व्रणशाय
गतं दुष्टास्रमेतत्पुनर्व्यमलं पर्युषितं विमोच्यमसृजो दुष्टस्य सेधभूतेः ॥ हस्राग्रायगमो
तिमात्रबलिनोप्यस्रं न च मस्यतो विश्राव्यं परतः स्रुतास्रगपानेनाल्पं हर्षणीतं भजेत ॥

७००

व्यम्लं पाकोऽनुरवं । पर्युषितमतिक्रांतावस्थामं ॥ प्रसूतेः मोक्षात् ॥ हृग्रागाय गमः पीडा लौहित्य यो
निवृत्तिः ॥ प्रस्यतः साईत्रयोदशपलतः ॥ सुतास्त्रकपुरुषः ॥ इति रक्तस्रावविधिः ॥ अथ निघं
टुरंभः ॥ यतो निघंटुं विना वैद्यः श्लेष्मभाग्भवति तदुक्तं ॥ निघंटुना विना वैद्यो विद्वान्व्याक
रणं विना ॥ आयुधं च विना योद्धा त्रयः श्लेष्मभागिन इति ॥ किंच ॥ पूर्वं रसगुणवीर्यविपा
कप्रभावाणां स्वरूपाण्युक्तानि ॥ तत्र कुत्र द्रव्ये के रसगुणवीर्यविपाकप्रभावाः संतीति ज्ञातु
मावश्यकमेव ॥ तदर्थमपि तत्तद्द्रव्यगतान् रसगुणवीर्यविपाकप्रभावान्वक्तुं सुप्रसिद्धा।
नि द्रव्याणि कथ्यंते ॥ तत्र प्रथमं हरीतक्या नामानि गुणांश्चाह ॥ शिवा हरीतकी पथ्या चेतकी
विजया जया ॥ जीवंती या हैमवती कायस्था प्राणदाऽमृता ॥ वयस्था पूतना सेया रोहिणी श्रे
यसी तथा ॥ अभया जीवनीया च प्रपथ्यानंदिनी तथा ॥ हरीतकी पंचरसा लवणा तु वरो

७०१

ष्कया॥ रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी॥ सरा बुद्धिप्रदा चक्षुष्या चक्षुष्यावं हरतीत

थुः॥ श्वासकासप्रमेहार्शःकुष्ठशोथोदरक्रिमीन्॥ वैस्वर्य्यग्रहणीदोषविबंधविषम

ज्वरान्॥ गुल्माध्मानव्रणच्छर्दिहिध्माकंडूहृदामयान्॥ कामलांशूलमानाहं प्लीहानं

वा यकृषेति॥ मधुराम्लतया वातं कषायस्वादुभावतः॥ पित्तं हंति कफं हंति कटुत्वेन ह

रीतकी॥ सिंधूत्थशर्कराशुंठीकणामधुगुडैः क्रमात्॥ वर्षादिष्वभया प्राश्या रसायन

गुणैषिणा॥ अध्वातिखिन्नो बलवर्जितश्च रूक्षः कृशो लंघनकर्षितश्च॥ नवेच्च रोग

मयितीव्रत्तीयक्षस्य स्वस्थपुंसोप्यभयां न खादेत्॥ अथ विभीतकनामगुणाः॥ विभीत

कस्त्रिलिंगः स्यादक्षः कर्षफलस्तुसः॥ कलिद्रुमो भूतवासस्तथा कलियुगालयः

विभीतकः स्वादुपाकः कषायः कफपित्तनुत्॥ उष्णवीर्यो हिमस्पर्शो भेदनः कास

७०१

नाशनः ॥ रूक्षो नेत्रहितः केश्यो मज्जा स्यमदकारकः ॥ अथामलकनामगुणाः ॥ त्रिष्वा
मलकमाख्यातं धात्री तिष्यफलाऽमृता ॥ शिवाभिधात्री फलाच वयस्थाजातीफलाच
सा सैव प्रोक्ता भिषग्वरैः ॥ हरीतकीसमं धात्रीफलं किं तु विशेषतः ॥ रक्तपित्तप्रमेहघ्नं
परं वृष्यं रसायनं ॥ हंति वातं तदम्लत्वात्पित्तं माधुर्य्यशैत्यतः ॥ कफं रूक्षकषायत्वात्फलं
धात्र्यास्त्रिदोषजित् ॥ कुर्यात्पित्तं तदम्लत्वात्कफं माधुर्य्यशैत्यतः ॥ वातं रूक्षकषायत्वाद्दे
वं किं न विपर्य्ययः ॥ धात्र्यास्त्रिदोषहंतृत्वं प्रोक्तं यन्मुनिभिः स्मृतं ॥ संभावनावशाद्युक्तार
सादेरपि हेतुता ॥ मुनिरेव हि जानाति योगसंयोगजं फलं ॥ अथ त्रिफलानामगुणाः
त्रिफलैतत्त्रयेण स्याद्वरा श्रेष्ठा फलोत्तमा ॥ त्रिफला कुष्ठमेहास्रकफपित्तविनाशि
नी ॥ चक्षुष्या रोपणी रूक्षा वयस्याः स्थापनी सरा ॥ अथ भूम्यामलकीनामगुणाः

॥७०२॥

भूधात्री बहुपत्रा स्यात् जटा तामलकी शिवा ॥ ताल्यस्सदवितुन्नस्स्यात् तमाली च सा स्मृ
ता ॥ भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा ॥ पिपासा कासपित्तास्रकफपांडुक्षताप
हा ॥ अथ वासा नामगुणाः ॥ वासा वृषः सिंहमुखी भिषङ्माता टरूषकः ॥ सिंहिका वाजि
दंतः स्यात् सिंहपर्णश्च स स्मृतः ॥ वासा तिक्ता कटुः शीता कासघ्नी रक्तपित्तजित् ॥ स्वय्पी
ज्यासज्वरछर्दिमेहकुष्ठपापहा ॥ अथ गुडूची नामगुणाः ॥ गुडूची मधुपर्णी स्यादमृता
ऽमृतवल्लरी ॥ छिन्ना छिन्नरुहा छिन्नोद्भवा च स्याद्वत्सादनीति च ॥ जीवंती तंत्रिका सोमा सो
मवल्ली च कुंडली ॥ चक्रलक्षणिका धारा विशल्या च रसायनी ॥ चंद्रहासा वयस्था च
मंडली देवनिर्मिता ॥ गुडूची कटुका तिक्ता स्वादुपाका रसायनी ॥ संग्राहिणी कषायो
ष्णा तद्बल्याग्निदीपनी ॥ दोषत्रयामतृड्दाहमेहकासांश्च पांडुतां ॥ कामलाकु

॥७०२॥

ष्ठवातास्रज्वरकृमिवमीर्जयेत् ॥ अथ बिल्वनामगुणाः ॥ बिल्वः शलाटुः शैलूषो मालूरश्च
सदाफलः ॥ लक्ष्मीफलो गंधगर्भः शांडिल्यः कंटकी मतः ॥ बिल्वं ग्राहि कषायोष्णं कटु दी
पनपाचनं ॥ वातं हृद्यं लघु स्निग्धं तिक्तं वातकफापहं ॥ वृद्धं गुरु त्रिदोषं स्यात् दुर्जरं पू
तिमारुत ॥ विदाहि विष्टंभकरं मधुरं वह्निमांद्यकृत ॥ गृहणीकफवातामघ्नलघ्वी ॥
बिल्वपेशिका ॥ अथाजरवलरणीनामगुणाः ॥ अग्निमंथो जयः सस्याच्छ्रीपर्णी गणिकारि
का ॥ जयाजयंती तर्कारी नादेयी वैजयंतिका ॥ अग्निमंथः श्वयथुहृद्वीर्योष्णः कफवातनु
त् ॥ पांडुघ्नः कटुकस्तिक्तस्तुवरोग्निःकरः परं ॥ अथ पाटलानामगुणाः ॥ पाटला पाटलिर्मो
घा मधुदूती फलेरुहा ॥ कृष्णवृंता कुबेराक्षी कालास्थाली स्थलिवरुहा ॥ ताम्रपुष्पी च कं
धिता परा स्यात् पाटला सिता ॥ पाटला तुवरा तिक्ताऽनुष्णा दोषत्रयापहा ॥ अरुचिश्वा

॥७०३॥

सश्लेष्मास्रछर्दिहिक्कातृषाहरी ॥ पुष्पं कषायं मधुरं हिमं रूक्षं कफास्रनुत ॥ पित्तातिसाररक्ता हघ्नं फलं हिक्कास्रपित्तहृत ॥ गंभीधनरीनामगुणाः ॥ गंभारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥ काश्मीरी काश्मरी हीरा काश्मर्यः पीतरोहिणी ॥ कृष्णवृंता मधुरसा महाकुमुदिकापि च ॥ काश्मीरी ज्वरशूलघ्नी वीर्योष्णा मधुरा गुरुः ॥ तत्पुष्पं वातलं ग्राहि पित्तासृक्प्रदरापहं ॥ फलं रसायनं केश्यं वृंहणं शुक्रलं गुरु ॥ वातपित्तक्षयं तृष्णां हंति मूत्रविबंधनुत ॥ अथ स्योनाकस्तुंडिकनामगुणाः ॥ स्योनाकः शुकनासः स्यान्नटकट्वंग टुंटुकाः ॥ दीर्घवृंतोरलुकश्चापि पृथुशिंबः कटंभरः ॥ स्योनाको दीपनः पाके कटुकस्तुवरो हिमः ॥ ग्राही तिक्तोनिलश्लेष्मपित्तकासामनाशनः ॥ टुंटुकस्य फलं बालं रूक्षं वातकफापहं ॥ हृद्यं कषायं मधुरं रोचनं लघु दीपनं ॥ गुल्मार्शःकृमिहृत्प्रौढं गुरु वातप्रकोपणं ॥ अथ बृहत्यं च ॥७०३॥

मूलंतस्यगुणाः ॥ बिल्वादिभिः पंचभिरेभिरेतत्स्यात्पंचमूलंमहदग्निकारि । लघूष्णतिक्तं रसतः कषायं मेदःकफश्वाससमीरहारि ॥ अथ गोक्षुरनामगुणाः ॥ गोक्षुरः क्षुरकोपि स्यात्त्रिकंटः स्वादुकंटकः ॥ गोकंटको मक्षकंटको वनशृंगाट इत्यपि ॥ पलंकषा श्वदंष्ट्रा च तथा स्यादिक्षुगंधिका ॥ गोक्षुरः शीतलः स्वादुर्बलकृद्बस्तिशोधनः ॥ प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातनुत् ॥ वृष्यो दीपनकृच्छ्रापंकपित्तश्वाश्मरीहरः ॥ अथ शालिपर्णीनामगुणाः ॥ शालिपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ॥ विदारिगंधा दीर्घांघ्रिर्दीर्घपत्रांशुमत्यपि ॥ शालिपर्णी गुरुश्छर्दिज्वरश्वासातिसारजित् ॥ शोषदोषत्रयहरी बृंहण्युक्ता रसायनी ॥ अथ पृश्निपर्णीनामगुणाः ॥ पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यंघ्रिपर्ण्यपि ॥ क्रोष्टुविन्ना सिंहपुच्छी कलसी धावनिर्गुहा ॥ पृश्निपर्णी त्रिदोष

॥ ७०४ ॥

ग्रीष्मे ब्योस्मा मधुरा सरा ॥ हंति दाहज्वरश्वासरक्तातीसारतृड्वमीः ॥ अथ वृहत्कंटकारीनाम
गुणाः ॥ वृहती स्थूलभंटकी विशदा च महोटिका ॥ वार्त्ताकी महती सिंही कंटकी राष्ट्रिका कुली
वृहती ग्राहिणी हृद्या पाचनी कफवातजित ॥ उष्णा कुष्ठज्वरश्वासशूलकासाग्निमांद्यजि
त ॥ अथ लघुकंटकारीनामगुणाः ॥ कंटालिका कंटकिनी कंटकारी निदिग्धिका ॥ दुःस्पर्शा
धावनी क्षुद्रा स्पाघ्राघ्री दुःप्रधर्षिणी ॥ कंटकारी सरा तिक्ता कटुका दीपनी लघुः ॥ रूक्षो
ष्णा पाचनी कासश्वासज्वरकफानिलान ॥ निहंति पीनसं पार्श्वपीडाकृमिहृदामयान ॥
अथ श्वेतकंटकारीनामगुणाः ॥ पीताक्षुद्रा चंद्रहासा लक्ष्मणा क्षेत्रदूतिका ॥ तद्वत्प्रोक्ता
श्वेताक्षुद्रा विशेषाद्गर्भकारिणी ॥ उभे च वृहती शुक्रवद्याच्यौ ॥ यत आह व्यास्वतः ॥ वृहत्यां
क्षुद्रे भंटाक्यां वृहतीति निगद्यते ॥ अथ तत्फलगुणाः ॥ तयोः फलं कटु रसे पाके च कटु

॥ ७०४ ॥

कं भवेत् ॥ शुक्रस्येरेचनं भेदि तिक्तं पित्तानिलास्रहृत् लघु ॥ हन्यात्कफं महत्कंडूकासमेदःकृमि-
ज्वरान् ॥ अथ लघुपंचमूलं तल्लक्षणगुणाः ॥ ह्रस्वाख्यं पंचमूलं स्यात्पंचभिर्गोक्षुरादि-
भिः ॥ वस्यं पित्तानिलहरं नात्युष्णं स्वादु बृंहणं ॥ अथ दशमूलं तल्लक्षणगुणाः ॥ एताभ्यां
पंचमूलाभ्यां दशमूलमुदाहृतं ॥ दोषत्रयश्वासकासशिरःपीडापतंत्रकान् ॥ तंद्रास्वेद-
ज्वरानाहारुचिपार्श्वरुजो जयेत ॥ अथाष्टवर्गस्तल्लक्षणगुणाः ॥ जीवकर्षभकौ मेदे काको-
ल्यौ ऋद्धिवृद्धिके ॥ अष्टवर्गोऽष्टभिर्द्रव्यैः कथितश्चरकादिभिः ॥ अष्टवर्गो हिमः स्वादु-
र्बृंहणः शुक्रलो गुरुः ॥ भग्नसंधानकृत्स्तन्यबलासबलवर्द्धनः ॥ वातपित्तास्रतृड्दा-
हज्वरमेहक्षयप्रणुत् ॥ तत्र जीवकर्षभकयोरुत्पत्तिलक्षणनामगुणाः ॥ जीवकर्ष-
भकौ ज्ञेयौ हिमाद्रिशिखरोद्भवौ ॥ रसोनकंदवत्कंदौ निःसारौ सूक्ष्मपत्रकौ ॥ जीव-

कः कूर्चकाकारः ऋषभो वृषशृंगवत्॥ जीवको मधुरः शृंगी ह्रस्वांगः कूर्चशीर्षकः॥ ऋष
भो वृषभो धीरो विषाणी द्राक्ष इत्यपि॥ जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ॥
मधुरौ पित्तदाहास्रकार्श्यवातक्षयापहौ॥ अथ मेदामहामेदयोरुत्पत्तिलक्षणना
मगुणाः॥ महामेदाभिधः कंदो मोरंगादौ प्रजायते॥ महामेदा च नौ मेदा स्यादित्यु
क्तं मुनीश्वरैः॥ शुक्लार्द्रकनिभः कंदो लताजातः सुपांडुरः॥ महामेदाभिधो ज्ञेयो मेदा
लक्षणमुच्यते॥ शुक्लः कंदो नखच्छेद्यो मेदोधातुमिव स्रवेत्॥ यः स मेदेति विज्ञेयो
जिज्ञासातत्परैः जनैः॥ शल्यपर्णी मणिच्छिद्रा मेदा मेदोभवाध्वरा॥ अध्वरा इत्यत्र अ
ध्वरेति च पाठः॥ महामेदा वसुच्छिद्रा त्रिदंता देवतामणिः॥ त्रिदंता इत्यत्र दंतेति
च पाठः॥ मेदायुगं गुरु स्वादु वृष्यं स्तन्यकफावहं॥ बृंहणं शीतलं रक्तपित्तवातज्व

रप्रयुत ॥ अथ काकोलीक्षीरकाकोल्योरुत्पत्तिलक्षणनामगुणाः ॥ जायते क्षीरका
कोली महामेदोद्भवस्थले ॥ यत्र स्यात्क्षीरकाकोली काकोली तत्र जायते ॥ पीवरीसदृ
शः कंदः सक्षीरः प्रियगंधवान् ॥ स प्रोक्तः क्षीरकाकोली काकोलीलिंगमुच्यते ॥ यथा
स्यात्क्षीरकाकोली काकोल्यपि तथा भवेत् ॥ एषा किंचिद्भवेत्कृष्णा भेदोयमुभयोरपि
काकोली वायसोली च वीरा कायस्थिका तथा ॥ सा तु क्षीरकाकोली वयस्या क्षीर
वल्लिका ॥ कथिता क्षीरिणी धीरा क्षीरशुक्ला पयस्विनी ॥ काकोलीयुगलं शीतं शुक्र
लं मधुरं गुरु ॥ बृंहणं वातदाहास्रपित्तशोषज्वरापहं ॥ अथ ऋद्धिवृद्ध्योरुत्पत्तिलक्षण
नामगुणाः ॥ ऋद्धिर्वृद्धिश्च कंदौ द्वौ भवतः कोशयामले ॥ श्वेतलोमान्वितः कंदो लता
जातः सरंध्रकः ॥ स एव ऋद्धिर्वृद्धिश्च भेदमप्येतयोर्ब्रुवे ॥ तूलग्रंथिसमा ऋद्धिर्वा

प्रावर्तपत्राचसावृद्धिस्तुदक्षिणा॥ वर्तकलाप्रोक्तामहर्षिभिः॥ ऋद्धिर्योग्यंसिद्धिलक्ष्म्यौ
वृद्धेरप्याह्वयाइमे॥ ऋद्धिर्बल्यात्रिदोषघ्नीशुक्रलामधुरागुरुः॥ वृद्धिर्गर्भप्रदाशीता
वृष्याकासक्षयास्रनुत्॥ तासामप्यष्टवर्गस्तुप्रतोयमतिदुर्लभः॥ तस्मादस्यप्रतिनिधिं
गृह्णीयात्तद्गुणंभिषक्॥ अथजेष्ठीमधुनामगुणाः॥ यष्टीमधुतथायष्टीमधुकंक्लीत
कंतथा॥ अन्यत्क्लीतनकंतत्तुभवेत्तोयेमधूलिका॥ यष्टीहिमागुरुःस्वाद्वीचक्षुष्याबल
वर्णकृत्॥ सुस्निग्धाशुक्रलाकेश्यास्वर्यापित्तानिलास्रजित्॥ व्रणशोथविषछर्दितृष्णा
ग्लानिक्षयापहा॥ अथजीवंतीशाकविशेषनामगुणाः॥ जीवंतीजीवनीजीवाजीव
नीयामधुस्रवा॥ मांगल्यनामधेयाचशाकश्रेष्ठापयस्विनी॥ जीवंतीशीतलास्वादुः
स्निग्धादोषत्रयापहा॥ रसायनीबलकरीचक्षुष्याग्राहिणीलघुः॥ इयंमधुरपुष्पा

प्रतति ॥ अथमुद्गपर्णीनामगुणाः ॥ मुद्गपर्णीकाकपर्णी सूर्यपर्ण्यल्पिकासहा ॥ काक
मुद्गा च सा प्रोक्ता तथा मार्जारगंधिका ॥ मुद्गपर्णी हिमा रूक्षा तिक्ता स्वाद्वी च शुक्रला ॥
चक्षुष्या क्षतशोथघ्नी ग्राहिणी ज्वरदाहनुत् । दोषत्रयहरी लघ्वी ग्रहण्यर्शोतिसारजि
त् ॥ अथमाषपर्णीनामगुणाः ॥ माषपर्णी सूर्यपर्णी कांबोजी हयपुच्छिका ॥ पांडुलो
मशपर्णी च कृष्णवृंता महासहा ॥ माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत् ॥
मधुरा ग्राहिणी शोथवातपित्तज्वरास्रजित् ॥ अथजीवनीयगणलक्षणगुणाः ॥ अष्ट
वर्गः सर्षभकौ जीवंती मुद्गपर्णिका ॥ माषपर्णी गणो यं तु जीवनीय इति स्मृतः ॥ जी
वनीयगणः प्रोक्तः शुक्रकृद्बृंहणो गुरुः ॥ हिमो गर्भप्रदः स्तन्यकफकृत्पित्तरक्तहृत् ।
तृष्णां शोषं ज्वरं दाहं रक्तपित्तं व्यपोहति ॥ अथशुक्लरक्तैरंडनामगुणाः ॥ शुक्लए

॥७०७॥

रंडआमंडश्चित्रोगंधर्वहस्तकः॥ पंचांगुलो वर्द्धमानो दीर्घदंडोप्यदंडकः॥ रक्तोपरो रुबू
कः स्यादुरुबुको रुबुस्तथा॥ व्याघ्रपुच्छश्च वातारिश्चंचुरुत्तानपत्रकः॥ एरंडयुग्मं मधुर
मुष्णं गुरु विनाशयेत्॥ शूलशोथकटीवस्तिशिरःपीडोदरज्वरान्॥ ब्रध्नश्वासकफाना
हकासकुष्ठाममारुतान्॥ एरंडपत्रं वातघ्नं कफकृमिविनाशनं॥ मूत्रकृच्छ्रहरं चापि पि
त्तरक्तप्रकोपणं॥ वाताग्रपल्लवं गुल्मवस्तिशूलहरं परं॥ कफवातकृमीन्हंति वृद्धिं स
प्तविधामपि॥ एरंडफलमत्युष्णं गुल्मशूलानिलापहं॥ यकृत्प्लीहोदरार्शोघ्नं कटुकं दी
पनं परं॥ तद्वन्मज्जा च विड्भेदी वातश्लेष्मोदरापहः॥ अथ कृष्णसारिवा धवलसारिवा
नामगुणाः॥ कृष्णा तु सारिवा श्यामा गोपी गोपवधूश्च सा॥ धवला सारिवा गोपा गो
पकन्या च शारदी॥ स्फोता श्यामा गोपवल्ली लतास्फोता च चंदना॥ श्यामापदेनकृसा

॥७०७॥

श्वेताविशारदाकथ्यते ॥ सारिवायुगलंस्वादुस्निग्धंशुक्रकरंगुरु ॥ अग्निमांद्यारुचिश्वास
कासामविषनाशनं ॥ दोषत्रयास्रप्रदरज्वरातीसारनाशनं ॥ कृष्णेयंजंबूवत्पत्रासुगंधा
श्वेताचेयंजंबूवत्पत्रादुग्धाभग्नेततिर्भवति ॥ अथयवासधमासनामगुणाः ॥ यासो
यवासोदुस्पर्शोधन्वयासःकुनाशकः ॥ दुरालभादुरालंभासमुद्रांताचरोदनी ॥ गांधारीक
च्छुरानंताकषायाह्वरविग्रहा ॥ यासःस्वादुःसरस्तिक्तस्तुवरःशीतलोलघुः ॥ कफमेदोम
दभ्रांतिपित्तासृक्कुष्ठकासजित ॥ तृष्णावीसर्पवातास्रवमिज्वरहरःस्मृतः ॥ यवासस्य
गुणैस्तुल्याबुधैरुक्तादुरालभा ॥ अथमुंडीनामगुणाः ॥ मुंडीभिक्षुःपरिव्राजीश्रावणी
स्यात्तपोधना ॥ श्रावणाह्वाश्रीमतीमुंडतिक्ताश्रवणशीर्षिका ॥ मुंडीतिक्ताकटुःपाकेवी
र्योष्णामधुरालघुः ॥ मेध्यागंडापचीकृच्छ्रकृमियोन्यर्त्तिपांडुजित ॥ अथबृहन्मुंडीना

मगुणाः ॥ महामुंडी लोमती याछिन्नग्रंथिनिका स्मृता ॥ चूतवृक्षः कुलहलो उलंबुषा भूकदं
बकः ॥ कदंबपुष्पी मुंडी च दुलौ भूमिकदंबकः ॥ अथापामार्गनामगुणाः ॥ अपामार्गस्तु शिख
रीत्वधःशल्यो मयूरकः ॥ मर्कटी दुरग्रहा चापि किणिही खरमंजरी ॥ अपामार्गः सरस्ती
क्ष्णो दीपनस्तिक्तकः कटुः ॥ निहंति दद्रुशिध्मार्शःकंडूशूलोदरापचीः ॥ अथ रक्तापामा
र्गनामगुणाः ॥ रक्तोन्यो वशिरो वृत्तफलोधामार्गवोपि च ॥ प्रत्यक्पर्णी केशपर्णी कथिता
कपिपिप्पली ॥ अपामार्गो ऽरुणो वातविष्टंभी कफकृद्धिमः ॥ रूक्षः पूर्वगुणैर्न्यूनः कथितो
गुणवेदिभिः ॥ अपामार्गफलं स्वादुरसे पाके च दुर्जरं ॥ विष्टंभि वातलं रूक्षं रक्तपित्तप्रसा
दनं ॥ अथ पकमेतानामगुणाः ॥ कंपिल्लो रोचनो रक्तचूर्णको व्रणशोधनः ॥ लोहितो रक्त
शमनो रेचीरंजनको मतः ॥ कंपिल्लः कफपित्तास्रकृमिगुल्मोदरव्रणान् ॥ हंति रेची क

दृस्मुष्णं तच्छाकं ग्राहि शीतलं॥ अथ लघुदंतीनामानि॥ लघ्वी दंती विशल्या च स्यादुदुंबर
पर्ण्यपि॥ तथैरंडफला शीघ्रा श्येनघंटा घुणप्रिया॥ वराहांगी च कथिता निकुंभश्च मकू
लकः॥ अथ बृहद्दंतीनामानि॥ द्रवंती शंबरीति च पाठः॥ री चित्रा प्रत्यक्श्रेण्येरण्या खुकर्ण्यपि
उपचित्रा स्तुतश्रेणी न्यग्रोधी च तथा वृषा॥ अथ तयोर्गुणाः॥ दंतीद्वयं सरं पाके रसे च क
टु दीपनं॥ गुदांकुराश्मशूलास्रकंडूकुष्ठविदाहनुत्॥ तीक्ष्णोष्णं हंति पित्तास्रकफशोफो
दरकृमीन्॥ अथ जयपालनामगुणाः॥ जयपालो दंतिबीजं स्यात्तित्तिरीफलं॥ जैपा
लो गुरुरूक्षः स्निग्धः कृमिहारी विरेचनः॥ दीपनः कफहामघ्नो जठरामयशोधनः॥ अथ श्वे
तनिसोतनामगुणाः॥ श्वेता त्रिवृत्त्रिभंडी स्यात्त्रिवृता त्रिपुटापि च॥ सर्वानुभूतिः सर
लाकुंभा रेचनीति च॥ श्वेता त्रिवृद्रेचनी स्यात्स्वादुरुष्णा समीरहृत्॥ रूक्षा पित्त

॥७०८॥

श्वेष्मापित्तास्रशोथोदरापहा ॥ अथ श्यामनिसोतनामगुणाः ॥ त्रिवृता श्यामाऽर्द्धचंद्रा च पा
लिंदी च सुषेणिका ॥ मसूरविदला काला कैषिका कालमेषिका ॥ श्यामा त्रिवृत्ततो हीनगुणा
तीव्रविरेचनी ॥ मूर्च्छादाहमदभ्रांतिकंठोत्कर्षणकारिणी ॥ अथेंद्रवारुणीरूपनामगु
णाः ॥ ऐंद्री इंद्रवारुणी चित्रा गवाक्षी च गवादनी ॥ वारुणी च परा प्रोक्ता सा विशाला महा
फला ॥ श्वेतपुष्पा मृगाक्षी च मृगैर्वा दृढमूलगवादनी ॥ गवादनी हिमं तिक्तं पाके कटु सरं लघु
वीर्योष्णं कामलापित्तकफप्लीहोदरापहं ॥ श्वासकासापहं कुष्ठगुल्मग्रंथिव्रणप्रणुत
प्रमेहमूढगर्भगंडामयविषापहं ॥ अथ गिरमालानामगुणाः ॥ आरग्वधो राजवृ
क्षः शम्पाकः कृतमालकः ॥ व्याधिघातः कर्णिकारः सुवर्णश्चतुरंगुलः ॥ आरेवत
सिंबी स्वर्णाकुः कर्णी दीर्घफलो मतः ॥ आरग्वधो गुरुः स्वादुः शीतलो मृदुरेचनः ॥

७०८॥

ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलजित् ॥ तत्तुष्यं वातसंग्राहि तिक्तं पित्तकफापहं तन्म
ज्जा मधुरः पाके स्निग्धः पित्तसमीरजित् ॥ अथ नीलिनीनामगुणाः ॥ नीली तु नीलिनी तू
नीकाला दोला च नीलिका ॥ रंजनी श्रीफला तुच्छा ग्रामीणा मधुपर्णिका ॥ क्लीतकोक्ता
लकेशी चे नीलपुष्पा च सा स्मृता ॥ नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा ॥ उष्णा हं
न्त्युदरप्लीहवातरक्तकफानिलान् ॥ आमवातमुदावर्त्तं मदं च विषमुद्धतं ॥ अथ कटुकी
नामगुणाः ॥ कट्वी तु कटुका तिक्ता कृष्णभेदा कटंभरा ॥ अशोका मत्स्यशकला चक्रांगी
शकुलादनी ॥ मत्स्यपित्ता कांडरुहा रोहिणी कटुरोहिणी ॥ कटुका कटुका पाके तिक्ता रूक्षा
हिमा लघुः ॥ भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ॥ प्रमेहश्वासकासास्रदाह
कुष्ठकृमिप्रणुत् ॥ अथ सेहुंडनामगुणाः ॥ सेहुंडः सिंहतुंडः स्याद्वज्री वज्रद्रुमोपि च

॥७१०॥

सुधासमंतदुग्धाचस्नुक्स्त्रियांस्यात्स्नुहीगुडा॥सेहुंडोरेचनस्तीक्ष्णोदीपनःकटुकोगुरुः॥
शूलाष्ठीलाध्मानकफगुल्मोदरानिलान्॥उन्मादमोहकुष्ठार्शःशोथमेदोश्मपांडुताः
व्रणशोथज्वरप्लीहविषदूषीविषंहरेत्॥उष्णवीर्यंस्नुहीक्षीरंस्निग्धंचकटुकंलघु॥
गुल्मिनांकुष्ठिनांचापितथैवोदररोगिणां॥हितमेतद्विरेकार्थेयेचान्येदीर्घरोगिणः
अथसातलानामगुणाः॥अथसेहुंडभेदः॥सातलासप्तलासाराविमलाविदुलाचसा
तथानिगदिताभ(ू)रिफेनाचर्मकषेत्यपि॥सातलाकटुकापाकेवातलाशीतलालघुः
तिक्ताःशोथकफानाहपित्तोदावर्तरक्तजित्॥अथनिंबनामगुणाः॥निंबोनियमनोने
अरिष्टःपारिभद्रकः॥सतिक्तःसर्वतोभद्रःपिचुमंदःप्रभद्रकः॥कुष्ठहादेवदत्तश्चरवि
सन्निधिकारकः॥निंबःशीतोलघुर्ग्राहीकटुपाकोग्निवातकृत्॥व्रणपित्तकफछर्दि॥७१०॥

कुष्टहृल्लासमेहजित्॥ तत्पुष्पं छर्दिपित्तघ्नं तत्त्वग्ज्वरविनाशिनी॥ तस्य संभेदनं स्निग्धमु
ष्णं कुष्टहरं तथा॥ अथ वकायनी नामगुणाः॥ महानिंबः स्मृतो द्रेकारम्यको विषमुष्टि
काः॥ केशमुष्टिर्निंबरकः कार्मुको क्षीव इत्यपि॥ महानिंबो हिमो रूक्षस्तिक्तो ग्राही कषाय
कः॥ कफपित्तकृमिच्छर्दिकुष्टहृल्लासरक्तजित्॥ प्रमेहश्वाससगुल्मार्शो मूषिकाविष
नाशनः॥ अथ चिरायता नामगुणाः॥ किराततिक्तः कैरातः कटुतिक्तः किराततकः॥ को
उतिक्तो ऽनार्य्यतिक्तो भूनिंबो रामसेनकः॥ किराततोन्यो नैपातः सोर्द्धतिक्तो ज्वरांतकः
तरलो निंबकघ्नो निद्रारिः सन्निपातघ्न ईरितः॥ किरातः सारको रूक्षः शीतलस्तिक्तको
लघुः॥ सन्निपातज्वरश्वासकफपित्तास्रदाहनुत्॥ अथ कुडे नामगुणाः॥ कुटजः
कूटजः कौटो वत्सको गिरिमल्लिका॥ कालिंगः शक्रशाखी च मल्लिकापुष्प इत्यपि

॥ ७११ ॥

इंद्रयवचकलः प्रोक्तो वत्सकः पांडुरद्रुमः ॥ कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः ॥ अर्शोति-
सारपित्तास्रकफतृष्णामकुष्ठनुत् ॥ अथेंद्रयवनामगुणाः ॥ उक्तं कुटजबीजं तु यवमिंद्रय-
वं तथा ॥ कलिंगं चापि कालिंगं तथा भद्रयवं स्मृतं ॥ ऐंद्रं यवं त्रिदोषघ्नं संग्राहि कटुकं हिमं
ज्वरातीसाररक्तार्शःकृमिवीसर्पकुष्ठनुत् ॥ दीपनं गुदकीलास्रवातास्रशूलजित् ॥
अथ मदनफलनामगुणाः ॥ मदनः छर्दनः पिंडी राठः पिंडीतकस्तथा ॥ करहाटो मरु-
वकः शल्यको विषपुष्पकः ॥ मदनो मधुरस्तिक्तो वीर्योष्णो लेखनो लघुः ॥ वांतिकृद्वि-
द्रधिहरः प्रतिश्यायव्रणांतकः ॥ रूक्षः कुष्ठकफानाहशोथगुल्मव्रणापहः ॥ अथ कुष्ठ-
नामगुणाः ॥ कुष्ठं रोगाह्वयं वाप्यं पारिभव्यं तथोत्पलं ॥ कुष्ठमुष्णं कटु स्वादु शुक्रलं ति-
क्तलं लघु ॥ हंति वातास्रवीसर्पकासकुष्ठमरुत्कफान् ॥ अथ कुष्ठभेद पुष्करमूलनाम ॥ ७११ ॥

गुणाः ॥ उक्तं पुष्करमूलं तु पौष्करं पुष्करं च तत् ॥ पद्मपत्रं च काश्मीरं कुष्ठभेदमिमं जगुः ॥ पौष्क
रं कटुकं तिक्तं मुष्णं वातकफज्वरान् ॥ हंति शोथारुचिश्वासान् विशेषात्पार्श्वशूलनुत् ॥
अथ लकडचोक नाम गुणाः ॥ पटुपर्णी हैमवती हैमक्षीरी हिमावती ॥ हेमाह्वा पीतदुग्धा
च तन्मूलं चोकमुच्यते ॥ हेमाह्वा रेचनी तिक्ता भेदिन्युत्क्लेशकारिणी ॥ कृमिकंडूविषाना
हकफपित्तास्रकुष्ठनुत् ॥ अथ काकडाशृंगी नाम ॥ शृंगी कर्कटशृंगी च स्यात्कुलीरविषा
णिका ॥ अजशृंगी च वक्रा च कर्कटाख्या च कीर्तिता ॥ शृंगी कषाया तिक्तोष्णा कफवातक्षय
ज्वरान् ॥ श्वासोर्ध्ववाततृट्कासहिक्कारुचिवमीर्हरेत् ॥ अथ भारंगी नाम गुणाः ॥ भार्गी भृ
गुभवा पद्मा फंजी ब्राह्मणयष्टिका ॥ ब्रह्मण्यंगारवल्ली च खरशाकश्च हंजिका ॥ भार्गी
रूक्षा कटुस्तिक्ता रुच्योष्णा पाचनी लघुः ॥ दीपनी तुवरा गुल्मरक्तगुल्मान्नाशयेद्ध्रुवं ॥ शोथ

॥७१२॥

कासकफश्वासपीनसज्वरमारुतात् ॥ अथ कायफलनामगुणाः ॥ कट्फलः सोमवल्कश्च
कैटर्यः कुंभिकापि च ॥ श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥ कट्फलो कटुरुष्णश्च
श्वासकासज्वरापहः ॥ उग्रदाहहरो रुच्यो मुखरोगशमप्रदः ॥ अथ पाषाणभेदनामगुणाः
पाषाणभेदः पाषाणोऽश्मरीभेदोऽश्मभेदकः ॥ शिलाभेदो दृषद्भेदो नगभिन्नगभेदकः ॥
पाषाणभेदस्तुवरः शीततीवस्तिधनः ॥ सरस्तिक्तः प्रमेहार्शःकृछ्राश्मरिहृजो जयेत ॥
योनिरोगहरः प्रोक्तः प्लीहशूलव्रणापहः ॥ अथ धातकीनामगुणाः ॥ धातकी धातु
पुष्पी च कुंजरा ॥ सुभिक्षा बहुपुष्पी च वन्हिज्वाला च सा स्मृता ॥ धातकी कटुका शीता म
दकृत्तुवरा लघुः ॥ तृष्णातीसारपित्तास्रविषकृमिविसर्पजित ॥ अथ मंजिष्ठानामगुणाः
मंजिष्ठा विकसा जिंगी समंगा कालमेषिका ॥ मंडूकपर्णी भंडीरी भंडी योजनवल्ल्यपि ॥७१२॥

रसायन्यरुणा काला स्कोंगी रक्तयष्टिका ॥ भंडीतकी च गंडीरी मंजूषा वस्त्ररंजनी ॥ मंजिष्ठा
मधुरा तिक्ता कषाया स्वरवर्णकृत ॥ गुरूरुष्णा विषश्लेष्मशोथयोन्यक्षिरुक्कर्णरुक्त ॥
क्तातीसारकुष्ठास्रविसर्पव्रणमेहनुत ॥ अथ कुसुंभनामगुणाः ॥ स्यात्कुसुंभं वन्हिसि
खं वस्त्ररंजकमित्यपि ॥ कुसुंभं वातलं कृछ्ररक्तपित्तकफापहं ॥ अथ लाक्षानामगुणाः ॥
लाक्षा पलंकषालक्तो यावो वृक्षामयो जतु ॥ लाक्षा वर्ण्या हिमा वल्या स्निग्धा च तुवरा लघुः
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा ॥ अथालक्तकगुणाः ॥ अलक्तको गुणैस्तद्वद्विशे
षाद्व्यंगनाशनः ॥ अथ हरिद्रानामगुणाः ॥ हरिद्रा कांचनी पीता निशाख्या वरवर्णिनी ॥ कृ
मिघ्ना हलदी योषित्प्रिया हट्टविलासिनी ॥ गौरीर्पिंडा वर्णवती रंजनी च प्रकीर्त्तिता ॥ हरिद्रा
कटुका तिक्ता रूक्षोष्णा कफपित्तनुत ॥ वर्ण्या त्वग्दोषमेहास्रशोथपांडुव्रणापहा ॥

॥७१३॥

अथदारुहलदीनामगुणाः ॥ दार्वीदारुहरिद्राचपर्जन्यापर्जनीतिच ॥ कटंकटेरीपीताचभवे
त्सैवपचंपचा ॥ सैवकालीयकःप्रोक्तस्तथाकालेयकोपिच ॥ पीतद्रुश्चहरिद्रुश्चपीतदारु
कपीतकं ॥ दार्वीनिशागुणाकिंतुनेत्रकर्णास्यरोगनुत ॥ अथपक्वदारुहलदीनामगुणाः ॥ दा
र्वीभेदामृगंधाचकर्पूरासुरभीत्वपि ॥ आम्रगंधाहरिद्रायासाशीतावातलामता ॥ पित्तहृ
न्मधुरातिक्तासर्वकंडुविनाशिनी ॥ अथरसोतनामगुणाः ॥ दार्वीक्काथसमंक्षीरंपादं
पक्त्वायदाघनं ॥ तदारसांजनाख्यांतन्नेत्रयोःपरमंहितं ॥ रसांजनंतार्क्ष्यशैलंरसगर्भंच
तार्क्ष्यजं ॥ रसांजनंकटुश्लेष्मविषनेत्रविकारनुत ॥ उष्णंरसायनंतिक्तंछेदनंव्रणदोष
नुत ॥ अथवाकुचीनामगुणाः ॥ अवल्गुजावाकुचीस्यात्सोमराजीसुपर्णिका ॥ शशि
लेखाकृष्णफलासोमापूतिफलेतिच ॥ सोमवल्लीकालमेषीकुष्ठघ्नीचप्रकीर्तिता ॥ ॥ ७१३ ॥

बाकुचीमधुरातिक्ताकटुपाकारसायनी॥ विष्टंभहृद्धिमारुच्यासराश्लेष्मास्रपित्तनुत॥
रूक्षाहृद्याश्वासकुष्ठमेहज्वरकृमिप्रणुत॥ तत्फलंपित्तलंकुष्ठकफानिलहरंकटु॥ केश्यं
त्वच्यंकृमिश्वासकाससोथामपांडुहृत॥ अथप्रपंचाडनामगुणाः॥ चक्रमर्दःप्रपुन्नाडो
दद्रुघ्नोमेषलोचनः॥ पुन्नाटःस्याद्गजाख्यश्चकीकुष्ठनिकृंतनः॥ चक्रमर्दोलघुःस्वादू
रूक्षःपित्तानिलापहः॥ हृद्योहिमःकफश्वासकुष्ठदद्रुकृमीनहरेत॥ हंत्युष्णंतत्फलंकु
ष्ठकंडूदद्रुविषानिलान॥ गुल्मकासकृमिश्वासनाशनंकटुकंस्मृतं॥ अथातिविषनाम
गुणाः॥ विषात्वतिविषाविश्वाशृंगीप्रतिविषारुणा॥ शुक्लकंदाचोपविषाभंगुराघुण
वल्लभा॥ विषोष्णापाचनीतिक्तादीपनीकटुकाहरेत॥ कफपित्तातिसारामविषकास
वमिकृमीन॥ अथशुंठीनामगुणाः॥ शुंठीविश्वाचविश्वंचनागरंविश्वभेषजं॥ ऊष

॥ ७१४ ॥

णं कटुभद्रं च शृंगवेरं महौषधं ॥ शुंठी रुच्यामवातघ्नी पाचनी कटुका लघुः ॥ स्निग्धोष्णा मधु
रा पाके कफवातविबंधनुत् ॥ वृष्या स्वर्या वमिश्वासशूलकासहृदामयान् ॥ हंति श्लीपद
शोथार्शआनाहोदरमारुतान् ॥ अथार्द्रकनामगुणाः ॥ आर्द्रकं शृंगवेरं स्यात्कटुभद्रं तथार्द्रि
का ॥ कंदौषधं च तत्प्रोक्तं गुरुश्चानूपजं ॥ कटूष्णमार्द्रकं भेदि विपाके शीतलं लघु ॥ दीपनं
रुचिदं श्लेष्मवातकं नामयापहं ॥ ये गुणाः कथिताः शुंठ्यास्तेपि संत्यार्द्रके खिलाः ॥ कुष्ठं
पांड्वामये कृच्छ्रे रक्तपित्ते व्रणे ज्वरे ॥ दाहे निदाघशरदोर्नैव पूजितमार्द्रकं ॥ अथ पिप्पली
नामगुणाः ॥ पिप्पली मागधी कृष्णा वैदेही चपला कणा ॥ उपकुल्योषणा शौंडी कोलाः स्या
त्तीक्ष्णतंडुला ॥ पिप्पली ज्वरहा वृष्या स्निग्धोष्णा कटुतिक्तका ॥ दीपनी मारुतश्वासकासश्ले
ष्मक्षयापहा ॥ आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः ॥ पित्तप्रशमनी सा तु शुष्का ॥ ७१४ ॥

पित्तप्रकोपिनी ॥ अथ मरिचस्य नामगुणाः ॥ मरिचं वेल्लजं कृष्णमूषणं धर्मपत्तनं ॥ कोलं
वृत्तफलं तीक्ष्णं मरिचं च प्रकीर्तितं ॥ मरिचं कटुकं तीक्ष्णं दीपनं कफवातजित् ॥ उष्णं पित्तह
रं रूक्षं श्वासशूलकृमीन् हरेत् ॥ तदार्द्रं मधुरं पाके नात्युष्णं कटुकं गुरु ॥ किंचित्तीक्ष्णगुणं श्लेष्म
प्रसेकि स्यादपित्तलं ॥ अथ त्रिकटुकस्य नामगुणाः ॥ विश्वोपकुल्यामरिचं त्रयं त्रिकटु
कथ्यते ॥ कटुत्रिकं तु त्रिकटु त्र्यूषणं व्योष उच्यते ॥ त्र्यूषणं दीपनं हंति श्वासकासत्वगा
मयान् ॥ गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान् ॥ अथ पिप्पलीमूलनामगुणाः ॥
ग्रंथिकं पिप्पलीमूलमूषणं चटकाशिरः ॥ षड्ग्रंथिमागधं तत्तु कोलमूलं च ग्रंथिलं ॥ दीप
नं पिप्पलीमूलं कटूष्णं पाचनं लघु ॥ रूक्षं पित्तकरं भेदि कफवातोदरापहं ॥ आनाहप्लीह
गुल्मघ्नं कृमिश्वासक्षयापहं ॥ अथ चतुरूषणलक्षणनामगुणाः ॥ त्र्यूषणं सकणामूलं

॥७१५॥

कथितंचतुरूषणं ॥ व्योषस्यैवगुणाःप्रोक्ताअधिकाश्चतुरूषणे ॥ अथचव्यनामगुणाः
भवेच्चव्यंतुचविकाकथितासातथोषणा ॥ तीक्ष्णकरिकणावतीयासीरोगंधना
कुली ॥ चव्यंस्यादुष्णकटुकंलघुरोचनदीपनं ॥ जंतुदेकापहंकासश्वासशूलार्तिकृं
तनं ॥ अथगजपिप्पलीनामगुणाः ॥ चविकायाःफलंप्राज्ञैःकथितागजपिप्पली
कपिवल्लीकोलवल्लीश्रेयसीवशिरश्चसा ॥ गजकृष्णाकटुर्वातश्लेष्मनुद्वन्हिव
र्द्धिनी ॥ उष्णानिहंतितीसारश्वासकंठामयकृमीन ॥ अथचित्रकनामगुणाः ॥ चित्र
कोऽनलनामाचपाठीव्यालस्तथोषणः ॥ शार्दूलःदायलोद्वीपीचित्रांगःक्रूरना
मकः ॥ चित्रकःकटुकःपाकेवन्हिकृत्पाचनोलघुः ॥ रूक्षोष्णोग्रहणीकुष्ठशोफार्शः
कृमिकासनुत ॥ श्लेष्मानिलहरोग्राहीतछार्शःश्लेष्मपित्तनुत ॥ अथपंचकोल ॥७१५॥

स्य तस्य लक्षणं गुणाश्च ॥ पिप्पली पिप्पलीमूलचव्यचित्रकनागरैः ॥ पंचभिः कोलमात्रं
यत्पंचकोलं तदुच्यते ॥ पंचकोलं रसे पाके कटुकं रुचिकृन्मतं ॥ तीक्ष्णोष्णं पाचनं
श्रेष्ठं दीपनं कफवातनुत ॥ गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनं ॥ अथ षडूषण
तस्य लक्षणं गुणाश्च ॥ पंचकोलं समरिचं षडूषणमुदाहृतं ॥ पंचकोलगुणं मतं रूक्ष
मुष्णं विषापहं ॥ अथ यवानीनाम गुणाः ॥ यवानिकोग्रगंधा च ब्रह्मदर्भाजमोदिका
सैवोक्ता दीप्यको दीप्यात्तथा स्याद्यवसाह्वया ॥ यवानी पाचनी रुच्या तीक्ष्णोष्णा कटु
का लघुः ॥ दीपनी च तथा तिक्ता पित्तला शुक्रशूलहृत ॥ वातश्लेष्मोदरानाहगुल्मप्ली
हकृमीन्हरेत ॥ अथाजमोदानाम गुणाः ॥ अजमोदा खराश्वा च मयूरो दीप्यकस्तथा
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तकः ॥ अजमोदा कटुस्तीक्ष्णा दीपनी कफ

७१६ ॥

यातनुत् ॥ उष्णा विदाहिनी हृद्या रुच्या बलकरी लघुः ॥ नेत्रामयकृमिच्छर्दिहिध्मावस्तिरुजो हरेत् ॥ अथ खुरासानीयवानीनामगुणाः ॥ यवानी यवानी प्रोक्ता चौहारोजंतुनाशनः ॥ पारसीकयवानी तु यवानीसदृशी गुणैः ॥ विशेषात्पाचनी रूक्षा ग्राहि मादिनी गुरुः ॥ अथ शुक्लजीरककृष्णजीरककृष्णबृहज्जीरकनामगुणाः ॥ जीरको जरणो जाजी कणा स्याद्दीर्घजीरकः ॥ कृष्णजीरः सुगंधश्च तथैवोद्गारशोधनः ॥ कालाजाजी तु सुषवी कालिका चोपकालिका ॥ पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुंचिका ॥ उपकुंची च कुंची च बृहज्जीरक इत्यपि ॥ जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु ॥ संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत् ॥ ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहं ॥ चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतीसारहृत् ॥ अथ धान्याकनामगुणाः ॥ धान्याकं धान्यकं ७१६ ॥

धान्यं धाना धान्येयकं तथा ॥ कुनटी धेनुका छत्रा कस्तुंबरु वितुन्नकं ॥ धान्यकं तुवरं स्नि
ग्धमवृष्यं मूत्रलं लघु ॥ तिक्तं कटूष्णवीर्यं च दीपनं पाचनं स्मृतं ॥ ज्वरघ्नं रोचकं ग्राहि
स्वादुपाकं त्रिदोषनुत ॥ तृष्णादाहवमिश्वासकासामार्शःकृमिप्रणुत ॥ आर्द्रं तु त
द्गुणं स्वादु विशेषात्पित्तनाशनं ॥ आर्द्रस्यास्य रसस्येति नाम ॥ अथ सोवा सोफ नाम
गुणाः ॥ शतपुष्पा शताह्वा च माधवी कारवी मिसिः ॥ अतिछत्रा सितछत्रा संहि
तच्छत्रिका पि च ॥ छत्रा शालेय शालीनौ मिश्रेया मधुरा मिसिः ॥ शतपुष्पा लघुस्तीक्ष्णा
पित्तकृद्दीपनी कटुः ॥ उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगहृत ॥ मिश्रेया तद्गुणा
प्रोक्ता विशेषाद्योनिशूलनुत ॥ अग्निमांद्यहरी हृद्या बद्धविट्कृमिशुक्रहृत ॥ रूक्षो
ष्णा पाचनी कासवमिश्लेष्मानिलान्हरेत ॥ अथ मेथी वनमेथी नामगुणाः ॥ मे

अथ अकरकरानामगुणाः ॥ आकारकरभोत्युक्तोकरभाकरभोपिच ॥ आकारकरभात् हस्मा
वस्यावातवतासहृत् ॥ अग्निसंदीपनीचय्याकामदामदकारिणी

७१७ ॥

षिकामेथिनीमेथीदीपनीवहुपत्रिका ॥ गंधबीजापीतबीजाआदित्योचनमेथिका ॥
मेथिकावातशमनीश्लेष्मघ्नीज्वरनाशिनी ॥ ततःस्वल्पगुणावन्यावाजिनांसातुपूजिता
अथचंद्रशूरस्यगुणाः ॥ चंद्रशूरंहितंहिक्कावातश्लेष्मातिसारिणां ॥ असृग्वात
गदद्वेषिवलपुष्टिविवर्द्धनं ॥ अथचारदानामेथिका ॥ चंद्रशूरस्तुकासाजाजीयवानि
का ॥ एतच्चतुष्टयंप्रोक्तंचतुर्वीजमितिस्मृतं ॥ तच्चूर्णंभक्षितंनित्यंनिहंतिपवनामया
न् ॥ अजीर्णंशूलमाध्मानपार्श्वशूलंकटिव्यथाः ॥ अथहिंगुनामगुणाः ॥ सहस्र
वेधिजतुकंवाल्हीकंहिंगुरामठं ॥ अगूढगंधंजरणंरक्षोघ्नंजतुनाशनं ॥ हिंगूष्णं ७१७ ॥

चनं रूक्षं तीक्ष्णं वातबलासहृत॥ शूलगुल्मोदरानाहकृमिघ्नं पित्तवर्द्धनं॥ अथ वचायानाम
गुणाः॥ वचोग्रगंधा षड्ग्रंथा गोलोमी शतपर्विका॥ क्षुद्रपत्री च मंगल्या जटिलोग्रा च लोम
शा॥ वचोग्रगंधा कटुका तिक्तोष्णा वांतिवह्निकृत॥ विबंधाध्मानशूलघ्नी शकृन्मूत्रवि
शोधिनी॥ अपस्मारकफोन्मादभूतजंत्वनिलान्हरेत॥ अथ खुरासानीवचानाम
गुणाः॥ पारसीकवचा शुक्ला प्रोक्ता हैमवतीति सा॥ हैमवत्युदिता तद्वद्भूतं हंति विशे
षतः॥ अथ कुलिंजननामगुणाः॥ कुलंजो गंधमूलश्च तीक्ष्णमूलः कुलंजनः॥ कुलंजः
कटुतिक्तोष्णो दीपनो मुखदोषनुत॥ सुस्वरत्वकरो रूच्यो विशेषात्कफकासनुत॥ अ
थ चोपचीनीनामगुणाः॥ द्वीपांतरवचा कद्वी तिक्तोष्णा वह्निदीप्तिकृत॥ विबंधा
ध्मानशूलघ्नी शकृन्मूत्रविशोधिनी॥ वातव्याधीनपस्मारमुन्मादं तनुवेदनां॥

॥७१८॥

व्यपोहति विस्फोटकिटिभं गण्डमालापनाशिनी ॥ अथ हैहवेरद्रूपं ॥ तन्मध्ये प्रथमफलं मत्स्यसदृ-
शं विस्रगंधं द्वितीयो मध्यमफलसदृशं मत्स्यगंधं ॥ तयोर्नामगुणाः ॥ हवुषा वपुषा विस्रा
परा मध्यमफला स्मृता ॥ मत्स्यगंधा ह्रीहहंत्री विषघ्नी ध्वांक्षनाशिनी ॥ हवुषा दीपनी ति-
क्ता मद्रुस्मा तुवरा गुरुः ॥ पित्तोदरसमीरार्शोग्रहणीगुल्मशूलहृत् ॥ पराप्येतद्गुणा प्रोक्ता
रूपभेदो द्वयोरपि ॥ अथ वायुविडंगनामगुणाः ॥ पुंसि क्लीबे विडंगं स्यात्कृमिघ्नो जंतुना-
शनः ॥ तंडुलश्च तथा वेल्लाम मोघा चित्रतंडुला ॥ विडंगं कटु तीक्ष्णोष्णं रूक्षं वह्निकरं लघु
शूलाध्मानोदरश्लेष्मकृमिवातविबंधनुत् ॥ अथ तुंबरुफलं ख्यातं सुखं मरिचवेत ॥ त-
न्नामगुणाः ॥ स्यात्तुंबरुः तीक्ष्णदलो वनजः सानुजोऽन्धकः ॥ तुंबरुः कटुकस्तीक्ष्णः कफ-
मारुतनाशनः ॥ उष्णो हंत्कदश्वासशूलगुल्महृदामयान् ॥ अथ वंसतोचननाम ॥७१८॥

गुणाः ॥ स्वादूष्णरोचनावांसीतुगाक्षीरीतुगाष्णुभा ॥ त्वक्क्षीरीवंशजाष्णुभ्वावंशाक्षीरी
चयैलायी ॥ वंशजा बृहती च स्याद्वस्या स्याद्धी च शीतला ॥ तस्मात्कासज्वरश्वासक्षयपि
त्तास्रकामलाः ॥ हरेत्कुष्ठं व्रणं पांडुं कषाया वातपकृच्छ्रजित ॥ अथ तक्रक्षीरनामगुणाः ॥
तक्रक्षीरं पयःक्षीरं पयजं गवयोद्भवं ॥ अन्यद्रोधूमजं चान्यत्पिष्टिकातंडुलोद्भवं ॥ अन्ये
च तालसंभूतं तालक्षीरं प्रकीर्तितं ॥ यवगोक्षीरजं श्रेष्ठं अभावेन्यदुदीरितं ॥ तक्रक्षीरं
च मधुरं स्निग्धं शिशिरं दाहपित्तनुत ॥ क्षयकासकफश्वासनाशनं चास्रदोषनुत ॥ अथ स
मुद्रफेननामगुणाः ॥ समुद्रफेनः फेनश्च डिंडीरोऽब्धिकफस्तथा ॥ समुद्रफेनश्चक्षु
ष्यो लेखनः शीतलः सरः ॥ कषायो विषपित्तघ्नः कर्णरुक्कफहृल्लघुः ॥ अथ रास्नानाम
गुणाः ॥ रास्नायुक्ता रसा रस्या सुवहा रसना रसः ॥ एलापर्णी च सुरसा सुगंधा श्रे

॥७१८॥

पत्री तथा ॥ तस्मात्तु त्रिविधा प्रोक्ता मूलं पत्रं त्वचं तथा ॥ त्रेयं मूलदलं प्रोक्तं तत्त्वगस्ता च म
ध्यमा ॥ तस्मात्पाचनी तिक्ता उष्णा कफवातजित् ॥ शोफश्वाससमीरघ्नं वातघ्नं तोद
तापहा ॥ कासज्वरविषघ्नीति वातिकामयनाशिनी ॥ अथ तेजवल्कलनामगुणाः ॥
तेजस्विनी तेजवती तेजोह्वा तेजनी तथा ॥ तेजस्विनी कफश्वासकासास्यामयवातहृत्
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥ अथ मालकांगुनीनामगुणाः ॥ ज्योतिष्म
ती स्यात्कटभी ज्योतिष्का कंगुनीति च ॥ पारावतपदी पण्यालता प्रोक्ता ककुंदिनी ॥ ज्योति
ष्मती कटुस्तिक्ता सरा कफसमीरजित् ॥ अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्र
दा ॥ अथ लोध्रनामगुणाः ॥ लोध्रस्तिल्वस्तिरीटश्च शाबरो गालवस्तथा ॥ द्वितीयः प
ट्टिकालोध्रः क्रमुकः स्थूलवल्कलः ॥ जीर्णपत्रो बृहत्पत्रः पट्टीलाक्षाप्रसादनः ॥ लो

॥७१८॥

ध्रोग्राहीलघुःशीतश्चक्षुष्यःकफपित्तनुत् ॥ कषायोरक्तपित्तासृग्दरातीसारशोथह
त ॥ अथ डीकेमालीनामगुणाः ॥ नाडीहिंगुर्वंशापत्राख्योजंतुकारामठीचला ॥ वंसपत्री
चपिंडाव्हासुवीर्याहिंगुनाडिका ॥ नाडीहिंगुकटूष्णंचकफवातार्तिशूलंतिकृत ॥ विष्टा
विबंधदोषघ्नंमनोमोहापहारि च ॥ अथ हिंगुपत्रीनामगुणाः ॥ पृथ्वीकाहिंगुपत्री
चकवरीदीर्घिकापृथुः ॥ तन्वीचदारुपत्रीचविल्वीयावाष्पीनयाव्हया ॥ हिंगुपत्रीकटु
स्तीक्ष्णातिक्तोष्णाकफवातजित ॥ आमकृमिहरारुच्यापथ्यादीपनपाचनी ॥ अस्या
वाफलीतिचनामांतरं ॥ अथ लशुननामगुणाः ॥ लशुनस्तुरसोनःस्यादुग्रगंधोम
हौषधं ॥ अरिष्टोम्लेच्छकंदश्चयवनेष्टोरसोनकः ॥ पंचभिश्चरसैर्युक्तोरसेनाम्ले
नवर्जितः ॥ तस्माद्रसोनइत्युक्तोद्रव्याणांगुणवेदिभिः ॥ कटुकश्चापिमूलेषुति

॥७२०॥

क्तः पत्रेषु संस्थितः ॥ नाले कषाय उद्दिष्टो नालाग्रे लवणः स्मृतः ॥ बीजे तु मधुरः प्रोक्तो रसस्त
द्गुणवेदिभिः ॥ रसोनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ॥ रसे पाके च कटुकस्ती
क्ष्णो मधुरको मतः ॥ भग्नसंधानकृत्कंठ्यो गुरुः पित्तास्रवृद्धिदः ॥ बलवर्णकरो मेधा
हितो नेत्र्यो रसायनः ॥ हृद्रोगजीर्णज्वरकुक्षिशूलविबंधगुल्मारुचिकासशोफान् ॥ दु
र्नामकुष्ठानलसादजंतुसमीरणश्वासकफांश्च हंति ॥ अथ पलांडुनामगुणाः ॥ पलां
डुर्यवनेष्टश्च दुर्गंधो मुखदूषिकाः ॥ शूद्रप्रियः कृमिघ्नश्च रोचनो बहुपत्रकः ॥ पलांडुस्तु
गुणैर्ज्ञेयो रसोनसदृशो गुणैः ॥ स्वादुः पाके रसेऽनुष्णः कफकृन्नातिपित्तलः ॥ वृष्या
श्च रोचनो बल्यो वांतिदोषविनाशकः ॥ अथ भल्लातकनामगुणाः ॥ भल्लातकं त्रिषु प्रो
क्तमरुष्कोऽरुष्करोग्निकः ॥ तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत ॥ भल्लात

॥७२०॥

कः कषायोम्लः शुक्रलो मधुरो लघुः ॥ वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ॥ हंति
गुल्मज्वरश्वित्रवन्हिमांद्यकृमिव्रणान् ॥ भल्लातकफलं पक्वं स्वादुपाकरसं लघु ॥ क
षायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनं मेध्यं वन्हिकरं हंति कफवातव्रणोदरं ॥
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरकृमीन् ॥ तन्मज्जा मधुरो वृष्यो बृंहणो वातपि
त्तहा ॥ वृंतमांसं हृष्करं स्वादु पित्तघ्नं केश्यमग्निकृत ॥ अथ भंगानामगुणाः ॥ भंगा गंजा मा
तुलानी मादिनी विजया जया ॥ आनंदा वीरपत्री च हर्षिणी चपला पिच ॥ भंगा कफ
हरी तिक्ता ग्राहिणी पाचनी लघुः ॥ तीक्ष्णोष्णा पित्तला मोहमदवाग्वन्हिवर्द्धिनी ॥ अ
थ खसखसनामगुणाः ॥ तिलभेदः खसतिलः खाखसश्चापि स स्मृतः ॥ खसबी
जानि बल्यानि वृष्याणि स्युर्गुरूणि च ॥ जनयंति कफं तानि शमयंति समीरणं ॥ अ

॥७२१॥

पञ्चफलीमनामगुणाः॥ उक्तंखसफलक्षीरमाफूकमहिफेनकं अफेनंखसखसरसोना
मफेनेतत्स्मृतं॥ अफूकंशोषणंग्राहिश्लेष्मघ्नंवातपित्तलं॥ तथाखसफलोद्भूतवल्क
लप्रायमिस्वपि॥ अथपोस्तस्यगुणाः॥ स्यात्खासफलोद्भूतवल्कलंशीतलंलघु॥ ग्रा
हिरुचिस्तिक्तंकषायंचवातकृत्कफकासहृत्॥ धातूनांशोषकंरूक्षंमदकृद्वाग्निवर्द्धनं
मुहुर्मोहकरंरुच्यंसेवनात्पुंस्त्वनाशनं॥ अथधत्तूरनामगुणाः॥ धत्तूरधूर्त्तरउन्मत्तः
कनकाव्हयः॥ देवितािकितवस्तूलीमहामोहीशिवप्रियः॥ मातुलोमदनश्चास्यफलेमा
तुलपुत्रकः॥ धत्तूरोमदवर्णाग्निवातकृज्ज्वरकुष्ठनुत॥ कषायोमधुरस्तिक्तोयूकालि
क्षाविनाशनः॥ उष्णोगुरुर्व्रणश्लेष्मकंडूकृमिविषापहः॥ अथशुक्लस्यार्कनामगु
णाः॥ श्वेतार्कोगणरूपःस्यात्मंदारोवसुकोपिच॥ श्वेतपुष्पःसदापुष्पःसया ॥७२१॥

अथ निर्विषी काश्मीरे प्रसिद्धा तस्या नामानि गुणाश्च ॥ श्यामकंदा चोपविषा साविषेपा
चतुर्विधा ॥ रक्ताश्वेताभ कृष्णा श्रीता पीतवल्ली तथैव च ॥ यथापूर्वं च विशेषा यावत्याश्रेष्ठा
गुणोत्तमा ॥ सर्वदोषहरा प्रोक्ता तेषां पाध्य पशुनाशिनी ॥ श्लेष्मजान् विंशतिं रोगान् सद्यो हन्यान्निषेवणात्

लर्कः प्रतापसः ॥ रक्तोपरोऽर्कनामा स्यादर्कपर्णो विकीरणः ॥ रक्तपुष्पः शुक्लफलस्तथास्फो
तः प्रकीर्तितः ॥ अर्कद्वयं सरं वातकुष्ठकंडुविषव्रणान् निहंति प्लीहगुल्मार्शःश्लेष्मोद
रशकृत्कृमीन् ॥ अलर्ककुसुमं वृष्यं लघु दीपनपाचनं ॥ अरोचकप्रसेकार्शःकासश्वा
सनिवारणं ॥ रक्तार्कपुष्पं मधुरं सतिक्तं कुष्ठकृमिघ्नं कफनाशनं च ॥ अर्शोविषं हंति
च रक्तपित्तं संग्राहि गुल्मे श्वयथौ हितं तत् ॥ क्षीरमर्कस्य तिक्तोष्णं स्निग्धं सलवणं
लघु ॥ कुष्ठगुल्मोदरहरं श्रेष्ठमेतद्विरेचने ॥ अथ कलहारी नाम गुणाः ॥ कलिहारी

तु हलिनी लांगली शक्रपुष्प्यपि ॥ विशल्याग्निशिखानंता वह्निवक्त्रा च गर्भनुत् ॥ कलिहा
री सरा कुष्ठशोफार्शोव्रणशूलजित् ॥ सक्षारा श्लेष्मजित्तिक्ता कटुका तुवरापि च ॥ तीक्ष्णो
ष्णा कृमिहृल्लघ्वी पित्तला गर्भपातिनी ॥ अथ श्वेतरक्तकरवीरनामगुणाः ॥ करवीरः
श्वेतपुष्पः शतकुंभोऽश्वमारकः ॥ द्वितीयो रक्तपुष्पः स चंडातो लगुडस्तथा ॥ करवीर
द्वयं तिक्तं कषायं कटुकं च तत् ॥ व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहं ॥ वीर्योष्णं कृ
मिकंडूघ्नं भक्षितं विषवन्मतं ॥ अथ पीतपापडानामगुणाः ॥ पर्पटो वरतिक्तोऽश्व
स्मृतः पर्पटकश्च सः ॥ कथितः पांशुपर्यायस्तथा कवचनामकः ॥ पर्पटो हंति पित्ता
स्रभ्रमतृष्णाकफज्वरान् ॥ संग्राही शीतलस्तिक्तो दाहनुद्वातलो लघुः ॥ अथ वृद्धदा
रुनामगुणाः ॥ वृद्धदारुर्महाश्यामो जांगलो जीर्णवल्कलः ॥ अंतःकोटरपुष्पी स्या

दावेगीश्लेष्मलांप्यपि॥ वृद्धदारुः कषायोष्णः सरस्तिक्तो रसायनः॥ वृष्यो वातामवाता
स्रशोफमेहकफान्जयेत्॥ अथ अश्मंतकनामगुणाः॥ अश्मंतो मालुकापत्रो युग्म
पत्रोम्लपत्रकः॥ सूक्ष्मस्त्वग्गश्मयोनिः स्यात्कुशलीपापनाशनः॥ अश्मंतस्तुवरोग्रा
ही शीतलः कफवातजित्॥ निहंति गलगंडाख्यगंडमालागलामयान्॥ तत्फलं लेप
नेग्राहि गुरुश्लेष्मानिलापहं॥ अथ कांचनारनामगुणाः॥ कांचनारः कांचनको गंडा
रिः शोणपुष्पकः॥ कोविदारोस्य भेदः स्यात्कुद्दालः कुंडलीकुली॥ ताम्रपुष्पश्चमरिकः
सत्यवपरिकीर्तितः॥ कांचनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्॥ कृमिकुष्ठगुद
भ्रंशगंडमालाव्रणापहः॥ कोविदारोपि तद्वत्स्यात्पुष्पंशीतं तयोर्लघु॥ रूक्षं संग्रा
हि पित्तास्रप्रदरक्षयकासनुत्॥ अथसुरजनानामगुणाः॥ सौभांजनः शिग्रुती

क्षागंधकाक्षीवमोचकः॥ बहुपत्रश्च संप्रोक्तो मधुशिग्रुस्तु लोहितः॥ तद्बीजं श्वेतमरिच
मन्यः प्रोक्तो पि सस्मृतः॥ शिग्रुः कटुः कटुः पाके तीक्ष्णोष्णो मधुरो लघुः॥ दीपनो रो
चनो रूक्षः क्षारस्तिक्तो विदाहकृत्॥ संग्राही शुक्रलो हृद्यः पित्तरक्तप्रकोपणः॥ च
क्षुष्यः कफवातघ्नो विद्रधिश्वयथुक्रिमीन्॥ मेदोपचीविषप्लीहगुल्मगंडव्रणान्
हरेत्॥ श्वेतः प्रोक्तगुणो ज्ञेयो विशेषाद्दाहकृद्भवेत्॥ प्लीहानं विद्रधिं हंति व्रणघ्नो
पित्तरक्तकृत्॥ मधुशिग्रुः प्रोक्तगुणो विशेषाद्दीपनः सरः॥ शिग्रुवल्कलपत्राणां
स्वरसः परमोर्तिहृत्॥ चक्षुष्यं शिग्रुजं बीजं तीक्ष्णोष्णं विषनाशनं॥ अवृष्यं कफ
वातघ्नं तन्नस्येन शिरोर्तिनुत्॥ तत्पुष्पं कटुकं तीक्ष्णमुष्णं स्नायुकशोफहृत्॥ कृ
मिहृत्कफवातघ्नं विद्रधिप्लीहगुल्मजित्॥ मधुशिग्रोस्त्वक्षिहितं रक्तपित्तप्र

शादनं ॥ सौभांजनफलं स्वादु कषायं कफपित्तनुत् ॥ शूलकुष्ठक्षयश्वासगुल्मघ्नं दीपनं परं ॥ अथ विष्णुक्रांता नामगुणाः ॥ अस्फोता गिरिकर्णी स्याद्विष्णुक्रांताऽपराजिता ॥ नीलपुष्पा परा प्रोक्ता जया च स्याच्च सा स्मृता ॥ विष्णुक्रांता कटुर्मेध्या शीता कंठा सुदृष्टिदा ॥ कुष्ठमूत्रत्रिदोषामशोथघ्नव्रणविषापहा ॥ कषाया कटुपाका च तिक्ता च स्मृतिबुद्धिदा ॥ अथ निर्गुंडी नामगुणाः ॥ सिंदुवारः श्वेतपुष्पः सिंदुकः सिंदुवारकः ॥ नीलपुष्पी तु निर्गुंडी शेफाली सुवहा च सा ॥ भूतकेशी श्वेतभीरुः स एव परिकीर्त्तितः ॥ सिंदुकः स्मृतिदस्तिक्तः कषायः कटुको लघुः ॥ केश्यो नेत्रहितो हंति शूलशोथाममारुतान् ॥ कृमिकुष्ठारुचिश्लेष्मव्रणान्निलापि तद्विधा ॥ सिंदुवारदले जंतुवातश्लेष्महरं लघु ॥ अथपमुस्मः ॥ अथ करंज नामगुणाः ॥ करंजो नक्त

७२४

मालाः स्यान्नेत्ताव्होघतपूर्णकः ॥ पूतीकोन्यः पूतिपर्णः प्रकीर्णश्चिरबिल्वकः ॥ करंजः कटु
कस्तीक्ष्णो वीर्ये स्नोयो निदोषजित् ॥ कुष्ठोदावर्तगुल्मार्शोव्रणकृमिकफापहः ॥ तत्फलं
कफवातघ्नं मेहार्शः कृमिकुष्ठजित् ॥ तत्पत्रं कफवातार्शः कृमिशोफहरं परं ॥ अथ सा
गरगोटानामगुणाः ॥ लताकरंजो दुस्पर्शो वीराख्यो वज्रबीजकः ॥ धनदाक्षी कंटफलः कु
वेराक्षी च समप्रधा ॥ लताकरंजपत्रं तु कटूष्णं कफवातनुत् ॥ तद्बीजं दीपनं पथ्यं शूलगुल्म
व्यथापहं ॥ अथ श्वेतरक्तगुंजानां नामगुणाः ॥ श्वेतगुंजा च श्वेता प्रोक्ता कृष्णला चापि सा स्मृ
ता ॥ रक्ता सा काकचिंची स्यात्काकणंती च रक्तिका ॥ काकादनी काकपीलुः सा स्मृता गुं
रवल्लरी ॥ गुंजाद्वयं तु केश्यं स्याद्वातपित्तज्वरापहं ॥ मुखशोषभ्रमश्वासतृष्णामदविना
शनं ॥ नेत्रामयहरं वृष्यं वस्यं कंडूव्रणं हरेत् ॥ कृमीन्हंतु मरुच्छानि व ... श्वेता च ... ते ॥७२४॥

अन्यच्च ॥ गुंजाद्वयं च तीक्ष्णोष्णबीजं कांतिकरी सिका ॥ अलक्ष्मीविषहृत्कंठ्ये तात हृत्स्नकी।
र्त्तिता ॥ अथ कपिकच्छूनामगुणाः ॥ कपिकच्छूरात्मगुप्ता ऋष्यप्रोक्ता च मर्कटी ॥ अजहा कंडु
रा व्यंडा दुःस्पर्शा प्रावृषायणी ॥ लांगूली शूकशिंबिश्च चित्रसैव प्रोक्ता महर्षिभी ॥ कपिक
च्छूः मधुरा वृष्या मधुरा बृंहणी गुरुः ॥ तिक्ता वातहरी वल्या कफपित्तास्रनाशिनी ॥ तद्बीजं वा
तघ्नमनं सत्तं वाजीकरं परं ॥ अथ वेतसनामगुणाः ॥ वेतसो वंजुलो नम्रो वानीरो दीर्घ
पत्रकाः ॥ नादेयो मेघपुष्पोऽन्यस्तोयकामो निकुंजकः ॥ जलौकासंवृतो भोजो निचुलो जल
वेतसः ॥ इज्जलो हिज्जलो गुच्छफलः स्यात्कच्छपोतिकः ॥ वेतसः शीतलो दाहशोफार्शोयो
निरुग्व्रणान् ॥ हंति वीसर्पकृच्छ्रास्रपित्ताश्मरिकफान्नितान् ॥ जलजो वेतसः शीतः सं
ग्राही वातकोपनः ॥ इज्जलस्तु कुलाः प्रोक्तो विशेषाद्विषनाशनः ॥ अथांकोलनामगु

॥७२५॥

णाः ॥ अंकोलो दीर्घकीलः स्यादंकोलश्च निकोचकः ॥ अंकोलकः कटुस्तीक्ष्णः स्निग्धोष्णस्तु
वरो लघुः ॥ रेचनः कृमिशूलामशोथग्रहविषापहः ॥ विसर्पकफपित्तास्रमूषकश्च विषा
पहः ॥ तत्फलं शीतलं स्वादु श्लेष्मघ्नं बृंहणं गुरु ॥ बल्यं विरेचनं वातपित्तदाहक्षयास्रजित्
अथ बलाचतुष्टयनामगुणाः ॥ बला वाट्यालिका वाट्या सैव वाट्यालिकोपि च ॥ महाबला
पीतपुष्पा सहदेवी च सा स्मृता ॥ ततोन्यातिबला ऋष्यप्रोक्ता कंकतिका सहा ॥ गांगेरुकी ना
गबला झषा ह्रस्वा गवेधुका ॥ बलाचतुष्टयं शीतं मधुरं बलकांतिकृत् ॥ स्निग्धं ग्राहि समी
रास्रपित्तास्रक्षतनाशनं ॥ बलामूलत्वचश्चूर्णं पीतं सक्षीरशर्करं ॥ मूत्रातिसारं हरति दृ
ष्टमेतन्न संशयः ॥ हरेन्महाबला कृच्छ्रं भवेद्वातानुलोमनी ॥ हन्यादतिबला मेहं पयसा सि
तया सह ॥ गुर्वी नागबला वृष्या विक्षोषादस्रपित्तजित् ॥ बल्या रसायनी पुंस्त्ववर्द्धनी ॥७२५॥

वृंहणीतथा॥ अथकार्पासनामगुणाः कार्पासःबदरस्तुंडछादनोवादनःपिचुः॥ कार्पासी
तुंडकेरीचसमुद्रांताचकथ्यते॥ कार्पासकीलघुःकोस्रामधुरोवातनाशनः॥ तत्पलाशंसमी
रघ्नंरक्तकृन्मूत्रवर्द्धनं॥ तत्कर्णपिडिकानादपूयास्रावविनाशनं॥ तद्बीजंस्तन्यदंवृष्यंस्नि
ग्धंकफकरंगुरु॥ अथवांसनामगुणाः॥ वंशस्त्वक्सारकर्मारत्वचिसारतृणध्वजाः॥
शतपर्वायवफलोवेणुमस्करतेजनाः॥ वंशःसरोहिमःस्वादुःकषायोवस्तिशोधनः॥
छेदनःकफपित्तघ्नःकुष्टास्रव्रणशोथजित्॥ तत्करीरःकटुःपाकेरसेरूक्षोगुरुःसरः
कषायःकफकृत्स्वादुर्विदाहीवातपित्तलः॥ तद्यवास्तुसरारूक्षाःकषायाःकटुपाकिनः
वातपित्तकराउस्नाबद्धमूत्राःकफापहाः॥ अथनलनामगुणाः॥ नलःपोटगलःशून्य
मध्यश्चधमनस्तथा॥ नर्त्तकःपुष्पमत्क्षरंध्रीचपरिकीर्त्तितः॥ नलस्तुमधुरस्तिक्तः

कषायः कफरक्तजित्॥ उष्णो हृद्बस्तियोन्यर्तिदाहपित्तविसर्पिहृत्॥ अथ मुंजद्वयनामगुणाः॥
भद्रमुंजः शरो बाणस्तेजनश्चक्षुवेष्टनः॥ मुंजो मुंजातको बाणः स्थूलदर्भः सुमेखलः॥ मुं-
जद्वयंतु मधुरं तुवरं शिशिरं तथा॥ दाहतृष्णाविसर्पास्रमूत्रवस्त्यक्षिरोगजित्॥ दोषत्रय-
हरं वृष्यं मेखलासूपयुज्यते॥ अथ काशनामगुणाः॥ काशः काशेक्षुरुद्दिष्टः स स्यादि-
क्षुः स स्यादिक्षुः स स्यादिक्षुरसस्तथा॥ इक्ष्वालिकेक्षुगंधा च तथा पोटगलः स्मृतः॥ काशः
स्यान्मधुरस्तिक्तः स्वादुपाको हिमः सरः॥ मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तजरोगजित्॥
अथ कुशनामगुणाः॥ कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः॥ ततोन्यो दीर्घपत्रः
स्यात्क्षुरपत्रस्तथैव च॥ दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमं॥ मूत्रकृच्छ्राश्मरीतृष्णाव-
स्तिरुक्प्रदरास्रजित्॥ अथ रोहिषनामगुणाः॥ कतृणं रोहिषं देवजग्धं सौगंधि

केतथा॥ मृत्तिकं ध्यामयौरंच श्यामकं धूमगंधिकं॥ रोहिषं कटुकं पाके तिक्तोष्णं तु वरं जयेत्॥
कंठहृद्रोगपित्तास्रशूलकासकफज्वरान्॥ अथ नीलदूर्वानामगुणाः॥ नीलदूर्वा रुहानंता
भार्गवी शतपर्विका॥ शष्पं सहस्रवीर्या च शतवल्ली च कीर्तिता॥ नीलदूर्वा हिमा तिक्ता म
धुरा तुवरा हरेत्॥ कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान्॥ अथ श्वेतदूर्वानामगुणाः॥
दूर्वा शुक्ला तु गोलोमी शतवीर्या च कथ्यते॥ श्वेता दूर्वा कषाया स्यात्स्वाद्वी व्रण्या च जीवनी
तिक्ता हिमा विसर्पास्रतृट्पित्तकफदाहहृत्॥ अथ गंडदूर्वा॥ गंडदूर्वा तु गंडाली मत्स्या
द्वी व्रण्या च जीवनी तिक्ता हिमा विसर्पास्र क्षी शकुलादनी॥ गंडदूर्वा हिमा लोहद्राविणी
ग्राहिणी लघुः॥ तिक्ता कषाया मधुरा वातकृत्कटुपाकिनी॥ दाहतृष्णाबलासास्रकुष्ठ
पित्तज्वरापहा॥ अथ वाराहीकंदनामगुणाः॥ वाराही वदना गृष्टिर्माधवी सौकरी तथा

॥ ७२७ ॥

तस्याः कंदः किटिः क्रोडनामा शंबरकंदकः ॥ वाराही तिक्तकटुका विषपित्तकफापहा ॥
कुष्ठमेहकृमिहरा वृष्या बल्या रसायनी ॥ वाराहीकंदसंज्ञस्तु पश्चिमे गृष्टिसंज्ञकः
वाराहीकंद एवान्यैश्चर्मकारालुको मतः ॥ आनूपे स भवेद्देशे वाराह इव लोमवान्
अथ विदारीकंदनामगुणाः ॥ विदारी स्यात्स्वादुकंदा च सा तु क्रोष्ट्री सिता स्मृता ॥ इक्षु-
गंधा क्षीरवल्ली क्षीरशुक्ला पयस्विनी ॥ भूकूष्मांडी स्वादुलता गजेष्टा वारिवल्लभा
विदारी मधुरा स्निग्धा वृंहणी स्तन्यशुक्रदा ॥ शीता स्वर्या मूत्रला च जीवनी बलव-
र्णदा ॥ गुरुः पित्तास्रपवनदाहान्हंति रसायनी ॥ अथ मुसलीनामगुणाः ॥ मुसली
तालमूली च सुवहा तालमूलिका ॥ गोधापदी हेमपुष्पी भूताली दीर्घकंदिका ॥ मु-
शली मधुरा शीता वृष्या पुष्टिबलप्रदा ॥ पिच्छिला कफदा पित्तदाहश्रमहरा परा ॥

॥ ७२७ ॥

सुशली चद्विधा प्रोक्ता श्वेता च परसंज्ञका ॥ श्वेता स्वल्पगुणा प्रोक्ता अपरा च रसा
यनी ॥ अथ शतावरी महाशतावरी नामगुणाः ॥ शतावरी बहुसुताऽभीरुरिंदीवरी
वरी ॥ नारायणी शतवीर्या च पीवरी ॥ महाशतावरी त्वन्या शतमूल्यूर्ध्वकंटिका
सहस्रवीर्या केशी च ऋष्यप्रोक्ता महोदरी ॥ शतावरी गुरुः शीता तिक्ता स्वाद्वी रसा
यनी ॥ मेधाग्निपुष्टिदा स्निग्धा नेत्र्या गुल्मातिसारजित ॥ शुक्रस्तन्यकरी बल्या वा
तपित्तास्रशोथजित ॥ महाशतावरी मेध्या हृद्या वृष्या रसायनी ॥ शीतवीर्या नि
हंत्यर्शो ग्रहणीनयनामयान ॥ अथाश्वगंधनामगुणाः ॥ गंधांता वाजिनामादि र
श्वगंधा हयाह्वया ॥ वराहकर्णी वरदा वनजा कुष्ठगंधिनी ॥ वृषापलासपर्णी च
गोकर्णी प्यावरी हयका ॥ अश्वगंधानिलश्लेष्मश्वित्रशोथक्षयापहा ॥ बल्या रसा

॥७२८॥ ठांप

यनी तिक्ता कषायोष्णा तिक्तकटुकला ॥ अथ पाठानामगुणाः ॥ पाठांबष्ठकी च प्राचीना पापचेलि
का ॥ एकाष्ठीला रसा प्रोक्ता पाठिका वरतिक्तिका ॥ पाठोष्णा कटुका तीक्ष्णा वातश्लेष्म हरी
लघुः ॥ हंति शूलज्वरछर्दिकुष्ठातीसारहृद्रुजः ॥ दाहकंडूविषश्वासकृमिगुल्मगरव्रणान्
अथ शरपुंखानामगुणाः ॥ शरपुंखः प्लीहशत्रुर्नीलीवृक्षाकृतिश्च सः ॥ शरपुंखो यकृ
त्प्लीहगुल्मव्रणविषापहः ॥ तिक्तः कषायः कासास्रश्वासज्वरहरो लघुः ॥ उष्णवीर्यश्च
कथितः कृमिवातरुजापहः ॥ अथ तालमखानानामगुणाः ॥ कोकिलाक्षस्तु काकेक्षु
रिक्षुरः क्षुरकः क्षुरः ॥ भिक्षुः कांडेक्षुरप्युक्त इक्षुगंधेक्षुवालिका ॥ क्षुरकः शीतलो वृष्यः
स्वाद्वम्लः पिच्छिलस्तथा ॥ हृष्यः कफहृत्तैरोचस्योग्रद्रवातास्रजित्स्मृतः ॥ अथास्थि
शृंखलानामगुणाः ॥ ग्रंथिमानस्थिसंहारो वज्रांगी चास्थिशृंखला ॥ अस्थिसं ॥७२८॥

हारकः प्रोक्तो वातश्लेष्महरोऽस्थियुक् ॥ उष्णः सरः कृमिघ्नश्च पाचनः पित्तलः स्मृतः ॥ अ
थ कुमारीनामगुणाः ॥ कुमारी गृहकन्या च कन्या घृतकुमारिका ॥ स्कंटका स्थूलदला
बहुपत्रामराऽजरा ॥ गृहकन्या हिमा तिक्ता मदगंधिः कफापहः ॥ पित्तकासविषश्वा
सकुष्ठघ्नी च रसायनी ॥ गुल्मप्लीहयकृद्वृद्धिकफज्वरहरी हरेत् ॥ ग्रंथ्यग्निदग्धविस्फोट
पित्तरक्तानि भेदिनी ॥ अथ श्वेतपुनर्नवानामगुणाः ॥ पुनर्नवा श्वेतमूला वृश्चीवो दी
र्घपत्रिकः ॥ विशाखो दीर्घवर्षाभूः पुनर्भूर्मंडलच्छदः ॥ पुनर्नवा सरा तिक्ता रूक्षोष्णा
मधुरा कटुः ॥ शोफानिलगरश्लेष्महरा हृद्या रसायनी ॥ अथ रक्तपुनर्नवानामगु
णाः ॥ पुनर्नवापरा रक्ता रक्तपुष्पी कठिल्लकः ॥ क्रूरः क्षुद्रवर्षाभूर्वर्षकेतुः शिवाटि
का ॥ पुनर्नवारुणा तिक्ता कटुपाका हिमा लघुः ॥ वातला ग्राहिणी श्लेष्मपित्तरक्त

॥७२९॥

विनाशिनी ॥ अथ गंधप्रसारिण्या नामगुणाः ॥ प्रसारिणी राजबला भद्रपर्णी प्रतानिनी ॥
सरणी सारणी भद्रबला चापि कटंभरा ॥ प्रसारणी गुरुर्वृष्या बलसंधानकृत्सरा ॥ वीर्यो
ष्णा वातहृत्तिक्ता वातरक्तकफापहा ॥ अथ भृंगराजनामगुणाः ॥ भृंगराजो भृंगरजो मार्क
वो भृंगरएव च ॥ भृंगारकः केशरजो भृंगारः केशरंजनः ॥ भृंगराजः कटुस्तिक्तो रूक्षोष्णः
कफवातनुत् ॥ केश्यस्त्वच्यः कृमिश्वासकासशोथामपांडुनुत् ॥ दंत्यो रसायनो बल्यः
कुष्ठनेत्रशिरोर्तिजित् ॥ अथ त्रायमाणानामगुणाः ॥ बलभद्रा त्रायमाणा त्रायंती गिरि
सानुजा ॥ मंगल्याही देवबला पालिनी भयनाशिनी ॥ त्रायंती शीतमधुरा गुल्मज्वरक
फास्रजित् ॥ भ्रमतृष्णाक्षयग्लानिविषच्छर्दिविनाशिनी ॥ इयं हिमवते प्रसिद्धा ॥ अथ
मूर्वानामगुणाः ॥ मूर्वा मधुरसा देवी मोरटा तेजनी स्रुवा ॥ मधूलिका मधुश्रेणी ॥७२९॥

गोकर्णी पीलुपर्ण्यपि ॥ मूर्वा सरा गुरुः स्वादुस्तिक्ता पित्तास्रमेहनुत् ॥ त्रिदोषतृष्णाहृ
द्रोगकंडूकुष्ठज्वरापहा ॥ अथ काकमाचीनामगुणाः ॥ इयं मकोई इति लोके प्रसिद्धा ॥
काकमाची ध्वांक्षमाची काकसाह्वा च वायसी ॥ काकमाची त्रिदोषघ्नी स्निग्धोष्णा
स्वरशुक्रदा ॥ हृद्या रसायनी शोथकुष्ठार्शोज्वरमेहजित् ॥ अथ काकनासानामगुणाः
काकनासा तु काकांगी काकतुंडफला च सा ॥ काकनासा कषायोष्णा कटुका रसपाके
योः ॥ कफघ्नी वामनी तिक्ता शोथार्शःश्वित्रकुष्ठहृत् ॥ अथ काकजंघानामगुणाः
काकजंघा नदीकांता काकतिक्ता सुलोमशा ॥ पारावतपदी दासी काका चापि प्रकी
र्त्तिता ॥ काकजंघा हिमा तिक्ता कषाया कफपित्तजित् ॥ निहंति ज्वरपित्तास्रं तथा
कंडूविषकृमीन् ॥ अथ मेषशृंगीनामगुणाः ॥ मेषशृंगी विषाणी स्यान्मेषवल्ल्य

॥ ७३० ॥

जश्रृंगिका ॥ मेषश्रृंगी रसे तिक्ता वातला श्वासकासहृत् ॥ रूक्षा पाके कटुः पित्तव्रणश्ले
ष्माक्षिशूलनुत् ॥ मेषश्रृंगीफलं तिक्तं कुष्ठमेहकफप्रणुत् ॥ दीपनं स्रंसनं कासकृ
मिव्रणविषापहं ॥ अथ हंसपदी ॥ हंसपादी हंसपदी कीटमाता त्रिपादिका ॥ हंस
पादी गुरुः शीता हंति रक्तविषव्रणान् ॥ विसर्पदाहातीसारलूताभूताग्निदोषनी
अथ सोमवल्लीनामगुणाः ॥ सोमवल्ली सोमलता सोमाक्षीरी द्विजप्रिया ॥ सो
माहिगुल्मवल्ली च यज्ञवल्ली द्विजप्रिया ॥ सोमवल्ली कटुः शीता मधुरा पित्तदा
हनुत् ॥ तृष्णाविशोषशमनी पावनी यज्ञसाधिनी ॥ त्रिदोषघ्नी च कथिता रसाय
न्यपि कीर्तिता ॥ अथामरवेलनामगुणाः ॥ खवल्ल्याकाशवल्ली च चद्रस्पर्शी म
रवल्लरी ॥ आकाशनामपूर्वी सा वल्लीपर्यायगा स्मृता ॥ खवल्ली ग्राहिणी ॥ ७३० ॥

त्तिक्ता पिच्छिलास्यामयापहा॥ तुवराग्निकरी हृद्या पित्तश्लेष्मामनाशिनी॥ अथ पा
तालगारुडी नामगुणाः॥ छिलिहिंट्टो महामूलः पातालगरुडाह्वयः॥ छिलिहिंट्टः
परं वृष्यः कफघ्नः पवनापहः॥ अथ वंदा नामगुणाः॥ वंदा वृक्षादनी वृक्षभक्षा
वृक्षरुहापि च॥ वंदाकः स्याद्धिमस्तिक्तः कषायो मधुरो रसे॥ मंगल्यः कफवा
तास्रः रक्षोघ्नो विषापह॥ अथ शंखपुष्पी नामगुणाः॥ शंखपुष्पी तु शंखाह्वा
मंगल्यकुसुमापि च॥ किरीटी शंखकुसुमा भूलग्नी केशमालिनी॥ शंखपुष्पी स
रा मेध्या वृष्या मानसरोगहृत्॥ रसायनी कषायोष्णा स्मृतिकामेहनाशिनी॥
ह्रत्विपाठांतरम् दैनविनोदनिघंटौ॥ दोषापस्मारभूताश्रीकुष्ठकृमिविषप्र
णुत्॥ अथ लज्जालु नामगुणाः॥ लज्जालुस्तु शमीपत्रा समंगा जलिकारिका

॥ ७३१ ॥

रक्तपादी नमस्कारी नाम्ना खदिरकेत्यपि ॥ लज्जालुः शीतला तिक्ता कषाया कफपित्त
जित् ॥ रक्तपित्तमतीसारं योनिरोगान् विनाशयेत् ॥ अथ लज्जालुभेदः अलंबुषा
नामगुणाः ॥ अलंबुषा खरत्वक् च तथा मेदोगला स्मृता ॥ अलंबुषा लघुः स्वादुः
कृमिपित्तकफापहा ॥ अथ दुग्धी नामगुणाः ॥ दुग्धिका स्वादुपर्णी स्यात् क्षीरिणी
स्वादुदुग्धिका ॥ दुग्धिकोष्णा गुरू रूक्षा वातला गर्भकारिणी ॥ स्वादुक्षीरा कटुस्ति
क्ता सृष्टमूत्रमलप्रदः ॥ स्वादुर्विष्टंभनी वृष्या कफकुष्ठकृमिप्रणुत् ॥ अथ ब्रा
ह्मीभेदं मांडूकी नामगुणाः ॥ ब्राह्मी कपोतवेगा च सोमवल्ली सरस्वती ॥ मंडूक
पर्णी मांडूकी त्वाष्ट्री दिव्या महौषधी ॥ ब्राह्मी हिमा सरा तिक्ता लघुर्मेध्या रसाय
नी ॥ स्वर्ण्या स्मृतिप्रदा कुष्ठपांडुमेहास्रकासजित् ॥ विषशोथज्वरहरी तद्वन्मं ॥ ७३१ ॥

डूकपर्ण्यपि ॥ अथ जलब्राह्मीनामगुणाः ॥ स्मनाम्नी खेधरा वारिब्राह्मी च हिलमोचिका ॥ ब्राह्मी तिक्तरसोष्णा च सरा वातामशोफनुत् ॥ इयं कामीति लोके प्रसिद्धा ॥ अथ द्रोणपुष्पीनामगुणाः ॥ द्रोणा च द्रोणपुष्पी च कीर्तिता ॥ द्रोणपुष्पी गुरुः स्वादुः रूक्षोष्णा वातपित्तकृत् ॥ सक्षारा तव लवणा स्वादुपाका कटी च भेदिनी ॥ कफामकामलाशोफतमकश्वासजंतुजित् ॥ अथ पटुटकदलनामगुणाः ॥ ब्रह्मदंडी अजदंडी च कटुपत्र फला च सा ॥ ब्रह्मदंडी कटूष्णा स्यात्कफशोफानिलापहा ॥ अथ सुवर्चलाद्यनामगुणाः ॥ सुवर्चला सूर्यभक्ता वरदा वरदलापि च ॥ सूर्यावर्त्ती रविप्रीता परा ब्रह्मसुवर्चला ॥ सूर्यावर्त्ती हिमा रूक्षा स्वादुपाका रसा गुरुः ॥ अथ पित्तलाकटुः क्षारा विषं मकफवातजित् ॥ अन्या तिक्ता कषायोष्णा सरा रूक्षा लघुः कटुः

॥७३२॥

निहंतिकफपित्तास्रश्वासकासारुचिज्वरान्॥ विस्फोटकुष्ठमेहास्रयोनिरुक्कृमिपांडु
ताः॥ अथवंध्याकर्कोटीनामगुणाः॥ वंध्याकर्कोटिकादेवीकन्यायोगीश्वरीतिच॥ ना
गारिर्नागदमनीविषकंटकिनीतथा॥ वंध्याकर्कोटिकालघ्वीकफनुद्व्रणशोधिनी॥
सर्पदर्पहरीतीक्ष्णाविसर्पविषहारिणी॥ अथभूतखडनामगुणाः॥ मार्कंडिकाभू
पिठरीमार्कंडीमृदुरेचनी॥ मार्कंडेयतथाकुल्यंगरेतरवटस्तथा॥ मार्कंडिकाकुष्ठहरीऊ
र्ध्वाधःकायशोधिनी॥ विषदुर्गंधिकासघ्नीगुल्मोदरविनाशिनी॥ तिक्ताकटुज्वरहरी
तथासिध्मामनाशिनी॥ अथकेदालनामगुणाः॥ देवदालीतुवेणीस्यात्कर्कोटीच
गराऽगरी॥ देवताडोवृत्तकोशस्तथाजीमूतइत्यपि॥ पीतापराखरस्पर्शाविषघ्नीग
रनाशिनी॥ देवदालीरसेतिक्ताकफार्शःशोफपांडुताः॥ नाशयेद्वामनीतीक्ष्णा क्ष

॥७३२॥

वह्निदं कृमिज्वरान् || देवदालीफलं तिक्तं कृमिश्लेष्मविनाशनं || स्रंसनं गुल्मशूलघ्न

मर्शोघ्नं वातजित्परं || इति देवदाली || अथ गोभीनामगुणाः || गोजिह्वा गोजिका गोभी दर्वि

का खरपर्णिनी || अधोमुखा न डुञ्जिव्हा भूतोन्मादार्त्तिहा तथा || गोजिह्वा वातला शी

ता ग्राहिणी कफपित्तनुत् || हृद्या प्रमेहकासास्रव्रणज्वरहरी लघुः || कोमला तु वरा

तिक्ता स्वादुपाकरसा स्मृता || अथ वीरतरुनामगुणाः || वेहत्रं तरोजगति वीरतरुः

प्रसिद्धः श्वेतासिता रक्ता पीतो हितनीलपुष्पः || स्यात्तासितनुस्त्वकुसुमः शमिसूक्ष्म

पत्रः स्यात्कंटकी विजलदे पजराषवृक्षः || वेहवंतरः कटुरुष्णकषायः संधिम्बल

नुत् || वन्हिदीप्तिकरः पथ्यो वातामयविनाशनः || अथ धनखछिक्करणी नामगुणाः

छिक्कणी क्षवकृती क्षुरा छिक्किका घ्राणदुःखदा || छिक्कणी कटुका हृद्या ती

॥ ७३३ ॥

श्लेष्मवह्निपित्तकृत् ॥ वातरक्तहरी कुष्ठकृमिवातकफापहा ॥ अथ पातुकर्कटीनामगु
णाः ॥ आरवककर्कटीत्वासुकर्कटीपर्कटिकामृदरीभवा ॥ मातामृमिचरा चंडा भ्रांचरी बहु
पादिका ॥ आरवुककर्कटी कटुश्लेष्मा च कफपित्तहरा सरा ॥ आनाहज्वरशूलार्तिनाशिनी
पाचनी परा ॥ अथ मयूरशिखानामगुणाः ॥ मयूराह्वशिखा प्रोक्ता सहस्राहि मधु
च्छदा ॥ शिखा वलाके प्रशिखा शिखालुः सुशिखा शिवा ॥ बर्हिचूडा रसे स्यात्तु
मूत्रकृच्छ्रविनाशिनी ॥ कासगूहादिदोषघ्नी वश्यकर्मसु शस्यते ॥ अथ रास्नाभेद
नाकुली इति लोके प्रसिद्धा तस्या नामगुणाः ॥ नाकुली सुरसा नागसुगंधा गंधनाकुली
नकुलेष्टा तु जंगाक्षी छत्राकी विषनाशिनी ॥ नाकुली तुवरा तिक्ता कटूष्णा विनाश
येत् ॥ भोगिलूता वृश्चिकाखु विषज्वरकृमिव्रणान् ॥ अथ पनस्याक्षीनामगुणाः ॥ ७३३ ॥

मत्स्याक्षी वाल्हिका मत्स्यगंधिमत्स्यादनी तथा ॥ मत्स्याक्षी ग्राहिणी शीता कुष्टपित्त
कफास्रनुत ॥ अथ वटस्य नामगुणाः ॥ वटो रक्तफलः शृंगी न्यग्रोधः स्कंधजो ध्रुवः
क्षीरी वैश्रवणो वासो बहुपादो वनस्पतिः ॥ वटः शीतो गुरुर्ग्राही कफपित्तव्रणा
पहः ॥ वर्ण्यो विसर्पदाहघ्नः कषायो योनिदोषहृत ॥ अथ पिप्पलनामगुणाः ॥
बोधिद्रुः पिप्पलोश्वत्थश्चलपत्रो गजाशनः ॥ शुचिद्रुमो गुह्यपुष्पोच्युतावास
श्चश्यामलः ॥ पिप्पलो दुर्जरः शीतः पित्तश्लेष्मव्रणास्रजित ॥ गुरुस्तुवरको रूक्षो
वर्ण्यो योनिविशोधनः ॥ अश्वत्थवृक्षस्य फलानि पक्वान्यतीव हृद्यानि च शीत
लानि ॥ कुर्वंति पित्तास्रविषार्त्तिदाहविच्छर्दिशोषारुचिदोषनाशनं ॥ अथ पिप्प
लभेदपार्श्वपिप्पलनामगुणाः ॥ पारिशोन्यः फलीशश्च कपिचूतः कमंडलुः ॥

गर्दभांडः कंदरालः कपीतनसुपार्श्वकाः ॥ पारिशो दुर्जरः स्निग्धः कृमिशुक्रकफप्रदः ॥ फलेऽम्लो मधुरो मूले कषायः स्वादुमज्जकः ॥ अथोदुंबरनामगुणाः ॥ उदुंबरो जंतुफलो यज्ञांगो हेमदुग्धकः ॥ शीतवल्कः शीतफलः कालस्कंधः पवित्रकः ॥ उदुंबरो हिमो रूक्षो गुरुः पित्तकफास्रजित् ॥ मधुरस्तुवरो वर्ण्यो व्रणशोधनरोपणः ॥ औदुंबरं फलमतीवहितं सुपक्वं पित्तापहं च मधुरं श्रमशोफहारि ॥ आमं कषायमतिदीपनरोचनं च मांसस्य वृद्धिकरमस्रविकारकारि ॥ अथ काकोदुंबरिकानामगुणाः ॥ काकोदुंबरिका फल्गुर्मलयूर्जघनेफला ॥ मलयूः स्तंभकृत्तिक्ता शीतला तुवरा जयेत् ॥ कफपित्तव्रणश्वित्रकुष्ठपांडुस्रकामलाः ॥ उदुंबरत्वचा शीता कषाया व्रणनाशिनी ॥ अथ पीपरीनामगुणाः ॥ प्लक्षो जटी पर्कटी च पर्कटी च स्त्रियामपि ॥ प्लक्षः कषा

यः शिशिरो व्रणयोनिगदापहः॥ दाहपित्तकफास्रघ्नः शोथहा रक्तपित्तहृत्॥ अथ
सिरीसनामगुणाः॥ शिरीषो मंडिलो मंडी मंडीरश्च कपीतनः॥ शुकपुष्पः शुकतरु
र्मृदुपुष्पः शुकप्रियः॥ शिरीषो मधुरोऽनुष्णस्तिक्तश्च तुवरो लघुः॥ दोषशोथविसर्प
घ्नः कासव्रणविषापहः॥ अथ पंचक्षीरिवृक्षपंचवल्कलयोर्नामगुणाः॥ न्यग्रो
धोदुंबराश्वत्थपारिशप्लक्षपादपाः॥ पंचैते क्षीरिवृक्षास्तेषां त्वक्पंचवल्कं॥ के
चित्तु पारिशस्थाने शिरीषं वेतसं परे॥ वदंतीति शेषः॥ क्षीरिवृक्षा हिमा वर्ण्या
योनिरोगव्रणापहाः॥ रूक्षाः कषाया मेदोघ्ना विसर्पमयनाशनाः॥ शोथपित्तक
फास्रघ्ना स्तन्या भग्नास्थियोजकाः॥ त्वक्पंचकं हिमं ग्राहि व्रणशोथविसर्पनु
त्॥ तेषां पत्रं हिमं ग्राहि कफवातास्रनुल्लघु॥ विष्टंभाध्मानजित्तिक्तं कषायं

रगो

॥ ७३५ ॥

तथुवरेखनं ॥ अथार्जुनवृक्षनामगुणाः ॥ ककुभोऽर्जुननामाख्यो नदीसर्जश्च कीर्त्तितः ॥ इंद्र
द्रुर्वीरवृक्षश्च वीरश्च धवलः स्मृतः ॥ ककुभः शीतलो भग्नक्षतक्षयविषास्रजित् ॥ मे
दोमेहव्रणान् हंति तुवरः कफपित्तहृत् ॥ अथ सिंसपनामगुणाः ॥ शिंशपा पिच्छिला
श्यामा कृष्णसारा च सा गुरुः ॥ कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता ॥ शिंशपा कटु
का तिक्ता कषाया शोफहारिणी ॥ उष्णवीर्या हरेन्मेदः कुष्ठश्वित्रवमीकृमीन् ॥ वस्ति
हृग्व्रणदाहास्रबलासान् गर्भपातिनी ॥ अथ असनवृक्षनामगुणाः ॥ बीजकः पी
तसारश्च पीतशालकस्त्वपि ॥ बंधूकपुष्पः प्रियकः सर्जकश्चासनः स्मृतः ॥ बीजकः
कुष्ठवीसर्पश्वित्रमेहगुदकृमीन् ॥ हंति श्लेष्मास्रपित्तं च त्वच्यः केश्यो रसायनः ॥ अथ
खदिरनामगुणाः ॥ खदिरो रक्तसारश्च गायत्री दंतधावनः ॥ कंटकी बालपत्रश्च ॥ ७३५ ॥

वहुशल्यश्च पञ्ज्ञियः ॥ खदिरः शीतलो दंत्यः कंडूकासारुचिप्रणुत ॥ तिक्तः कषायो मेदोघ्नः
कृमिमेहज्वरव्रणान् ॥ श्वित्रशोथामपित्तास्रपांडुकुष्ठकफान् हरेत ॥ अथ श्वेतख
दिरनामगुणाः ॥ खदिरः श्वेतसारोन्यः कदरः सोमवल्कलः ॥ कदरो विशदो वर्ण्यो
मुखरोगकफास्रजित ॥ अथ वंवूलनामगुणाः ॥ वंवूलः किंकिरातः स्यात्किंकिराटः
सपीतकः ॥ स एव कषितातज्ज्ञैराभाषट्पदमोदिनी ॥ वंवूलः कफनुद्ग्राही कुष्ठकृमि
विषापहः ॥ आमरक्तातिसारघ्नः कासघ्नो हिमः कषायकः ॥ अथारिष्ठनामगुणाः
अरिष्टकस्तु मंगल्यः कृमिघ्नः सर्वार्थसाधनः ॥ रक्तबीजः पीतफेनः फेनिलो गर्भपा
तनः ॥ अरिष्टकस्त्रिदोषघ्न उष्णो गर्भग्रहापहः ॥ अथ पुत्रंजीवनामगुणाः ॥ पु
त्रंजीवो गर्भकरो यष्टीपुष्पोर्थसाधकः ॥ पुत्रंजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवात

॥७३६॥

नेत ॥ रुच्यम् अम्लो रूक्षो हिमः स्वादुः कटुः पटुः ॥ अथ हिंगोटनामगुणाः ॥ इंगुदोंगारवृक्ष
स्तिक्तकस्तापसद्रुमः ॥ इंगुदः कुष्ठभूतादिग्रहव्रणविषकृमीन् ॥ हंत्युष्णः श्वित्रशूल
घ्नस्तिक्तकः कटुपाकवान् ॥ अथ जिंगिनीनामगुणाः ॥ जिंगिनी झिंगिनी झिंगी सुनिर्या
साप्रमोदिनी ॥ जिंगिनी मधुरा सोष्णा कषाया योनिशोधिनी ॥ कटुः क्वाप्रणहृद्रोगवा
तातीसारहृत्पटुः ॥ उष्णस्तस्यास्तु निर्यासो नस्याद्वातव्यथापहः ॥ अथ तालनामगुणाः
तालस्तालद्रुमः छत्री दीर्घस्कंधो ध्वजद्रुमः ॥ तृणराजो मधुरसो मदाढ्यो दीर्घपाद
पः तालस्तु मधुरः शीतः पित्तदाहश्रमापहाः ॥ अथ शालनामगुणाः ॥ शालः स
र्जो रसः सर्जः श्रीरुन्मारीचपत्रकः ॥ वल्लीवृक्षो गंधवृक्षो लत्तकर्णोऽपि संस्मृतः
तन्निर्यासो दिव्यसारः सुरेष्टो पक्षधूपकः ॥ शालस्तु कटुकस्तिक्तो हिमः स्निग्धो

॥७३६॥

तिसारजित् ॥ पित्तास्रदोषकुष्ठघ्नः कंडूविस्फोटतापजित् ॥ अथ तमालस्य नामगुणाः ॥ तमा
लउक्तस्तापिच्छः कालस्कंधोऽसितद्रुमः ॥ तमालस्तद्गुणः शोथदाहविस्फोटहृद्गुरुः ॥
अथ भूर्जवृक्षस्य नामगुणाः ॥ भूर्जपत्रः स्मृतो भूर्जश्चर्मी बहुलवल्कलः ॥ भूर्जो भूतघ्न
हृल्लेष्मकर्णरुक्पित्तरक्तजित् ॥ कषायो राक्षसघ्नश्च मेदोविषहरः परः ॥ अथ प
लाशस्य नामगुणाः ॥ पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ॥ क्षारश्रेष्ठो ब्रह्मवृंत
श्चन्नस्तववृक्षः समिद्वरः ॥ पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ॥ कषायः कटु
कस्तिक्तः स्निग्धो गुदरोगजित् ॥ भग्नसंधानकृद्दोषग्रहण्यर्शः कृमीन्हरेत् ॥ तत्पुष्पं
स्वादु पाके तु कटु तिक्तं कषायकं ॥ वातलं कफपित्तास्रकृच्छ्रजिद्ग्राहि शीतलं ॥ तृट्दाह
शमकं वातरक्तकुष्ठहरं परं ॥ फलं लघूष्णं मेहार्शः कृमिवातकफापहं ॥ विपाके क

॥७३२॥

ष्टकं रक्तसंकोचकृद्गुल्मोदरप्रणुत् ॥ अथ सेमलनामगुणाः ॥ शाल्मलिस्तु भवेन्मोचा पिच्छि-
ला पूरणीति च ॥ रक्तपुष्पा स्थिरायुश्च कंटकाढ्या च तूलिनी ॥ शाल्मली शीतला स्वाद्वी
रसे पाके रसायनी ॥ श्लेष्मला स्निग्धवीजा च वृंहणी रक्तपित्तजित् ॥ अथ मोचरस
नामगुणाः ॥ निर्यासः शाल्मलेः पिच्छा शाल्मली वेष्टकोऽपि च ॥ मोचो स्त्रावो मोचरसो
मोचनिर्यास इत्यपि ॥ मोचास्त्रावो हिमो ग्राही स्निग्धो वृष्यः कषायकः ॥ प्रवाहिका-
तिसारामकफपित्तास्रदाहनुत् ॥ अथ धामणी नामगुणाः ॥ धन्वनस्तु धनुर्वृक्षो गो-
त्रवृक्षः सुतेजनः ॥ धन्वनः कफपित्तास्रकासहृत् तुवरो लघुः ॥ वृंहणो बलकृद्रूक्षः
संधिकृद्व्रणरोपणः ॥ अथ करीर नेपती ति च तस्य नामगुणाः ॥ करीरः क्रकरो
ऽपत्रो गूढपत्रो मरुस्थरुहः ॥ करीरः कटुकस्तिक्तः स्वेद्युष्णो भेदनः स्मृतः ॥ दुर्नाम

॥७३२॥

मकफवातामगरशोफघ्नरक्तमरुज्जित ॥ अथ सागनामगुणाः ॥ आरग्वोटः पीतफलकोभू
तावासः स्वरच्छदः ॥ आरग्वोटो रक्तपित्तास्रोवातश्लेष्मातिसारजित ॥ कफघ्नं मधुरं
रूक्षं कषायं शाकवल्कलं ॥ अथ चहरणनामगुणाः ॥ चहरणो चररणः सेतुस्तिक्तश्च
कः कुमारकः ॥ चहरणः पित्तलोमेदोश्लेष्मकृच्छ्राश्ममारुतान ॥ निहंति वातगुल्मार्शः
कृमीश्लेष्मोग्निदीपनः ॥ कषायः कटुको रूक्षो मधुरस्तिक्तको लघुः ॥ अथ मोषप
लास्य वर्यवर्तेव क्षस्तस्य नामगुणाः ॥ मोक्षस्तु मुष्ककोपि स्याद्रोलीढो गोतिहस्त
पा ॥ क्षारश्रेष्ठः क्षारवृक्षो द्विविधः श्वेतकृष्णकः ॥ मुष्ककः कटुकस्तिक्तोग्राही रू
क्षः कफवातहृत ॥ विषमेदोगुल्मकंडूवस्तिहृच्छुक्रकृमिप्रणुत ॥ अथ शमीनामगु
णाः ॥ शमी शक्तुफला तुंगा केशहंत्फला शिवा ॥ मंगल्यापतथा लक्ष्मीः शमीरः

॥७३८॥ सास्थिका स्मृता ॥ शमी तिक्ता कटुः शीता कषाया रेचनी लघुः ॥ कफकासभ्रमश्वासकुष्ठा
र्शःकृमिजित्स्मृता ॥ तत्फलं पित्तलं रूक्षं मेध्यं केशविनाशनं ॥ अथ सप्तपर्णनामगु
णाः ॥ सप्तपर्णो विशालत्वक् शारदो विषमछदः ॥ सप्तपर्णो व्रणश्लेष्मवातकुष्ठा
स्रजंतुजित ॥ दीपनः श्वासगुल्मघ्नः स्निग्धोष्णस्तुवरः सरः ॥ अथाम्रनामगुणाः
आम्रः प्रोक्तो रसालश्च सहकारोतिसौरभः ॥ कामांगो मधुदूतश्च माकंदः पिकवल्लभः
आम्रपुष्पमतीसारकफपित्तप्रमेहनुत ॥ आसृग्दुष्टिहरं शीतं रुचिकृद्ग्राहि वात
लं ॥ आम्रबीजं कषायं स्याछर्द्यतीसारनाशनं ॥ ईषदम्लं च मधुरं तथा हृदयदाहनुत
आम्रस्य पल्लवं रुच्यं कफपित्तविनाशनं ॥ तत्फलं बालमत्यम्लं रूक्षं दोषत्रयास्रकृ
त ॥ पक्वं तु मधुरं वृष्यं स्निग्धं हृद्यं बलप्रदं ॥ गुरु वातहरं रुच्यं वर्ण्यं शीतमपित्तलं ॥७३९॥

रसस्तस्य सरः स्निग्धो रोचनो बलवर्णकृत् ॥ आम्रो ग्राही प्रमेहास्रकफपित्तव्रणा
न् जयेत् ॥ शुष्कांमसोनुपानं स्यादाम्राणामतिभक्षणे ॥ जीरकं चाम्रपोक्तव्यं सह सौ
वर्चलेन च ॥ अथाम्रावर्त्तस्य तल्लक्षणं गुणाश्च ॥ पक्वस्य सहकारस्य पटे विस्तारितो
रसः ॥ धर्मशुष्को मुहुर्दत्त आम्रावर्त्त इति स्मृतः ॥ आम्रावर्त्तस्तृषाच्छर्दिवातपित्तह
रः सरः ॥ सूर्यांशुभिः पाकात् लघुश्च स हि कीर्त्तितः ॥ अथ फलरसनामगुणाः ॥ प
नसः कंटकीफलः फनसोतिबृहत्फलः ॥ पनसं शीतलं पक्वं स्निग्धं पित्तानिला
पहं ॥ तर्पणं बृंहणं स्वादु मांसलं श्लेष्मलं भृशं ॥ बल्यं शुक्रप्रदं हंति रक्तपित्तक्ष
तक्षयान् ॥ आमं तदेव विष्टंभि वातलं तु वरं गुरु ॥ पनसोद्भूतबीजानि वृष्याणि
मधुराणि च ॥ गुरूणि बद्धवर्चांसि सृष्टमूत्राणि संवदेत् ॥ अन्यच्च ॥ मज्जा प

णास्रजो वृष्यो वातपित्तकफापहः ॥ विशेषात्परणा संवर्ज्यं गुल्मिभिर्मन्दवन्हिभिः ॥ अथ
क्षुद्रपणसनामगुणाः ॥ लकुचः क्षुद्रपणसः प्रोक्तो लिकुचो डहरित्यपि ॥ आमलकुच
मुष्णं च गुरु विष्टंभकृत्तथा ॥ मधुरं च तथाम्लं च दोषत्रितयरक्तकृत ॥ शुक्राग्नि-
नाशनं चापि नेत्रयोरहितं स्मृतं ॥ सुपक्वं तत्तु मधुरमम्लं चानिलपित्तकृत ॥ कपा
यन्हिकरं रुच्यं वृष्यं विष्टंभकं च तत ॥ अथ कदलीनामगुणाः ॥ कदली वारणा बु-
सा रंभा मोचांशुमत्फला ॥ ऊरुस्तंभा गुच्छफला सुकुमारा सकृत्फला ॥ मोचाफलं
स्वादु शीतं विष्टंभि कफकृद्गुरु ॥ स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित ॥
पक्वं स्वादु हिमं पाके स्वादु वृष्यं च बृंहणं ॥ क्षुत्तृष्णानेत्रगदहृन्मेहघ्नं रुचिमांसकृ
त ॥ अथ चिर्भिटनामगुणाः ॥ चिर्भिटं धेनुदुग्धं च तथा गोरक्षकर्कटी ॥ चि

॥ ७३८ ॥

र्भिटं मधुरं रूक्षं गुरु पित्तकफापहं ॥ अन्तस्थं ग्राहि विष्टंभि पक्वं तत्स्यं च पित्तलं ॥ अ
थ नारिकेलनामगुणाः ॥ नारिकेलो दृढफलो लांगली कूर्चशीर्षकः ॥ तुंगस्कंधफ
लस्कंधो च्चवृक्षस्तृणराजः सदाफलः ॥ मंगल्यस्त्र्यंबकफलो दाक्षिणात्यो दुरारुहः ॥ ना
रिकेरफलं शीतं दुर्जरं बस्तिशोधनं ॥ विष्टंभि बृंहणं बल्यं वातपित्तास्रदाहहृत्ते ॥
विशेषतः कोमलनारिकेरं निहंति पित्तज्वरपित्तदोषान् ॥ तदेव जीर्णं गुरुपित्तको
रिविदाहि विष्टंभि मतं भिषग्भिः ॥ तस्यांभः शीतलं हृद्यं दीपनं शुक्रलं लघु ॥ पि
पासापित्तजित्स्वादु बस्तिशुद्धिकरं परं ॥ नारिकेरस्य तालस्य खर्जूरस्य शिरांसि
तु ॥ कषायस्निग्धमधुरबृंहणानि गुरूणि च ॥ खर्जूरं नारिकेरं स्यात्स्निग्धं गुरु च
दुर्जरं ॥ दाहविष्टंभदं रुच्यं च तवीर्यविवर्द्धनं ॥ खर्जूरं खोबरे इति भाषायां प्रसि

॥२४०॥

ॐ अथ कलिंगडेनाम गुणाः ॥ कालिंदं मांसलं फलं कलिंदं च सुवर्तुलं ॥ घण्टाफलं
चित्रफलं तदेव परिकीर्त्तितं ॥ कालिंदं मधुरं शीतं पित्तदाहश्रमापहं ॥ वृष्यं संतर्प
णं बल्यं कोष्ठशुद्धिकरं गुरु ॥ स्निग्धं स्वादुतरं शीतं वृष्यं पित्तानिलापहं ॥ तेषु पक्वा
म्लमधुरं सक्षारं च सान्द्रवेत ॥ रक्तपित्तकरं तत्तु मूत्रकृच्छ्रकरं परं ॥ अथ सुपारीना
म गुणाः ॥ घोंटा पूगश्च पूगी च गुवाकः क्रमुकोऽस्य तु ॥ फले पूगीफलं प्रोक्तं मु
द्वेगं च तदीरितं ॥ पूगं गुरु हिमं रूक्षं कषायं कफपित्तहृत ॥ मोहनं दीपनं रुच्यमा
स्यवैरस्यनाशनं ॥ आर्द्रं तद्गुर्वभिष्यंदि वह्निदृष्टिहरं स्मृतं ॥ स्विन्नं दोषत्रयच्छे
दि दृढमध्यं तदुत्तमं ॥ अपि च ॥ पूगं सन्मोहकृत्सर्वं कषायं स्वादु रेचनं ॥ त्रिदोष
शमनं रुच्यं कफक्लेदमलापहं ॥ अथ पानेनाम गुणाः ॥ तांबूलवल्ली तांबूली ॥२४०॥

नागिनी नागवल्लिरी ॥ भक्ष्यपत्री पर्णलता फणिवल्ली च कीर्तिता ॥ तांबूलं विशदं रु-
च्यं तीक्ष्णोष्णं तुवरं सरं ॥ वश्यं तिक्तं कटु क्षारं रक्तपित्तकरं लघु ॥ बल्यं श्लेष्मास्य
दौर्गंध्यमलवातश्रमापहं ॥ कृष्णं पर्णं तिक्तमुष्णं कषायं धत्ते दाहं वक्त्रजाड्यं।
मतं च ॥ शुभ्रं पर्णं श्लेष्मवातामयघ्नं पथ्यं रुच्यं दीपनं पाचनं च ॥ अथ कपित्थ
नामगुणाः ॥ कपित्थस्तु दधित्थः स्यात्तथा पुष्पफलः स्मृतः ॥ कपिप्रियो दधि
फलस्तथा दंतशठेपि च ॥ कपित्थमामं संग्राहि कषायं लघु लेखनं ॥ पक्वं गुरु तृ-
षाहिक्काशमनं वातपित्तजित ॥ स्वाद्वम्लं तुवरं कंठशोधनं ग्राहि दुर्जरं ॥ अपि च
कपित्थो मधुराम्लश्च कषायस्तिक्तशीतलः ॥ वृष्यः पित्तानिलं हंति संग्राहि व्र-
णनाशनः ॥ कपित्थमाममम्लोष्णं कफघ्नं ग्राहि वातलं ॥ अथ नारंगनामगु

॥७४१॥

गाः ॥ नारंगो नागरंगः स्यात्त्वक्सुगंधो मुखप्रियः ॥ ऐरावतो वक्त्रवासो गंधपत्रः सुरं-
गकः ॥ नारंगं मधुरं चाम्लं गुरूष्णं वातनाशनं ॥ वातामकफनिष्पूलघ्नं श्रमहृद्बलरोच-
कं ॥ अपरं त्वम्लमत्युष्णं दुर्जरं वातहृत्सरं ॥ अथ टेंटवहनाम गुणाः ॥ तिंदुकः स्फूर्जकः ॥
कालस्कंधश्चासितसारकः ॥ स्यादामं तिंदुकं ग्राहि वातलं शीतलं लघु ॥ पक्वं पित्तप्र-
मेहास्रश्लेष्मघ्नं मधुरं गुरु ॥ अथ काटेंटवहनाम गुणाः ॥ तिंदुकोन्यस्तु कथितो जत-
जो दीर्घपत्रकः ॥ कुपीलुः कुलकः कालपीलुकः कालतिंदुकः ॥ कपीलु शीतलं तिक्तं वा-
तलं मदकृल्लघु ॥ परं व्यथाहरं ग्राहि कफपित्तास्रनाशनं ॥ अथ जंबूनाम गुणाः ॥
महाजंबू राजजंबूर्महास्कंधा वहल्कला ॥ क्षुद्रजंबूः सूक्ष्मपत्रा नादेयी जलजंबुका ॥
राजजंबुफलं स्वादु विष्टंभि गुरु रोचनं ॥ क्षुद्रजंबूफलं तद्वद्गोषाद्दाहनाशनं ॥ अथ

॥७४१॥

वदरीनामगुणाः ॥ पुंसिस्त्रियांचकर्कंधुर्वदरीकोलमित्यपि ॥ फेनिलंकुवलंघोंटासौ
वीरंवदरंचतत् ॥ अजाप्रियाकुहाकोलिर्विषमोभयकंटकः ॥ तत्रवदरविशेषाणां
लक्षणांगुणाश्च ॥ वक्ष्यमानंसुमधुरंसौवीरंवदरंमहत् ॥ सौवीरंवदरंशीतंभेदनं
गुरुशुक्रलं ॥ बृंहणंपित्तदाहास्रक्षयतृष्णानिवारणं ॥ सौवीरात्तघुसपक्कंमधुरं
कोलमुच्यते ॥ कोलंतुवदरंग्राहिरुच्यमुष्णंचवातहृत् ॥ कफपित्तकरंचापिगुरुसार
कमीरितं ॥ कर्कंधुःक्षुद्रवदरंकथितंपूर्वसूरिभिः ॥ अम्लंस्यात्क्षुद्रवदरंकषायंमधु
रंमनाक् ॥ स्निग्धंगुरुचतिक्तंचवातपित्तापहंस्मृतं ॥ शुष्कंभेद्यग्निकृत्सर्वंलघुतृष्णा
क्लमास्रजित् ॥ वदरीपत्रलेपस्तुज्वरदाहविनाशनः ॥ त्वचाविस्फोटशमनीवीजंने
त्रामयापहं ॥ अपवलीनामगुणाः ॥ सुगंधमूलालवलीपांडुःकोमलवल्कला ॥

॥ ७४२ ॥

लवलीफलमस्रार्शःकफपित्तहरंगुरु ॥ विशदंरोचनंरूक्षंस्वादुलंतुवरंरसे ॥ अथकरौं
दीनामगुणाः ॥ करमर्द्दःसुषेणःस्यात्कृष्णपाकफलस्तथा ॥ तस्माद्ध्रस्वफलायातुसा
ज्ञेयाकरमर्द्दिका ॥ करमर्द्दद्वयंत्वाम्लंगुरुतृष्णाहरं ॥ उष्णंरुचिकरंप्रोक्तंरक्तपित्तक
फप्रदं ॥ तत्पक्वंमधुरंरुच्यंलघुपित्तसमीरजित ॥ अथचिरौंजीवृक्षस्यनामगुणाः ॥ प्रिया
लस्तुखरस्कंधश्चारोबहलवल्कलः ॥ राजादनंतापसेष्टःसन्नकद्रुर्धनुष्पटः ॥ चारः
पित्तकफास्रघ्नस्तत्फलंमधुरंगुरु ॥ स्निग्धंसरंमरुत्पित्तदाहज्वरतृषापहं ॥ प्रियाल
मज्जामधुरोवृष्यःपित्तानिलापहः ॥ हृद्योतिदुर्जरःस्निग्धोविष्टंभीचामवर्द्धनः ॥
अथखिरनीनामगुणाः ॥ राजादनंफलाध्यक्षोराजन्याक्षीरिकापिच ॥ क्षीरिका
याःफलंवृष्यंबल्यंस्निग्धंहिमंगुरु ॥ तृष्णामूर्छामदभ्रांतिक्षयदोषत्रयास्रजित ॥ ७४२ ॥

अथ कण्टाईनामगुणाः ॥ विकंकतः स्रुवावृक्षो ग्रंथिलः स्वादुकंटकः ॥ स एव यज्ञवृक्ष
श्च कंटकी व्याघ्रपादपि ॥ विकंकतफलं पक्वं मधुरं सर्वदोषजित् ॥ अथ कमलगटेना
मगुणाः ॥ पद्मवीजं तु पद्माक्षं गालोड्यं पद्मकर्कटी ॥ पद्मवीजं हिमं स्वादु कषायं तिक्त
कं गुरु ॥ विष्टंभि वृष्यं रूक्षं च गर्भसंस्थापकं परं ॥ कफवातकरं बल्यं ग्राहि पित्तास्रदा
हनुत् ॥ अथ मखानेनामगुणाः ॥ मखान्नं पद्मवीजाभं पानीयफलमित्यपि ॥ मखा
न्नं पद्मवीजस्य गुणैस्तुल्यं विनिर्दिशेत् ॥ अथ सिंगाडेनामगुणाः ॥ शृंगाटकं जलफ
लं त्रिकोणफलमित्यपि ॥ शृंगाटकं हिमं स्वादु गुरु वृष्यं कषायकं ॥ ग्राहि शुक्रानिल
श्लेष्मप्रदं पित्तास्रदाहनुत् ॥ अथ पकुंदफलनामगुणाः ॥ उक्तं कुमदवीजं तु बुधैः
कैरविणीफलं ॥ भवेत्कुमद्वतीवीजं स्वादु रूक्षं हिमं गुरु ॥ अथ मकुयानामगुणाः

७४३

मधूकोगुडपुष्पःस्यान्मधुवृक्षोमधुस्रवः ॥ वानप्रस्थोमधुष्ठीलोजलजेत्रमधूलकः
मधूकपुष्पंमधुरंशीतलंगुरुबृंहणं ॥ बलशुक्रकरंप्रोक्तंवातपित्तविनाशनं ॥ फलं
शीतंगुरुस्वादुशुक्रलंवातपित्तनुत् ॥ अहृद्यंहंतितृष्णास्रदाहश्वासक्षतक्षयान्
अथपरूषकस्यनामगुणाः ॥ परूषकंतुपरूषमल्पास्थिचपरापरं ॥ परूषकंकषायाम्ल
मामंपित्तकरंलघु ॥ तत्पक्वंमधुरंपाकेशीतंविष्टंभिबृंहणं ॥ हृद्यंतृट्पित्तदाहास्र
ज्वरक्षयसमीरहृत् ॥ अथसेतूतनामगुणाः तूदस्तूलश्चयूपश्चक्रमुकोब्रह्मदारु
च तूदंपक्वंगुरुस्वादुहिमंपित्तानिलापहं ॥ तदेवामंगुरुसरमम्लोष्णंरक्तपित्तकृत् ॥
अथप्राचीनामलकनामगुणाः ॥ प्राचीनामलकंप्रोक्तंपानीयामलकंस्मृतं ॥ प्राचीना
मलकंदोषत्रयजिद्वरघातिच ॥ अथअनारनामगुणाः ॥ दाडिमःकरकोदंत

७४३

बीजो लोहितपुष्पकः ॥ मधुवीजः कुचफलो रोचनः शुकवल्लभः ॥ तत्फलं त्रिविधं स्वा
दु स्वादम्लं केवलाम्लकं ॥ स्वाद्वम्लं दीपनं रुच्यं स्निग्धं पित्तकरं लघु ॥ अम्लं तु पित्तजन
कमुष्णं वातकफापहं ॥ स्वादु पथ्यं तापहारि दोषत्रयविनाशनं ॥ शुष्काम्लं दाडिमीसा
रः कुट्टिमो वातपित्तकृत ॥ अथ गुंदीनामगुणाः ॥ बहुवारस्तु शीतः स्याद् द्दालो द्वि
जकुत्सितः ॥ श्लेलुः श्लेष्मातकं श्मायि पिच्छिलो भूतवृक्षकः ॥ बहुवारो विषस्फोटव्र
णवीसर्पकुष्ठनुत ॥ मधुरस्तुवरस्तिक्तः केश्यश्च कफपित्तहृत ॥ फलमामं तु विष्टं
भि रूक्षं पित्तकफास्रजित ॥ तत्पक्वं मधुरं स्निग्धं श्लेष्मलं शीतलं गुरु ॥ अथ कतक
फलनामगुणाः ॥ पयः प्रसादि कतकं कतकं कतफलं च तत ॥ कतकस्य फलं नेत्र्यं जल
निर्मलताकरं ॥ वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥ अथ द्राक्षानामगुणाः ॥

॥७४४॥

द्राक्षास्वादुफलाप्रोक्तातथामधुरसापिच ॥ मृद्वीकाहारहूराचगोस्तनीचापिकीर्त्तिता ॥
द्राक्षापक्कासराशीताचक्षुष्याबृंहणीगुरुः ॥ स्वादुपाकरसास्वर्यातुवरासृष्टमूत्र
विट् ॥ कोष्ठमारुतकृद्वृष्याकफपुष्टिरुचिप्रदा ॥ हंतितृष्णाज्वरश्वासवातवातास्रका
मलाः ॥ कृच्छ्रास्रपित्तसंमोहदाहशोषमदात्ययान् ॥ आमासाल्पगुणागुर्वीसैवा
म्लारक्तपित्तकृत् ॥ वृष्यास्याद्गोस्तनीद्राक्षागुर्वीचकफपित्तनुत् ॥ अबीजान्यास्वल्प
तरागोस्तनीसदृशीगुणैः ॥ द्राक्षापर्वतजालघ्वीसाम्लाश्लेष्माम्लपित्तकृत्द्राक्षाप
र्वतजायादृक्तादृशीकरमर्द्दिका ॥ अथखर्जूरीत्रयनामगुणाः ॥ भूमिखर्जूरिका
स्वाद्वीदुरारोहामृदुच्छदा ॥ तथास्कंधफलाकाककर्कटीस्वादुमस्तका ॥ पिंडखर्जूरि
कात्वन्यासादेशेपश्चिमेभवेत् ॥ खर्जूरीगोस्तनाकारापरद्वीपादिहागता ॥ जा ॥७४४॥

पतेपश्चिमेदेशेसाछोहारेतिकीर्त्यते ॥ खर्जूरीत्रितयंशीतंमधुरंरसपाकयोः ॥ स्निग्धंरु
चिकरंहृद्यंक्षतक्षयहरंगुरु ॥ तर्पणंरक्तपित्तघ्नंपुष्टिविष्टंभशुक्रदं ॥ कोष्ठमारुतहृद्बल्यं
वांतिवातकफापहं ॥ ज्वरातिसारक्षुत्तृष्णाकासश्वासनिवारकं ॥ मदमूर्छामरुत्पित्तम
द्योद्भूतगदांतकृत ॥ महतीभ्योगुणैरल्पास्वल्पाखर्जूरिकास्मृता ॥ स्तनेपालीतुमृदुलाव
लिहीनफलाचसा ॥ स्तनेपालीश्रमभ्रांतिदाहमूर्छास्रपित्तहृत ॥ रयंपिंडंखर्जूरीमदः
खर्जूरीतरुतोयंतुमदपित्तकरंभवेत ॥ वातश्लेष्महरंरुच्यंदीपनंबलशुक्रकृत ॥ अथ
वदामनामगुणाः ॥ वातादोवातवैरीस्यान्नेत्रोपमफलस्तथा ॥ वातादउष्णःसुस्नि
ग्धोवातघ्नःशुक्रकृद्गुरुः ॥ वातादमज्जामधुरोवृष्यःपित्तानिलापहः ॥ स्निग्धोष्णःक
फकृन्नेष्टोरक्तपित्तविकारिणां ॥ अथचिलगोजेपिस्तेनामगुणाः ॥ निकोचकंदा

हृत्फलं संकोचमलगोजकं ॥ पिस्तं मुकूलकं ज्ञेयं दंतीफलसमाकृति ॥ निकोचकं गुरु स्नि
ग्धं वृष्योष्णं स्वादु बृंहणं ॥ रक्तप्रसादनं बल्यं वातघ्नं कफपित्तकृत् ॥ तद्वन्मुकूलकं ज्ञे
यं विशेषाद्गुरु दुर्जरं ॥ अथ पीलुनामगुणाः ॥ पीलुर्गुडफलः स्रंसी तत्पर्णा शीतफलोपि
च ॥ पीलुः श्लेष्मसमीरघ्नं पित्तलं भेदि गुल्मनुत् ॥ स्वादु तिक्तं च यत्पीलु तन्नात्युष्णं त्रि
दोषहृत् ॥ अथ आखरोटनामगुणाः ॥ पीलुः शैलभवोक्षोटः कंदरालश्च कीर्तितः ॥
कीरेष्टः पार्वतीयश्च फलस्नेहो गुडाशयः ॥ आक्षोटो मधुरो बल्यः स्निग्धोष्णो वा
तपित्तनुत् ॥ रक्तदोषप्रशमनः शीतलः कफकोपनः ॥ अथ सेवनामगुणाः ॥ मु
ष्टिप्रमाणं बदरं सेवं सिंचितिकाफलं ॥ सेवं समीरपित्तघ्नं बृंहणं कफकृद्गुरु ॥
रसे पाके च मधुरं शिशिरं रुचिशुक्रकृत् ॥ अथ नासपातीनामगुणाः ॥ अमृ

तफलं लघु वृष्यं स्यादुष्णी न्हरेद्दोषान् ॥ देशे शुभ्रदलानां च फलं तद्दृश्यते लोकैः ॥ अथ
बीजोरानामगुणाः ॥ बीजपूरो मातुलुंगो रुचकः फलपूरकः ॥ बीजपूरफले स्वादु रसे
म्लं दीपनं लघु ॥ रक्तपित्तहरं कंठ्यं जिह्वाहृदयशोधकं ॥ श्वासकासारुचिहरं तृष्ण
तृष्णाहरं स्मृतं ॥ अथ निंबु बीजपूरनामगुणाः ॥ बीजपूरोपरः प्रोक्तो मधुरो मधुक
र्कटी ॥ मधुकर्कटिका स्वाद्वी रोचनी शीतला गुरुः ॥ रक्तपित्तक्षयश्वासकासहिक्का
भ्रमापह ॥ अथ जंबीरद्वयनामगुणाः ॥ स्याज्जंबीरो दंतशठो जंभजंभीरजंभलाः ॥ जंबी
रमुष्णं गुरु चाम्लं वातश्लेष्मविबंधनुत् ॥ शूलकासकफोत्क्लेशछर्द्दितृष्णामदोषजित्
आस्यवैरस्यहृत्पीडावह्निमांद्यकृमीन्हरेत् ॥ स्वल्पजंबीरिका तद्वत् तृष्णाछर्द्दिनि
वारिणी ॥ अथ साकरनिंबुनामगुणाः ॥ अन्यो मधुरजंबीरः पित्तहृवीप्रकीर्त्तितः

मधुरो मधुजंबीरः शिशिरः कफपित्तनुत ॥ शोकघ्नस्तर्परोगोवद्व्यः अम्लमद्यः पुष्टि
कारकः ॥ अथ निंबूनामगुणाः ॥ निंबूः स्त्री निंबुकं क्लीबे निंबूकमपि कीर्त्यते ॥
दंताघातं जंतुमारितदेव परिकीर्त्तितं ॥ निंबूफलं प्रथितमम्लरसं कटूष्णं गुल्मा
मवातहरमग्निविवृद्धिकारि ॥ चक्षुष्यमेतदपकासकफार्तिकंठविछर्दिहा
रि परिपक्कमतीवरुच्यं ॥ त्रिदोषवन्हिक्षयवातरोगनिपीडितानां विषविक्लु
सानां ॥ मलग्रहे वद्धगुदे प्रदेयं विशूचिकायां मुनयोवदंति ॥ अथ कमरषनामगु
णाः ॥ कर्मारः कर्मकः पीतफलो धाराफलश्च सः ॥ कर्मारकोम्लउष्णश्च वात
हृत्पित्तकारकः ॥ पक्कस्तु मधुराम्लः स्याच्छीतलो बलपुष्टिदः ॥ अथ चिंचानाम
गुणाः ॥ अम्लिका चुक्रिकाम्लीका चुक्रा दंतशठापि च ॥ अम्लाच चिंचिका

चिंचातिंतिडीका च तिंतिडी ॥ अम्लिकामा गुरुर्वातहरी पित्तकफास्रकृत ॥ पक्का तु
दीपनी रूक्षा सरोष्णा कफवातनुत ॥ चिंचापत्रं तु शोफघ्नं रक्तदोषव्यथापहं ॥
तस्य शुष्कत्वग्भस्माक्षां तृष्णूलमंदाग्निनाशनं ॥ चिंचासारस्तु चिंचाम्लं चुक्राम्लं चो
म्लचुक्रिका ॥ चिंचासारस्त्वतीवाम्लो वातघ्नः कफदाहकृत ॥ साम्येन शर्करामि
श्रो दाहपित्तकफार्त्तिजित ॥ अथाम्लवेतनामगुणाः ॥ स्यादम्लवेतसश्चुक्रः शत
वेधी सहस्रभित ॥ अम्लवेतसमत्यम्लं कषायोष्णं च वातजित ॥ कफार्शःघ्नमगु
ल्मघ्नःमरोचकहरं परं ॥ कफवातामयध्वंसी छागमांसद्रवत्वकृत ॥ अथ तिंतडी
कनामगुणाः ॥ वृक्षाम्लं तिंतडीकं च चुक्रं स्यादम्लवृक्षकं ॥ शाकाम्लमम्लपूरं चा
श्रेष्ठाम्लं तिंतडीफलं ॥ वृक्षाम्लमाममम्लोष्णं वातघ्नं कफपित्तलं ॥ पक्वं तु गुरु सं

॥७४१॥

ग्राहिकटुकंतुवरंलघु ॥ आम्फलंरोचनंरूक्षंदीपनंकफवातजित् ॥ तत्पक्वंगुरुहरीतगु
लंमधुरहृद्रोगतंतुजित् ॥ अथचतुरम्लपंचाम्लयोर्लक्षणं ॥ अम्लवेतसवृक्षाम्लव
हृज्जंवीरनिंबुकैः ॥ चतुरम्लंहिपंचाम्लंवीजपूरयुतैर्भवेत् ॥ अथलघुकाकडीवालम
काकडीनामगुणाः ॥ कर्कटीलोमसीवालापैर्वीरूर्वात्फला ॥ कर्कटीशीतलारूक्षाग्रा
हिणीमधुरागुरुः ॥ रुच्यापित्तहरासामापक्कोष्णापित्तवन्हिकृत् ॥ त्रपुसंकंटकिल

तास्रधावासोपरंस्मृतं ॥ छर्द्दिपर्णीमूत्रलामूत्रलाहस्तिपर्णिनी ॥ त्रपुसंमूत्रलंशी ३फ
तंरूक्षंपित्ताश्मकृच्छ्रजित् ॥ तत्पक्वमुष्णमम्लंस्यात्पित्तलंकफवातजित् ॥ अथांजी
रनामगुणाः ॥ अंजीरमंजिलंगोहकाकोदुंवरिकाफलं ॥ अंजीरंशीतलंस्वादुगुरु
पित्तास्रवातजित् ॥ तस्मादस्यगुणंज्ञेयमजीरंलघुतद्गुणैः ॥ अथपक्वमलनाम ॥७४१॥

गुणाः ॥ वा पुंसि पद्मं नलिनमरविंदं महोत्पलं ॥ सहस्रपत्रं कमलं शतपत्रं कुशेशयं ॥
पंकेरुहं तामरसं सारसं सरसीरुहं ॥ विशप्रसूनराजीवपुष्कराम्भोरुहाणि च ॥ कम
लं शीतलं वर्ण्यं मधुरं कफपित्तजित ॥ तृष्णादाहास्रविस्फोटविषवीसर्पनाशनं ॥
विशेषतः सितं पद्मं पुंडरीकमिति स्मृतं ॥ रक्तं कोकनदं ज्ञेयं नीलमिंदीवरं स्मृतं ॥
धवलं कमलं शीतं मधुरं कफपित्तजित ॥ तस्मादल्पगुणं ज्ञेयं किंचिद्रक्तोत्पला
दिकं ॥ अथ पद्मिनीनामगुणाः ॥ मूलनालदलोत्फुल्लफलैः समुदिता पुनः ॥ पद्मि ल
नी प्रोच्यते प्राज्ञैर्बिसिन्यादिश्च सा स्मृता ॥ आदिशब्दान्नलिनीकमलिनीत्यादि
पद्मिनी शीतला गुर्वी मधुरा लवणा च सा ॥ पित्तासृक्कफनुद्रूक्षा वातविष्टंभ
कारिणी ॥ अथ नवपत्रादिनामगुणाः ॥ संवर्तिका नवं दलं बीजकोशो ब्जकर्णि

॥७४८॥

का ॥ किंजल्कः केसरः प्रोक्तः शृंगाये पद्मापि स स्मृतः ॥ पद्मनालं मृणालं स्यात्तथा वि
समिति स्मृतं ॥ पद्मादिमूलं शालूकं शालीनं करहाटकं ॥ संवर्त्तिका हिमा तिक्ता कषा
या दाहतृट्प्रणुत् ॥ मूत्रकृच्छ्रगुदव्याधिरक्तपित्तविनाशिनी ॥ पद्मस्यैकर्णिका ति
क्ता कषाया मधुरा हिमा ॥ मुखवैशद्यकृद्धृद्य शीत स्यात्सकफपित्तनुत् ॥ किंजल्कः
शीतलो रूक्षः कषायो ग्राहको पि सः ॥ कफपित्ततृषादाहरक्तार्शोविषशोथजित् ॥ मृ
णालं शीतलं वृष्यं पित्तदाहास्रजिद्गुरु ॥ दुर्जरं स्वादु पाकं च स्तन्यानिलकफप्रदं ॥
संग्राहि मधुरं रूक्षं शालूकमपि तद्गुणं ॥ अथ स्थलकमलनामगुणाः ॥ पद्मचारि
णी अतिचराव्यथा पद्मा च चारिटी ॥ पद्मा तु स्याल्लघुः श्लेष्मकृच्छ्रजित्स्तनदार्ढ्यकृ
त् ॥ अथ कुमुदनामगुणाः ॥ श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं तथा ॥ कुमुदं पिच्छिलं ७४८ ॥

स्निग्धं मधुरं ल्हादि शीतलं ॥ अथ कुंभिकाशैवालनामगुणाः ॥ कुंभिका वारिपर्णी।
स्याच्छैवालं शैवलं च तत् ॥ वारिपर्णी हिमा तिक्ता लघ्वी स्वाद्वी सरा पटुः ॥ दोषत्रय
करी रूक्षा प्रोक्ता शोणितज्वरशोषकृत ॥ शैवालं तु वरं तिक्तं मधुरं शीतलं लघु ॥ स्निग्धं दा
हतृषापित्तरक्तज्वरहरं परं ॥ अथ सेवंतीगुलाबनामगुणाः ॥ शतपत्री तरुण्युक्ता
कर्णिका चारुकेसरा ॥ महाकुमारी गंधाढ्या लाक्षापुष्पातिमंजुला ॥ शतपत्री हि
मा हृद्या ग्राहिणी शुक्रला लघुः ॥ दोषत्रयास्रजिद्वर्ण्या तिक्ता कट्वी च पाचनी ॥
अथ नेवालीनामगुणाः ॥ वासंती कथिता तज्ज्ञैः सप्तला नवमालिका ॥ वासंती शी
तला लघ्वी तिक्ता दोषत्रयास्रजित ॥ अथ चवेलीनामगुणाः ॥ जातिर्जाती च सुम
ना मालती राजपुत्रिका ॥ चेतिका हृद्यगंधा च सा पीता स्वर्णजातिकी ॥ जातीयु

गं तिक्तमुष्णं तु वरं लघु दोषजित् ॥ शिरोक्षिमुखदंतार्त्तिविषकुष्ठव्रणास्रजित् ॥ अभि
धानचिंतामणौ तु मालती शीततिक्ता स्यात्कफघ्नी मुखपाकनुत् ॥ कुड्मलं नेत्ररोगघ्नं
व्रणविस्फोटकुष्ठजिदित्युक्तं रदमेव प्रोक्तमिति प्रतिभाति ॥ अथ जूहीनामगुणाः
यूथिका गणिकांबष्ठा सा पीता हेमपुष्पिका ॥ यूथीयुगं हिमं तिक्तं कटु पाकरसं ल
घु ॥ मधुरं तु वरं हृद्यं पित्तघ्नं कफवातलं ॥ व्रणास्रमुखदंताक्षिशिरोरोगविषापहं
अथ मोगरानामगुणाः ॥ मुद्गरो गंधसारस्तु गंधराजो विटप्रियः ॥ मुद्गरो मधुरः
शीतः सुरभिः सौख्यदायकः ॥ मनोज्ञो मधुपानंदकारी पित्तप्रकोपहृत् ॥ अथ वे
लमोगरानामगुणाः ॥ मल्लिका मदयंती च शीतभीरुस्त्रिभूपदी ॥ मल्लिकोष्णा लघु
र्वृष्या तिक्ता च कटुका हरेत् ॥ वातपित्तास्यदृग्व्याधिकुष्ठारुचिविषव्रणान् ॥

अथवटमोगरानामगुणाः ॥ मल्लिकामोदिनीचान्यावटपत्राकुमारिका ॥ सुगंधाब्जा
वृत्तपुष्पामुक्ताभावृत्तमल्लिका ॥ नेत्ररोगापहंत्रीस्यात्कटुःस्याद्वृत्तमल्लिका ॥ व्रण
घ्नीगंधबहुलादारयत्यास्यजान्गदान् ॥ अथचंपानामगुणाः ॥ चांपेयश्चंपकःप्रो
क्तोहेमपुष्पश्चसस्मृतः ॥ एतस्यकलिकागंधफलीतिकथिताबुधैः ॥ चंपकःकटु
कस्तिक्तःकषायोमधुरोहिमः ॥ विषकृमिहरःकृच्छ्रकफवातास्रपित्तजित् ॥ अथब
कुलनामगुणाः ॥ बकुलोमधुगंधश्चसिंहकेसरकस्तथा ॥ बकुलस्तुवरोऽनुष्णःकटु
पाकरसोगुरुः ॥ कफपित्तविषश्वित्रकृमिदंतगदापहः ॥ अथकदंबनामगुणाः ॥
कदंबप्रियकोनीपोवृत्तपुष्पोहलिप्रियः ॥ कदंबोमधुरःशीतःकषायोलवणोगु
रुः ॥ शुक्रवृद्धिकदोवातनाशनःकफपित्तहृत् ॥ अथकेतकीनामगुणाः ॥ केतकः

॥७५०॥

सूचिकापुष्पोजंबुकः क्रकचछदः ॥ सुवर्णकेतकीचान्यालघुपुष्पासुगंधिकोनी ॥ केतकीकुसुमंवर्ण्यंकेशदौर्गंध्यनाशनं ॥ हेमाभंमदनोन्मादवर्द्धनंसौख्यकारिच ॥ तस्याः स्तनोतिशिशिरःकटुःपित्तकफापहः ॥ रसायनकरोवल्योदेहदार्ढ्यकरःपरः ॥ अथ कर्णिकारनामगुणाः ॥ कर्णिकारःपरिव्याधपादपोत्पल इत्यपि ॥ कर्णिकारःकटुःतिक्तःसुपरःशोधनोलघुः ॥ रंजनःसुखदःशोफश्लेष्मास्रव्रणकुष्ठजित ॥ अथकोरंटानामगुणाः ॥ सैरेयकःश्वेतपुष्पःसैरेयःकटसारिका ॥ सहाचरःसहचरःसहिष्णुंचापिकथ्यते ॥ कुरंटकोत्रपीतःस्याद्रक्तःकुरवकःस्मृतः ॥ नीलेवाणो द्वयोरक्तोदसआर्त्तगलस्त्वसः ॥ सैरेयःकुष्ठवातास्रकफकंडुविषापहः ॥ तिक्तो ष्णोमधुरोदंताःसुस्निग्धःकेशरंजनः ॥ अथकुंदनामगुणाः ॥ कुंदंतुकेथितंमा

॥७५०॥

ध्येसदापुष्पंचतास्मृतं ॥ कुंदःशीतंलघुश्लेष्मशिरोरुग्विषपित्तनुत् ॥ अथमुचकुंदना
मगुणाः ॥ मुचकुंदःक्षत्रवृक्षश्चित्रकःप्रतिविष्णुकः ॥ मुचकुंदःशिरःपीडापित्तास्र
विषनाशनः ॥ अथप्तासवननामगुणाः ॥ ओड्रपुष्पंजपाचाथत्रिसंध्यासारुणा
सिता ॥ जपासंग्राहिणीकेश्यात्रिसंध्याकफवातजित् ॥ अथसिंदूरीनामगुणाः
सिंदूरीरक्तबीजाचरक्तपुष्पासुकोमला ॥ सिंदूरीविषपित्तास्रतृष्णावांतिहरीहि
मा ॥ अथागस्तिनामगुणाः ॥ अगस्त्योहोवंगसेनोमुनिपुष्पोमुनिद्रुमः ॥ व्रणारिः
शीघ्रपुष्पःस्याद्वक्रपुष्पःसुरप्रियः ॥ अगस्तिःपित्तकफजिच्चातुर्थिकहरोहिमः
रूक्षोवातकरस्तिक्तःप्रतिश्यायंनिवारणः ॥ अथतुलसीनामगुणाः ॥ तुलसीसुर
साग्राम्यासुलभावहुमंजरी ॥ अपेतराक्षसीगौरीभूतघ्नीदेवदुंदुभिः ॥ तुलसीक

॥७५१॥

रुक्कांतिकृत् हृद्योस्त्रादाहपित्तकृत् ॥ दीपनीकुष्ठकृच्छ्रास्रपार्श्वरुक्कफवातजित् ॥ पुन्का
कुहमाच तुलसीगुणैस्तस्याप्रकीर्तिता ॥ अथ मरुवागुणाः ॥ मरुतको मरुवको मरुन्म
रुरपिस्मृतः ॥ फणीफणिज्जकश्चापि प्रस्थपुष्पः समीरणः ॥ मरुदग्निप्रदो हृद्यस्ती
क्ष्णोस्रः पित्तलो लघुः ॥ वृश्चिकादिविषश्लेष्मवातकुष्ठक्रिमिप्रणुत् ॥ अथ दवनाना
मगुणाः ॥ उक्तो दमनको दांतो मुनिपत्रस्तपोधनः ॥ गंधोत्कटो ब्रह्मजटी विनीतः कुल
पत्रकः ॥ दमनस्तुवरस्तिक्तो हृद्यो वृष्यः सुगंधकः ॥ ग्रहनुद्विषकुष्ठास्रक्लेदकंडूत्रिदो
षजित् ॥ अथ बर्बरीनामगुणाः ॥ बर्बराकबरीतुंगी खरपुष्पाजगंधिका ॥ पर्णासस्त
त्रकृष्णे तु कटिंजरकुठेरकौ ॥ तत्रशुक्लेर्जकः प्रोक्तो वटपत्रस्ततोपरः ॥ बर्बरात्रितयं रू
क्षं मुहृद्यं कटु विदाहि च ॥ तीक्ष्णं रुचिकरं हृद्यं दीपनं लघु पाकि च ॥ पित्तलं कफवा

॥७५१॥

तास्रः दद्रूकृमिविषापहं ॥ अथ पटोलनामगुणाः ॥ पटोलं कुलकस्तिक्तः पांडुकः कर्क
शछदः ॥ राजनामामृतफलः कुष्ठारिः कासमर्द्दनः ॥ पटोलं पाचनं हृद्यं वृष्यं लध्वा
ग्निदीपनं ॥ स्निग्धोष्णं हंति कासास्रज्वरदोषत्रयकृमीन् ॥ पटोलस्य भवेन्मूलं विरे
चनकरं सुखाद ॥ नालं श्लेष्महरं पत्रं पित्तहारि फलं पुनः ॥ दोषत्रयहरं प्रोक्तं तद्वति
क्तं पटोलकं ॥ अथ कटुतुंबीनामगुणाः ॥ कटुतुंबी कटुफला इक्ष्वाकुः कटुतुंबिनी ॥
कटुतुंबी कटुस्तीक्ष्णा वांतिकृत् श्वासवातजित् ॥ कासघ्नी शोधनी शोफव्रणाश्रू
लविषापहा ॥ अथ कोशातकीनामगुणाः ॥ कोशातकी कृतछिद्रा जालिनी कृतवेध
ना ॥ क्ष्वेडा सुतिक्ता घंटाली मृदंगफलनी तथा ॥ कोशातकी तु शिशिरा कटुकाल्प
कषायका ॥ पित्तवातकफघ्नी च मलाध्मानविशोधनी ॥ अथ कुचिलानामगुणाः

कारस्करस्तु किंपाको विषमुष्टिर्विषद्रुमः ॥ गरद्रुमो रम्यफलः कुपाकः कुलकेटकः कार-
स्करः कटूष्णश्च तिक्तः कुष्ठविनाशनः ॥ वातामयास्रकंडूतिकफवातव्रणापहः ॥
अथ पिंडारनामगुणाः ॥ महापिंडीतरुः प्रोक्तः श्वेतपिंडीतकश्च सः ॥ करहाटः क्षु-
द्रश्चैव शस्त्रकोशतरुस्तथा ॥ पिंडीतरुः कषायोष्णस्त्रिदोषशमनोऽपि च ॥ चर्मरोगा-
पहश्चैव विशेषाद्रक्तरोगजित् ॥ अथ भूतांकुशनामगुणाः ॥ भूतांकुशः क्षयस्ती-
क्ष्णो भूतद्रावी क्षुरस्तथा ॥ भूतांकुशः तीव्रगंधः कषायोष्णः कटुस्तथा ॥ भूतग्रहादि-
दोषघ्नः कफवातनिकृंतनः ॥ अथ रुद्रजटानामगुणाः ॥ रुद्रा रुद्रजटा रौद्री रुद्राणी
च महाजटा ॥ रुद्रा कटूष्णा सक्षारा सकासहृद्रोगनाशिनी ॥ भूतविद्रावणी चैव रक्ष-
सां च निवर्हणी ॥ अथ रुद्रवंतीनामगुणाः ॥ स्याद्रुदंती स्रवत्तोया च रणपत्रा सुधा

७५२

श्रृशा ॥ हृदंतीकटुतिक्तोष्णाकषायाश्मविनाशिनी ॥ रक्तपित्तकफश्वासमेहहारीरसाय
नी ॥ अथपेक्षलिंगीनीनामगुणाः ॥ लिंगिनीबहुपत्रीस्यादीश्वरीशिवबल्लिका ॥ स्वयं
भूलिंगसंभूतालैंगीचित्रफलाचसा ॥ लिंगिनीकटुरुष्णाचदुर्गंधाचरसायनी ॥ सर्व
सिद्धिकरीदिव्यावश्यारसनियामिनी ॥ अथरुद्राक्षनामगुणाः ॥ रुद्राक्षंचशिवा
क्षंचशर्वाक्षंभूतनाशनं ॥ पावनंनीलकंठाक्षंहराक्षंचशिवप्रियं ॥ रुद्राक्षमम्लमु
ष्णंचवातघ्नंकफनाशनं ॥ शिरोर्त्तिशमनंरुच्यंभूतग्रहविनाशनं ॥ अथमहाराष्ट्री
नामगुणाः ॥ महाराष्ट्रीतुसंप्रोक्ताशारदीतोयवल्लरी ॥ तरणीशीतावहुशिखाप्राण
दाशाकुलादनी ॥ महाराष्ट्रीकटुस्तीक्ष्णाकषायामलशोधिनी ॥ व्रणकीटादिदोष
घ्नीरसदोषनिबर्हणी ॥ अथकालांजनीनामगुणाः ॥ कालांजनीचरुक्षाभारेच

॥७५३॥

नीचासितांजनी ॥ कालांजनीकटूष्णाचमत्तामकृमिशोधनी ॥ अपामार्गशमनीजठ
रामयहारिणी ॥ अथकंथारीनामगुणाः ॥ कंथारीकंथरीकंथादुर्धर्षातीक्ष्णकंटका
कंथारीकटुतिक्तोष्णाकफवातनिकृंतनी ॥ शोफघ्नीदीपनीरुच्यारक्तग्रंथिरुजापहा
अथगंगापत्रीनामगुणाः ॥ गंगापत्रीसुपत्रीस्यात्सुगंधागंधपत्रिका ॥ गंगाप
त्रीकटूष्णाचवातजिद्व्रणरोपणी ॥ अथमाषफलनामगुणाः ॥ माषाफलंमाषि
फलंचमाषिकाछिद्राफलंमाषिचपंचनायकं ॥ माषाफलंवातहरंकटूष्णकं
पतंगसंकोचनकेशकार्ष्ण्यदं अथचवलाईनामगुणाः ॥ तंदुलीयोमेघनादः
कांडेरस्तंदुलेरकः ॥ भंडीरस्तंदुलीबीजोविषघ्नोल्पमारिषः ॥ तंदुलीयोलघुः
शीतोरूक्षःपित्तकफास्रजित् ॥ सृष्टमूत्रमलोरुच्योदीपनोविषहारकः ॥ ॥७५३॥

अथकंचटजलचवलाईनामगुणाः ॥ पानीयतंदुलीयोयस्तत्कंचटमुदाहृतं ॥ कंच
टंतिक्तकंरक्तकंरक्तपित्तानिलाहरंलघु ॥ अथवास्तूकद्वयनामगुणाः ॥ वास्तूकं
वास्तुकंचस्यात्क्षाररपत्रंचशाककराट् ॥ तदेवतुबृहत्पत्रंरक्तंस्याद्गौडवास्तुकं ॥ प्रा
यश्शोयवमध्यंस्याद्यवशाकमतःस्मृतं ॥ वास्तुकद्वितयंस्वादुक्षारंपाकेकटुदिप्तं
दीपनंपाचनंरुच्यंशीतंशुक्रवलप्रदं ॥ सरंप्लीहास्रपित्तार्शःकृमिदोषत्रयाप
हं ॥ अथपोईनामगुणाः ॥ पोतक्युपोदिकासातुमालवेडमृतवल्लरी ॥ पोतकी
शीतलास्निग्धाशीतलावातपित्तनुत् ॥ वलदारुचिकृत्पथ्यावृंहणीतृप्तिकारि
णी ॥ अथपालक्यानामगुणाः ॥ पालंक्यावास्तुकाकाराछुरिकाचीरितच्छदा
पालंक्यावातलाशीताश्लेष्मलाभेदिनीगुरुः ॥ विष्टंभिनीमदश्वासपित्त

७५४

रक्तविषापहा ॥ अथ कालशाकनामगुणाः ॥ नाडीकं कालशाकं च श्राद्धशाकं च कालकं ॥
कालशाकं सरं रुच्यं वातकृत्कफशोफहृत ॥ बल्यं रुचिकरं मेध्यं रक्तपित्तहरं हिमं
अथ लोणीनामगुणाः ॥ लोणा लोणी च कथिता बृहल्लोणी तु घोलिका ॥ लोणारू-
क्षा गुरुः कट्वी वातश्लेष्महरी पटुः ॥ अर्शोघ्नी दीपनी चाम्ला मंदाग्निविषनाशिनी
घोलिकाम्ला सरूक्षोष्णा वातहृत्कफपित्तकृत ॥ त्वग्दोषव्रणगुल्मघ्नाश्वासकास
प्रमेहनुत ॥ शोफे लोचनरोगे च हिता तज्ज्ञैरुदाहृता ॥ अथ चांगेरीनामगुणाः ॥
चांगेरी चुक्रिका दंतशठांबष्ठाम्ललोणिका ॥ अश्मंतकस्तु शफरी कुशली चाम्लप
त्रकः ॥ चांगेरी दीपनी रुच्यालघूष्णा कफवातनुत ॥ पित्तलाम्ला गृहण्यर्शःकु
ष्ठातीसारनाशिनी ॥ अथ चूक्रानामगुणाः ॥ चुक्रिका स्यात्तु पत्राम्ला रोचनी

७५४

शतवेधनी ॥ चुक्राल्पाम्लतरा हृद्या वातघ्नी कफपित्तकृत् ॥ अथ कसौंदी नाम गुणाः
कासमर्दोरिमर्दश्च कासारिः कर्कशस्तथा ॥ कासमर्ददलं रुच्यं वृष्यं कासविषास्र
नुत् ॥ मधुरं कफवातघ्नं पाचनं कंठशोधनं ॥ विशेषतः कासहरं पित्तघ्नं ग्राहकं
लघु ॥ अथ कुष्मांड नाम गुणाः ॥ कुष्मांडं स्यात्पुष्पफलं पीतपुष्पं बृहत्फलं ॥ कु
ष्मांडं बृंहणं वृष्यं गुरु पित्तास्रवातनुत् ॥ बालं पित्तापहं शीतं मध्यमं कफकारकं
वृद्धं नातिहिमं स्वादु सक्षारं दीपनं लघु ॥ बस्तिशुद्धिकरं चेतोरोगहृत् सर्वदोष
जित् ॥ अथ भोपला नाम गुणाः ॥ अलाबूः कथिता तुंबी दीर्घवृत्तफलाभिधा ॥ मि
ष्टतुंबीफलं हृद्यं पित्तश्लेष्मापहं गुरु ॥ वृष्यं रुचिकरं प्रोक्तं धातुपुष्टिविवर्द्धनं ॥
अथ पडवल नाम गुणाः ॥ चिंचिंडः श्वेतराजिः स्यात् सुदीर्घा गृहकूलकः ॥

७५५

चिचिंडो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ॥ शोषिणोऽतिहितः किंचिद्गुणैर्न्यूनः पटो
लकात् ॥ अथ कारवेल्लीनामगुणाः ॥ कारवेल्लं कठिल्लं स्यात्कारवेल्ली ततो लघु
कारवेल्लं हिमं भेदि लघु तिक्तमवातलं ॥ ज्वरपित्तकफास्रघ्नं पांडुमेहकृमीन्हरेत्
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः ॥ अपि च ॥ कारवेल्ली सुतिक्तोष्णा दीप
नी कफवातजित् ॥ अरोचकहरा चैव रक्तदोषकरी च सा ॥ अथ व्याघ्राटीनामगुणाः
व्याघ्री कंटलता व्याघ्रनखी चाखुनखी मता ॥ व्याघ्रीफलं तिक्तकटु दीपनं पाचनं प
रं ॥ अथ नेनुआनामगुणाः ॥ महाकोशातकी प्रोक्ता हस्तिघोषा महाफला ॥ धामा
र्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥ महाकोशातकी स्निग्धा सरा पित्तानिलाप
हा ॥ अथ तोरयीनामगुणाः ॥ धामार्गवः पीतपुष्पो जालिनी कृतवेधना ॥ राज

७५५

को स्नातकी चेति तथोक्ता राजिमत्फला ॥ राजकोस्नातकी शीता मधुरा कफवातला ॥ पि
तघ्नी दीपनी रुच्या सज्वरकासकृमिप्रणुत् ॥ अथ बिंबीनामगुणाः ॥ बिंबी रक्तफला
तुंडी तुंडिकेरी च बिंबिका ॥ ओष्ठोपमफला प्रोक्ता पीलुपर्णी च कथ्यते ॥ बिंबीफलं
स्वादु शीतं गुरु पित्तास्रवातजित् ॥ स्तंभनं लेखनं रुच्यं विबंधाध्मानकारकं ॥ अथ घो
लोरनामगुणाः ॥ क्षिंवः कुक्षिंविः क्षिंविः कुंस्या ज्ञा सिंबी पुस्तक क्षिंबिका ॥ विस्नालफलिका
वैद्यति ष्यावी चिपिटा तथा ॥ क्षिंबिः शीता गुरुर्बल्या श्लेष्मला वातपित्तजित् ॥ अथ
चिल्हीनामगुणाः ॥ चिल्ही महादला रक्तचिल्हीका गौडवास्तुका ॥ चिल्लिः सरा लघुः
स्वादुरुच्या मेध्याग्निवर्द्धिनी ॥ बल्या रूक्षा हरेत् प्लीह रक्तदोषत्रयक्रमीन् ॥ अथ वृं
ताकनामगुणाः ॥ वृंताकं स्त्री तु वार्ताकुर्भंटाकी भंटिका पि च ॥ वृंताकं स्वादु तीक्ष्णो

७५ह

स्यात्कटुपाकमपित्तलं ॥ ज्वरघातवलासघ्नं दीपनं गुरुकं तेलघु ॥ तद्बालं कफपित्तघ्नं वृद्धं पित्तकरं गुरु ॥ अपरं श्वेतवृंताकं कुक्कुटांडसमं भवेत् ॥ तदर्शःसु विशेषेण हितं हीनं च पूर्वतः ॥ अन्यच्च ॥ वार्त्ताकी कटुकारुच्या मधुरा पित्तनाशिनी ॥ बलपुष्टिकरी हृद्या गुरुर्वातेषु निंदिता ॥ अथ कर्कोटनामगुणाः ॥ कर्कोटकी पीतपुष्पा महाजालीति चोच्यते ॥ कर्कोटकीफलं कुष्ठहृल्लासारुचिनाशनं ॥ श्वासकासज्वरान्हंति कटुपाकं च दीपनं ॥ अथ सूरणनामगुणाः ॥ सूरणः कंदलः कंदी दुर्नामारिः सुवृत्तकः ॥ सूरणः कटुकरुच्यदीपनः पाचनः कृमिकफानिलापहः ॥ श्वासकासवमनार्शसां हरः शूलगुल्मशमनोऽस्रदोषकृत् ॥ सर्वेषां कंदशाकानां सूरणः श्रेष्ठ उच्यते ॥ दद्रुणां रक्तपित्तानां कुष्ठानां न हितो हि सः ॥ अथ पिंडालुनामगुणाः ॥ पिंडको

वातलः श्लेष्मी ग्राही वृष्यो महागुरुः ॥ अथालूकनामगुणाः ॥ आलूकं आलुकं तच्च
कथितं वीरसेनकं ॥ काष्ठालुकादिभेदैस्तद्बहुधा परिकीर्त्तितं ॥ आलूकं शीतलं सर्वं
विष्टंभि मधुरं गुरु ॥ सृष्टमूत्रमलं रूक्षं दुर्जरं रक्तपित्तनुत ॥ कफानिलकरं बल्यं वृष्यं
स्तन्यविवर्द्धनं ॥ अथ रक्तालुनामगुणाः ॥ कथितो रक्तपिंडालू रक्तालू रक्तपिंडकः
रक्तपिंडालुकः शीतो मधुराल्पः श्रमापहः ॥ पित्तदाहापहो वृष्यो बलपुष्टिकरो गु
रुः ॥ अथ मूलकनामगुणाः ॥ मूलकं मूलकंदं च बालं मूलकपोतिका ॥ मूलकं बाल
कं रुच्यं स्वल्पोष्णं पाचनं लघु ॥ हंति त्रिदोषजं स्वासं गलाक्षिगदपीनसान् ॥ मह
त्तदेव गुर्वस्यं रूक्षं दोषत्रयप्रदं ॥ स्नेहसिद्धं तदेव स्याद्दोषत्रयविनाशनं ॥ शुष्कं तु विषं शो
षघ्नं तत्तु दोषत्रयापहं ॥ तत्पुष्पं श्लेष्मपित्तघ्नं फलं वातकफापहं ॥ अथ गाजरना

॥७५७॥

मगुणाः ॥ गाजरं गृंजनं प्रोक्तं तथा नारंगवर्णकं ॥ गाजरं मधुरं तीक्ष्णं तिक्तोष्णं दीपनं ल
घु ॥ संग्राहि रक्तपित्तार्शोग्रहणीकफवातजित् ॥ अथ पंचलवणान्याह ॥ सिंधुसौ
वर्चलं चैव विडं सामुद्रकं गडं ॥ एकद्वित्रिचतुःपंचलवणानि क्रमाद्विदुः ॥ तत्र सैंध
वनामगुणाः ॥ सैंधवो स्त्री शीतसिवं मणिमंथं च सिंधुजं ॥ शुद्धं शिवात्मजं पथ्यं
नादेयं च पटूत्तमं ॥ सैंधवं लवणं स्वादु दीपनं पाचनं लघु ॥ स्निग्धं रुच्यं हिमं वृ
ष्यं सूक्ष्मं नेत्र्यं त्रिदोषयत् ॥ अथ सौवर्चलनामगुणाः ॥ सौवर्चलं स्याद्रुचकम
क्षम्याक्षं च तन्मतं ॥ तिलकं कृष्णलवणं रुच्यकोद्रविकं तथा ॥ सौवर्च्चलं लघु क्षा
रं कटूष्णं वातगुल्मनुत ॥ ऊर्ध्ववातामशूलातिविबंधारोचकानजयेत ॥ अथ वि
डलवणनामगुणाः ॥ विडं द्राविडकं खंडं कृतकं क्षारमासुरं ॥ सुपाक्यं खंडलव

॥७५७॥

णंधूर्त्तकृत्रिमकंचतत॥ विडमुष्णंचलवणंदीपनंवातनाशनं॥ रूच्यंचाजीर्णशूल
घ्नंगुल्ममेहविनाशनं॥ अथसामुद्रकलवणनामगुणाः॥ सामुद्रंचतुलवणमक्षी
वंवशिरंचतत॥ सामुद्रमधुरंपाकेसतिक्तंमधुरंगुरु॥ नात्युष्णंदीपनंभेदिसक्षा
रमविदाहिच॥ श्लेष्मलंवातनुतिक्तमरूक्षंनातिशीतलं॥ अथगडलवणनाम
गुणाः॥ शाकंभरीयंकथितंगडाख्यंरोमकंतथा॥ गडाख्यंलघुवातघ्नमत्युष्णं
भेदिपित्तलं॥ तीक्ष्णंव्यवायिसूक्ष्मंचाभिष्यंदिकटुपाकिच॥ अथयवक्षारस
र्जीक्षारसोरानामगुणाः॥ पाक्यःक्षारोयवक्षारोयावशूकोयवाग्रजः॥ स्वर्जि
कापिस्मृतःक्षारःकापोतःसुखवर्चकः॥ कथितःस्वर्जिकाभेदोविशेषज्ञैःसु
वर्चिका॥ यवक्षारोलघुस्निग्धससूक्ष्मोवह्निपाचनः॥ निहंतिशूलवाताम

॥७५८॥

ऽसे कच्चा सगलामयान् ॥ पांडुश्लेष्मग्रहणीगुल्मानाहप्लीहहृद्रोगमयान् ॥ स्वर्जिकाल्प
गुणा तस्माद्विशेषाद्गुल्मशूलहृत ॥ सुवर्चिका स्वर्जिका च द्वौ कृष्याग्रगुणतो जनैः ॥
अथ सोहागानामगुणाः ॥ सौभाग्यं टंकणं क्षारो धातुद्रावककमुच्यते ॥ टंकणं व
न्हिकद्रूक्षं कफहृद्वातपित्तकृत ॥ अथ क्षारद्वयक्षारत्रयलक्षणं ॥ स्वर्जिका याव
शूकश्च क्षारद्वयमुदाहृतं ॥ टंकणेन युतं तत्तु क्षारत्रयमुदीरितं ॥ मिलितं तत्क्षारगु
णाढ्यं द्विशेषाद्गुल्महृत्परं ॥ अथ क्षाराष्टकं ॥ पलाशवज्रिशिखरिचिंचार्कतिल
नालजाः ॥ यवजः स्वर्जिका चेति क्षाराष्टकमुदाहृतं ॥ क्षारा एते ग्निना तुल्या गुल्म
शूलहरा भृशं ॥ अथ साबुणक्षारनामगुणाः ॥ सर्वक्षारो बहुक्षारः समहक्षा
रकस्तथा ॥ सर्वक्षारमतिक्षारं चक्षुष्यं वस्तिशोधनं ॥ गुर्वी तिक्तं मिश्रं शूलघ्नम ॥७५८॥

तद्वच्छ्लेष्मघ्नं ॥ अथ जयसागरनामगुणाः ॥ नवसारः समाख्यातश्चुल्लिकालवणा
भिधः ॥ इष्टिकोपाकदहने जायते पांडुरप्रभः मनुष्यमूत्रकरणां स विज्ञातः किट्टवद्भ
वेत् ॥ क्षारेषु गणनातस्य स्वर्णघ्नो घनकः परः ॥ शंखद्रावरसे पूज्यो मुख्यकर्मणि
पारदे ॥ विडद्रव्योपयोगी च क्षारवत्तद्गुणाः स्मृताः ॥ अथ सुधाक्षारनामगुणाः ॥
सुधामृताह्वया सौधम् षरांकटशर्करा ॥ सुधाक्षारोऽग्निसंकाशः पाकोक्ते दीपि
दारणाः ॥ अथ चुक्रनामगुणाः चुक्रं सहस्रवेधि स्याद्रसाम्लं शुक्रमित्यपि ॥ चु
क्रमत्यम्लमम्लं च दीपनं पाचनं परं ॥ शूलगुल्मविबंधामवातश्लेष्महरं सरं ॥ वमि
तृष्णास्यवैरस्यहृत्पिडावह्निमांद्यहृत ॥ अथ चणकाम्लगुणाः ॥ चणकाम्लकम
त्युष्णं दीपनं दंतहर्षणं ॥ लवणानुरसं रुच्यं शूलाजीर्णविबंधनुत ॥ अथ कर्पूर

नामगुणाः॥ पुंसि क्लीबे च कर्पूरः सिताभ्रो हिमवालुकः॥ घनसारश्चंद्रनामा हिमनामा
पि स स्मृतः॥ कर्पूरः शीतलो वृष्यो चक्षुष्यो लेखनो लघुः॥ सुरभिर्मधुरस्तिक्तः क
फपित्तविषापहः॥ दाहतृष्णास्यवैरस्यमेदोदौर्गंध्यनाशनः॥ कर्पूरो द्विविधः प्रो
क्तः पक्वापक्वप्रभेदतः॥ पक्वात्कर्पूरतः प्राहुरपक्वं गुणवत्तरं॥ अथ कस्तूरीनामगुणाः
मृगनाभिर्मृगमदः कथितस्तु सहस्रभित्॥ कस्तूरिका च कस्तूरी वेधमुख्यामतस्मृ
ता॥ कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः कफवातविषच्छर्दिशीतदौर्गंध्य
शोषहृत्॥ अथ मुसकदानानामगुणाः॥ लताकस्तूरिका तिक्ता स्वाद्वी वृष्या हिमा ल
घुः॥ चक्षुष्या छेदनी श्लेष्मतृष्णावस्यास्यरोगहृत्॥ अथ जवादीनामगुणाः॥ मा
र्जारी पूतिका पूतिकचः स्याद्गंधचेलिका॥ मार्जारीकांतिमाधत्ते चक्षुष्या कफवा

तजित् ॥ अथ चंदननामगुणाः ॥ श्रीखंडं चंदनं न स्त्री भद्रश्रीस्तैलपर्णिका ॥ गंधसा
रो मलयजस्तथा चंद्रद्युतिश्च सः ॥ चंदनं शीतलं रूक्षं तिक्तमाल्हादनं लघु ॥ श्रमशो
षविषश्लेष्मतृष्णापित्तास्रदाहनुत् ॥ अथ पीतचंदननामगुणाः ॥ कालीयकं तु का
लीयं पीताभं हरिचंदनं ॥ हरिप्रियं कालसारं तथा कालानुसार्यकं ॥ कालीयकं रक्तरु
ग्विशेषाद्व्यंगनाशनं ॥ अथ रक्तचंदननामगुणाः ॥ रक्तचंदनमाख्यातं रक्तांगं
क्षुद्रचंदनं ॥ तिलपर्णी रक्तसारं तत्प्रवालफलं स्मृतं ॥ रक्तं शीतं गुरु स्वादु छर्दितृषा
स्रपित्तहृत् ॥ तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहं ॥ अथ पतंगनामगुणाः ॥ पतंगं
रक्तसारं च सुरंगं रंजनं तथा ॥ पट्टरंजकमाख्यातं पत्तूरं च कुचंदनं ॥ पतंगं मधुरं
शीतं पित्तश्लेष्मव्रणास्रजित् ॥ हरिचंदनवद्वेद्यं विशेषाद्दाहनाशनं ॥ अथ कस्तू

र ६०

गरुनामगुणाः ॥ अगरु प्रवरं लोहं राजार्हं जोंगकं तथा ॥ वंशिकं कृमिजं चापि कृमिजग्ध
मनार्य्यकं ॥ अगरु स्यात्कटूष्णं च तिक्तं तीक्ष्णं च पित्तलं ॥ लघु कर्णाक्षिरोगघ्नं शीतवात
कफप्रणुत् ॥ कृष्णं गुणाधिकं तत्तु लोहवद्वारि मज्जति ॥ अगरुप्रभवः स्नेहः कृष्णाग
रुसमः स्मृतः ॥ अथ तगरनामगुणाः ॥ कालानुसार्य्यं तगरं कुटिलं नहुषं नतं ॥ वक्रं
विनम्रं च शठं ननुकुषापस्मारमूर्द्धाक्षिरोगदोषत्रयापहं ॥ अथ देवदारुनामगुणाः
देवदारु स्मृतं दारु भद्रदार्विद्रुदारु च ॥ मस्तदारु द्रुकिलिमं किलिमं सुरभूरुहं ॥ देव
दारु लघु स्निग्धं तिक्तोष्णं कटुपाकि च ॥ विबंधाध्मानशोथामतंद्राहिक्काज्वरास्र
जित् ॥ प्रमेहपीनसश्लेष्मकासकंडूसमीरनुत् ॥ अथ चीडनामगुणाः सरलः पी
तवृक्षः स्यात्तथा सुरभिदारुकः ॥ स एव नंदनश्चीडो नमेरुः परिकीर्त्तितः ॥ सर

र ६०

लो मधुरस्तीक्तः कटुपाकरसो लघुः ॥ स्निग्धोऽस्रः कर्णकंठाक्षिरोगरक्षोहरः स्मृतः ।
कफानिलस्वेदपकाकासालक्ष्मीज्वरणापहः ॥ अथ पद्माकनाम गुणाः ॥ पद्मकं प
द्मगंधि स्यात्तथा पद्माह्वयं स्मृतं ॥ पद्मकं तुवरं तिक्तं शीतलं वातलं लघु ॥ विसर्पदा
हविस्फोटकुष्ठश्लेष्मास्रपित्तहृत् ॥ गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत् ॥ अ
थ गुग्गुलुनाम गुणाः ॥ गुग्गुलुर्देवधूपश्च जटायुः कौशिकः पुरः ॥ दुर्गः शिवः शांभव
श्च महिषाक्षः पलंकषः ॥ गुग्गुलुर्विशदस्तिक्तो वीर्योष्णः पित्तलः सरः ॥ कषायः कटु
कः पाके कटू रूक्षो लघुः परं ॥ भग्नसंधानकृद्वृष्यः सूक्ष्मः स्वर्यो रसायनः ॥ दीपनः
पिच्छलो बल्यः कफवातव्रणापचीः ॥ मेदोमेहाश्मवातांस्त्र क्लेदकुष्ठाममारुतान्
पिटिकाग्रंथिशोफार्शोगंडमालाकृमीन जयेत् ॥ माधुर्याच्छमयेद्वातं कषायत्वा

स्वपित्तहा ॥ तिक्तत्वात्कफजित्तेन गुग्गुलुः सर्वदोषहा ॥ स नवो बृंहणो वृष्यः पुरा
णस्त्वतिलेखनः ॥ स्निग्धकांचनसंकाशः पक्वजंबूफलोपमः ॥ नूतनो गुग्गुलुः
प्रोक्तः सुगंधिर्यस्तु पिच्छिलः ॥ शुष्को दुर्गंधकश्चैव त्यक्तप्रकृतवर्णकः ॥ पुरा
णः स तु विज्ञेयो गुग्गुलुर्वीर्यवर्जितः ॥ अम्लं तीक्ष्णमजीर्णं च व्यवायं श्रम
मातपं मद्यं रोषं त्यजेत्सम्यक् गुणार्थी पुरसेवकः ॥ अथ सरलनिर्यासगुगरी
नामगुणाः ॥ श्रीवासः सरलस्रावः श्रीवेष्टो वृक्षधूपकः ॥ श्रीवासो मधुरस्ति
क्तः स्निग्धोष्णस्तुवरः सरः ॥ पित्तलो वातमूर्द्धाक्षिस्वररोगकफापहः ॥ रक्षो
घ्नः स्वेददौर्गंध्ययूकाकंडूव्रणप्रणुत ॥ अथ सिल्हारसनामगुणाः ॥ सिल्ह
कस्तुरुष्कः स्यात्तथा यवनदेशजः ॥ कपितैलं च संख्यातस्तथा च कपिनाम

कः ॥ सिल्हकः कटुकः स्वादुः स्निग्धोष्णः शुक्रकांतिकृत् ॥ वृष्यः कंडूस्वेदकुष्ठज्वरदा
हग्रहापहः ॥ अथ जायफलनाम गुणाः ॥ जातीफलं जातिकोशं मालतीफलमित्य
पि ॥ जातिसस्यं च शालूकं तदेव सुमनःफलं ॥ जातीफलं कषायोष्णं कटुकं ठाम
पार्त्तिजित् ॥ वातातिसारमेहघ्नं वृष्यं दीपनकं लघु ॥ अथ जायपत्री नाम गुणाः
जातीफलस्य त्वक् प्रोक्ता जातीपत्री भिषग्वरैः ॥ जातिकोशा च कथिता सुमनः
पत्रिका च सा ॥ जातीपत्री लघुः स्वादुः कटूष्णा रुचिवर्णकृत् ॥ कफकासवमिश्वा
सतृष्णाकृमिविषापहा ॥ अथ लवंग नाम गुणाः ॥ लवंगं देवकुसुमं श्रीसंज्ञं ।
श्रीप्रसूतकं ॥ तीक्ष्णपुष्पं तु भृंगारं श्रीवं दिव्यं च शेखरं ॥ लवंगं शीतलं तिक्तं च
क्षुष्यं भक्तरोचनं ॥ वातपित्तकफघ्नं च क्षयकासास्रदोषनुत् ॥ अथ इलायचीस्थू

॥७६२॥

सातन्नामगुणाः॥ एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च॥ भद्रैला च बृहदेला च चंद्रबा
ला च निष्कुटिः॥ स्थूलैला कटुका पाके रसे चानलकृल्लघुः॥ रूक्षोष्णा श्लेष्मपित्तास्रकं
डूश्वासतृषापहा॥ हृल्लासविषवस्त्यास्यशिरोरुग्वमिकासनुत॥ अथ सूक्ष्मैलाची
नामगुणाः॥ सूक्ष्मोपकुंचिका तुत्था कोरंगी द्राविडी त्रुटिः॥ कपोतवर्णा गौरांगी
चंद्रबाला निषा च सा॥ एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत॥ रसे तु कटु
का शीता लघ्वी वातहरी मता॥ अथ तजनामगुणाः॥ त्वचं वरांगं भृंगं स्यात्त्वक्चो
चं तनुकं वरं॥ त्वाटपर्णं घनं भंगं गउत्वक्रत्वर्णभूमिकं॥ त्वचं लघूष्णं कटुकं स्वादु
तिक्तं च रूक्षकं॥ पित्तलं कफवातघ्नं कंडूआमारुचिनाशनं॥ हृद्बस्तिरोगवातार्शः
कृमिपीनसशुक्रहृत॥ अथ दारचीनामगुणाः॥ त्वक्स्याद्वीतुतनुत्वक्स्या

॥७६२॥

तथा दारुसितामता ॥ उक्ता दारुसिता स्वाद्वी तिक्ता चानिलपित्तहृत् ॥ सुरभिः शुक्र-
लावल्यामुखशोषतृषापहं ॥ अथ पत्रकनामगुणाः ॥ पत्रं तमालपत्रं च तथा स्या-
त्पत्रनामकं ॥ अंशुकं रोमशं वासस्तापसं कुमारकं ॥ पत्रकं मधुरं किंचित्तीक्ष्णोष्णं
पिच्छिलं लघु ॥ निहंति कफवातार्शोहृल्लासारुचिपीनसान् ॥ अथ नागकेसर-
नामगुणाः ॥ नागपुष्पः स्मृते नागः केसरो नागकेसरः ॥ चांपेयो नागकिंजल्कः
कथिता कांचनाह्वयः ॥ नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनं ॥ दौर्गंध्यकुष्ठवी-
सर्पकफपित्तविषापहं ॥ अथ त्रिजातकचातुर्जातकलक्षणं गुणाश्च ॥ त्वगेला-
पत्रकैस्तुल्यैस्त्रिसुगंधि त्रिजातकं ॥ नागकेसरसंयुक्तं चातुर्जातकमुच्यते ॥
तद्द्वयं रोचनं रूक्षं तीक्ष्णोष्णं मुखगंधहृत् ॥ लघु पित्ताग्निकृद्वर्ण्यं कफवात

॥७६३॥

विषापहं ॥ अथ केसरनामगुणाः ॥ कुंकुमं घुसृणं रक्तं काश्मीरं पीतनं वरं ॥ वाल्हीकं
पिशुनं क्लांतं संकोचं पिशितोदकं ॥ कुंकुमं कटुकं हि धमाशिरोरुग्व्रणजंतुजित ॥ उष्णं
हास्यकरं वर्ण्यं व्यंगदोषत्रयापहं ॥ अथ गोरोचननामगुणाः ॥ गोरोचना तु मंग
ल्या वंद्या गौरी च रोचना ॥ गोरोचना हिमा तिक्ता वश्या मंगलकांतिदा ॥ विषालक्ष्मी
ग्रहोन्मादगर्भस्रावक्षतास्रहृत ॥ अथ नखनखीनामगुणाः ॥ नखं व्याघ्रनखं
व्याघ्रायुधं तच्चक्रकारकं ॥ नखं स्वल्पं नखी प्रोक्ता हनुर्हट्टविलासिनी ॥ नखद्वयं
ग्रहश्लेष्मवाताश्रीज्वरकुष्ठहृत ॥ लघूष्णं शुक्रलं वर्ण्यं हृद्यं स्वादु विषापहं ॥ अ
थ सुगंधवालानामगुणाः ॥ वालं हिवेरं बर्हिष्ठोदीच्यं केशांबुनामचे ॥ वालकं शी
तलं रूक्षं लघु दीपनपाचनं ॥ हृल्लासारुचिवीसर्पहृद्रोगामातिसारहृत ॥ अथ ॥७६३॥

वीरणनामगुणाः ॥ स्याद्वीरणं वीरतरुर्वीरं च बहुमूलकं ॥ वीरणं पाचनं शीतं स्तंभनं
लघु तिक्तकं ॥ तृष्णास्रविषवीसर्पकृच्छ्रदाहव्रणापहं ॥ अथ उशीरनामगुणाः ॥
वीरणस्य तु मूलं तु स्यादुशीरमभयं तथा ॥ अमृणालं च सेव्यं च समगंधिकमित्यपि ॥
उशीरं पाचनं शीतं स्तंभनं लघु तिक्तकं ॥ मधुरं ज्वरहृद्वांतिमदनुत्कफपित्तनुत ॥
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहं ॥ अथ जटामांसीनामगुणाः ॥ मांसीज
टामृतकेशीकव्यालानलददिशिखा ॥ कृस्मान्या पूतनाकेशी गंधमांसी पिशाचिका
मांसी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठजित ॥ अथ छडिलानामगुणाः ॥ शैलेयं
तु शिलापुष्पं वृद्धं कालानुसार्यकं ॥ शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ॥ कं
डूकुष्ठाश्मरीदाहविषहृद्दुल्लेदरक्तहृत ॥ अथ मुस्तानामगुणाः ॥ मुस्तकं न स्त्रि

॥ ७ द्वि ॥

यांमुस्तंत्रिषुवारिदनामकं ॥ कुरुविंदस्त्वसख्यातोपरःक्रोडकसेरुकः ॥ भद्रमुस्तंचगुं
द्राचतथानागरमुस्तकः ॥ मुस्तकटुहिमंग्राहितिक्तंदीपनपाचनं ॥ कषायंकफपि
त्तास्रतृड्ज्वरारुचिजंतुहृत् ॥ अथकर्पूरनामगुणाः ॥ कर्चूरोवेधमुख्यश्चद्राविडः
कल्पकःशटी ॥ कर्चूरोदीपनोरुच्यःकटुकस्तिक्तएवच ॥ उष्णोलघुर्हरेच्छ्वासगुल्म
वातकफक्रमीन् ॥ अथएकांगीनामगुणाः ॥ मुरागंधकुटीदैत्यासुरभिःशालप
र्णिका ॥ मुरातिक्ताहिमास्वाद्वीलघ्वीपित्तानिलापहा ॥ ज्वरासृग्भूतरक्षोघ्नीकुष्ट
कासविनाशिनी ॥ सुगंधद्रव्यमिदंगुर्जरेप्रसिद्धं ॥ अथप्रियंगुनामगुणाः ॥ प्रियं
गुःफलिनीकांतालताचमहिलाव्हया ॥ गुंद्रागंधफलीश्यामाविष्वक्सेनांगना
प्रिया ॥ प्रियंगुःशीतलातिक्तादाहपित्तास्रदोषहृत् ॥ वांतिभ्रांतिज्वरहराव

॥ ७ द्वि ॥

कृजाड्यविनाशिनी॥ इयंगुंग्गुमेरितिचप्रसिद्धा॥ अथमरिचसदृशीरेणुकानामगु
णाः॥ रेणुकाराजपुत्रीचनंदिनीकपिलाद्विजा॥ भस्मगंधापांडुपुत्रीस्मृताकौंतीह
रेणुका॥ रेणुकाकटुकापाकेतिक्तानुष्णाकटुर्लघुः॥ पित्तलादीपनीमेध्यापाचनीग
र्भपातिनी॥ वलासवातवैक्लैव्यतृट्कंडुविषदाहहृत॥ अथग्रंथिपर्णीनामगुणाः
ग्रंथिपर्णीग्रंथिकंचकाकपुष्पंचगुच्छकं॥ नीलपुष्पंसुगंधंचकथितंतैलपर्णकं
ग्रंथिपर्णीतिक्ततिक्ष्णंकटूष्णंदीपनंलघुः॥ कफवातविषश्वासकंडूदौर्गंध्यना
शनं॥ अथग्रंथिपर्णीभेदस्थौणेयकनामगुणाः॥ स्थौणेयकंवर्हिवर्हिष्पुष्पकंवर्हं
चकुक्कुरं॥ शीर्णरोमशुकंचापिशुकपुष्पंशुकच्छदं॥ स्थौणेयकंकटुस्वादुतिक्तं।
स्निग्धंत्रिदोषनुत॥ मेधाशुक्रकरंरुच्यंरक्षोघ्नंज्वरजंतुजित॥ हंतिकुष्टास्र

॥७६५॥

तृड्दाहदौर्गंध्यतिलकालकान् ॥ अथ भूम्यामलकीवद्गुच्छतालीसपत्रनामगुणाः
तालीसमुक्तं पत्राढ्यं धात्रीपत्रं च तन्मतं ॥ तालीपत्रं चार्कवेधं करिपत्रं घनच्छदं
तालीसपत्रं तिक्तोष्णं मधुरं कफवातनुत् ॥ कासहिक्काक्षयश्वासछर्दिदोषवि
नाशकृत् ॥ अथ कंकोलनामगुणाः ॥ कंकोलं कोलकं प्रोक्तं तथा कोशफलं स्मृ
तं ॥ कोलं च स्थूलमारीचं तद्देवपरिकीर्तितं ॥ कंकोलं लघु तिक्तोष्णं तीक्ष्णं हृद्यं
रुचिप्रदं ॥ आस्यदौर्गंध्यहृद्रोगकफवातामयांध्यहेतु ॥ अथ लामज्जकमुशी
रवसीतच्छपितन्नाविक्रेयनामगुणाः ॥ लामज्जकं सुनालं स्यादमृणालं लयं ल
घु ॥ इष्टकायपथकं सेव्यं नलदं चावदातकं ॥ लामज्जकं हिमं तिक्तं लघु दोषत्रया
स्रजित् ॥ त्वग्गामयस्वेदकृच्छ्रदाहपित्तास्ररोगनुत् ॥ अथ एलवालुककेट्फल

॥७६५॥

सद्दशाकृष्णगंधिनामगुणाः ॥ एलवालुकमैलेयं सुगंधिहरिवालुकं ॥ एलावालुक
मेल्वालुकपिभ्यत्वगुपीरितं ॥ एल्वालुकं स्वंकं पाके कषायं शीतलं लघु ॥ हंतिकंडू
व्रणछर्दितृट्कासारुचिहृद्रुजः ॥ बलासविषपित्तास्रकुष्ठमूत्रगदक्रमीन्
अथपक्केपटीमोषानामगुणाः ॥ कुंठं तटं दासपुरं वालेयं परिपेलवं ॥ ल्लवरगो
पुरगोनुर्द्कैवर्तीमुस्तकानिच ॥ मुस्तावस्पेलवपुटं श्रुकामंस्याद्हितुल्लकं ॥ वितु
न्नकंहिमं तिक्तं कषायं कटुकांतिदं ॥ कफपित्तास्रवीसर्पकुष्ठकंडूविषप्रणुत् ॥
अथपक्केपूरीनामगुणाः ॥ स्पृक्कासृग्ब्राह्मणी देवीमरुन्मालालतालघुः ॥ समु
द्रांतावधूःकोटिवर्षालंकोपिकेत्यपि ॥ स्पृक्कासाद्दीहिमावृष्यातिक्ताविरवि
लदोषहृत् ॥ कुष्ठकंडूविषस्वेददाहाश्मीज्वररक्तनुत् ॥ अथपनतिकानामगुणाः

॥ ७ हैही ॥

नलिका विद्रुमलता कपोतचरणा नटी ॥ धमन्यंजनकेशी च निर्मध्या शुषिरा नली
नलिका शीतला तिक्ता चक्षुष्या कफपित्तहृत् ॥ कृच्छ्राश्मवाततृष्णास्रकुष्ठकं
डूज्वरापहा ॥ इयं प्रवालाकृतिस्तद्देशे प्रसिद्धा ॥ अथ रालनामगुणाः ॥ राला
सर्जरसो यक्षधूपो सर्ज्जोग्निवल्लभः ॥ रालकः शालनिर्यासो लाक्षा शाल
वनोद्भवा ॥ रालाहिमा गुरुस्तिक्ता कषाया ग्राहिणी जयेत् ॥ ग्रहास्रस्वेदवीसर्प
ज्वरव्रणविपादिकाः ॥ अथ पर्पटीनामगुणाः ॥ पर्पटी रंजनी कृष्णा जतुका ज
ननी जनी ॥ पर्पटी वर्ण्यदा शीता कफपित्तास्रकुष्ठजित् ॥ अथ समुद्रफलनाम
गुणाः ॥ समुद्रनाम प्रथमं पश्चात्फलमुदाहरेत् ॥ समुद्रफलमित्यादि नाम
वाच्यं भिषग्वरैः ॥ फलं समुद्रस्य कटूष्णकारि वातापहं भूतविरोधकारि ॥

॥ ७ हैही ॥

त्रिदोषदवानलदोषहाह्लिकामयमूंतिविरोधकारि ॥ अथवोलनामगुणा
वोलगंधरसप्राणपिंडगोपरसाः समाः ॥ वोलंतु त्रिविधं प्रोक्तं स्यामं मनुष्यजं
वोलं रक्तहरं शीतं मेध्यं दीपनपाचनं ॥ मधुरं वटुकं तिक्तं गूहस्वेदत्रिदोषह
त ॥ ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशुद्धिकृत ॥ चक्षुष्यं च सरं प्रोक्तं रक्तवो
लं भिषग्वरैः ॥ श्यामवोलं तीक्ष्णगंधं दद्रूकंडुविषापहं ॥ कुष्ठापस्मारवेधाश्री
रक्तगुंथींश्च नाशयेत ॥ अपरं मानुषं वोलं सद्योव्रणहं जापहं ॥ भग्नास्थिसं
धिजननं त्रिदोषशमनं हिमं ॥ धातुकांतिवयःस्थैर्यबलौजोवृद्धिकारकं ॥
मानुषं वोलं मिमिक्राई इति भाषायां प्रसिद्धं ॥ अथ वत्सनाग विषनामगुणाः
अमृतं स्याद्वत्सनाभो विषमुग्रं महौषधं ॥ गरलं मरणं नागः प्राणहार

कमित्यपि ॥ चर्चस्तनागो तिमधुरः सोष्णो वातकफापहः ॥ कंठरुक्सन्निपातघ्नः पि
त्तसंतापकारकः ॥ अपि च ॥ विषं रसायनं च स्याद्वातश्लेष्मविकारनुत् ॥ कटु तिक्त
कषायं च मदकारि स्वरप्रदं ॥ व्यवायि शीतं हृद्यं हि कुष्ठवातास्रनाशनं ॥ अ
ग्निमांद्यश्वासकासरक्तप्लीहोदरभगंदरान् ॥ गुल्मपांडुज्वरानर्शांसि नाशये
त्क्रमशो नृणां ॥ विषस्याशोधितस्याभिदायान्तु वैरं पंचयसत्पक ॥ तदत्र नोक्तमस्मा
भिर्ग्रंथविस्तरभीरुभिः ॥ अथ सोमलनामगुणाः ॥ गौरीपाषाणकः प्रोक्तो द्वि
विधः श्वेतपीतकः ॥ श्वेतः शंखसदृक्पीतो दाडिमाभः प्रकीर्तितः ॥ श्वेतः
कृत्रिमकः प्रोक्तः पीतः पर्वतसंभवः ॥ विषवत्तत्प्रकरोतीहि रसकर्मणि पूजि
तौ ॥ अथ मृद्दारशृंगनामगुणाः ॥ मृद्दारशृंगकं प्रोक्तं द्विविधं पीतपांडुरं ॥

सदलं निर्दलं तस्य जनि गुर्जरमंडले ॥ केश्यं पुंस्त्व रोगघ्नं रंजनं रसबंधकं ॥ अथ धान्या
नां भेदाः ॥ शालिधान्यं व्रीहिधान्यं शूकधान्यं तृतीयकं ॥ शमीधान्यं क्षुद्रधान्या
मित्युक्तं धान्यपंचकं ॥ शालयो रक्तशाल्याद्या व्रीहयः षष्टिकादयः ॥ यवादि
कं शूकधान्यं मुद्गाद्यं शिंबिधान्यकं ॥ कंग्वादि क्षुद्रधान्यं स्यात् तृणधान्यं च तत्
स्मृतं ॥ तत्र शालिधान्यलक्षणं ॥ कंडनेन विना शुक्ला हैमनाः शालयः स्मृताः
अथ शालीनां नामानि ॥ रक्तशालिः सकलमः पांडुकः शकुनाहृतः ॥ सुगंध
कः कर्दमको महाशालिश्च दूषकः ॥ पुष्पांडकः पुंडरीकस्तथा महिषमस्तकः
दीर्घशूकः कांचनको हायनो लोध्रपुष्पकः ॥ इत्याद्याः शालयः संति बह
वो बहुदेशजाः ॥ ग्रंथविस्तरभीतेस्ते समस्ता नात्र भाषिताः ॥ अथ तेषां गुणाः

७ ह्दै८ ॥

शालयो मधुराः संति बहवो बहुदेशजाः ग्रंथविस्तरभीतेस्ते समस्ता नात्र भाषि-
तः स्निग्धा बल्या बद्धाल्पवर्च्चसः ॥ कषायाः लघवो रुच्याः स्वर्या वृष्याश्च बृंहणाः
अल्पानिलकफाः शीताः पित्तघ्ना मूत्रलास्तथा ॥ तत्र रक्तशालिगुणाः ॥ रक्तशा-
लिर्वरस्तेषु बल्यो वर्ण्यस्त्रिदोषजित् ॥ चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृ-
ड्ज्वरापहाः ॥ विषव्रणश्वासकासदाहनुद्वह्निपुष्टिदः तस्मादल्पांतरगुणाः
शालयो महदादयः ॥ रक्तशालिः दाउदखानी नि मगधदेशे प्रसिद्धः ॥ अथ व्री-
हिधान्यलक्षणं ॥ वार्षिकाः कंडिताः शुक्ला व्रीहयश्चिरपाकिनः ॥ अथ व्री-
हीणां नामानि ॥ कृष्णव्रीहिः पाटलश्च कुक्कुटांडक इत्यपि ॥ शालामुखो ज-
तुमुख इत्याद्या व्रीहयः स्मृताः ॥ अथ तेषां गुणाः ॥ व्रीहयः कथिताः पा-

॥ ७ ह्दि ॥

के मधुरा वीर्यतो हिमाः ॥ अल्पाभिष्यंदिनो बद्धवर्च्चस्का षषिकैः समाः ॥ कलम
श्री हि वरस्तेषां तस्मादल्पगुणाः परे ॥ अथ षषिकानां लक्षणं ॥ गर्भस्था एव
ये पाकं यांति ते षषिकाः मताः ॥ अथ षषिकानां नामानि ॥ षषिकः शतपु
ष्पश्च प्रमोदकमुकुंदको ॥ महाषषिक इत्याद्याः षषिकाः समुदाहृताः ॥
एते पि व्रीहयः प्रोक्ता व्रीहि लक्षणदर्शनात् ॥ अथ तेषां गुणाः ॥ षषिका
मधुराः शीता लघवो बद्धवर्च्चसः ॥ वातपित्तप्रशमनाः शालीनां सदृशा
गुणैः ॥ तत्र षषिकस्य गुणाः ॥ षषिकः प्रवरस्तेषां लघुः स्निग्धस्त्रिदोष
जित् ॥ स्वादुर्मृदुश्चग्राही च बलदो ज्वरहारकः ॥ रक्तशालिगुणैस्तुल्या
स्ततः स्वल्पगुणाः परे ॥ षषिकैः साठी इति लोके प्रसिद्धः ॥ अथ प्पुक

७ ईदी

धान्यानि ॥ तत्र यवानां नामानि गुणांश्चाह ॥ यवस्तु शितशूकः स्यान्निःशूकोतिय
वः स्मृतः ॥ तोक्यस्तद्वत्स हरितस्ततः स्वल्पश्च कीर्तितः ॥ यवः कषायो मधुरः शी
तलो लेखनो मृदुः ॥ व्रणेषु तिलवत्पथ्यो रूक्षो मेधाग्निवर्द्धनः ॥ कटुपाको न
भिष्यंदी स्वर्य्यो बलकरो गुरुः ॥ बहुवातमलः स्थैर्यवर्णकारी च पिच्छिलः ॥ कंठ
त्वगामयश्लेष्मपित्तमेदः प्रणाशनः ॥ पीनसश्वासकासोरुस्तंभलोहिततृ
ट्प्रणुत् ॥ अस्मादतियवो न्यूनस्तोक्मोन्यूनतरस्ततः ॥ अथ गोधूमस्य नामानि
लक्षणं च ॥ गोधूमः सुमनोपि स्यात्त्रिविधः स च कीर्तितः ॥ महागोधूम इ
त्याख्यः पश्चाद्देशात्समागताः ॥ मधूली तु ततः किंचिदल्पा सा मध्यदेशजा
निःशूको दीर्घगोधूमः क्वचिन्नंदीमुखाभिधः ॥ गोधूमो मधुरः शीतो वा

७ ईदी

तपित्तहरो गुरुः ॥ कफशुक्रप्रदो बल्यः स्निग्धः संधानकृत्सरः ॥ जीवनो बृंहणो
वर्ण्यो बल्यो रुच्यः स्थिरत्वकृत ॥ कफप्रदो नवीनः ॥ न तु पुराणः ॥ मधूली शी
तला स्निग्धा पित्तघ्नी मधुरा लघुः ॥ शुक्रला बृंहणी पथ्या तद्वन्नान्दीमुखः स्मृतः ॥
अथ शमीधान्यं ॥ तत्पर्यायमाह ॥ शमीजाः शिंबिजाः शिंबीभवाः सूप्याश्च वैदलाः
तेषां गुणाः ॥ वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः ॥ वातलाः कफपित्तघ्ना ब
द्धमूत्रमला हिमाः ॥ ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारिणः ॥ अथ मुद्गनामगु
णाः ॥ मुद्गो बलाटो मंगल्यो हरितः शारदो परः ॥ पीतः प्रचेतो वसुको माधवः प्रव
रो सितः ॥ वनमुद्गस्तु वरको राजमुद्गस्तु खंडकः ॥ मुद्गो रूक्षो लघुर्ग्राही कफपित्तह
रो हिमः ॥ स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ॥ हारितः प्रवरस्तेषां तच्छा

॥७०॥

कंतिक्तमुत्तमं ॥ अथ उडिदनामगुणाः ॥ माषोवीजकरः प्रोक्तो धारिस्वैव प्रकीर्त्तितः ॥
माषोगुरुः स्वादुपाकः स्निग्धो रुच्यो निलापहः ॥ उष्णः संतर्पणो बल्यः शुक्रलो बृंह
णः परः ॥ भिन्नमूत्रमलस्तन्यमेदः पीत्तकफप्रदः ॥ गुदकीलार्दितश्वासपंक्तिशू
लानि नाशयेत ॥ अथ चवसानामगुणाः ॥ राजमाषो महामाषश्चपलश्चवलः स्म
तः ॥ राजमाषो गुरुः स्वादुस्तुवरस्तर्पणो ऽरसः ॥ ग्राही वातकरस्तन्यवरुवेद्योर्हिचि
प्रदः ॥ श्वेतो रक्तस्तथा कृष्णस्त्रिविधः सप्रकीर्त्तितः ॥ यो महांस्तेषु भवति सएवो
क्तो गुणाधिकः ॥ अथ निष्पावनामगुणाः ॥ निष्पावो राजशिंबिः स्याद्दस्वकश्चे
तशिंबिकः ॥ निष्पावो मधुरो रुक्षो विपाके ऽम्लो गुरुः सरः ॥ कषायस्तन्यपितास्त्र
मूत्रवातविवंधकृत ॥ विदाह्युष्णो विषश्लेष्मशोथहृच्छुक्रनाशनः ॥ अथ मोठना ॥७०॥

इतिप्रकीर्तितः [illegible]

मगुणाः ॥ मकुष्ठो वनमुद्गः स्यान्मकुष्ठकमयुष्ठकौ ॥ मकुष्ठो वातलो ग्राही कफपित्तहरो लघुः ॥ वांतिजिन्मधुरः पाके क्रमिकृज्ज्वरनाशनः ॥ अथ मसूरनामगुणाः ॥ मंगल्यको मसूरः स्यान्मंगल्या च मसूरिका ॥ मसूरो मधुरः पाके संग्राही शीतलो लघुः कफपित्तास्रजिद्रूक्षो वातलो ज्वरनाशनः ॥ अथ तुवरनामगुणाः ॥ आढकी तुवरी चापि सा प्रोक्ता शणपुष्पिका ॥ आढकी तुवरा रूक्षा मधुरा शीतला लघुः ॥ ग्राहिणी वातजननी वर्ण्या पित्तकफास्रजित् ॥ अथ चणकनामगुणाः ॥ चणको हरिमंथः स्यात्सकलप्रिय इत्यपि ॥ चणकः शीतलो रूक्षः पित्तरक्तकफापहः ॥ लघुः कषायो विष्टंभी वातलो ज्वरनाशनः ॥ श्वेतोप्येवंगुणौ रैपः किंचित्स्याद्रूक्षतः ॥ आर्द्रभृष्टो बलकरो रोचनश्च प्रकीर्त्तितः ॥ शुष्कभृष्टोति रूक्षः स्याद्वातकुष्ठप्रकोप

स

॥७७१॥

णः ॥ स्विन्नः पित्तकफौ हन्यात्सूपः क्षोभकरो मतः ॥ अर्द्धपक्वैश्च तच्छिन्नैर्होलको वन्हि
भर्जितैः ॥ होलकोल्पानिलो मेदःकफश्रमपित्तनाशनः ॥ बल्योतिरुचिकृत्पथ्यः ॥ अथ
माजांनरणांगुरुः ॥ अथ कलायनामगुणाः ॥ कलो वर्तुलः प्रोक्तः सतीनश्च हरेणुकः
कलायो मधुरः स्वादुः पाके रूक्षश्च शीतलः ॥ कषायो वातलो ग्राही कफपित्तहरो ल
घुः ॥ अथ लांकनामगुणाः ॥ त्रिपुटः खंडिकोपि स्यात्कथ्यंते तद्गुणा अथ ॥ त्रिपुटो
मधुरस्तिक्तस्तुवरो रूक्षणोभृशं ॥ कफपित्तहरो रुच्यो ग्राहकः शीतलस्तथा ॥ किं
तु खंजत्वपंगुत्वकारी वातातिकोपनः ॥ अथ कुलत्थीनामगुणाः ॥ कुलत्थिका कुल
त्थश्च कुलाली वनजः परः ॥ कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत ॥ लघुर्विदा
ही वीर्योष्णः श्वासकासकफानिलान् हंति हिक्काश्मरीशुक्रगदानाहान्स ७७१ ॥

पीनसान् ॥ स्वेदसंग्राहको मेदःकृमिज्वरहरः सरः ॥ वन्यो विशेषतः शीतो नेत्रामयवि
षापहः ॥ अथ तिलनामगुणाः ॥ तिलः स्नेहफलः पूतः स्नेहपूरफलस्तथा ॥ तिलः कृ
ष्णः सितो रक्तः स वन्यो जर्तिलः स्मृतः ॥ तिलो रसे कटुस्तिक्तो मधुरस्तुवरो गुरुः ॥
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तकृत् ॥ बल्यः केश्यो हिमस्पर्शस्त्वच्यस्त
न्यो व्रणे हितः ॥ दंत्योल्पमूत्रकृद्ग्राही वातघ्नोग्निमतिप्रदः ॥ कृष्णः श्रेष्ठतमस्तेषु
शुक्लो मध्यमः सितः ॥ अन्ये हीनतराः प्रोक्तास्तज्ज्ञै रक्तादयस्तिलाः ॥ अथातसी
नामगुणाः ॥ अतसी नीलपुष्पी च पार्वती स्यादुमा क्षुमा ॥ अतसी मधुरा तिक्ता
स्निग्धा पाके कटुर्गुरुः ॥ उष्णा दृक्शुक्रवातघ्नी कफपित्तप्रकोपिणी ॥ अथ सर्ष
पनामगुणाः ॥ सर्षपः कटुकः स्नेहस्तंतुभः कदंबकः ॥ गौरस्तु सर्षपः प्राज्ञैः

॥७२॥

सिद्धार्थ इति कथ्यते ॥ सर्षपस्तु रसे पाके कटुः स्निग्धः सतिक्तकः । तीक्ष्णोष्णः कफवातघ्नो
रक्तपित्ताग्निवर्द्धनः ॥ रक्षोहरो जयेत्कंडूकुष्ठकोष्ठकृमिग्रहान् ॥ यथा रक्तस्तथा गौ
रः किंतु गौरो वरो मतः ॥ अथ राई नाम गुणाः ॥ राजी तु राजिका तीक्ष्णगंधा क्षुज्जनि
कासुरी ॥ क्षवः क्षताभिजनकः कृष्णिका कृष्णसर्षपः ॥ राजिका कफवातघ्नी तीक्ष्णो
ष्णा रक्तपित्तकृत ॥ किंचिद्रूक्षाग्निदा कंडूकुष्ठकोष्ठकृमीन्हरेत ॥ अतितीक्ष्णा वि
शेषेण तद्वत्कृष्णापि राजिका ॥ अथ सणनाम गुणाः ॥ सणः प्रोक्तो मातुलानी
जे तु ते तु महासणाः ॥ सणो हिमो गुरुर्ग्राही हितस्तुष्ट्यं प्रदरास्रजित ॥ अथ क्षुद्रधा
न्यं ॥ क्षुद्रधान्यं कुधान्यं च तृणधान्यमिति स्मृतं ॥ क्षुद्रधान्यमनुष्णं स्यात्कषायं
लघु लेखनं ॥ मधुरं कटुकं पाके रूक्षं च क्लेदशोषकं ॥ वातकृद्बद्धविट्कं च पित्तरक्त ॥७२॥

कफापहं ॥ तत्रकंगुनीनामगुणाः ॥ स्त्रियांकंगुप्रियंगू द्वेकृष्णारक्तासितातथा ॥ पीताच
तुर्विधाकंगूस्तासांपीतावरास्मृता ॥ कंगूस्तुभग्नसंधानवातकृद्बृंहणीगुरुः ॥ रूक्षा
श्लेष्महरातीववाजीनांगुणकृद्भृशं ॥ अथचीनाकगुणाः ॥ चीनाकःकंगुभेदोस्तिस
ज्ञेयःकंगुवद्गुणैः ॥ अथसांवानामगुणाः ॥ श्यामाकःश्यामकःश्यामस्त्रिबीजः
स्यादविप्रियः ॥ सुकुमारोराजधान्यंतृणाधीजोत्तमःस्मृतः ॥ श्यामाकःशोषणो
रूक्षोवातलःकफपित्तनुत ॥ अथकोद्रवनामगुणाः ॥ कोद्रवःकोरदूषस्यादु
द्दालोवनकोद्रवः ॥ कोद्रवोवातलोग्राहीहिमःपित्तकफापहः ॥ उद्दालस्तुभवेदु
ष्णोग्राहीवातकरोभृशं ॥ अथखरबीजनामगुणाः ॥ चारकःखरबीजंस्यान्नक
ष्यंतेतद्गुणाअथ ॥ चारकोमधुरोरूक्षोरक्तपित्तकफापहः ॥ शीतोलघुरवृष्य

ऽल्पकषायो वातकोपनः ॥ अथ वंशबीजकोद्भवगुणाः ॥ यवा वंशभवा रूक्षाः कषायाः
कटुपाकिनः ॥ बद्धमूत्राः कफघ्नाश्च वातपित्तकराः सराः ॥ अथ करडनामगुणाः ॥
कुसुंभबीजं च रयसैव प्रोक्ता वराटिका ॥ वरटा मधुरा स्निग्धा रक्तपित्तकफापहा ॥
कषाया शीतला गुर्वी स्याद्वृष्यानिलापहा ॥ अथ गवेडुवानामगुणाः ॥ गवेधुका
तु विद्वद्भिर्गवेधुः कथिता स्त्रियां ॥ गवेधुः कटुका स्वाद्वी कार्श्यकृत्कफनाशिनी ॥
अथ तीनीनामगुणाः ॥ प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतं ॥ नीवारः शी
तलो ग्राही पित्तघ्नः कफवातकृत ॥ अथ जूर्णानामगुणाः ॥ यवनालो देवधान्यं
जूर्णाह्वो जून्हलो पि च ॥ जूर्णलो बीजपुष्पश्च पुष्पगंधश्च कीर्त्तितः ॥ यवनलो हि
मः स्वादुर्लौहितः श्लेष्मपित्तजित ॥ अथ वष्यस्तुवरो रूक्षः क्लेदकृत्कफपित्तो लघुः

अथ वाजरीगुणाः ॥ वाजरी दुर्जरा ज्ञेया कफवातहरा मता ॥ पित्तप्रकोपना गुर्वी श्रे-
ष्मा वल्या च गुर्जरे ॥ धान्यं सर्वं नवं स्वादु गुरु श्लेष्मकरं स्मृतं ॥ तत्तु वर्षोषितं पथ्यं य-
तो लघुतरं हितं ॥ एतेषु यवगोधूम तिलमाषा नवा हिताः ॥ पुराणा विरसा रू-
क्षा न तथा गुणकारिणः ॥ यवाद्यो नवाः स्वस्थान प्रतिहिताः ॥ पथ्या षष्टिनां तु पु-
राणाः हिताः ॥ पुराणायवगोधूमक्षौद्रजांगलसूल्यभुगिति वाग्भटेनोक्तत्वात्
अथ मांसस्य नामानि गुणाश्च ॥ मांसं तु पिशितं क्रव्यमामिषं पललं पलं ॥ मांसं
वातहरं सर्वं वृंहणं बलपुष्टिकृत ॥ प्रीणनं गुरु हृद्यं च मधुरं रसपाकयोः ॥ अ-
पतद्भेदः ॥ मांसवर्गो द्विधा ज्ञेयो जांगलानूपभेदयः ॥ तत्र जांगललक्षणमाह ॥
मांसवर्गे त्रिजंघाला विलस्था स्याद्गुहाशयाः ॥ तथा परो मृगा ज्ञेया विष्किराः प्र-

तुदाश्चपि ॥ प्रसहाश्चयथाक्रमाश्चाष्टौजांगलजातयः ॥ अथजांगलगुणानाह ॥ जांग
लामधुरारूक्षाःकषायालघवस्तथा ॥ बल्यावृष्यावृंहणाश्चदीपनादोषहारिणः
मूकतामिन्मनत्वंचगद्गदत्वार्दितंतथा ॥ बाधिर्यमरुचिंछर्दिंप्रमेहमुखजान
गदान् ॥ श्लीपदंगलगंडंचनाशयंत्यनिलामयान् ॥ अथानूपलक्षणमाह ॥ कूले
चराःप्लवाश्चापिकोशस्थाःपादिनस्तथा ॥ मत्स्याएतेसमाख्याताःपंचधानूपजा
तयः ॥ अथानूपगुणानाह ॥ आनूपामधुराःस्निग्धागुरवोवह्निसादनाः ॥ श्लेष्म
लाःपिच्छिलाश्चापिमांसपुष्टिप्रदाभृशं ॥ तथाभिष्यंदिनस्तेहिप्रायोऽपथ्यतमाः
स्मृताः ॥ अथजेघालानांगणनाविशिष्टाग्रणाश्च ॥ हरिणैणकुरंगर्ष्यपृषतन्यं
कुशंबराः ॥ राजीवोपिचमुंडीचेत्याद्याजंघालसंज्ञकाः ॥ हरिणस्ताम्रवर्णःस्या

देनः कुसुमः प्रकीर्तितः ॥ कुरंगईषत्ताम्रः स्याद्धरिणाकृतिको महान् ॥ अथ मेवग
वयः नीलांडकोलोके सरोज्ञ इति भण्यते ॥ पृषतश्चंद्रबिंदुः स्याद्धरिणात्किंचिद
ल्पकः ॥ न्यंकुर्बहुविषाणोऽथ शंबरो गवयान्महान् ॥ राजीवस्तु मृगो ज्ञेयो राजीभिः
परितो वृतः ॥ यो मृगः श्रृंगहीनः स्यात्स मुंडीति निगद्यते ॥ जंघालाः प्रायशः सर्वे
पित्तश्लेष्महराः स्मृताः ॥ किंचिद्वातकराश्चापि लघवो बलवर्द्धनाः ॥ अथ बिलेशया
नां गणनागुणाश्च ॥ गोधाशशभुजंगाखुशल्लक्याद्या बिलेशयाः ॥ बिलेशया
वातहरा मधुरा रसपाकयोः ॥ बृंहणा बद्धविण्मूत्रा वीर्योष्णा अपि कीर्तिताः ॥
अथ गुहाशयानां गणनागुणाश्च ॥ सिंहव्याघ्रवृकाऋक्षतरक्षुद्वीपिनस्तथा
बभ्रुर्जंबुकमार्जाराइत्याद्याः स्युर्गुहाशयाः ॥ बभ्रुः स्थूलपुच्छः रक्तनेत्रः नाकुलो

॥७७५॥

मेदः॥ गुहाशयावातहरागुरुस्समधुराश्चते॥ स्निग्धावल्याहितानित्यंनेत्रघ्नाश्चविका
रिणां॥ अथपर्णमृगाणांगणनागुणाश्च॥ वनौकोवृक्षमार्जारवृक्षमर्कटिकाद
यः॥ एतेपर्णमृगाः प्रोक्ताः सुश्रुताद्यैर्महर्षिभिः॥ वनौकाः वानरः॥ वृक्षमार्जारः वृक्ष
विडालः॥ वृक्षमर्कटिकांखबीइतिलोकेप्रसिद्धा॥ स्मृताः पर्णमृगावृष्याश्चक्षुष्याः
शोषिरोहिताः॥ श्वासार्शःकासशमनाः सृष्टमूत्रपुरीषकाः॥ अथविष्किराणांग
णनागुणाश्च॥ वर्त्तिकालावविकिरकपिंजलकतित्तिराः॥ कुलिंगकुक्कुटाद्याश्चंकि
ष्किराः समुदाहृताः॥ विकीर्य्यभक्षयंत्येतेयस्मात्तस्माद्विष्किराः॥ कपिंजलोगौर
तित्तिरः॥ विष्किरामधुराः शीताः कषायाः कटुपाकिनः॥ वल्यावृष्यास्त्रिदोषघ्नाः
पथ्यास्तेलघवः स्मृताः॥ अथप्रतुदानांगणनागुणाश्च॥ कालकंटकहारीतक ॥७७५॥

पोतशतपत्रकाः ॥ सारिका खंजरीटश्च पिकाद्याः प्रतुदाः स्मृताः ॥ प्रतुद्य भक्षयंत्येते
तुंडेन प्रतुदास्ततः ॥ कालकंटकः गौडादौ डाहुक इति प्रसिद्धः ॥ प्रतुदा मधुराः पित्तक
फघ्नास्तुवरा हिमाः ॥ लघवो बद्धवर्चस्काः किंचिद्वातकरा मताः ॥ अथ प्रसहानां
गुणानाह गुणाश्च ॥ काको गृध्र उलूकश्च चिल्हश्च शशघातकः ॥ चाषो भासश्च कुरर
इत्याद्याः प्रसहाः स्मृताः ॥ शशघातकः बाज इति लोके प्रसिद्धः ॥ प्रसहाः कथिता ए
ते प्रसह्याच्छिद्य भक्षणात् ॥ प्रसहाः खलु वीर्योष्णास्तन्मांसं भक्षयंति ये ॥ ते शोष
भस्मकोन्मादैः शुक्रक्षीणा भवंति हि ॥ अथ ग्राम्याणां गुणानाह गुणाश्च ॥ छाग
मेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ॥ ग्राम्या वातहराः सर्वे दीपनाः कफपि
त्तलाः ॥ मधुरा रसपाकाभ्यां बृंहणा बलवर्द्धनाः ॥ अथ कूलेचराणां गुणानाह

७७ ही

गाश्च ॥ लुलायमंडवाराहचमरीवारणादयः ॥ एते कूलेचराः प्रोक्ता यतः कूलेचरंत्यपां
गंडः खड्गः ॥ कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः ॥ मधुराः शीतलाः स्निग्धा मू
त्रलाः श्लेष्मवर्द्धनाः ॥ अथ प्लवानां गणनागणाश्च ॥ हंससारसकाचाक्षबककौं
चशारिकाः ॥ नंदीमुखीसकांदेवाबलाकाद्याः प्लवा मताः ॥ प्लवंते सलिले य
स्मादेते तस्मात्प्लवाः स्मृताः ॥ काचाक्षो वहहद्धकः ॥ बलाकाचगुली इति लोके प्रसि
द्धाः ॥ प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ॥ वातश्लेष्मप्रदाश्चापि बल
शुक्रकराः सराः ॥ अथ कोशस्थानां गणनागणाश्च ॥ शंखः शंखनकश्चापि
शुक्तिशंबूककर्कटाः ॥ जीवा एवंविधाश्चान्ये कोशस्थाः परिकीर्त्तिताः ॥ शंखन
कः क्षुद्रशंखः ॥ कोशस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ॥ बृंहणा बहुव

७७ ही

द्वी स्वादुष्याश्च बलवर्द्धनः ॥ अथ यादसांगणनामगुणाश्च ॥ कुम्भीरः कुम्भनक्रश्च ग्रो
धः मकरसंकयः ॥ घोटिकः शिशुमारश्चैतेस्या दस्यः यादिनः स्मृताः ॥ कुंभीरो मारको
जलजंतुः ॥ शंकुः साकुचीति लोकेन सिद्धः ॥ यादिनो पिच्छयेतेतु क्लेशस्थानांगुरौः
समा ॥ अथ मत्स्यानांनामानि तत्परांगुणाश्च ॥ मत्स्यो मीनो विसारश्च झषो
वैसारिणोंडजः ॥ शकुलीपृथुरोमा च ससुदर्शन इत्यपि ॥ रोहिताद्यास्तु ये जीवा
स्ते मत्स्याः परिकीर्तिताः ॥ मत्स्याः स्निग्धोष्णमधुरा गुरवः कफपित्तला ॥ वात
घ्ना वृंहणा वृष्या रोचका बलवर्द्धनाः ॥ अथ छागव्यवायसक्तानां दीप्ताग्नीनां च पू
जितः ॥ अथ चिक्रीष्टानां कतिपयानां जंतूनां नामानि गु
णाश्च ॥ तत्र छागस्य नामानि गु
णाश्च ॥ छागलो बर्करः छागो बस्तो जः छेलकः स्तुभः ॥ अजा छागी स्तुभा चापि छेलि

॥७७॥

काचगलस्तनी ॥ छागमांसं गुरु स्निग्धं लघुपाके त्रिदोषनुत ॥ अदाहि वृंहणं नातिशी
तं पीनसनाशनं ॥ देहधातुसमानत्वादनभिष्यंदि वृंहणं ॥ अजास्तु तस्य बालस्य मांसं
लघुतरं स्मृतं ॥ हृद्यं ज्वरहरं श्रेष्ठं वृष्यं स्वादु बलदं भशं ॥ मांसं निष्क्रासितांडस्य छागस्य
कफकृद्गुरु ॥ अजाया अप्रसूताया मांसं पीनसनाशनं ॥ शुष्ककासे रुचौ शोषे हितम
ग्नेः प्रदीपनं ॥ ऊर्ध्वजत्रुविकारघ्नं छागमुंडं रुचिप्रदं ॥ अथ भेडनामगुणाः ॥ मेढ्रो भे
डो मेषउरभ्रउरणोपि च ॥ अविर्वृष्णिस्तथोर्णायुः कथ्यंते तद्गुणा अथ ॥ मेषस्य मां
सं पुष्टै स्यात्पित्तश्लेष्मकरं गुरु ॥ तस्यैवांडविहीनस्य मांसं किंचिल्लघु स्मृतं ॥ अथ
एडकादुंबानामगुणाः ॥ एडकः पृथुशृंगः स्यान्मेदः पुच्छस्तु दुंबकः ॥ एडकस्य पलं
श्लेयं मेषामिषसमं गुणैः ॥ मेदः पुच्छोद्भवं मांसं हृद्यं वृष्यं श्रमापहं ॥ पित्तश्लेष्मक

॥७७॥

रं किंचिद्वातव्याधिविनाशनं ॥ अथ हरिणस्य गुणाः ॥ हरिणः शीतलो बद्धविण्मूत्रो
दीपनो लघुः ॥ रसे पाके च मधुरः सुगंधिः सन्निपातहा ॥ अथ शशस्य नाम गुणाः
शशः शूली लोमकर्णः शशकश्च विलेशयः ॥ शशः शीतो लघुर्ग्राही रूक्षः स्वादुः स
दा हितः ॥ वह्निकृत्कफपित्तघ्नो वातसाधारणः स्मृतः ॥ ज्वरातीसारशोषास्रश्वासा
मयहरः स्मृतः ॥ अथ हस्ती नाम गुणाः ॥ हस्ती मतंगजो दंती मातंगो नैकपः करी ॥ सिं
धुरः कुंजरः पद्मी वारणो द्विरदो द्विपः ॥ इभो दंतावलो नागः कुंभी स्तंबेरमो गजः ॥ ह
स्तिनी धेनुका प्रोक्ता करेणुः करिणी च सा ॥ हस्ती कफानिलौ हन्यादुस्नः पित्तास्र
कोपनः ॥ अथ घोडानाम गुणाः ॥ घोटकः सैंधवो वाजी तुरंगस्तुरगो हरिः ॥ तुरंग
मो हयः सप्तिर्वाहो वीतिर्यपुर्जनी ॥ घोडिका वडवा यामी प्रसूः कोष्ठ्यो च वाजि

॥ ७१८॥

नी॥ तज्ञो घोट्यामध्यतरः शीघ्रगो वेगपूजितः॥ घोटकः कटुकः पाके दीपनः कफपित्तकृ
त्॥ वातहृद्बृंहणो वल्यश्चक्षुष्यो मधुरो लघुः॥ वल्यमध्यतरं मांसं बृंहणं कफपित्तलं
अथ उष्ट्रनामगुणाः॥ उष्ट्रः क्रमेलको वक्रग्रीवः क्रूरस्वाश्रयो मयः॥ द्विककुत्करभो दी
र्घजंघो धूम्रो मरुप्रियः॥ उष्ट्रमांसं लघु स्वादु चक्षुष्यमनिलापहं॥ उष्ट्रमश्रीः प्रश
मनं मेदः पित्तकफप्रदं॥ अथ गर्दभनामगुणाः॥ गर्दभो रासभो भारवाही दूरगमः
खरः॥ गार्दभं पिशितं वल्यं बृंहणं कफपित्तकृत॥ कृष्णाके स लघुष्णे च तदेव परिकी
र्तितं॥ अथ महिषनामगुणाः॥ महिषो घोटकारिः स्यात्कासरश्च रजस्वलः॥ पीन
स्कंधः कृष्णकायो लुलायो यमवाहनः॥ महिषस्यामिषं स्याद्दुस्निग्धोष्णं वात
नाशनं॥ निद्राशुक्रवलस्तन्यतन्द्रा दार्ढ्यकरं गुरु॥ वृष्यं च स स्य विष्टंभि वातपित्ता॥ ७१८॥

स्त्रनाशनं ॥ तद्वद्दारण्यजं विद्यांद्विश्लेषाश्लेषिरोगेहितं ॥ अथ शूकरनामगुणाः

शूकरो रोमशः पोत्री कोलो घोणी किरिः किटिः दंष्ट्री क्रोडस्तब्धरोमा भूदारस्त्र

वराहकः ॥ शौकरं पिशितं स्याद्दृष्यं वातापहं गुरु ॥ स्निग्धोष्णं शुक्रलं हृद्यं निद्रा

स्थूलत्वदार्ढ्यकृत ॥ अथ सिंहशार्दूलनामगुणाः ॥ सिंहः पंचाननोध्यक्षो मृगेंद्रः

केसरी हरिः ॥ शार्दूलः स्यात्पंचनखो मृगनाथः सकृत्प्रजेः ॥ सिंहशार्दूलयोर्मांस

मुष्णं वातोक्षिरोगजित ॥ अथ व्याघ्रचित्रितरक्षुश्वचकनामगुणाः ॥ व्याघ्रो

मृगारिर्भीमहाव्यालो भीमपराक्रमः ॥ चित्रको वेगवांश्चित्री द्वीपी स्यात्तीक्ष्ण

दंष्ट्रकः ॥ चकईहामृगः कोकस्तरक्षुस्तु मृगादनः ॥ कुक्कुरः श्वनकः श्वानो कौलेयः

शुनकश्शुनः ॥ सारमेयः कृतज्ञश्च भषणो मृगदंशकः ॥ व्याघ्रचित्रितरक्षुश्च

॥७९॥

वकाणांपललंगुरु ॥ उष्णंवातहरंस्वर्यंहितमक्षिविकारिणां ॥ अथवृषभनामगु
णाः ॥ वलीवर्द्दोदगूउक्षागौर्गव्योधूर्धरःस्थिरः ॥ अनड्वानृषभोभद्रःसौर
भेयोवृषस्तथा ॥ गोमांसंतुगुरुस्निग्धंपित्तश्लेष्मविवर्द्धनं ॥ वृहणंवातहृद्दास्य
मपथ्यंपीनसप्रणुत् ॥ अथरीछगंडकनामगुणाः ॥ अछोछभल्लभल्लूकाःख
ड्गीखड्गगंडके ॥ अछःस्निग्धोगुरुर्वृष्यःस्वादूष्णःपवनापहः ॥ गंडकोवृंहणवि
ण्मूत्रःपवित्रोनिलनाशनः ॥ अथविडालनकुलनामगुणाः ॥ विडालओतुर्मार्जा
रोवृषदंशकआखुभुक् ॥ नकुलःपिंगलोवभ्रुःसर्पारिःसर्पभक्षकः ॥ मार्जारो
मधुरःस्निग्धोवीर्योष्णःकफवातजित् ॥ कृशतांश्वासकासघ्नोनकुलस्तत्समो
गुणैः ॥ अथवानरनामगुणाः ॥ वानरोमर्कटःकीशोवनौकाःप्लवगोमुखः ॥

॥७९॥

हरिश्शाखामृगः श्लावस्रवंगः स्रवगः कपिः ॥ वानरः पवनश्वासमेदः पांडुकर्मी
नजयेत ॥ अथशृगालनामगुणाः ॥ शृगालो जंबुकः फेरुर्गोमायुः फेरवः शिवा ॥
शिवेश्वो वंचकः क्रोष्टा लोपाकः स्यच्छजंबुकः ॥ शृगालो बलदो वृष्यः सर्ववात
क्षयापहः ॥ अथमूषकनामगुणाः ॥ मूषकः खनकस्तेयी वृषडंदुरुराखुकः
मूषको बद्धविण्मूत्रो वस्यो वृष्योतिलापहः ॥ अथसालैसेधानामगुणाः ॥
शल्लकः शल्लली श्वाविसेधो स्यात्सूचिनी खरा ॥ शल्यकः श्वासकासास्र
शोकदोषत्रयापहः ॥ सेधातथैवविसेया विशेषाद्बलवर्द्धिनी ॥ अथपक्षि
नामानि ॥ पक्षीविहंगमः पत्री शकुनिर्विहगः खगः ॥ अंडजोविः पत्ररथः
पतत्री शकुनिर्द्विजः ॥ अथचटकनामगुणाः ॥ चटकः कलविंकः स्यादन्योग्रा

॥१८०॥

म्यस्तुपुंडुकः । चटकः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः ॥ सन्निपातहरो वेश्मच
टकस्त्वति शुक्रलः ॥ अथ पारेवानामगुणाः ॥ पारावतः कलरवो मंजुघोषो मदो
त्कटः ॥ कपोतो धूम्रधूसरः पांडुः कारणादो धवलः परः ॥ पारावतो गुरुः स्निग्धो रक्तपि
त्तानिलापहः ॥ संग्राही शुक्रलः शीतः कपोतोपि समो मुना ॥ अथ मयूरनामगुणाः
मयूरः स्यंद्रकी केकी मेघरावो भुजंगभुक् ॥ शिखी शिखावलो वर्ही शिखंडी नील
कंठकः ॥ शुक्लापांगः कलापी च मेघनादानुलास्यपि ॥ मयूरो वहरणः श्रोत्रशिरो
हग्वातघ्नो बजित् ॥ उष्णो वलायुर्मेधाग्निकेप्राहक स्वरवर्णदः ॥ सेव्यमायूरजं मां
सं हेमंते शिशिरे मधौ ॥ नष्टारूक्षविषमयाः पथ्यं वर्षास्विप्य हि भक्षणात ॥ अथ
कुक्कुटनामगुणाः ॥ कुक्कुटो विष्किरो दाक्षः कालज्ञ स्फुरणायुधः ॥ कृकवाकु ॥१८०॥

ताम्रचूडः स्याद्दन्यो रण्यकुक्कुटः ॥ कुक्कुटो बृंहणः स्निग्धो वीर्य्योष्णोनिलजिद्गुरुः
चक्षुष्यः शुक्रकफकृत्तद्वन्यो रूक्षः कषायकः ॥ पानीयकुक्कुटः स्निग्धो बृंहणः
श्लेष्मलो गुरुः ॥ अथ शुकसारिकयोर्नामगुणाः ॥ शुको रक्तमुखः कीरो वाग्मी संद
ष्टदर्शनः ॥ सारिका रसिका दूती सुमतिः प्रियवादिनी ॥ शुकः शीतो लघुर्ग्राही क्ष
तकासक्षयापहः ॥ रूक्षस्तद्वन्मता सारी स्निग्धा बुद्धिबलाग्निकृत् ॥ अथ कोकिला
नामगुणाः ॥ कोकिलः कलकंठः स्यात्परपुष्टो वनप्रियः ॥ पिकः परभृतो हारिता
म्राक्षो मधुदूतकः ॥ कोकिलो दीपनो ग्राही चक्षुष्यः क्षयकासजित् ॥ अथ काक
भासनामगुणाः ॥ काको ध्वांक्षो गूढकामो बलिपुष्टः सकृत्प्रजः ॥ वायसो बलिभु
क्काकारावः करटश्चतुरो द्विजः ॥ भासः शिखावान्भासंतो गृध्राकारो रजःप्रभः

॥७८१॥

काकमासभवंमांसंचक्षुष्यंदीपनंलघुः ॥ आयुष्यंबृंहणंचसंक्षतदोषत्रयापहं ॥
अथघुघुनामगुणाः ॥ उलूकःकौशिकःकाकवैरिर्घूकोनिशाचरः ॥ उलूकपललं
मूत्रातिकरंवातप्रकोपदं ॥ अथतित्तिरनामगुणाः ॥ तित्तिरिश्चित्रपक्षःस्यात्कृष्णोगौ
रःकपिंजलः ॥ तित्तिरिर्वर्णदोग्राहीहिक्कादोषत्रयापहः ॥ श्वासकासहरःपथ्य
स्तस्माद्गौरोधिकोगुणैः ॥ अथकछपस्यनामगुणाः ॥ कछपोगूढपात्कूर्मःकम
ठोदृढपृष्ठकः ॥ कछपोबलदोवातोपित्तनुत्पुंस्त्वकारकः ॥ अथमंडूकनामगुणाः
मंडूकःप्लवगोभेकोवर्षाभूर्दर्दुरोहरिः ॥ मंडूकःश्लेष्मलोनातिपित्तलोबलका
रकः ॥ अथकेकडानामगुणाः ॥ कर्कटःकुरपिष्टःस्यात्कुलीरःषोडशांघ्रिकः
कर्कटोबृंहणोबल्यःशीतलोसृग्दरापहः ॥ अथसर्पनामगुणाः ॥ सर्पोभुजं

॥७८१॥

गोभुजंगो व्यालस्त्वाशीविषस्त्वहिः ॥ गूढपादुरगो नागो दर्वीकाकोदरो विषी ॥
चक्षुःश्रवाः पदाकुंडल्योऽप्यहिर्गूढपात्फणी ॥ सर्पाणां चं हराणां मांसं चक्षुष्यं स्वे
हनं गुरु ॥ दूषीविषकृमिहरं मेधाग्निबलवर्द्धनं ॥ अथ मत्स्यभेदरोहितगुणाः ॥
रक्तोदरो रक्तमुखो रक्ताक्षो रक्तपक्षतिः ॥ कृष्णपक्षो सषण्णेच्छो रोहितः कथितो बु
धैः ॥ रोहितः सर्वमत्स्यानां वरो वृष्योऽर्द्दितार्त्तिजित ॥ कषायानुरसः स्वादुर्वातघ्नो ना
तिपित्तकृत ॥ ऊर्ध्वजत्रुगतान्रोगान्हन्याद्रोहितमंडकं ॥ अथ विशेषः ॥ सद्योहतस्य
मांसं स्याद्धोधिघाति पथ्यामतं ॥ चपेस्वं चं हराणां सात्म्यमन्यथा तद्विवर्जयेत ॥ स्व
यं मृतस्य चाप्यल्पमतीसारकरं गुरु ॥ वृद्धानां दोषलं मांसं बालानां वलदं लघु ॥
त्रिदोषकृद्यात्तज घंष्णु क्लिन्नं ष्मलकरं गुरु ॥ विहंगेष्वप्रमानं प्रोक्षेषुः स्त्रीचेत्पुष्पद

॥७८२॥ जातिषु ॥ परार्द्धं लघु पुंसां स्यात्स्त्रीणां पूर्वार्द्धमादिशेत् ॥ देहमध्यं गुरु प्रायः सर्वेषां
प्राणिनां स्मृतं ॥ इति मांसनामगुणाः ॥ अथ पानीयनामानि गुणाश्च ॥ पानीयं स
लिलं नीरं कीलालं जलमंबु च ॥ आपो वा वारि कं तोयं पयः पाथस्तथोदकं ॥ जीवनं
वनमंभोर्णोऽमृतं घनरसोपि च ॥ पानीयं शीतलं हृद्यं हंति पित्तविषभ्रमान् ॥
दाहाजीर्णश्रमछर्द्दिमदमूर्छामदात्ययान् ॥ तच्छीतं स्तिमितं क्लोष्मे गलरोगे नवे
ज्वरे ॥ गूरुहरणे पीनसाध्मानहिक्कागलेषु विद्रधौ ॥ कासमेहारुचिश्वासपांडुवा
नामयेषु च ॥ पार्श्वशूले स्नेहपाने सद्यःशुद्धौ न शस्यते ॥ यः पानीयं पिबति पि
प्रीरं स्यादुनित्यं निशीथे प्रत्यूषे वा पिबति यदि वा प्राणरंध्रेण धीरः ॥ सोयं
सद्यः पतगपतिना स्पर्द्धते नेत्रकांत्या सर्गाचार्य्यं प्रहसति धिया देषि दसौ ॥७८२॥

च तत्वा ॥ तत्वं तोयं पादभागेन हीनं पथ्यं प्रोक्तं वातजातामयघ्नं ॥ अर्द्धक्षीणेनं नाशये

द्वातपित्तं पादप्रायं तत्त्रिदोषामयघ्नं ॥ हेमंते पादहीनं तु पादार्द्धोनं तु शारदे ॥ प्राव

ड्सेत शिशिरे ग्रीष्मे वार्द्धावशेषितं ॥ पक्काथ्यमानं निर्वेगं निफेनं निर्मलं भवेत्

तत्सर्वदोषशमनं दीपनं पाचनं लघु ॥ अपनयति पवन दोषं दलयति कफमा

शु मांद्यमपहरति चिं ॥ पाचयति चान्नमनलं पुष्णाति निशोथ्यपीतमुष्णांभः ॥ अप

वेताज्जलगुरुणा नाह ॥ रात्रौ पीतमजीर्णदोषशमनं ध्वंसेति सामान्यतः पीतं या

रिनिशावसानसमये सर्वामयध्वंसनं ॥ भुक्त्वा तूर्ध्वमिदं च पुष्टिजननं प्राक्चे

द्वपुष्टिप्रदं हृद्यं जाठरवह्निपाटवकरं पथ्यं च भुक्तांतरे ॥ अथ दुग्धस्य नामानि

गुणाश्च ॥ दुग्धं क्षीरं पयः स्तन्यं बालजीवनमित्यपि ॥ उषस्य नमन्ते सौम्यं तत्र

अथ गुणानुच्यते ॥ दुग्धं बलकरं शीतं मधुरं वातपित्तजित् ॥ स्निग्धं रसायनं मेध्यं जी
वनं धातुवर्द्धनं ॥ रोते रोगहरं श्वाससक्षयार्शोभ्रमनुद्वे ॥ विरेकवांतिवस्तीनां तु
ल्यमोजोविवर्द्धनं ॥ जीर्णज्वरे मनोरोगे शोषमूर्छाभ्रमेषु च । ग्रहण्यां पांडुरोगे च
दाहे तृषि हृदामये ॥ शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदांकुरे । रक्तपित्तेतिसारे च
योनिरोगे श्रमे क्लमे ॥ गर्भस्रावे च सततं हितं मुनिवरैः स्मृतं ॥ अथ गोदुग्धस्य
गुणाः ॥ गोक्षीरं मधुरं शीतं गुरु स्निग्धं रसायनं ॥ बृंहणं स्तन्यकृद्दर्प्यं जीवनं
वातपित्तजित् ॥ अथ महिषीदुग्धस्य गुणाः ॥ माहिषं मधुरं गव्यात् स्निग्धं शु
क्रकरं गुरु ॥ निद्राकरमभिष्यंदि क्षुधाधिक्यकरं हिमं ॥ अथ छागीदुग्धगुणाः
आजं कषायं मधुरं शीतं ग्राहि पयो लघु । रक्तपित्तातिसारघ्नं क्षयकासज्वर

तापहं ॥ अथमेंडीदुग्धगुणाः ॥ आविकं लवणं स्वादु स्निग्धोष्णं चाश्मरीप्रणुत
पथ्यं वातप्रकोपे च कासे चानिलसंभवे ॥ अथउष्ट्रीक्षीरगुणाः ॥ औष्ट्रं दुग्धं ल
घु स्वादु लवणं दीपनं तथा ॥ कृमिकुष्ठकफानाहशोथोदरहरं सरं ॥ अथनारी
दुग्धगुणाः ॥ नार्याः पयो लघु पथ्यं शीतं दीपनं वातपित्तजित ॥ चक्षुःशूलाभिघातघ्नं
नस्याश्च्योतनयोर्वरं ॥ अथदधिनामगुणाः ॥ दधि स्वाद्वम्लं पयस्यं च मंगल्यं क्षी
रजं तथा दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु ॥ पाकेम्लं ग्राहि पित्तास्रशोथ
मेदःकफप्रदं ॥ मूत्रकृच्छ्रे प्रतिश्याये शीतके विषमज्वरे ॥ अतीसारे रुचौ का
र्श्ये शस्यते च लघुक्रमकृत ॥ मंदं त्रिदोषजनकं मधुरं वातपित्तजित ॥ अम्लं पि
त्तास्रकफकृदत्यम्लं रक्तपित्तकृत ॥ मधुराम्लं गुरौ मिश्रैर्दधि पूर्ववदादि

॥७८४॥

शीत ॥ मंदमीषत्स्मातं ॥ अथ गोदधिगुणाः ॥ गव्यं दधि विशेषेण स्वादुवल्यं रुचिप्र
दं ॥ पवीत्रं दीपनं स्निग्धं पुष्टिकृत्पवनापहं ॥ अथ माहिषीदधिगुणाः ॥ माहिषं
दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत ॥ स्वादुपाकमभिष्यंदि वृष्यं गुर्वस्रदूषकं
अथ दधिजलगुणाः ॥ उष्णाम्लं रुचिवृद्धिधं क्लमहरं बल्यं कषायं रसे भुक्तिछं
दकरं तर्षोदरादाहार्शसां नाशनं ॥ स्रोतःशुद्धिकरं कफानिलहरं विष्टंभ
शूलापहं पांडुच्यासविकारगुल्मशमनं मस्तु प्रशस्तं लघु ॥ अथ सरस्य लक्ष
णमाह ॥ दध्नस्तु परियो भागो घनः स्नेहसमन्वितः ॥ स लोके सर इत्युक्तः क्तश्चिकि
त्साकोविदैरिह ॥ सरः स्वादुर्गुरुर्वृष्यो वातवह्निप्रणाशनः ॥ साम्लो बस्तिप्र
धमनः पित्तश्लेष्मविवर्द्धनः ॥ अथ तक्रनामगुणाः ॥ दंडाहतं कालसेयं गो ॥७८४॥

रसेश्च विलोडितं ॥ ससरं निर्जलं घोलं मथितं सरवर्जितं ॥ समोदकं श्वेतमथमुद
श्वि दर्द्धवारिकं ॥ पादोदकं भवेत्तक्रमर्द्धांभोन्ये च भाषिरे ॥ तक्रं ग्राहि कषायाम्लं
मधुरं दीपनं लघु ॥ वीर्योष्णं बलदं रूक्षं प्रीणनं वातनाशनं ॥ हंति सोफगरछ
र्द्दिः ह्रिप्रसेक विषमज्वरान ॥ पांडुमेदोग्रहण्यर्शो मूत्रकृच्छ्रभगंदरान ॥ मेहं
गुल्ममतीसारं शूलप्लीहकफक्रमीन ॥ श्वित्रकोठकफव्याधिकुष्ठशतन्सोदरा
पचीः ॥ वातपित्तहरं घोलं मथितं कफपित्तनुत ॥ उदश्विल्कफकृद्बल्यंश्रम
घ्नं परमं मतं ॥ श्वेतं शीतं बले लघु च पित्तश्रमतृषांहरं ॥ वातनुल्कफकृत्तु दीप
नं लवणान्वितं ॥ अथ नवनीतनामगुणाः ॥ म्रक्षणं सरजं हैयंगवीनं नवनी
तकं ॥ नवनीतं तु सद्यस्कं स्वादुग्राहिहिमं लघु ॥ मेध्यं किंचित्कषायाम्लमीष

॥ ७८५ ॥

तक्रांशसंक्रमात् ॥ नवनीतं चिरोद्धृतं गुरु मेदः कफप्रदं ॥ सक्षारकटुकाम्लत्वाच्छर्दि
अर्शःकुष्ठकारकं ॥ नवनीतं हितं गव्यं वृष्यं वर्ण्यं बलाग्निकृत् ॥ संग्राहि यातपित्ता
सृक्क्षयार्शोर्दितकासहृत् ॥ तद्धितं बालके वृद्धे विशेषादमृतं शिशोः ॥ अथ घृ
तस्य नामानि गुणाश्च ॥ घृतमाज्यं हविः सर्पिराधारममृताह्वयं ॥ घृतं रसाय
नं स्वादु चक्षुष्यं वह्निदीपनं ॥ शीतवीर्यं विषालक्ष्मीतापपित्तानिलापहं ॥ अ
ल्पाभिष्यंदि कांत्योजस्तेजोलावण्यबुद्धिकृत् ॥ उदावर्तज्वरोन्मादशूलानाह
व्रणान् जयेत् ॥ स्निग्धं कफकरं रक्षःक्षयवीसर्परक्तजित् ॥ स्वर्यं क्षतहरं पा
पःश्रास्य ते बाले वृद्धये ॥ वर्षादूर्ध्वं भवेदाज्यं पुराणं तत्त्रिदोषजित् ॥ मूर्छाकुष्ठ
विषोन्मादपस्मारतिमिरापहं ॥ सर्वेषु गुणाकृद्व्यमाधिकं निर्दितं पुनः ॥ ॥ ७८५ ॥

अथ गोमूत्रगुणाः ॥ गोमूत्रं कटु तीक्ष्णोष्णं क्षारं तिक्तं कषायकं ॥ लघ्वग्निदीप
नं मेध्यं पित्तकृत्कफवातहृत् ॥ शूलगुल्मोदरानाहकंडूक्षिमुखरोगजित् ॥ कि
लासगदवातामवस्तिरुक्कुष्ठनाशनं ॥ कासश्वासापहं शोथकामलापांडुरो
गहृत् ॥ मूत्रं गोनागमहिषीहयाजाविखरोष्ट्रजं ॥ नराणां च भवेत्सर्वं पाचनं
दीपनं लघु ॥ गोजाविमहिषीणां तु स्त्रीणां मूत्रं प्रशस्यते ॥ खरोष्ट्रेभनराश्वा
नां पुंसां मूत्रं हितं मतं ॥ अथ तैलस्य स्वरूपनिरूपणं ॥ तिलादिस्निग्धवस्तूनां
स्नेहस्तैलमुदाहृतं ॥ तत्तु वातहरं सर्वं विशेषात्तिलसंभवं ॥ अथ तिलतैलगु
णाः ॥ तिलतैलं गुरु स्थैर्यबलवर्णकरं सरं ॥ वृष्यं विकाशि विशदं मधुरं रस
पाकयोः ॥ सूक्ष्मं कषायानुरसं तिक्तं वातकफापहं ॥ वीर्येणोष्णं हिमं स्पर्शे

॥ ७८ ही ॥

वेहरणं रक्तपित्तकृत ॥ लेखनं वद्धविण्मूत्रं त्वगामांश्यसोधनं ॥ दीपनं वुद्धिदं मेध्यं
व्यवायिव्रणमेहनुत ॥ श्रोत्रयोनिशिरःशूलनाशनं संघुताकरं ॥ त्वच्यं केश्यं
च चक्षुष्यमभ्यंगे भोजनेत्वपथा ॥ मथितच्युतविछिन्नभग्नव्यालविषादिषु ॥
क्षते ग्निदग्धे तत्पथ्यं पानाभ्यंगादिभिः सदा ॥ घृतमब्दात्परं पक्कं हीनवीर्य्यं प्र
जायते ॥ तैलं पक्कमपक्कं वा चिरस्थायि गुणाधिकं ॥ अथ सर्षपतैलगुणाः ॥ दी
पनं सार्षपं तैलं कटुपाकरसं लघु ॥ लेखनं स्पर्शवीर्योष्णं तीक्ष्णं पित्तास्रदूषकं
कफमेदोनिलार्शोघ्नं शिरःकर्णामयापहं ॥ कंडूकोठकृमिश्वित्रकुष्ठदुष्टव्रणेरण
प्रणुत ॥ अथातसीतैलगुणाः ॥ तैलं तु स्यसवीजानां वस्यं चक्ष्यं गुरु स्मृतं ॥ वात
हृत्कफहृच्छीतं स्वादुपाके रसं चतत ॥ अथैरंडतैलगुणाः ॥ एरंडतैलं तीक्ष्णो ॥ ७८ ही ॥

संदीपनं पिछिलं गुरु ॥ वर्ष्यं त्वच्यं वपःस्थापि मेधाकांतिबलप्रदं ॥ कषायानुरसं सू
क्ष्मं योनिशुक्रविशोधनं ॥ विसं स्वादुरसे पाके सतिक्तं कटुकं सरं ॥ विषमज्वरहृ
द्रोगपृष्ठगुह्यादिशूलहृत ॥ हंति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ॥ वातशो
णितविड्बंधप्लेहमश्मरीं पामविद्रधीन् ॥ अथ रालतैलगुणाः ॥ तैलं सर्जरसोद्भूतं ।
विस्फोटव्रणनाशनं ॥ कुष्ठपामाकृमिहरं वातश्लेष्मामयापहं ॥ अथ मधुनो ना
मानि गुणाश्च ॥ मधु माक्षिक माध्वीक क्षौद्र सारघमीरितं ॥ मधु शीतं लघु स्वादु
रूक्षं ग्राहि विलेखनं ॥ चक्षुष्यं दीपनं स्वर्यं व्रणशोधनरोपणं ॥ सौकुमार्यकरं
सूक्ष्मं परं स्रोतोविशोधनं ॥ कषायानुरसं ह्लादि प्रसादजनकं परं ॥ वर्ण्यं मेधाकरं वृष्यं
विशदं रोचनं हरेत् ॥ कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ॥ मेदस्तृष्णा

॥१८१॥

वमिश्वासहिक्कातीसारविड्ग्रहान् ॥ दाहक्षतक्षयांस्तत्तु योगवाह्यल्पवातलं ॥ अ
थमदननामगुणाः ॥ मदनंतु मधूच्छिष्टं मधुशेषं च सिक्थकं ॥ मधूछाधारो
मदनकं मधूच्छिष्टमपिस्मृतं ॥ मदनं मृदु सुस्निग्धं भूतघ्नं व्रणरोपणं ॥ भग्न
संधानकृद्वातकुष्ठविसर्परक्तजित् ॥ अथेक्षोर्नामानि गुणाश्च ॥ इक्षुर्दीर्घ
छदः प्रोक्तस्तथा भूरिरसोपि च ॥ गुडमूलोसिपत्रश्च तथा मधुतृणः स्मृतः
तृणराजश्च संप्रोक्तो गंडीरी मत्कपुष्पकः ॥ इक्षुः स्वादुरसः शीतो वृष्यः स्नि
ग्धो बलप्रदः ॥ जीवनी वातपित्तघ्नः कुर्यान्मूत्रकफकृमीन् ॥ अथ फाणितल
क्षणं गुणाश्च ॥ इक्षोरसस्तु यः पक्वः किंचिद्गाढो बहुद्रवः ॥ स एवेक्षुविका
रेषु ख्यातः फाणितसंज्ञया ॥ फाणितं गुर्वभिष्यंदि बृंहणं कफशुक्रकृत् ॥ १८१ ॥

वातपित्तश्रमान्हंति मूत्रवस्तिविशोधनं ॥ अथ मत्स्यंडीलक्षणंगुणाश्च ॥ इक्षोर
सोयः संपक्वो घनः किंचिद्द्रवान्वितः ॥ मंदंस्यंदेत तस्मान्मत्स्यंडीति निगद्यते
मत्स्यंडी भेदिनी बल्या लघ्वी पित्तानिलापहा ॥ मधुरा बृंहणी वृष्या रक्तदोषाप
हा स्मृता ॥ अथ गुडस्य लक्षणं नामानि गुणाश्च ॥ इक्षो रसो यः संपक्वो जायते ॥
लोष्ठवद्दृढः ॥ स गुडो गौडदेशे तु मत्स्यंड्येव गुडो मतः ॥ गुडः स्यादिक्षुसारस्तु सि
ताद्विक्षु शिशुप्रियः ॥ गुडः समधुरः क्षारो गुरुः स्मः कफवातनुत ॥ आहितः पित्तस्को
चवलपित्ताग्निकृत्सरः ॥ पित्तघ्नः पवनार्तिजित्कृमिकरो हृद्यस्त्रिदोषापहः संयो
गेन विशेषतो ज्वरहरः संतापशांतिप्रदः ॥ विण्मूत्रामयशोधनोऽग्निजननः पांडु
प्रमेहांतकः स्निग्धः स्यात्तरो लघुः श्रमहरो येष्य पुराणो गुडः श्लेष्माण

॥१८८॥

माक्षुविनिहंतिसदार्द्रकेणपित्तंनिहंतिचसहरीतकीभिः॥ शुंठ्यासमंहरति।
वातमशेषमित्यंदोषत्रयक्षयकरायनमोगुडाय॥ अथशर्करानामगुणाः॥ शर्करे
क्षातुमीनांडीस्यैतामत्स्यंडिकाचसा॥ अहिछत्रासुसिकतासितायैवगुडोद्भवा॥
शर्करामधुराशीतापित्तदाहश्रमापहा॥ रक्तदोषहरभ्रांतिक्लमकोपघ्नरगाघ्नी
अथमिश्रीगुणाः॥ सितोपलासरालध्वीवातपित्तहरीहिमा॥ अथमधुखंडगु
णाः॥ मधुजाशर्करारूक्षाकफपित्तहरीगुरुः॥ छर्द्यतीसारतृड्दाहरक्तहृतुव
राहिमा॥ अथभक्तस्यनामानिसाधनंगुणाश्च॥ भक्तमन्नंतथांधःक्वचिक्कचित्कू
रश्चकीर्तितं॥ ओदनोदरुख्यापोभिस्साहिदिविःपुंसिभाषितः॥ सुधौतानतंदुला
न्स्फीतांस्तोयेपंचगुणेपचेत॥ तद्भक्तंप्रस्रुतंचोष्णंविशदंगुणवन्मतं॥ भक्तंच ॥१८५॥

न्निकरं पथ्यं तर्पणं रोचनं लघु॥ रसे पाके च मधुरं वातपित्तहरं परं॥ वृष्यं कृशहितं
नातिश्लेष्मलं बलकारकं॥ सुधौतं प्रस्रुतं चोष्णं विशदं गुणवन्मतं॥ अधौतमस्रु
तं शीतं गुर्व्वरुच्यं कफप्रदं॥ अथ सूप॥ दलितं तु शमीधान्यं दालिर्दाली स्त्रियामुभे
दाली तु सलिले सिद्धा लवणार्द्रकहिंगुभिः॥ संयुक्ता सूपनाम्नी स्यात्कथ्यते तद्गुणा
अथ॥ सूपो विष्टंभको रूक्षः शीतः स तु विशेषतः॥ निस्तुषो भृष्टसिद्धस्तु लाघवं
सततं व्रजेत॥ अथ भृष्टतंदुलजभक्त॥ भृष्टतंदुलजं भक्तं रुचिकृत्कपलघु॥ वात
पित्तहरं ग्राहि ज्वरयक्ष्मातिसारनुत॥ अथ खिचरी॥ मुद्गतंदुलजा ज्ञेया कृशरा र
शुक्रला लघुः॥ भक्तातो दुर्जरा वल्या पुष्टिकृत्तर्पणी हिमा॥ अथ पोलिका॥ गोधू
मपोलिका वल्या कफला वातनुद्गुरुः॥ शुक्रला मधुरा पाके पित्तघ्नी वृंहणी सरा

॥७८८॥

अथ सूपस्य विशेषगुणाः ॥ मौद्गः सूपस्त्रिदोषघ्नो नयनप्रीतिहिमश्चाराराको वातकर्ता
रुच्यः पित्तास्रहंता च पथ्यो रूक्षोदितो वातलश्चाढकीजः ॥ वल्यो माषस्य पित्तं जनयति
सकफं रक्तकृद्वातहर्ता नितांतं कुलत्थो मौद्गवत्स्याद्दर्पपवनकरौ ऽग्निविनिष्पावसूपौ ॥
अथ खीरी ॥ आर्द्रीवर्षिशेषक्वथानादुग्धे क्षोद्गान्नस्तंदुलान् ॥ पचेल्लाति द्रव्य घनं
परमान्नमिदं स्मृतं ॥ पायसं दुर्जरं बल्यं धातुपुष्टिप्रदं गुरु विष्टंभि पित्तरक्ताग्नि
मारुताग्निहरेत् क्रमात् ॥ अथ कढी ॥ स्थाल्यां घृते वा तैले वा हरिद्रां हिंगु भर्जयेत्
अवलेहन संपक्वं तक्रं चैव विनिक्षिपेत् ॥ एषा सिद्धा समरिचा क्वथिता क्वथिता बुधैः
क्वथिता पाचनी रुच्या लघ्वी वह्निप्रदीपिनी ॥ कफानिलविबंधघ्नी किंचित्पि
त्तप्रकोपिनी ॥ अथ पर्परोटिका ॥ पर्पजारोटिका रुच्या मधुरा विशदा लघुः ॥७८८॥

मलस्तुष्कानिलक्करीवस्याहंतिकफानिलान् ॥ पीनसश्वासकासांश्च मेदोमेहग
लामयान् ॥ अथ पर्पटकाः ॥ माषाणां पिष्टिकां पक्कां लवणार्द्रकहिंगुभिः ॥ कृत्वावि
दध्यात्पटकांस्तांस्तैले प्रपचेच्छनैः ॥ पिष्टपर्पटकावस्याचंहरणावलवर्द्धनाः ॥ वा
तामयहरा रुच्या विष्टंभादहिता पहाः ॥ विवंधभेदितः श्लेष्मकारिणोल्पाग्निपू
जिताः ॥ अथ मोदीलड्डु ॥ मुद्गानां धूमसीं सम्यक् धौलयेन्निर्मलांबुनां ॥ कटाहस्थघृ
तस्योर्ध्वे सर्सरं स्थापयेत्ततः ॥ धूमसीं तु द्रवीभूतां प्रक्षिपेत् ससरीरोसं परि ॥ पतं

समन्विता ॥ शर्करोदकनाम्नी तत्प्रसिद्धं विदुषां मुखे ॥ शर्करोदकमाख्यातं पुष्टकरं
स्निग्धशिरं सरं ॥ वल्यं रुच्यं लघु स्वादु वातपित्तास्रनाशनं मूर्छाछर्दितृषादाहज्वरघ्नं

॥७६०॥

तिविंदवस्तस्मास्तु पक्कांस्तान् समुद्धरेत् ॥ सितापाकेन संयोज्य कुर्याद्युक्तेन मोदकान् ॥
लघुर्ग्राही त्रिदोषघ्नः स्वादुः शीतो रुचिप्रदः ॥ चक्षुष्यो ज्वरहृद्बल्यस्तर्पणो मुद्गमो
दकः ॥ एवमेव प्रकारेण कार्यो बेसनमोदकः ॥ ते बल्यास्तु घनाः शीताः किंचिद्वातक
रास्तथा ॥ विषंभिनो ज्वरघ्नाश्च पित्तरक्तकफापहाः ॥ अथ निंबूफलपानकं ॥ भागै
कं निंबुजं तोयं षड्भागं शर्करोदकं ॥ लवंगमरिचोन्मिश्रं पानकं पानकोत्तमं ॥ निंबूफल
भवं पानमत्यम्लं वातनाशनं ॥ वन्हिदीप्तिकरं रुच्यं समस्ताहारपाचकं ॥ अथाम्र
फलपानकं मातं जलास्विन्नं मर्द्दितं दृढपाणिना ॥ सिताशीतांबुसंयुक्तं कर्पूरम
रिचान्वितं ॥ प्रपानकमिदं श्रेष्ठं भीमसेनेन निर्मितं ॥ सद्यो रुचिकरं बल्यं शीघ्रमिं
द्रियतर्पणं ॥ अथाम्लिकापानकं ॥ आम्लिकायाः फलं पक्वं मर्द्दितं वारिणा दृ

॥७६०॥

ठं ॥ शर्करामरिचोन्मिश्रं लवंगेंदुसुवासितं ॥ आम्लिकाफलसंभूतं पानकं वातनाश
नं ॥ पित्तश्लेष्मकरं किंचित्सुरुच्यं वह्निबोधकं ॥ अथ शर्करोदकं ॥ जलेन शीतले
नैव घोलिताश्च भूशर्करा ॥ एलालवंगंकर्पूरमरिचैश्च ॥ अथ धान्याकपानकं ॥
सिलायां साधु संपिष्टं धान्यकं वस्त्रगालितं ॥ शर्करोदकसंयुक्तं कर्पूरादिसुसं
स्कृतं ॥ नवीनमृण्मये पात्रे स्थितं पित्तहरं परं ॥ माषपिष्टस्य वा मुद्गपिष्टीसप
दुरामठा ॥ जीरकार्द्रकसंयुक्ता पिंडिता मुष्टिमात्रया ॥ तप्तांबुगर्भिते पात्रे पात्रे
सुस्विन्ना तलिता तथा ॥ स्वादयेयमिंडरीश्च शुष्कारंधिता तक्रणादिभिः ॥ तद्दल
गुणा श्लेष्मपाचि विष्टंभाश्च शुक्रपुष्टिदा ॥ इति माषादिंडरी ॥ अथ कांजीवटा ॥ मंथ
नी नूतना धायीकटु तैलेन लेपिता ॥ निर्मलेनांबुना पूर्य तस्यां चूर्णं विनि

॥ ७९१ ॥
दि

क्षिपेत ॥ राजिकाजीरलवणहिंगुशुंठीनिशाकृतं ॥ निक्षिपेद्घटकोस्तत्र भांडस्यास्यं
च मुद्रयेत ॥ ततो निःत्रयादूर्ध्वमम्लाः स्फवटकाध्रुवं ॥ कांजिकवटको रुच्यो वात
हरः श्लेष्मकारकः शीतः ॥ दाहं शूलमजीर्णं हरते नेत्रामयेषु हितः ॥ अथ लपसी
समितां सर्पिषा भृष्ट्वां शर्कराप्रयसि क्षिपेत ॥ तस्मिन् घनीकृते न्यस्येत् लवंगम
रिचादिकं ॥ सिद्धेषा लप्सिका ख्याता गुणान् अस्या वदाम्यहं ॥ समिता मैदा इति लो
के ॥ लप्सिका वृंहणी वृष्या बल्या पित्तानिलापहा ॥ स्निग्धा श्लेष्मकरी गुर्वीञ्चैः रो
चनी तर्पणी परा ॥ अथ पापरः ॥ माषाणां दालयः स्तोपे स्थापितास्त्यक्तकंचुकाः
आतपे शोषिता यंत्रे पिष्टाः साधुमसी स्मृता ॥ धूमसी रचिता हिंगु हरिद्रा ल
वणैर्युताः ॥ जीरकस्वर्जिकाभ्यां च तनूकृत्य च वेष्टिताः ॥ पर्पटास्ते संदोगारे ॥ ७९१ ॥

भक्षाः परमरोचकाः ॥ दीपनाः पाचना रूक्षा गुरवः किंचिदीरिताः ॥ मोद्गाश्चतद्गु
णाः प्रोक्ता विशेषात्स्वयथोहिते ॥ चणकस्य गुणैर्युक्ताः पर्पटाश्चणकोद्भ
वाः ॥ स्नेहे भक्षास्तु ते सर्वे भवेयुर्मध्यमा गुणैः ॥ अथ शाकपाकविधिः ॥ हिं
गुजीरयुते तैले क्षिपेच्छाकं सुखंडितं ॥ लवणं चाम्लचूर्णादि सिद्धे हिंगूदकं क्षि
पेत ॥ इत्येवं सर्वशाकानां साधने विहितो विधिः ॥ अथ पललं ॥ पललं तु समा
ख्यातं सैक्षवं तिलपिष्टकं ॥ पललं मलकृद्वृष्यं वातघ्नं कफपित्तकृत ॥ बृंहणं
च गुरुः स्निग्धं वृष्यं मूत्रनिवर्तकं ॥ अथ खली ॥ तिलकिट्टं तु पिण्याकस्तथा तिल
खलः स्मृतः ॥ पिण्याको ग्लपनो रूक्षो विष्टंभी दृष्टिदूषकः ॥ अथ मांसरस
पिष्टमांससमुद्भूतः स्मृतो मांसरसो रसः ॥ रसो हृद्यः श्रमश्वासवातपि

त्क्षतापहाः || प्रीणनो व्रणशुष्काणां क्षीणानामल्पचेतसां || विच्छिन्नभग्नसंधानः
पुद्धानां पुष्टिकृत्कांक्षिणां || ग्रस्यते स्वरहीनानां दृष्ट्यायुःश्रवणार्थिनां || अथ पू
ल्पकालखेंडादिमीसानि गूथितानि शलाकया || घृते सत्वरणं दत्वा निर्द्धूमे दह
ने पचेत || तत्तुं पूल्यमिति प्रोक्तं पाककर्मविशारदैः || पूल्यं चल्यं सधातुस्यं रु
च्यं वन्हिकरं लघु || कफवातहरं वृष्यं किंचित्पित्तहरं हितं || अथ वेसवार || गाता
स्थिमांसे संस्विन्नं पुनर्दृषद्दि पेषयेत || व्योषादिसंस्कृतं कृत्वा पचेद्भूयो घृता
न्वितं || वेसवारोयमुद्दिष्टो वल्यो वातहरो गुरुः || स्विन्नमुद्गादिकल्कोपि वेसवा
रः परः स्मृतः || हरिद्राव्योषसिंधूत्थहिंगुधान्यकदाडिमैः || साजाजिभिर्वेसवा
रः सौरभोयमुदाहृतः || इति कतिपयपक्वान्नानि || अथ पारदस्योत्पत्तिना

|| ७८१ ||

मलक्षरणाद्गुणादि ॥ शिवांगात्प्रच्युतं रेतः ॥ पतितं धरणीतले ॥ तद्देहसारजातत्वा-
च्छुक्लमच्छमभूत्ततः ॥ तस्य निरुक्तिमाह ॥ रसायनार्थिभिर्लोकैः पारदो रस्य-
ते यतः ॥ ततो रस इति प्रोक्तः स च धातुरपि स्मृतः ॥ तस्य नामान्याह ॥ पारदो रसधा-
तुश्च रसेंद्रश्च महारसः ॥ चपलः शिववीर्यं च रसः सूतः शिवाह्वयः ॥ तस्य गु-
णानाह ॥ पारदः षड्रसः स्निग्धस्त्रिदोषघ्नो रसायनः ॥ योगवाही महावृष्यः
सदा दृष्टिबलप्रदः ॥ सर्वामयहरः प्रोक्तो विशेषात्सर्वकुष्ठनुत् ॥ मूर्छित्वा ह-
रति रुजं बंधनमनुभूय खेगतिं कुरुते ॥ अजरीकरोति हि मृतः कोन्यः करुणाक-
रः सूतात् ॥ यस्य रोगस्य यो योगस्तेनैव सह योजितः ॥ रसेंद्रो हंति तं रोगं नरकुं-
जरवाजिनां ॥ मलं विषं वन्हिगिरित्वचापलं नैसर्गिकं दोषमुशंति पारदे ॥

॥१८३॥

उपाधिजौ द्वौ त्रपुनागयोगजौ दोषौ रसेंद्रकथितौ मुनीश्वरैः ॥ मलेन मूर्छा मरणं विषेण दाहोग्निना कष्टतरः शरीरे ॥ देहस्य जाड्यं गिरिणा सदा स्याच्चांचल्यतो वीर्य्यहृतिश्च पुंसां ॥ वंगेन कुष्ठं भुजगेन गंडो भवेदतो सौ परिशोधनीयः वन्हिर्विषं मलं चेति मुख्या दोषास्त्रयो रसे ॥ एते कुर्वंति संतापं मृतिं मूर्छां नृणां क्रमात् ॥ अन्ये सैपि कथिता दोषा भिषग्भिः पारदे यदि ॥ तथाप्येते त्रयो दोषा हरणीया विशेषतः ॥ संस्कारहीनं खलु सूतराजं यः सेवते तस्य करोति बाधां देहस्य नाशं विदधाति नूनं कष्टांश्च रोगान् जनयेन्नराणां ॥ अथ सर्वदोषहरः ॥ संक्षिप्तः शोधनविधिः ॥ कुमारिका चित्रक रक्तसर्षपैः कृतैः कषायैर्बृहती विमिश्रितैः ॥ फलत्रिकेनापि विमर्दितो रसो दिनत्रयं सर्वमलैर्विमु

॥१८३॥

च्यते ॥ इतियुगपत्सप्तमलनाशनं ॥ अथान्यत्सिंदूरमतं ॥ रक्तेष्टिकानिशाधूमसा
रैर्लीभस्मचूर्णकैः ॥ जंबीरद्रवसंयुक्तैर्मुहुर्मर्द्यो दिनत्रयं ॥ दिनैकं चापि सूतः
स्यान्मर्द्दनान्निर्मलः परं ॥ ऊर्ध्वपातनयंत्रेण गृह्णीयाच्च पुनः पुनः ॥ पश्चसारणतो
चापि क्षालनाद्धारणात्ततः ॥ अथान्यत्सिंदूरमतं ॥ कुमार्यचित्रिशाचूर्णैर्दिनैकं म
र्द्दयेद्रसं ॥ पातयेत्पातनायंत्रे सम्यक्शुद्धो भवेद्रसः ॥ अथवा गृह्णीयेत्सूतं दर
दात्तन्निगद्यते ॥ कंचुकैर्नागवंगाद्यैर्विमुक्तो रसकर्मणि ॥ हिंगुलाकृष्टसूतस्तु
जीर्णगंधसमो गुणैः ॥ तद्यथा ॥ निंबूरसैर्निंबपत्ररसैर्वा याममात्रकैः ॥ घृष्ट्वा
हिंगुलमूर्ध्वं त्वधःपातयंपातनयंत्रके ॥ तत्सूतं योजयेत्कृष्णात्सप्तकंचुकवर्जि
तं ॥ अन्यत्रापि ॥ अथवा दरदाकृष्टं स्थिलं सेवणांगुभाजितदोषाणां ॥ रसमाद

॥७९४॥

पपथ्येछं कर्त्तव्यस्तेन मेषजेयोगः॥ योगचंद्रिकायामपि॥ निंबूरसैर्निंबदलो रसै
र्वा विमर्द्य पामनं मदमत्र सद्धं॥ सुलिप्तसंधिप्रपचेल्लघ्वग्नौ तदूर्ध्वभांडं पिचुना
द्रयेच्च॥ पामहृद्याद्देवरसं विशुद्धं मध्योर्ध्वलग्नं भिषगाददीत॥ विनैव कर्माष्टक
मेष युक्तः समस्तकर्मस्वचनयाप उक्तः॥ अथैवं शोधितस्य मुखकरणं॥ अथ पव
डुंडुकी ठैष्ण रसो मर्द्यस्त्रिवासरं॥ तद्रसस्य मैर्मुखं तस्य जायते धातुघस्मरं॥
अथ गंधकजारणं॥ मल्लकुंडे निक्षिपेल्लीरं तन्मध्ये च शरावकं॥ महल्लकुंड पिधान
हं मध्ये मेखलयावृतं॥ तिल्वा च मेखलामध्ये चूर्णेनात्र रसं क्षिपेत्॥ रसस्यो
परि गंधस्य रजो दद्यात्समांशकं॥ दत्वोपरि शरावं च भस्ममुद्रां प्रदापयेत्॥ त
स्योपरि पुटं दद्याच्चतुर्भिर्गोमयोपलैः॥ एवं पुनः पुनर्गंधं षड्गुणं जारयेद्बुधः ॥७९४॥

गंधे जीर्णे भवेत्सूत स्तीक्ष्णाग्निः सर्वकार्यकृत् ॥ अपरं समारणं ॥ द्विपलं शुद्धसू
तस्य सूतांकुंशुद्धगंधकं ॥ कंन्यानीरेण संमर्द्य दिनमेकं निरंतरं ॥ रुध्वा तद्भूधरे
यंत्रे दिनैकं मारयेत्पुटात् ॥ अन्यच्च ॥ धूमसारं रसं तोरीं गंधकं नवसादरं ॥ यामै
कं मर्द्दयेदम्लैर्भागं कृत्वा समं समं ॥ काचकूप्यां विनिक्षिप्य तां च मृद्वस्त्रमुद्रया ॥
विलिप्य परितो वक्त्रे मुद्रां दत्वा विशोषयेत् ॥ अधः सच्छिद्रपिठरीमध्ये कूपीं नि
वेशयेत् ॥ पिठरीं वालुकापूरैर्भृत्वा चाकूपिकागलं ॥ निवेश्य चुल्ल्यां तदधो वन्हिं
कुर्याच्छनैः शनैः ॥ तस्माद्दप्यधिकं किंचित्पावकं ज्वालयेत्क्रमात् ॥ एवं द्वादशभि
र्यामैर्म्रियते रससत्तमः ॥ स्फोटयेत्स्वांगशीतं तमूर्ध्वगं गंधकं त्यजेत् ॥ अधस्थं
च मृतं सूतं गृह्णीयात्तं तु मात्रया ॥ यथोचितानुपानेन सर्वकर्मसु योजयेत् ॥

॥७८५॥

गंधकं धूमसारं च शुद्धं सूतं समं त्रयं ॥ यामैकं चूर्णयेत् खल्वे काचकूप्यां विनिक्षिपेत् ॥
रुध्वा द्वादशयामं तद्वालुकायंत्रगं पचेत् ॥ स्फोटयेत् स्वांगशीते च तदूर्ध्वं गंधकं त्यजे
त् ॥ तत्तद्भस्म स्मिमं योगवाहि स्यात् सर्वरोगहृत् ॥ इति रससंकेतकलिकातः प्रोतां नखर्प

अथान्यः प्रकारः ॥ अपामार्गस्य बीजानां मूषायुग्मं प्रकल्पयेत् ॥ तत्संपुटे क्षिपेत् सूतं म
त्स्यदुग्धमिश्रितं ॥ द्रोणपुष्पीप्रसूतानि चिंचागमिरिमेदकः ॥ एतच्चूर्णमध्यमध्योर्ध्वं
दत्वा मुद्रां प्रदीपयेत् ॥ तं गोलं मंधयेत् सम्यक् मृन्मूषासंपुटे सुधीः ॥ मुद्रां दत्वा शोषयि
त्वा ततो गजपुटे पचेत् ॥ एकेनैव पुटेनैव जायते सूतभस्मकं ॥ तत्प्रयोज्यं यथास्था
नं यथामात्रं यथाविधि ॥ अथान्यप्रकारः ॥ काष्ठोदुंबरिकादुग्धैः रसं किंचिद्विमर्द
येत् ॥ तद्दुग्धघृष्टहिंगोश्च मूषायुग्मं प्रकल्पयेत् ॥ क्षिप्त्वा तत्संपुटे सूतं तत्र मुद्रां

॥७८५॥

रेचुह्यांफटकीतेयितेक्षिपेत ॥ पुनर्नवारसे पक्वो मर्द्दनान्म्रियते रसः ॥ रसमपि तत्रैव

प्रदापयेत ॥ धृत्वा तं गोलकं प्राज्ञो मृण्मूषासंपुटे ऽधिके ॥ पचेद्गजपुटे तेन सूतको या

ति भस्मतां ॥ अन्यच्च ॥ वटक्षीरेण सूतां म्रौ मर्द्दयेत्प्रहरद्वयं ॥ पाचयेत्तेन काष्ठेन भ

स्मी भवति तद्रसः ॥ अन्यच्च ॥ अपामार्गस्य बीजानि तेषां रंडं च चूर्णयेत ॥ तच्चूर्णं

पारदे देयं मूषायाम धरोत्तरं ॥ रुद्ध्वा लघुपुटैः पक्वाश्चतुर्भिर्भस्मतां व्रजेत ॥ अन्यच्च

काकोदुंबरिकापाल्क दुग्धेन विभावितो हिंगुः ॥ मर्द्दनपुटनविधानात्सूतं भस्मी

करोत्येव ॥ अन्यच्च ॥ रसः प्रसारिकानीरैर्मर्द्दितो दिनसप्तकं ॥ चक्रमर्द्ददलैः छन्नो मू

षायां भस्मतां व्रजेत ॥ अथ रसकर्पूरविधिः ॥ शुद्धसूतसमं कुर्यात्प्रत्येकं गैरिकं सु

धीः ॥ इष्टिकां खटिकां तद्वत्स्फुटिकां सिंधुजन्मच ॥ वल्मीकक्षार लवणं भांडरं

जनमृत्तिकाः ॥ सर्वाण्येतानि संचूर्ण्य कासीसं परिशोधयेत् ॥ सिंधुजन्म सैंधवं वल्मी
कं तज्जन्ममृत् ॥ क्षारलवणं खरिपातोण इति लोके ॥ भांडरंजनमृत्तिका कुलाल गृहे का
विस इति नाम ॥ एभिश्चूर्णैर्युतं सूतं पाक्याम्ले विमर्दयेत् ॥ तच्चूर्णसहितं सूतं स्था
लीमध्ये परिक्षिपेत् ॥ तस्याः स्थाल्या मुखे स्थालीमपरां धारयेत्समं ॥ सधसंधि कुट्टि
तमृदा मुद्रयेदुभयोर्मुखं ॥ संशोष्य मुद्रयेद्भूयो भूयः संशोष्य मुद्रयेत् ॥ सम्यक् विशो
ष्य मुद्रितां तां स्थालीं चुल्ल्यां निधारयेत् ॥ अग्निं निरंतरं दद्याद्यावद्दिनचतुष्टयं ॥ अंगा
रोपरि तत्रं रक्षेद् घल्लादहर्निशं ॥ शनैर्लेह्णाट्पेयेत्र मूर्ध्वस्थालीगतं रसं ॥ कर्पूरव
त्सुविमलं गृह्णीयात् कुशलोत्तरं ॥ तदेवकुसुमचंदनकस्तूरीकुंकुमैर्युक्तं ॥ खादनेह
रति फिरंगव्याधिं सोपद्रवं सपदि ॥ विंदति च नेह दीप्तिं पुष्टिं पीयूषयति वपुर्ले

॥ ७ टद्दी ॥

रमयति रमणीशतकं रसकर्पूरस्य सेवकः सततं ॥ इति रसकर्पूरः ॥ एवं मारितस्य गुणाः
पारदः क्रमिकुष्ठघ्नो जयदो दृष्टिदः सरः ॥ मत्कुणघ्नो महावीर्यो योगवाही जराहरः
सप्तयोजो रूपदो वृष्यो वह्निकृद्धातुवर्द्धनः ॥ षंडत्वनाशनः सूरः खेचरः सिद्धिदः
परः ॥ अथोपरसाः ॥ गंधो हिंगुलमभ्रतालकशिलाः स्रोतोंजनं टंकणं राजावर्तक
चुंबकौ स्फटिकया शंखः खटी गैरिकं ॥ कासीसं रसकं कपर्दसिकता बोलाश्च कंकुष्ठ
कं सौराष्ट्री च मता अमी उपरसाः सूतस्य किंचिद्गुणैः ॥ तुल्याः स्युर्विधिना विशोध्य
यदि ते संसाधिताः सेवितास्तत्रद्रोगहरा अनुपानसहितैर्योगैश्चिरायुःप्रदाः ॥ तत्रा
दौ गंधकस्योत्पत्तिमाह ॥ श्वेतद्वीपे पुरा देव्यास्तीरे क्षीरपयोनिधेः ॥ क्रीडंत्याः सखि
भिः सार्द्धं प्राभवत्तस्स्वतै रजः ॥ प्रस्तुतं पुष्कलं ॥ प्रस्तुतं पट्टजस्तस्माद्गंधकः समजा

॥ ७६ ॥

यत ॥ अथ तस्य नामानि ॥ गंधको गंधिकश्चापि गंधपाषाण इत्यपि ॥ सौगंधिकश्च
कथितो बलिर्बलिवसापि च ॥ चतुर्धा गंधकः प्रोक्तो रक्तः पीतः सितोसितः ॥ पीत
श्चामलसारः स्याच्छ्रेष्ठो रसरसायने ॥ अथ तस्य गुणाः ॥ गंधकः कटुकस्तिक्तो वी
र्योष्णस्तुवरः सरः ॥ पित्तलः कटुकः पाके कंडूविसर्पजंतुजित ॥ हंति कुष्ठक्षयप्लीह
कफवातान्रसायनः ॥ अथाशुद्धगुणाः ॥ अशुद्धगंधः कुरुते च कुष्ठं तापं भ्रमं पि
त्तरुजं तथैव ॥ रूपं सुखं वीर्यबलं निहंति तस्माद्धि शुद्धो विनियोजनीयः ॥ अथ शो
धनं ॥ लोहपात्रे विनिक्षिप्य घृतमग्नौ प्रतापयेत ॥ तप्ते घृते तत्समानं क्षिपेद्गंध
कजं रजः ॥ विद्रुतं गंधकं ज्ञात्वा तनुवस्त्रे विनिक्षिपेत ॥ यथा वस्त्राद्विनिःसृत्य ।
दुग्धमध्ये खिलः पतेत ॥ शीतो निष्कास्य प्रक्षाल्य जलैर्वस्त्रेण शोषयेत ॥ एवं

॥ ७६ ॥

निर्जलमापन्नो गंधकः शुद्ध उच्यते ॥ एवं वारत्रयं शोध्यो मिलितो दुग्धे प्रयत्नतः ॥ भ
क्षणार्थं तु भिषजा योगार्थं त्विक्रयारतः ॥ अन्यच्च ॥ साज्यभांडे पयः क्षिप्त्वा मुखं व
स्त्रेण बंधयेत् ॥ गंधकं वस्त्रपृष्ठे तु सूक्ष्मं चूर्णित मर्पयेत् ॥ छादयेत्पुटदीर्घेण
खर्परेणैव गंधकं ॥ संधिरोधः प्रकर्त्तव्यो भांडखर्परयोर्मिदा ॥ भांडं निक्षिप्य भू
गर्ते किंचिद्रूक्षे द्वहिर्मुखे ॥ ज्वालयेत्खर्परस्योर्ध्वं जातवेदं वनोपलैः ॥ ततः क्षीरे
द्रुतं गंधं शीतं धौतं जलेन तु ॥ वस्त्रघृष्टं निर्जलं तु शुद्धयोगेषु योजयेत् ॥ अन्यच्च
गंधको द्रावितो भृंगरसे क्षिप्तो विशुद्धयति ॥ सप्तधैवं भक्षणार्थं योगार्थं सकृ
द्वहि ॥ एवं शोधितस्य गुणाः ॥ शुद्धो गंधो हरेद्रोगान् कुष्ठमृत्युजरादिकान्
अग्निकारी महानुष्णो वीर्यवृद्धिं करोति हि ॥ अथ गंधकसेवनप्रकारः ॥ रस्यं

॥ ७९४ ॥

पिष्टुंदुं त्रिकलाज्यसंगमध्वन्वितः श्वासगमितो हि सो हः ॥ ३६ ॥ आक्षिततस्यं कुरुते क्षिप्र
गमं करोति रोगो ह्रस्वितदीर्घमायुः ॥ अत्र पथ्यं तु दुग्धोदनं ॥ अथ हिंगुलस्य नामानि
हिंगुलं दरदं म्लेच्छं चित्रांगं चूर्णपारदं ॥ सुरंगं सगर्भं च वर्वरं रक्तमप्यथ ॥ अथ
तस्य गुणाः ॥ तिक्तं कषायं कटु हिंगुलं स्यान्नेत्रामयघ्नं कफपित्तहारि ॥ हृल्लास
कुष्ठज्वरकामलाघ्नं प्लीहामवातौ च गरं निहंति ॥ अन्यच्च ॥ हिंगुलं मधुरं तिक्तं उ
ष्णं वातकफापहं ॥ त्रिदोषद्वंद्वदोषोत्थं ज्वरं हरति सेवितं ॥ अथास्य शुद्धस्य तस्य
गुणाः ॥ अशुद्धो दरदः कुर्यादांध्यं क्लैब्यं क्लमं भ्रमं ॥ मोहं मेहं च संशोध्य तस्मा
स्माद्देयैस्तु हिंगुलः ॥ अथ शोधनं ॥ मेषीक्षीरेण दरदमम्लवर्गैश्च भावितं ॥
सप्तवारं प्रयत्नेन शुद्धिमायाति निश्चितं ॥ अन्यच्च ॥ सप्तकृत्वार्द्रकद्रावैर्वि

॥ ७९४ ॥

कुचस्यांबुना पिष्टा॥ शोषितो भावयित्वा च निर्दोषो जायते खलु॥ एवं शोधि
तस्य गुणाः॥ तिक्तोष्णं हिंगुलं दिव्यं रसगंधसमुद्भवं॥ मेहकुष्ठहरं हृद्यं वयस्तमे
धाग्निवर्द्धनं॥ हिंगुलस्य शोधनमेव दर्शितं रसगंधयेपुनान्यक्रियांतरमित्यायु
र्वेदप्रकाशकृत॥ अथाभ्रकोत्पत्तिः॥ पुरा वधाय वृत्रस्य वज्रिणा वज्रमुद्धृतं
विस्फुलिंगास्ततस्तस्य गगने परिसर्पिताः॥ ते निपेतुर्घनध्वानाच्छिखरेषु
महीभृतां॥ तेभ्य एव समुत्पन्नं तत्तद्गिरिषु चाभ्रकं॥ तद्वज्रं वज्रजातत्वादभ्रम
भ्ररवोद्भवात्॥ गगनात्पतितं यस्माद्गगनं च ततो मतं॥ ब्रह्मक्षत्रियविट्शूद्र
भेदात्तस्याच्चतुर्विधं॥ क्रमेणैव सितं रक्तं पीतं कृष्णं च वर्णतः॥ प्रशस्यते
सितं तारे रक्तं तत्तु रसायने॥ पीतं हेमनि कृष्णं तु गदेषु द्रुतयेपि च॥ पिनाकं

दर्दुरंनागंवज्रंचेतिचतुर्विधं॥अभ्रकंकथितंप्राज्ञैस्तेषांलक्षणमुच्यते॥मुंचत्य
ग्नौचिनिक्षिप्तंपिनकंदलसंचयं॥अज्ञानाद्भक्षणंतस्यमहाकुष्ठप्रदायकं॥दर्दु
रंत्वग्निनिक्षिप्तंकुरुतेदर्दुरध्वनिं॥गोलकान्बहुशःकृत्वातत्स्यान्मृत्युप्रदा
यकं॥नागंतुनागवद्वन्हौफूत्कारंपरिमुंचति॥तद्भक्षितमवश्यंतुविदधातिभगं
दरं॥वज्रंतुवज्रवत्तिष्ठन्नचाग्नौविकृतिंव्रजेत॥वज्रसंज्ञंतुतद्योग्यमभ्रंसर्वत्र
नेतरत॥अथाभ्रकनामानि॥अभ्रकंस्वच्छमाकोशंपटलंव्योमपीतकं॥अथगुणाः
अभ्रंकषायंमधुरंसुशीतमायुःकरंधातुविवर्द्धनंच॥हन्यात्त्रिदोषंव्रणमेह
कुष्ठंप्लीहोदरग्रंथिविषकृमीश्च॥रोगान्हंतिदृढयतिवपुर्वीर्यवृद्धिंविध
तेतारुण्याढ्यंरमयतिशतंयोषितांनित्यमेव॥दीर्घायुष्याञ्जनयतिसुता॥

नृविक्रमैः सिंहतुल्या नमस्यो मौंजीति हरति सततं सेव्यमानं मताभ्रं ॥ अथाम्बुद्रस्य
भक्षणे दोषमाह ॥ पीडां विधत्ते विविधो नराणां कुष्ठं क्षयं पांडुगदं च शोथं ॥ हृत्पा
र्श्वपीडां च करोत्यशुद्धमभ्रं हितदद्रु रुवन्हि हृतस्यात् ॥ अथ मताभ्रस्य लक्षणे
माह ॥ निष्पंदं कं सुसूक्ष्मं च लोचतां जनसंनिभं ॥ तदा तु मतमित्युक्तं मभ्रकं ना
न्यथा मतं ॥ अन्यच्च ॥ मतं निष्पंदतां याति मरूरणं चामृतोपमं ॥ सचेंद्रं विषवद्ध
द्वैयं मृत्युकृत्केवाधारो भवत् ॥ व्याधारो भवतव्याधाश्चरमाश्चरो भयद्भावरयति तद्ध
द्धितार्थः ॥ अथ मारणोपुटसंख्यामाह ॥ मृताद्दिरत्सुसहस्रां तंःपुटो दैयो रसायने
दशाद्दिरत्सुमृतांतः स्याद्व्याधिनाशनकर्मणि ॥ सहस्रपुटपक्षे तु भावना पुटनं
भवेत् ॥ मर्द्दनं तु तथान स्यादिति प्राचां हि संमतं ॥ अथ शोधनं ॥ वज्राभ्रकं धमे

॥२००॥

वन्हौ ततः क्षीरे विनिक्षिपेत् ॥ भिन्नपत्रं ततः कृत्वा तंदुलीयाम्लयोर्द्रवैः ॥ भावयेदष्ट
यामं तदेवं शुद्ध्यति चाभ्रकं ॥ अथवा दद्दरीक्काथे ध्मातमभ्रं विनिक्षिपेत् ॥ मर्दितं
पाणिना शुद्धं धान्याभ्रादतिरिच्यते ॥ अथैवं शुद्धस्य धान्ययोगेन सूक्ष्मीकर
णं तस्य धान्याभ्रकसंज्ञा ॥ तत्प्रकारो यथा ॥ पादांशशालिसंयुक्तमभ्रं बध्वा
च कंबले ॥ त्रिरात्रं स्थापयेन्नीरे ततः क्लिन्नं मर्दयेत्करैः ॥ तन्नीरेण च यत्नेन स्राव
येच्च ततः ॥ केवलाद्गलितं सूक्ष्मं वालुकासदृशं च यत् ॥ तद्धान्याभ्रकमित्कमा
रणं चाप्यथोच्यते ॥ अत्र नीरं तु कांजिकमेव ॥ यत उक्तं ॥ चूर्णमभ्रं शालिसंयुक्तं
वस्त्रे बद्धं हि कांजिके इति ॥ अथैवं संस्कृतस्य मारणमुच्यते ॥ धान्याभ्रकस्य भा
गैकं द्वौ भागौ शुद्धटंकणात् ॥ पिष्ट्वा तदंधमूषायां संपुटे पांशुधातीव्राग्निना पचे ॥२००॥

त ॥ रसभावः शीतलं चूर्णं सर्वरोगेषु योजयेत् ॥ अन्यच्च ॥ मृत्पात्रे तु समावर्त्य समटं
कणमभ्रकं ॥ टालयेत्स्वपसि क्षिप्तं पिष्ट्वा निष्कं द्रुतं व्रजेत् ॥ इत्येकपुटि ॥ धान्याभ्र
कं समादाय क्षोभ पिष्ट्वा तु मर्द्दयेत् ॥ अर्कक्षीरैर्दिनं मर्द्यमर्कमूलद्रवेण वा ॥ चक्रा
कारं ततः कृत्वा क्षोभयेदातपेन तु ॥ वेष्टयेदर्कपत्रैश्च सम्यग्गजपुटे पचेत् ॥ पुन
र्मर्द्यं पुनः पाच्यं सप्तवारं प्रयत्नतः ॥ ततो वटजटाक्वाथैस्तद्वद्देयं पुटत्रयं ॥ म्रियते
नात्र संदेहः सर्वरोगेषु योजयेत् ॥ इति दशपुटि ॥ अन्यच्च ॥ धान्याभ्रकास समर्द्दस्य
रसेन परिमर्द्दितं ॥ पुटितं दशवारेण म्रियते नात्र संशयः ॥ तद्वन्मुस्तारसेनापि तं
दुलीयरसेन च ॥ इत्यपि दशपुटि ॥ अन्यच्च ॥ सूर्यक्षारं तथा व्योम पत्रागि समम्
भागतः ॥ पर्यायेणान्यसेत्सर्वं ततो गजपुटं नयेत् ॥ चतुर्यामाद्रवेद्रूस्य निष्कं

॥ ८०१ ॥

द्रेणात्रसेशयः ॥ मर्द्दयेत्टंकसूर्यांशं मात्रे रोधयेत्ततः ॥ चुल्ल्यां पाचकयोगेन सिंदूराभं
चजायते ॥ योजयेत्सर्वरोगेषु त्रिफलामधुसंयुतं ॥ अथ शतपुटि ॥ दुग्धत्रयं कुमार्या
तु गंगापुत्रेन पत्रकं ॥ वटक्षुंगामकास्तके षे मिमूं समर्द्दितं ॥ शतधापुटितं भस्मजाय
ते यमरागवत् ॥ दुग्धत्रयं वटस्नुहार्कीरणं ॥ गंगापुत्रं [illegible] मुस्ता ॥ रति शतपुत्र मूकं
अथामृतीकरणं ॥ तुरंधृतं मृताभ्रणं लोहपात्रे विपाचयेत् ॥ घृते जीर्णे तदभ्रं
तु सर्वयोगेषु जीजयेत ॥ अथास्यानुपानं मात्राप्रमितिं चाह ॥ येहृव्योषसमायु
क्तं सीदं मधुघृतेन च ॥ येद्धैककमभ्रजं भस्म सम्प्रोक्तं गुदंपरं ॥ अथ हरितालस्य
नामानि ॥ हरितालं तु तालं स्यात् तालं तालकमित्यपि ॥ अस्त गोदंतगौरालिनेट
मंडनमित्यपि ॥ अथ तस्य तेस्सरा माह ॥ हरितालं द्विधा प्रोक्तं पत्राख्यं पिंडसं ॥ ८०१ ॥

क्षितं ॥ तयोराद्यं गुणैः श्रेष्ठं ततो हीनगुणं परं ॥ स्वर्णवर्णं गुरु स्निग्धं सपत्रं चाभ्र
पत्रवत् ॥ पत्राख्यं तालकं विद्याद्गुणाढ्यं तद्रसायनं ॥ निःपत्रं पिंडसदृशं स्वल्पस
त्वं तथा लघु ॥ स्त्रीपुष्पहारकं स्वल्पगुणं तत्पिंडतालकं ॥ अथ गुणानाह ॥ हरिता
लं कटु स्निग्धं कषायोष्णं हरद्विषं ॥ कंडूकुष्टास्यरोगास्रकफपित्तकचव्रणान्
अशुद्धस्याप्यसम्यक् मारितस्य च दोषानाह ॥ हरति च हरितालं चारुतां देहजा
तां सृजति च वहुतापानंगसंकोचपीडां ॥ वितरति कफवातौ कुष्टरोगं विदध्या
च्च दिमशितमशुद्धं मारितं चाप्यसम्यक् ॥ शोधितं हरितालं तु कांतिवीर्यविव
र्द्धनं ॥ कुष्टादिपापरोगघ्नं जरामृत्युहरं परं ॥ अथ मृततालक्षणं ॥ तालं मृतं तदा
ज्ञेयं पंचवह्निसंधूमवर्जितं सधूमं नैव मृतं प्राहुर्वैद्यवैद्या इति स्थितिः ॥ अथ

॥ ८०२ ॥

तालकशोधनं ॥ तालकं कणशः कृत्वा वध्वा पोटलिकां ततः ॥ दोलायंत्रे त्र्याहमेकं स
चूर्णे कांजिके पचेत् ॥ याममेकं दोलयात् कूष्मांडकरसे ततः ॥ तिलतैले पचेद्यामं ।
यामं चैवै फलैजते ॥ दोलायंत्रे चतुर्याममेवं पक्वं विशुध्यति तालकं ॥ मतांतरं ॥ स्विन्नं कू
ष्मांडतोयेवा तिलक्षारजलैरपि वा ॥ तोये वा टंकणचूर्णसंयुक्ते दोलायंत्रे तु शुध्यति ॥
अथ सत्वपातनं ॥ ताक्ष्णं राजितिलापिष्टिगुंजाकणं च चूर्णं गुडं तालकार्द्धेन संमर्द्य
छिद्रमूषां निरोधयेत् ॥ कुटपालियंत्रे वा मत्वं पतति निश्चितं ॥ पुनः ॥ तालकं म
र्दयेद्दुग्धा सर्पाक्ष्या वाथ मूत्रकैः ॥ पूर्ववद्गाहयेत् सत्वं छिद्रमूषानिरोधतं ॥ पवा
तिलसर्षपपिष्टिगुंजाचूर्णं ताक्ष्णं सर्वत्रणं वा पोगुडं ॥ टंकेरोन समायुक्तं तालं काचघटे क्षि
त्रे पेत् ॥ वालुकायंत्रे पक्वात् सत्वं पतति निर्मलं ॥ अथ मनःशिलासत्वं ॥ पुनः निश्चि

॥ ८०२ ॥

गूढवेसतोयैर्भावितायमनःशिला ॥ तालकस्यप्रयोगेण सत्वंहेमनिभंभवेत् ताल
वतनुत्यसत्वंचपातयेद्युक्तिपूर्वकं ॥ तुत्थेनटंकणेनैव ध्मातसत्वंचतुत्थके इति
तु ॥ अथतालकस्यमारणविधिः ॥ पत्रीकृतंतालकंपुनर्नवारसेनतु ॥ खल्वे
विमर्द्दयेदेकंदिनंपश्चाद्द्विक्षारेक्षिपेत् ॥ संशोष्यगोलकंकृत्वाचक्राकारंमथापि
चा ॥ ततःपुनर्नवाक्षारैःस्थाल्याअर्द्धंप्रपूरयेत् ॥ तत्रतेगोलकंधृत्वापुनस्तेनैव
पूरयेत् ॥ आकंठपिठरंतस्यपिधानंधारयेन्मुखं ॥ स्थालींचुल्ल्यांसमारोप्यक्र
माद्वह्निंचवर्द्धयेत् ॥ दिनान्यंतस्थूल्यानिपंचचवह्निंप्रदापयेत् ॥ एवंतन्म्रियते
तालंमात्रातस्यैकरक्तिका ॥ अनुपानान्यनेकानियथारोगंप्रयोजयेत् ॥ अथताल
कसत्वपातनविधिः ॥ कुलत्थक्वाथटंकणमहिषीघृतमधुयुक्तंहरितालंशुद्धंद

॥२०३॥

धान्याम्लेन भावितं ॥ हंडिकायां क्षिपेत्तस्या उपरि मल्लं संछिद्रं दत्वा संधिलेपं च कृत्वा क्रमेण
वह्निं यामचतुष्टयं दद्यात् ॥ यावन्नीलः पीतो वा धूमो न गच्छति ततः पांडुरे धूमे दृष्टे
सति अग्निं पूर्णं कुर्यात् पश्चाच्छीतां स्वांगशीतां उत्तार्य्य सत्वं ग्राह्यं ॥ अथ मनःशिलाया
नामलक्षणगुणाः शोधनं च ॥ मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका ॥
नैपाली कुनटी गोला शिला दिव्यौषधिः स्मृता ॥ तालकस्येव कर्म्मैदोऽस्ति मनोह्वायेत
दंतरं ॥ तालकं त्वतिपीतं स्याद्रक्तैव रक्ता मनःशिला ॥ मनःशिला त्रिधा प्रोक्ता श्यामां
गी करवीरका ॥ द्विखंडाख्या च तासां तु लक्षणानि निबोधत ॥ श्यामा माहिंगुलवद्र
क्ता किंचित्पीता तथैव दीप्तिका ॥ करवीरा रक्तवर्णा चूर्णरूपातिभारयुक् ॥ किं
चिद्रक्ता च गौरा च द्विखंडा भारवर्जिता ॥ त्रिविधापि चैषा स्यात्करवीरा म

॥२०३॥

नःशिला ॥ अथ तस्या गुणाः ॥ मनःशिला गुरुर्वर्ण्या सरोष्णा लेखनी कटुः ॥ तिक्ता
स्निग्धा विषश्वासकासभूतकफास्रनुत् ॥ अथ तस्याः अशुद्धायाः गुणाः ॥
मनःशिला मंदबलं करोति जंतुं ध्रुवं शोधनमंतरेण ॥ मलस्य बंधं किल मूत्ररो
धं सशर्करं कृच्छ्रगदं च कुर्यात् ॥ अथास्याः शोधनं ॥ जयंतिकाद्रवे दोलायंत्रे
शुद्ध्येन्मनःशिला ॥ दिनमेकमजामूत्रे भृंगराजरसेपि च ॥ मतांतरं ॥ अगस्तिप
त्रतोयेन भाविता सप्तवारकं ॥ शृंगवेररसैर्वापि विशुद्ध्यति मनःशिला ॥ अथ
स्रोतोंजनस्य मानभेदगुणशोधनानि ॥ अस्य सरमा इति भाषायां नाम ॥
तत्र नामानि ॥ अंजनं यामुनं चापि कापोतांजनमित्यपि ॥ स्रोतोंजनं तु द्वि
विधं प्रोक्तं तत्कृष्णसितभेदतः ॥ तत्र स्रोतोंजनं कृष्णं सौवीरं श्वेतमीरितं ॥ अ

॥ २०४ ॥

पोमयोर्गुणाः ॥ स्रोतोंजनं स्मृतं चाक्षुष्यं कफपित्तनुत् ॥ कषायं लेखनं स्नि
ग्धं ग्राहिछर्दिविषापहं ॥ हिंग्वाम्लस्यासदृष्टीतं सौवीरमपिताद्दृशं ॥ किंतु द्वयो
रंजनयोः श्रेष्ठं स्रोतोंजनं स्मृतं ॥ अथ पोमयोः शोधनं ॥ त्रिफलावारिणा स्वेद्यं
तद्वयं शुद्धिमृच्छति ॥ भृंगराजरसे वापि स्रोतः सौवीरकं शुचिः ॥ अथ टंकण
क्षारशोधनं ॥ अशुद्धं टंकणो वांतिभ्रांतिकारी प्रयोजितः ॥ अतस्तं शोधयेद्दवा
वन्हौ वा स्फुटतः शुचिः ॥ अथ राजावर्त रेवटी इति च भाषा ॥ राजावर्तः स्मृतः कै
श्चिद्बुधैरुपरसे तथा ॥ रत्नजातौ स्मृतः कैश्चिद्द्वयोर्लक्षणं तस्य कथ्यते ॥ राजावर्तो
द्विधा प्रोक्तः सरक्तो नीलिमाश्रितः ॥ गुरुः श्रेष्ठः सकथितस्तदन्यो हीन उच्यते
तस्य गुणाः ॥ राजावर्तः कटुस्तिक्तः शिशिरः पित्तनाशनः ॥ प्रमेहनाशकः प्रो ॥ २०४ ॥

क्तः छर्दिहिक्कानिवारणः ॥ शोधनमारणे ॥ गंधाश्ममातुलुंगाम्लशृंगवेररसेन
च ॥ विशुद्ध्यति म्रियते च पुटतो नात्र संशयः ॥ अथ चुंबकः ॥ स तु पाषाणजातिः
उक्तं च ॥ कांतलोहाश्मभेदाः स्युश्चुंबकभ्रामकादयः ॥ चुंबकः कांतपाषाणो
यः कांतो लोहकर्षकः ॥ तस्य गुणाः ॥ चुंबको तेखनः शीतो मेदोविषगरापहः
कंडूपांडूदरक्षैण्यमेदोमूर्छाविलोहहृत ॥ अथास्य शोधनमुपयोगश्च ॥ सौभां
जनरसे सोम्लवर्गे दोलागतो दिनं ॥ पाचितः शुद्ध्यते कांतपाषाणः पारदोप
कृत ॥ अथ स्फुटिकानाम लक्षणगुनशोधनानि ॥ स्फुटिका च स्फटी प्रोक्ता श्वे
ता शुभ्रा च रंगदा ॥ दृढरंगा रंगदृढा रंगांगा चापि कथ्यते ॥ अथ गुणाः ॥ स्फु
टिका तु कषायोष्णा वातपित्तकफव्रणान् ॥ निहंति श्चित्रवीसर्पान् योनिसं

॥२०५॥

क्रोचकारिणी ॥ मेहकृच्छ्रवमीरोगपदोषघ्नी प्रदरापहा ॥ स्फुटिका निर्मला श्वेता श्लेष्म
स्याः शोधने क्वचित् ॥ नदश्शंखशास्त्रतो लोकावन्हावुत्कुरुच्चयंति च ॥ अथ शंखस्य
नामलक्षणगुणशोधनानि ॥ शंखः समुद्रजः कंबुः क्षुद्रः शंखनकः स्मृताः ॥ द्वि
धा स दक्षिणावर्तो वामावर्त्तः प्रकीर्त्तितः ॥ दक्षिणावर्तशंखस्तु पुण्ययोगादवा
प्यते ॥ यद्गृहे तिष्ठते सो वै स लक्ष्म्या भाजनं भवेत् ॥ अथ दक्षिणावर्तस्य गुणाः ॥ द
क्षिणावर्तशंखस्तु त्रिदोषघ्नः शुचिर्निधिः ॥ ग्रहालक्ष्मीक्षयघ्नश्च क्षामताक्षिक्षया
क्षमी ॥ अथ वामावर्त्तस्य गुणाः ॥ शंखः क्षारो हिमो ग्राही गुरुर्नेत्ररेकनाशनः ॥ नेत्रपु
ष्पहरो वर्ण्यस्तारुण्यपिटिकाप्रणुत् ॥ गुल्मशूलहरः श्वासनाशनो विषदोषनु
त् ॥ अथ शुद्धिगुणादौ च शुद्धो म्लैः सगुणप्रदः ॥ अम्लैः कांजिकादिभिर्दोलायंत्रे ॥ २०५ ॥

खिन्नाः सन्त्युक्वतीस्वर्यः ॥ अथ खटिका ॥ खटिका खटिनी चापि लेखनी च निगद्य
ते ॥ सितधातुः श्वेतधातुः पांडुमृत्पांडुपत्रिका ॥ अथ गुणाः ॥ खटी दाहास्रनुच्छीतला ।
मधुरा विषशोथजित ॥ कफघ्नी नेत्रयोः पथ्या लेखने कासकोचिता ॥ व्रणदोषहरी
तिक्ता व्रणरोगनिकृंतनी ॥ लेपादेतद्गुणा प्रोक्ता भक्षिता मृत्तिका समा ॥ अथ गैरि
कं ॥ गैरिकं रक्तधातुश्च गौरेयं गिरिजं तथा ॥ द्विविधं गैरिकं प्राहुः स्वर्णं सामान्यगै
रिकं ॥ पैरस्तृतीयमप्यक्तं पाषाणस्त्वं हि गैरिकं ॥ सुवर्णगैरिकं रक्ततरं शिवं तु रक्त
कं ॥ अथ गुणाः ॥ गैरिकद्वितयं स्निग्धं मधुरं तुवरं हिमं ॥ चक्षुष्यं दाहपित्तास्रकफा
हिक्काविषापहं ॥ अतिकंडुहरं हृद्यं तथा प्रोक्तं मुदहृगीत ॥ पाषाणगैरिकं त्वन्य द्विका
तक्ष्मीविषापहं ॥ सुवर्णगैरिकं श्रेष्ठं गैरिकद्वितयात्परं ॥ अथ शोधनं ॥ गैरिकं

किंचिदाज्येन मर्द्दितं शुद्धं प्रजायते ॥ अथ कासीसं ॥ भस्मवन्मतिकाम्ला ॥ कासीसं धातुकासीसं पांशुकासीसमित्यपि ॥ तदेव किंचित्पीतं तु पुष्पकासीसमुच्यते ॥ कासीसद्वयमम्लोष्णं तिक्तं चक्षुष्यं तथा ॥ वातश्लेष्महरं केश्यं नेत्रकंडुविषप्रणुत् ॥ मूत्रकृच्छ्राश्मरीश्वित्रनाशनं परिकीर्तितं ॥ अथ शोधनं ॥ सकृद्भृंगांबुना स्विन्नं कासीसं निर्मलं भवेत् ॥ अथ रसकं ॥ खपरिया इति भाषा ॥ रसकं तु थमेदः स्यात् खपरं चापि तत्स्मृतं ॥ पेरुणा स्तुम्पके प्रोक्तास्ते गुणा रसके स्मृताः ॥ अपि च ॥ खर्परी कटुका तिक्ता चक्षुष्या च रसायनी ॥ त्वग्दोषशमनी चैव चलुपविविवर्द्धनी ॥ खर्परं द्विविधं ज्ञेयं दर्दुरं कारवेल्लकं ॥ सदलो दर्दुरो ज्ञेयो निर्दलः कारवेल्लकः ॥ सत्वपाते दर्दुरः स्यादौषधे कारवेल्लकः ॥ अन्यत्रापि गुणा अस्य प्रोक्ताः ॥ ते यथा ॥ रसकः सर्वमेहघ्नः कफपित्तविनाशनः ॥ नेत्ररोगक्षयघ्नश्च

तस्तोवामकोपिच ॥ अशुद्धः खर्परः कुर्याद्वांतिं भ्रांतिं विशेषतः ॥ तस्माच्छोध्यः प्रयत्नेन

पाकद्वांतिविवर्जितः ॥ अथ शोधनं ॥ खर्परः परिसंतप्तः सप्तवारं निमज्जितः ॥ बीजपूररस ते

स्यांतर्निर्मलत्वं समश्नुते ॥ अन्यच्च ॥ नमूत्रे वाश्वमूत्रे वा तक्रे वा कांजिकेथवा ॥ प्रताप्य प्र

मज्जितः सम्यक् खर्परः परिशुद्धति ॥ अन्यच्च ॥ नरमूत्रे स्थितो मासं रसको रंजयेद्ध्रुवं ॥

शुद्धतामं रसं तारं शुद्धं स्वर्णप्रभं यथा ॥ क्वचिद्रस्य भस्मप्रकार उक्तः ॥ खर्परं पारदेनैव

चूर्णयित्वा दिनं पचेत् ॥ वालुकायंत्रमध्यस्थं शोभनं भस्म जायते ॥ अन्यच्च ॥ खर्परं प

तलं कृत्वा कृत्वा तद्वर्णं तगतं पचेत् ॥ जायते शोभनं भस्म सर्वरोगापहं स्मृतं ॥ अथ

कपर्दिका कौडी इति भाषा ॥ कपर्दिका कपर्दिश्च वराटी च वराटिका ॥ वराटिका त्रिधा प्रो

क्ता श्वेत श्रोणा सिता परा ॥ पीता चेती ह च श्रेष्ठा श्वेत श्रोणा हि मध्यमा ॥ असि

॥ ८०७ ॥

तार्विंदुभिः श्वेतैस्तैर्लांछिता रेखयाप्यथा ॥ वातस्य हहरी नाना कौतुकेषु च पूजिता ॥ पीता ग्रस्म
घुतापखेरसप्रयोगेषु पूजिता ॥ साद्विनिष्कप्रमाणा सौभ्रेघ्यायोगेषु युज्यते ॥ निष्कप्रमाणा
मध्यासा हीना पादोननिष्किका ॥ अथ शोधनं ॥ वराटाः कांजिके स्विन्ना यामात् शुद्धिमया
न्त्यपुः ॥ अंगारानौ स्थिता ध्माता सम्यक् प्रोक्षालिता यदा ॥ स्यांगसीता मस्ता सा तु पिष्टं
सम्यक् प्रयोजयेत ॥ इति भस्म ॥ कपर्दिका हिमा नेत्रहिता स्फोटक्षयापहा ॥ कर्णस्रावा
ग्निमांद्यघ्नी पित्तास्रककफनाशिनी ॥ अपि च ॥ कटुः स्माद्दीपिनी चष्या तिक्ता वातकफा
पहा ॥ परिणामादिशूलघ्नी ग्रहणीक्षयहारिणी ॥ अथ वालुका ॥ वालुका सिकता प्रो
क्ता शर्करा रेतजापि च ॥ वालुका मधुरा शीता संतापश्रमनाशिनी ॥ सेकप्रयोगतश्चैव
स्मा स्याच्छोत्यानिलापहा ॥ तद्वच्च सैरवनी प्रोक्ता भ्रमरोगः क्षतनाशिनी ॥ शर्करा म्पक्षं ॥ ८०७ ॥

यकेनकेचिद्धृढं स्यपोरजः ॥ सुकरं त्विदमाख्यातं तच्च संशोध्य मारयेत् ॥ योतस्य नामल
क्षणगुणास्तु पूर्वमेवोक्ताः ॥ अथ कंकुष्ठोत्पत्तिनामलक्षणगुणाः ॥ हिमांचलैकदेशेतु
कंकुष्ठमुपजायते ॥ तदेकं नलिकाख्यं स्यादन्यद्रेणुकनामकं ॥ पीतप्रभं गुरु स्निग्धं कंकुष्ठं कं
श्रिलपासमं ॥ दलीयश्चलाकाभं सच्छिद्रं नलिकाभिधं ॥ रेणुकाख्यं तु कंकुष्ठं श्यामपीत
रजोन्वितं ॥ त्यक्तसत्त्वं लघु प्रायः पूर्वस्माद्धीनवीर्यकं ॥ अथ तस्य नामानि ॥ कंकुष्ठं का
कुष्ठं चैव रंगं कोलकाकुकं ॥ रेचकं पुलकं चैव शोधकं कालपालकं ॥ अत्र केचित् ॥ सद्यो
जातस्य करिणः शकृत्कंकुष्ठमुदीर्यते ॥ यद्वाश्वसद्यःप्रसूतस्य वाजिवालस्य विट् स्मृतं
नालेवावाजिवालस्येत्येवं केकुष्ठकेभ्रमः ॥ अथ शुद्धिः ॥ शुंठ्यांबुभावितं शुद्धिं कंकुष्ठमु
पगच्छति ॥ अथ गुणाः ॥ कंकुष्ठं रेचनं तिक्तं कटूष्णं परमं स्थूलहृत् ॥ कृमिशोथोदराना

हृद्गुल्माध्मानकफापहं ॥ कंकुष्ठस्य तु रुडाष्ठ्रंगी इति नामेति केचिदित्याहुर्वैद्यप्रकाशाकृत
अथ सौराष्ट्री सोरटी माटी इति भाषा ॥ सौराष्ट्री तुवरी कांक्षी मृत्तालकसुराष्ट्रजे ॥ आढ
की चापि सा ख्याता मृत्स्ना च सुरमृत्तिका ॥ स्फुटिकाया गुणाः सर्वे सौराष्ट्र्यामपि की
र्तिताः ॥ तस्मात्परस्पराभावे प्रयोज्यान्यतरा बुधैः ॥ अथान्ये पि उपरसाः संति तान्।
पि वक्ष्यामः ॥ तत्र समुद्रफेनो प्युपरसोस्ति तन्नामगुणाः पूर्वमुक्ताः ॥ तच्छोधनं यथा
समुद्रफेनः संपिष्टो निंबूतोयेन शुद्ध्यति ॥ अशुद्धः स करोत्यंगभंगं तस्माद्विशोधयेत्
अथ क्षुद्रशंखः शंबूकः घोघी इति भाषा ॥ तन्नामगुणाः ॥ क्षुद्रशंखाः शंखनकाः
शंबूका जलशुक्तयः ॥ शंबूकः शीततो नेत्ररुजास्फोटविनाशनः ॥ शीतज्वरहर
स्तीक्ष्णो ग्राही दीपनपाचनः ॥ अस्य शुद्धिस्तु महाशंखवत् ॥ अथ मुक्ताशुक्ति

॥२०८॥

नामगुणाः ॥ शुक्तिर्मुक्ताप्रसूश्चैव महाशुक्तिश्च शुक्तिका ॥ मुक्तास्फोटस्तौतिकं भ-
मौक्तिकप्रसवा च सा ॥ ज्ञेया मौक्तिकसूश्चैव महामातंगजा स्मृता ॥ मुक्ताशुक्तिः कटुः
स्निग्धा श्वासहृद्रोगहारिणी ॥ शूलप्रशमनी रुच्या मधुरा दीपनी परा ॥ अथ जलशु-
क्तिनामगुणाः ॥ जलशुक्तिर्वीरिशुक्तिः कृमिसूः क्षुद्रशुक्तिका ॥ शंबूका जलशु-
क्तिश्च पुटिका तोयशुक्तिका ॥ जलशुक्तिः कटुः स्निग्धा दीपनी गुल्मशूलनुत् ॥ विष-
दोषहरा रुच्या पाचनी बलदायिनी ॥ अथोभयोः शोधनमारणे ॥ शोधनं पूर्ववत्तस्या
मृतिः प्रोक्ता कपर्दवत् ॥ अथ कृष्णमृत्तिकानामगुणाः ॥ मृन्मृत्तिका प्रशस्ता तु मृत्स्ना
मृत्स्ना च मृत्तिका ॥ कृष्णमृत्स्ना क्षतदाहास्रप्रदरश्लेष्मपित्तनुत् ॥ अथ पंकनामगुणाः
पंकः कर्दमनिःसिक्तो जंबालः पंकिलस्तथा ॥ पंको दाहास्रपित्तार्तिशोथघ्नः शीतलः

सरः॥ कंपिल्लकगौरीपाषाणनवसारमोदरशृंगकान्यष्टुपरसमृतानि॥ तन्नामग्र

॥८०९॥

हणं कथनं पूर्वमुक्तमेव॥ अथाग्निजार इति क्षारविशेषः॥ अब्धितीरेऽग्निनक्रस्य

जरायुः शुष्कतां गतं॥ अग्निजारस्तु तत्प्रोक्तं सक्षारो जारणे हितः॥ अथ गिरिसिंदूरकं

पतु गिरेः पाषाणजं भवेत्॥ किंचिद्दिग्र रसतुल्यं तद्रसबंधे हितं मतं॥ धातुवादेपि तत्प्र

ज्यं नेत्ररोगघ्नमीरितं॥ अथैषां साधारणरसानां सामान्यं शोधनं॥ साधारणरसाः

सर्वे मातुलुंगार्द्रकांबुना॥ त्रिवारं भाविताः शुद्धा भवेयुर्दोषवर्जिताः॥ अथ धातूपधा

तुनिर्णयः॥ स्वर्णतारारताम्राणि नागवंगौ च तीक्ष्णकं॥ धातवः सप्त विज्ञेया अ

ष्टमः क्वापि पारदः॥ मतांतरे॥ स्वर्णं तारं च ताम्रं च वंगो नागस्तु पंचमः॥ रीतिका

च तथा घोषो लोहं चेत्यष्ट धातवः॥ घोषः पंचरसो धातुः॥ मतांतरे च॥ सुवर्णं ॥८०९॥

रूप्यकं ताम्रं रंगं यसदसीसकं ॥ लोहं चैते मताः सप्त धातवो गिरिसंभवाः ॥ अथ धातुसमु-
द्भवस्य निरुक्तिः ॥ वलीपलितखालित्यकार्श्याबल्यजरामयान् ॥ निवार्य देहं दधति न-
णां तद्धातवो मताः ॥ अथ सूर्यादिग्रहाणां धात्वाधिपत्वं व्यवहारार्थमाह ॥ ताम्रं तारं
रंगं गाङ्गेहेम वंगं योयतीक्ष्णं ॥ कांस्यकं पित्तलं जातिभेदः हंच धातवो नव ये स्मृताः ॥
सूर्यादीनां ग्रहाणां ते कथितानामभिः क्रमात् ॥ इति धातवः ॥ अथोपधातूनाह ॥ ताप्यं
च विमलातुत्थं कांस्यं पित्तलकं तथा ॥ सिंदूरं शैलनिर्यासः स्मृताः सप्तोपधातवः ॥
स्वस्वधातुगुणैस्तुल्याः किंचिद्धिः परे पि च ॥ गुणास्तेंति विशेषेण द्रव्यान्तरयोगताः
मतांतरं ॥ अभ्रकं माक्षिकं तालं शिलानीलांजनं तथा ॥ तुत्थकं रसकं चैते प्रोक्ताः सप्तो-
पधातवः ॥ अथ सुवर्णस्योत्पत्तिर्नामलक्षणगुणशोधनमारणानि ॥ तत्रोत्पत्ति

॥ ८१० ॥

माह ॥ पुरा निजाश्रमस्थानां सप्तर्षीणां जितात्मनां ॥ पत्नीर्विलोक्य लावण्यलक्ष्मी
संपन्नयौवनाः ॥ कंदर्पदर्पविध्वस्तचेतसो जातवेदसः ॥ पतितं यद्धरापृष्ठे मतामगा
त कृत्रिमं चापि भवति तद्रसेंद्रस्य वेधतः ॥ मेरुसानुपतज्जंबूफलांभोयोगतः परं
दिव्यौषधिमणिस्पर्शाद् अन्यद्भवति कांचनं ॥ एवं नानाविधानीह जायंते कांचना
नि वै ॥ अस्य नामानि ॥ स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकं ॥ तपनीयं कलधौ
तं गांगेयं भर्मकांचनं ॥ चामीकरं शातकुंभं तप्ताकार्त्तस्वरं च तत ॥ जांबूनदं जातरूपं म
हारजतमित्यपि ॥ अथ सदसत्सुवर्णलक्षणं ॥ दाहे रक्तं सितं छेदे निकषे कुंकुम
प्रभं ॥ तारशुल्वोज्झितं स्निग्धं कोमलं गुरु हेम सत ॥ यच्छ्वेतं कठिनं रूक्षं विवर्णं सम
तं दलं ॥ दाहे छेदे सितं सेतं कषे त्याज्यं लघु स्फुटं ॥ दलं नाम यदा नाहतं स्फुटति ॥ ८१०

अथ स्वर्णस्य गुणाः ॥ सुवर्णं शीतलं वृष्यं बल्यं गुरु रसायनं ॥ स्वादु तिक्तं च तुवरं पाके च
स्वादु पिच्छिलं ॥ पवित्रं बृंहणं नेत्र्यं मेधास्मृतिमतिप्रदं ॥ हृद्यमायुःकरं कांतिवाग्विशु
द्धिस्थिरत्वकृत ॥ विषक्षयोन्मादत्रिदोषज्वरशोषजित ॥ अपक्वमेव संशुद्धं पक्वं
तनुरसायनं ॥ तथा च रससंपद्धृत्यां ॥ पक्वं हेमरसायनं विदुरथापक्वं तु सद्यो विषप्रध्वंसि
क्षपिवहरणं चमिहरं च दर्पज्वरिभ्यो हितमिति ॥ अथापक्वसुवर्णसेवने प्रकारद्वया-
मुक्तं तत्रांतरे ॥ तद्यथा ॥ अपक्वं हेम संघृष्टं शिलायां जलयोगतः ॥ द्रवरूपं तु तल्लेपं मधु
नागगणदायकं ॥ पद्मातितं चकारव्यं तु स्वर्णपत्रं विचूर्णितं ॥ मधुना ना संगृहीतं चेत्स
द्यो हंति विषादिकमित्यादि ज्ञेयं ॥ अनुपानमाह ॥ मध्वामलकचूर्णं तु सुवर्णं चेति
त्रयं ॥ प्राश्यारिष्टगृहीतोपि मुच्यते प्राणसंकटात ॥ मेधाकामस्तु वचया प्राश्नीका

॥ ८११ ॥

मः पद्मकेसरैः ॥ संखपुष्पावयोर्थीच विदार्य्याच मज्जार्पकः ॥ अथाष्टकुष्ट्यासम्यक् मारि
तस्य गुणाः ॥ वलंचवीर्य्यं हरते नराणां रोगव्रजं पोषयतीह काये ॥ असौख्यकार्य्येव
सदा सुवर्णमशुद्धमेतन्मरणं च कुर्यात ॥ अथ रसरणादीनां मात्राकथनं ॥ पववध्या
प्रयोक्तव्यं हेमगंजाष्टकं रविः ॥ तारं तद्द्विगुणं लोहमन्यत्तु त्रिगुणाधिकं ॥ अथ रसर्णा
दिमारणे क्रियतीपरिभाषोच्यते ॥ रसीभवंति लोहानि मृतानि सुरवंदिते ॥ विनिघ्नं
ति जराव्याधीन् रसयुक्तानि किं पुनः ॥ लोहां मारणं प्रोक्तं सर्वेषां रसभस्मना ॥ मूर्छी
भिर्मध्यमं प्राहुः कनिष्ठं गंधकादिभिः ॥ स्वर्णे रौप्ये वधे स्तेयं पुटं कुक्कुटकादिकं ॥
ताम्रे काष्ठादिजो वन्हिर्तीहि गजपुटानि च ॥ अथ स्वर्णादीनां शोधनं ॥ स्वर्णे हप्य
ताम्रायः पत्राण्यग्नौ प्रतापयेत ॥ कन्याकं टकवेधीनि दृष्ट्वा वन्हिसमानि च ॥ निषिं ॥ ८११ ॥

चेत्तप्रतप्तानि तैले तक्रे गवां जले || कांजिके च कुलित्थानां कषाये सप्तधा पृथक् || एवं
स्वर्णादिलोहानां विशुद्धिः संप्रजायते || अथ नागवंगयोर्विशोधनमाह || नागवंगौ प्र
तप्तौ च गालितौ तौ निषेचयेत || सष्ठिद्रुस्रावपिहिते हंडिकास्थे द्रवे शनैः || सप्तधै
वं विशुद्धिः स्याद्रविद्राव्येच सप्तधा || अथान्यमतं || सर्वलोहानि तप्तानि कदलीमूल
वारिणि || सप्तधाभिनिषिक्तानि शुद्धिमायांत्यनुत्तमां || अथ स्वर्णस्यैव विशेषशो
धनं || वल्मीमृत्तिकयातिष्ठायाम्रनिशोधमापितं वसु || विशुध्यति वरं किंच वर्णवृ
द्धिः प्रजायते || वल्मीमृत्तिकानामेकुंभकारत्पयथाभांडानि रंजयितापाचयंतिसा वर्ण
मृत्तिका || अन्यच्च || सुवर्णमुत्तमं चन्हौ विद्रुतं निक्षिपेत्त्रिशः || कांचनारीरसे शुद्धं
कांचनं जायते स्फुटं मतांतरं || वल्मीकमृत्तिकाधूमं गैरिकं चेष्टकापटु || इत्येताम्

॥८१२॥

त्रिकाः ॥ पंचजंबीरेणारनालकैः ॥ पिष्ट्वा कंटकवेध्यानि स्वर्णपत्राणि लेपयेत् ॥ पुटेत्पुटु
हसंख्यांतु निर्वीते विंशादुन्मलैः ॥ आधिक्यैवाधिके हेम्नि यावद्वर्णो विवर्द्धते ॥ इत्येवं
पुटनैर्युक्त्या सम्यक्कुष्णुद्युतिकांचनं ॥ अत्र केचित् ॥ इत्यमेव स्वर्णस्य शुद्धिर्नान्याहि
क्रियते ॥ तैलतक्रादिके याति हृष्यादीनामुदाहृता ॥ अथ स्वर्णादिसर्वधातुमारणं
सामान्येन ॥ शिलागंधार्कदुग्धाक्ताः स्वर्णाद्याः सर्वधातवः ॥ म्रियंते द्वादशपुटैः
सत्यं गुरुवचो यथा ॥ अथ स्वर्णमारणं ॥ स्वर्णस्य द्विगुणं सूतमम्लेन सह मर्दयेत्
तद्गोलकसमं गंधं निदध्यादधरोत्तरं ॥ चूर्णीकृतं ततो रुध्वा शरावदृढसंपुटे ॥ सेवस्त्र
याकुद्वितयाम्लाचिक्कणया ततः ॥ त्रिंशद्वनोपलैर्दद्यादेवमुदान्येवचतुर्दश ॥ निरुत्था
यते भस्म गंधो देयः पुनः पुनः ॥ इति हिरण्यारसपद्धत्यां सर्वोत्कृष्टहेमभस्म ॥ अ ॥८१२॥

थान्यःप्रकारः॥सवर्णेऽग्नौद्रुतेक्षुद्रंदद्यात्सीसकसांशकं॥अम्लेनमर्दयेतत्तुचूर्णी
पिस्वाशनैःशनैः॥पश्चात्तद्गोलकंकृत्वातुल्यगंधरजोगतं॥शरावसंपुटेस्थाप्यवैसं
धिरोधंविधायच॥त्रिंशद्वनोपलैःपच्यात्सप्तधैवंपुनःपुनः॥अम्लेनमर्द्येतद्गोलं
पच्यात्स्वर्णमृतिर्भवेत॥अथान्यःप्रकारः॥शिलासिंदूरयोश्चूर्णंसमयोरर्कदु
ग्धकैः॥सप्तधाभावयित्वातुशोषयेच्चपुनःपुनः॥ततस्तुगलितेहेम्निकल्कोऽयंदी
यतेसमः॥पुनर्धमेदतितरांयथाकल्कंविलीयते॥एवंवेलात्रयंदद्यात्कल्कंहेम
मृतिर्भवेत॥इतिरसवर्जंहेमभस्म॥अथास्वर्णद्रुतिः॥चूर्णंसेंद्रगोपानांदेव
दालीफलद्रवैः॥भावितंसदर्पंहेमकरोतिजलवद्द्रुतं॥अथस्वर्णभस्मपरीक्षा॥जां
बवाभंस्वर्णस्यभस्मप्राहुर्भिषग्वराः॥अथरूप्यस्योत्पत्तिनामलक्षणगुणा

॥ ८१३ ॥

क्रोधनमारणानि ॥ तत्रोत्पत्तिः ॥ त्रिपुरस्य वधार्थाय निर्निमेषैर्विलोचनैः ॥ निरीक्षया
मास शिवः क्रोधेन परिपूरितः ॥ ततस्तु रुद्रकासमभवत्तस्यैकस्माद्विलोचनात् ॥ अप
रस्माद्भ्रुवद्रुद्रोगणो वह्निरिव ज्वलन् ॥ तृतीयाद्रश्रुबिंदुस्तु लोचनादपतद्भुवि ॥ तस्मा
द्रजतमुत्पन्नं नानामूर्तिषु संस्थितं ॥ कृत्रिमं चापि वंगादेः सूतयोगतः ॥ अथ नामा
नि रूप्यं तु रजतं तारं चंद्रकांतं सितं सुभं ॥ कुप्यं धौतं वसुश्रेष्ठं रुचिरं चंद्रलोहकं ॥
अथ लक्षणं ॥ गुरु स्निग्धं मृदुश्वेतं दाहच्छेदे घनक्षमं ॥ वर्णाढ्यं चंद्रवत्स्वच्छं रूप्यं न
वगुणं शुभं ॥ कृत्रिमं कठिनं रूक्षं रक्तं पीतं दलं लघु ॥ दाहच्छेदघनैर्नष्टं रूप्यं दुष्टं प्र
कीर्त्तितं ॥ दलं घनताडनेन स्फुटनशीलं ॥ अथ गुणाः ॥ रूप्यं शीतं कषायाम्लं स्वादु
पाकरसं सरं ॥ वयसः स्थापनं स्निग्धं लेखनं वातपित्तजित् ॥ प्रमेहादिकरोगां ॥ ८१३ ॥

क्रमनाशयत्यचिराद्ध्रुवं ॥ गुटिकास्यधृताचक्रेत हेमाशोषविनाशिनी ॥ रसपद्धत्यां ॥ अप
क्वं रजतं नैवसंयोज्यं स्वर्णाद्युद्दे ॥ पक्वं भस्मापि तन्नैव योज्यं ताम्रादिभस्मवत् ॥ व्यवहा
राभावतः किंच यश्चैतत्कुष्ठकरं हितत् ॥ इति लोकप्रसिद्धिस्तु तस्माद्योज्यं रसादिषु ॥ गुण
ग्रंथेपि क्वचित् ॥ प्रोक्तकर्मसु संयोज्यं रजतं हि विधानतः इति ॥ अथाशुद्धमारणे दो
षमाह ॥ तारं शरीरस्य करोति तापं विड्बंधतां यच्छति शुक्रनाशं ॥ वीर्यं बलं हंति तनो
श्च पुष्टिं महागदान्पोषयति ह्यशुद्धं ॥ अथास्य विशेषशोधनं ॥ पत्रीकृतं तु रजतं प्र
तप्तं जातवेदसि ॥ निर्वापितमगस्त्यस्य रसे वारत्रयं शुचि ॥ मतांतरं ॥ तारं तप्तं त्रिधा क्षि
प्तं तैले ज्योतिष्मतीभवे ॥ शुद्धं भवेदिति शेषः ॥ अथ मारणं ॥ विधायपिपिष्टिं सूतेन र
जतस्याथ मेलयेत् ॥ तालं गंधं समं शुद्धं तन्मध्ये निंबुकद्रवैः ॥ गोलकीकृत्य संरुद्ध्य म

घायांस्वर्णेचदद्यात्॥ द्वित्रैःपुटैर्भवेद्भस्मयोज्यमेतद्रसादिषु॥ इतिस्वर्णसंहृत्यभस्म॥ मतां
तरं॥ हिंगुलेनसमंमाक्षिकेणचलितानातुल्येनजंभांभसालिप्तंरौप्यदलंपुटेनपटुनास्या
द्भस्ममृषास्थितं॥ पटुनापुटेनगजपुटेन॥ मतांतरं॥ सूतगंधकयोस्तारतुल्ययोःकज्ज
लींभिषक्॥ द्रवीकृत्यकुमार्यथ्वीद्विस्तारपत्राणिलेपयेत॥ शरावसंपुटेरुद्ध्वात्रिंशद्दुत्स
लैःपुटेत॥ द्विवारंरजतस्याशुभस्मस्यात्सायसःसितं॥ इत्यपिस्वर्णसंहृत्यभस्म
अथताम्रस्योत्पत्तिनामलक्षणगुणदोषधनमारणानि॥ तत्रोत्पत्तिः॥ उक्तंयत्का
र्तिकेयस्यपतितंधरणीतले॥ तस्मात्ताम्रंसमुत्पन्नमिदमाहुःपुराविदः॥ अथना
मानि॥ ताम्रमौदुंबरंशुल्वमुदंबरमितिस्मृतं॥ रविप्रियंम्लेछमुखंसूर्यपर्यायना
मकं॥ त्र्यंबकंचारविंदंचनेपालंरविलोहकं॥ अथलक्षणं॥ ताम्रंतुद्विविधंप्रो

तं नेपालं म्लेच्छनामकं ॥ अतिश्लोणं मृदु रूक्षं कठिनं कमपाः स्मृतं ॥ अन्यच्च ॥ नपाकु
समसंकाशं स्निग्धं मृदु घनं क्षयं ॥ लोहनागो स्सितं ताम्रं नेपालं मत्यवेष्टभं ॥ कृष्णं रू
क्षमति सात्स्यं घृतं वा पिघनासहं ॥ लोहनागयुतं शुल्वं म्लेच्छं दुष्टमतो त्यजेत ॥ अन्यच्च
एको दोषो विषे ताम्रे त्वष्टौ दोषाः प्रकीर्तिताः ॥ भ्रमो मूर्च्छा विदाहश्च स्वेदक्लेदन वां
तयः ॥ अरुचिश्चित्तसंतापश्च ते दोषा विषोपमाः ॥ अथ तैलतक्रादिशुद्धस्याप्यस्य
विशेषशोधनं ॥ गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना ॥ साम्लक्षारेण संशुद्धिं
ताम्रं माप्नोति सर्वथा ॥ अथ मारणं ॥ ताम्रपादांशतः सूतं ताम्रतुल्यं तु गंधकं मर्द
येद्याममुग्मं तु पायाल्कज्जलिका भवेत ॥ सांतकं न्यारसैः पिष्टा ताम्रपात्राणि वेप
येत ॥ संशुष्काणि ततस्तानि निक्षेप कज्जलिकांतरा ॥ निक्षिप्य हंडिकां मध्ये शरावे

॥८३५॥

णानिरोधयेत ॥ संधिरोधं द्वयोः कुर्याद्वज्रभस्म विशेषतः ॥ हंडिकां पटुना पूर्य भस्मना
वा गगनाथधि ॥ पिधाय चुल्ल्यां मां रोप्य वह्निं प्रज्वालयेद्दृढं ॥ चतुर्यामं ततः स्वांगशी
तलं तत्समुद्धरेत ॥ गोक्षीरे स्वेदयेद्यामं दोलायां स्यात्तदुत्तमं ॥ इति सारसं रसभस्म ॥
अन्यच्च ॥ अधमं पीनरसेन तुल्यं च लिनाजे भांडु पिष्ट्वा पुनर्निधाय तां मूदत्त्वा निसं
स्तरचितान्यर्कस्य पक्कछदैः ॥ भांडे रंध्रे शरातिं तिरणीक विटपस्य चगभस्म संपूरि
ते घस्रैकं परिपाचिता निश्रु चिनातीव्रं म्रियते सकृत ॥ संस्तरस्य च पनं तु अधो
र्कपत्रं हंडिकायां पक्कं दत्वा तत्र कज्जली तदुपरि तां मूपत्रं पुनः स्तदुपरि कज्ज
ली तदुपरि पक्काकपत्रं एवं क्रमेण इति भावः ॥ अथ प्रमथः ॥ आदौ रंध्रं वपति
भांडे अश्लीकाल्वगभस्म चतुरंगुलं दद्यांतं प्रसार्य तत्र तां मूसं संस्तरं दत्वा तदु

॥८३५॥

परि पुनर्भस्मपूर्णीकृत्वा उपरि शरावं मृत्कर्पटानि दत्वा चुल्ह्यामारोप्य प्रहरचतुष्टय
पर्यंतमग्निं तीव्रतमं दत्वा तानि निष्कृष्यंते ॥ स्वांगशीतानि गृह्याणि ॥ शुचिरत्र वह्निः
अथान्यप्रकारः ॥ शुल्वचूर्णं विशुद्धं तु समसूतं विमर्द्दयेत ॥ खल्वे जंबीरनीरेण
तयोः समं तु गंधकं ॥ दत्वा संमर्द्दयेत्सर्वं शरावयुगमध्यगं ॥ सप्तमृत्कर्पटानेकृत्वा
विशुष्कं छगणाग्निना ॥ दिने गजपुटे पच्यात्ताम्रभस्म प्रजायते ॥ यद्वा पक्कः काच
कूप्यामयं ताम्रेश्वरः परः ॥ वृष्यो रसायनः श्लेष्मकासपश्यादिमर्द्दनः ॥ पुंस्त्वप्रदो
नुपानैश्च मारीश्चातस्सर्वप्रदः ॥ इत्यपि सरसभस्मप्रकारः ताम्रेश्चरस्य ॥ जंबीर
रससंपिष्टरसगंधकलेपितं ॥ ताम्रपत्रं शरावस्थं त्रिपुटैर्याति भस्मतां ॥ इदमपि
सरसभस्म ॥ अथ ताम्रभस्मलक्षणं ॥ वह्निकंटकछविताम्रं मृतं भवति केवलं

॥ ८१६ ॥

पिष्टं चूर्णीत्वमायाति सरसं चेत्सचंद्रिका ॥ अथ ताम्रगुणाः ॥ ताम्रं कषायं मधुरं च ति
क्तमम्लं च पाके कटु सारकं च ॥ पित्तापहं श्लेष्महरं च शीतं तद्रोपणं स्याल्लघु लेखनं च
पाण्डूदरार्शोज्वरकुष्ठकासश्वासक्षयान् पीनसमम्लपित्तं ॥ शोथं कृमिं शूलमपाक
रोति प्राहुः परे चैंहणमल्पमेतत् ॥ अदोषमुक्तं सतं ताम्रं विपाकाच्छीतलं मतं ॥ दा
हः स्वेदो रुचिर्मूर्छा क्लेदो रेको वमिर्भ्रमः ॥ असम्यक्पक्वदोषितदोषास्ताम्रे सम्यक्
चमारिते ॥ अस्यैकश्चिदपक्वस्य शुद्धस्यापि प्रयोगो दृश्यते ॥ तथा च रसवाग्भटे
विषमुक्तावद्द्याद्वा प्रद्युयोद्धमधस्तथा ॥ सूक्ष्मं ताम्ररजः काले सक्षौद्रं हृद्विशो
धनमिति ॥ अथ वंगस्य नामलक्षणगुणशोधनमारणानि ॥ तत्र नामानि ॥ रं
गं वंगं त्रपु प्रोक्तं तथा पिच्चटमित्यपि ॥ कुरूप्यं पूतिगंधं च तारकं कंकरटीघनं ॥ ॥ ८१६ ॥

अथ लक्षणं ॥ खुरकं मिश्रकं चेति द्विविधं वंगमुच्यते ॥ खुरकं श्वेतमुदितं मिश्रकं
त्ववरं स्मृतं ॥ खुरकं चेद्द्रुतस्याभं खुराकारं च कीर्त्यते ॥ एतल्लक्षणाभिन्नं तु वंगं मि
श्रकनामकं ॥ अथ गुणाः ॥ वंगं तिक्तोष्णरूक्षं कफकृमियमिजिन्मेहमेदोनिलघ्नं
कासश्वासक्षयारिप्रशमितकृतमुज्ज्वाद्यमाध्मानहारि ॥ वश्यं वृष्यं प्रभाकृन्मन
सिजजनकं स्वप्नमेहप्रणाशि प्रस्रावकृद्रागपुष्ट्यै रतघुरतिरसस्यस्यापदं च्यह
णं च ॥ अशुद्धं मारितं वंगं प्रमेहादिप्रदं ॥ गुल्महृद्रोगशूलार्शः कासश्वासव
मिप्रदं ॥ अस्य शोधनं विशेषशोधनं च प्रागुक्तमेव ॥ अथ भस्मीकरणं ॥ शुद्धं वं
गं क्षिपेत्कुंड्यां च हिस्व्यायां शनैः शनैः ॥ तदधो ज्वालयेदग्निं द्रुते वंगे क्षिपेत्पुनः ॥
अपामार्गचतुर्थांशं चूर्णं संचालयेदिदं ॥ स्थूलाग्रपात्रोह दर्व्या यावत्तद्भस्म

॥८१॥

जायते ॥ अत्ररहस्यं ॥ चूर्णप्रक्षेपणंकार्य्यं स्वल्पंस्वल्पंमुहुर्मुहुः ॥ यावद्रससमभवेद्द्रुगं ताव
च्चूर्णंसमापयेत ॥ ततःशरावपिहितंस्थापयेत्तत्रतद्विषकं ॥ रजःसर्वैततोधस्ता
कुर्य्याद्दग्निंतुतीव्रकं ॥ यावद्गारवर्णंतद्रजःसमुपजायते ॥ स्वांगशीतंततोग्राह्यंमा
रणायरजःशुभं ॥ प्रकारांतरंसपद्धत्यां ॥ वंगोघर्षणकालेपमिषजःपीतायवानी
रसोऽन्वयस्यंतिष्ठरणश्रःश्विलाजतुतथाभस्माप्यपामार्गजं ॥ तिष्ठारंगदत्तान्यच्छ्रु
पिष्टितैभंडितुचिंचात्वचोभूत्वासंस्तरसंस्थितानिपुटतःकुर्वीतिभस्मान्यपि ॥
घर्षणकालेवक्ष्यमाणपत्राश्चदंडादिनाघर्षणे ॥ पीताहरिद्रायवानीयवसाक्षा
अनयोजःक्षरणक्षःक्षरांक्षरणंयावत्पिष्टीभवतितावद्विषजःन्यस्यंतिष्ठिपं
ति ॥ ततोभस्मनःश्रुद्धार्थंश्विलाजतुक्षिपेति ॥ श्विलाजतेरत्रक्ष्येततोग्राह्यःसो ॥८१॥

रक्ताख्यः तथेति ॥ अपामार्गजं भस्म घर्षणेन काले याक्षिपंति ॥ अत्र भस्मीकृत्य तदुप
रिष्टाणां दत्वातीव्रतरं वह्निं कृत्वा यथांगारवर्णो भवति तथा कर्त्तव्यं ॥ पश्चात्स्वांगसी
तं ग्राह्यं मारणं यत्तद्भस्म इति भावः ॥ प्रकारांतरं ॥ तिष्ठेति ॥ सेस्तरस्तु भस्म दत्वा त
दुपरि पत्रमेवं क्रमेण ॥ पुटतः गजपुटतः ॥ प्रकारांतरं तत्रैव ॥ पट्टे तस्य दलानि विं
शतिगुणोपि पिण्याकचूर्णेन तसीसंभृते सणपट्टवर्त्तिनि पुनस्तद्द्वयवान्यामपि की
र्णानि क्रमशो निबध्य सुदृढं दत्वा गजाख्ये पुटे स्तु भस्मत्रपुलिस्थिते तु पुटतोय
क्षेपमेव क्रमः ॥ व्याख्या ॥ अतसीपिण्याकचूर्णयवानीचूर्णयोः समुच्चयः ॥ शा
णपट्टवर्त्तिनोस्तु भयोर्विशेषणं ॥ क्रमशः पट्टे उभयोश्चूर्णे तत्रैकं पत्रं पुनश्चूर्णं
मित्यादि ॥ अथैवमन्यतमप्रकारेण निष्पन्नस्य वंगभस्मनः पुनर्मारणेन

॥८१८॥

निरुत्थीकरणमाह ॥ अथैवेवं गजं भस्मक्षुद्रतालेन मेतयेत ॥ समेन वोद्भिन्नो येण
घृष्टमांस्त्रोन वातततः ॥ मर्द्दियेल्लिंबुकद्रावैरथवाकन्यकाद्रवैः ॥ वोमैकं चाद्दियामं वा दृ
ढं मर्दयेत्पचक्रियां ॥ कृत्वा घर्मे विशुष्कां तां पिप्पलस्य त्वगंतरे ॥ संस्थाप्य पश्चाद्देवं
तस्य मध्याविपचेद्विषक्त ॥ सर्वोत्तमं चैव गभस्म निरुत्थं वटिकाप्रभं ॥ सर्वकार्य्यकरं
चैव कृत्वापते वैद्य जीनं ॥ द्वितीयादि पुटे तालं नं देयं किंतु घर्षणं ॥ प्रोक्तवेणाचक्रां मं
कृत्वा शुष्कं पुटे न्मुहुः ॥ पिप्पलस्य त्वचो तरे स्थापनविधिर्यथा ॥ पिप्पलत्वग्गुड्डवं
चूर्णमर्धं स्थाप्यं शरावके ॥ चक्रिकां तत्र संस्थाप्य प्रोषमूर्ध्वं न्यसेद्रजः ॥ संपिधाय्या
पसंरुध्य मत्कर्पटविलेपितं ॥ शुष्कं गजपुटे क्षेप्यं रहस्यमेति कीर्त्तितं ॥ केचिद्दं
ति पुटनाय दाम स्ममदेभवेत ॥ तद्वांतिमपुटान्यस्य चस्य छगणकानि हि ॥ ॥८१८॥

रतिवंगं रजसो निरुत्थीकरणेन भस्मत्वापादनं ॥ अथ प्रकारांतरं ॥ वंगं सतालमर्कस्यापि
ष्ठ्वा दुग्धेन तत्खुपेत् ॥ अश्वत्थाश्वत्थभंचेर्वल्कैः समधा भस्मतां व्रजेत ॥ अथ मध्यमपक्षे
णावंगमारणं ॥ रजनीरजसा वह्निस्थापां हंसांतु पूर्वयेत ॥ वंगभस्म विधायाथ सोर
कं तत्र मेलयेत ॥ वंग तुर्यांशमथ तच्छरावेणापिधापयेत ॥ मंदमग्निं घटीमेकां दत्वा
थस्वांगशीतलं ॥ कुंदेंदुधवलं वंगभस्म ग्राह्यं सर्वकार्यकृत ॥ अथान्यः प्रकारः ॥
चन्योत्पलोपरि स्थित्वा गोमयीखंडे क्षिपेद्रजः ॥ तितिणीवल्कलस्याथ तिलांस्तत्र विनि
क्षिपेत ॥ अंगुलार्द्धप्रमाणेन तत्र वंगदलं न्यसेत ॥ खंडीकृतं पुनस्तेन क्रमेणैवात्र
विन्यसेत ॥ तिलतिंतिणीवल्कं च गोमयाख्याग्निना दहेत ॥ स्वांगशीतं ततो ग्राह्यं
पुष्पावंगस्य भस्मतत ॥ श्वेतं लघु णाकाभासं सुसूक्ष्मं सर्वकार्यकृत ॥ अत्रप

॥८१८॥

क्षुद्रपथ्यान्नदानंप्राशैरुपेक्षितं ॥ इत्ययिवेगाभस्मकांतरेण ॥ अथजसदस्यनामलक्ष
णगुणमारणानि ॥ जसदंरंगसदृशंरीतिहेतुश्चतन्मतं ॥ उक्तंच ॥ जसदंगिरिजंतस्य
दोषाःक्रोधनमारणे ॥ वंगस्येवहिवोधव्यागुणाःसंतुप्रवदाम्यहं ॥ जसदंतुवरंतिक्तं
शीतलंकफपित्तहृत ॥ चक्षुष्यंपरमंमेहान्पांडुंश्वासंचनाशयेत ॥ नास्यप्रोक्तंकचि
द्वैद्यैर्मारणादिसक्रोधनं ॥ योगेकापिप्रयोगेवानदृष्टःशास्त्रतःकचित ॥ इच्छाचे
द्भ्रासदृशंक्रोधनंमारणंवुधैः ॥ विज्ञेयंहिगुणालायादन्यथाकिंप्रयोजनं ॥ अथना
गस्योत्पत्तिनामलक्षणगुणशोधनमारणानि ॥ तत्रोत्पत्तिः ॥ दृष्ट्वाभोगिसुतांरम्यां
वासुकिस्तुमुमोचयेत ॥ वीर्यंजातस्ततोनागःसर्वरोगापहोनृणां ॥ अथनामानि ना
गःसीसंचवध्रंचयोगेष्टंनागनामकं ॥ पद्मंवंगंजडंचैवकुवेगंपरिपिष्टकं ॥ अथ ॥८१८॥

गुल्मान् ॥ सीसं रंगगुणं ज्ञेयं विशेषान्मेहनाशनं ॥ अन्यच्च ॥ नागः समीरकफपित्तवि
कारहंता सर्वप्रमेहवनराजिकृपीटयोनिः ॥ उस्नः सरोजतरंजनकृद्गुणाढ्यो गुरुस्सगु
हणपतिसतिक्ष्णदंशुमाली ॥ अशुद्धः कुरुते नागः प्रमेहक्षयकामलाः ॥ तस्मात्सं
शुद्धएवायं मारणीयो भिषग्वरैः ॥ अपाकस्य दोषमाह ॥ पाकेन हीनौ किलना
गवंगौ कुष्ठानि गुल्मांश्च तथातिकष्टान ॥ पांडुप्रमेहानलसादशोथभगंदरादीनकु
रुतः प्रभुक्तौ ॥ अस्य शोधनं विशेषशोधनंच प्रागुक्तमेव ॥ अथमारणं ॥ भूभु
जंगमगास्तिं च पिष्ट्वा देहः पत्रमादिहेत ॥ हंडयामग्नौ द्रवीकृत्यवासायामार्गसंभवं ॥
क्षारं विनिक्षिपेत्तत्र चतुर्थांशं गुरुन्क्षितः ॥ प्रहारं पाचयेच्चुल्यां वासादर्व्या विघट्ट
यन् ॥ चुल्लीमध्ये ततं त्पिधाय कुर्यादग्निसमं पुनः ॥ ततउद्धृतच्चूर्णं शुद्धपात्रिलया

॥८२०॥

न्वितं ॥ वस्त्वंशावाटथतसर्वैर्यासानीरैर्विमर्द्दयेत ॥ पुटेत्पुनः समुद्धृत्यतद्द्रवेणविमर्द्दये
त ॥ एवंसप्तपुटैर्नागः सिंदूराभोभवेद्ध्रुवं ॥ भुजंगो भुजंगमःनागः ॥ आगस्तितत्वलीरसं ॥ क्षा
रंतेद्भस्म ॥ सौकुर्यात ॥ गुरुक्तिः स्वस्वंस्वेस्वदेयमित्येवंकृपा ॥ प्रहरमितिपावद्भस्मभव
त्यविलंतावत् नतुप्रहरनियमः ॥ इतिनिरुत्थंनागभस्म ॥ अथान्यप्रकारः ॥ तांबूल
रससंपिष्टसिसालेयान्पुनःपुनः द्वात्रिंशद्भिः पुटैर्नागोनिरुत्थंभस्मजायते ॥ इति
द्वात्रिंशत्पुटिनागभस्म ॥ अथान्यः प्रकारः ॥ त्रिभिः कुंभीपुटैर्नागोवासारसविमर्द्दि
तः ॥ सप्ति सोभस्मतामेतितद्गजः स्वयमेहनुतकुंभीगजः ॥ नागोनागपिष्टी ॥ सप्तिलः
अथमांशाष्युद्भृष्णिलापुक्तः ॥ श्राणवसंपुटस्यरेत्पथ्याहार्यं ॥ अथान्यः प्रकारः ॥ नो
गंत्वपरिकेनिधायकुमेटीचूर्णदद्दीतद्धुतेनिंवूत्पद्रवगंधकेनपुटितंभस्मीभवत्या

॥८२०॥

भुतत ॥ एवं तालकवाषतस्तु कुटिलं चूर्णीकृतं तत्पुटेद्दंधालेन समस्तदोषरहितं योगे
षु योज्यं भवेत् ॥ इति नागभस्मीकरणं ॥ अथ नागादिभस्मनि चिह्नो यदुक्तो रसपद्ध
तिकृता ॥ तद्यथा ॥ सर्वेषामतमेतद्द्वि भिषजां पनारसीसोढुवं पार्थक्येन गुणाव
हं न भस्मितं प्रोक्तोपलोहस्य च ॥ किं कार्यं भस्मितस्य चेच्छृणु रसादिष्वेव योज्यं हित
तादृक्सद्वचनानुरोधयेतेतः प्रोक्ता व्यवस्था इति ॥ अथ लोहस्योत्पत्तिनामलक्षणा
भेदगुणाश्चोधनमारणानि ॥ तत्रोत्पत्तिः ॥ पुरा लोमिलदैत्यानां निहतानां सुरैर्युधि
उत्पन्नानि शरीरेभ्यो लोहानि विविधानि हि ॥ अथ नामानि ॥ लोहोस्त्री शस्त्रकं तीक्ष्णं
पिंडं कालायसायसी ॥ अथ लक्षणं ॥ मुंडं तीक्ष्णं तथा कांतमिति लोहं त्रिधा स्मृतं ॥
मुंडं तु यत्तु संभग्नं मौपर्यं तेषु च जायते ॥ गजवद्दृष्यादितीक्ष्णं स्यात्कांतं चुंबकसंभवं

॥८२१॥

अन्यच्च॥ मुंडात्कटाहपात्राद्दिजायते तीक्ष्णलोहितः॥ खड्गादि शस्त्रभेदाः स्युः कां
तलोहं तु दुर्लभं॥ मुंडोत्क्षताधिकं तीक्ष्णं तीक्ष्णात्कांतं शताधिकं॥ तस्मान्मुंडं
परित्यज्य तीक्ष्णं वा कांतमुत्तमं॥ मारणायेति शेषः॥ अथ तीक्ष्णकांतयोर्वि
शेषलक्षणानि॥ कासीसामलकल्कात्ते लोहं गंधस्पृते गुरु खं॥ तीक्ष्णलोहं त
दुद्दिष्टं मारणायोत्तमं विदुः॥ अन्यच्च॥ क्षमामध्ये खराकारणं गात्रमलेन ते
पिते॥ लोहे स्फर्य त्रसूक्ष्मालि तत्सारमभिधीयते॥ अस्य गुणाः॥ लोहसारा
रूपं हन्यादुद्ग्रहणीमतिसारकं॥ अर्द्धसर्वांगजं वातं शूलं च परिणामजं॥ छर्दिं च
पीनसं पित्तं श्वासमामं सुख्य पोहति॥ अथ कांतलक्षणगुणाः॥ यत्पात्रे न प्रसर
ति जले तैलविंदुः प्रतप्ते हिंगुर्गंधं त्यजति च निजं तिक्ततां निंबकल्कः॥ तप्तं दु

ग्यं भवति शिखराकारकं नेति भूमिं कृष्णांगः स्यात्स जलश्च लाकः कांतलोहं तदु
क्तं ॥ कांतायः कामलाः शोथकुष्ठानि क्षयगुल्मकौ ॥ शूलोदराणि प्लीहानमाम
वातं भगंदरं ॥ अम्लपित्तं यकृच्चापि शिरोरोगं हरेद्ध्रुवं ॥ बलं वीर्यं वपुःपुष्टिं कु
रुते ग्निं विवर्द्धयेत ॥ सर्वान्रोगान्विजयते कांतलोहनसंशयः ॥ अथ सामान्य
गुणाः ॥ लोहं तिक्तं सरं शीतं मधुरं तुवरं गुरु ॥ रूक्षं वयस्यं चक्षुष्यं सेलनं वात
लं जयेत ॥ कफं पित्तं गरं शूलं शोथार्शःप्लीहपांडुताः ॥ मेदो मेह कृमीन् कुष्ठं तल्कि
ट्टं तदुणं स्मृतं ॥ अथ लोहदोषानाह ॥ गुरुता दृढतोत्क्लेदः कश्मलं दाहकारिता
अश्मदोषस्तु दुर्गंधो दोषाः सप्तायसस्य तु ॥ अथाशुद्धगुणानाह ॥ षंढत्वकुष्ठा
मयमृत्युदं भवेत हृद्रोगशूलौ कुरुते श्मरीं च ॥ नानारुजानां च तथा प्रकोपं

॥ ८२३ ॥

करोतिहृल्लासमथदुष्टलोहं॥ अथासम्यक्मारितस्यगुणाः॥ जीर्णहारिमदकारिचा
पसंदेहपुष्टिमदसंस्कृतंध्रुवं॥ पाटवंनतनुतेशरीरकेदाहरुगांहृदिरुजांचयच्छ
ति॥ अत्रकेचित्॥ नरसेनविनालोहंनलोहंचाभ्रकंविना॥ एकत्वेनशरीरस्यबंधो
भवतिदेहिनः॥ चपलेनविनालोहंयःकरोतिपुमानिह॥ उदरेतस्यकिट्टानिजायं
तेनात्रसंशयः॥ यत्कृतंसुप्राज्ञस्यायरसयोगोरसाभूयोगश्च॥ अथानुपानमे
तस्य॥ त्रिफलामधुसंयुक्तंसर्वरोगेषुयोजयेत्॥ पथ्याशिनांलोहमस्ययथोक्त
गुणदंभवेत्॥ अस्यमात्राप्रमाणं॥ गुंजामेकांसमारभ्ययावत्स्युर्नवरक्तिकाः॥
तावल्लोहंसमश्नीयाद्यथादोषबलंनरः॥ अथलोहसेविनांवर्ज्यानि॥ कूष्मांडं
तिलतैलंचमाषान्नंराजिकांतथा॥ मद्यमम्लमसूरांश्चत्यजेल्लोहस्यसेवकः॥ ॥ ॥८२३॥

अथ लोहस्योधनमारणौ ॥ जीर्णाः शस्त्रादिखंडाया पुराणा यंत्रखंडकाः ॥ तीक्ष्णजास्ते
हि ग्रह्णांति मारणार्थं भिषग्वराः ॥ यंत्रखंडकायंत्रीलोहमिति स्वर्णकारगृहे प्रसि
द्धाः ॥ शस्त्रादिखंडाः खड्गकंटारिकाछुरिकादिजाः ॥ तेषां कंटकवेधीनि पथ्याशक्ति
दत्तानि पैनिर्मलानि विधाय पादेशोधयेत्प्रोक्तवर्त्मना ॥ पश्चाच्छुद्धदलान्येषां लोहकी
टैः सुरेतयेत ॥ शुल्कं दत्वा कुट्टयेद्यत्तच्चूर्णमथ मारयेत ॥ अथ सुगमपक्षः ॥ शाणो
द्धृतं शाणाच्चूर्णं गृहीतं चुंबकाश्मना ॥ शस्त्रकृल्लोहकाराणां गृहे तद्बहुलं भवेत ॥
तच्चूर्णं तु समानीय सुधौवं निर्मलं शुचि पुनस्त्यासं शोध्यविधिना मारणं तस्य कार
येत ॥ युक्तिस्तु दृढशाणेवा लोहजे शाणे वा तच्चूर्णं स्थाप्यको क्लिलैः शुल्कानीतैर्घर्षी
त्वा लोहकारादिभिर्धमापयित्वा वा भस्त्रावातेन अग्निसमानदेह्यादृष्टेन निष्का

॥ ८२३ ॥

स्यतन्मध्ये तैलतक्रौ दिदेयं एवं सुकरं भवति ॥ तैलतक्रादिषु चूर्णं निक्षिप्तं चेत्पुनः पु
नस्तस्मान्निष्काशनेन महत्प्रयासः इति एवं यथाबुद्धिवैभवं शोधयेत् ॥ अथान्योपि चू
र्णप्रकारः ॥ संपुटं लोहजं पत्रं तप्तं तप्तं वराजले ॥ गोजले वा मुहुः क्षिप्तं क्षिप्तं चूर्णत्व
मानयात् ॥ पुनरन्योपि चूर्णप्रकारः ॥ स्थूलाभ्यः सिकताभ्योपि चुंबकस्पर्शनेन मु
हुः ॥ लोहचूर्णं हिंगुलं हंति सूक्ष्मं मारलोहितं ॥ अथ विशेषशोधनं ॥ त्रिफलाष्टगु
णे तोये त्रिफलाषोडशं पलं ॥ तत्क्वाथे पादशेषे तु लोहस्य पलपंचकं ॥ कृत्वा पत्राणि
तप्तानि सप्तवारं निषेचयेत् ॥ एवं प्रलीयते दोषो गिरिजं लोहसंभवः ॥ अथान्योपि जो
विशेषः ॥ तत्तद्व्याध्युक्तपथ्यानामौषधानां जलेपि सः ॥ प्रक्षेपं प्राह तत्त्वज्ञः सिद्धो ना
गार्जुनस्ततः ॥ ततः सामान्यविशेषेण शोधनेनतः ॥ अन्यच्च ॥ सर्वाभावे निषेक्त ॥ ८२३ ॥

कांक्षी रैतैलाज्यगोजले ॥ पुत्रदुःखस्य शोधनं ह्येतदुरणाधिक्यायसंमतां ॥ इति विशेषशो
धनं ॥ अथ भस्मप्रकाराः ॥ पुत्रदुःखस्य सूतराजस्य भागो भागद्वयं वसेः ॥ द्वयोः समं सा
रचूर्णमर्द्दयेत्कंन्यकांबुना ॥ यामद्वयं तस्य गोलं संवेष्ट्यैरंडजैर्दलैः ॥ ततः सूत्रेण संव
ध्य स्थापयेत्ताम्रसंपुटे ॥ संमुद्र्य वर्द्दनं तस्य मृदा संशोष्य तत्पुनः ॥ त्रिदिनं धान्यरा
सिस्थं ततउद्धृत्य मर्द्दयेत ॥ रजसा द्वस्त्रगालितं नीरे तरति हंसवत ॥ सोभाग्यताभिध
मिदं तोहभस्मप्रकीर्तितं ॥ इति निरग्निकं सोमाभ्रताभिधं लोहभस्म ॥ मतांतरं सा।
ध्योतु भूतो योगींद्रैः क्रमोन्योतोहमारणे ॥ कथ्यते रामराजेन कौतूहलधिया पुनः ॥
सपथ्या ॥ सूतकाद्द्विगुणं गंधं दत्वा कुर्याच्च कज्जलीं ॥ द्वयोः समं लोहचूर्णं मर्द्दयेत्कन्य
काद्रवैः ॥ यामयुग्मं ततः पिंडं कृत्वा ताम्रस्य पात्रके ॥ घर्मे धृत्वा रुवूकस्य पत्रैराच्छाद

‖ ८२४ ‖

पेहुधः । यामद्वयाद्वेदुरसं धान्यराशौ न्यसेत्ततः । दत्वोपरि शरावं तु त्रिदिनांते समुद्धरे
त् । पिष्ट्वा च गालयेद्वस्त्राद्देयं वारितरं भवेत् । एवं सर्वाणि लोहानि स्वर्णादीन्यपि मा
रयेत् । इति सूर्यतापितलोहभस्म स्वर्णादिभस्म च । अथाग्निपक्वं लोहभस्म । मारणा
कृष्णमयोरजस्त्रिदिनं संपिष्टं वराकारिण्या पद्मारक्तपुनर्नवाकादलरसैर्यद्वाद्रिकर्णी
रसैः । चांगेरीसत्तिलैस्तत्पैवसतिलैर्वा नीरव्यानीरजेस्त्रिंशद्दंतिपुटैः पचेज्जलत
रं स्याद्रूक्षजं वूप्रभं । अस्यार्थः । मारणां कृष्णं फाराणोपरिश्राकृष्णं घृष्टं पश्चाद्बुद्धं तो हें
तीक्ष्णं कांतं वा तस्य रजः । वरा त्रिफला । अद्रिकर्णी गिरिकर्णी । चांगेरी अम्लपर्णी
नीरव्या नीरजेत्वेतस्सः । एषामन्यतमस्य रसैः त्रिदिनं संपिष्टं त्रिवारं भावितं प
श्चाद्दंतिपुटैः पक्वं भस्म स्यात् । त्रिंशत्संख्याकगजपुटैरित्यर्थः । वैरं तोप्याधि ‖ ८२४ ‖

कैर्गजपुटैरलक्तरंभस्मजंचूर्णंभंस्यादित्यर्थः ॥ अत्रवाशब्दःसमुच्चये ॥ तेनएभि
रौषधिभिर्यथात्रिंशत्पुटानिभवंतितथाकार्यं ॥ त्रिदिवससप्तशब्दस्तुभावनात्रय
वाचकः ॥ नत्वेकदिनसाध्यभावनावाचकः ॥ इत्यग्निपक्वंत्रिंशत्पुटिशतपुटिया
लोहभस्म ॥ अन्यच्च ॥ क्षिपेद्द्वादशमांसेनदरदंतीक्ष्णचूर्णतः ॥ मर्द्दयेत्कन्यकाद्रा
वैर्यामयुग्मंततःपुटेत ॥ एवंसप्तपुटैर्मृत्युंलोहंचलीमवाप्नुयात ॥ इतिसप्तपुटि
लोहभस्म ॥ मतांतरं ॥ काकोदुंबरिकानीरैर्लोहपत्राणिसेचयेत ॥ यन्हितप्तानिष
ड्वारंकुट्टयेत्तदुलूखले ॥ तत्पंचमांसंदरदंक्षिप्त्वासर्वंविमर्द्दयेत ॥ कुमारीनीरतः
प्रक्ष्यांपुटेद्गजपुटेनतु ॥ त्रिवारंत्रिफलाकाथैस्तसंख्यैरपितत्पचेत ॥ तिरुत्थंजा
यतेलोहंत्रिधाप्यत्रनसंशयः ॥ इत्यग्निपक्वंषट्पुटिलोहभस्म ॥ मतांतरं ॥ निं

॥ ८२५ ॥

कूफलस्य पानीयैः सकांसांसैः प्रपूरिते ॥ कांस्यपात्रे क्षिपेत् खंडु खंडं ङातपस्थिते ॥ दि
नैकेन स्फुटं त्यजेत दिनांते तां स्कंपेषयेत् ॥ त्रिफलाक्वाथपिष्टं तच्चूर्णं गजपुटे पचेत् ॥
पौनःपुनेन यावत्स्यात्तद्धारितरमुत्तमं ॥ ततः पारदगंधाभ्यां तत्समाभ्यां सहार्दितं ॥
पूर्ववद्द्रात्परात्रिस्यं तीक्ष्णं संवेतिमं भवेत् ॥ मतांतरं ॥ जंबीररससंयुक्ते दरदेतन्मा
षसं ॥ चतुर्यामं विनिक्षिप्तं म्रियते नात्र संशयः ॥ अन्यच्च ॥ सप्तधा तप्तनिर्वापितं गो
जलेष्वधुकांतं ततः खंडशः कारयेत् ॥ हैयगोस्नारके लोडितं गोजलैर्धान्यके स्थापितं
यामिनीर्विंशति ॥ ततोस्त्रपुपुटेह्नवाये पेषयित्वा च गालयेत् ॥ कांतं वारितरं सयोजाय
ते रोगनाशनं ॥ अन्यच्च ॥ शालवसंखेंकि सतीक्ष्णाचूर्णं गवां दधिस्याखत्तुतन्मा
त्रां ॥ यामार्द्धमात्रं च विमर्द्य सर्वं धर्मैन्यसेत्तन्महरं च खल्वे ॥ ततो द्रवे माकंडयसंभ

॥ ८२५

येचवरास्ततेनिंबुरसेचतोहं ॥ रस्यंभवेत्सूर्यपुटैरमृतुर्भिःश्रुद्धंचतद्धारितरंगुएणाद्यं ॥
अन्यच्च ॥ दाडिमीपत्रजरसैर्लोहचूर्णंचभावितं ॥ आतपेसप्तधातेनपुनर्गजपुटेद
यं ॥ देयमित्यंतुतद्रस्मश्रुद्धंवारितरंभवेत ॥ योजयेत्सर्वयोगेषुसत्यंगुह्यचोयथा
अन्यच्च ॥ दाडिमस्यदत्तंपिष्ट्वातच्चतुर्गुणवारिणा ॥ तद्रसेनापसच्छूर्णंसलिलेपात्स्मा
वयेदपि ॥ आतपेशोषयेतच्चपुटेदेयंपुनःपुनः ॥ एकविंशतिवारैस्तुमृतेनात्रसं
शयः ॥ अन्यच्च ॥ गृहीत्वातीक्ष्णजंचूर्णंतत्तैलवचगवांदधि ॥ एकत्रकारयेद्भांडेयाव
च्छोषत्वमाप्नुयात ॥ उद्धृत्यगालयेद्गतौत्रिफलायाःपुटत्रयं ॥ देयंवारितरंसद्योजाय
तेनात्रसंशयः ॥ अन्यच्च ॥ एकभागंतोहचूर्णंतत्समोनवसागरः ॥ किंचितमोदकं
गृह्यंसर्वंवस्त्रेणावध्यच ॥ द्विपामंधर्षयेत्पात्रमौसद्योवारितरंभवेत ॥ योजये

अथ लोहसत्व ॥ चांगेरिकायत्ररसैव कुश्मोमर्दयेद्द्रवः ॥ चूर्णं तत्पारितं भिर्गाढं दिनं पंचावधि
धि धाठं केरलोन समं मूषेकाचं स्वेत मधः क्षिपेत ॥ षट्पले ॥ इति लोहसत्वं ॥ लोहचूर्णं समि
तं पंच टंकं तु तावुजं मलंवं च दीयते मध्ये पुनः काचं परिक्षिपेत ऊर्ध्वं संसंधि रोधं स्यात
पुनः संज्ञाम्यते मर्षं मूषां स्वांत स्थं ततो ग्राह्यं लोहसत्वं मप्मी प्रतं

सर्वरोगेषु सर्वरोगाय तु तये ॥ अथ मृतामृत लोहपरीक्षा ॥ सर्वमेव मृतं लोहं ध्मातव्यं
मित्रपंचकैः ॥ पद्येवं स्यान्निरुत्थं तु सेव्यं कारितरं हितं तत ॥ मधुघृतगुग्गुलुगुंजा टंक
णमेतत्तु पंचकं मित्रं ॥ मेलयेति सप्त धातून् नेगा रागैर्तु धर्मे मेन ॥ मध्याज्यं मृतलोहं च
सरूप्यं संपुटे क्षिपेत ॥ रुध्वा ध्माते च संग्राह्यं रूप्यं च पूर्वमानकं तदा लोहं मृतं वि
द्यादन्यथा मारयेत्पुनः ॥ इति मृतामृतलोहपरीक्षा ॥ गंधकेनोत्थितं लोहं तु स्यं ख ८२ हि

॥ ८२ हि ॥

त्रैविमर्द्दयेत् ॥ दिनैकं कन्यकाद्रावै र्हस्ता गजपुटे पचेत् ॥ इत्येवं सर्वलोहानां कर्त्तव्ये
यं निरुत्थितिः ॥ इत्येपक्वं स्यसर्वलोहस्य निरुत्थीकरणं ॥ अथ मृतलोहस्यामृतीक
रणं ॥ द्विगुणो त्रिफला क्वाथे तुल्ये पि स्वाप्य पोरजः ॥ विपचेन्मध्यपाकेन सर्वव्याधि
जरापहं ॥ इति मृतीकरणं ॥ द्विगुंणे ॥ अथ लोहद्रुतिः ॥ देवदाल्या द्रवैर्भाव्यं गंधकं दिनस
प्तकं ॥ तेन प्रवापमात्रेण लोह स्तिष्ठति सूतवत् ॥ अथ मंडूरोत्पतिनामलक्षणगुण
क्रोधनानि ॥ ध्मायमानमयो वन्हौ परित्यजति यन्मलं ॥ से किट्टं संज्ञांतं भवेत् तदने
कविधं मतं ॥ उक्तंच ॥ ध्मायमानस्य लोहस्य मलं मंडूरमुच्यते ॥ लोहा सिंहानिका कि
ट्टो सिंहानं च निगद्यते ॥ यस्य लोहस्य यत्किट्टं तत्किट्टमपि तद्गुणं ॥ अथ लक्षणा
नि ॥ इष्टं चो लं गुरुस्निग्धं मंडूकिट्टं जगुर्बुधाः भिन्नांजनप्रभं किट्टं विक्रोषाकुरु

॥८२७॥

निर्म्मलं ॥ निःकोटरं च विज्ञेयं तीक्ष्णाः किट्टं मनीषिभिः ॥ पिंगं हस्तं गुरु तमं मंदं दाढ्यम कोटरं ॥ छिन्ने चरजतच्छायस्मात किट्टं तु कांतजं ॥ अन्यच्च ॥ अकोटरं गुरु स्निग्धं दृढं शतसमाधिकं ॥ चिरोज्झटजनस्थान संस्थितं किट्टमाहरेत ॥ शतोत्थमुत्तमं किट्टं मध्यं चाशीतिवार्षिकं ॥ अधमं षष्ठिवर्षीयं ततो हीनं विषोपमं ॥ अथ किट्टमारणं ॥ किट्टं लोहजमक्षांगारे ध्मात्वा निषिच्य गोमूत्रैः ॥ सप्तावृतितद्धूर्णं संचूर्ण त्रैफलैस्तु प्रैतैः ॥ द्विगुणैर्विमर्द्य विन्हौ मर्द्यं मंडूरमुद्दिष्टं ॥ पांडुप्रमेहजीर्णज्वरनाशायनायोलं ॥ तत्रांतरे पि किट्टगुणाः ॥ किट्टं कषायं शिशिरं पांडुश्वयथुशोषजित ॥ हंतीमकंकामलां च हरते कुंभकामलां ॥ सवर्णमथवा वारि प्लवं मतं पत्र न विद्यते ॥ कोतलोहेन कमीलितं त्र्यकुयद्विषम्यैः ॥ किट्टादशगुणं मुंडं मुण्डातीक्ष्णं शताधिकं ॥ तीक्ष्णात्स्व ॥८२७॥

ष्कगुणं कांतं मक्षरणात्कुरुतेगुणं ॥ स्वर्णाभावेमतं ताप्यं ततोपिस्वर्णगौरिकं ॥ रूप्यादी
नामलाभेतुप्रक्षिपेद्विमलादिकं ॥ अथोपधातुनीरूपणं ॥ तेषुस्वर्णमाक्षिकनामा
नि ॥ स्वर्णमाक्षिकमारव्यातं ताप्पीजं धातुमाक्षिकं ॥ ताप्यंमाक्षिकधातुश्चमधुधातु
श्चससूतः ॥ किंचित्सुवर्णसाहित्यात्स्वर्णमाक्षिकमीरितः ॥ उपधातुसुवर्णस्य
किंचित्स्वर्णगुणान्वितः ॥ तथाचकांचनाभावेदीयतेस्वर्णमाक्षिकं ॥ किंतुतस्या
नुकल्पत्वात्किंचिदूनगुणास्ततः ॥ नकेवलंस्वर्णगुणावर्त्तंतेस्वर्णमाक्षिके ॥ द्र
व्यांतरस्यसंसर्गात्संत्यन्येपिगुणायतः ॥ अपतस्यगुणाः ॥ सुवर्णमाक्षिकंस्वा
दुतिक्तंवृष्यंरसायनं ॥ चक्षुष्यंवस्तिरुक्छंठं पांडुमेहविषोदरं ॥ अर्शःशोथंवि
षंकंडूंत्रिदोषमपिनाशयेत् ॥ तस्माच्चद्रुस्यगुणानोह ॥ मंदानलत्वंवलहानि

॥ ८२५ ॥

सुगंधिचिंचमितां नेत्रगदान्नुत्कुष्ठान् ॥ मालांतपैवच्च लापूर्विकांचकुर्याद्दसुद्धं त्वे
लुमाक्षिकं तु ॥ अथ तस्य शोधनं ॥ माक्षिकस्य त्रयो भागा भागैकं सैंधवस्य च ॥
मातुलुंगद्रवैर्वापि जंबीरस्य द्रवैः पचेत् ॥ चालयेल्लोहजे पात्रे यावत्पात्रं सुलोहितं
भवेत्ततस्तु संशुद्धिं स्वर्णमाक्षिकमृच्छति ॥ अथ मारणं ॥ माक्षिकस्य चतुर्थांशं
दत्वा गंधं विमर्दयेत् ॥ उरुबूकस्य तैलेन ततः कुर्याच्च चक्रिकां ॥ शरावसंपुटे ध्मात्वा
पुटेद्गजपुटेन च ॥ धान्यस्य तु षष्ठं वापि दत्वा शीतं समुद्धरेत् ॥ सिंदूराभं भवेद्भस्म
माक्षिकस्य न संशयः ॥ मृतां वरं ॥ कुलत्थस्य कषायेण घृतं तैलेन वा पुटेत् ॥ अजा
मूत्रेण वाथ तं म्रियते स्वर्णमाक्षिकं ॥ अथ सत्वाकृष्टिः ॥ एरंडोत्थेन तैलेन गुंजा
क्षौद्रं च टंकणं मर्दितं तत्स्वकाथेन सत्वं माक्षिकजं भवेत् ॥ अथास्यानुपानमाह ॥ ॥ ८२८ ॥

अथवा गोदुग्धैरम्लैस्तु हि क्षिरैर्भाव्यमेरंडतैलकैः ॥ माक्षिकं दिनमेकं तु मर्दितं वटकीकृतं
पूर्ववत्क्रमयोगेन सत्वं मुंचति तत्क्षणात् ॥

अनुपानं च राज्यो षवे इत्थं सज्यं हि माक्षिके ॥ अथ तारमाक्षिकं ॥ तारमाक्षिकमन्यत्तु
तद्भवेद्रजतोपमं ॥ किंचिद्रजतसाहित्यात्तारमाक्षिकमीरितं ॥ अनुकल्पतया तस्य
तत्तो हीनगुणाः स्मृताः ॥ न केवलं रूप्यगुणा वर्तंते तारमाक्षिके ॥ द्रव्यांतरस्य सं
सर्गात्संत्यन्येपि गुणा यतः ॥ अथैतस्य स्वरूपलक्षणं ॥ कांसवच्चाकविक्याठ्यंक
षेघषं तु रूप्यवत् ॥ गुरु स्निग्धं सितं पत्रबहुलं स्यात्तारमाक्षिकं ॥ स्वर्णमाक्षिकवद्दो
षा विज्ञेयास्तारमाक्षिके ॥ अतस्तद्दोषशांत्यर्थं शोधनं तस्य कथ्यते ॥ तद्यथा ॥
कर्कोटीमेषशृंग्युत्थैर्द्रवैर्जंबीरजैर्दिनं ॥ भावयेदातपे तीव्रे विमला शुध्यति

॥ ८२९ ॥

ध्रुवं ॥ विमलातारमाक्षिकं ॥ अथैतन्मारणं ॥ स्वर्णमाक्षिकवत्त्रेयं तारमाक्षिकमार
णं ॥ विमलायागुणाः किंचिन्न्यूनाः कनकमाक्षिकात् ॥ इतितारमाक्षिकशोधनमा
रणं ॥ अथतुत्थोत्पत्तिनामलक्षणगुणाः ॥ गरुडेनामृतंपीत्वापश्चात्पीतंविषंपु
रा ॥ वातेमरकताद्रौतुतद्वांतंशिखिवितुत्थकं ॥ तुत्थंवितुन्नकंचापिशिखिग्रीवंमयूर
कं ॥ नीलाश्मजंताम्रगर्भममृतासंगमुच्यते ॥ तुत्थंताम्रोपधातुःस्यात्किंचित्ताम्रेण
तद्भवेत् ॥ किंचित्ताम्रगुणंतस्माद्वक्ष्यमाणगुणंचतत् ॥ तुत्थस्यैवप्रभवेद्वंद्वः खर्परं
तद्गुणंचेतत् ॥ शिखिकंठसदृक्छायं भाराढ्यंतुत्थकंचपत् ॥ गुणवत्तत्परिज्ञेय
मन्यद्धीनगुणंमतं ॥ तुत्थकंकटुकंक्षारंकषायंवामकंलघु ॥ लेखनंभेदकंशीतंच
क्षुष्यंकफपित्तहृत् ॥ विषाश्मकुष्ठकंडूघ्नं खर्परंचापितद्गुणं ॥ वांतिभ्रांतिमस्तु ॥ ८२९ ॥

द्रुतं तत्कुरुते शोधितं शुभं ॥ अथ शोधनं ॥ विषयामर्द्दयेत्तस्यं माजाश्मपोतपोदक्षं
शं टंकणं दत्वा पचेद्दृढपुटे तथा ॥ पुटं दद्यात्पुटं क्षौद्रैर्द्दियं तस्य विशुद्धये ॥ प्रकारां
तरं ॥ आतो विंशा सममं तस्यं सक्षौद्रं टंकणं घृयुक् ॥ त्रिधैवं पुटितं शुद्धं यातिभ्रांति
विवर्जितं ॥ इति तस्य शुद्धिः ॥ कचिन्मारणमयुक्तं ॥ गंधाश्मटंकणयुतं तलकुचद्राव
मर्द्दितं ॥ अंधमूषागतं द्वित्रिकुक्कुटैर्म्रीतिमान्कयात ॥ अथ तस्य सत्वाकृष्टिः ॥ तस्य
कं टंकणयुतं निंबुद्रवविमर्द्दितं ॥ अंधमूषास्थितं ध्मातं सत्वं मुंचति तामकं ॥ अथ

पषासद्यो भस्मनागं मादाय चारयेत् क्षिप्रि खिन्नं बुधः ॥ अथ वा कुक्कुटं वीरं कृत्वा मदिर
माछ्रितमतमूत्रेगृहीते च संत्यज्य प्रथमां शाकं आलौह्य क्षारमध्याज्यं धमेत्सत्वा
श्रमाद्गलत ॥ मुंचेत सीसवत सत्वं तत्सुद्राजलपानतः न आतिजंगमविषाणप्रोषा
णिनसंशयेः ॥ १ इति प्रकांतरेण भस्मनागसत्वं

॥८३०॥

भूनाग॥ भूनागाः क्षितिनागश्च भुजंगो रक्तजंतुकः॥ क्षितिजः क्षितिजंतुश्च भूमिजो।
रक्ततुंडकः॥ अस्य गुणाः॥ भूनागो वज्रमारः स्यान्नानाविज्ञानकारकः॥ रसस्य जा
रणे प्रोक्तं तत्सत्वं तु रसायनं॥ अथ तेषां स्वरूपमाह॥ वर्षासु वर्षिसंक्लिन्नभूगर्भे सं
भवंति हि॥ जंतवः कृमिरूपा ये ते भूनागा इति स्मृताः॥ अथ तेषां सत्वाकर्षिः॥ ताम्रभ
भव भूनागोन्निश्शा पिष्टान्समेन तान्॥ गुडगुग्गुलुलाक्षोर्णामत्स्यपिण्याकटंकणैः
दृढमेतैश्च संयोज्य मर्दयित्वा धमेत्सुखं॥ मुंचेति ताम्रवत्सत्वं ते पक्षाश्च अपि वर्हिणां
ते भूनागाः॥ भूनागसत्वं च्छिच्छिरं सर्वकुष्ठव्रणप्रणुत॥ तस्य घ्जलपानेन स्थावरं
चापि जंगमं॥ विषं नश्यति सप्तात्रगतः सूतोग्नितो दृढः॥ एवं मयूरपक्षोत्थसत्व
स्यापि गुणाम्मताः॥ दृढं च ध्यतइत्यर्थः॥ अपक्कांस्य पित्तलयो रूत्पतिनाम लक्ष ॥८३०॥

रोगघ्नो वृष्यो धनमारणानि ॥ अष्टभागेन ताम्रेण द्विभागं कुटिलं मतं ॥ एकत्र द्रावितं
तस्मात्कांस्यं सौराष्ट्रजं शुभं ॥ ताम्रत्रपुजमाख्यातं कांस्यं घोषं च कंसकं ॥ उपधातुर्भ-
वेत्कांस्यं द्वयोस्तरणिरंगयोः ॥ कांस्यस्य तु गुणास्ते याः स्वयोनिसदृशा गुणैः ॥ संयो-
गजप्रभावेण तस्यान्येपि गुणाः स्मृताः ॥ तेपथा ॥ कांस्यं कषायं तिक्तोष्णं लेखनं वि-
शदं सरं ॥ गुरु नेत्रहितं रूक्षं कफपित्तहरं परं ॥ कांस्यं च द्विविधं प्रोक्तं पुष्पं तैलिकमे-
दतः ॥ पुष्पं श्वेततमं तत्र तैलिकं कपिलप्रभं ॥ एतयोः प्रथमं श्रेष्ठं संसेव्यं रोगशांतये
अथ पित्तलं ॥ पित्तलं त्वारकूटं स्यादारो रीतिश्च कथ्यते ॥ राजरीति ब्रह्मरीतिः कपिला
पिंगलापि च ॥ रीतिरप्युपधातुः स्यात्ताम्रस्य जसदस्य च ॥ पित्तलस्य गुणास्ते याः
स्वयोनिसदृशा बुधैः ॥ संयोगजप्रभावेन तस्यान्येपि गुणाः स्मृताः ॥ रीतिकाद्वि-

॥८३१॥

विधा प्रोक्ता तत्राद्या राजरीतिका ॥ काकतुंडी द्वितीया स्यात्तयोराद्या गुणाधिका ॥ सं
तप्ता कांजिके क्षिप्ता ताम्रा स्याद्राजरीतिका ॥ काकतुंडी तु कृष्णा स्यान्मूत्रा स्यो सेव्याधिजा
नता ॥ गुणाः ॥ रीतिकायुगलं रूक्षं तिक्तं च लवणं रसे ॥ शोधनं पांडुरोगघ्नं कृमिघ्नं ना
ति सेवनं ॥ अथोभयोः शोधनमारणे ॥ पत्तलीकृतपत्राणि कांस्यरीत्योः प्रतापये
त् ॥ निषिंचेत्तप्ततप्तानि तैले तक्रे च कांजिके ॥ गोमूत्रे च कुलत्थानां कषाये च त्रिधा त्रि
धा ॥ एवं कांस्यस्य रीतेश्च विशुद्धिः संप्रजायते ॥ विशेषशोधनं पथ्या ॥ गोमूत्रेण
पचेद्यामं कांस्यपत्राणि बुद्धिमान ॥ दृढाग्निना विशुद्ध्यंति पक्वान्यम्लद्रवेण वा ॥
रीतिस्तप्ता तु निर्गुंडीरसे श्यामारजोन्विते ॥ निषिक्ता शुद्धिमायाति पक्वा वाम्लद्रवे
पि च ॥ अथ मारणं ॥ अर्कक्षीरेण संपिष्टो गंधकस्तेन लेपयेत् ॥ समेन कांस्यप ॥८३१॥

आरोग्यपुष्ट्यन्यमस्तद्वैर्मुहुः ॥ ततो मूषापुटे ध्मात्वा पुटेद्गजपुटेन च ॥ एवं पुटद्वयात्कांस्यं
रीतिश्च म्रियते ध्रुवं ॥ अन्यच्च ॥ कांस्यकं राजरीतिश्च ताम्रवच्छोधयेद्भिषक् ॥ ताम्रव
न्मारणं चापि तयोरुक्तं भिषग्वरैः ॥ अथ भर्त्तसंज्ञं पंचलोहं पंचरसनामकं च अधि
कोपधातुं भवति ॥ स यथा ॥ कांस्यं रीतिस्तथा ताम्रं नागो वंगश्च पंचमः ॥ एकत्र द्रावि
तैरेतैः पंचलोहं प्रजायते ॥ नामानि ॥ पंचलोहं पंचरसं वर्त्तलोहं भर्त्तमित्यपि ॥ व्यंजनं
सूपमन्यच्च तद्भांडे साधितं शुभं ॥ आदौ तैलादिके क्षोध्यं पश्चात्तत्साध्यमत्र के ॥
निक्षिप्तं शुद्धिमायाति पंचलोहं न संशयः ॥ अर्कक्षीरेण संपिष्टगंधतालकलेपना
त् ॥ पंचकुंभिपुटैर्भर्त्तं म्रियते योगवाहकं ॥ इति भर्त्तमारणं ॥ घृतवर्ज्जं विधैः सर्वं संपा
द्यं कांस्यपात्रके ॥ भोजने तु प्रसस्तं स्याद्रीतिका मध्यमा स्मृता ॥ अथ सिंदूरं ॥ सिं

॥ ८३२ ॥

दूरं रक्तरेणुश्च नागगर्भं च सीसकं ॥ गणेशभूषणं संध्यारागं शृंगारकं स्मृतं ॥ सीसोप
धातुः सिंदूरं गुणैस्तत्सीसवन्मतं ॥ संयोगजप्रभावेण तस्याप्यन्ये गुणाः स्मृताः ॥ तेय
था ॥ सिंदूरमुष्णं वीसर्पकुष्ठकंडूविषापहं ॥ भग्नसंधानजननं ॥ व्रणशोधनरोपणं ॥
अथ शोधनं ॥ तत्र शोधनयोग्यसिंदूरलक्षणं ॥ स रंगो ग्निसहः सूक्ष्मः स्निग्धः स्व
च्छो गुरुर्मृदुः ॥ सुवर्णकरजः शुद्धः सिंदूरो मंगलप्रदः ॥ दुग्धाम्लयोगतस्तस्य विशु
द्धिर्गदिता बुधैः ॥ मतांतरं सिंदूरं निंबुकद्रावैः पिष्ट्वा धर्मे विशोषयेत ॥ ततस्तंडुल
तोयेन तथा भूतं विशुद्धति ॥ सिंदूरस्य प्रयोगो हि न दृष्टः कुत्रचित्पृथक् ॥ तस्मा
दुक्तस्थले पेऽप्यनुपदेशो गुरोरिति ॥ अथ सिलाजतुन उत्पत्तिर्नाम लक्षणगुणाः शो
धनानि ॥ शिलाजतु द्विधा ज्ञेयं तत्राद्यं गिरिसंभवं ॥ द्वितीयं स्याद्दुष्टभूम्यां मति ॥ ८३२ ॥

काजलयोगतः ॥ अथ स्वर्णादयः ॥ निदाघे घर्मसंतप्ता धातुसारं धराधराः ॥ निर्यासवन्मुंचति तच्छिलाजतु कीर्तितं ॥ सौवर्णं राजतं ताम्रमायसं च चतुर्विधं ॥ शिलाजतु हि विज्ञेयं तत्तल्लक्षणलक्षितं ॥ सौवर्णं तु जयापुष्पवर्णं भवति शैलजं ॥ मधुरं कटु तिक्तं च शीतलं कटुपाकि च ॥ राजतं पांडुरं शीतं कटुकं स्वादुपाकि च ॥ ताम्रं मयूरकंठाभं तीक्ष्णमुष्णं च जायते ॥ लोहं जटायुपक्षाभं ततिक्तं लवणं भवेत ॥ विपाके कटुकं शीतं सर्वश्रेष्ठमुदाहृतं ॥ अन्यच्च ॥ गोमूत्रगंधि पत्कृष्णं स्निग्धं मृदु तथा गुरु ॥ तिक्तं कषायं शीतं च सर्वश्रेष्ठं तदायसं ॥ लक्षणांतरं ॥ पतु गुग्गुलुसंकाशं तिक्तं च लवणान्वितं ॥ विपाके कटुकं शीतं सर्वश्रेष्ठं तदायसं ॥ वातपित्ते तु सौवर्णं श्लेष्मपित्ते तु राजसं ॥ ताम्रजं कफरोगेषु लोहजं तत्रिदोषनुत ॥ विंध्यादौ व

॥ ८३३ ॥

ऽलं तेषु पत्रलोहं ततोधिकं ॥ तच्छोधनमतेर्व्यमनेकमलमेलनात् ॥ अथ नामानि ॥ शि
लाजत्वद्रिजतु चाश्मोत्थं निर्यासरस्त्वपि ॥ गैरेयमश्मजं चापि गिरिजं शैलधातुजं ॥ शि
लाव्हं कटु तिक्तोष्णं कटुपाकं रसायनं ॥ छेदि योगवहं हंति कफमेहाश्मशर्कराः ॥
मूत्रकृच्छ्रक्षयश्वासवाताशार्शांसि पांडुतां ॥ अपस्मारं तथोन्मादं शोथकुष्ठोदरा
न् कृमीन् ॥ अथ शुद्धशिलाजतुनो गुणाः ॥ अशुद्धं दाहमूर्छा यभ्रमपित्तास्त्र।
शोषताः ॥ शिलाजतु प्रकुरते मांद्यमग्नेश्च विड्ग्रहं ॥ अथ शोधनं ॥ शिलाजतुसमा
नीयलोहजं लक्षणान्वितं ॥ वह्निर्मलमपाकर्तुं क्षालयेत्केवलांबुना ॥ अथ तस्यां
तर्मलविनाशोपायमाह हारीतः ॥ लोहस्थितं निंबगुडूचिसर्पिर्यवैर्यथावत्परि
भावयेत् ॥ संतानिकाकीटपतंगदंशादुष्टौषधीदोषनिवारणाय ॥ संतानिका ॥ ८३३ ॥

अंतःसंमिश्रितादुग्धमृत्तिका ॥ अत्रभावनार्थंकाचकूपकस्यनामाहवाग्भटः ॥ तुत्थं
गिरिजेनजलेवस्त्रगालिते ८ भावनौषधंकार्यं ॥ तत्काथेतत्पादांशकापूतोरसेतत्प्रक्षि
पेद्गिरिजं ॥ तत्समरसतांयातेसंपुष्टंप्रक्षिपेद्रसेमुहुः ॥ स्वैस्वैरेवंकार्येभाव्यंवारा
नभवेत्सप्त ॥ अथैवंभावनांदत्वासंशोध्यकेवलेनजलेनशोधनंकर्तव्यंतत्प्रकार
माहाग्निवेशः ॥ उष्णेचकालेरवितापयुक्तेव्यभ्रेनिवातेसमभूमिभागे ॥ चत्वारि
पात्राण्यसितायसानिन्यस्यातपेतत्रकृतावधानः ॥ शिलाजतुन्येष्वमवाप्यपात्रेप्र
क्षिप्यतस्माद्द्विगुणंचतोयं ॥ उष्णंतदूर्ध्वंक्वथितंचदत्वाविशोधयेत्तन्मृदितंयथा
वत् ॥ स्ववस्त्रपूतंप्रविधायतत्तुसंस्थाप्यनीयंपुनरेवतत्र ॥ ततस्तुपल्कस्समुपैति
चोर्ध्वंसंतानिकावद्विरम्यतप्तं ॥ पात्रेतदन्यत्रततोनिदध्यात्तस्योतरेकोसंजलं

॥८३४॥

निधाय ॥ ततस्तस्मात्तस्माद्दंपत्रपात्रेतत्स्मात्सुपात्राद्दपरत्रभूयः ॥ पुनस्ततोन्यत्रनिधा
यकर्षमेयसंहृतंतत्वनराहरेच्च ॥ यदाविष्णुकुंजलमष्टमर्द्धप्रसन्नभावान्मलमे
त्यधस्तात ॥ तदात्यजेत्तत्सलिलंमलंचशिलाजतुस्याज्जतत्पुटमेवं ॥ चतुर्थपात्रा
द्धृहितंहिसर्वंपरीक्षणंतस्यवदामिभूयः ॥ तद्यथा ॥ वन्हौक्षिप्तंतुनिर्धूमंपत्का
लिंगोपमंभवेत ॥ तृणाग्रेणांभसिक्षिप्तमधोयोगत्वतितंतुवत ॥ गोमूत्रगंधि
मलिनंपुटुकुंजेपंशिलाजतु ॥ अथैवंपुटकुंस्यगुणोत्कर्षोयभावनोप्रोक्ता ॥ त्रिफ
लावारिगोदुग्धमूत्रैर्भाव्यंशिलाजतु ॥ स्वस्वेस्वस्वंविधानेनस्थापयेत्काचपा
त्रके ॥ अगुवीक्षिप्तमेधूपैर्धूपयेत्तत्प्रयत्नतः ॥ मात्रयापाशीलयेत्पश्चात्स्निग्ध
पुटकोयथाविधि ॥ एकत्रिसप्तसप्ताहंकर्षमर्द्धपतंपरं ॥ हीनमध्योत्तमोयोगः ॥८३४॥

शिलाजस्य क्रमान्मात्रः ॥ क्षीरेणालोडितं कुर्याच्छीघ्रं रासायनं फलं ॥ हन्याद्रोगान
घोरांश्च जीर्णे हितमिताशनः ॥ व्यायामातपमारुतं चेतःसंतापगुरुविदाहादि
उपयोगादपि परतो द्विगुणांपरिवर्जयेत्क्वाथं ॥ कुलत्थान्काकमाचीं च कपोतांश्च
सदा त्यजेत ॥ पिबेन्माहेंद्रमुदकं कौपं प्रास्रवणं तु वा ॥ सर्वानुपानैः सर्वेषु रोगे
षु विनियोजितं ॥ जयत्यभ्यासतो नूनं तांस्तान्रोगान्न संशयः ॥ रसोपरससूतें
द्ररत्नलोहेषु ये गुणाः ॥ विशंति ते शिलाधातौ जरामृत्युजिगीषया ॥ अस्य भस्म
प्रकारः ॥ शिलया गंधतालाभ्यां मातुलुंगरसेन च ॥ पुटितं हि शिलाधातुम्रियते
ष्टगिरिंडकैः ॥ सत्वप्रकारस्तु ॥ पिष्टं द्रावणवर्गेण साम्लेन गिरिसंभवं ॥ रु
ध्वामूषोदरे ध्मानं कोकिलैः सत्वमृच्छति ॥ द्वितीयं शिलाजतु ॥ द्वितीयं सौरे

॥८३५॥

काळ्यं स्याच्छेतवर्णं शिलाजतु ॥ अग्निचारणोयमुक्तं तद्गुणं मूत्रामयेषु च ॥ उक्तं च
पांडुरं सिकताकारं कर्पूराभं शिलाजतु ॥ मूत्रकृच्छ्राश्मरीमेहकामलापांडुनाश
नं ॥ एलातोयेन संभिन्नं सिद्धं शुद्धिमुपैति तत् ॥ नैतस्य मारणं सत्वपातनं विहि
तं बुधैः ॥ उत्पत्तिस्तु मृत्तिकाविशेषाज्जलविशेषाज्जायते ॥ स्वरूपधातुनिरूप
णं ॥ अथ रत्नानि तत्र रत्नस्य निरुक्तिः ॥ धनार्थिनो जनाः सर्वे रमंते स्मिन्नती
व यत् ॥ अतो रत्नमिति प्रोक्तं शब्दशास्त्रविशारदैः ॥ अथ रत्नस्य नामानि स्वरू
पनिरूपणं च ॥ रत्नं क्लीवे मणिः पुंसि स्त्रियामपि निगद्यते ॥ तत्तु पाषाणभेदे
स्ति वज्रादि च तदुच्यते ॥ वज्रं विद्रुम मौक्तिके मरकतं वैदूर्यगोमेदसीमाणि
क्यं हरिनीलपुष्पदृषदौ रत्नानि नाम्ना नव ॥ यान्यन्यान्यपि संति कानि चि ॥८३५॥

दिह त्रैलोक्यसीम्निस्फुटं नाम्नातान्यपरत्नतामुपगतान्याहुः परीक्षतः ॥ मरकतं
पन्ना इति लोके ॥ वैदूर्यं विदूरमणिः ॥ हरिनीलः इंद्रनीलः ॥ पुष्पदषपुष्परागः ॥
प्रोषं स्पषं ॥ उपरत्नान्याह वैक्रांतः सूर्यकांतश्च चंद्रकांतस्तथैव च ॥ राजावर्तो
लालसंज्ञः पेरोजाख्यस्तथापरं ॥ मुक्ताशुक्तिस्तथा शंखः कर्पूराश्मा च काचजाः
नीलपीतादिमणयोऽप्यन्ये विषहरा हि ये ॥ वस्यादिस्तंभकाये च ते सर्वे हि परीक्ष
केः ॥ उपरत्नेषु गणिता मणयो लोकविश्रुताः ॥ अथ सर्वेषां लक्षणं ॥ श्यामः स्या
दिंद्रनीलस्त्वतिमसृणतनुच्छायगात्रस्ततः स्यान्नीलच्छायोऽतिदीप्तोऽप्यथ मि
हिरमणिः सूर्यतप्तोऽग्निमुक् स्यात् ॥ चंद्रांशुस्पर्शतो भःस्रवति शशिमणिः
पुष्परागस्तु पुष्पप्रख्यश्री वज्रमुच्चैर्घनसमभिहतं संविशेद्धो हपिंडे ॥ वैदू

॥८३ ही॥

र्यंवद्विडालेक्षणाह्वयंगदितंस्याच्चगोमेदरत्नंगोमूत्राभंविधूम्रमुज्वलदनलनि
भंपद्मरागंवदंति ॥ मुक्ताफलंस्वप्रवालंसरिदधिपतिजंविंध्यविख्यातमेतद्राजा
वर्त्तंतुपीताह्वयमद्रुस्तरभिक्षोणिजातोम्यमाहुः ॥ अथपंचरत्नानि ॥ पुष्परागं
महानीलंपद्मरागंसवज्रकं ॥ मरकतंचेतिसंप्रोक्तंपंचरत्नंवरंशुभं ॥ तत्रहीरके
स्वनामलक्षणंग्रंथाज्ज्ञ ॥ हीरकःपुंसिवज्रोस्त्रीचंद्रोमणिवरश्चसः ॥ ऐंद्रा
युधंचकुलिशंतथाभार्गवकंस्मृतं ॥ सतुश्वेतःस्मृतोविप्रोलोहितःक्षत्रियोम
तः ॥ पीतोवैश्योऽसितःशुद्रश्चतुर्वर्णात्मकश्चसः ॥ रसायनेमतोविप्रःसर्व
सिद्धिप्रदायकः ॥ क्षत्रियोव्याधिविध्वंसीजरामृत्युहरःस्मृतः ॥ वैश्योधन
प्रदःप्रोक्तस्तथादेहस्यदार्ढ्यकृत ॥ शुद्रोनाशयतिव्याधीन्वयस्तंभंकरो ॥८३ ही॥

ति च ॥ स्त्री पुं नपुंसकाश्चैते तल्लक्षणीयाश्च लक्षणैः ॥ सुवृत्ताः फलं दलं संपूर्णां

स्तेजो युक्ता च हस्तराः ॥ पुरुषास्ते समाख्याता रेखा बिंदु विवर्जिताः रेखा बिं

दु समायुक्ताः षडस्रास्ते स्त्रियः स्मृताः ॥ त्रिकोणाश्च लघु दीर्घाश्च ते विज्ञेया न

पुंसकाः ॥ तेषु स्फः पुरुषाः श्रेष्ठा रसबंधनकारिणः ॥ स्त्रियः कुर्वंति काय

स्य कांतिं स्त्रीणां सुखप्रदाः नपुंसकास्त्ववीर्याः स्युरकामाः सत्ववर्जिताः

स्त्रीयः स्त्रीभ्यः प्रदातव्याः क्लीबाः क्लीबे प्रयोजयेत् ॥ सर्वेभ्यः सर्वदा देयाः पुरु

षा वीर्यविवर्द्धनाः ॥ अशुद्धं कुरुते वज्रं कुष्ठं पार्श्वव्यथां तथा ॥ पांडुतां पंगुरत्वं

च तस्मात्संशोध्य मारयेत् ॥ अथ गुणाः ॥ वज्रं समीरकफपित्तगदालिहंत्या छत्रोप

मं च कुरुते च पुरुस्तमश्रि ॥ श्रो षड्क्षय भूम भगंदर मेह मेदो पांडूदरघ्न पशुहारि

॥८३७॥

चषड्रसाढ्यं॥ अथविद्रुमनामगुणाः॥ पुंसिक्लीवेप्रवालःस्यात्पुमानेवतुविद्रुमः॥ अंभो
धिपल्लवोंगारमणिर्भ्रमलतामणिः॥ प्रवालंमधुरंसाम्लंकफपित्तादिदोषनुत्॥ वी
र्यकांतिकरंस्त्रीणांधृतंमंगलदायकं॥ क्षयपित्तास्रकासघ्नंदीपनंपाचनंलघु॥ विष
भूतादिशमनंविद्रुमंनेत्ररोगहृत्॥ अथमौक्तिकनामगुणाः॥ मौक्तिकंशौक्तिकंमु
क्तातथामुक्ताफलंचतत्॥ अंभःसारंनीरजंचशुक्तिरत्नंचतारका॥ मौक्तिकंमधुरं
सुशीतलंदृष्टिरोगशमनंविषापहं॥ राजयक्ष्मपरिकोपनाशनंक्षीणवीर्यबलपु
ष्टिवर्द्धनं॥ कफपित्तक्षयध्वंसिकासश्वासाग्निमांद्यनुत्॥ पुष्टिदंवृष्यमायुष्यंदा
हघ्नंमौक्तिकंमतं॥ अथमरकतनामगुणाः॥ गारुत्मतंमरकतमश्मगर्भोहरिन्मणिः॥ ॥८३७॥
सौपर्णंगरलारिश्चबुधरत्नंचतत्स्मृतं॥ गारुत्मतंविषघ्नंचशीतलंमधुरंरसे॥ आ

मपित्तहरं रुच्यं पुष्टिदं मृतनाशनं ॥ अथ वैदूर्य्यनामगुणाः ॥ वैदूर्य्यं दूरजं रत्नं स्यात्केतु
गृहवल्लभं ॥ प्रावृष्यमभ्रतोहं च कैतवं च प्रकीर्त्तितं ॥ वैदूर्य्यमुष्णमम्लं कफमारुतना
शनं ॥ गुल्मादिदोषशमनं भूषितं तच्छुभावहं ॥ अस्याप्रसिद्धत्वात्तल्लक्षणमुच्यते
एतेद्दलपत्ताभापेशातरुचामापूरकंठविषामाजीरेक्षणपिंगलच्छविमुपासेयं
त्रिधाच्छायया ॥ यद्गात्रं गुरुतां दधाति नितरां स्निग्धं तु दोषोज्झितं वैदूर्य्यं विदुस्तं व
देति सुधियः स्वच्छं च तच्छोभनं ॥ अथ गोमेदसो नामगुणाः ॥ गोमेदकं तु गोमेदो
रुहरत्नं तमोमणिः ॥ गोमेदकोम्ल उष्णश्च वातकोपविकारजित ॥ दीपनः पाचन
श्चैव धृतोयं पापनाशनः ॥ अथ माणिक्यनामगुणाः ॥ माणिक्यं पद्मरागः स्या
च्छोणरत्नं च लोहितं ॥ शोणरागश्चमाकुरुविंदं च रत्नराड्रविरत्नकं ॥ माणिक्यं म

च

धुरं स्निग्धं वातपित्तज्वरणापहं ॥ रत्नप्रयोगप्रज्ञानां रसायनकरं परं ॥ अथेंद्रनीलना

॥८३४॥ मगुणाः ॥ नीलस्तथेंद्रनीलश्च सौरिरत्नं च सस्मृतः ॥ नीलस्तु तिक्तकश्चोष्णः कं

फपित्तानिलापहः ॥ यो दधाति शरीरेस्य शौरिर्मंगलदो भवेत ॥ अथ पुष्परागना

मगुणाः ॥ पुष्परागो मंजुमणिः स्याद्वाचस्पतिवल्लभः ॥ पीताश्मा पीतस्फटिकः

पीतरक्तश्च सस्मृतः ॥ पुष्परागोम्लः पीतश्च वातजिद्दीपनः परः ॥ आयुःश्रियं

च प्रज्ञां च धारणात्कुरुते नृणां ॥ इति नवरत्नानि ॥ अथोपरत्ननामगुणाः ॥ तत्र

वैक्रांतोऽथ तिमाहा ॥ दैत्याहते महादैत्ये महिषासुर संसके ॥ तद्देहरुधिरोद्भूता विं

द्योपत्रपत्रहि ॥ पतिता विंध्यकादेसु दक्षिणोत्तरभागयोः ॥ वज्राकारास्तु ते जा

ता वैक्रांता इति विश्रुताः ॥ गौरीमते तु ॥ विक्रांता वज्रखंडा ये वैक्रांताख्या भजं ॥८३८॥

तिजे॥ जातयः शोधनं हिंसा गुणास्तेषां च वज्रवत्॥ अथ गुणाः॥ वैक्रांतो वज्रसदृशो
देहलोहकरो मतः॥ विषघ्नो रसराजश्च ज्वरकुष्ठक्षयप्रणुत्॥ अन्यत्रापि वैक्रां
तस्तु त्रिदोषघ्नः षड्रसो देहदार्ढ्यकृत्॥ पांडूदरश्वासकासयक्ष्मप्रमेहनु
त्॥ अशुद्धौ वज्रवैक्रांतौ कीलासंदाहसे ततिं॥ पांडुरोगं पार्श्वपीडां कुरुतो तौ
विशोधयेत्॥ अथ सूर्य्यकांत नाम गुणाः॥ अथ भवति सूर्य्यकांतस्तपनमणि
स्तांपेनश्च रविकांतः॥ दीप्तोपलोग्निगर्भो ज्वलनाश्मार्कोपलश्च वसुनामा॥
रविकांतो भवेदुष्णो निर्मलश्च रसायनः॥ वातश्लेष्महरो मेध्यः पूजनाद्रवितु
ष्टिदः॥ अथ चंद्रकांत नाम गुणाः॥ इंदुकांतश्चंद्रकांतश्चंद्राश्मा चंद्रजोपलः
शीताश्मा चंद्रिकाद्रावः शशिकांतश्च सप्तधा॥ चंद्रकांतस्तु शिशिरः स्नि

॥८३८॥

ध्यः पित्तास्रतापजित् ॥ शिवप्रीतिकरः स्वच्छो महालक्ष्मीविनाशनः ॥ अथ पेरोज

नामगुणाः ॥ पेरोजं हरिताश्मं च भस्मांगं हरितं द्विधा ॥ पेरोजं सुकषायं स्यान्मधु

रं दीपनं परं ॥ स्थावरं जंगमं चैव संयोगाच्चैव यद्विषं ॥ तत्सर्वं नाशयेच्छीघ्रं भूतभू

तादिदोषजं ॥ अथ कर्पूरमणिः ॥ कर्पूरनाममणिश्चा दंचते च मणिवाचकः ॥ कर्पू

रमणिनामायं शान्त्या वातादिदोषजित् ॥ अथ कांचनामगुणाः ॥ काचः कृत्रिमर

लं स्यात्पिंगारः कांचभाजनं ॥ काचो विदारणो व्रण्यो चक्षुष्यो लेखनो लघुः ॥ अ

थ दुग्धाश्मानामगुणाः ॥ अयं क्षीरगौसार रतिलोके ॥ दुग्धाश्मा दुग्धपाषाणः क्षी

रो गोमेदसन्निभः ॥ वज्राभो दीप्तिकः सौधो दुग्धी क्षीरपयोपि च ॥ दुग्धपाषाणा

को रूक्ष ईषदुष्णो ज्वरापहः ॥ पित्तहृद्रोगमूत्रघ्नः कासश्वासविनाशनः ॥ ॥८३८॥

अथ वज्रशोधनमारणे ॥ तत्र शोधनमाह ॥ व्याघ्रीकंदगतं वज्रं दोलायंत्रेण पाचये
त् ॥ सप्ताहं कोद्रवक्काथे कुलिशं विमलं भवेत् ॥ अथान्यत्र त्रिदिनाच्च युक्तानि ॥
तदुक्तं ॥ कुलत्थकोद्रवक्काथे दोलायंत्रे विपाचयेत् ॥ व्याघ्रीकंदगतं वज्रं त्रिदिनं तद्वि
शुद्धति ॥ व्याघ्री कंटकारिका ॥ प्रकारांतरं ॥ व्याघ्रीकंदगतं वज्रं महालिंगपुटे पचेत्
अहोरात्रात्समुद्धृत्य हयमूत्रेण सेचयेत् ॥ वज्रीक्षीरेण वा सिंच्यात्कुलिशं विम
लं भवेत् ॥ प्रकारांतरं ॥ गृहीत्वा निष्प्रभं वज्रं व्याघ्रीकंदे विनिक्षिपेत् ॥ महिषीपि
च्छपासिंद्याकरीषाग्नौ विपाचयेत् ॥ त्रियामायां चतुर्यामं यामिन्यंतेऽश्वमूत्रके ॥ से
चयेत्पाचयेदेवं सप्तरात्रेण शुद्धति ॥ अथ मारणं ॥ त्रिवर्षारूढकार्पासमूल
मादाय पेषयेत् ॥ त्रिवर्षनागवल्ल्या वा निजद्रावैः प्रपेषयेत् ॥ तद्गोलके क्षिपेद्व

॥ ८४० ॥

त्रेऽहन्यामगजपुटे पचेत् ॥ एवं सप्तपुटैर्नूनं कुलिशं मृतिमाप्नुयात् ॥ अथान्यः प्रकारः ॥
त्रिसप्तकृत्वः संतप्तं खरमूत्रेण सेचितं ॥ मत्कुणैस्तालकं पिष्ट्वा तद्गोले कुलिशं क्षिपे
त् ॥ ध्मातं वाजिमूत्रेण सिक्तं पूर्वक्रमेण वै ॥ भस्मीभवति तद्वज्रं रवशीतांशुसुं
दरं ॥ अथान्यः प्रकारः ॥ कांस्यपात्रस्य भेकस्य मूत्रे वज्रं समावपेत् ॥ त्रिः सप्तकृत्वः सं
तप्तं वज्रमेवं मृतं भवेत् ॥ कांस्यपात्रं कांस्यस्यजन्तानेककटोरिका ॥ तेत्रस्थो भेको मंडू
कः ॥ अंगुल्यादिना धर्षितः पात्रस्य चिक्कणतया बहिर्गंतुमशक्तः भीतः सन् मूत्रं
सृजति इति मूत्रग्रहणार्थमयं प्रयत्न इति भावः ॥ अन्यच्च ॥ मेषशृंगं भुजंगास्थि कू
र्मपृष्ठाम्लवेतसं ॥ शोप्रदंतं समं पिष्ट्वा वज्रीक्षीरेण गोलकं ॥ कृत्वा तन्मध्यगं वज्रं
म्रियते ध्मातमेव हि ॥ अथान्यः सुगमप्रकारः ॥ हिंगुसैंधवसंयुक्ते क्षिपेत्क्व ॥ ८४० ॥

कुलत्थजे ॥ तप्तं तप्तं पुनर्वज्रं भवेद्भस्म त्रिसप्तधा ॥ इति वज्रभस्म ॥ अथान्योपरत्नानां
शोधनमारणं ॥ उक्तं च ॥ रत्नोपरत्नान्येतानि शोधनीयानि यत्नतः ॥ अशुद्धा
नि न कुर्वंति गुणान् रोगां स्फुतन्यते ॥ शुद्धमम्लेन माणिक्यं जयंत्या मौक्तिकं शु
चि ॥ विद्रुमं क्षारवर्गेण तार्क्ष्यं गोदुग्धतः शुचि ॥ पुष्परागं च संधानैः कुलत्थक्का
थसंयुतैः ॥ तंदुलीयजलैर्वज्रं नीलं नीलीरसेन च ॥ रोचनाभिस्तु गोमेदं वैदूर्यं त्रि
फलाजलैः ॥ एतान्येतेषु संस्विन्नान्याशु शुद्धंति दोलया ॥ तकुचद्रावसे पिष्टैः शि
लातालकगंधकैः ॥ वज्रं विनान्यरत्नानि म्रियंते षट्पुटैः खलु ॥ प्रकारांतरं ॥ मुक्ता
मणिप्रवालान्यनेकवर्णानि तप्ततप्तानि ॥ स्तन्येन तंदुलीयद्रावैः कन्यारसैः
स्वरावृत्या ॥ सिंचेन्नश्यंति मत्स्यं माक्षिकं मौक्तिकं प्रवालं च ॥ वद्धापि रत्न

८४१ ॥

जातं विशोधयेन्मारयेद्यथावज्रं ॥ अथ कश्चिद्विशेषः रत्नादीनाममलाभे तु ग्राह्यं तस्यो
परत्नकं ॥ मौक्तिकस्याप्यभावे तु मुक्ताशुक्तिं प्रयोजयेत् ॥ अत्र गुरुश्च रत्नाः ॥ न हन्या
द्धीरकादीनि नवरत्नानि बुद्धिमान् ॥ महामौल्यानि तेषां तु वधे रौरवमश्नुति ॥ तर्हि
ऋषिभिः कथं हननक्रियोक्ता इति संदेहनिवृत्यर्थं परंपरोपदेशप्राप्तं बीजमस्ति
तद्यथा ॥ वज्रादीनां तु संस्कारे क्रियमाणोपतंतिये ॥ गात्रेभ्यः स्वेदकाः स्वल्पास्ता
न्हन्याद्बुद्धिमान्भिषक् ॥ यद्यात्रत्नजाताये तज्जातीयाः सुलक्षणाः ॥ स्वल्पमौ
ल्यास्तेषां तु वधे नास्ति हि पातकं ॥ अन्यच्च ॥ गुणा यथैव रत्नानां मुपरत्नेषु ते तथा
तेषु किंचित्ततो हीना विशेषोयमुदाहृतः ॥ तत्रैव क्रांतशोधनमारणे ॥ वैक्रांतो वज्र
वच्छोध्यध्मातः सिक्तोश्वमूत्रके ॥ वज्रवन्मृतिमापन्नो वज्रस्थाने प्रयोजयेत् ॥ ॥८४१॥

प्रकारांतरं ॥ कुलिशस्य क्वाथसंस्थितो वैक्रांतः परिशुद्ध्यति ॥ भूयते शुभैर्योधनिवृक्षद्रु
वसेपुतः ॥ इति वैक्रांतभस्म ॥ अन्येषां चोपरत्नानां शोधनमारणविधिर्भिन्नत्वः ॥ ग
णास्तु ॥ रत्नानि सोपरत्नानि चक्षुष्याणि सराणि च ॥ शीतलानि कषायाणि मधुरा
णि शुभानि च ॥ धृतानि मंगलान्यायुःपुष्टिपुष्टिकराणि च ॥ ग्रहालक्ष्मीविषक्षैणप
पापसंतापजिंति च ॥ भक्षितानि तु ॥ यक्ष्मपांडुप्रमेहार्शःकासश्वासभगंदरान् ॥ ज्वर
वीसर्पकुष्ठार्त्तिभूतकृच्छ्रव्रणामयान् ॥ घ्नंति पुण्यपयशःकुंतिपुण्यानि च नराणां भ
शं ॥ अथ नवग्रहसानुकूलार्थं नवरत्नजडितमुद्राधार्यति स्थाने नवरत्नविन्यासप्र
कारमाह ॥ दिक्प्राचीकुलिशस्य मौक्तिकमणेराग्नेयिका दक्षिणादिग्वह्नीप्रभव
स्यैनैऋतककुवगोमेदसौवारुणी ॥ नीलांसोरथ्यदिकविदूरजमणेर्वीयोः कुबेर

स्यादिकपुष्पस्याथ हरिन्मणोर्हरहरिच्छेषस्य शेषाहरित ॥ हरहरितरेष्मानी ॥ शेषस्य
माणिक्यस्य शेषाणामध्यादिककर्णिकायांन्यसेदित्यर्थः ॥ अथ मुक्ताफलानां द्रुति
स्तथान्येषामपि रत्नानां द्रुतिप्रकारमाह ॥ मुक्ताफलानि सत्याहं वेतसाम्लेन भावये
त् जंबीरोदरमध्ये तु धान्यराशौ निधारयेत ॥ पुटपाकेन तच्चूर्णं द्रवते सलिलं यथा
कुरुते योगराजोयं रत्नानां द्रावणं प्रिये ॥ इति रसादिनामग्रणां शोधनमारणं ॥ अथ
धात्वादिमारणयोग्यानकतिपयान्पुटप्रकारानाह ॥ गंभीरे विस्तृते कुंडे द्विहस्ते च
तुरस्रके ॥ वनोपलसहस्रेण पूरिते पुटनौषधं कोष्ठेस्थं प्रयत्नेन गोविष्ठोपरिधा
रयेत ॥ वनोपलसहस्रार्द्धं कोष्ठिकोपरितिः क्षिपेत ॥ वन्हिविनिक्षिपेत्तत्र महापुट
मितिस्मृतं कोष्ठं मृषा ॥ इति महापुटं ॥ सपादहस्तमानेन कुंडे निम्नेतथा यते ॥ व

नोपलसहस्रेण पूर्णे मध्ये विधारयेत् ॥ पुटनद्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे ॥ अर्धो
र्ध्वानि करंडानि अग्न्यूर्ध्वं परि निक्षिपेत् ॥ एतद्गजपुटं प्रोक्तं ख्यातं सर्वपुटोत्तमं ॥ हस्तश्च
चतुर्विंशत्यंगुलप्रमाणः ॥ स सपादः ॥ तेन त्रिंशदंगुलप्रमाणो नेत्यपरे ॥ इति गजपु
टं ॥ अरत्निमात्रके कुंडे पुटं वाराहमुच्यते ॥ निःसृतकनिष्ठया मुष्ट्या पक्षक्षितो हस्तोऽ
रत्निरित्यपरे ॥ इति वाराहपुटं ॥ वितस्तिमात्रके ख्याते कथितं कौक्कुटं पुटं ॥ षोडशांगुल
के ख्याते कस्यचित् कौक्कुटं पुटं ॥ इति कुक्कुटपुटं ॥ पलपुटं दीयते ख्याते घषसंख्यैर्वनोप
लैः ॥ कपोतपुटमेतत्तु कथितं पुटपंडितैः ॥ इति कपोतपुटं ॥ वहद्भांडस्थितैः पत्रैर्गोवरै
र्दीयते पुटं ॥ तद्गोवरपुटं प्रोक्तं भिषग्भिः सूतभस्मकृत् ॥ गोवरस्य लक्षणं ॥ गोष्ठां
तर्गोखुरक्षुण्णपांशुचूर्णितगोमयं ॥ गोवरं तत्समाख्यातं वरिष्ठं रससाधने

॥८४३॥

इतिगोर्वरपुटं ॥ वहद्भांडेतुषैःपूर्णेमध्येमूषांविधारयेत् ॥ क्षिप्त्वाग्निंमुद्रयेद्भांडंतद्भां
डपुटमुच्यते ॥ इतिभांडपुटं ॥ अथकतिपयानयंत्रप्रकारानाह ॥ भांडेवितस्तिगंभीरे
मध्येनिहितकूपिके ॥ कूपिकाकंठपर्यंतंवालुकाभिःप्रपूरिते ॥ भेषजंकूपिकासं
स्थंवह्निनापरिपच्यते ॥ वालुकायंत्रमेतद्धियंत्रतंत्रबुधैःस्मृतं ॥ इतिवालुकायंत्रं
निबध्यपोटलींकाष्ठे द्रव्यपूर्णांतुलोनहि ॥ द्रवैरापूर्णकुंभांतःस्वावलंबनसंस्थि
तां ॥ अधस्ताज्ज्वालयेदग्निंतन्नदुक्तंक्रमेणहि ॥ दोलायंत्रमिदंप्रोक्तंस्वेदनाख्यं
तदेवहि ॥ इतिदोलायंत्रं ॥ अधःस्थाल्यांरसंक्षिप्त्वानिदध्यात्तन्मुखोपरि ॥ स्थाली
मूर्ध्वमुखींसम्यक्निरुध्यमृत्स्नया ॥ ऊर्ध्वस्थालींजलंक्षिप्त्वाचुल्ल्यामारोप्य
यत्नतः ॥ अधस्ताज्ज्वालयेदग्निंयावत्प्रहरपंचकं ॥ स्वांगशीतात्ततोयंत्रात् ॥ ८४३ ॥

रन्ध्रीयाद्रसमुत्तमं ॥ विद्याधराभिधं यंत्रमेतत्तज्ज्ञैरुदाहृतं ॥ इति विद्याधरयंत्रं ॥ वा
लुकागूढसर्वांगां गर्तेमूषां रसान्वितां ॥ दीप्तोपलैः संवृणुयाद्यंत्रं भूधरनामकं ॥
इति भूधरयंत्रं ॥ यंत्रं डमरुसंज्ञं स्यात्तस्यां स्योमुद्रिते मुखे ॥ इति डमरुयंत्रं ॥ अथ
मदनमुद्रा ॥ सिक्थमाठकमादाय तत्षोडशगुग्गुलं जले ॥ प्रक्षिप्यावर्तयेल्लोहे कटा
हे चंडवह्निना ॥ पाचयति षड्गुपर्यस्य जलमंगुलपंचकं ॥ ततोन्यत्क्वाथ्यमानं तु जलेलैत
त्रागसंक्षिपेत् ॥ एवं पुनः पुनः कुर्याद्यावत्तज्जायते घनं ॥ मुद्रायोग्यमति स्वल्पं यंग
न्धीयात्तेन्प्रपलतः ॥ तेन मुद्रा विधातव्या जतयंत्रस्य साधकैः ॥ न भिद्यते जलै रेषा
वर्षेनापि कदाचन ॥ इति मदनमुद्रा ॥ अथ रसवेधनविद्या ॥ मूलताग्निरवरीमूलं
वारिणा मर्दयेद्दृढं ॥ तन्मूषां लेपयेन्मध्ये तन्मध्ये निक्षिपेद्रसं ॥ पंचटंकप्र

मारितां तां मूषामंगारके क्षिपेत् ॥ एवं वद्धो भवेत्सूतो मूषांतस्थो दृढो भवेत् ॥ मुखमध्यग
तस्तिष्ठेन्मुखरोगविनाशनः ॥ शरीरे क्रामिते जरापलितजिन्नरः ॥ स्तंभयेः छस्त्रसंघा
तं क्रामोत्पादनकारकः ॥ पुनर्नवं वपुः कुर्यात्साधकस्यन संशयः ॥ अतिक्रामो भवेन्म
र्त्यो जरापलितनाशनः ॥ इति रसबंधनं ॥ अथ विषशोधनं ॥ ये दुर्गुणा विषेषु कुर्वते स्फ
र्हीना विशोधिते ॥ तस्माद्विषं प्रयोगेषु शोधितं योजयेद्भिषक् ॥ विषभागांश्चणकैर्गते व
स्त्रपूतान्कृत्वा तु भाजने ॥ तत्र गोमूत्रकं क्षिप्या प्रत्यहं नित्यनूतनं ॥ शोषयेत्रिदिना
दूर्ध्वं धृत्वा तीव्रातपे ततः ॥ प्रयोगेषु प्रयुंजीत भागमानेन तद्विषं ॥ इयं प्रवृद्धिर्ग्रीष्म
र्तौ विचिता ॥ तत्र तीव्रातपसद्भावात् ॥ रक्तैः सर्षपैस्तैलेन तिस्रो वा सप्त धारयेत् ॥ वि
षं प्रयुंज्य प्रयत्नेन नानान्यत्रगराहानितः ॥ अथ तीव्रातपाभावे प्रकारांतरे राशोध ॥ २४४ ॥

नं ॥ विषभागांश्चणकवत्स्थूलान्कृत्वा तुले स्थापयेत ॥ गोदुग्धे घटिकाः पंच शुद्धि
मायाति तद्विषं ॥ न प्रोक्तं शोधनं यस्य विषस्योपविषस्य वा ॥ गोदुग्धे स्वेदनं तस्य
कर्त्तव्यं शुद्धिकारकं ॥ अथान्यः प्रकारः ॥ खंडीकृत्य विषं वस्त्रपरिवद्धं तु दोलया ॥
अजापयसि संस्विन्नं यामतः शुद्धिमान्प्रयात ॥ अजाक्षीराभावतस्तु गव्यक्षीरे
ण शोधयेत ॥ जायते दोषनिर्मुक्तं विषं योगेषु योजयेत ॥ अथान्यः प्रकारः ॥ विष
गृंथिमसेन्यस्य माहिषे दृढमुद्रितं ॥ करीषाग्नौ पचेद्यामं वस्त्रपूतं विषं शुचि ॥
इति विषशुद्धिः ॥ समटंकणसपिष्टं तद्विषं मृतमुच्यते ॥ योजयेत्सर्वयोगेषु न वि
कारं करोति तत ॥ अन्यमतं ॥ तुल्येन टंकणेनैव द्विगुणेनोपणेन च ॥ विषं संयो
जितं शुद्धं मृतं भवति सर्वथा ॥ इति विषकल्पार्थं विषमारणं ॥ अथ विषसेवा

॥८४५॥

शरद्ग्रीष्मवसंतेषु वर्षासु च यतस्तापयेत् ॥ हेमंते शिशिरे तैस्तु विधिना मात्रया पाययेत् ॥ अ
शीतिर्यस्य वर्षाणि च सुवर्णानि यस्य वा ॥ विषं तस्मै न दातव्यं दत्तं चेद्रोगकारकं ॥ दा
तव्यं सर्वरोगेषु घृताशिनि हिताशिनि ॥ क्षीराशिनि प्रयोक्तव्यं रसायनरते नरे ॥ ब्रह्म
चर्यप्रधाने हि विषकल्पं समाचरेत् ॥ पथ्यैः स्वस्थमना भूत्वा तदा सिद्धिर्न संशयः
अथ विषानधिकारिणः ॥ न क्रोधिते न पित्तार्ते न क्लीबे राजयक्ष्मणि ॥ क्षुत्तृष्णाश्र
म कर्माध्वसेविनि क्षयरोगिणि ॥ गर्भिण्यां बालवृद्धेषु न विषं राजमंदिरे ॥ न दातव्यं
न भोक्तव्यं विषं वा देकदाचन ॥ आचार्येण तु भोक्तव्यं शिष्यप्रत्ययकारकं ॥ विषं तु
हितं दपि मात्रया नान्यथा भवेत् ॥ सर्वरोगोपशमनं दृष्टिपुष्टिकरं विषं ॥ विधि
ना मात्रया काले भवेत्पथ्याशिनां नृणां ॥ अथ विषमात्राकथनं ॥ पवाषके भ

॥८४५॥

वेद्यावद्दम्यसत्तं तिलमात्रया ॥ सर्वरोगहरं नॄणां जायते शोधितं विषं ॥ मतांतरं ॥ प्र
थमे सार्षपी मात्रा द्वितीये सर्षपद्वयं ॥ तृतीये च चतुर्थे च पंचमे दिवसे तथा ॥ षष्ठे च
सप्तमे चैव क्रमवृद्ध्या विवर्द्धयेत् ॥ सप्त सर्षपमात्रेण प्रथमं सप्तकं नयेत् ॥ क्रमह
न्या तथा नेयं द्वितीये सप्तके विषं ॥ यवमात्रं विषं देयं तृतीये सप्तके क्रमात् ॥ वृद्ध्या
हान्या प्रदातव्यं चतुर्थे सप्तके तथा ॥ एवं सात्म्ये समायाते परां मात्रां भिषग्वरः ॥
स्थिरीकृत्य यथेष्टं तु ततस्त्यागं तु कारयेत् ॥ सेवनं क्रमहान्यायं विषकस्य रतीरि
तः ॥ यवमात्रं ग्रसेत्यस्योगं जामात्रं तु कुर्षवान् ॥ एवं यवाष्टपर्यंतं परा मात्राधिका
न हि ॥ अथ विषे पथ्यानि ॥ घृतं क्षीरं सितां क्षौद्रं गोधूमांस्तंडुलान् यवान् ॥ मरिचं
सैंधवं द्राक्षां मधुरं पानकं हितं ब्रह्मचर्यं हितं मंदे स्त्रं हितं कालं हितं जलं ॥ विष

स्यसेवकोमर्त्यो भजेदिति विचक्षणाः ॥ अथ विषपरिहारः ॥ मात्राधिकं यदा मर्त्यः प्रमा

८४६ दाद्भक्षयेद्विषं ॥ अष्टौ वेगास्तदा तेन जायंते तस्य देहिनः ॥ प्रथमः प्रथमे वेगे द्विती
ये वेपथुर्भवेत् ॥ वेगे तृतीये दाहः स्याच्चतुर्थे पतनं भुवि ॥ फेनं तु पंचमे वेगे षष्ठे विक
लता भवेत् ॥ जडता सप्तमे वेगे मरणं चाष्टमे भवेत् ॥ विषवेगानिति ज्ञात्वा मंत्रद्रव्यैर्वि
नाशयेत् ॥ यावन्नाष्टमवेगं तु संप्राप्नोति हि मानवः ॥ अतिमात्रं यदा भुक्तं वमनं त
स्य कारयेत् ॥ अजादुग्धं दद्यात्तावद्यावच्छांतिर्न जायते ॥ अजादुग्धं यदा कोष्ठे स्थिरी
भवति देहिनः ॥ विषवेगं तदात्तीर्णं जानीयात्कुशलो भिषक् ॥ तदा जीर्णमिति क्क
चित्पाठः ॥ विषं हन्याद्रसः पीतो रजनीमेघनादयोः ॥ सर्पाक्षीटंकणं वापि पिबते ॥ ८४६
न विषहृत्परं ॥ चत्वारो योगाः ॥ अतिमात्रं यदा भुक्तं तदाज्यं टंकणं पिबेत् ॥ विषं

सवेगं तेनाशु नाशमाप्नोति निश्चितं ॥ अथोपविषाणां गणनं शोधनं च ॥ अर्कसें
हुंडधत्तूरलांगलीकरवीरकं ॥ गुंजाहिफेनावित्येताः सप्तोपविषजातयः ॥ अर्कसेंहुंड
योर्दुग्धमितरेषांजयभवः ॥ रसः प्रयोज्यो योगे शुयद्वा पंचांगजो रसः ॥ मतांतरं अ
र्कसुलांगली गुंजा हयारि विषमुष्टयः ॥ जैपालोन्मत्ताहिफेना नवोपविषजातयः
मंगातु अनिश्चितैव ॥ लांगली शुद्धिमायाति दिनं गोमूत्रसंस्थिता ॥ इति लांगलीशु
द्धिः ॥ गुंजा कांजिकसंस्विन्ना प्रहरं शुद्धिमृच्छति ॥ इति गुंजाशुद्धिः ॥ किंचिदाज्येन सं
भृष्टो विषमुष्टिर्विशुद्ध्यति ॥ इति विषमुष्टिशुद्धिः ॥ जैपालं रहितं त्वगंकुररसनाभि
र्मलैर्माहिषे निक्षिप्य अहमुष्मतोपविमर्ते स्वल्पे सवासो द्दितं ॥ तिप्तंन्तुतनेन त्व
परेशु विगतस्नेहं रजः सन्निभं निंबुकांबुविभावितं च चतुष्प्राणशुद्धं प्रलाहं भवेत

॥८४७॥

इति जैपालशुद्धिः ॥ प्रकारांतरेणापि जैपालशुद्धिमाह ॥ दिनद्वयं इति वीजं जले क्षिप्त्वा वि
शोषितं ॥ त्रिदिनं स्थापयेद्दुग्धे क्षालयेत्सतिलेन तु ॥ शुद्धं हृल्कंठकसनक्षतादीनि
करोति न ॥ अन्यच्च ॥ पलस्त्रेवध्यात्तु जैपालं गोमयोस्योदके न्यसेत् ॥ पाचयेद्याममा
त्रं तु जैपालं शुद्धतां व्रजेत् ॥ इति जैपालशुद्धिः ॥ धत्तूरबीजं गोमूत्रे चतुर्यामोषितं
पुनः ॥ कंडितं निस्तुषं कृत्वा शुद्धं योगेषु योजयेत् ॥ इति धत्तूरबीजशुद्धिः ॥ अहिफे
नं शृंगवेररसैर्भाव्यं त्रिसप्तधा शुद्धं हृल्फक्तेषु योगेषु योजयेत् छिद्यानतः ॥ इत्य
हिफेनशुद्धिः ॥ वव्बूलत्वक्कषायेण भंगां संस्वेद्य शोषयेत् ॥ गोदुग्धभावनां द
त्वा शुद्धां सर्वत्र योजयेत् ॥ इति भंगाशुद्धिः ॥ अथ विषतैलं ॥ गन्धीपाल्काचयंत्रे
ण विषस्यागरुसत्ववत् ॥ तैलं तेन रसो मर्द्यः कुल्कारी समहान् भवेत् ॥ एवं ॥८५७॥

अथ कुं॰ क्षारकल्पना ॥ क्षारवृक्षस्य काष्ठानि शुष्काण्यग्नौ प्रदीपयेत् ॥ कृत्वा तद्भस्म म
त्पात्रे क्षिप्त्वा नीरे चतुर्गुणे ॥ विमर्द्य धारयेद्रात्रौ प्रातः स्वच्छं जलं नयेत् ॥ तन्नीरं क्वा
थयेद्वह्नौ यावत्सर्वं विशुष्यति ॥ ततः पात्रात्समुद्धृत्य क्षारो ग्राह्यः सितप्रभः
चूर्णाभः प्रतिसार्य्यः स्यात्पेयः स्यात्क्वाथवत्स्थितः ॥ इति क्षारकल्पना ॥

धत्तूरबीजादेस्तैलं ग्राह्यं विधानतः ॥ योगे सर्वत्र युंजीत प्रोक्तमानेन नान्यथा ॥
अथ कर्मविपाकानुसारेण कर्मजानां व्याधीनां हेतुचिकित्से उच्यते ॥ तत्रादौ क्रमप्राप्तस्या
स्य ज्वरस्य हेतुं प्रतिकारं चाह ॥ ये पुनः क्रूरकर्माणः पापाः पिशुनचेतसः ॥ ते भ
वेयुः सदा शीतज्वरयंतस्ततो परं ॥ शांतये प्रेतसंख्याकं प्रकुर्यात्त्रिपतो जपं ॥ जां
तवेदसमंत्रेण ब्राह्मणान्भोजयेत्ततः ॥ सुरामांसोपहाराद्यैर्बलिस्तत्र प्रश

॥ ८४८ ॥

स्यते ॥ सहस्रकलशैः स्नानं प्रकुर्यान्माधवस्य च ॥ तत्र ब्राह्मणभोजनं गुरुं तत्र शुभा
येन शक्त्यापेस्मया च कर्त्तव्यं ॥ इति शीतज्वरे ॥ शुभकार्ये सदा क्रोधी जायते तोमज्व
रो नरः ॥ जातवेदसमंत्रेण तच्छमायापुतं जपेत ॥ सहस्रकलशैः कुर्यान्महेशस्या
भिषेचनं ॥ पाते रौद्रस्य सूक्तस्य जपः कार्यो विजानता ॥ यथाशक्त्या प्रकुर्वीत त
तो ब्राह्मणभोजनं ॥ इत्यष्टमज्वरे ॥ अथ सर्वज्वरहरं कुंभदानमाह ॥ ज्वराभिभूतः
पुरुषो घटस्थापनं करोतु वै ॥ नवं कुंभं समानीय मृण्मयं चाव्रणं दृढं ॥ लोहितं कार्ष्णि
रहितं स्थापयेत् तंडुलोपरि ॥ परिमाणं तंडुलानां द्रोणपंचकमिष्यते ॥ विष्णुरूपस्तं
डुलो ग्राह्याः श्वेतवस्त्रेण वेष्टयेत ॥ मधुनाप्यथवाज्येन खंडेनाप्यगुडेन वा ॥
तैसेनवांमसावातं पूरयेच्छक्तितो नरः ॥ ततः पुष्पाक्षतैः शुद्धैर्गंधधूपैस्तथा ॥ ८४८ ॥

परैः॥ पूजयेत्कलशैः तंतु वेदमंत्रैर्यथाविधि॥ होमश्च पूर्ववत्कार्य्यः समिदाज्यचरु
त्कारैः॥ सप्तवर्णं च कलशं ब्राह्मणाय निवेदयेत्॥ मंत्रेणानेन विधिवत्पूजयित्वा
ज्वरी नरः॥ महेशदेव देवेश वासुदेव परात्पर॥ कुंभेनानेन दत्तेन ज्वरः क्षिप्रं विनश्य
तु॥ एकांतरं सन्निपातं त्रितयकचतुर्थकौ॥ पाक्षिकं मासिकं चापि सांवत्सरिकमे
वच॥ नाशयेतां मम क्षिप्रं वासुदेवमहेश्वरौ॥ इति सर्वज्वरहरकुंभदानविधिः॥ अ
त्राचीर्णप्रायश्चित्तो न दानाद्यधिकारीति शंकाचेदत्रोक्तमेव जपहोमादिकं प्राय
श्चित्तं ज्ञेयं॥ इति ज्वरहेतुप्रतीकारौ॥ अथातीसारस्य हेतुं प्रतीकारं चाह॥ अतीसारी
संभवति जलेनाग्निविनाशकः॥ तडागभेदकोयश्च सोग्निरस्मीत्यचं जपेत्॥ तथाद
शांशं जुहुयात्तिलाज्यैर्हेमदानकृत॥ जपो दशसहस्रसंख्यया कर्तव्यः॥ येन्द्रि

॥८४८॥

मूर्त्तिदानेचकुर्यात् ॥ तथाचपद्मपुराणे ॥ अतीसारीसभवतियस्त्वेताग्निविनाशकः
तस्योपशांतयेदद्याद्वन्हेःप्रतिकृतिंबुधः ॥ सौवर्णेनाथताम्रेणकुर्यात्प्रतिकृतिं
बुधः ॥ वन्हेर्विभवसारेणयत्नेनाद्भुतेनवा ॥ तथाच्छासकुलांरक्तचंदनेनानुलेपि
तां ॥ रक्तवस्त्रेणसंवीतांमेषस्योपरिसंस्थितां ॥ रक्तमाल्यैःसुसंछन्नांमुक्तादाम
परिष्कृतां ॥ कनकाचलवर्णाभांद्वादशार्कनिभाप्रभां तत्वयत्नित्वितेविप्रेकर्मनि
ष्ठेग्निहोत्रिणि ॥ अंगुलीयकवस्त्राद्यैर्भूषितांनिवेदयेत् ॥ मंत्रेणानेनविधिवद्दाग्नि
प्रीत्यर्थमादृतः ॥ त्रेतारूपोग्निरीड्यस्त्वमंतक्षरसिवैनृणां ॥ त्वयेयंप्राक्तनंपापम
तीसारंविनाशय ॥ एवंकृत्वावरःसम्यगतीसारंव्यपोहति ॥ निरोगःसुसुखी
भूत्वादीर्घमायुश्चविंदति ॥ इतिवन्हिमूर्त्तिदानविधिः ॥ इत्यतीसारहेतुप्रसक्तं ॥ ८४८ ॥

जपेल्लिंगं श्रीसूक्तं च विचक्षणः ॥ यद्रूपा राक्षरस्त्वेवं महाशान्त्यं तरं पुनः ॥ यो विनाकार
णं किंचिद्दूरं दत्वा विनाशयेत ॥ समं दाग्निर्भयेन्मर्त्यो मितकस्योपशान्तये ॥ विद्ध्या
च्चरुसर्पिभ्यां होमम अष्टोत्तरं शतं ॥ यातेरौद्रस्य सूक्तेन जपेदष्टोत्तरं शतं ॥ तामग्निवर्णा
मित्येतद्वो जपेच्च द्विजोत्तमान ॥ चत्वारिंशन्मितानेव मग्निमांद्याद्विमुच्यते ॥ चौरा
यनमते नापि वन्हिमांद्यविधिं स्मरण ॥ अग्निमांद्यं भवेत स्य यस्त्रे ताग्नि विनाशकः
वक्ष्यामि तत्प्रतीकारं यथोक्तं ब्रह्मणा पुरा ॥ यत्रार्द्धेन तदर्द्धेन तदर्द्धेनाथवा पुनः ॥
राजतं कारयेत्सम्यक् वन्हेर्वाहनमुत्तमं ॥ सौवर्णां सुखुरः कार्यः पूजयेत वस्त्रेणावेष्ट
येत ॥ पूजयेत माल्यैः श्वेतगंधैर्धूपं दद्यान्मधूत्कटं ॥ तंदुलोपरि संस्थाप्य पुनः सात्व
जपेत्सुधीः ॥ तंदुलानां परीमाणं द्रोणाद्वयमुदीरितं ॥ आग्नेय्यां दिशि होममन्त्र

॥ ८५०॥

समिदाज्यतिलैरपि ॥ आचार्येण विनीतेन सर्वशास्त्रार्थजानता ॥ द्विजन्मना च कर्तव्य
स्तत्र मंत्रानिमांछृणु ॥ अग्निमूर्द्धेति मंत्रेण समिद्धोमः प्रशस्यते ॥ अग्नेर्नयेत्याज्यहो
मोप्यग्निर्नग्निस्तिलाक्षतैः ॥ मंत्राध्यायोक्तमार्गेण अग्निसंस्थापनं स्मृतं ॥ आग्नेः
प्रागुत्तरे देशे श्रु मंकुंभं तु चिन्तयेत ॥ प्रणीतामोक्षपर्यंतं कृत्वा स्नानं विधीयते ॥ आ
पोहिष्ठेति मंत्रश्चैव हिरण्येति त्रृचेन तथा ॥ पावमान्यनुवाकेन मार्जयेद्रोगिणं ततः
शं नो वातानुवाकेन शांतिं चापि प्रकल्पयेत ॥ तस्मै तु नवते रोगी प्राङ्मुखोपल्कं द
ङ्मुखः ॥ पूजितायथशक्त्या दद्याद्दानं सदक्षिणं ॥ देवानां यो मुखं हव्यवाहनो
हव्यपूजितः ॥ तस्यात्वं वाहनं पूज्यं देवैः सेंद्रैर्महर्षिभिः ॥ अग्निमीड्यं पूर्वकर्मविपा
कोत्थं तु पन्नम ॥ तस्यैनं नाशयक्षिप्रं जठराग्निं प्रवर्द्धय ॥ इति दानमंत्रः ॥ एवं वि

प्रायपोदयाद्दग्नेर्व्रीहिनमुत्तमं॥यत्नवानग्नियान्मर्त्यो जीवेद्दर्षशतंपुनः॥ततःस्वयं
धुभिर्विप्रैःस्नात्वाभुंजीतमानवः॥इत्यग्निमांद्यहरंभेषदानं॥यस्यभुक्तंनजीर्य्येत
नतिष्ठेत्कथंचन॥ध्यात्वापक्तारमनलस्यअग्निरस्मीत्यृचंजपेत॥जपोन्नअष्टो
तरसहस्रसंख्याकःकर्त्तव्यः॥किंच॥अन्नहर्त्तात्वजीर्णान्नोभवेदस्यप्रशांतये॥
उपावासत्रयंकुर्याद्वत्सोवस्यानुसारतः॥अष्टोतरसहस्रंचसंख्यातंजपहोमतः
होमेसघृतमन्नंस्यादग्निरस्मीत्यृचंमनुः॥किंचशूद्रस्यैवयत्नुभुक्त्वाम्रियतस्यद्वि
जस्यच॥शूलव्याधिर्भवेतस्यमजीर्णेनातिपीडितः॥यहछातापाद्वाक्यमुपवास
त्रयंमतं॥यतत्रेयमितंहव्यंज्ञोत्रिपापसमुत्सजेत॥इत्यजीर्णशूलव्याधिदानं
मिंधमिंधधमधमकंपपकंपपहुंफट्स्वाहा॥करकोरकस्वेरंकोरेस्वाहा॥आ

॥८५१॥

यो जीर्णहरो मंत्रो वरो स्त्वादग्निमावहेत्॥ आभ्यां मंत्रप्रयोगाभ्यां तोयभस्माप्यऔ
षधं॥ मंत्रितं दीयते यस्य सोऽजीर्णान्मुच्यतेऽचिरात्॥ इत्यजीर्णमंदाग्निरोगहेतु
प्रतीकारौ॥ अथ कृमिरोगस्य हेतुं प्रतीकारं चाह॥ गजघात्यश्वघाती च कृमिकुक्षि
र्नरो भवेत्॥ शांतये नीलवृषभं दद्याद्धगां स्वशक्तितः॥ ब्राह्मणान् भोजयेत्पश्चात्कृ
मिरोगाद्विमुच्यते॥ किंच॥ मृते भर्तरि या नारी नीलवस्त्रं प्रधारयेत् सा मृता नरकं
याति कृमिकुक्षिस्ततः परं ततः परं जन्मांतरे ह्यस्य पीमं॥ कृत्वा चांद्रायणं कुर्यात्तिं शुद्धा
स्त्रणभोजनं॥ औषधं च यदुक्तं स्यात्कृमिरोगे चिकित्सिते॥ तद्दानं विधिवद्द
त्वा कृमिभ्योतिमयान्कयात्॥ इति कृमिरोगहेतुप्रतीकारौ॥ अथ पांडुरोगस्य हेतुं
प्रतीकारं चाह॥ देवब्राह्मणरायोद्रव्यहर्त्ता स्यात्पांडुरोगवान्॥ कृच्छ्रातिकृच्छ्रे वा ॥८५१॥

कार्य्यंचोद्यापनंतस्यांतयेपिवा॥ कूष्मांडहोमः कर्त्तव्योब्राह्मणान्भोजयेदपि॥ दक्षिणां
हेमरजतंवासांस्यन्नंप्रदापयेत्॥ उक्तंयत्पुराणोक्तंशौनकस्यमतेषु॥ अन्य
जन्मनिमर्त्यःपांडुरोगीप्रजायते॥ वक्ष्यामितत्प्रतीकारंदानहोमादिकर्मणा॥
पलत्रयेणकुर्वीतरजतेनवसुंधरां॥ तदर्द्धेनापिवाकार्य्यावित्तशाठ्यंनकारयेत्॥ स
पर्वतवनांकृत्स्नांसमुद्रपरिवेष्टितां॥ नवरत्नानिनिक्षिप्यवेष्टयेत्वस्त्रेणवेष्टयेत्॥
कांस्यपात्रेपिनिक्षिप्यपलाष्टकविनिर्मिते॥ देवीमावाहयेत्तत्रभूतधात्रींहरिप्रि
यां॥ एह्येहिवसुधेदेविरूपेस्मिन्समुपागता॥ सहितापर्वतैर्द्वीपैःपर्वतैःसुमनो
भिर्मनोहरैः॥ एवमावाह्यतांदेवींगंधमाल्यैःसमर्चयेत् उपचारैःषोडशभिरा
चार्य्यैःसर्वशास्त्रवित्॥ होमंचापिप्रकुर्वीतसमिदाज्यतिलैरपि॥ भूमिभूमी

॥८५२॥

तिमंत्रेणसंसिद्धो मम प्रकीर्त्तितः ॥ तथा भूमिमहान्मंत्रे मातरमित्यपि ॥ मंत्रः प्रकीर्त्तित
आग्नेयीति साज्याहुतिभिर्जुहेत् ॥ अग्नेरुत्तरतः प्रागग्रकं कुंभं वस्त्रेणावेष्टितं ॥ स्थापयेद्ब्र
णं शुभं मध्यस्थानादिमृत्तिकाः प्रक्षिपेच्च ततः कुंभं वारिणा परिपूरयेत् ॥ पाद्यमा
न्यादिभिर्मंत्रैरभिषेकं च कारयेत् ॥ अभिषिक्तस्य चांगानि वस्त्रेण परिमार्जये
त् ॥ अक्षिण्या मनुवाकेन यथालिंगं शुभार्थकं ॥ शंनोदेव्यनुवाकेन शांतिं चापि प्रक
ल्पयेत् ॥ आचार्याय पंच तां पृथ्वीं दद्याद्रोगी समाहितः ॥ मंत्रेणानेन विधिवत्प्राज्ञ
रवापउद्देस्तुरवेः ॥ धात्री धरित्री भूतानां वाराहेणोद्धृता पुरा ॥ रत्नगर्भा समुद्रेक्व
सना सर्वशोभना दानेनानेन सुप्रीता पांडुरोगक्षयं करोतु ॥ अनेन विधिना दद्यात्पृ
थ्वीदानं प्रयत्नतः ॥ पश्चात्तं वैकृतं प्रश्नमंत्रजाप मंनेनतु ॥ तत्सर्वं नाशमायातु ॥ ८५२ ॥

पांडुरोगादिकं महत् ॥ ध्यात्वा स्वर्णं ब्राह्मणैः सार्द्धं कुर्यात्सुरण्याहयाचनं ॥ इति पांडुरोगह
रं भूषणं ॥ इति पांडुरोगहेतुप्रतीकारौ ॥ अथ कामलारोगस्य हेतुं प्रतीकारं चाह ॥ काम
लो भक्तचौरः स्यात्तस्य वक्ष्यामि निष्कृतिं कुर्याच्च पक्षिराजानं विहंगो वाहनं तं तमं
सुवर्णेनातिशुद्धेन पक्षयोर्मौक्तिकद्वयं ॥ नासिकायां तथा वज्रं प्रत्तरीयं च राजतं ॥
एवं कृत्वा गरुत्मंतं घृतद्रोणोपरि न्यसेत् ॥ श्वेतवस्त्रेण संवेष्ट्य श्वेतमाल्यैः सम
र्चयेत् ॥ सर्वसाध्यार्पितत्वसौ वैष्णवो धर्मतत्परः ॥ ब्राह्मणाय स्वर्चितो भक्त्या यजमा
नेन शक्तितः ॥ उपचारैः षोडशभिर्द्विजमभ्यर्चयेत्तदा ॥ आग्नेय्यां दिशि होमश्चाष्टक
र्तव्यः स्वयं त्रिष्टुभैः ॥ समिदाज्यतिलैः सात्रपलाशसमिधोदिताः ॥ पक्षिराजाय वि
द्महे स्वर्णपक्षाय धीमहि ॥ तन्नो गरुडः प्रचोदयादिति ॥ इति गरुडगायत्री ॥ अ

॥८५३॥

स्यागरुडगायत्र्याः समिदाज्येनकीर्त्तनात॥ तितहोमोव्या हृतिभिकार्य्यः स्विष्टकृतंजपे
त॥ स्थापयेच्चाग्रणंकुंभंस्थितवस्त्रेणवेष्टितं॥ क्षिपेतत्रचरत्नानिमृत्तिकाःपंचरोच
नं॥ पंचत्वक्स्पह्यवानकृत्वापूरयेतीर्थवारिणा॥ तेनाभिषेकंकुर्वीतआपोहिष्ठादिभिः
क्रमात॥ हिरण्यवर्णेतिसूच्यापवमानेनचैवहि॥ ततःस्नात्वाशुचीरोगीविहितोर्व्वाहत
मुत्तमं॥ सदक्षिणंमृशाद्युक्तोप्राङ्मुखायनिवेदयेत॥ मंत्रेणानेनविधिवद्दत्वापूर्व्वीपा
र्जितदुःखः॥ श्रीकृष्णपरमानंदजगतःपरिपालक॥ पूर्वजन्मनियत्सायंभक्ताचौर्य्य
मयाकृतं॥ तेनापात्वंहिवैरूप्यंपन्नापातुतिदुःसहं॥ कामलोपमिदंदेवयावदन
दानतः॥ विनाशयाशुभेकृष्णजगतांपालकोह्यसि॥ एवंगरुडदानेचकृत्वामर्त्यः
सुखीभवेत॥ आचार्यभोजयित्वातुप्रणिपत्यविसर्जयेत॥ इतिकामलाहरण ॥८५३॥

रुद्रदानविधिः ॥ इति कामलाहेतुप्रतीकारौ ॥ अथ रक्तपित्तस्य हेतुं प्रतीकारं चाह ॥
योन्यजन्मनि वैद्यः सन् मोहात्पित्तघ्नमौषधं ॥ योजयेदन्यथा कृत्वा स रक्ताक्षो रोगि
तपित्तवान् ॥ तस्मिन्नभिहितः शांतिरग्निदूतं वृणीमहे ॥ इत्यादिमंत्रमयुतं जपेत् ।
चरुं हुत्वा ततः ॥ दद्यात्पुंसे मधुसर्पिर्भ्यां रक्तपित्तप्रशांतये ॥ सप्तरात्रं प्रदद्याद्द्विविंश
तिद्विजभोजनं ॥ पित्तघ्नौषधदानं च प्रदद्याज्जीवनं जलं ॥ इति रक्तपित्तहेतुप्रती
कारौ ॥ अथ क्षयरोगस्य हेतुं प्रतीकारं चाह ॥ पूर्वजन्मनि यः साक्षाद्ब्रह्महा सः
क्षयी भवेत् ॥ प्रायश्चित्तं तस्य प्रोक्तं पुराणे पद्मनामनि ॥ महारोगोपसृष्टं तु
बहुद्वंद्वतमाचरेत् ॥ रोगाणां तारतम्येन प्रायश्चित्तं विकल्पयेत् ॥ किंच ॥ कारणं
राजरोगस्य पुंसि कोप्यापनो भवीत् ॥ परद्रव्यातिसाध्वीयोपस्तुस्यान्मासलो

॥८५४॥

सुपः ॥ परभोगासहिष्णुश्चापि स नरो यक्ष्मरोगवान् ॥ प्रायश्चित्तं तत्र कुर्याच्छक्त्या तत्त्वपेक्षम
नुक्रमात् ॥ पद्मसध्यं कीटमध्यं कुर्याच्चांद्रायणत्रयं ॥ कृच्छ्राद्यशक्तो धनिनः तस्याशी
त्कृत्तरं शतं ॥ निष्काणां दानमप्युक्तमान्यदद्याद्याप्रकल्पयेत् ॥ हीनकस्ये तत्कुर्वीत पि
तृश्राद्धं विवर्जयेत् ॥ चतुर्विंशति विप्रान्वै भोजयेच्च दिने दिने ॥ मुंचामि त्वेति सू
क्तेन प्रत्यृचं होममाहरेत् ॥ चरुणा घृतयुक्तेन शतेनाष्टोत्तरेण च ॥ अत्र रोगमृत्य
स्त्वं चेद्युतसंख्यो जप्ये होमश्च कर्तव्यः ॥ किंच ॥ असाध्यव्याधिना ग्रस्तो उग्रेण
प्राणहारिणा ॥ पातै रौद्रेण सूक्तेन प्रत्यृचं याप्यतः शुचिः ॥ पूर्वमाज्याहुती हुत्वा
उपस्थाप्य पयस्कं करं ॥ हविःशेषे वर्तेत एकोत्तरशतं ततः ॥ पूर्णमासं जपेन्मंत्रं रो
गी भवेदप्रमुच्यते ॥ होमकर्मण्यशक्तश्चेज्जपेत्सद्विगुणो भवेत् ॥ विष्णोर्नाम

॥८५४॥

सहस्रस्य जपः स्यात्कृतसंख्यया ॥ क्षयेऽक्षय्यां तरं प्राह तथा वै द्रापनो मुनिः कार
येत्कदलीं दिव्यां पत्रैः सर्वत्र संवृतां ॥ पूगीफलैश्च संयुक्तां सुवर्णस्य पलेन तु ॥
पद्मावि भवतत्कुर्याद्दिव्यैर्वा विचित्रसूत्रकैः ॥ ब्राह्मणान्भोजयेच्चापि भक्ष्यैर्नानावि
धैः शुभैः ॥ होमं च कारयेत्तत्र पूर्वद्रव्यगणेन च ॥ हिरण्यगर्भ इत्यादितल्लिंगैः प्राज्ञ
रेवनतु ॥ तस्मै तां कदलीं दद्याद्वस्त्रालंकारपूर्वकं ॥ पूजिता परिद्रापयते स्थापयात्म
वेदिने ॥ धर्मज्ञायातिदांताय मंत्रेणानेन पक्ष्मणि ॥ हिरण्यगर्भपुरुषपरात्पर
जगन्मय ॥ रंभादानेन देवेश क्षयं पयम प्रभो ॥ हवाचनं कार्यं ब्राह्मणैर्वेदपारगैः ॥
त्रिष्वैरिषैर्वंधुभिश्च सह भोजनमाचरेत् ॥ किंच ॥ धर्मशास्त्रानभिज्ञो यः प्राप
ज्जितं ददाति वै ॥ राजयक्ष्मा भवेत्तस्य रोगः पीडाति दारुणः ॥ पूर्वोक्तेन विधाने

॥८५५॥

नमद्यात्प्रतिरूपकं ॥ प्रतिरूपकं व्याधिप्रतिरूपकं ॥ तद्विधानं यथा ॥ स्वर्णरत्नरज
तैर्यथाशक्त्या तु रूपतः ॥ कृत्वा च प्रतिमां व्याधेर्दद्याद्विप्राय यत्नतः ॥ कृत्वा च प्र
तिमां व्याधेर्दद्याद्विप्राय यत्नतः ॥ शतेन वा तदर्द्धेन त्रिंशता तिष्कसंख्यया ॥ ना त
रूपमयं व्याधिप्रतिरूपं तु कारयेत् ॥ निधाय पात्रे संपूर्णे तंदुलैः सितरूपकैः ॥ अ
लंकृत्य च सौवर्णैः रूपं चागरुलेपनैः ॥ वासोयुग्मेन संवेष्ट्य हिरण्यवस्त्रभूषणैः ॥
अर्चितं कृतायचिप्राय दद्यान्मंत्रमुदीरयेत् ॥ येमां रोगाः प्रबाधंते देहस्थाः सततं
ततः ॥ गृह्णीष्व प्रतिरूपेण तान्रोगान्द्विजसत्तम ॥ याठमित्येव तद्रूपं गृह्णीयाद्व्या
धिभिः सह ॥ ततः स रोगी दत्ता च दीर्घायुस्त्वं प्रपद्यते ॥ अत्र पात्रं कांस्यमेयं वि
ज्ञातव्यं ॥ ततः प्रतिगृहीतुर्मुखं श्रीमन्नरगास्यमुखं नावलोकयेत् ॥ षड्कुक्तं ॥ दुःप्रति ॥८५५॥

गृहदाघस्यविप्रस्यकिलभारत॥नपश्येद्दहनंपश्चात्तंचैनेनमभिभावयेदिति॥
श्रीमहाभारथवचनात्॥इतिसर्वव्याधिप्रतिरूपकदानविधिः॥इतिक्षयरोगहे
तुप्रतिकारौ॥उरःक्षतस्यापिक्षयरोगांतःपातित्वात्व्याधिग्रहस्तत्प्रभावेनक्षय
रोगोक्तमेवविधानंकार्य्यं॥इत्युरःक्षतप्रतीकारः॥अथश्वासकासकफरोगस्यहे
तुप्रतीकारंचाह॥कृतघ्नोजायतेमर्त्यःकफवान्श्वासकासवान् उग्रज्वरीचति
त्वंहिपित्तरोगसमन्वितः॥कृतघ्नःउपकारिणःअप्रत्युपकर्त्ताअपकर्त्तावा॥
यवमध्यकीठमध्यचान्द्रायणात्रपंचरेत्॥तच्छांत्तेयेपप्येछंचपंचाद्विजभोजनं
कुर्यादग्निंदूतमितिसूक्तेनजुहुयात्ततःसाज्येनचरुणास्वष्टोत्तरशतंहुत्वाप्र
माणतः॥तद्विष्णोरितिसूक्तेनजपंतावंतमेवच॥कुर्य्याद्धिरण्यंसमधुसस

र्विंदेयमत्रं च ॥ दद्याद्धस्त्यानिवस्त्राणि ब्राह्मणाय कुटुंबिने ॥ ब्रह्मांडस्य पुराणस्य वाक्येना
हरणं व्रतैः ॥ कर्तव्यमिति शेषः ॥ पिष्टमन्नं तिलापूपपायसं मधु तैलवत् ॥ गंधपुष्पा
नि धूपश्च दीपो वासश्च कांचनं ॥ पूर्णकुंभेन तत्संयोज्य राशौ धान्यं चतुःपथे ॥ मंत्रेणाने
न विधिवद्रोगी कासात्प्रमुच्यते ॥ प्रगृह्णीष्व बलिं चेमं त्र्यंबक मम कष्ट महाबल ॥ आतुरस्य
गृहं सीघ्रं प्रपच्छत्वं महाप्रभ ॥ प्रतिमां कासरोगस्य प्रदद्याद्यथाविधि ॥ इति बलिः
अत्रैव कारणं तरं विधानांतरं चाभिधीयते ॥ तत्र लक्ष मधुकृत्स्नाजिनमहादानादिकु
हृत्क्षेत्रादिविशिष्टदेशे शुभग्रहणादिविशिष्टकाले शुभिषिद्धदातृभ्यः प्रतिग्रहस्तन्हा
ति स्वयमपापाश्रीभूतो जन्मांतरे रोगमार्कंडूपयां पीड्यमानः श्वासी कासी कृमिकुक्षि
श्च भवति तदुपशांतये महिषिं पद्योक्तविधानां दद्यात् विनृशाश्च्यं विवर्जयेत ॥ ॥८५ द्वी॥

पुरुषसूक्तं सहस्रनामस्तोत्रं उपनिषच्चंचजपेत् ॥ प्रत्यष्टोत्तरशतं च चरुपता

भ्यां जुहुयात् ॥ पंचाशद्ब्राह्मणान्नभोजयेत् रक्षकायासां सिद्ध्यात् ॥ एतद्दशांशकौ पंचाश

द्ब्राह्मणभोजनेनाममंत्रयमष्टोत्तरशतं त्रयं जपेत् ॥ नाममंत्रयमंत्राच्युतानंतगोविंदेति

किंच ॥ व्यासकासपुतीमन्त्रीयरूणमराणतोभवेत् ॥ ध्वजं पाषाणसैके नकुर्यात्तु रजते

न वा ॥ पत्राईं नापवाप्युरु स्फटिकोपममाहृतं ॥ रत्नैर्मरकतैः सम्यक् वद्धं मंगीगेवस

यितः ॥ कुंभं च स्थापयेत्तत्र तिलानां द्रोणं पंचके ॥ कुंभस्योपरि संस्थाप्य ध्वजपाषाणौ

सुशोभनौ ॥ स्वाहिरण्मं द्वयं तत्र ब्राह्मणाय निवेदयेत् ॥ यद्वेरागवेष्टितं कुंभं गंधपुष्पा

क्षताचितं ॥ प्रत्रुतवस्त्रसमग्राय ब्राह्मणाय कुटुंबिने ॥ ये रूपणस्यतथा यायोः प्रीत्यर्थं

विनिवेदयेत् ॥ नमः पाषाणमंते तु मंत्रं नमो द्विजवरापते ॥ जलाधिपतये तु मंत्रं यापवे

॥ ८५७ ॥

यजनप्रियः ॥ एतयोः प्रीतये दद्यौ ध्वयाश्वौ सुरजतौ ॥ श्वासकासौ हरेतां मे प्रीतौ सर्व
जनाश्रयौ ॥ एवं कृत्वा श्वासकासी नीरोगस्तु क्षणाद्भवेत् ॥ इति श्वासकासहेतुप्र
तीकारौ ॥ अथ हिक्कारोगस्य हेतुं प्रतीकारं चाह ॥ योऽस्मान्वा अजघान हत्वा वा प्राहन्न
लो मुक्तेः स हिक्की रोगी भवति ॥ स श्रीलिंगं चांद्रायणे नित्यसाति कृच्छ्रौ लिंगे चरेत् ॥ ता
मग्निवर्णामित्यादि सूक्तं मन्त्रदानं च दद्यात् ॥ इति हिक्कारोगहेतुप्रतीकारौ ॥ स्व
रभेदरोगस्य तु क्षयरोगवत् हेतुप्रतीकारौ ज्ञेयौ ॥ अथ पदुद्दत्वरोगस्य हेतुं प्रती
कारं चाह ॥ वह्निरोधं गुरोः कृत्वा भवेद्ददवाक् नरः ॥ तस्य वक्ष्ये प्रतीकारं दाने
न ऋषिभाषितं ॥ पलेनाप्यतदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥ वाग्देवीप्रतिमां कृत्वा
भुजानां च चतुष्टयं ॥ वरदं चाक्षसूत्रं च विभूतीं दक्षिणे करे ॥ पुस्तकं च भयं वामे ॥ ८५७ ॥

दधानां हंसवाहनः ॥ अतिशुभ्रेण रौप्येण कूटवर्णेन वा भवेत् ॥ आसने च प्रकुर्वी
त सौवर्णं पद्ममुत्तमं ॥ तस्योपरि च संवेश्य देवीं वागीश्वरीं परां ॥ मुक्तादाम समावृ
तां शुक्लवस्त्रेण संवृतां ॥ वागीश्वरेण मंत्रेण पूजयेत्पीततंडुलैः ॥ श्वेतगंधैः श्वेतपु
ष्पं सत्कृत्य विधिपूर्वकं ॥ ब्राह्मणाः सर्वशास्त्रज्ञाः कुशलाः सर्वसंमताः ॥ मंत्रवाद
प्रवीणाश्च तेन होमं च कारयेत् ॥ पायसं जुहुयादष्टशतेनासिमयेत्तथा ॥ जुहुया
त्समिधश्चापि तथाज्यं च तिलानपि ॥ सरस्वतिमिदं शिवरतिवा मंत्रश्रुच्यते ॥ कृते
धिवासने चाप आचार्यायतिवेदयेत् ॥ मंत्रेणानेन विधिवत्प्राङ्मुखाय हृद्दृशु
खेः ॥ संपूज्य ब्राह्मणं सम्यक् वस्त्रालंकारपूर्वकं ॥ पावके ब्राह्मणे देवीपासा वागी
श्वरी परा ॥ ब्रह्मविष्णुशिवैश्चान्यैः पूजिता सर्ववंदिता ॥ तुष्टा भवतु दानेन समि

८५८॥

रुग्यतिलैरपि॥नैवेद्यंपायसंदद्याद्दिव्यंचग्राह्यलौतथा॥सरस्वतिप्रेदमितिमंत्रःस
र्वत्रसंमतः॥तस्मैहुतवतेदद्यात्तांघंटांपूजितांयतुमंत्रेणानेविधिवद्रोगीपूर्व
मुखःशुचिः॥उदङ्मुखोपविष्टायसतोयामप्यभक्तितः॥गलेरवैस्वपापन्मेस्वा
ध्यायाध्ययनंकृतं॥सरस्वतिजगन्मान्मातर्जगज्जाड्यापहारिणि॥साक्षाद्ब्रह्म
कलत्रात्वंविष्णुरुद्रादिभिस्तुता॥तन्मामध्ययनंदेहिजाड्यंहरवराननेे॥इति
दानमंत्रः॥अनुस्रायपन्नाहनलांत्वंस्वयंभुंजीतमानवः॥इतिगद्दल्यहेतुप्रती
कारै॥अथारोचकहेतुंप्रतीकारंचाह॥धनीश्रद्धाहीनोऽदातास्यान्नरतिस्ताम
लगदणान्वितोयापःसोन्यजन्मन्यरुचिमान्मूतीयाजायते॥अस्यप्रायश्चि
त्तंकृष्णमतिकृच्छ्रंचांद्रायणांव्यस्तंसमस्तंयाव्याधितारतम्येनकुर्यात॥अत्रा॥ ८५८॥

शान्तौ धनी च प्रतिदिनं पंचाशद्ब्राह्मणभोजनं मिष्टान्नेन रोगशांतिं कुर्यात् ॥ अत्रा
प्यशक्तौ सततं वा होमं कारयेत् ॥ तदुक्तं ॥ जपं होमं तथा तीर्थस्नानं वापि समाचरे
त् ॥ तीव्रवैराग्यसंयुक्तः कुर्याद्ब्राह्मणभोजनं ॥ मिष्टान्नं च प्रदद्याद्वै ब्राह्मणानां
निरंतरं रक्ष्मीति मंत्रेण जपेद्युतसंख्यया ॥ वह्नणा च घृतेनात्र गुडूच्या कुष्प्यया
हनेदिति ॥ जपादिकं यावद्रोगमुक्तो भवति तावदेव कर्त्तव्यं ॥ एतत्तु ब्राह्मणविषयं
इतरविषये होमान्नसत्रमेव प्रशस्तं ॥ इत्यरोचकहेतुप्रतीकारौ ॥ अथ छर्दिरोग
स्य हेतुं प्रतीकारं चाह ॥ यो ब्राह्मणाय केशकीटकास्थ्यारसेवाद्युपहतमन्नं ज्ञात
मेव मोहात्प्रयच्छति स छर्दिमान् जायते ॥ यदुक्तं शातातपीये ॥ च कीटकेशकाका
दिदूषितं मोहतो नरः ॥ दत्वा द्विजाय भवति छर्दिमान्नन्यजन्मनीति वचनात्

॥८५८॥

विष्व्यासघातकी छर्द्दिरुक्तो भवति तिगौतमोप्याह॥ तदुपशांतये पंचाशद्ब्राह्मणभो
जनं कारयेत्॥ आज्यभुक्तं चान्नदानं यथाशक्त्या कुर्यात्॥ अग्निरस्मि जन्मनेति मंत्रे
णव्याधिग्रस्तस्तु भावेन जपं कुर्यात्॥ तिलहोमं च कुर्यात् तेनोपशांतिर्भवति॥ इति
छर्द्दिरोगहेतुप्रतीकारौ॥ अथ तस्मान्मूर्छारोगयोः हेतुप्रतीकारं चाह॥ पापमध्य
पस्थानं तत्रोह्मरणं गामथापिवा॥ न पाययेज्जलं यस्कोसतस्मान्मूर्छितो भवेत्॥
वारुणं संजपेत्सूक्तं होमं कुर्याद्घृतं द्विजः॥ विदध्याज्जलपानं च तस्मान्मूर्छोपशां
तये॥ पानीयं पायसं मुद्गशर्कराघृतसंयुतं दद्याद्वस्त्रकं देयं मूर्छितस्योपशां
तये॥ एवं कृते तु तद्दोषशांतिर्भवति नान्यथा॥ इति तस्मान्मूर्छाहेतुप्रतीकारौ॥
अथोन्मादस्य हेतुं प्रतीकारं चाह॥ मदगर्वाभ्यां परस्य स्त्रीयान्नीयषिद्धयस्तु ॥८५८॥

योगेषुःपरान्मोहयितावृद्धगुरूणामुपहासकृच्छास्त्रज्ञानेसतिनजानामीतिवं
चकश्चपरोपदेशासनीवाजायतेसउन्मद्यान्भवेत् ॥ तदुपशमार्थंचांद्रा
यणंकुर्यात् ॥ सदसस्पतिमद्भुतमितिमंत्रेणचरुघृताभ्यांहोमंचकुर्यात् ॥ कया
नश्चित्रइतिसूक्तंचजपेत् ॥ हिरण्यंमधुद्रव्याणिचदद्यात् ॥ सारस्वतमंत्रांश्च
जपेत् ॥ एवमेवपानात्ययस्यापि ॥ इत्युन्मादपानात्ययहेतुप्रतीकारौ ॥ अथस
र्वांगदाहरोगस्यहेतुंप्रतीकारंचाह ॥ यःपुनरग्नौष्ठीवतितंकपिलोर्नामग्रहो
गृह्णातितत्क्षणाज्ज्वरस्पृष्टःसर्वांगदाहीभवतिपीतनयनश्चस्यात् ॥ तदुप
शांतयेबलिंनिशिचतुष्पथेपिष्टराजपिण्याकरुधिरतिलध्वजगंधपुष्पै
र्वक्ष्यमाणमंत्रेणदद्यात् ॥ गृह्णीष्वबलिंचेमांकपिलाख्यमहाग्रह

आतुरस्य सुखं प्रयच्छ त्वं महाबल इति मंत्रः ॥ इति दाहहेतुप्रतीकारौ ॥ अथापस्मार
रोगस्य हेतुं प्रतीकारं चाह ॥ यः स्वामिनो गुरोश्च हंता प्रतिकूलो यासः अपस्मारी जा
यते ॥ अस्य प्रायश्चित्तं चांद्रायणं कुर्यात ॥ सदस्यतिमद्भुतमित्यनेन मंत्रेण चरुघृ
ताभ्यां जुहुयात ॥ देवब्राह्मणान् संपूज्य नमस्कुर्यात ॥ हिरण्यं च दद्यात ॥ कयानश्चि
त्र आभवदिति च सूक्तं जपेत ॥ बौधायनश्चाह ॥ ब्राह्मणस्यासरोधेन ह्यपस्मारी भ
वेन्नरः ॥ वक्ष्ये तस्य प्रतीकारं दानहोमक्रियादिभिः ॥ पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा
पुनः ॥ विनायकप्रतिं कुर्यात्स्वर्णेन श्लोमनां ॥ राजतं च तथा नागमुपवीतं प्रकल्पये
त ॥ पुष्करं पद्मरागेन हस्ते रत्नं प्रकल्पयेत ॥ विनायकार्द्धमानेन चाखुरूपं देवस्य क
ल्पयेत ॥ तस्याप्यंगेषु देयानि रत्नानि विविधानि च ॥ मालिक्येन प्रकुर्वीत च षु

षीतस्यशोभने॥ पूर्वेचूर्मंडपेकुर्यात्स्तंभैःषोडशभिर्दृढं॥ यद्वाद्वादशभिःकुर्याद्दशभि
श्चप्रयत्नतः॥ मंडपस्यचतुर्भागांवेदिकांपरिकल्पयेत्॥ रात्रौविनायकस्यापिह्यधि
वासनमिष्यते॥ चतुर्भिर्ब्राह्मणैःसार्द्धमाचार्य्यःसर्वशास्त्रवित्॥ कुलीनोनयवृद्धश्
चसर्वप्राणिहितेरतः॥ रात्रौजागरणंकृत्वामध्यरात्रेवलिंहरेत्॥ मत्स्यमांसेनतं
दद्यात्तथाक्षीरोदकेनच॥ आचार्य्यःप्रयतोभूत्वामंत्रेणानेनसंयतः॥ पूर्वस्यांदिशि
तंदद्याद्बलिंवैसर्वकामिकं॥ आदित्यावसवोरुद्रादेवाभूतानिवासराः सर्पाःपिशा
चाःशाकिन्योपांपदेवताः॥ अपस्माराधिदैवंचवेतालानैर्ऋतस्तथा॥ बलिदानेन
दत्तेनशांतिंकुर्वंतुसर्वशः॥ इतिबलिदानमंत्रः॥ ततःप्रभातेविमलेस्नात्वाचाहत
वाससः॥ भूषिताःकर्णकैःसम्यगुपवीतांगुलीयकैः॥ कुंडानिदिक्षुचत्वारिमेखले

तासंखैवकृतानिच॥ कुंडेष्वथपक्वेनहोममंत्रैःस्वकैस्तदा॥ पूर्वस्मिनबह्वृचःकुर्यात्स
मिदाज्यचरून्क्रमात्॥ विनायकंसमुद्दिश्यगणानांत्वेतिमंत्रतः॥ तत्पुरुषायविद्महेव
क्रतुंडायधीमहि॥ तन्नोदंतीप्रचोदयात्॥ अध्वर्युर्दक्षिणेकुंडेकुर्याद्धोमंसमाहि
तः॥ छंदोगःपश्चिमेचापितद्देवत्येनहोमयेत्॥ अथर्वणश्चोत्तरेचकुंडेहोमंप्रक
ल्पयेत्॥ विनायकायदेवायसर्वभूतहितायच॥ नामाधिपत्येप्रभक्तायहुंफट्स्व
स्तिस्वधानमःस्वाहा॥ समिदाज्यचरून्हुत्वापूर्णाहुत्यंतमेवहि॥ आचार्यःप्र
तिमांतांचआह्वानैःसहसंयतः॥ आसनेवेदिकामध्येवितानादिसुशोभिते
तिसानामुपरिस्थाप्यगंधपुष्पैःप्रपूजयेत्॥ वस्त्रैर्नानाविधैःशुभ्रैःकर्पूरक
टकादिभिः॥ उपचारैःषोडशभिःनैवेद्यैश्चमोदकैः॥ यथादेवेतथाचार्ये

ष्पालंकारादिकल्पयेत् ॥ आचार्य्यः परया भक्त्या गणेशाय प्रकल्पयेत् ॥ आपूपा
दि तथान्यच्च कारयेद्दुग्धकादिकं ॥ निवेद्य पार्वतीं चापि देवदेवं महेश्वरं ॥ पूजयेत्प
रया भक्त्या आचार्य्यः स्वयमेव हि ॥ तथैव रोगवान् भक्त्या संपूज्य गणनायकं ॥ ग
णानां त्वेति मंत्रेण तूष्णीं शूद्रः सुपूजयेत् ॥ ततो मध्यंदिने प्राप्ते प्रतिमां दक्षिणा
युतां ॥ मंत्रेणानेन दत्वा च स रोगी प्राङ्मुखः स्वयं ॥ उदङ्मुखाय विप्राय ब्राह्मणाया
तिभक्तितः ॥ विनायक प्रपन्नार्त्तिहर विघ्नविनायक ॥ त्वं देवैः प्रार्थितः पूर्वं विघ्न
विघ्नपरायणैः ॥ ब्राह्मणश्वासरोधेन यज्जातं मम वैकृतं ॥ पूर्वकर्मविपाकेन स्व
पस्मारोन्मादादिकं ॥ जाड्यं वाप्यथवा धिर्य्यं नासिकारोधमाथवा ॥ त्वद्दीपाः प्र
दानेन रोगमांसु विनाशय ॥ इति दानमंत्रः ॥ चतुर्वर्णां ब्राह्मणानां च यथाशक्त्या

॥ ८ दि ॥

च दक्षिणा ॥ एवं कृत्वा गणपतेर्दानमन्यैः सुखी भवेत् ॥ इत्यपस्मारहेतु प्रतीकारो
अथ वातव्याधिहेतुं प्रतीकारं चाह ॥ सौरेः प्रीत्यर्थं वातरोगी शन्नोदेवीति मंत्रेण
जपं कुर्वीत ॥ जपोऽत्रायुतत्रयपरिमितः तद्दशांशो होमश्च कर्तव्यः ॥ अन्यच्च ॥ देवब्रा
ह्मणस्वापहरणात् स्वामिद्रोहाच्च वातरोगी भवति तदुपशांत्यर्थं कृच्छ्रचांद्रायणं
कुर्यात् ॥ अग्निरस्मीत्यृचं जपेत् ॥ अनेन मंत्रेणैव दशांशतो जुहुयात् ॥ हिरण्यदक्षि
णां दद्यात् वातार्त्तः सुखी भवति ॥ किंच ॥ विष्णुवस्तस्य विषप्रदः अभक्ष्यभक्षी
या वातार्त्तः स्यात् तदुपशांतये वासो हिरण्यं दद्यात् ॥ अन्यच्च ॥ यः पुनरक्षतयो
निमगच्छंतीं परस्त्रियं बलादाक्रम्योपभुंक्ते स सर्वसंधिपीडावान् धनुर्वात
रोगी विषमज्वरवान् अरुचिमांश्च भवति ॥ तदुपशांतये प्रतिरूपदानं महि ॥ ८ दि ॥

षीदानं कृच्छ्रातिकृच्छ्रचांद्रायणे च कुर्यात् उपपातके त्वयं जपेत् ॥ सहस्रनामस्तोत्रं
च वारत्रयं जपेत् ॥ नामत्रयं अच्युतानंतगोविंदेति अयुतत्रयसंख्याकं जपेत् ॥
नामत्रयस्य छंद विद्दैवता यथा ॥ उष्णिगायत्र्यौ प्रकृति स्तु तस्य छंदांसि ॥ वसिष्ठक
श्यपपराशरा ऋषयः ॥ महाविष्णुर्महानृसिंहो महावराहश्च देवताः ॥ नामत्रयस्य
सर्वरोगशांत्यर्थं जपः कर्त्तव्यः ॥ अच्युतानंतगोविंदेत्येतन्नामत्रयं जपेद्द्विजः ॥
अयुतत्रयसंख्याकं जपं कुर्याद्विशांतये इति शंकरगीतासु सर्वव्याधिशमना
र्थमुक्तं ॥ पुरुषसूक्तजपं च वारत्रयं कुर्यात् ॥ ततः पापक्षयाद्रोगशांतिर्भवत्येव ॥
इति धनुर्गीतादि रोगे प्रोक्तं ॥ अन्यच्च ॥ वातव्याधियुतस्तेयी स्याहवै ह्यापनोमु
निः ॥ हरिश्शंकारये न्नामूघनंतुदशाभिः पलैः ॥ तदर्द्धं न तदर्द्धं न श्चं गेहस्यमयेद

॥८६३॥ च

ढे। तंदुलीपरि संस्थाप्य कांस्यपात्रचतुष्टयं॥ वायुदैवतमंत्रैश्च होमं तत्र प्रकल्पयेत्॥ समि
दाज्यैर्हुतं कृत्वा शतमष्टोत्तरं द्विजः। अष्टाविंशतिमीर्वीपि दानमंत्रेण कारयेत्॥ दान
मंत्रोयथा॥ वायो च रक्षिभूतानां मे त त्वं लोकपावन॥ वाहनस्य प्रदानेन वातव्याधिं
विनाशय॥ इति दानमंत्रः॥ अनेन कृतमात्रेण यथोक्तेन विधानतः। वातव्याधि
विनिर्मुक्तो नीरोगः सुखमश्नुते॥ इति वातव्याधिहेतुप्रतीकारः॥ अथ वातरक्त
रोगस्य हेतुं प्रतीकारं चाह॥ सवर्णागमनेवात रक्तवान्भवति॥ अस्य प्रायश्चि
त्तं चांद्रायणद्वयं कुर्यात्॥ लक्ष्मीनारायणप्रतिरूपं च दद्यात्॥ तद्यथा॥ लक्ष्मीना
रायणं रूपं सर्वदा सुवर्णेन प्रकल्पयेत्॥ पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुन
लक्ष्मीनारायणं देवं सर्वदा सर्वकामदं॥ पद्मासनगतं कुर्याद्ध्वदेवं च तु॥ ८६३॥

भुजं ॥ दक्षिणाधःकरे पद्मं शंखमूर्ध्वकरेन्यसेत् ॥ वामोर्ध्वे च भवेच्चक्रं लक्ष्मीप
क्षेकरं परं ॥ वामोत्संगगता देवी रत्नपात्रकरा भवेत् ॥ दक्षिणाग्रभुजो देव्याः
पृष्ठे देवस्य चक्रिणः ॥ गरुडं राजतं कुर्याद्दिव्यदेवस्य वाहनं ॥ पक्षौ च तस्य सौव
र्णौ स्युः वर्णेनैव नासिका ॥ वस्त्रैरत्यंतरुचिरैः परिधाप्य सकौतुकं ॥ मुक्तादा
मपरिक्षिप्तं चंदनागरुलेपनं ॥ अर्चयेत्कुसुमैर्धूपैः लक्ष्मीनारायणात्मकं
प्रसन्नं रमणीयं च गरुडोपरि संस्थितं ॥ ततो विप्रं समाहूय सुशीलं लक्षणान्वि
तं ॥ आचारवंतं धर्मज्ञं वेदवेदांगपारगं ॥ प्रतिग्रहनिवृत्तं च श्रुतिस्मृतिप
थे स्थितं ॥ स्वयं भक्त्या समानीय पूजयेद्धस्त्रकुंडलैः ॥ कुंकुमागरुकर्पूरैरुचि
रैरंगुलीयकैः ॥ पूर्वोक्तेन विधानेन होमं तत्र प्रकारयेत् ॥ मंत्रेणानेन तं द

८६४ ॥

यात्सर्वलोकनमस्कृतं ॥ लक्ष्मीपते देवकीनंदने शार्ङ्गी राघवि शरणायिनूवचसामगम्य
गोविंद दामोदर वात रक्तं विनाशयाशु क्षयतारिवर्गी ॥ लक्ष्मीनारायणस्यैवं मूर्त्ति
दद्यात्सुभक्तितः ॥ अरोग्यवान्सुखी नित्यं जायते नात्र संशयः ॥ अन्यच्च ॥ स्नात्वा
पीत्वा जलं समभ्यच्छं ड्रालानां जलाशये ॥ हस्तपाददाहशोषयवानन्यजन्मनि ॥ कृष्टसां
तपनं कुर्यात्स्वर्णगांवसनानि च ॥ दद्यात्कुर्याच्च सौत्यर्थं यत्पुनः कुष्टरोगवत् ॥ इति
वातरक्तहेतुप्रतीकारौ ॥ अथारुस्तंभामवातयोर्हेतुं प्रतीकारं चाह ॥ यो हुताग्निं निर्वा
पयति स आमवातवान्भवति ॥ हुताग्निनिर्वापक आमवानितिस्मरणात् ॥ तद्दो
षशांतये अयुतसंख्याको गायत्र्या जपः कर्त्तव्यः ॥ तिलैराज्येन च होमः कार्यः सु
वर्णालंदानं च कार्यं ॥ एवमेवोरुस्तंभस्यापि ॥ इत्यूरुस्तंभामवातहेतुप्रतीकारौ ॥ ८६४ ॥

अथ पृथुलरोगस्य हेतुं प्रतीकारं चाह ॥ याचितारमकिंचनं ब्राह्मणं श्रुताध्ययनसंपन्नं
मतिशांतमाहूय यो न प्रयच्छति स जठरस्थूलवान् भवति ॥ कदाचित्तं दाध्मानी भवति ॥
स कृच्छ्रातिकृच्छ्रं चांद्रायणानि कुर्यात् वस्त्राणि दद्यात् सघृतं हिरण्यं दद्यात् ॥ अन्यच्च
नष्टसंध्योपासनादिरन्यजन्मनि हस्तस्थूली भवति ॥ स्वर्णछागं दशाकं दद्यात् ॥ यथा।
विभवं ब्राह्मणभोजनं च कुर्यात् ॥ किंच ॥ यो मातापितृभ्यां प्रव्रतं मैथुनं स्मरण्यात् ॥
स कर्णस्थूली भवति ॥ पश्चाद्बधिरो भवति किंचिद्देवयावा शृणोति ॥ तद्धिस्मोरित्यघो-
त्रराणुतं जपेत् ॥ पुरुषसूक्तं वा जपेत् ॥ अपामार्जनस्तोत्राभिमंत्रितं जलं पिबेत् ॥ किं-
च ॥ स्थूलेन स्थूली भवति मनुष्याणां च हिंसकः ॥ एतेनाप्युत द्वैतं न तद्वैतं नाप्यथा
पि च ॥ सौवर्णी राजतं वापि स्थूलं कुर्यात्प्रयत्नतः ॥ ताम्रेणाथ सावापि स्वादिरे

॥ ८६५ ॥

णा पि शक्तितः ॥ रक्तवस्त्रेण संवेष्ट्य तिलानामुपरिन्यसेत् ॥ तिलानां तु परीमाणं द्रो
णं वापि तदर्द्धकं ॥ तदर्द्धं वा यथाशक्त्या पूजयेद्ब्राह्मणांश्शुचिः ॥ अर्चीन् मूलमंत्रेण
षोडशैवोपचारकान् ॥ कुर्याद्ब्राह्मणः पूजां कृत्वा होमं प्रकल्पयेत् ॥ शूलस्य दक्षिणे
पार्श्वे स्थंडिलेग्निः प्रणीयते ॥ समिदाज्यतिलैर्हुत्वा पुरुषायेति वै समित् ॥ अंबके
णाज्यहोमं च विद्वांस्तत्र प्रकल्पयेत् ॥ पातेरुद्रेति मंत्रेण तिलान्हुत्वा प्रयत्नतः ॥
शूलिन स्नातः शांतिं ब्राह्मणः परिकल्पयेत् ॥ तेनोदकेन वा सिंचेत् शूलिनं रोगि
नं परं ॥ ततो हुतवते शूलं संपूज्यैव स्वशक्तितः ॥ दद्यात्स सक्तिं ते दक्षिणां ते तु ब्राह्म
णाय उदङ्मुखः ॥ मंत्रेणानेन परया भक्त्या सर्वे हरं स्मरन् ॥ त्वं शूल ब्रह्मणास्त्र
ष्टं त्रिपुराणां विनाशकं ॥ दैत्यानां दानवानां च शंकरस्यायुधं तथा ॥ कुक्षिस्थम ८६५

यपार्श्वस्थंमथ्यपापस्वदेहजं ॥ शूलंविनाशायत्वंमेमहादेवेनधारितं ॥ दानमंत्रः ॥ ततः
स्नात्वाचभुंजीतब्राह्मणैर्बंधुभिःसह ॥ शूलहिंसासमुत्पन्नवेदनाचाशुनश्यति ॥ इ
तिशूलदानविधिः ॥ अन्नहर्तापरिणामाः शूलवान्भवति ॥ सचांद्रायणंकुर्यादन्नं
चदद्यात् ॥ इतिशूलरोगहेतुप्रतीकारौ ॥ अथोदावर्त्तरोगस्यहेतुप्रतीकारंचाह
देवद्विजक्षेत्रतडागवल्मीककूपादीनांयोभेदंकरोतितंपापसोनामगृह्णाति ॥ तेनाधमा
नोउदावर्त्तयानज्वरीअरुचिमान्पाददाहीचजायते ॥ अस्यप्रायश्चित्तंकृच्छ्रमाच
रेत् ॥ व्याहृतिभिराज्येनजुहुयात् ॥ हिरण्यंचदद्यात् ॥ श्वेतवस्त्रपीतायनेकवर्णवस्त्र
ध्वजादिभिःदीपोदिभिःसहप्रदोषेचतुष्पथेबलिंदद्यात् ॥ तत्रायंमंत्रः ॥ प्रगृह्णी
ष्वबलिंचेमंपापरोगमहाग्रह ॥ आतुरस्यसर्वांसिद्धिंप्रयच्छत्वंमहाबलेति

॥ ८ हृदि ॥

रत्याध्मानोदावर्त्तरोगहेतुप्रतीकारौ ॥ अथगुल्मरोगस्यहेतुंप्रतीकारंचाह ॥ गुरोः
प्रत्यर्थिवाक्येनवातगुल्मवान् ॥ भवतितदुपशांतयेमासमेकंपयोव्रतमाचरेत्
मुंचामीत्यनेनप्रत्यूचंचलघुताभ्यामयुतंजुहुयात् ॥ यातआयातमेवजमितिजपे
त् ॥ अन्नदानंचकुर्यात् ॥ किंच ॥ अंत्यजागमनेगुल्मीस्यात् ॥ तदुपशांतयेविनायक
दानंकुर्यात् ॥ तथाचयोद्धायनः ॥ सौवर्णीराजतंताम्रंकारयेत्कांस्यतोपिवा ॥ तथा
र्कमूलकाष्ठेनविघ्नेशंकल्पयेन्नरः ॥ पुष्करंकल्पयेद्धेमंसौवर्णीलोचनत्रयं ॥ आ
खुंप्रकल्पयेत्तस्यपश्चाद्देवविनिर्मितं ॥ नागयज्ञोपवीतंचकल्पयेत्तस्यगुल्मवा
न् ॥ अनंतरंचवासोभिर्गंधनागरपूजितं ॥ सहिरण्यंब्राह्मणायस्वशक्त्यापू
जितायच ॥ कृतहोमायशांतायसर्वसिद्धार्थयेदिने ॥ मंत्रेणानेनविधिवद्दक्षि

॥ ८ हृदि ॥

रणाभिमुखाय च ॥ विनायक गणेशत्वं सर्वदेवनमस्कृत ॥ पार्वतीनंदनश्रेष्ठ मम ग
लं विनाशय ॥ इति मंत्र कृते नानेन दानेन नीरोगो जायते नरः ॥ इति गल्मेहेतुप्रती
कारः ॥ अथ हृद्रोगस्य हेतुं प्रतीकारं चाह ॥ परहृदयपीडाकारी हृद्रोगी जायते ॥
अस्य प्रायश्चित्तार्थमेकं प्राजापत्यं कुर्यात ॥ तदशक्तौ गां सुवर्णं च दद्यात ॥ उद्य
न्नद्येति सूक्तं जपेत ॥ तिलाज्येन जुहुयात सहस्रनामस्तोत्रं पठेत ॥ नामत्रयं चाज
पेत कूष्मांडहोमं चा कुर्यात ॥ इति हृद्रोगहेतुप्रतीकारः ॥ अथ मूत्रकृच्छ्ररोगस्य हे
तुं प्रतीकारं चाह ॥ गुरुतल्गा सोऽदूसततं मत्सरी दिवास्त्रीगामी मूत्रकृच्छ्रवान् भ
वति ॥ अस्योपशांत्यर्थं गुरुतल्पादि प्रायश्चित्तं कुर्यात ॥ सरापकृत्र मूत्रकृच्छ्रवा
न् भवति ॥ अत्राह बौधायनः ॥ सौवर्णं कारयेत्पद्मं पलेनार्द्धपलेन वा ॥ यथाव

॥ ८६ ॥

त्मतिमानकुर्यात्पयसमष्टदलंशुभं ॥ पित्तप्रारब्धंनकुर्वीतभवेन्निष्फलमन्यथा ॥ द्रोणे
तिलस्याढकेवाताम्रपात्रंजलान्वितं ॥ तस्यमध्येशुभंपद्मंनिदध्यात्कुसुमान्वितं ॥
ब्राह्मणंश्रुतसंपन्नंदरिद्रंचाग्निहोत्रिणं ॥ आहूयगंधमाल्याद्यैर्विधिनापूज्यभ
क्तितः ॥ ततःस्वर्णमयंपद्मंदद्यान्मंत्रेणसंयुतं ॥ भगःपूषापतंगोसौद्वादशात्मा
त्रयीमयः ॥ पद्मेनानेनदत्तेनप्रीतोभवतुभास्करः ॥ इतिदानमंत्रः ॥ कृतेनानेनदा
नेनमूत्रकृच्छ्रादिमुच्यते ॥ मूत्रकृच्छ्रातुरस्तस्मादेतत्कुर्यात्प्रयत्नतः ॥ इतिमूत्रकृ
च्छ्रहरंतिपात्रदानविधिः ॥ इतिमूत्रकृच्छ्रहेतुप्रतीकारौ ॥ एवमेवमूत्राघातेपिक
र्त्तव्यः ॥ व्याधिप्रतिरूपदानंचकर्त्तव्यं ॥ अथाश्मरीरोगस्यहेतुप्रतीकारंचाह ॥
परस्त्रीगामीअश्मरीवान्भवतिअपस्मारीच ॥ सकृच्छ्रत्रयंकुर्यात् ॥ यद्यपि ॥ ८६ ॥

कण्ठोक्ताश्मरीहरं दानं नाभिहितं तथापि स्वर्णदानं कर्त्तव्यं ॥ तस्य सर्वरोगहरत्वा
त् ॥ तथा चोक्तं ब्रह्मांडपुराणे ॥ सर्वरोगोपशमनं सौवर्णं दानमुच्यते इति ॥ इत्यश्म
रीहेतुप्रतीकारौ ॥ अथ प्रमेहरोगस्य हेतुं प्रतीकारं चाह ॥ स्वामिभार्याभिगामी मे
हरोगवान्भवति ॥ कन्यागामी दिवामैथुनी पातप्रमेही भवति ॥ स चेंद्रायण
त्रयं कुर्यात् प्रतिरूपदानं च ॥ मातृगामी स्वसृगामी मधुमेही सततं नरो भव
ति ॥ मातृभार्याभिगामी जलमेही भगिनीगामी रक्तमेही च भवेति ॥ अत्र पूर्वो
क्तास्वप्रगुणितं प्रायश्चित्तं प्रकल्पयेत् ॥ यत्राशक्तेः सत्रकृच्छ्रत्रयं प्रतिदिनं चत्वा
रिंशद्ब्राह्मणभोजनं च कुर्यात् ॥ पुरुषसूक्तं सहस्रनामस्तोत्रं गायत्रीजपं च
यावदारोग्यदर्शनं तावत्कुर्यात् ॥ यातेरुद्रेति सूक्तेनाज्यहोमं जपं चाष्टोत्तरस

॥ ८६ ॥

हस्तं च कारयेत् ॥ किंच ॥ चांडालीगामी सर्वप्रमेहव्याधिमान् भवति स ततं दुःखिपा
सात्तुरक्षा ॥ स पिपीलिकामध्यचांद्रायणानि कुर्यात् ॥ इदमापः प्रवहत उदुत्तमं वरु
णेत्यादिभिर्मंत्रैर्जपेज्जुहुयाच्च ॥ अत्र जपो होमश्चाष्टोत्तरसंख्याकः ॥ वड
वागर्द्दभ्यादितिर्यग्गामी प्रमेही मूत्रली च भवति ॥ स सांतपनानि कुर्यात् ॥ अत्र व्या
धिगुरुत्वलघुभावेन प्रायश्चित्तगुरुलघुभावो द्रष्टव्यः ॥ अथ सर्वप्रमेहहरं स्वर्ण
धेनुदानमाह वृद्धगौतमः ॥ धेनुं स्वर्णमयीं कुर्यात् पूर्वोक्तविधिमाततः ॥ स्वर्ण
शृंगीं च रत्नाढ्यां तथा रौप्यखुरामपि ॥ तथैव तर्णकं कुर्याद्दशभागेन पूर्ववत् ॥
ब्राह्मणं संस्कृतसंपन्नं वैदस्मर्वं च कुटुंबिनं ॥ आचार्यं तं धर्मसंद्विजशुश्रूषवरैर्गो
रतं ॥ गृहमाहूय विधिवत्पूर्ववत्पूजयेत्ततः ॥ यथाविभवतो भक्त्या होमः पूर्ववदे ॥ ८६ ॥

यहि ॥ मंत्रैस्तु वैस्नवैः सम्यक्पालाशाः समिधः स्मृताः ॥ होमांते तां प्रदद्याच्च मंत्रेणा
नेन मे हरयान् ॥ चक्रं सुदर्शनं यस्य राजते ध्वंतयैव च ॥ प्रमेहं हर मे हर मे स्थि प्रं विह्लो
गरुडवाहन ॥ इति मंत्रः ॥ दानं प्रमेहरोगघ्नमेतत्कार्य्यं मनीषिभिः ॥ कृते नानेन शा
म्यंति प्रमेहा दारुणा अपि ॥ इति प्रमेहरस्य लोधेनु दानं ॥ इति प्रमेहहेतु प्रतीकारौ
अथ मेदो रोगस्य हेतुं प्रतीकारं चाह ॥ दधिचौर्येण पुरुषो जायते मेदसा युतः ॥
दधिधेनुः प्रदातव्या तेन विप्राय पुंडुवे ॥ एवं कृष्णं च कुर्यात ॥ इति मेदो रोग हे
तु प्रतीकारौ ॥ अथोदररोगस्य हेतुं प्रतीकारं चाह ॥ योग्नलविघ्नं महेश्वरशरणं मु
त्तमभावेन मेदं साधयति स उदरव्याधिमान भवति ॥ तच्छांतये कृष्णचांद्रायणा
नि कुर्यात ॥ महेश्वरस्य सहस्रकलशाभिषेकं कुर्यात ॥ उपलघेन्वा च सप्तत्र

पंजपेत् ॥ यातेरुद्रेति सूक्तेन चरुं घृतम्पायसं चोत्तरं सहस्रं जुहुयात् ॥ मधुघृतप्लुतं हि
रण्यं दद्यात् ॥ धर्मनिष्क्रयार्थं स्वामिनानियुक्तस्य ततोऽसीकमाचरतः प्राड्विवाके
स्य मंत्रिणो वा जलोदरित्वं ॥ तस्य प्रायश्चित्तं मासत्रयं पयोव्रतं शतब्राह्मणभोज
नं च कारयेत् ॥ महादेवस्य सहस्रकलशाभिषेकं च कुर्यात् ॥ किंच ॥ गुर्वंगनागामी
जलोदरी भवति ॥ तच्छमाय मकरदानं कुर्यात् ॥ तथा च बौद्धायनः ॥ कारयेन्मकरं
सम्यक् राजतं ताम्रमेव वा ॥ पलत्रयेण द्वाभ्यां च तदर्धेनैकेन तथाप्शुभं ॥ पुच्छे रत्नानि
देयानि कोटिरौप्येण कारयेत् ॥ नेत्रे स्वर्णमये कार्ये जिव्हां रौप्यात्प्रकल्पयेत् ॥
पादयोः प्रक्षिपेत्तत्र घृतपात्रेषु तद्द्वयोः ॥ कुंकुमवस्त्रेण संवेष्ट्य चंदनागरुचे
र्चितं ॥ ताम्रे च जलपात्रस्ये स्थापयेन्मकरं शुभं ॥ ब्राह्मणां चित्तसंपन्नवृद्धं दद्यात्

तमालोलुपं ॥ वस्त्रैः कटककेयूरैः पूजयेदंगुलीयकैः ॥ होमो वरुणदैवत्यमंत्राध्यायो
क्तमार्गतः ॥ ततश्चौदरिको विप्रं मकरं विनिवेदयेत ॥ जलाधिदैवदेवेश पश्चिमाशा
पते विभो ॥ उदरव्याधिनाशं मे कुरु दानेन तोषितः ॥ इति जलोदरहरमकरदानवि
धिः ॥ इति जलोदरहेतुप्रतीकारौ ॥ अथ पश्चपशुरोगस्य हेतुं प्रतीकारं चाह ॥ यो मा
र्गे शुसिने पर्वतागेकपित्थछायायामधिरुह्य विषं मुंचति तत्र शीवति श्रोचाप
मतिवा सप्पश्चपशुभिः पीड्यमानो निशं मूर्छितो भवति ॥ स इदं यो विश्वतः स्प
रित्वादिनाष्टोत्तरशतावृत्तं जपं कुर्यात ॥ आपो हिष्ठा मयोभुव इत्यनेन च
चरुघृताभ्यामष्टोत्तरावृत्तं होमं कुर्यात ॥ अत्र व्याधिं गुरुलघुभावेन प्राप
ष्जितगुरुलघुभावौ द्रष्टव्यौ ॥ किंच ॥ किंघकेत्ती चभोतरांश्चोपी भवतिमा

॥ ८७० ॥

न च ॥ तस्य कर्मविपाकोत्थव्याधिनाशनमुत्तमं ॥ दानं वक्ष्याम्यशेषेण सर्वरोगोपवि
नाशनं ॥ क्षौमवस्त्रं समानीय चतुर्हस्तं च यद्भवेत् ॥ मुक्ताफलानि वध्नीयाद्वस्त्र
प्रांते समंततः ॥ कुंकुमेनार्चितं सम्यक् ॥ कर्पूरागरुधूपितं ॥ तंदुलोपरि संस्थाप्य तं
दुलाष्टकस्य सक्तितः ॥ उपचारैः षोडशभिराचार्यं पूजयेत्ततः ॥ ध्रुवा सुवासा मं
त्राभ्यां पूजनं च ततो विदुः ॥ एवं वस्त्रीणामित्येकः ध्रुवासुवासा इत्यपरो मंत्रः ॥
होमे चापि प्रकुर्वीत समिदाज्यतिलैरपि ॥ उद्बुध्यस्वेदं विष्णुरायस्मिंस फर
त्यपि ॥ मंत्राभ्यां तु क्रमाज्जुहुयात्स्विष्टकृच्चैव दस्य च ॥ वदस्य कर्मणोत्येव मिति
मंत्रेण होमं ततः ॥ हुत्वाथ संस्रवान्पूर्वं पात्रे संमर्दं निवेशयेत् ॥ संस्रव्याचार्योत्त
रशतमष्टाविंशतिरेव वा ॥ संपाते न च संमार्ज्य सर्वांगं रोगिणस्ततः ॥

॥ ८७० ॥

अक्षिभ्यामिति सूक्तेन यथालिंगं तथैव च ॥ वाससा मार्जनं कुर्यान्मार्जयेद्दर्भ
मुष्टिना ॥ आचार्याय च तद्वस्त्रं दद्याद्धेनुकां च दक्षिणां ॥ मंत्रेणानेन विधि
वद्दक्षिणाभिमुखः शुचिः ॥ आधीराणां प्रवरो गस्यौलोपा मुद्रा पतिः प्रभुः
क्षौमवस्त्रप्रदानेन तुष्टः शोकं व्यपोहतु ॥ इति दानमंत्रः ॥ ब्राह्मणोभ्य स्तथा
न्येभ्यो दद्याच्छक्त्या च दक्षिणां ॥ ततश्नातः शुचिर्भूत्वा व स्त्रमास्योपयोभि
तः ॥ ब्राह्मणैर्बंधुभिः सार्द्धं भुंजीतातीव भक्तितः ॥ इति शोषहरक्षौमवस्त्रदा
नविधिः ॥ इति शोषहर हेतु प्रतीकारौ ॥ अथ वृद्धिरोगस्य हेतुं प्रतीकारं
च चाह ॥ तत्र स्नुषागामी वातवृषणः ॥ अस्य प्रायश्चित्तं ॥ आत्मजस्त्रि
यं संस्पृश्य स्नात्वा कृत्वा चांद्रायणं दद्याच्छुद्ध्येत् ॥ स्नानात्सौवर्णं दद्याच्छुद्धिः कुङ्कुमेन

॥६७१॥

यहृदिनं गत्वाऽग्निं प्रविश्य मृतः स्युश्चेत्॥ अपरं च॥ अपराधमंतरेण यो नृपो भृत्या
दीनां हस्तपादादीन् छेदयति तस्य मुष्कमग्निना दग्धमिव शिलाविद्धमिव सर्व
णं जायते॥ पश्चात् रुधिरं स्रवति सरुद्रसंहितामष्टोत्तरसहस्रं जपेत्॥ पतिचां
द्रायणं कुर्यात्॥ गां दद्यात्॥ इति वृषणव्याधिहेतुप्रतीकारौ॥ अथांत्ररोगस्य
हेतुं प्रतीकारं चाह॥ पूर्वजन्मनि वैश्यस्य हेतु रंत्राणि छिन्नानि भवंति तस्याशीत
ज्वरेऽनंतरमुष्णज्वरेऽपानदाहश्च भवति॥ तत्प्रतीकारार्थं च तत् ब्राह्मणभोज
नं उपलघलिपचं मधुतत्त्रयं जपेत्॥ यातेरोद्र इति सूक्तेन मधुघृताभ्यां ज
हुयात्॥ अथ महिषीप्रतिरूपं च दद्यात्॥ इति सोपद्रवांत्रपीडायां॥ किंच॥ प
स्त्रविघ्नकरो मर्त्यो जायते चांडवृद्धिमान्॥ वैश्यमितत्प्रतीकारं दानहोमादिकं

॥६७१॥

मेणा। कुर्यात्स्वर्णमयीं मूर्तिं शुभां नारायणस्य तु॥ व्यावहारिकनिष्काभ्यामेकेनापि
तदर्द्धतः॥ प्रक्षाल्य पंचगव्येन स्नापयेत्कुंकुमोपरि॥ श्वेतवस्त्रेण संवेष्ट्य गंगमाल्यैः
समर्चयेत्॥ उपचारैः षोडशभिराचार्यो वैष्णवः शुचिः सर्वशास्त्रार्थतत्वज्ञो भक्ति
विद्याप्रतिष्ठितः॥ होमं च कारयेत्तत्र प्रागग्न्यां दिशि शास्त्रतः॥ समिदाज्यतिलैश्चै
व मूलमंत्रेण संयुतं॥ आज्यं नारायणायेति तिलान्व्याहृतिभिर्हुयात्॥ रोगी तथा
र्चयेद्देवं नारायणमनामयं॥ मूलमंत्रेण विधिवन्नैवेद्यं चरुरिष्यते॥ नमोंतं नाम
सोंकारं मूलमंत्रः प्रकीर्तितः॥ ततस्तां प्रतिमां दद्यात्प्राङ्मुखायोदङ्मुखः॥ मंत्रे
णानेन विधिवद्भक्त्या परमया युतः॥ नारायण जगन्नाथ शंखचक्रगदाधर॥ पू
र्वजन्मनि यत्स्य विद्याद्यैर्हृतं मम॥ अनेन चंड्यमहारोगं दानेनानेन तोषितः

चक्रहस्तगदापाणेक्षमयाच्युजगत्पते ॥ दानमंत्रः ॥ एवंदत्वातुतंदेवंक्षमाप्यब्राह्मणां
ततः ॥ विप्राणांभोजनंदत्वात्स्नात्वाभुंजीतवाग्यतः ॥ एवंकृत्वासमाप्नोतिनिरोगत्वंनरो
भुवि ॥ आरोग्ययुक्तोनित्यंचसुचिरंसुखमेधते ॥ इतिनारायणदानविधिः ॥ इत्यंत्र
रोगहेतुप्रतीकारः ॥ अथगलगंडगंडमालाख्यचिरोगाणांहेतुप्रतीकारंचाह ॥ गुरुद्वेषी
परवित्तदुःखकारीगुरुस्त्रीगंडमालाव्याधिमांश्चजायते ॥ अपरंच ॥ ब्राह्मणंप्रताप्य
योध्यापयतिशिष्यश्चगुरुंवंचयित्वायोधीतेसगंडमालीभवति ॥ अस्यप्रायश्चित्त
मनुक्तनिष्कृतित्वात्चांद्रायणंकुर्यात ॥ अस्यशांतयेपुरुषसूक्तंऋषिछंदेदेवता
सहितमष्टोत्तरशतवारंजपेत ॥ एतच्चाधीतवेदब्राह्मणविषयं ॥ इतरविषयंतुकृ
च्छ्रचांद्रायणादिशतब्राह्मणभोजनंच ॥ अभक्ष्यभक्षीचैवं ॥ अत्रपूगदानम ॥ ८७२

यिकर्त्तव्यं ॥ इतिगलगंडादिहेतुप्रतीकारौ ॥ अथार्बुदरोगस्यहेतुंप्रतीकारंचाह ॥ पू
र्वजन्मनिविधवयासार्द्धंरममाणः स्त्यार्बुदवान्भवति ॥ सकृछ्रातिकृछ्रचांद्रायणा
न्यानिसमस्तानिव्यस्तानिवागुरुलघुभावोपेक्षयाकुर्यात ॥ सुवर्णदानंचदद्यात
विभवापेक्षयाब्राह्मणभोजनंचकुर्यात ॥ अथलोहदानंचकुर्यात ॥ इत्यर्बुदरोगहे
तुप्रकारौ ॥ अथश्लीपदरोगस्यहेतुंप्रतीकारंचाह ॥ स्वगोत्रस्यभिगामीश्लीपदी
भवति ॥ अस्यप्रपञ्चितार्थंचांद्रायणंमेकंपयोव्रतंवाकुर्यात ॥ तदंतेकस्येनसु
वर्णंदद्यात ॥ पंचाशद्ब्राह्मणभोजनंकुर्यात ॥ इतिश्लीपदरोगहेतुप्रतीकारौ ॥
अथविद्रधिरोगस्यहेतुंप्रतीकारंचाह ॥ विद्रधिःफलहर्त्तुःस्यात्प्राणिनोब्राह्म
णस्यच ॥ वक्ष्यामितत्प्रतीकारंदानहोमादितःपुनः ॥ यथाविभवतोवापिकु

॥८७३॥

कीद्दाम् तद्रं नरः ॥ स्निग्धं तथैव वक्षाखाभि सर्वतः संस्कृतं शुभं ॥ ध्येत वस्त्रेण संवेष्ट
फलैरपि सुकल्पितं ॥ गंधपुष्पैः समभ्यर्च्य तंदुलोपरि विन्यसेत् ॥ तं दृष्ट्वा नां परी
माणां द्रोणानां च चतुष्टयं ॥ तदर्द्धमथवा गृह्यं यथाविभवतो नरः ॥ आचार्यो यवि
नीतस्तु सर्वशास्त्रार्थतत्वजित् ॥ धर्मज्ञः सत्यवादी च कुलीनो लोकसंमतः ॥ आहू
य परया भक्त्या तेन पूजादिकारयेत् ॥ वनस्पते रक्षानयेत्येतया पूजनादिकं ॥ आग्ने
यां दिशि होमश्च समिदाज्यतिलैर्भवेत् ॥ तिलहोमो व्याहृतिभिरष्टोत्तरसहस्रकं ॥
यद्देना इति मंत्रेण आज्यहोम प्रशस्यते ॥ गृहशांतिश्च कर्तव्या गृह्योक्तविधिना
ततः ॥ कृत्वा च संस्रवान् पर्ण्वीपात्रेऽन्यस्मिन्निधापयेत् ॥ आग्नेरुत्तरतो भागे क
लशस्थापनं भवेत् ॥ ततः शुक्लांबरधरः शुक्लगंधानुलेपनः ॥ सौवर्णीमामू ॥८७३॥

वृक्षं तु प्रदद्यात् प्राङ्मुखोपतु || गंधर्वैश्च पूजिताय रोगी स्वयमुदङ्मुखः || आमूलं
ब्रह्मण्यस्सुखः सर्वप्राणिहिताय तु || वृक्षराणामादिभूतस्तु देवानां प्रीतिवर्द्धनः ||
फलचौर्येण पत्यापैवैरूप्यं पूर्वजन्मजिं || सौवर्णवृक्षदानेन तुष्टाः सर्वेपि देव
ताः || विद्रधिं मे शरीरोत्थं वाह्यमाभ्यंतरं तथा || विनाशयंतु सकलं स्वास्थ्यं कुर्वंतु
सर्वदा || दानमंत्रः || एवं कृत्वा तु तद्दानं मासाचाप्यर्पयाति भक्तितः || शनैःशनैः तपदं
गत्वा प्रणिपत्य विसर्जयेत् || अन्येभ्यो ब्राह्मणेभ्यश्च दद्याच्छक्त्या च दक्षिणां
ब्राह्मणान् भोजयित्वा तु स्वयं भुंजीत बंधुभिः || इति विद्रधिरोगे आमूतरुदानं
इति विद्रधिहेतुप्रतीकारौ || अथ व्रणरोगस्य हेतुं प्रतीकारं चाह || जलाग्न्युद्धंध
नादिनिमित्तेन योम्रीयेते स उदरव्रणी भवति || गोद्वयं दद्यात् || पंचाशद्ब्राह्मण

॥ ८७४ ॥

णभोजनंचकारयेत् ॥ दक्षिणांचदद्यात् ॥ तथाच ॥ अतिक्रोधादतिस्नेहाद्भयादपि
योधर्मीनिश्चयंजानन्नथाकुरुतेनरः ॥ सएवप्रोक्षितवहभ्रणीभवतिमानवः ॥ तच्छां
तयेत्तत्वकृच्छ्रंप्रकुर्यात् ॥ तिलप्रस्थदक्षस्यात् ॥ दशभिर्व्याहृतिसंख्याहुतिभिरष्टोत्तरं
सहस्रंजुहुयात् ॥ ब्राह्मणभोजनंचकारयेत् ॥ तथाचमहाफलतस्करःपादभ्रणी
भवति ॥ तथाचपक्षंडाखादिचवः ॥ श्रण्वनभुक्तेसपितोद्रेकोद्भणीभवतिसकृ
च्छ्रातिकृच्छ्रचांद्रायणानिकुर्यात् ॥ यथाविभवंतिलानदद्यात् ॥ सर्पिर्मधुयुतमष्टो
तरशतंजुहुयात्यमसूक्तेन ॥ किंचचतुर्द्दंतंवारणंस्वर्णमयंदद्यात् ॥ तत्प्रकारोप
था ॥ कारयेद्वारणंहैमंचतुर्द्दंतंचवारणं ॥ दंताःस्वर्णमयाःकार्य्यारत्नैकोर्प्यी-
र्णानाविधैर्युताः ॥ सर्वाभरणसंयुक्तंकरिणंचोपकल्पयेत् ॥ उपचारैःषोड ॥ ८७५

ग्मभिः सर्च्चयेत्पुष्पंगंधकैः ॥ ततो ब्राह्मणमाहूय सर्वशास्त्रार्थकोविदं ॥ भूतवृत्तो
पसंपन्नमनुद्वेगकरं नृणां ॥ भक्त्या संपूज्य वस्त्राद्यैर्होमं तेनैव कारयेत् ॥ मंत्रैः पौ
राणिकैस्तत्र संहिताशास्त्रकोविदैः ॥ चत्वारो दिग्गजा ये च पुष्पदंताद्यश्च ये ॥
सार्वभौमादयो ये च आहूत्वा तोषयामि तान् ॥ समिदाज्यतिलैर्होमो गजानां प्रीतये
भवेत् ॥ तस्मै हुतं च ते सम्यग्ब्राह्मणो प्रीत्यर्थमादितः ॥ मंत्रेणानेन विधिवद्याद्भक्ति
समन्वितः ॥ प्राङ्मुखः सव्रणीतेत्रोदङ्मुखो ब्राह्मणो भवेत् ॥ ऐरावणाभ्रतुदंतो
गजानां नायकः स्वयं ॥ दिग्दंतिनां पूज्यतमो व्रणान्क्षपयतु प्रभुः ॥ इति मंत्रः ॥ अनं
तरमनुग्रज्यतमाचार्यमुदान्वितः ॥ ब्राह्मणान्भोजयित्वा च स्वयं भुंजीत वाग्य
तः ॥ एवं कृते व्रणव्याधिस्तत्क्षणादेव नश्यति ॥ इति सर्वव्रणघ्नगजदानविधिः

परवृतमेदोकीलकज्वरी भवति ॥ सुवर्णं कृत्वा यसंदद्यात ॥ इति ज्वरव्याधिहेतुप्रती
कारौ ॥ अथ भगंदररोगस्य हेतुं प्रतीकारं चाह ॥ पूर्वजन्मनि राज्ञा धर्मनिष्ठया पीड
तो हितः प्रहितः सद्द्रव्यं गृहीत्वा यथा वर्द्धमते निष्पिनोति स भगंदररोगवान् भ
वति ॥ स हिरण्यं रत्नधान्यं वस्त्राणि भूमिं ब्राह्मणेभ्यो भोजनं च दद्यात ॥ ततो रोगा
न्मुक्तो भवति ॥ दुष्टव्रणानामप्येवमेव ॥ किंच ॥ आचार्यभार्यागमने भगंदरयुतो भ
वेत ॥ तत्प्रशांत्यर्थं नवरत्नदानं कर्त्तव्यं ॥ यथाह वृद्धगौतमः ॥ माणिक्यं पद्मरागं
च वज्रं वैदूर्यमेव च ॥ मौक्तिकं पुष्परागं च सम्यक् मरकतं तथा ॥ हरितं च नवैतानि
स्वर्णपात्रे परिन्यसेत ॥ अथवा राजते ताम्रे गृहान् मंत्रैः प्रपूजयेत ॥ स्वलिंगैर्वै
दमंत्रैश्च होमः कार्यश्च पूर्ववत ॥ पूर्ववदिति गृहयज्ञोक्तमार्गेणेत्यर्थः ॥ ततो ॥

ब्राह्मणमाहूय सर्वशास्त्रार्थकोविदं ॥ संपूज्य विधिवत्तस्मै दद्याद्रत्नानि मंत्रतः ॥
आदित्यादिग्रहाः सर्वे नवरत्नप्रदानतः ॥ चिन्ताश्चयंतु मे दुःखं क्षिप्रमेव भगंदरं
अनेन कर्मणा सम्यक् यथावद्विहिते न तु नरो नैरुज्यमाप्नोति निःसंदिग्धं भगंद
री ॥ इति भगंदरहेतुप्रतीकारौ ॥ अथोपदंशरोगस्य हेतुं प्रतीकारं चाह ॥ यः पूर्वमात्त
गामी भवति तस्य लिंगं विनश्यति ॥ तस्मायश्चितार्थं धनदप्रतिमादानं कुर्यात् ॥
तद्विधिर्यथा ॥ उत्तरस्यां दिशि तत्र स्वर्णकुम्भमास्य विभक्तं लिंगं स्थापयित्वा तस्यो
परि कांस्यपात्रे सुवर्णनिष्कनिर्मितां नरवाहनप्रतिमां स्थाप्य पुरुषसूक्तेन पूज
यित्वा अर्घ्यं चैशान्यां वेदविद्ब्राह्मणमाहूय वस्त्रांगुलीयादिभिः पूजयित्वा तस्मै
धनदप्रतिरूपं दद्यात् ॥ तत्र मंत्रः ॥ निधीनामधिपो देवः शंकरस्य प्रियः सखा

॥ ८७ ही ॥

सौम्यां श्वाधिपतिः स्वामी मम पापं व्यपोहतु ॥ इति मंत्रः ॥ एवं कृते लिंगनाशरोगादि मु
च्यते ॥ एवमेव कृष्णकरोगे इत्यकपदं शाण्डुकरोगहेतुप्रतीकारौ ॥ अथ कुष्टरोगस्य हेतुं
प्रतीकारं चाह ॥ यो नरो जंतून्नास्ति स कुष्टरोगी भवति ॥ स सांतपनं कुर्यात ॥ ब्रह्महा
रीचस्वेत कुष्टी भवति ॥ तच्छांतये स्वर्णदानं कार्यं सांतपनमपि कार्यं ॥ अन्नायदं
डकाग्नीरीमुखकुष्टी भवति ॥ असौ कृच्छ्रातिकृच्छ्रचांद्रायणं कुर्यात ॥ किंच ब्रह्मन्न
स्त्रीसज्जनवधापरस्वहरणादिभिः ॥ कर्मभिः पापरोगस्य प्रादुः कुष्टस्य संभवं
अथ तच्छांतये वृषदानमुच्यते ॥ अथ कुष्टहरं वक्ष्ये वृषदानमनुत्तमं ॥ यत्कार्यं
कुष्टरोगार्त्तैः शरीरसुखकारकं ॥ पलैः त्रिभिः प्रकुर्वीत द्वाभ्यामेकेन वा पुनः
जातं वृषभं शुभ्रं हेमशृंगखुरं शुभं ॥ महेश्वरेणो मयाचकुर्वीत तमधिवि

८७ दे

ते ॥ सौवर्णे प्रतिमे द्वे तु पूर्वोक्तेन क्रमेण तु ॥ यथाविभवमानेन वित्तशाठ्यं न कारये-
त् ॥ पलाष्टके कांस्यपात्रे स्थापयेत्तं विचक्षणः ॥ श्वेतपुष्पैः रक्तैस्तैश्चार्चयेत वस्त्रै-
रलंकृतं ॥ ब्राह्मणं वेदसंपन्नं सदाचारं संयतेंद्रियं ॥ सपत्नास्त्वप्रवक्तारं प्रतिग्र-
हपराङ्मुखं ॥ दांतं कुलीनं धर्मज्ञमनुद्वेगकरं नृणां ॥ क्रोधलोभविहीनं च सर्व-
शास्त्रार्थकोविदं ॥ गृहमाहूय भक्त्या तं यथाविधि समर्चयेत् ॥ केयूरैः कटकैर्वस्त्रै-
र्माल्यैश्चैवांगुलीयकैः ॥ होमं च पूर्ववत्कार्यं मंत्रैर्माहेश्वरैस्तथा ॥ उदङ्मुखो-
पविष्टाय महादेवस्य सन्निधौ ॥ प्राङ्मुखो व्याधितो दद्यान्मंत्रेणानेन धर्मतः
अष्टमूर्त्ते महेशान कृपया वृषभध्वज ॥ ष्चेतमौदुंबरं सर्वमनया चार्चयेत मे यच्च
द्विदोषजनितं यच्च मंडतान्यथवा पुनः ॥ सर्वकर्मविपाकोत्थं पार्वतीनाथ स

८७

र्वगं कुष्ठहा भवसर्वैश्वरक्षमां पर्वती पते ॥ इति कुष्ठहरो रोप्यवृषभदानविधिः ॥ वि
प्रो ग्यांतरमपि ॥ ब्रह्महा नरकस्यांते पांडुकुष्ठी प्रजायते ॥ प्रायश्चित्तं प्रकुर्वीत यथोक्त
मृषिभिः पुरा ॥ अथ पापमाह हेतु प्रतीकाराश्चाह ॥ यः पूर्वजन्मनि परविषमनुलोप
यति स पापमाचान् भवति ॥ तस्यांगे श्वेतरोगितं पूर्वं पंचगव्यं वति स उपवासत्रयं कृत्वा
पंचाशद्द्विजेभ्यो यथेप्सितं भोजनं दद्यात् ॥ अत्र व्याधेर्गुरुलघुभावो दृश्यव्यः
प्रकारांतरमपि ॥ यः तस्करण मधुक्रकृष्णाजिनमहादानादि कुरुक्षेत्र विप्रोद्दे
श्रो गुरुहरणादि विप्रोपकालेषु निषिद्धदानम्यः प्रतिगृह्णाति स च यमपात्री
भूतो स जन्मांतरे पापात्माकं दूष्यं पीड्यमानः कासी श्वासी कृमिकुक्षिश्च भवति
तदुपशांतये यथोक्तविधानं महिषीं दद्यात् ॥ चित्रशाठ्यं विवर्जयेत् ॥ पुरुष

८७

सूक्तं सहस्रनाम स्तोत्रं उद्यल्लक्ष्मीमित्यर्चं च जपेत् ॥ चतुर्घताभ्यां अष्टोत्तराभ्यां तं संख्या
कं जुहुयात् ॥ पंचाशद्ब्राह्मणभोजनं वा कारयेत् ॥ रक्तवासांसि दद्यात् सहस्रकलसस्ना
नं नामत्रयस्य अष्टोत्तरायुतजपं वा कुर्यात् ॥ इति पामाहेतुप्रतीकाराः ॥ अथ दद्रुवि
चर्चिकादीनां हेतुप्रतीकाराश्चाह ॥ सुवर्णापहारी कुनखी दद्रुणो वा जायते ॥ अगम्य
त्सादीमंडलकुष्ठी कच्छ्वनदाही वा दद्रुणः ॥ किंच ॥ ब्राह्मणानां नेत्रयोर्हन्ता दद्रुरोगी
भवेत्तु सः ॥ तस्योपशमनं वक्ष्ये सुवर्णेनतु कारयेत् ॥ पलेन वा तदर्द्धेन तदर्द्धेनाथ
वा पुनः ॥ उमामहेश्वरं रूपं वृषभे रणप्रतिष्ठितं ॥ चतुर्भुजं च द्विभुजामुमां कुर्याद्द्विच
क्षणाः ॥ एकवक्त्रो भवच्छंभुस्त्रिनेत्रश्च महाभुजः ॥ अक्षमालां त्रिशूलं च तस्य द
क्षिणहस्तयोः ॥ देवी पद्मे मतस्यैको वरदश्चाकरः परः ॥ वामोत्संगगता देवी प्रि

अथ गुलाब ॥ रक्तपुष्पो वृहत्पुष्पो महाकंटो तिमंजुलः ॥ रक्तपुष्पस्त्रिदोषघ्नो हंति वह्निकजं विषं

८१८ ॥ वृषपदैकपालिका ॥ वृषभोप्यग्रतः कार्यो घंटयालंकृतस्तदा ॥ स्वशक्त्या वित्तशाठ्यं तु कु

र्वतो निःफलं भवेत् ॥ तत्राप्यारोप्य देवेशं पुत्रमयासहितं प्रभुं ॥ वस्त्रमाल्यैस्तथा गंधैर्मू

लमंत्रेण पूजयेत् ॥ ततो ब्राह्मणमाहूय दरिद्रं धर्मकोविदं ॥ अतएवैतोपसेयनलंशांतं

चैवात्मवेदिनं ॥ वस्त्रांगुलीयकैस्तस्यं कृस्नात्मजेनवा ॥ हेनावस्थांक्षिप्त्वा समीपतः

आयुर्वेदाब्धिसारस्य योग्रंथो यं रचितो बहून् भावप्रकाशप्रभृतीन् ग्रंथानालो

क्य यत्नतः ॥ अस्मिन् कटाक्षविक्षेपं वैद्याः कुर्वंतु कोविदाः ॥ ग्रंथस्य क्रियाप्रवीणा

ये वैद्यास्तदुपयोग्यसौ ॥ संग्रहो मत्कृतो मूढवैद्यानां त्राधिकारिणः ॥ सर्वेषां ग्रं

थकर्तॄणां लेखको हं न कस्यकः ॥ स्वपयोधाय रचितो मयायं संग्रहः शुभः ॥ २ ॥ ८१८

मघासितमुनिभूमिसंमितेशालिवाहनशाकेशरद्यृतौ ॥ एषक्षुल्लकदत्तद्विजातिपौत्रेणैनौ
संगृहश्चरमवर्णतांगतः ॥ इत्यायुर्वेदाब्धिसारः समाप्तः ॥ ॥ अथ तमालनाम
गुणाः ॥ धूम्रपत्रो धूम्रवृक्षश्च वहल्पत्रश्च धूसरः ॥ तमाखुर्गुच्छफलको धूम्रयं
त्रदर्शकः ॥ बहुबीजो बहुफलाः सूक्ष्मबीजस्तु दीर्घकः ॥ दीर्घपाटलवर्णोंतु पुष्पंत
स्य प्रकीर्तितं ॥ २ तस्य पत्रं तु तीक्ष्णोष्णं कफवातहरं परं ॥ श्वासकासहरं चैव क्रो
ष्ठवातहरं तथा ॥ ३ ॥ तस्यैव धूम्रपानेन विशेषाद्दीपिष्णुकं हृतं ॥ देशांतरप्रले
दे न तीक्ष्णां चातीव्रपित्तलं ॥ ४ वमनस्य प्रभावेन वृश्चिकादिविषं हरेत् ॥ रेच
नं त्वाहरेद्वातं श्लेष्माणं चाधिगच्छति ॥ ५ वज्रभंगीकटुस्मांजनगुडमिश्रिता
धूम्रपाने प्रशस्ता श्वासं हिक्कां पवनकफकृतान्हंति रोगानशेषान् गु-

२७ छी

स्मद्धीहृत्कृमिघ्नापवनकफरुजोहंतिसामंचशूलं ॥ हिक्काकव्यामयक्ष्मिजनि
तंपीनसंनस्ययोगात ॥ अथताम्रभस्म ॥ पक्कानुवीपत्राण्पानीतद्रसेनता
तस्यभावना ॥ दत्वामूषिकायांनिक्षिप्य ममम लकर्षटंकत्वापंचगोमयान्य
धोनिक्षिप्यउपरिधान्यतुषंनिक्षिप्यतन्मध्येमूषिकांस्थाप्यउपरिदशगो
मयानिनिक्षिप्यअन्याल:कर्तव्य:भस्मभवतिगोरीपाषाणस्याप्येवमेवभस्म
भवति ॥ समाप्तम ॥ संवत ॥ १९५४ ॥ मार्गशीर्ष ॥ मासेशुक्ल ॥ पक्षेतिथ ॥
म्यां ॥ धार रविवासरे ॥ लिखितं ॥ त्रिपाठी ॥ महासुख ॥ प्रसाद ॥ राम ॥ ॥

॥ आयुर्वेदाब्धिसार सेवाराम वैद्य का है ॥

२७६ ८

[OrderDescription]
,CREATED=18.10.19 16:16
,TRANSFERRED=2019/10/18 at 16:57:54
,PAGES=325
,TYPE=STD
,NAME=S0002073
,Book Name=618A
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF

FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF

FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF

FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF

FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF

FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF

FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF

FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF

FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF

FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF

FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF

FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF

FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF
,FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF

FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF
,FILE311=00000311.TIF

FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,